1. निर्णयसिन्धु पत्र - 320 सम्पूर्ण
तृतीयपरिच्छेद तक

1382

13"x5.50"

कुंभेऽर्के देवपूज्ये यदि धनुषि गते शीतगो कर्कनस्थे पुष्यार्के फाल्गुने मास्यथ शुभदे शुक्लपक्षे चेत्स्यान्नागपातिरेकादिह जलधितटे द्वादशीति स्मृतीयं गोविंदद्वादशीयं कलिकलुषहरा मुक्तिसायुज्यदात्री ॥१॥
यजनं याजनं चैव स्वाध्यायाध्यापने तथा। दानं प्रतिग्रहं चैव षडेव कर्माण्यग्रजन्मनः ॥१॥
भाद्रशुक्लतृतीया हरितालिकेत्युच्यते ॥ सा मुहूर्त्तमात्रापि परयुता ग्राह्या ॥ तदाह माधवः ॥
मुहूर्त्तमात्रसत्त्वेपि दिने गौरीव्रतं परे ॥ शुद्धाधिकायामप्येवं गणयोगप्रशंसनात् ॥१॥
चतुर्थीयुक्तायां तु फलाधिक्यमाह माधवीये ॥ आपस्तंबः ॥ चतुर्थीसहितायां तु सा तृतीया फलप्रदा ॥ अवैधव्यकरी स्त्रीणां पुत्रपौत्रप्रवर्द्धिनी इति ॥ द्वितीयायोगे प्रत्यवायमाह स एव ॥ द्वितीयाशेषसंयुक्तायां या करोति विमोहिता ॥ सा वैधव्यमवाप्नोति प्रवदंति मनीषिण इति ॥ इति तृतीयानिर्णयः ॥ भाद्रशुक्लचतुर्दश्यामनंतव्रतम् ॥ तत्रोदयव्यापिनी ग्राह्या ॥ तथा भाद्रपदस्यांते चतुर्दश्यां द्विजोत्तम ॥ पौर्णमास्याः समायोगे व्रतं चानंतकं चरेदिति गोविंदार्णवे भविष्योक्तेः ॥ मुहूर्त्तमपि चेद्भाद्रे पौर्णमास्यां चतुर्दशी ॥ संपूर्णां तां विदुस्तस्यां पूजयेद्विष्णुमव्ययमिति स्कांदादिति अनंतव्रतनिर्णयः ॥
अविधदाहेतुलक्षः अविधौ तु क्रियालुप्ता क्रियालुप्ते तु नार्घिकीति वचनात्पुनः संस्कारमर्हति १ यदा चापे जीवे भवति दिनरत्नोदिनमणिर्यदा तारानाथः स्वभवनगतः फाल्गुने मासि यदार्को द्वादश्यां भवति शोभनयुते तदा गोविंदाख्या हरिदिवसमस्यां क्षितितले १

१ श्रीगणेशायनमः कारुण्यैकनिकेतं रामंसीतालतायुक्तंविश्वामित्रान्ववायजततिसमालंवशाखिनंवंदे १
लक्ष्मीसहायंकल्पद्रुतलरंजितगोकुलं वर्हापीडंघनश्यामंमहःकिंचिदुपास्महे २ वेदार्थधर्मरक्षायैमायामा
नुषरूपिणं पितामहंहरिंवंदेभट्टनारायणाह्वयं ३ यत्पादसंस्मृतिःसर्वमंगलप्रतिभूर्मता तान्भट्टरामकृष्णा
ख्यान्श्रीतातचरणान्नुमः ४ सर्वकल्याणसंदोहनिदानंयत्पदद्वयं धुनदीशोदरीमेवामुमाख्यांनौमिसादरं ५
विदुमाधवपादाब्जरोलंवीकृतविग्रहं ज्यायांसंभ्रातरंभट्टदिवाकरमुपास्महे ६ हेमाद्रिमाधवमतेप्रविचार्यसम्यगा
६ तीर्थशास्त्रम् लोच्यतत्वमथतीर्थकृतांपरेषां श्रीरामकृष्णतनयःकमलाकराख्यःकालंयथामतिविनिर्णयमातनोति संतियद्य
पिविद्वांसस्तन्निबंधाश्चकोटिशः तथाप्यमुंसुधीवेदंगंधींकेचिद्विज्ञातुमीशते तत्रसंक्षेपतःकालःषोढा अब्दोयन
मृतुर्मासःपक्षोदिवसइति तत्राब्दोमाधवमतेपंचधा सावनःसौरश्चांद्रोनाक्षत्रोवार्हस्पत्यइति गुरोर्मध्यमराशिभो
गेनवार्हस्पत्यः सचज्योतिःशास्त्रेप्रसिद्धः हेमाद्रिस्त्वंत्ययोर्धर्मशास्त्रेनुपयोगात्त्रिस्त्रएवविधाइत्याह तत्रवक्ष्यमा

सावनादिसंज्ञं १

रोः सावनादि द्वादशमासैस्तत्तद्वर्षं मलमासेतुसति षष्ठ्यदि नात्मक एकोमासइतिद्वादशमासत्वमविरुद्धं तथाचव्या
सः षष्ठ्यातुदिवसैर्मासः कथितोवादरायणोरिति तत्रचांद्रोब्दः षष्ठिभेदः तदाहगार्ग्यः नारदश्च प्रभवोविभवः
शुक्लः प्रमोदोथप्रजापतिः अंगिराःश्रीमुखोभावोयुवाधातेश्वरस्तथा बहुधान्यःप्रमाथीच विक्रमोथवृषस्तथा
चित्रभानुःसुभानुश्चतारणःपार्थिवोव्ययः सर्वजित्सर्वधारीचविरोधीविकृतःखरः नंदनोविजयश्चैवजयोमन्म
थदुर्मुखौ हेमलंबोविलंबोथ विकारीसार्वरीप्लवः शुभकृच्छोभनःक्रोधीविश्वावसुपराभवौ प्लवंगःकीलकःसौ
म्यः साधारणोविरोधकृत् परिधावीप्रमादीच आनंदोराक्षसोनलः पिंगलःकालयुक्तश्च सिद्धार्थीरौद्रदुर्मती दुं
दुभीरुधिरोद्गारीरक्ताक्षःक्रोधनःक्षयइति यद्यपिज्योतिषे गुरोर्मध्यमराशिभोगेनप्रभवादीनांमासाब्दोप्र
वृत्तिरुक्ता तथापिप्रभवादीनांचांद्रत्वमप्यस्तिचांद्राणांप्रभवादीनांपंचकेपंचकेयुगेइतिमाधवोक्तेः तेनचांद्रःप्र
भवादिश्चैत्रसितप्रवर्त्ततेवार्हस्पत्यस्तुमासाब्दे तयोर्विनियोगोज्योतिर्निबंधेब्रह्मसिद्धांते व्यावहारिकसंज्ञायंका
प्रतिपदमारभ्य २

संवत्सरपरिवत्सरेदावत्सरेद्वत्सरवत्सरइतिप्रतिपंचकमेकैकाद्वस्मृ

संकल्पवाक्येयाकालांगस्मृतिस्तदादिकर्मसु १ वार्हस्पत्यः १

लः स्मार्तादिकर्मसु योज्यः सर्वत्र तत्रापि जैवोवानर्मदोत्तरे तत्र आर्द्धिषेणाः स्मरेत्सर्वत्रकर्मादौ चांद्रसंवत्स

२ रंसदा नान्यं यस्मात्वत्सरादौ (तु चैत्रे) प्रवृत्तिस्तस्यकीर्तितेति अयनंतुसौरर्त्तुत्रयात्मकंसौरर्त्तुत्रितयंप्रदिष्टमयनमि

तिदीपिकोक्तेः तद्द्विविधं दक्षि(णो)मुत्तरंचेति कर्कसंक्रांतिर्दक्षिणं मकरेंत्यं अनयोर्विनियोगमाह मदनरत्ने स

त्यव्रतः देवतारामवाप्यादिप्रतिष्ठां दक्षुरेवरवौ दक्षिणासामुखेकुर्वन्नतत्फलमवाप्नुयात् वैखानसः मात्

भैरववाराहनरसिंहत्रिविक्रमाः महिषासुरहंत्र्यश्चस्थाप्यावैदक्षिणायने वैशब्दोप्यर्थे नतुदक्षिणायनएवेतुनि

यमः पूर्ववचनेदक्षिणायनेनिषिद्धायादेवप्रतिष्ठायादेवविशेषेप्रतिप्रसवमात्रात् रत्नमालायां गृहप्रवेशत्रिदशप्रति

ष्ठाविवाहचौलव्रतवंधपूर्वं सौम्यायनेकर्मशुभंविधेयंयद्गर्हितंतत्खलुदक्षिणेचेति अस्यापवादः काशीखंडे स

दाकृतयुगंचास्तुसदाचास्तूत्तरायणं सदामहोदयश्चास्तुकाश्यांनिवसतांसतां इत्ययनं ऋतुर्मासद्वयात्मा मल

मासेतुमासद्वयात्मकएकोमासस्तेनमासद्वयात्मकत्वमविरुद्धं सद्वेधा चांद्रःसौरश्च चैत्रारंभोवसंतादिश्चांद्रः मीना

अभिचारादि ३

भुक्तान्तादिना
भुक्तेऽभावेसौरस्तु २

रंभोमेषारंभोवासौरः मीनमेषयोर्मेषवृषयोर्वावसंतइतिबौधायनोक्तेः अनयोर्विनियोगमाहत्रिकांडमंडनः
श्रौतस्मार्त्तक्रियाःसर्वाःकुर्य्याच्चांद्रमसर्त्तुषु इतिज्योतिर्विदांमतं सद्भिविधोपिषोढा वसंतोग्रीष्मोवर्षाःशरद्धेमंतः
शिशिरइति इतिऋतुः मासश्चतुर्धा सावनःसौरश्चांद्रोनाक्षत्रइति त्रिंशद्दिनःसावनः अर्कसंक्रांतेःसंक्रांत्यवधिः
सौरः यद्यपिहेमाद्रिमाधवकालादर्शाद्यालोचनेनमेषसंक्रांत्यसमाप्तावेकामावास्यकत्वंचैत्रत्वमितिलक्षणाच्चमे
षसंक्रांतेश्चैत्रत्वंप्रतीयतेतथापिमेषसंक्रमेदर्शद्वयेसतिवैशाखस्यैवाधिक्यात्तत्पूर्वभावितेनमीनस्यैवचैत्रत्वंयुक्तं
एवंमेरवादयोवैशाखाद्याःसौरमासप्रसंगात्संक्रांतिनिर्णयउच्यते तत्रपूर्वतोपिपरतोपिसंक्रमात्पुण्यकालघटिका
स्तुषोडशेतिसामान्यतःपुण्यकालःसर्वैरुक्तः विशेषस्तूच्यते अत्रमामकाःसंग्रहश्लोकाः प्रागूर्ध्वंदशपूर्वतःषड
वानिस्तद्धत्परतःपुनस्थोपुण्यांस्तुमेषादितः अस्यार्थः मेषेप्रागूर्ध्वंचदशघटिकाःपुण्यकालः वृषेपूर्वाःषोडश
मिथुनेपरतःषोडश कर्कपूर्वास्त्रिंशत् सिंहेपूर्वाःषोडश कन्यायांपरतःषोडश तुलायांप्रागूर्ध्वंचदशवृश्चिकेपूर्वाःषो
डशधनेपरतःषोडशमकरेपूर्वास्त्रिंशत्कुंभेपूर्वाःषोडशमीनेपरतःषोडश

पूर्वेनत्रिंशत्षोडशपूर्वतोऽर्धेपरतःपूर्वापरेःस्युर्दश॥पूर्वाःषोडशचोत्तराःऋतुमुखेःपश्चाच्चवेदाःपुनःपूर्वाःषोडशचोत्तराः २

तुलायां वृश्चिके धने मकरे कुंभे मीने
पूर्वाश्चापराश्च

उभयत्ररात्रेःपरित्याज्यत्वात् ३ पूर्वदिनांत्ययामद्वयमुत्तरदिनाद्ययामद्वयं चेत्यर्थः ४ केचित् १ सर्वपुण्यकाला २ मकरे १ पूर्वा २

ष्टा धनुषिपराःषोडशमकरेचत्वारिंशत्पराः इदंचहेमाद्रिमतेनोक्तंमाधवमतेत्वत्रपराविंशतिःपुरायाः कुंभे

संक्रांतिः

२ पूर्वाःषोडशमीनेपराःषोडशेति याप्युत्तरापुण्यतमामयोक्तासायंभवेत्सायदिसापिपूर्वातुयोक्तायदिसाविभा

तेसाप्युत्तरारात्रिनिषेधतःस्यात् अर्वाङ्निशीथाद्यदिसंक्रमःस्यात्पूर्वेन्हिपुण्यंपरतःपरेन्हि आसन्नयाम[illegible]

संक्रमणासमयस्य

द्वयमेवपुण्यंयानिशीथमध्येतुदिनद्वयंस्यात् कर्के[illegible]षेप्येवमितिह्युवाचहेमाद्रिसूरिश्चतथापरार्कः [illegible]षःप्रदो

मकरे मतांतरमाह

षेयदिवार्द्धरात्रेपरेन्हिपुण्यंत्वथकर्कटश्चेत् प्रभातकालेयदिवानिशीथेपूर्वेन्हिपुण्यंपठितिमाधवार्यः अत्रमू

लवचनानिमाधवापरार्कहेमाद्र्यादिषुद्रष्टव्यानि सर्वासुसंक्रांतिदानविशेषोहेमाद्रौदानकांडउक्तः विश्वा

मित्रः मेषसंक्रमणेभानोर्मेषदानंमहाफलं वृषसंक्रमणेदानंगवांप्रोक्तंतथैवच वस्त्रान्नपानदानानिमिथु

नेविहितानितु घृतधेनुप्रदानंचकर्कटेपिविशिष्यते ससुवर्णंछत्रदानंसिंहेपिविहितंसदा कन्याप्रवेशेवस्त्राणां

वेश्मनांदानमेवच तुलाप्रवेशेतिलानांगोरसानामपीष्यते अन्नकीचलितेभानोर्दीपदानंमहाफलं [illegible]

वृश्चिकगते १

मकरे विकल्पः विष्णुपदादयः पंचकयुगे ३ वस्तुतस्तु संक्रांतिपक्षिणी ज्ञेया

समरात्रिंदिवे काले विषुवद्विषुवं च तत् तत्र तुलासंक्रमणं मेषसंक्रमणं च तस्मिन् २ एकोपावरणपक्षे विशेषमाह ४ अयनविषुवत्प्रवेशदिना सर्वं २

श्चिकः धनुःप्रवेशे वस्त्राणां यानानां च महाफलं १० मृगप्रवेशे दारूणां दानमग्नेस्तथैव च कुंभप्रवेशे दानं तु गवामंबु
तृणस्य च मीनप्रवेशे स्यान्नानां माल्यानामपि चोत्तममिति अत्रोपवासमाह हेमाद्रावापस्तंबः अयने विषुवे चैव त्रि २ अयनप्रवेश
रात्रोपोषितो नरः स्नात्वा यस्त्वर्चयेद्भानुं सर्वकामफलं लभेत् अशक्तौ तु वृद्धवसिष्ठः अयने संक्रमे चैव ग्रहणे
चंद्रसूर्ययोः अहोरात्रोषितो यितः स्नात्वा सर्वपापैः प्रमुच्यते अत्रोपवासः संक्रांतिदिने दानानि तु पुण्यकालदि
ने इत्याचार्यचूडामणिः विधिलाघवात्पुण्यकालदिन एवोभयमिति वृद्धाः इदं च पुत्रिगृहस्थातिरिक्तविषयं आदित्ये
ऽहनि संक्रांतौ ग्रहणे चंद्रसूर्ययोः उपवासो न कर्तव्यः पुत्रिणा गृहिणा तथेति जैमिनिवचनात् अत्र श्राद्धमुक्तं हेमाद्रौ विष्णु
धर्मे श्राद्धं संक्रमणे भानोः प्रसीसत्पृथिवीपते अपरार्केपि विष्णुः आदित्यसंक्रमणे विशेषेणायनद्वयं जन्मर्क्षमभ्युदय उत्रोत्पत्यादिः ३
श्च एतांस्तु श्राद्धकालान्वै काम्यानाह प्रजापतिरिति द्वादशदिनैरर्वागयनांशप्रवृत्तावपि पुण्यं वक्तुमयनग्रहणं अन्य
था संक्रमेणासिद्धेयनग्रहणं व्यर्थं स्यादित्यपरार्कः हेमाद्रावपि गालवः अयनांशकतुल्येन कालेनैव स्फुटं भवेत् म

अयनांशप्रवृत्तिसमये द्वादशदिनात्मकेपि २
अयनात्प्राग् द्वादशदिनानामपि पुण्यतां वक्तुं म २
अयने चांशकेन तत्तुल्येन कालेनैव पुण्यत्वं स्फुटं भवति यथा ऽयनं पुण्यं तथायनांशोपीत्यर्थः १
अंशस्याप्ययनतुल्येन

मेषेऽयनं गमनम् २

मकरायनांशेऽत्यर्थः ४ याम्यं चोदक् च याम्योदक् तस्मिन् तदयनं च तस्मिन् १ विष्णुपदम् ५ अयनांशेऽपि २ १ यदा ह्ययनांशगोत्वच्यवते तदा संक्रमते रश्मितरस्मर्याः संज्ञाः १

गककीदिगे सूर्ये याम्योदगयने सति तदा संक्रांतिकेले स्युरुक्ता विष्णुपदादय इति अयनांशच्युतिरूपे संक्रांतिकाले वि
ष्णुपदादयः प्रवर्त्तंते ते न तत्प्रयुक्तपुण्यकालादिः तत्रांशेऽपि ज्ञेयमिति स एव व्याचख्यौ तत्र मेषायनं वृषायनमित्यादि
सर्वत्र ज्ञेयं माधवीयेऽपि जाबालिः संक्रांतिषु यथाकालस्तथा पुण्येऽप्ययने तथा अयने विंशतिः पूर्वा मकरे विंशतिः परे
ति मकरायणे पूर्वा विंशतिर्घटिकाः पुण्याः मकरसंक्रांतौ तु पश्चाद्विंशतिघटिकाः पुण्याः अन्यत्रायने तत्संक्रांतिव
दित्यर्थः विष्णुपदादिस्वरूपं च दीपिकायामुक्तं हर्यैहि वृषसिंहवृश्चिकघटेष्वर्कस्य यः संक्रमः कार्यामीनधनुर्द्वयु नृयुग्मिथुनं ५
षडशीतिमुखं तु षडशीत्यास्यं तुलामेषयोः प्रोक्तं तद्विषुवं मृगे अयनमुदक् कर्कटके दक्षिणमिति हर्यैहि विष्णुपदं नृयुग्मिथुनं अत्र चापिं
डरहितं श्राद्धं कुर्यात् तथा चापरार्के मात्स्ये अयने द्वितये श्राद्धं विषुवद्द्वितये तथा संक्रांतिषु च सर्वासु पिंडनिर्वपणाहते इ
ति श्राद्धमूलपाणिस्त्वस्य निर्मूलत्वात् समूलत्वेऽपि ततः प्रभृति संक्रांतावुपरागादिपर्वसु त्रिपिंडमाचरेत् श्राद्धमेकोद्दिष्टं मृता
हनीति मात्स्योक्ते र्ग्रहणाग्रहणवद्विकल्प एवेत्याह तन्न अस्य पार्वणविधायकत्वेन पिंडाविधायकत्वात् पिंडाव्यक्तिः

अतिरात्रे षोडशिनं गृह्णाति। नातिरात्रे षोडशिनं गृह्णाति। तत्र सोमरसपानपात्रं षोडशी तु च्यते लक्षणया षोडशीशब्देन स्तोत्रविशेषः सोमपात्रस्यादानकाले
पठ्यत इतीदमपि तत्सांज्ञम्। अत्र यथा विधिनिषेधाभ्यां विकल्पस्तथेत्यर्थः १ पार्वणविधानं च पिंडदानाभावेऽपि संगच्छते तत्र यः पिंडादेया यत्र तत्त्रिपिंडमित्यर्थात् १

सकृत्स्वरितः श्रद्धः सकृदर्थं गमयती निन्यायेनैकार्थबोधनीये त्रिपिंडमित्येकशब्देनशास्त्रपिंडानुवादस्त्रित्वविधिश्चेत्यर्थद्वयेवैरूप्यं विरुद्धरूपत्वं तस्मात् १
पुरोडाशस्य प्रथमो भक्षो होतुरिति वाक्ये भक्षानुवादेशाद्यम्याविधाने च वैरूप्यमित्याशाद्यम्याविशिष्टभक्षरागनिधीयते तस्य वैसंक्रांतिषु पिण्डरहितमेव श्राद्धमित्यर्थः १

अन्यथैकपदे पिंडानुवादे त्रित्वविधौ च वषट्कर्तुः प्रथमभक्षवद्वैरूप्यापत्तेः मंगलकृत्येषु विशेषमाह ज्योतिर्निबं
धे नारदः त्याज्याः सूर्यस्य संक्रांतेः पूर्वतः परतस्तथा विवाहादिषु कार्येषु नाड्यः षोडश षोडश एतत्पुण्यकालोपल
क्षणं भानोः संक्रांतिभोगश्च कुलिकश्चार्द्धयामिक इति ज्योतिःप्रकाशे वर्ज्येषु परिगणनात् अयनव्यतिरिक्तासु
दससं संक्रांतिषु रात्रौ स्नानश्राद्धादिनकार्यं अन्हि संक्रमणे पुण्यमहः कृत्स्नं प्रकीर्तितं रात्रौ संक्रमणे भानोर्दिनार्द्धं
स्नानदानयोः अर्द्धरात्रादधस्तस्मिन्मध्यान्हस्योपरि क्रिया ऊर्द्ध्वं संक्रमणे चोर्द्ध्वमुदयात्प्रहरद्वयं पूर्णे चेदर्द्धरा
त्रे तु यदा संक्रमते रविः प्राहुर्दिनद्वयं पुण्यं मुक्त्वा मकरकर्कटौ वितिवृद्धवशिष्ठादिवचनैरहः पुण्यत्वात्तया रात्रौ संक्र
मणे भानोर्दिवा कुर्यात्तु तत्क्रियां पूर्वस्मात्परतो वापि प्रत्यासन्नस्य तत्फलमिति वशिष्ठवचनाच्चार्थाद्रात्रौ स्नाना
दिनिषेधप्रतीतेः यानि तु विवाहव्रतसंक्रांतिप्रतिष्ठाकतुजन्मसु तथोपरागपातादौ स्नाने दाने निशा शुभेति राहुद
र्शनसंक्रांतिविवाहात्ययपवृद्धिषु स्नानदानादिकं कुर्युर्निशि काम्यव्रतेषु चेत्यादिनि विष्णुगोभिलादिवचनानि तानि

आद्धादिनकार्य्य
मिति रवैरगाद्व
प: २

५

मकरकर्कसंक्रांतिविषयाणि मुक्त्वा मकरकर्कटावितितयोर्दिवानुष्ठानस्य पर्युदस्तत्वादिति हेमाद्रिमाधवादयः
वस्तुतस्तु प्रागुक्तवचनेन तयोर्दिनद्वयपुण्यत्वादेरेव पर्युदासान्मकरकर्कयोरपि स्नानंदानंपरेहनीत्यादिभिरहः
पुण्यत्वोक्तेः अहःपुण्यत्वानुपपत्त्याकल्प्यरात्रिनिषेधस्य च प्रत्यक्षरात्रिविधिनाबाधात्सर्वसंक्रांतिषु रात्रावनु
ष्ठेन विकल्पः स च देशाचाराद्व्यवतिष्ठात इति युक्तः पंथाः अयनयोस्तु वक्तव्यो विशेषः श्रावणे माघे च वक्ष्यते ज्यो
तिर्निबंधे गर्गः यस्य जन्मर्क्षे मासा घरविसंक्रमणं भवेत् तन्मासाभ्यंतरे तस्य वैरक्लेशाधनक्षयाः तग्गरसरोरुहपं
त्रैरजनी सिद्धार्थलोध्रसंयुक्तैः स्नानं जन्मर्क्षगते रविसंक्रमणे न रोगाशुभदं हेमाद्रौ अन्हि चेद्रात्रियुग्मस्याद्रात्रौ चे
द्वासरद्वयं संक्रांतिः पद्मिनीगिज्ञेया दानाध्ययनकर्मसु यत्तु गोड़ाः संक्रांत्यापक्षयोरंते द्वादश्यां श्राद्धवासरे सायं सं
ध्यां न कुर्वीत कुर्वंश्च पितृहा भवेत् इति कर्मोपदेशिन्यां व्यासोक्तेः सायं पुण्यकाले संध्यानिषेधमाहुस्तन्निर्मूलं
अन्यच्च बहु वक्तव्यं विस्तरभीतेर्नोच्यते इति संक्रांतिनिर्णयः पक्षयुगजश्वां द्वौ मासः स द्वेधा शुक्लादिर्मांतः कृष्णा
अह्नि चेत्संक्रांतिस्तदा पूर्वरात्रौ पुण्ये रात्र्यां चेत्सा तदा हद्वयं पुण्यमित्यपि पक्षोऽस्तिता दृक् प्रसिद्धिस्तु माधवा ३ शुक्लप्रतिपदादिः १

पत्रज ५

इतिज्योतिर्विक्रम्यम्५ सप्तविंशत्यहोरात्रात्मकः५

द्धिः पूर्णिमांतश्चतथाचत्रिकांडमंडनः चांद्रोपिशुक्लपक्षादिः कृष्णादिर्वेतिद्विधेत्युक्तो देशभेदेन तद्व्यवस्थामा
ह कृष्णपक्षादिकंमासंनांगीकुर्वंतिकेचन येपीच्छंतिनतेषामपीष्टोविंध्यस्यदक्षिणाइति विंध्यदक्षिणेकृष्णादि
निषेधादुत्तरतोद्वयोरप्यनुज्ञागम्यते तत्रापिशुक्लादिर्मुख्यः कृष्णादिर्गौणः शास्त्रेषुचैत्रशुक्लप्रतिपद्येवचांद्रसंव
त्सरारंभोक्तेः तदुक्तंदीपिकायां चांद्रोदोमधुशुक्लगप्रतिपदारंभइति नहियेकृष्णादिंमन्यंतेतेषांसंवत्सरारंभोमि
ध्यतेऽतःशुक्लादिर्मुख्यः कृष्णादिनामलमासासंभवाच्च चंद्रस्यसर्वनक्षत्रभोगेननाक्षत्रोमासः सावनादीनांव्यवस्था विनियोगे५
क्ताहेमाद्रौब्रह्मसिद्धांते अमावास्यापरिछिन्नोमासःस्याद्ब्राह्मणस्यतु संक्रांतिपूर्णमासीभ्यांतथैवनृपवैश्ययोः यथासंख्यम्४
अत्रब्राह्मणादीनांवचनांतरेणापत्रकर्मविशेषेवसंतेब्राह्मणोग्निमादधीतेत्यादिवन्मासउक्तस्तत्रदर्शांतत्वमात्रंनियम्य
तेनतुसर्वकर्मसुदर्शांतएवेति वष्ट्याघर्षसोमरेहोषादिनिधननियमवद्विधिलाघवात् त्रैवर्णिकानांसर्वकर्मसुमा
सविशेषविधेःसावनादीनांशूद्रानुलोमादिपरत्वापत्तेश्चेतिगुरुचरणाः ज्योतिर्गर्गः सौरोमासोविवाहादौयज्ञादौसावनः

प्रथमाह्निके १ | नक्षत्रव्रतानि। इंदोरयनानि चांद्रायणानि ३

स्मृतः आह्निके पितृकार्ये च चांद्रो मासः प्रशस्यते अब्दसंगः विवाहव्रतयज्ञेषु सौरं मासं प्रशस्यते पार्वणे त्वष्ट
६ काश्राद्धे चांद्रमिष्टं तथाह्निके स्मृत्यंतरे एकोद्दिष्टे विवाहादौ अन्नप्राशनादौ सौरसावनौ ज्योतिर्गर्गः आयुर्दायविभाग
श्च प्रायश्चित्तक्रिया तथा सावनेनैव कर्त्तव्या शत्रूणां चाप्युपासना विष्णुधर्मे नक्षत्रसत्राण्ययनानि चेंदोर्मा
नाक्षत्रेण ४ सेन कुर्याद्ग्रहगणात्मकेनेति ब्राह्मे तिथिकृत्ये च कृच्छ्रादिं व्रतमुक्तादिमेव च विवाहादौ सौरादिं मासं कृत्ये विनिर्दि
शेत् अथ मलमासः तत्रैकसंक्रांतिरहितः सिताद्यश्चांद्रो मासो मलमासः एकसंक्रांत्यराहित्यमसंक्रांतत्वेन संक्रां
तिद्वयवत्त्वेन च भवतीति मलमासो द्विधा अधिमासः क्षयमासश्चेति तदुक्तं काठकगृह्ये यस्मिन्मासे न संक्रांतिः सं
क्रांतिद्वयमेव वा मलमासः स विज्ञेयो मासः स्यात्तु त्रयोदश इति सत्यव्रतोपि राशिद्वयं यत्र मासे संक्रमेत दिवाकरः
नाधिमासो भवेदेष मलमासस्तु केवलमिति अधिकमासस्य कालनियममाह वशिष्ठः द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोड
शभिस्तथा घटिकानां चतुष्केण पतत्यधिकमासक इति एतच्च संभवार्थं न तु नियमार्थं अन्यथा षोडशदिनाधिकत्वा

उपलक्षणं फलितम् १

यस्मिन्वर्षेक्षयः स्यात्तस्मिन्वर्षे मलमासद्वयमित्यर्थः ३

बहुकालेन न तु अधिमासवत्पुनः पुनः ३

त्रिंशन्मासानंतरं क्रमप्रपन्ननियमे शुक्लादित्वभंगापत्तेः तेन न्यूनाधिककाले मलमासपातेपि न दोषः अत एव

वोक्तं माधवीये मासे त्रिंशत्तमे भवेदिति क्षयस्यापि ज्योतिःशास्त्रे असंक्रांतमासोधिमासः स्फुटं स्याद्द्विसं

क्रांतिमासः क्षयाख्यः कदाचित् क्षयः कार्त्तिकादित्रये नान्यतः स्यात्तदावर्षमध्येधिमासद्वयं च एकः क्षयात्पू

र्वेपरतस्त्वेके इत्यधिमासद्वयं भवतीत्यर्थः यत्तु क्वचित् अत्र विशेषमाह जाबालिः मासद्वयेब्दमध्ये तु संक्रांतिर्न

यदा भवेत् प्राकृतस्तत्र पूर्वः स्यादधिमासस्तथोत्तर इति उत्तरस्मिन्नेव कालाधिक्यं न पूर्वस्मिन्नित्यर्थः यत्तु ब्र

ह्मसिद्धांते चैत्रादवर्वाङ्नाधिमासः परतस्त्वधिको भवेदिति यच्च ज्योतिःसिद्धांते घटकन्यागते सूर्ये वृश्चिके वाथ ध

न्विनि मकरे वाथ कुंभे वा नाधिमासो विधीयत इति तत् क्षयपूर्वभाव्यधिमासस्य कालाधिक्यनिषेधार्थं न त्वधिक

मात्रस्यैदृशानां फाल्गुनादीनां प्रायोभावस्य च क्वचित् नपुंसकत्वं भवतीत्येष शास्त्रविनिश्चय इति हेमाद्रौ विष्णुधर्म

ोक्तेः मलमासेष्टकानिषेधानुपपत्तेश्च मकरे वाथ कुंभे वेति दृष्टांतार्थं प्राप्त्यभावात् क्षयस्यागमनकालज्ञाः

यथा मकरे कुंभे च नाधिमासस्तथा क्षयात्पूर्वस्मिन्नपि अधिकत्वेपि नाधिमासत्वम् मलमासत्वम् २ ... १

क्षयात्पूर्वभावी योधिमासः ... पूर्वान्तर्भूत एव अतो नाधिककालत्वेन ... यः किं तूत्तर एवाधिकोऽस्तु ... ३

क्षयः कार्त्तिकादित्रये नान्यतः स्यादिति निबंधेन १

अधिकत्वमपि ... धिकः ... २

ग्यारहसैपंद्रह ३

मदुक्तंक्षयाख्यःकदाचिदितितद्विवृणोति १ अंकानांवामतोगत्या २

सिद्धांतसिरोमणौ गतोब्ध्यद्रिनंदैर्गतैःशाककालैस्तिथीशैर्भविष्यत्ययंगांगाक्षसूर्यैः गजाग्निभूमिर्मिते
७ प्रायशोयंकुवेदेंदुवर्षैः क्वचिद्गोकुभिश्चेति अब्धयश्चत्वारः अद्रयःसप्त नंदाःनव एषांप्रातिलोम्येनपाते ९७४ नवसैचोहत्तरि २
तेमितेवर्षेकश्चिद्दनयमासःपूर्वंजातइत्यर्थः तिथयःपंचदश ईशाएकादश११५ एवंमितेपातेकश्चिद्भविष्यती
त्यर्थः अंगा।६।अक्षाः५सूर्याः१२ एकत्र१२५६।गजाः।८।अद्रयः।७।अग्निः।३।भूः।१।एकत्र१३७८।कु१।वेदाः४
इंदुः१ एकत्र१४१।गावः।९।कुः१एकत्र।१९।एतैर्मितैर्वर्षैर्यातेकश्चिद्भविष्यतीत्यर्थः अथमलमासेकार्याका
र्यंनिरूप्यते तत्रजाबालिः नित्यनैमित्तिकेकुर्यात्श्राद्धंकुर्यान्मलिम्लुचे तिथिनक्षत्रवारोक्तंकाम्यंनैवकदा
चन अयंचकाम्यनिषेधआरंभसमाप्तिविषयः असूर्यानामयेमासानतेषुममसंमतः व्रतानांचैवयज्ञानामा
रंभश्चसमापनमितितेनैवोक्तत्वात् असूर्योधिकमासइत्यर्थः तत्रमंडलंतपतेरवेरितिवचनात् कारीर्यादेःका
म्यस्यत्वारंभसमाप्तीभवत एवेत्यादिरन्यत्रविस्तरः काठकगृह्येपि मलेनन्यगतिंकुर्यान्नित्यांनैमित्तिकींमिति

श्राद्धस्यनित्यनैमित्तिकत्वाज्ज्ञोबलिवर्द्दन्यायेनपृथग्ग्रहणम् ४
नतुसूर्यः २

नंदान ५

सीमंतेपुंसवनेश्राद्धंपुंसवसीमंतौच ३ एद्धिश्राद्धादि ३ श्रद्धेदियादौ ३

तत्रजन्मनिमित्तचंद्रसूर्यदर्शनभूम्युपवेशनतांबूलभक्षणादिनतुयानेष्टिस्तन्निषेधस्यवक्ष्यमाणत्वात् ३ प्रतिमासु १

पुनराधानम् १

तानिनैमित्तिकानिदीपिकायामुक्तानि यन्नैमित्तिकमग्निनष्टानुगताग्न्याधानमर्चासुवासंस्कारादिविलोपनेस्प
तिपुनःप्रोक्तंप्रतिष्ठादिकमिति गत्यंतरयुतंतुसोमादिहेयमेव तत्रकर्त्तव्यान्युक्तानिकालादर्शे द्वादशाहसपिंडांतंक
र्मग्रहणाज्जन्मनोः सीमंतेपुंसवेश्राद्धंद्वावेतौजातकर्मैव रोगेशांतिरलभ्येचयोगेश्राद्धंव्रतानिचे प्रायश्चित्तंनिमित्तस्य
अयनात् ४ वैशात्पूर्वपरत्वच अर्द्धोदकुंभमन्वादिमहालययुगादिषु श्राद्धंदर्शेप्यहरहःश्राद्धमूनादिमासिकं मलिम्लुचान्यम
मृतोद्देशेन ४
प्रथमाब्दिकम् ५ सेषुमृतानांश्राद्धमाब्दिकं श्राद्धंतुपूर्वदृष्टेषुतीर्थेष्वेवयुगादिषु मन्वादिषुचयद्दानंदैनंदिनंचयत् तिलगोभूहिरण्या
नांसंध्योपासनयोःक्रियाः पर्वहोमश्चाग्रयणं (नवान्नेष्टिः) साग्नेरिष्टिश्चपर्वणि नित्याग्निहोत्रहोमश्चदेवतातिथिपूजनं स्ना
नंचस्नानविधिनाप्यभक्ष्यापेयवर्जनं तर्पणंवा निमित्तस्यानित्यत्वादुभयत्रचेति एतौपुंसवसीमंतौ एतच्चगर्भाधाना
द्यन्नप्राशनांतसंस्कारोपलक्षणं तदुक्तंदीपिकायां गर्भाधानमुखं(आदि)चचौलविधितःप्राग्जातयागं(यानेष्टि)विनाकृच्छ्रेष्वामयत
गजेंद्रपुरतश्छायामघानंगयोः तीर्थेदुर्दिनपयोश्चपितमधिकेमासेवमाँद्याचरेदिति अलभ्ययोगेऽर्धोदयपद्मका

असिद्धगने दृश्यायांपित्र्यंमघात्रयोदश्योश्च २
छायासहितेति चतौमघानंगौचतयोः १

अमायांपौर्णमास्यांचहोमः ४ दर्शपौर्णमासेष्टिः ४ दारिद्र्यदुर्भिक्षादिनाकष्टेषुसत्सुनवान्नेष्टिर्नीचकृच्छ्रेपि २

अन्यदानिषिद्धस्यहकरणेकदाचिद्दोषाभावःस्यादितिपाशंक्याह ३

अमा १

येकाम्यान्यपिव्रतादीनिकार्याणीत्यर्थः पूर्वपरेत्रमलेऽशुद्धेचेत्यर्थः महालयसंबंधेनमघात्रयोदश्युच्यतइतिमा
धवः दर्शश्राद्धंमलेपिकार्यं यत्तुऋष्यशृंगः संवत्सरातिरेकेणमासोयःस्यान्मलिम्लुचः तस्मिंस्त्रयोदशेश्राद्धं
नकुर्यादिंदुसंक्षयइति तत्काम्यदर्शश्राद्धविषयं काम्यंनैवकदाचनेतिवचनात् दर्शेचकाम्यंश्राद्धंकन्यांकन्यावे कन्यार्थिनःकन्यां प्राप्नुयुः ३
दिनश्चेत्यादिनायाज्ञवल्क्येनोक्तं नित्यंतुमलेभवत्येव दर्शेप्यहरहःश्राद्धंदानंचप्रतिवासरं गोभूतिलहिरण्या
नांमासेपिस्यान्मलिम्लुचइतिमात्स्योक्तेरितिहेमाद्र्यादयः दिवोदासीयेपि अमा अनिंदुरिंदुपूर्णाचहरिवारोबुधाष्टमी
नाधिमासेपरीत्याज्याःसीमंतान्नाशनेशिशोरिति अनिंदुर्दर्शः द्विविधमप्यमाश्राद्धंनकार्यमितित्वपरार्कः तत्र
यद्विहितंकर्म उत्तरेमासिकारयेत् इत्युक्तेःषष्ट्यातुदिवसैरितिशुद्धमासकरणोपिशास्त्रार्थोपपत्तेर्दर्शश्राद्धंमलेनका
र्यमितिप्राचीनगौडाः शूलपाणिस्तुसंवत्सरप्रदीपेपि एकराशिस्थितेसूर्येयदादर्शद्वयंभवेत् दर्शश्राद्धंतदादोस्या
न्नपरत्रमलिम्लुचे अत्रापिप्राग्वद्व्यवस्था यद्यपिकालादर्शेसर्ववार्षिकंमासद्वयेकार्यमित्युक्तं तथापिहेमाद्रिमाध

वापरार्कादिमतात्प्रथमवार्षिकं मलमासे कार्यं द्वितीयाद्याब्दिकं शुद्धमास एव कार्यं असंक्रांतेपि कर्त्तव्यमाब्दिकं
प्रथमं द्विजैः तथैव मासिकं श्राद्धं सपिंडीकरणं तथेति हारीतोक्तेः आब्दिकं प्रथमं यत्स्यात्तत्कुर्वीत मलिम्लुचे वत्
दर्शाप्ततु संप्राप्ते कुर्वीत पुनराब्दिकमिति स्मृत्यंतरोक्तेश्च पुनराब्दिकं द्वितीयादि वार्षिकं त्रयोदशे मासे तीते वत्
दर्शाद्यदिने कुर्यादित्यर्थः यत्तु सत्यव्रतः वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृते हनि मलमासे न तत्कार्यं व्याघ्रस्य वच
नं यथेति तद्द्वितीयादि वार्षिकविषयं आब्दिकं प्रथमं यत्स्यात्तत्कुर्वीत मलिम्लुचे इति पूर्वोक्तवचनात् तेन द्वितीया
दि शुद्धमास एव पृथ्वीचंद्रोदये दिवोदासीये मदनरत्ने प्येवं मलमासमृतानां यदा स एवाधिकः स्यात्तदा तत्रैव का
र्यं यथाह पैठीनसिः मलमासमृतानां तु श्राद्धं यत्प्रतिवत्सरं मलमासेपि कर्त्तव्यं नान्येषां तु कथंचनेति यत्तु वृ
द्धवसिष्ठः श्राद्धीयाहनि संप्राप्ते अधिमासो भवेद्यदि मासद्वयेपि कुर्वीत श्राद्धमेवं न मुह्यति यच्च व्यासः उत्तरे देवका
र्याणि पितृकार्याणि चोभयोरिति तन्मासिकादिविषयं योगाद्यब्दिकं मासिकं च श्राद्धं चापरपक्षिकं मन्वादिकं तैर्थि

पारि ५ नु ५

कंचकुर्यान्मासद्वयेपिचेतिस्मृतिचंद्रिकोक्तेः तैर्थिकंतीर्थश्राद्धं तत्रमासद्वयेपिकार्यमितित्रिस्थलीसेतौभट्टाः
८ केचित्तुप्रतिमासंमृताहेचश्राद्धंयत्प्रतिवासरं मन्वादौवयुगादौचतन्मासोरुभयोरपिति मरीचिवचनात् वर्षेवर्षे
तुयच्छ्राद्धंमातापित्रोर्मृतेहनिमासद्वयेपितत्कुर्याद्व्याघ्रस्यवचनंयथेति गालववाक्येश्चप्रत्याब्दिकंमासद्वयेकार्य
मित्याहुः तन्नुच्छं प्रतिमासमृताहेक्रियमाणंमासिकंप्रतिसंवत्सरंक्रियमाणंकल्पादिश्राद्धमितिमरीचिवचसोम
दनरत्नेनव्याख्यानात् गालवीयस्यचमासद्वयात्मकेव्दयमासइतिमाधवेनव्याख्यानात् यच्चकैश्चिदुक्तं प्रथ
माब्दिकंमासद्वयेपिकार्यं श्राद्धिकंप्रथमंयत्स्यात्तत्कुर्वीतमलिम्लुचे त्रयोदशेवसंप्राप्तेकुर्वीतपुनराब्दिकमिति
यमोक्तेरिति तदपिचिंत्यं पुनराब्दिकंद्वितीयादिवार्षिकंत्रयोदशातीतेचतुर्दशेकुर्यात् अन्यथासांवत्सरंनवर्द्धेत
श्राद्धंतत्रमृतेहनीतिपैठीनसीविरोधःस्यादितिहेमाद्रौपृथ्वीचंद्रोदयेच एतेनवर्द्धेतनक्षिंघ्राक्षुद्रेपिकुर्यादेवेत्य
नंतभट्टव्याख्यामानाभावात्परास्ता पूर्वव्याख्यायांतुहारीतोपेपृथमग्नहरणमेवमानं यदपिनिर्णयामृतेपूर्वोक्तक

पुनराब्दिकंद्वितीयादिवार्षिकम्

लादर्शवचनान्मलमासेश्राद्धदिनस्यवंध्यत्वनिरासार्थेपितृुद्देशेनब्राह्मणाभोजइत्वाशुद्धमासेसपिंडकंश्राद्धंकुर्यात्
पिंडवर्यमसंक्रांतेसंक्रांतौपिंडसंयुतं प्रतिसंवत्सरंश्राद्धमेवंमासद्वयेपिचेतिवृद्धपराशरोक्तेरितितदापिचिंत्यं पूर्वोक्तव
चनस्यक्षयपूर्वभाव्यधिकमासविषयत्वात् तत्रहिमासद्वयेश्राद्धमुक्तं तदाहसत्यतपाः एकएवयदामासःसंक्रांतिद्व
यसंयुतः मासद्वयगतंश्राद्धंमलमासेपिसस्यतइति मासद्वयगतंपूर्वासंक्रांतिगतंक्षयगतंच मलमासेक्षयमासे अपि
शाट्यायनपूर्वाधिमासेचेतिहेमाद्रिः दीपिकापि तत्प्राक्संक्षयाधिमासकोयदिभवेत्तत्रत्यसंवत्सरंतस्मिन्मुद्धृतयाक्षयेचव
चनात्कुर्याद्द्वयोःकोविदइति कालादर्शेप्येतद्विषयएवत्यलंबहुना मलमासवर्ज्यान्युक्तानिकालादर्शे अनित्यमति
मित्तंचदानंचमहदादिकं अग्न्याधानाध्वरापूर्वतीर्थयात्रामरेक्षणं देवारामतडागादिप्रतिष्ठामौंजिबंधनं आश्रमस्वी
कृतिः काम्यवृषोत्सर्गश्चनिःक्रमः राजाभिषेकःप्रथमश्चूडाकर्मव्रतानिच अन्नप्राशनमारंभोगृहाणांचप्रवेश
नं स्नानंविवाह[illegible]नमांतिपन्नंदेवमहोत्सवः व्रतारंभसमाप्तीचकाम्यंकाम्यंचपाप्मनां प्रायश्चित्तंतुसर्वस्य ब्राह्मणादेः१

प्रमादादिनाऽतिक्रांतंनाम१ सूतीगृहाद्बहिर्निःसरणकर्म२
समावर्त्तनम१

काम्यंसाधारणं०पाप्मनांकाम्यंप्रायश्चित्तंचवर्ज्यं०पूर्वनैमित्तिकस्यप्रा
यश्चित्तस्यस्वीकारात्१

आवरामासंत्यागे ऽपूर्ववेदाध्ययनस्येत्यर्थः १
वेदग्रहणमावरामासं १
हेमंतेजलावस्थानाख्यंतपः १
क्षमार्तं २
प्रथमेतिथ्यर्द्धेमृतस्यक्षयात्पूर्वोमासः द्वितीयेर्द्धेमृत
स्यद्वितीयोमासोद्वितीयाधाब्दिके ४

मलमासेविवर्जयेत् उपाकर्मोत्सर्जनंचपवित्रदमनार्पणं अवरोहश्चहेमंतः सर्पाणांवलिरष्टकाः ईशानस्यबलि
विष्णोःशयनंपरिवर्त्तनं दुर्गेंद्रस्यापनोत्थानेध्वजोत्थानंचवर्जिताः पूर्वंप्रतिषिद्धानिपरत्रांन्यच्चदैवकमिति अत्र
मलवचनानिहेमाद्रिमाधवादिभ्योज्ञेयानि दिवोदाशीयेपि यात्रोत्सवंचदेवादिसपर्थदिव्यमेवच मलमासेनकु
र्वीतव्यासस्यवचनंयथेति अयंनिर्णयःक्षयमासेविज्ञेयः रविसंक्रमहीनेयोवर्ज्यावर्ज्यविधिस्मृतः सएवतुद्विसंक्रां
१० तमलमासेप्युदीरितइतिकाष्टकगृह्योक्तेः क्षयमासमृतानांप्रत्याब्दिकेविशेषोहेमाद्रौ तिथ्यर्द्धेप्रथमेपूर्वोद्वितीये
र्द्धेतथोत्तरः मासावितिबुधैश्चिंत्योक्षयमासस्यमध्यगौ आब्दिकवर्द्धधपिनेपिज्ञेयं यन्मलमासवर्ज्यमुक्तंतच्छु
क्रगुर्वोरस्तादिष्वपिज्ञेयं तदाहबृहस्पतिः वालेवायदिवावृद्धेशुक्रेवास्तंगतेगुरौ मलमासइवैतानिवर्जयेद्देवदर्श
नमिति अन्नादिस्वतांदृष्ट्वाशुचःस्युर्नष्टभार्गवे मलमासेप्यनावृत्ततीर्थयात्रांविवर्जयेत् आवृत्तीर्थेदोषाभावमा
त्रंनतुफलमिति वाचस्पतिमिश्राः तन्न असतिवाधकेफलहेतुत्वात्ततःक्षीणोपि नीचस्थेवक्रसंस्थेप्यतिचरणगतेवा
फलस्यनिषेधके १

लवद्धास्तगेवासंन्यासोदेवयात्राव्रतनियमविधिःकर्णवेधस्तुदीक्षा मौंजीबंधोंगनानांपरिणायनविधिर्वास्तुदे
वप्रतिष्ठावर्ज्याःसद्भिःप्रयत्नात्त्रिदशपतिगुरौसिंहराशिस्थितेचेति दीक्षायांगदीक्षागमदीक्षाच तथाउद्यानचूडा
व्रतबंधदीक्षाविवाहयात्रावधूप्रवेशः तडागकूपत्रिदशप्रतिष्ठावृहस्पतौसिंहगतेनकुर्यात् दिवोदासीये गुर्वादित्य
गुरौसिंहेनष्टेशुक्रेमलिम्लुचेग्रहकर्मव्रतंयात्रांमनसापिनचिंतयेत् अस्यापवादस्तत्रैव व्राह्मे मुंडनंचोपवासश्चगौत गोदावर्य्यां४
म्यांसिंहगेगुरौ कन्यागतेतुकृष्णायांनतुतत्तीरवासिनां तथा आद्यासागौतमीगंगाद्वितीयाजान्हवीस्मृता सर्वतीर्थ
फलंस्नानाद्गौतम्यांसिंहगेगुरौ संहिताप्रदीपे स्यात्सप्तएवगुरुशुक्रयोश्चवालत्वमह्नांदशकंचवार्द्धे वृद्धोसितेर्ज्याव शुक्रगुरू४
शुभौशिशुत्वेशस्तौयतस्तावुपचीयमानौवशिष्ठः अतीचारगतेजीवेवर्जयेत्तदनंतरं व्रतोद्वाहादिकार्येषु अष्टविंशतिवा
सरौ वाल्यादिलक्षणमुक्तंव्रह्मसिद्धांते रविरश्मिसन्निरन्येषांमहाणामस्तउच्यते ततोर्वाग्वार्धकंप्रोक्तमूर्द्ध्वंवाल्यंप्रकी
र्तितमिति वाल्यादिपरिमाणंचरत्नशते वालःशुक्रोदिवसदशकंपंचकंचैववृद्धःपश्चादह्नांत्रितयमुदितःप्रत्यैमोर्ध्वं
वर्द्धमानौ३ पूर्वपरित्यागपरःसरंग्रहांतरप्राप्तिः२ अस्तात२ अस्तादूर्ध्वग्रहांतरसक्तोसत्याम२

क्रमेण जीवो वृद्धः शिशुरपि तथा पक्षमन्यैः शिशूतौ वृद्धौ प्रोक्तौ दिवसदशकं चापरैः सप्तरात्रं पश्चिमे तु उदये दशदि
२२ नानि बालः अस्ते पंच दिनानि वृद्धः पूर्वतो दिनत्रयं बालः पक्षं च वृद्ध इत्यर्थः जीवे गुरुः अन्यत्र त्वन्यथोक्तं प्राक्
पश्चादुदितः शुक्रः पंचसप्तदिनं शिशुः विपरीते तु वृद्धत्वं तद्वदेव गुरोरपीति एषां च पक्षाणां व्यवस्थामाह मिहिरः
बहवो दर्शिताः कालाः पंचाल्पे वार्द्धके पि वा मासास्तत्राधिकाः शेषा देशभेदाद् उता यदि देशभेदश्च मदनरत्ने गार्ग्यः
शुक्रो गुरुः प्राक् पुरा वृद्धं बालो विंध्ये दशावंतिषु सप्तरात्रं वंगेषु हूणेषु षडहं पंच शेषे च देशे त्रिदिनं वदंतीति अस्यापवादः
अपवादः काशीखंडे न महास्तोदयकृतो दोषो विश्वेश्वरालये त्रिस्थलीशे तीर्थवायावपि गोदावर्यां गयायां च श्रीशैले गं
हरणादपि सुरासुरगुरूणां च मौढ्यदोषो न विद्यते महालयेपि तन्निमित्तकं कुरुक्षेत्रे पात्राप्रदानादावित्यर्थः तदाह त्रिस्थली
सेतो लल्लः उपप्लवे शीतलभानुभान्वोरस्तोदये वै कपिलाख्यषष्ठ्यां सुरासुरेज्यास्तमये च तीर्थे यात्रा विधिः संक्रमणे
च सत्त इत्यलं बहुना मलमासे च व्रतविशेष उक्तो हेमाद्रौ पाद्मे अधिमासे तु संप्राप्ते गुडसर्पिर्युतानि च त्रयस्त्रिंशदपूपा
नि दातव्यानि दिने दिने। खाद्यानि गुडमिश्राणि अधिमासे नृपोत्तम। अधिमासे तु संप्राप्ते त्रयस्त्रिंशत्तु देवताः। उद्दिश्यापूपदानेन पृथ्वी [illegible]

वंचयति प्रतारयति वृथायुःक्षपतो न ३
मलमाससंबंधात् आम्नानाम् ४

न्नं कांस्यपात्रे धृत्वा च सवृतं सहिरण्यं च ब्राह्मणाय निवेदयेत् विष्णुरूपी सहस्रांशुः सर्वपापप्रणाशनः अपूपा
न्नप्रदानेन मम पापं व्यपोहतु नारायण जगद्बीज भास्कर प्रतिरूपक व्रतेनानेन पुत्रांश्च संपदं चाभिवर्द्धय यस्य हस्ते
गदाचक्रे गरुडो यस्य वाहनं शंखः करतले यस्य स मे विष्णुः प्रसीदतु कलाकाष्ठादिरूपेण निमेषघटिकादिना यो वंचयते भूतानि
तस्मै कालात्मने नमः कुरुक्षेत्रसमो देशः कालः पर्व द्विजो हरिः पृथ्वीसममिदं दानं गृहाण पुरुषोत्तम मलानां च विशुद्ध्य
र्थं पापप्रशमनाय च पुत्रपौत्राभिवृद्ध्यर्थं तव दास्यामि भास्कर मंत्रेणानेन यो दद्यात् त्रयस्त्रिंशदपूपकान् प्राप्नोति विपुलां
लक्ष्मीं पुत्रपौत्रादिसंपदः इति इति कमलाकरभट्टकृते निर्णयसिंधौ चैत्रमासमलमासनिर्णयः पक्षनिर्णयस्तु
दैवे मुख्यः शुक्लपक्षः कृष्णः पित्र्ये विशिष्यत इति माधवेनोक्तः अथ तिथिनिर्णयः तत्र तिथिर्द्वेधा शुद्धा विद्धा च दिने तिथ्यंतरसं
वंधरहिता शुद्धा तद्रहिता विद्धा तत्र शुद्धायामसंदेहाद्विद्धा निर्णीयते तत्र सामान्यतो वेधमाह माधवीये पैठीनसिः पक्षद्व
ये ऽपि तिथयस्तिथिं पूर्वां तथोत्तरां त्रिभिर्मुहूर्तैर्विध्यंति सामान्योऽयं विधिः स्मृत इति हेमाद्रिमदनरत्नादौ तु द्विमुहूर्तोऽप्युक्तः

तिथ्यंतरसंबंधरहितत्वरहिता तिथ्यंतरसंबंधवती त्यर्थः २

सत्कर्मपरमेश्वर रविमुखानि ३

या तिथिर्भानावुदिते सत्यह्नो द्विमुहूर्त्तव्यापिनी तस्यां दैवतं दैवतोद्देश्यकं हव्यसंज्ञकं कर्म विधेयम् । तथा रवावस्तमिते सति या तिथिस्त्रिमुहूर्त्तव्यापिनी तस्यां पित्र्यं
पितृदेश्यकं कव्यसंज्ञकं कर्म विधेयम् । इति लिङ्गाच्चयत्र्यार्धश्लोक इत्यध्याहारेण व्याख्येयः १ वैपरीत्यं तु सायं घटिकैका तु या भवेत्साऽपेक्ष्येति ४

द्विमुहूर्त्तः २

उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ द्विमुहूर्त्तं त्रिरह्नश्च सा तिथिर्हव्यकव्ययोरिति विष्णुधर्मोक्तेः द्विमुहूर्त्तत्वं चानुकल्पः
१२ द्विमुहूर्त्तापि कर्त्तव्या या तिथिर्वृद्धिगामिनीति दक्षेणापि शब्दोक्तेः अयं वेधः प्रातरेव सायं तु त्रिमुहूर्त्तवेध एव यां ति
थिं समनुप्राप्य यात्यस्तं पद्मिनीपतिः सा तिथिस्तद्दिने प्रोक्ता त्रिमुहूर्त्तैव या भवेदिति स्कांदोक्तेः दीपिकापि त्रिमुहूर्त्त
सायं त्रिमुहूर्त्तगा तिथिः सकला पूर्णा ज्ञेया ४ गांस्पृकला सायेति यानित व्रतोपवासस्नानादौ घटिकैकापि या भवेत् उदये सा तिथिर्ग्राह्या विपरीता तु पैतृके इत्या
दीनि स्कांदादिवचनानि तानि वैश्वानराधिकरणन्यायेनावपर्वस्तुस्त्या त्रिमुहूर्त्तप्रशंसापराणि तिथिविशेषे वेधविशे कृ५
षः स्कांदे नागो द्वादशनाडीभिर्दिक्पंचदशभिस्तथा भूतोऽष्टादशनाडीभिर्दूषयत्युत्तरां तिथिमिति अयं चोपवासा
तिरिक्तविषय इति वक्ष्यते इति वेधः तत्र सर्वा तिथिर्यदहः कर्मकालव्यापिनी सैव ग्राह्या कर्मणो यस्य यः कालस्तत्काल
व्यापिनी तिथिः तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणमिति विष्णुधर्मोक्तेः दिनद्वये तद्व्याप्त्यभावव्याप्त्यावेकदेशव्याप्तौ
युग्मवाक्यस्य १ वा युग्मवाक्यान्निर्णयः तस्य पूर्वाबाधेनोपपत्तेः कर्मकालस्य प्रधानांगत्वाच्च युग्मवाक्यं तु निगमे युग्माग्नियुगभूतानां

यथा वैश्वानरं द्वादशकपालं निर्वपेदिति प्रकरणेऽष्टाकपालादयोऽप्युक्तास्ते यथावभूता द्वादशकपालप्रशंसापराणि तथेत्यर्थः ५

विशेषणं ४

षरामुन्योर्विस्मरं ग्रंथयो: रूद्रेणाद्वादशीयुक्ताचतुर्दश्यांपूर्णिमा प्रतिपद्यप्यमावास्यातिथ्योर्युग्मंमहाफलं एतद्व्यस्तं
महादोषंहंतिपुण्यंपुराकृतमिति अत्रग्रंथोक्ताः शब्दाद्वितीयादिनवम्यंततिथिवाचकाः रुद्रएकादशी द्वितीयात
तीयायुतासाचद्वितीयायुताइतिसप्तयुग्मानीत्यर्थः इदंचशुक्लपक्षे अमाप्रतिपद्युग्मस्यपूर्णिमापाश्चतत्रैवसत्वादि
तिकेचित् तत्वंत्वमाप्रतिपद्युग्मात्कृष्णपक्षलिंगात्पक्षद्वयपरमिदं तत्तद्विशेषवाक्यैःकृष्णतिथिषुविशेषेपोद्यतइति दश अपवादविषयीक्रियतेनिषिद्ध्यते४
मीत्युक्तापुराणसमुच्चये संपूर्णादशमीकार्यापिमिश्रितापूर्वयापिवेतिसंपूर्णाशुक्लपक्षे त्रयोदशीसुमंतुनोक्ता त्रयोदशी
तुकर्त्तव्याद्वादशीसहितामुनेइति कृष्णपक्षेत्वापस्तंबः प्रतिपत्सद्वितीयास्याद्वितीयाप्रतिपद्युता चतुर्थीसंयुतायाच
सातृतीयाफलप्रदा पंचमीप्रकर्त्तव्याषष्ठ्यायुक्तातुनारद कृष्णपक्षेष्टमीचैवकृष्णपक्षेचतुर्दशी पूर्वविद्धाप्रकर्त्तव्याप
रविद्धानकुत्रचित् दशमीचप्रकर्त्तव्यासदुर्गाद्विजसत्तम षष्ठ्यष्टमीअमावास्याकृष्णपक्षेत्रयोदशी एताःपरयुताःपूज्याःप
राःपूर्वेणसंयुताइति यत्तुव्यासः खर्वोदर्पस्तथाहिंसास्यात्पूर्वकालिकीति खर्वःसाम्यं दर्पोवृद्धिः तयोःपरः हिंसाद्वयस्त तिथेन्यूनत्वम् १
त्रिविधंतिथिलक्षणं।खर्वेदर्पेपरेपूर्ज्योहिंसा १

विनियोगः १ युग्मवाक्यं नियमादिविषयम् १
खर्वादर्पादिइतिविधिः प्रवर्त्तते २

त्रपूर्वेत्यर्थः एतच्छ्राद्धादिविषयं द्वितीयादियुग्मानां पूज्यता नियमादिषु एकोद्दिष्टादिवच्छ्रेदोऽहासवच्छ्राद्धादिवाद
१३ नेतिव्यासोक्तेः नियमादिषु व्रतदानादिदैवकर्मसु एकोद्दिष्टादितिथौ वृद्ध्यादावित्यर्थः कर्मकालव्याप्त्यभावेतु कर्मो सूर्योदयकालगा २
पक्रमकालगैव ग्राह्या कर्मोपक्रमकालगा तु कृतिभिर्ग्राह्या न युग्मादर इति दीपिकोक्तेः यानितु यां तिथिं समनुप्राप्य
उदयं याति भास्करः सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु इत्यादीनि तानि त्रिमुहूर्त्तादिस्तुतिरिति निर्णयशैली अथैक
भक्तं तत्कालः पंचमे मध्याह्नव्यापिनी ग्राह्या एकभक्ते सदा तिथिरिति मध्याह्नस्त्वपंचधा विभक्तदिनतृतीयांशः तेनय
द्यपि द्वादशदंडानंतरं प्राप्यते तथापि दिनार्द्धसमयेऽतीते भुज्यते नियमेन यत् एकभक्तमिति प्रोक्तमतस्तत्स्याद्दिवैवहीति
स्कांदोक्तेः षोडशं सप्तदशादिदंडो मुख्यः कालः दीपिकायांतु मध्याह्नात्परतः त्रिभागदिवसे स्यादेकभक्तमिति ततः सू
र्यास्तपर्यंतं गौणः दिवैवहीत्यस्यैव वैयर्थ्यापत्यैतत्परत्वात् अत्र पूर्वेद्युर्व्याप्तिः परेद्युर्व्याप्तिरुभयेद्युर्व्याप्तिस्तदभावेंऽशव्या
प्तिस्तत्रापि साम्यं वैषम्यं चेति षट्पक्षाः तत्राद्ये रसंदेह एव तृतीये तु पूर्वाह्नि गौणामुख्यव्याप्तेः सत्त्वात्पूर्वेति माधवः युग्म

उभयेद्युर्व्याप्त्यभावे १ व्रताद्यंगे एकभक्ते २ अप्यनुसारेण २

वाक्यान्निर्णय इति हेमाद्रिः चतुर्थ्यपदेन पूर्वविद्धेण काललव्याप्तेः सत्वात् वैषम्येणांशव्याप्तौ याधिका सा ग्राह्या
साम्ये पूर्वा अयं च स्वतंत्रैकभक्ते निर्णयः अन्यांगे उपवासप्रतिनिधौ च तदनुसारेण निर्णयः अथ नक्तं तच्च दि
नानशनपूर्वकरात्रिभोजनं तत्र प्रदोषव्यापिनी ग्राह्या प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदेति वत्सोक्तेः प्रदोष
स्तु त्रिमुहूर्तः प्रदोषः स्याद्भानावस्तंगते सति नक्तं तत्र तु कर्तव्यमिति शास्त्रविनिश्चय इति मदनरत्ने व्यासोक्तेः तत्रा
पि त्रिदंडोत्तरं कार्यं सायंसंध्या त्रिघटिका अस्तादुपरि भास्वत इति स्कांदोक्तेः दंडत्रयस्य संध्यात्वेन तत्र च चत्वारि मानि
कार्याणि संध्यायां परिवर्जयेत् आहारं मैथुनं निद्रां स्वाध्यायं च चतुर्थकमिति मार्कंडेन भोजननिषेधात् मुहूर्तो
नं दिनेनक्तं प्रवदंति मनीषिणः नक्षत्रदर्शनान्नक्तमहं मन्ये गणाधिपेति माधवीये भविष्योक्तेश्च गौणस्तु प्रदो
षोस्तमयादूर्ध्वं घटिकाद्वयमिष्यते इति वत्सोक्तः प्रदोषः संध्या च दिनरात्र्योः संधौ मुहूर्तः अर्धास्तमयात्संध्या व्यक्ती सायंसंध्या २
भूतान तारका यावत् तेजःपरिहानिवशाद्भानोरूर्ध्वोदयं यावत् ध्वजिवराहोक्तेरित्याहुः तन्न अस्य संध्यावंदनानध्यायना

सम्यङ्नक्षत्रदर्शनं हि त्रिघटिकोत्तरं जायते ३ मुहूर्तात्मक प्रदोषस्य १
प्रातःसंध्या १

यथा न हिंस्यात्सर्वाणि भूतानीति निषेधवाक्याविरोधेन। कपिंजलानालभेतेति विधिवाक्यं प्रवर्तते तथेहापीत्यर्थः। अयमाशयः। सर्वकपिंजलहिंसाया असक्यत्वाद् बहुत्वस्य त्रित्वे पर्यवसानात् कपिंजलत्र
यहिंसने विधिः अतिरिक्तार्थं सत्यधिकहिंसने च निषेधः शायकाशत्वादविरोधो विधिनिषेधयोरिति २

दिनद्वये प्रदोषस्पर्शित्वे सति परदिने ३

अर्द्धमंडलस्य १ समानविषये हि विधिनिषेधयोर्विरोधे सति तयोरन्यतरसमाधानं विधेयं। इह तु तयोर्विषयभेदादविरोधाभावः। नक्तस्य रात्रि दंडोत्तरकाले विधिर्भोजननिषेधस्य च ततः प्राक्काल इत्यनुक्तोपालंभवदिदं समाधानं २

दिपरत्वात् अतएव तत्र खंडमंडलस्य सैध्यात्वमुक्तं विज्ञानेश्वरेण पश्चमदनरत्ने नक्तस्यैवैत्वाद्ग्रामसंभो
१४ जनगोचरो निषेध इत्युक्तं तन्न विधेर्निषेधाविरोधात् अन्यथा कपिंजलानित्यत्र त्रिभ्योधिकानां हिंसनस्या
त्र सायंकाले नक्तं तु दिनद्वये प्रदोषास्पर्शे ज्ञेयं अतएवायं पूर्वत्रैस्यादस्माद्वाग्यतोहि सैति जावालिवचनात्प्रदो
षव्यापिनी न स्यात् दिवा नक्तं विधीयते आत्मनो द्विगुणा छाया मंदीभवति भास्करे तन्नक्तं नक्तमित्याहुर्नक्तं
निशि भोजनमिति स्कांदाच्च यत्यादीनामपि सायान्हे नक्तं नक्तं निशायां कुर्वीत गृहस्थो विधिसंयुतः यतिश्च विध
वा चैव कुर्यात्तत्सदिवाकरमिति माधवीये स्कंदे पत्यंतरात् इयमपुत्रविधुरोपलक्षणं पुत्रवस्तु रात्रावेव अनाश्रमी आश्र
मी स्यादपत्नीकोपि पुत्रवानिति संग्रहोक्तेः सौरनक्तं दिवैव त्रिमुहूर्तस्पृगेवान्हि निशि चैतावतीतिथिः तस्यां सौरं
भवेन्नक्तमहन्येव तु भोजनमिति सुमंतूक्तेः हरिनक्ते विशेषः कालादर्शे स्कांदे षष्ठ्यां सदा पूज्या हरिनक्तव्रतेतिथि
१ देवतांतरनक्तं तु रिति अन्यनक्तं तु संक्रांत्यादावपि रात्रावेव निषेधस्य रागप्राप्तभोजनगोचरत्वेन वैधावाधकत्वात् दिनद्वयव्याप्तौ

भोजननिषेधवत्यपि १

अपुत्रः सन् यो विधुरः स्त्रीरहितस्तदुपलक्षणं। स्त्रीपुत्ररहितस्य यतिवत्स दिवाकरं नक्तम् ४

अनाश्रमी अपत्नीकोपि पुत्रवान् एवं स आश्रमी गृहस्थ एवेत्यर्थस्तेन रात्रावेव नक्तं विधेयम् ४

अलाभप्राप्तावर्थात्प्राप्तोपवासपक्षे। अतो यस्यां तिथावयाचितं विधेयं सोपवासतिथिर्नान्तरीयाऽयाचितार्थम् ४

परा उभयोर्यद्विवातिथ्योः प्रदोषव्यापिनी तिथिः तत्रोत्तरं तु नक्तं स्यादुभयत्रापि सा यत इति कालादर्शीयावालि
वचनात् अन्यत्रैषु एकभक्तवन्निर्णयः अविशेषो मदनरत्ने गारुडे हविष्यभोजनं स्नानं सत्यमाहारलाघवं
अग्निकार्यमधः शय्यां नक्तभोजी षडाचरेत् अग्निकार्यं व्याहृतिहोमः इति नक्तं अयाचिते तु विशेषवचनाभा
वात्पैत्रेऽप्युपवासप्राप्तेरुपवासवन्निर्णयः अथ नक्षत्रव्रतकालः विष्णुधर्मे उपोषितव्यं नक्षत्रं यस्मिन्नस्तमि
यादृविः युज्यते यत्र वा तारा (नक्षत्र) निशीथे शशिना सहेति माधवीये स्कान्दे तत्रैवोपवसेदृक्षे यन्निशीथादधो भवेत् उप
वासे यदृक्षं स्यात्तद्दिनं नक्तैकभक्तयोः अथ व्रतपरिभाषा तत्राधिकारिणो मदनरत्ने भविष्ये अनग्नयस्तु ये विप्रास्तेषां
श्रेयो विधीयते व्रतोपवासनियमैर्नानादानैस्तथा नृप अनग्निमहतामुपवासविषयं अत एव देवलः आहिता
(उपवासः)
ग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः अश्नन्त एव सिद्ध्यन्ति नैषां सिद्धिरनश्नतां एकादश्यादौ तु वचनाद्भवतीति वक्ष्यामः
शूद्रस्याप्यधिकारः शूद्रो वर्णश्चतुर्थोऽपि वर्णत्वाद्धर्ममर्हति वेदमन्त्रस्वधास्वाहावषट्कारादिभिर्विनेति व्यासोक्तेः

स्वकार्यसाधनक्षमाभावेति २

अनग्निनैवोपवासो विधेयो न साग्निना ३

फलं।व्युष्टिःफलेसमृद्धौचेत्यमरः२

चतुर्थदिनेऽन्नत्यागः२

प्राच्यास्तुवैश्यशूद्रयोर्द्विरात्राधिकोपवासनिषेधः वैश्याःशूद्राश्चयेमोहादुपवासंप्रकुर्वते त्रिरात्रंपंचरात्रंवा
२५ तेषांव्युष्टिर्नविद्यते इतिवचनादित्याहुः चतुर्थभक्तक्षपणंवैश्येशूद्रेविधीयते त्रिरात्रंतुनधर्मज्ञैर्विहितंब्रह्म
वादिभिरितिहेमाद्रौवचनात्यावादुक्तनिषेधइत्येके प्रकरणात्महातपोविषयेइत्युक्तं एवंस्त्रीणामपि यत्तुस्कां
दे नास्तिस्त्रीणांपृथग्यज्ञोनव्रतंनाप्युपोषणं भर्तृशुश्रूषयैवैतालोकानिष्टान्व्रजंतिहि यद्देवेभ्योयच्चपित्रा
दिकेभ्यःकुर्याद्भर्त्ताभ्यर्चनंसत्क्रियांच तस्यार्द्धंवैसाफलंनान्यचित्तानारीभुंक्तेभर्तृशुश्रूषयैव आदित्यपुराणे
नारीखल्वननुज्ञाताभर्त्रावापिसुतेनवा विफलंतद्भवेत्तस्यायत्करोत्यौर्ध्वदेहिकं और्ध्वदेहिकंपारलौकिकं तद्भर्त्र
ननुज्ञाविषयं भार्यापत्युर्मतेनैवव्रतादीनाचरेत्सदेतिकात्यायनोक्तेः अत्रविशेषोहरिवंशे स्नानंचकुर्यात्सरसस्त
तःफलमवाप्नुयात् स्नात्वास्त्रीप्रातरुत्थायपतिंविज्ञापयेत्सती तथा गृहीत्वोदुंबरंपात्रंसकुशंसाक्षतंतथा गोशृंग
दक्षिणांसिंच्यप्रगृह्णीयाच्चतज्जलं औदुंबरंताम्रमयं ततोभर्त्तुःसतीदद्यात्स्नातस्यप्रयतस्यच आत्मनश्चाभिषेकं

मनसावाचावा २ समाप्तिमारंभंच ३ हस्तेनवारिकुशानादाय संकल्पवाक्यमुच्चार्यवा २

व्यंततः शिरसितज्जलं उपवासेषुकर्त्तव्यमेतद्धिव्रतकेषुचेति सर्वव्रतेषुसंकल्पविधिश्च भारते महीलौदुंबरं
पात्रंवारिपूर्णमुदङ्मुखः उपवासंतुगृह्णीयाद्यद्वासंकल्पयेद्बुधः हस्तेनैवेत्यर्थः अथव्रतारंभकालः मदनरत्ने
गार्ग्यः अस्तगेचगुरौशुक्रेबाल्येवृद्धेमलिम्लुचे उद्यापनमुपारंभंव्रतानांनैवकारयेत् रत्नमालायां सोमसौम्य
गुरुशुक्रवासराः सर्वकर्मसुभवंतिसिद्धिदाः भानुभौमशनिवासरेषुचप्रोक्तमेवखलुकर्मसिध्यति तथा विरुद्धसं
ज्ञाऽहृदयेचयोगास्तेषामनिष्टः खलपादआद्यः सवैधृतिस्तुव्यतिपातनामासर्वोप्यरिष्टः परिघस्यचार्द्धं तिस्रस्तुयो
विष्कुंभे ४ गाःप्रथमेसवज्रेव्याघातसंज्ञेनवपंचशूले गंडेतिगंडेचषडेवनाड्यः शुभेषुकार्येषुविवर्जनीयाः संग्रहे कश्यपेन
परदले ३ दिक्संयोर्दृष्ट सप्तमीभूतपोरधः शुक्लेवेदेशयोर्दृष्ट भद्राप्राग्वसपूर्णयोः श्रीपतिः नसिद्धिमायातिकृतंचविष्ट्यांवि
षारिघातादिकमत्रसिद्धं व्यवहारसमुच्चये दशम्यामष्टम्यांप्रथमघटिकापंचकपरं हरिर्घुःसप्तम्यांद्विदेशघटिकां
तेत्रिघटिकं तृतीयाराकायांरवपंमघटिकाभ्यः परभवंशुभंविष्टेः पुच्छंशिवातिथिचतुर्थ्यास्तुविरमे तत्रैववासापि

अर्घादेकाघटिका १

पूर्वदलविहिताभद्राचोत्पासिद्वायां रात्रौभवतितथापर दलविहिताभद्राचेत्प्रसिद्धेदिनेभवतितदानसाज्या २ विष्टिर्भद्रामदातिथेः परदलं निशि दिनकृत्यप्रवृत्तातदाऽहनिशुभा। तथायदातिथेः पूर्वार्द्धे निशिदिनकृत्यप्रवृत्ता तदानिशिशुभा। तथापुच्छेचशुभा १

तत्र ४ आरंभः १ तदेवाह २

रात्रौतु सितपक्षेकृष्णेचैवतुवृश्चिकी सर्पिणायास्तुमुखंत्याज्यंवृश्चिकायाःपुच्छमेवच माधवीये विष्टिर्यदाहनि

१८ तिथेरपरार्द्धेजातापूर्वार्द्धेयानिशितदाशुभदाचपुच्छे ब्रह्मयामले दिनभद्रायदारात्रौरात्रिभद्रायदादिवा

नत्याज्याशुभकार्येषुप्राहुरेवंपुरातनाः व्रतारंभेचविशेषामदनरत्नेसत्यव्रतेनोक्तः ऽदयस्थातिथिर्याहिन

भवेत्दिनमध्यभाक् साखंडानव्रतानांस्यादारंभश्चसमापनमिति देवलः अभुक्त्वाप्रातराहारं स्नात्वाचम्य

समाहितः सूर्यायदेवताभ्यश्चनिवेद्यव्रतमाचरेत् मदनरत्नेभविष्ये क्षमासत्यंदयादानंशौचमिंद्रियनिग्र

हः देवपूजाग्निहवनंसंतोषस्तेयवर्जनं सर्वव्रतेष्वयंधर्मःसामान्योदशधास्मृतः अग्निहोमस्तद्दैवत्यःव्या

हृतिहोमोवातिवर्द्धमानः यत्तुतेनोक्तं सर्वपदमेतत्पुराणोक्तप्रकृतपरं व्रतांतरेतुविध्यंतरसत्वेहोमोन्यथान

स्मृतएवैकादश्यांशिष्टानांहोमानाचरणमिति तन्न जपोहोमश्चेतिवृद्धयमाणैकवाक्यत्वेनास्यकाम्यव्रतस

मासिपरत्वात् तत्वंतुसामदशोस्यपद्युमित्रविंदादिप्रकरणस्थेनवतत्तद्व्रतविशेषहोमविधिभिरस्योपसंहार

अयमर्थः। सप्तदशमंत्रसाध्यंकर्मसाप्तदश्यंतत्पशुप्रकरणेपठ्यते। मित्रविंदाप्रकरणेच। ताभ्यांवहिर्भ्रातिनस्यप्रकरणस्थेनयथोपसंहारस्यार्थः ९

दंतधावनमकृत्वे त्यर्थः। तत्स्थानेगं डूषत्रयपरैरर्थि भीमुखशुद्धिःका र्येतिबोध्यम् ४

व्रताधिष्ठातृदेवतामूर्त्तयः ३

इति विष्णुधर्मे तज्जप्यजपनध्यानतत्कथाश्रवणादिकं तदर्चनं च तन्नामकीर्त्तनश्रवणादयः ऽपवासकृता मेते गुणाः प्रोक्ता मरीचिप्रमुखैः कौमे वहिर्ग्रामांत्यजान्सूतिपतितं तु रजस्वलां नस्पृशेन्नाभिभाषेत नेक्षेत व्रतवासरे पृथ्वीचंद्रोदये अग्निपुराणे स्नात्वाव्रतवतासर्वेव्रतेषु व्रतमूर्त्तयः पूज्याः सुवर्णमय्याद्याः शक्त्याथवे भूमिशायिना जपो होमश्च सामान्यं व्रतांते दानमेव च चतुर्विंशद्द्वादश वा पंच वा त्रय एव वा विप्राः पूज्या यथा सदन्नभोजनेन ४

शक्तितेभ्योदद्याच्च दक्षिणां अत्र विप्रा इति पुल्लिंगनिर्देशात्पुमांस एव भोज्या न तु स्त्रियः एवं सहस्रभोजनादा वपि विरूपैकशेषस्य प्रमाणांतरं विनाऽयुक्तत्वात् अत एव द्वयोर्यजमानयोः प्रतिपदं कुर्यात् वहुभ्यो यजमा नेभ्य इत्यादौ विरूपैकशेषायोगात् पत्न्यभिप्रायं द्वित्वं वहुत्वं वा न संभवतीत्युक्तमाचार्यैः पार्थसारथिना च एते नैकस्य ब्राह्मणस्यावृत्त्या भोजनं परास्तं वहुत्वस्य एकपदश्रुत्या ब्राह्मणरूपेऽन्वितत्वेन भोजनान्वयाभावादित्यन्यत्र विस्तरः शूद्रस्य तु प्रतिष्ठादिवत् विप्रद्वारा व्याहृतिहोमः इति वर्द्धमानः व्रतमूर्त्तयो व्रतदेवताप्रतिमाः प्रतिमास्वरूपं

ब्राह्मणान्भोजयेदिति वाक्ये ब्राह्मणानित्येकपदेश्रवणाच्च वहु× त्वस्य प्रकृत्यर्थे ब्राह्मणेऽन्वितत्वेन। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थवोधजननत्वनियमादित्यर्थः २

एकः प्रजापतिश्छन्दोऽर्थद्वयपरः। मंत्रानुक्तौ प्रजापतिर्देवता व्याहृतिर्देवतानुक्तौ प्रजापतिः ३

च मदनरत्ने भविष्ये अनुक्तद्रव्यतत्संख्यादेवताप्रतिमानपि सौवर्णी राजती ताम्री वा मृज्जा मार्त्तिकी तथा चित्रजा पि
१८ ष्टलेख्या वा निजवित्तानुरूपतः आमाषात्पलपर्यंतं कर्त्तव्या शाठ्यवर्जितैः तत्रैव ब्राह्मे आज्यं द्रव्यमनादेशे जु
होतिषु विधीयते मंत्रस्य देवतायाश्च प्रजापतिरिति स्थितिः मंत्रानुक्तौ समस्तव्याहृतिरूपो मंत्रः प्रजापतिश्च देव
तेति कल्पतरुः वर्द्धमानधृतदेवीपुराणे होमो ग्रहादिपूजायां तिमष्टाधिकं भवेत् अष्टाविंशतिरष्टौ वा यथाप्रा यथाशक्ति ४
प्ति विधीयते मदनरत्ने अनुक्तसंख्याय त्रस्याष्टशतमष्टोत्तरं स्मृतं वर्द्धमानधृतब्रह्मशातातपः उपवासं द्विजः कृ
त्वा ततो ब्राह्मणभोजनं कुर्यात्तेनास्य सगुणोऽपवासोऽभिजायते व्रतोद्यापनानुक्तौ तु पृथ्वीचंद्रोदये नंदिपुराणे
कुर्यादुद्यापनं तस्य समाप्तौ यदुदीरितं उद्यापनं विना यत्तु व्रतं तन्निःफलं भवेत् यदि चोद्यापने नोक्तं व्रतानुगुणतश्च
रेति वित्तानुसारतो दद्यादनुक्तोद्यापने व्रते गाश्चैव कांचनं दद्याद्व्रतस्य परिपूर्त्तये वचाद्विप्रवचो यस्तु गृह्णाति मनु
जः शुभं अदत्वा दक्षिणां पापः स्यातिनकं ध्रुवं भारते वेदोपनिषदे चैव सर्वकर्मसु दक्षिणा सर्वत्र तु मयादिष्टा

दंद्याद्युदाम्रहेतिटच १

क्षारलवणानुत्स्वादुनः ३

भूमिर्गावोथकांचनं वैजवापः शिवनेत्रोद्भवं यस्माद्‌जातं पितृवल्लभं अमंगलं तद्यत्नेन देवकार्येषु वर्जयेत् देवी
पुराणे व्रते च तीर्थे ध्ययने श्राद्धेपि च विशेषतः परान्नभोजनाद्देवि यस्यान्नं तस्य तत्फलं पृथ्वीचंद्रोदये ग्निपुरा
णे नित्यस्नायी मिताहारो गुरुदेवद्विजार्चकः क्षारं क्षौद्रं च लवणं मधुमांसं निवर्जयेत् क्षारास्तु तत्रैवोक्ताः तिलमु
द्गादृते शैव्य सस्यै गोधूमकोद्रवौ धान्यकं देवधान्यं च समीधान्यं तथैव च स्विन्नधान्यं तथापण्यं मूलं क्षारगणाः
स्मृतः गोधूमानां तु तत्रैव प्रतिप्रसवः व्रीहिषष्टिकमुद्गाश्च कलायः सतिलं पयः श्यामाकाश्चैव नीवारा गोधूमाद्या
व्रते हिताः कूष्मांडालाबुवार्त्ताकपालंकी ज्योत्स्निकास्त्यजेत् चतुर्भैक्ष्यं सक्तुकणाः शाकं दधिघृतं मधु न स्यामा
काः शालिनीवारा यावकं मूलतंडुलं हविष्यं व्रतनक्तादावग्निकार्यादिके हितं मधुमांसं विहायान्यद्व्रते वा हितं
मीरितं मिति शिंवी धान्यं माषादि पालंकी मध्यदेशी पोइ इति प्रसिद्धः ज्योत्स्निका कौशातकी मिताक्षरायां गो
तमः चतुर्भैक्ष्यं सक्तुकणायावकशाकपयोदधिघृतमूलफलोदकानि हवींष्युत्तरोत्तरं प्रसस्तानि पयोदधिघृ

यवविकारः ३

क्षौद्रादि ३

तं चगाव्यमिति अन्येचविशेषा एकादशीचातुर्मास्यादिप्रकरणेवक्ष्यंते गृहीतव्रतत्यागेतुमदनरत्ने छागलेयः

२८ पूर्वंवृतंगृहीत्वायोनचरेत्काममोहितः जीवन्भवतिचांडालोमृतःश्वाचाभिजायते तत्रप्रायश्चित्तमुक्तं पृथ्वी

चंद्रोदये अग्निगरुडपुराणयोः क्रोधात्प्रमादाल्लोभाद्व्रतभंगोभवेद्यदि दिनत्रयंनभुंजीतमुंडनंशिरसोथवे

ति प्रायश्चित्तस्नानादतिक्रांतव्रतानुष्ठानेनास्तीतिगम्यते अतिक्रांतमपिव्रतंकार्यमेवेतिशूलपाणिः एतच्चैश

क्तविषयं असंक्तौतुकामहेमाद्रौपुराणांतरे उपवासासमर्थश्चेदेकंविप्रंतुभोजयेत् तावद्धनादिवाद्यद्भुक्तेन्य

द्विगुणंतथा भुक्तः कृतभोजनःब्राह्मणभोजनंविनेतिशेषः सहस्रसंमितांदेवींजपेद्वाप्राणासंजमान् कुर्याद्वा

द्दशसंख्याकान्यथाशक्त्यातुरोनरइति भुद्धितत्वेमात्स्ये उपवसेच्चशक्तानांनक्तंभोजनमिष्यते मदनरत्नेवायवी

ये द्रव्यदतोपवासस्यफलंप्राप्नोतिसंसंयं तथापराकेदेवलः ब्रह्मचर्यंतथाशौचंसत्यमामिषवर्जनं व्रतेष्वेता

निचत्वारिवरिष्ठानीतिनिश्चयः मात्स्ये तस्मात्कृतोपवासेनस्नानमभ्यंगपूर्वकं वर्जनीयंप्रयत्नेनरूपघ्नंतत्परंनृप

अंतरीयोत्तरीये २

अन्ये च नियमास्तत्र तत्रान्वेषणीयाः अथ स्त्रीव्रतेषु विशेष उच्यते तत्र हेमाद्रौ व्रतकांडे गारुडे गंधालंका
रतांबूलपुष्पमालानुलेपनं उपवासे न दुष्यंति दंतधावनमंजनमिति इदं च सभर्तृकोपवासविष
यं अंजनं वस्त्रतांबूलं कुंकुमं रक्तवाससी धारयेत्सोपवासापि नित्यमवैधव्यकरं ततः विधवापतिमार्गेण कुमारी
वा पदद्वये तितत्रैव भविष्योक्तेः तथा विष्णुधर्मे सर्वेष्वेतूपवासेषु पुमान्वा यस्तु वासिनी धारयेद्रक्तवस्त्रा
णि कुसुमानि सितानि च विधवास्तु शुक्लवसनमेकमेव हि धारयेत् मनुरपि पुष्पालंकारवस्त्राणि गंधधू
पानुलेपनं उपवासे न दुष्यंति दंतधावनमंजनं मदनरत्ने व्यासः दंतधावनं पुष्पादिव्रतेष्वस्या न दुष्यती
ति यद्यपीदं सर्वोपवासविषयं प्रतीयते तथापि शिष्टाचारात्सौभाग्याद्यर्थं क्रियमाणनवरात्रिरात्र्या
द्युपवासविषयमेव नत्वेकादश्यादिविषयं असकृज्जलपानाच्च सकृत्तांबूलचर्वणात् उपवासः प्रणश्येत
दिवास्वापाच्च मैथुनादित्यपरार्के देवलेन तांबूल तन्निषेधात् नचास्य पुंविषयत्वेन सावकाशत्वात्स्त्रीणां तांबूला

तांबूलनिषेधस्य २

पुराणपकसंज्ञकंव्रतम् ३

दिप्राप्नोतीतिवाच्यं तांबूलादिप्रापकस्यैवैकादशीतरविषयत्वेनैवपरीतिस्यापिसुवचत्वात् यत्तुहरिवंशे
अभ्यंजनंरोचनंचैवगंधान्सुमनसस्तथा व्रतेचैवोपवासेच नित्यमेवविवर्जयेत् शिरसोभ्यंजनंसौम्यनैवमृत
तस्संस्पृशेत नपादयोर्नगात्रस्यस्नेहेनेतिस्थितिःस्मृतेति. तत्रैवोक्तपुराणपकव्रतविषयंनतुसर्वत्र पूर्वोक्त
विरोधादितिमदनरत्नेऽउक्तं तत्रैव अश्रुप्रपातोरोषश्चकलहस्यकृतिस्तथा उपवासाद्धृताच्चापिसद्योभ्रंस
यतिस्त्रियं स्त्रियमित्युपलक्षणंमदनरत्नेशिवधर्मे दानंव्रतानिनियमाज्ञानंध्यानंहुतंजपः यत्नेनापिकृतं
सर्वंक्रोधनस्यवृथाभवेत् अथसूतकादौनिर्णयः तत्रशावसूत्याशौचयोःसर्वस्मार्त्तकर्मनिवृत्तिर्निषेधेषु
स्यष्टेवृद्धोडास्तुक्षताशौचादावपितामाहुः जानूर्ध्वंचक्षतेजातेनित्यकर्मनचाचरेत् नैमित्तिकंचतदधःस्र
वद्रक्तोनचाचरेत् पातकेचसमुत्पन्नेज्वरकर्मणिमैथुने धूमोद्गारेतथावांतौनित्यकर्माणिसंत्यजेत्
द्वेवभुक्तेत्वजीर्णेचनेवभुक्त्वापिकिंचन कर्मकुर्यान्नरोनित्यंसूतकेमृतकेतथेतिकालिकापुराणात् वस्तुत

स्तु पूर्वं देवीपूजोपक्रमात्तन्मात्रविषयत्वमस्येतिप्युक्तं प्रतीमः तथा हेमाद्रौ पाद्मे गर्भिणीसूतिकादिभ्यश्च कुमारीवा
परोगिणी यदाशुद्धा तदान्येन कारयेत्प्रयता स्वयमिति पुंसोप्येष विधिः लिंगस्याविवक्षितत्वात् तेन यस्मिन्न
तेयत्पूजाद्युक्तं तदन्येन कारयेत् शारीरनियमान् स्वयं कुर्यादिति हेमाद्रिर्व्याचख्यौ नवेति नां व्रते इति विशेषोक्तेश्च
आशौचे ४ आरंभस्तु न भवत्येव शुद्धितत्त्वे विष्णुः वहुकालिकसंकल्पो गृहीतश्च पुरा यदि सूतके मृतके चैव व्रतं तन्नैव दुष्यति
एतत्काम्यपरं नित्यं तु नारब्धमपि कार्यमिति गौडाः मदनरत्ने पूर्वसंकल्पितं यच्च व्रतं सुनियतव्रतैः तत्कर्त्तव्यं न
प्रधानमात्रम् ४ नरैः शुद्धं दानार्चनविवर्जितमिति एतेन सांगेष्वधिकाराद्व्रतांगदेवपूजादि कार्यमिति वर्द्धमानोक्तिः परास्ता प्रारब्धे
पूजादि कार्यमेव नवरात्रे तु तत्रैव विशेषं वक्ष्यामः एवं रजस्वलापि यत्तु सत्यव्रतः प्रारब्धदीर्घतपसां नारीणां य
द्रजो भवेत् न तत्रापि व्रतस्य स्यादुपरोधः कदाचनेति तत्प्रतिनिधिना कार्यं चेदिष्येत तत्परं तदुक्तं मदनरत्ने मात्स्ये
अंतरा तु रजोयोगे पूजामन्येन कारयेदिति प्रतिनिधयश्च निर्णयामृते पैठीनसिः भार्या पत्युर्व्रतं कुर्याज्जाया या

अंगरहितप्रधानकथनेन ४

श्चपतिव्रतं असामर्थ्येपरस्ताभ्यांव्रतभंगोनयाँयते स्कांदेपि पुत्रोवाविनयोपेतंभगिनींभ्रातरंतथा एषामभावएवा
२ न्यंब्राह्मणंवानियोजयेत् कात्यानः पितमातभ्रातपतिगुर्वर्थेच विशेषतः उपवासंप्रकुर्वाणाःपुण्यंशतगुणंलभे
त् मातामहादीनुद्दिश्यएकादश्यामुपोषणे कृतेतंतुफलंविप्राःसमग्रंफलमाप्नुयुः मदनरत्नेप्रभासखंडे भर्त्तापु
त्रःपुरोधाश्चभ्रातापत्नीसखापिच यात्राधर्मकार्येषु जायंतेप्रतिहस्तकाः एभिःकृतंमहादेविस्वयमेवकृतंभवेत्
तत्रैववायवीये स्वयंकर्त्तुमसक्तश्चेत्कारयीतपुरोधसा इदंचसर्ववर्णसाधारणं अविशेषात् यत्तुकश्चिदाह शूद्रस्य
ब्राह्मणादिरेवप्रतिनिधिर्युक्तोनशूद्रः जपस्तपस्तीर्थसेवाप्रव्रज्या मंत्रसाधनं विप्रैःसंपादितंयस्यसंपन्नंतस्यतत्फ
लमितिमरीचिवचनात् इति तन्तुच्छं प्रव्रज्यादौ नोशूद्रसंभवाद्विषयेप्रायदर्शनादितिन्यायेनास्यब्राह्मणादिगो
चरत्वात् यदापिउपवासोव्रतंहोमस्तीर्थस्नानजपादिकमितिपूर्वार्द्धपाठस्तदापिसएवदोषः स्त्रीशूद्रपतनानिषेधि
तिमानवीयेजपनिषेधात् वस्तुसंपूर्णतावचनमात्रेमंत्रोच्यतेइतिप्रतिनिधेःकावार्त्तेत्यलं अत्रविशेषमाहत्रिकांड

तस्तु १

संदेहेसतिविशेषादर्शनात् ३
प्रतिनिधेःप्रसंगएवात्रनास्तीत्यर्थः १

अग्न्युत्पादकत्वादग्निरेवैतत्रप्रतिनिधिप्रभावउत्तएव २

पूर्वकालविधानात् ५

आरंभात् १

मंडनः काम्येप्रतिनिधिर्नास्तिनित्येनैमित्तिकेचसः काम्येप्युपक्रमादूर्ध्वंकेचित्प्रतिनिधिंविदुः नस्यात्प्रतिनिधि
र्मंत्रस्वामिदेवाग्निकर्मसु संदेशकालयोर्नास्तिनारणौरग्निरेवसा नापिप्रतिनिधातव्यंनिषिद्धंवस्तुकुत्रचित्
हिरण्यकेशीसूत्रेपि नस्वामीत्वस्यभार्यायाःपुत्रस्यदेशस्यकालस्याग्नेर्देवतायाःकर्मणःशब्दस्यचप्रतिनिधिर्वि
तइति अथव्रतादिसंनिपातेनिर्णयः तत्रतिथिद्वयसंनिपातेतत्रोक्तंदानहोमादिक्रमेणानुष्ठेयं अविरोधात्
यत्रतुनक्तैकभक्तादौविरोधस्तत्रपूर्वाद्यम्यादिकभक्तंकार्यं नक्तंतुपरेद्युस्तत्तिथियोगेगौणकालेकार्यं समकालीनविरुद्ध
व्रतादौत्वेकंस्वयंकृत्वान्यद्भार्यादिनाकारयेदितिमाधवः यत्रतुशिवरात्र्यादौतिथिमध्येपारणास्यान्निभोजनं
प्राप्तं भूताष्टम्योर्दिवाभुक्त्वारात्रौभुक्त्वाचपर्वणि एकादश्यामहोरात्रंभुक्त्वाचांद्रायणंचरेदितितन्निषेधश्च त
त्रपारणाप्राप्तवैधत्वाद्विवभोजनं निषेधस्तुरागप्राप्तभोजनविषयः एवमष्टम्यादिनक्तव्रतेसंक्रांत्यादौरवौसंक
ष्टचतुर्थ्यांचरात्रौभोजनं यत्रत्वष्टम्यादौदिवाभुजिनिषेधः संक्रमेचरात्रावितिनिषेधद्वयंतत्रोपवासएवकार्यः

निषिद्धमपिवैधंकार्य्यम् १

एकस्मिन्नहोरात्रे १

मासोपवासादिषुद्वादश्यांसत्यांजलपारणमेव ४

यद्यपिप्रवृत्तिरोऽउपवासोऽपिनिषिद्धस्तथापिउपवासनिषेधेतुभक्ष्यंकिंचिन्नकल्पयेदितिवचनात्किंचिद्भुक्त्वापि
२१ त्वोपवासःकार्यः चांद्रायणमध्येएकादश्यादौतुभोजनंकार्यमेव चांद्रायणस्यकाम्यत्वेननित्यबाधकत्वात्
अबाधेनगत्यसंभवाच्च एकादश्यामेकांतरोपवासादिपारणायां मासाद्या जलपारणंकृत्वोपवासेत् आपोवाअशितमन
शितंचेतिश्रुतेः एवंद्वादश्यांमासोपवासश्राद्धप्रदोषादिषुज्ञेयं एवंकाम्यनैमित्तिकनित्यत्वादिकृतबलाबलंस्व
यमूह्यमितिदिक् इतिकमलाकरभट्टकृतेनिर्णयसिंधौपरिभाषा अथप्रतिपदादितिथिनिर्णयः शुक्लप्रतिप
दपराह्णव्यापित्वेपूर्वाग्राह्या युग्मवाक्यात् प्रतिपत्संमुखी पूर्वा कार्यायाभवेदापराह्णिकीतिस्कांदोक्तेः शुक्लास्यात्प्र
तिपत्तिथिः प्रथमतश्चेत्सापराह्णेभवेदितिदीपिकोक्तेश्च अपराह्णश्चपंचधाभक्तेदिनेचतुर्थोभागः तद्भावे
शींयाह्नव्यापिनीग्राह्या तदभावेसायाह्नव्यापिनीपरिग्राह्यतामितिमाधवोक्तेः कृष्णातुपरा कृष्णात्तूत्तरतो
रिवलेतिदीपिकोक्तेः कृष्णापिपूर्वैवेत्यनंतभट्टः सर्वतिथिषुवर्ज्यान्युक्तानिमुहूर्तवर्ज्यादीपिकायांकूष्मांडंब्रह

युग्मवाक्यस्योभयसाधारण्यादितिनदाग्रहः सचविशेषवचनविरुद्धः १

स्वर्गगमनेच्छावता १

तीफलानि लवणं वर्ज्यैतिलाम्लंतथा तैलंचामलकंदिवं प्रवसतां शीर्षकपालांत्रके निष्पावाश्च मसूरिका न्फ-
लमयोर्वं तांकसंज्ञं मध्वं घृतं स्त्रीगमनं क्रमात्प्रतिपदादिषु एवमाषोडश शीर्षनालिकेरं कपालं त्वलावु श्चंत्रं
पटोलं भूपालः कूष्मांडं बृहती द्वार मंमूलकं पनसं फलं धात्रीशिरः कपालांत्रं नखचर्मतिलानि च तुरकमीगा
नासेवां प्रतिपत्प्रभृतित्यजेत् नखंशिंवी चर्ममसूरिकाः द्वितीयातु कृष्णापूर्वाभ्युक्तान्तरे तिहेमाद्रिः कृष्णाद्विती
यादिमापूर्वान्हेयदिसाऽसितानुपरतः सर्वेतु दोषपिकोक्तेः माधवानंतभट्टमतेतु सर्वापि द्वितीयापरा तथाचमाध
वः पूर्वेद्युरसती प्रातः परेद्युस्त्रिमुहूर्त्तगा साद्वितीयापरोपोष्यापूर्वविद्धातमान्यथेति ततीतुसर्वमतेरंभाव्यतिरि
क्तापरैव तेनयुग्मवाक्यंरंभाविषयं रंभाख्यांवर्जयित्वातु तृतीयां द्विजसत्तम अन्येषु सर्वकार्येषु गणयुक्ता प्र
शास्यते इति ब्रह्मवैवर्त्तात् गौरीव्रतेतु विशेषमाह माधवः मुहूर्त्तमात्रसत्वेपि दिने गौरीव्रतंचरेत् शुद्धाधिकायामप्
येवं गणयोगप्रशंसनादिति चतुर्थ्यपि सर्वमते गणेशव्रतातिरिक्ता परैव युग्मवाक्यात् एकादशी तथा षष्ठी अ

मावास्याचतुर्थिका उपोष्याः परसंयुक्ताः पराः पूर्वेणासंयुताः इतिमाधवीयेबृहद्वसिष्ठोक्तेश्च नागचतुर्थीतुम
ध्यान्हव्यापिनीपंचमीयुताचग्राह्येतिनिर्णयामृते माधवीयेचोक्तं युगंमध्यंदिनेयत्रतत्रोपोष्यफणीश्वरान्
क्षीरेणाप्याय्यपंचम्यांपूजयेत्प्रयतोनरः विषाणितस्यनश्यंतिनतान्हिंसंतिपन्नगाइतिमाधवीयेदेवलोक्तेः
युगंचतुर्थी पूर्वेद्युर्मध्यान्हव्याप्तौपूर्वा अन्यपक्षेषुपरैव पंचम्यांपूजोक्तेः गणेशव्रतेतुततीयायुतैवंचतुर्थीतु
ततीयायांमहापुण्यफलप्रदा कर्त्तव्याव्रतिभिर्वत्सगणनाथसुतोषिणीतिहेमाद्रौब्रह्मवैवर्तात् माधवीयेतु
गणेशव्रतेमध्यान्हव्यापिनीमुख्या चतुर्थीगणनाथस्यमातृविद्धाप्रशस्यते मध्यान्हव्यापिनीचेत्स्यात्परत
श्चेत्परेऽहनीतिबृहस्पतिवचनात् प्रातःशुक्लतिलैःस्नात्वामध्यान्हेपूजयेन्नृपेतितत्कल्पाभिधानाच्च तेनपरदिने
तत्वपरा अन्यथापूर्वेत्युक्तं वस्तुतस्तु तत्रभाद्रशुक्लचतुर्थ्यादौगणेशव्रतविशेषेमध्यान्हपूजोक्तातद्विषयाण्ये
वप्रागुक्तवचनानिनतुसर्वविकारिणि संकष्टचतुर्थ्यादौबहूनांकर्मकालानांबाधापत्तेः तेनसर्वत्रगणेशव्रतेपूर्वैः

चंद्रार्घ्यादीनाम् १

समन्विता तस्यांतुतुषिता नागाइतरासचतुर्थ्यिकेति तेननागपूजादोपरैव यत्तुमदनरत्नेदिवोदासीयेप्योः
२३ श्रावणेपंचमीशुक्लासंप्रोक्तानागपंचमी तांपरित्यज्यपंचम्यांश्चचतुर्थीसहिताहिताइतिसंग्रहोक्तेः गौतो
शस्कंदयोगाभ्यांक्रमान्नागोस्तुभाष्युभः मित्रामित्रेतयोः पत्रेनागानामाखुवर्हिणाविति बौद्धायनमताच्चस्या
वरापंचम्यतिरिक्तायाः पंचम्याश्चतुर्थीयुतत्वमुक्तंतदुपवासादिविषयं पत्रेवाहने षष्ठीसर्वमतेस्कंदध्व
तातिरिक्तापरैवयुग्मवाक्यात् गौविद्धानकर्त्तव्याषष्ठीचैवकदाचनेतिस्कांदाच्च निर्णयामृते षष्ठीचसप्त
मीचैववारश्चेदंशुमालिनः योगोयंपद्मकोनामकोटिसूर्यग्रहैःसमः सप्तमीपूर्वैवयुग्मवाक्यात् षष्ठ्या
युतासप्तमीचकर्त्तव्यातातसर्वदेतिस्कांदाच्च अष्टमीतुसर्वमतेक्वापूर्वासितापरा व्रतमात्रेष्टमीकृष्णापू
र्वाशुक्लाष्टमीपरेतिमाधवोक्तेः परयुक्शुक्लाष्टमीपूर्वयुक्कृष्णेतिदीपिकोक्तेश्च शिवशक्त्युत्सवेतुकृष्णा
प्युत्तरा पक्षद्वयेप्युत्तरैवशिवशक्तिमहोत्सवे इतिमाधवोक्तेः दिवोदासीयेभविष्ये यदायदासिताष्टम्यांबुधवा

वेतिसिद्धं संकष्टचतुर्थीतुचंद्रोदयव्यापिनीग्राह्यादिनद्वयेतत्त्वेमातृयोगस्यसत्वात्पूर्वेतिकेचित् अन्येतुदि
नेमुहूर्त्तत्रयादिरूपस्यतृतीयायोगस्याभावात्परदिनेमाध्यैँक्तमध्यान्हव्याप्तिसत्वात्संपूर्णत्वाच्चपरेत्यँचद
ते दिनद्वयेतदभावेतुपरैव गौरीविनेतपूर्वैव गणेशगौरीवहुलाव्यतिरिक्ताःप्रकीर्त्तिताः चतुर्थ्यःपंचमीवि
द्धादेवतांतरयोगतइतिमदनरत्नेब्रह्मवैवर्त्तात् पंचमीतुमाधवमतेसर्वापिपूर्वा चतुर्थीसंयुताकार्यापंचमी
परयानतुदैवेकर्मणिपित्र्येचशुक्लपक्षेतथाऽसितेइतिहारीतोक्तेः हेमाद्रिमतेतुकृष्णापूर्वासितापरा
कृष्णापूर्वयुतासितापरयुतास्यात्पंचमीतिदीपिकोक्तेः वस्तुतस्तु हारीतोक्तिरुपवासविषया प्रतिपत्पंचमी
चैवसावित्रीभूतपूर्णिमा नवमीदशमीचैवनोपोष्याःपरसंयुताइतिब्रह्मवैवर्त्तात् यत्तुपंचमीतुप्रकर्त्तव्याषष्ठी
युक्तातुनारद इत्यापस्तंवीयेन स्कंदव्रतपरं स्कंदोपवासेस्वीकार्यापंचमीपरसंयुतेतिवाक्यशेषादितिमाध
वः नागपूजाविषयमितिनिर्णयामृतादयः चमत्कारचिंतामणौ च पंचमीनागपूजायांकार्याषष्ठी

क्वचित् १

राभवेत्तं तदा तदाहि सामाद्यादेकभक्ताशनेनच संध्याकालेतथाचैवंप्रसुप्तेस्वजनादिने वुधाष्टमीनकर्त्तव्याहं
तिपुरायंपुराकृतं नवमीतुसर्वमतेपूर्वायुग्मवाक्यात् नकुर्यान्नवमीतातदशम्यातुकदाचनेतिस्कांदाच्च दश
मीतुपूर्वापरावेतिहेमाद्रिः कृष्णापूर्वोत्तराशुक्लादशम्येवंव्यवस्थितेतिमाधवः वस्तुतस्तु मुख्यानवमीयुतेवमा
न्या दशमीतुप्रकर्त्तव्यासदुर्गाद्विजसत्तमेतिश्रापस्तंवोक्तेः यत्तुसंपूर्णादशमीकार्यापूर्वयापरयाथवेत्यंगि
रसोक्तंतन्नवमीयुक्तालाभेश्रौदयिकीग्राह्येत्येवंनेयं अथैकादशी तत्रैकादश्युपवासोद्वेधा निषेधपरि
पालनात्मकोव्रतरूपश्च तत्राद्यः नसंखेनपिवेत्तोयंनखादेत्कूर्मशूकरौ एकादश्यांनभुंजीतपक्षयोरुभयो
रपीतिकौर्मेदेवलाद्युक्तः अग्निपुराणेपि गृहस्थोब्रह्मचारीचश्राहिताग्निस्तथैवच एकादश्यांनभुंजीतप
क्षयोरुभयोरपीति नचात्रपर्युदासेनव्रतविधिः तद्वेतुव्रतादिशब्दाभावात् व्रतरूपंतुब्रह्मवैवर्त्ते प्राप्तेहरिदि
नेसम्यग्विधायनियमंनिशि दशम्यामुपवासस्यप्रकुर्याद्वैसवंव्रतमिति इदंचशिवभक्तादिभिरपिकार्यं

नित्यं२

वैष्णवो वाथ शैवो वा कुर्यादेकादशीव्रतमिति शिवधर्मोक्तेः वैष्णवो वाथ शैवो वा सौरोप्येतत्समाचरेत् इ
२४ ति सौरपुराणाच्च सोपि द्वेधा नित्यः काम्यश्च उपोष्यैकादशी पक्षयोरुभयोरपीति गारुडोक्तेः पक्षे पक्षे
च कर्त्तव्यमेकादश्यामुपोषणमिति नारदोक्तेश्च नित्यता यदीच्छेद्विष्णुसायुज्यं श्रियं संततिमात्मनः एका
दश्यां न भुंजीत पक्षयोरुभयोरपीति कौर्मादिषु फलश्रुतेश्च काम्यता उभय्येकादशीव्रतं गृहस्थातिरिक्तानां
मेव नित्यं गृहस्थस्य तु शुक्लायामेव व्रतं नित्यं न कृष्णायां एकादश्यां न भुंजीत पक्षयोरुभयोरपि वनस्थयति
धर्मोयं शुक्लामेव सदा गृही इति देवलोक्तेः न चानेन निषेधपालनमेव वनस्थयतिविषयेऽपसंह्रियते न
तु व्रतमिति वाच्यं अस्य पर्युदासेन व्रतविधिपरत्वात् अन्यथा पूर्वोक्तेनि पुराणवचने निषेधपालने गृहस्थ
स्याधिकारे तद्व्याविरोधः स्यात् निषेधस्य निवृत्तिमात्रफलत्वेन विशेषानपेक्षणादुपसंहारायोगात् अ
भावस्य धर्मत्वाभावाच्च तस्मादनेन सर्वेषामेकादशीव्रतविधायिनां सामान्यवाक्यानां वनस्थयतिविषयेऽ

निषेधो ह्यभावस्तस्योपसंहाराभावात् १

पसंहारान्नगृहस्थस्यकृष्णायांनित्यव्रतप्राप्तिः कथंतर्हि संक्रांत्यामुपवासंचकृष्णैकादशीवासरे चंद्रसूर्यग्र
हेचैवनकुर्यात्पुत्रवान्गृहीतिनारदादिवचनेषुकृष्णानिषेधः प्राप्त्यभावादितिचेत्सूयतां शयनीबोधिनी
मध्येयाकृष्णैकादशीभवेत् सैवोपोष्यागृहस्थेननान्याकृष्णाकदाचनेतिपा॰ द्मेगृहस्थस्याषाढीका
र्त्तिकीमध्यस्थायाकृष्णाविहितासापुत्रवतोनिषिध्यते अन्यथाकृष्णायांतुनविधिः सर्वविधीनांवनस्थय
तिषूपसंहारात् ननिषेधःप्राप्त्यभावात् शयन्यादिवाक्यंत्वपुत्रगृहिगोचरमित्यनंतभट्टहेमाद्र्यादिग्रंथाः दी
पिकापि असितात्वशयनीबोधांतरस्थाप्युपोष्यानस्यात्सात्मजैनोपीति मदनरत्नेभविष्ये यथाशुक्लातथाकृ
ष्णाद्वादशीमेसदाप्रिया शुक्लागृहस्थैःकर्त्तव्याभोगसंतानवर्द्धिनी मुमुक्षुभिस्तथाकृष्णानतेतेनोपदर्शिते
तिनिषेधपालनंकाम्यव्रतंचसर्वकृष्णार्थासर्वगृहिणांभवत्येव पुत्रवांश्चसभार्यश्चबंधुयुक्तस्तथैवच उभयोः
पक्षयोःकाम्यव्रतंकुर्यात्तुवैष्णवमितिनारदोक्तेः एतच्चसर्वकालादर्शेउक्तं विधवायावनस्थस्ययतेश्चैकाद

शौद्रेप्ये ऽपवासोमहेस्थस्यस्थस्त्नायामेवपुत्रिराः भुजेर्निषेधः कृष्णापांसिद्धिस्तस्यततोव्रतइति प्राच्यास्तुवै
२५ स्मवगहेस्यानांकृष्णापिनित्या नित्यंभक्तिसमापुक्तैः नैरैर्विष्णुपरापणैः पक्षेपक्षे चकर्त्तव्यमेकादश्यामु
पोषणं ॥ सपुत्रश्चसभार्यश्चस्वजनोभक्तिसंयुतः एकादश्यामुपवासेत्पक्षयोरुभयोरपि इतिनारदोक्तेरित्याहुः
पुत्रशब्दश्चापत्यमात्रवचनः नारायणाद्वतोपुमांसएवमेपुत्राजायेरन्नितपत्रापत्यमात्रवाचित्वोक्तेः जनयेद्
बहुपुत्राणीति लिंगात् पौत्रीमातामहस्तेनेतिमनूक्तेः पुत्र्यापत्यमित्यर्थेतुस्त्रीभ्योढकिपौत्रेयइत्यापत्तेः
पुमान्पुत्रोपीयतेतिच ऽपवासनिषेधेविशेषोवायवीयेऽक्तः ऽपवासनिषेधेतुभक्ष्यंकिंचित्प्रकल्पयेत् नदु
ष्यत्युपवासेनऽपवासफलंलभेत् भक्ष्यंचतत्रैवोक्तंनक्तंहविष्यान्नमनोदनंवाफलंतिलाःक्षीरमथांबुचा
यत्वं २ ज्यंचगव्यंयदिवापिवायुःप्रशस्तमत्रोत्तरमुत्तरंचेत्पलं तत्रदशमीवेधोद्विधा अरुणोदयवेधःसूर्योदयवेध
श्चेति आद्यागारुडे दशमीवेधसंयुक्तोयदिस्यादरुणोदयः नैवोपोष्यंवैष्णवेनतद्दिनेकादशीव्रतमिति अ

पुत्रस्यकन्यायाअपत्यंपौत्रः सोऽस्यास्तीतिपौत्री ५

अरुणोदयस्वरूपंच माधवीये स्कांदे ऽउदयात्प्राक् चतस्रस्तु घटिका अरुणोदय इति यदपि ऽ दयात्प्रागय
ताविप्रमुहूर्त्तद्वयसंयुता संपूर्णैकादशीनामतत्रैवोपवसेद्गृहीति गारुडसौरधर्मादिवचनं यच्चभविष्ये आ
दित्योदयवेलायाः प्राङ्मुहूर्त्तद्वयान्विता एकादशीतुसंपूर्णा विद्धान्यापरिकीर्त्तितेति तदप्युपसंहारन्या
येन दंडचतुष्टयपरमेव हेमाद्राप्येवं यत्तु ब्रह्मवैवर्त्ते चतस्रो घटिकाः प्रातररुणोदयनिश्चयः चतुष्टयविभा
गोत्र वेधादीनां किलोदितः अरुणोदयवेधः स्यात्सार्द्धं तु घटिकात्रयं अतिवेधो द्विघटिकः प्रभासंदर्शना
द्रवेः महावेधोपि नत्रैव दृश्यतेर्कोनदृश्यते तुरीयस्तत्र विहितो योगः सूर्योदये बुधैरिति तदप्यवयवद्वार
रुणोदयवेधविशेषपरमेवेति माधवीयमदनरत्नेच अंत्यस्तूदयवेधः तथान्येपि वेधा हेमाद्रौ माधवीये
चगारुडे ऽउदयात्प्राक् त्रिघटिकाव्यापिन्येकादशीयदा संदिग्धैकादशीनामवर्ज्येयं धर्मकांक्षिभिः ऽउदयात्प्रा
ङ्मुहूर्त्तेन व्यापिन्येकादशीयदा संयुक्तैकादशीनामवर्ज्येयं धर्मवृद्धये हेमाद्रौ रात्रिरंत्यो यष्टमोभागो ह्यरुणो

एकेइत्यनेनान्वयः ४ रात्रिविशेषणं ३

दयउक्तः निशीः प्रांतेतुयामार्द्धेदेव वादित्रवादने सारस्वतानध्ययनेवारुणोदयउच्यतेइतिस्मृतेः अत्रैकेरुए
२६ षांसर्वपक्षाणांमुहूर्त्तद्वयेनकोडीकारान्निशःप्रांत्येइतिवचनाद्रात्रिमानवसात्सार्द्धत्रिदंडाद्यपेनैकेरुणो
दयाः तदाहहेमाद्रिः सार्द्धघटिकात्रयेणाक्तिरष्टाविंसतिघटीमिनरात्रिविषया मुहूर्त्तरास्तुरात्रीरप्यर्द्धपचत
सोघटिकाइत्युक्तमित्याहुः तन्न अरुणोदयसद्धस्यान्येकार्थत्वपत्तेः नचमुहूर्त्तद्वयमर्थः दंडद्वयेकमुहू
र्त्तादिविधानांतर्थ्यानुपपत्तेः नहितेषांयामार्द्धत्वमरुणोदयत्वंचास्ति मुहूर्त्तद्वयस्ययामार्द्धस्यचचतस्रोघटि
काइत्यनेनोपसंहाराच्चनतदर्थः नचसार्द्धंतुघटिकात्रयमित्यन्येनापितदापत्तिःशंक्यातेनचतुर्दंडवेधस्यै
वोक्तेः चतुर्दंडैर्द्वघटीदशमीसत्वेहिवेधस्तथैः द्विघटिकादोतदयोगाच्च यत्तुमतं क्रियतेरुणोदयवेधइत्य
पेक्षायांसार्द्धघटिकात्रयनियमादरुणोदयेर्द्धघटिकातेमूनदशमीसत्वेनदोषइति तत्तुच्छं द्विदंडादावपितदा
पत्तेः दशमीशेषसंयुक्तोयदिस्यादरुणोदयः नैवोपोष्यंवैष्णवेनतद्दिनेकादशीव्रतमितिगारुडभविष्यव

योगमात्रनिषेधात् नारदीयेपि लववेधेपिविप्रेंद्र दशम्येकादशीत्यजेत् सुरायाबिंदुनास्पृष्टं गंगाम्भइवनिर्मलं
स्कांदेपि कलाकाष्ठादिगत्येवदृश्यतेदशमीविभो एकादश्यांनकर्त्तव्यंव्रतंराजकदाचनेतिमाधवोप्याह सोपिकं
लादिवेधोरुणोदयवेधेसूर्योदयवेधेचसमानइति निगमेपि सर्वप्रकारवेधोयमुपवासस्यदूषकइति अतए
वमाधवेनारुणोदयाघदंडेत्यदशमीस्पर्शेसंकटकाले नवटीयोगेसंदिग्धा मुहूर्त्तव्याप्तौसंयुक्ताउदयेसंकीर्णो
त्युक्ता अरुणोदयवेलायांदशमीयदिसंगता संपृक्तैकादशींतांतुमोहिन्यैदत्तवान्प्रभुरितिगोभिलाद्युक्तः पूर्वोक्त
गारुडादेश्च सामान्यतोविशेषतश्चारुणोदयवेधानिषेधः यत्तुब्रह्मभागोरुणोदयइतिहेमाद्रिणोक्तंयच्चमदनर
त्नेरितितत्परमतंस्वयमेवदूषितं अन्येप्युक्तं वेधतारतम्यंचदोषतारतम्यादुपपद्यतइति दोषतारतम्यंचप्रायश्चि
त्ततारतम्यादवगम्यते तच्चोक्तंहेमाद्रौस्मृत्यंतरे अज्ञानाद्यदिवामोहात्कुर्वन्नेकादशीनरः दशमीशेषसंयुक्तांप्रा
यश्चित्तमिदंचरेत् कृच्छ्रपादंनरश्चीर्त्वागांचदद्यात्सवत्सिकां सुवर्णस्यार्द्धकंदेयंतिलद्रोणसमन्वितं विधांतरं

सूर्योदयवेधः३

तत्रैव ब्राह्मणान्भोजयेत्त्रिंशद्वा चदद्यात्सवस्त्रिकां स्वर्णस्यार्द्धकं देयं तिलद्रोणमथापि चेति त्र अत्र वेधतारतम्या
२७ द्व्यवस्थेति हेमाद्रिः निशः प्रान्त्ये इत्यपि दोषाधिक्यार्थमेव तस्माच्चतुर्द्दश्येकात्मक एवारुणोदय इति सिद्धं ते
धं नष[illegible]चासेद्दंडानंतरं दशमीप्रवेशेऽरुणोदयवेध उक्तो भवति अन्योपि तत्रैव कारवेनोक्तः उदयोपरि विधा
तु दशम्येकादशी यदि दानवेभ्यः प्रीणनार्थं दत्तवान्पाकशासन इति स्मृत्यंतरेपि दशम्याः प्रांतमादाय
यदोदेति दिवाकरः तेस्पष्टं हरिदिनं दत्तं जंभासुराय त्विति तत्रारुणोदयवेधो वैष्णवविषयः तद्वाक्येषु वैष्ण
वग्रहणात् तत्स्वरूपं तु माधवीये स्कांदे परमापदमापन्नो हर्षे वा समुपस्थिते नैकादशीं त्यजेद्यस्तु यस्य दीक्षा
स्ति वैष्णवी विष्णवर्पिताखिलाचारः सहि वैष्णव उच्यत इति यद्यपि पित्रादे रागमदीक्षाप्रांतन्मात्रस्य वैष्णवत्वं न
तु पुत्रादेस्तथापि स्वपारंपर्यप्रसिद्धमेव वैष्णवत्वं स्मार्त्तत्वं च मन्यंते वृद्धाः तत्त्वसागरे भविष्ये यथा शुक्ला तथा कृष्णा
यथा कृष्णा तथेतरा तुल्ये ते मन्यते यस्तु स वै वैष्णव उच्यते केचित्तु दशम्यां नवमीवेधमपि त्यजंति तत्र मूलं मृग्यं उप

एकादशीनियमांगभूतायां१

यवेधस्तुपरिशेषात्स्मार्त्तगोचरः तदाह माधवः अरुणोदयवेधोत्र वेधः सूर्योदये तथा उक्तौ द्वौ दशमीवेधौ वैष्ण
वस्मार्त्तयोः क्रमात् हेमाद्रिस्तु केषांचिदर्द्धरात्रेपि दशमीवेधमाह अर्द्धरात्रे तु केषांचिद्दशम्या वेध इष्यते क
पालवेध इत्याहुराचार्या ये हरिप्रिया इति ब्रह्मवैवर्त्तात् कैमुतिकन्यायेनारुणोवेधस्यैवेयं स्तुतिरिति तु मा
धवः यत्तु दिवसं च दशभिस्तथेति वेधः स उपवासातिरिक्तविषय इति माधवः सर्वप्रकारवेधोयमुपवासस्य
दूषकः सार्द्धसप्तमुहूर्त्तस्तु योगोयं बाधते व्रतमिति निगमादित्यलं तत्र माधवमते वैष्णवैररुणोदयविद्धा
त्याज्या यदा त्वेकादश्येव शुद्धा सती वर्द्धते द्वादशी वोभयं वा तदा परोपोष्या एकादशी द्वादशी वाधिका चेत्त्यज्य
तां दिनं पूर्वं ग्राह्यं तूत्तरं स्यादिति वैष्णवनिर्णय इति माधवोक्तेः स्मार्त्तैस्तु सूर्योदयविद्धा त्याज्या यदा त्वेकादशी
शुद्धा सती वर्द्धते द्वादशी शुद्धा सती च समा न्यूना वा तदा गृहस्थैः पूर्वा यतिभिस्तूत्तरा कार्या प्रथमेहनि संपूर्णा व्या
प्याहोरात्रसंयुता द्वादश्यां च तथा तात दृश्यते पुनरेव च पूर्वा कार्या गृहस्थैश्च यतिभिश्चोत्तरा विभो इति स्कांदोक्तेः

वर्द्धमानोप्येवमाह उभयवृद्धौ तु शुद्धा विद्धा वा सर्वेषां परैव संपूर्णैकादशी यत्र प्रभाते पुनरेव सा सर्वैरेवोत्त
२८ राकार्या परतो द्वादशी यदीति नारदोक्तेः द्वादशीमात्रवृद्धौ शुद्धायां पूर्वैव नवेदेकादशी विद्धा द्वादशी प
रतः स्थिता उपोष्यैकादशी तत्र यदीच्छेत्परमं पदमिति नारदोक्तेः द्वादशीमात्रवृद्धौ तु शुद्धा विद्धे व्यवस्थिते
शुद्धा पूर्वोत्तरा विद्धा स्मार्त्तनिर्णय ईदृश इति माधवोक्तेश्च मदनरत्नेप्येवं यत्तु विद्धाप्यविद्धा विज्ञेया पर
तो द्वादशी न चेत् अविद्धापि च विद्धा स्यात्परतो द्वादशी यदीति हेमाद्रौ पाद्मवचनं तदेकादश्या वृद्धौ ज्ञेयं त एकादश्यात्रापि ५
दुक्तं माधवेन एकादशी द्वादशी चेत्युभयं वर्द्धते यदा तदा पूर्वदिनं त्याज्यं स्मार्त्तैः ग्राह्यं परं दिनमिति विद्धैकाद
श्यां द्वादशीमात्रवृद्धौ तु सर्वेषां परैव नत्वेवैकादशीमात्रवृद्धौ गृहिणः पूर्वा यतेरुत्तरा पूर्वोक्तपाद्मोक्तेः एका
दशी विवृद्धा चेच्छुक्ले कृष्णे विशेषतः उत्तरां तु यतिः कुर्यात्पूर्वामुपवसेद्गृहीति प्रचेतसोक्तेः एतच्छुद्धाविद्धातुल्य
मिति माधवः त्रयोदश्यां न लभ्येत द्वादशी यदि किंचन उपोष्यैकादशी तत्र दशमीमिश्रितापि चेति स्कांदात्

शुद्धन्यूनान्यूनद्वादशीका। शुद्धन्यूनासमद्वादशीका। शुद्धन्यूना ऽधिकद्वादशीका। विद्धन्यूनान्यूनद्वादशीका। विद्धन्यूना समद्वादशीका। विद्धन्यूना ऽधिकद्वादशीका। विद्धाऽधिकान्यूनद्वादशीका। विद्धाऽधिकासमद्वादशीका। विद्धाधिका ऽधिकद्वादशीका। तथा चोक्ताः षट्प्रकाराः प्रत्येकं त्रिप्रकाराः संतोऽष्टादश भवंति ४

इत्युभयान्वयि २

नथ तस्वेति केषु। तत्र केन दृतिप्राप्तो फलस्योन रूपीति निषिध्यते इति सर्वत्रान्वेति ३ टि०

अविद्धानि निषिद्धेश्चनलभ्यंते दिनानि तु मुहूर्त्तैः पंचभिर्विद्धा ग्राह्यैवैकादशीति धियिरिति मध्यमं गोकेश्व मुहूर्त्तपंचकमरुणोदयमारभ्य ज्ञेयं अन्यथोत्तरेन्हि एकादश्यभावासंभवात् यदपि हेमाद्रिणा शुद्धसमा शुद्धन्यूनावाधिकद्वादशिकां चेत्सर्वैषां पूर्वैवेत्युक्तं तदपि वैष्णवविषयं स्मार्त्तानां तु पूर्वैवेत्यविरोधः हेमाद्रिम तेतूच्यते तत्र शुद्धा विद्धा द्वयीं नंदा त्रेधा नसमाधिकैः षट्प्रकाराः पुनस्त्रेधा द्वादश्यूनसमाधिकैरित्यष्टादशै कादशीभेदाः तत्र शुद्धाधिकं समद्वादशिका च सकामैः पूर्वा निष्कामैरुत्तरा कार्या प्रथमेहनि संपूर्णेति पूर्वोक्ता त्त्वादात् ऊनद्वादशिकायां तु विष्णुप्रीतिकामैरुपवासद्वयं कार्यं संपूर्णैकादशी यत्र प्रभाते पुनरेव सा लुप्यते द्वा दशी तस्मिन्नुपवासः कथं भवेत् उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परैरिति वृद्धवसिष्ठोक्तेः शुद्धन्यूना शुद्धाधि का शुद्धसमा विद्धन्यूना विद्धसमा वाधिकद्वादशिका चेत्सर्वेषां परैवेति हेमाद्रिः मदनरत्ने तु शुद्धाधिका परा संपू र्णैकादशी यत्रेति पूर्वोक्तेः अन्या पूर्वा शुद्धा यदा समा हीना समा हीनाधिकोत्तरा एकादशीमुपवसेन्न शुद्धां वैष्ण

न्यूनद्वादशिकाशुद्धा धिक ५

शुद्धा सती समा न्यूना रहिता शुद्धा सती न्यूना २

त्रयोदश्यां क्षयव शादित्यर्थः ४

इति सर्वत्रान्वेति २

शुद्धा विद्धा भेदेन ... द्वयी ... एकादशी। न्यूनसमाधिकैः प्रत्येकं त्रेधा। शुद्धन्यूना। शुद्धसमा। शुद्धाधिका। विद्धन्यूना। विद्धसमा। विद्धाधिका चेति षट्प्रकारा ६

इतिपुनःस्मारितम् २
विद्धासतीन्यूनेकादशी द्वादशीच समावृद्धिरहितातदा ३
व्रतलोपभयात् ४

क्षमवीमपीति स्कांदात् शुद्धाएकादशी उत्तराद्वादशी नचेदेकादशीविद्धेत्यादि नारदोक्तेश्च यत्तुअविद्धापि चविद्धा
२८ स्यादितिपाद्मं तच्छुद्धाधिकापरं यत्तुसंपूर्णैकादशी त्याज्यापरतोद्वादशीयदि उपोष्याद्वादशीशुद्धाद्वादश्यामेपार
णामित्यादि तद्वैक्षमवपरं स्मार्त्तानांतुपूर्वैवेत्युक्तं विद्धन्यूनासमद्वादशिकातुमुमुक्षूणांपुत्रवतांचपरा अन्येषां
पूर्वा पुत्रवतोपिपूर्वेतिमदनरत्ने विद्धन्यूनान्यूनद्वादशिकाचसैवसर्वैः कार्येतिहेमाद्रिः मुमुक्षूणांपरान्येषांपूर्वेतिम
दनरत्ने विद्धसमासमद्वादशिकोनद्वादशिकाच मुमुक्षुभिःपरान्यैःपूर्वाकार्या दशमीमिश्रितापूर्वा द्वादशीयदिलुप्य त्रयोदश्यांनव इतिद्वयर्थः ५
ते शुद्धेवद्वादशीराजन्नुपोष्यामोक्षकांक्षिभिरितिव्यासोक्तेः मोक्षकांक्षिग्रहणादन्येषांपूर्वैव सर्वत्रैकादशीकार्याद्वा
द्वादश्यामेकादशी प्रातरस्तुमावा ३ दशीमिश्रितानरैः प्रातर्भवतुवामावायतोनित्यमुपोषणमिपाद्मोक्तेः विद्धाधिकासमद्वादशिकासर्वेषांपूर्वैवपा
रणाहेनलभ्येतद्वादशीकलयापिचेत् तदानींदशमीविद्धाप्युपोष्यैकादशीतिथिरिति ऋष्यशृंगोक्तेश्च माधवम
तेतुअत्रगृहिणःपूर्वायतेरुत्तरा विद्धाधिकन्यूनद्वादशिकामोक्षपापक्षयविष्णुप्रीतिकामैःपराकार्या गृहस्थेनत

एकस्मिन्दिने निषेधद्वयप्रवृत्तावविहितं व्रतं कर्त्तव्यम् विहित्याज्यमित्यर्थः

नक्तं कार्यं एकादशी द्वादशी च रात्रिशेषे त्रयोदशी उपवासं न कुर्वीत पुत्रपौत्रसमन्वित इति कौर्मे दिनद्वये उपवास
निषेधात् दशम्येकादशी विद्धा द्वादशी च क्षयं गता क्षीणा सा द्वादशी ज्ञेया नक्तं तु गृहिणां स्मृतमिति वृद्धशाता
तपोक्तेश्च गृहिणां पूर्वोपवासः यानि तु दशम्यनुगताहेति द्वादशद्वादशीफलं धर्मापत्यधनायूंषि त्रयोदश्यां
तु पारणमिति कौर्मादीनि दशमीवेधत्रयोदशीपारणयोर्निषेधकानि तानि विहितभिन्नपराणि एवं मूलवचना
नि तद्व्यवस्था चावकरे ज्ञेया यत्तु कालहेमाद्रौ बहुवाक्यविरोधेन संदेहो यदि जायते तदा द्वादशी तु तदा ग्राह्या त्रयो
दश्यां तु पारणमिति मार्कंडेयोक्तेः संदिग्धेषु च वाक्येषु द्वादशीं समुपोषयेत् तथा विवादेषु च सर्वेषु द्वादश्यां स
मुपोषणं पारणं च त्रयोदश्यामाज्ञेयं मामकी मुनेरिति पाद्मोक्तेश्च वेधसंदेहे ज्योतिर्विदां विप्रतिपत्तौ वापरा कार्ये
त्युक्तं तद्वैष्णवविषयमित्यलं बहुना अत्रोपयुक्तं किंचिदुच्यते तत्र दशम्यामेकादशीयोगे दशमी मध्य एव भो
जनं कार्यं एकादश्यां न भुंजीतेति तस्या एव निमित्तत्वात् निषेधस्तु निवृत्त्यात्मा कालमात्रमपेक्षत इति देवलोक्तेश्च
व्रतदिनात्पूर्वमित्यर्थः २

केचित्तु एकादशीव्रतांगत्वेन पूर्वेद्युरेकभक्तविधानात् विधिस्पृष्टे च निषेधानवकाशान्न काम्यव्रतांगे भोजने निषेधः
३० प्रवर्त्तते तेनैकादशीमध्येपि पूर्वेद्दिने भोजनमित्याहुः अत्राधिकारः कात्यायनेनोक्तः अष्टवर्षाधिको मर्त्यो ह्य
शीतिन्यूनवत्सरः एकादश्यामुपवसेत्पक्षयोरुभयोरपीति भविष्ये ब्रह्मचारी च नारी च शुक्लामेव सदा गृहीति यत्तु
विष्णुः पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत् आयुष्यं हरते भर्त्तुर्नरकं चैव गच्छतीति तद्भर्त्तुरननुज्ञाविषयमिति प्रागु
क्तं उपवासासामर्थ्ये तु मार्कंडेयकौर्म्मयोः एकभक्तेन नक्तेन तथैवायाचितेन च उपवासेन दानेन न निर्द्वादशिको भ
वेत् अथैकभक्तेन यो मर्त्य उपवासव्रतं चरेत् इत्येकभक्तादिषूपवासशब्दस्तद्धर्मातिदेशार्थः तेन तत्प्रयुक्ताः सर्वे ध
र्माः संकल्पमंत्रे चैकभक्तादिपदेनोहः कार्य इति मदनरत्ने तथाऽसामर्थ्ये प्रतिनिधिना कारयेदिति प्रागुक्तं व्रताक
रणे प्रायश्चित्तमाह माधवीये कात्यायनः अर्कपर्वद्वये रात्रौ चतुर्दश्यष्टमी दिवा एकादश्यामहोरात्रं भुक्त्वा चां
द्रायणं चरेत् इति अथ काम्यव्रतविधिः लघुनारदीये दशम्यादि महीपाल त्रिदिनं परिवर्जयेत् गंधतांबूलवस्त्रा

उपवासधर्मादिदेशः। एकस्यैकभक्तोपवासयोरेकदिनेऽसंभवादसमर्थः कल्प्यते ॥

कृतवकुव्रीह्योः कर्मधारः इ

दिस्त्रीसंभोगोमहापथाः तत्रदशम्यांविधिः कौर्मे कांश्यंमांसंमसूरांश्चचणकान्कोरदूषकान् शाकंमधुपर
न्नंचत्यजेदुपवसन्स्त्रियं तथाशाकंमांसंमसूरांश्चपुनर्भोजनमैथुने द्यूतमत्यंवुपानंचदशम्यांवैष्णवस्त्यजेत्
मदनरत्नेनारदीये अक्षारालवणाः सर्वेहविष्यान्ननिषेविणः अवनीतल्पशायनाः प्रियासंगमवर्जिताः व्रतध्या
न्याहरेमार्थेदेवलः असकृज्जलपानाच्च सकृत्तांवूलचर्वणात् उपवासः प्रणश्येतदिवास्वापाच्चमैथुनात् थिराभ्यंग ५
अशक्तौतुमदनरत्नेदेवलः अत्ययेचांवुपानेननोपवासः प्रणश्यति आपिपेकष्टे विष्णुरहस्ये गात्राभ्यंगंशिरो
तांवूलंचानुलेपनं व्रतस्थोवर्जयेत्सर्वंयच्चान्यत्रनिकृतं एषुप्रायश्चित्तमुक्तं निर्णयामृतसंग्रहे स्तेनहिंसकयोः
सरव्यंकृत्वास्तेन्यंचहिंसनं प्रायश्चित्तंप्रतीकुर्याज्जपेन्नामशतत्रयं मिथ्यावादेदिवास्वापवहुसंभाषणेषुच
अष्टाक्षरंमंत्रंजप्त्वाशतमष्टोत्तरंशुचिः ॐनमोनारायणायेत्यष्टाक्षरः तत्रैवपैठीनसिः तांवूलचर्वणस्त्रीसं
गभोगमांसनिषेवणे व्रतलोपानचेत्कुर्यात्कथावाङ्मुजिवर्जनमिति संभोगोऋतुकालादन्यत्र रतःसेकात्मसं

व्रतलोपः१

भोगामतेन्यत्र द्वैयः स्मृतइतितथैवकात्यायनोक्तेः तथैववशिष्ठः उपवासेतथाश्राद्धेनकुर्याद्दंतधावनं दंतानां
३१ काष्ठसंयोगाद्धंत्यासप्तमंकुलं काष्ठग्रहणान्मल्लोष्ठाद्यनिषेधइतिहेमाद्रिः विष्णुरहस्ये श्राद्धोपवासादि
वसेषौदित्वादंधावनं गायत्र्याभिमंतसंपूतमंबुप्राश्यविशुध्यति निर्णयामृतेव्यासः वर्जयेत्पारणेमांसंव्रतां
हेत्वौषधंसदेति एकादश्यांश्राद्धप्राप्तौमाधवीयेकात्यायनआह उपवासोयदानित्यःश्राद्धंनैमित्तिकं
भवेत् उपवासंतदाकुर्यादाघ्रायपितृसेवितं मातापित्रोःक्षयप्राप्तेभवेदेकादशीयदि अभ्यर्च्यपितृदेवां व५
श्चआजिघ्रेत्पितृसेवितमिति हेमाद्र्यादिसर्वनिबंधेष्वप्येवं एतेनैकादशीनिमित्तिकंश्राद्धंद्वादश्यांका
र्यमितितिविदंतःपरास्ताः किंच महालयेसपक्षःसकलःपूज्यःश्राद्धंषोडशकंप्रतीतिस्मृतंषोडशत्वं पौषैका
दश्यांचमन्वादिश्राद्धंक्षयाहापरित्यागोनैवतत्पदैकादश्यांविहितंश्राद्धंवाधितमेवस्यात् यदपिस्मृतिचंद्रि
कायांपठति अन्नाश्रितानिपापानितद्वान्नंतुर्ययातुरवच मज्जंतिपितरस्तस्य नरकेशाश्वतीःसमाइति तस्यापिरागः

देवनिवेदितान्नदानम् २ जलपिंडदानरहिताः १

प्राप्तमग्निगोचरस्यैवैधं श्राद्धं गोचरप्राप्तं महत्साहसमित्युक्तं योपि अकृतश्राद्धनिचयाजलपिंडं विना
कृताशनतिलव्वु नारदीये एकादश्यां श्राद्धनिषेधः समातापितृभिन्नविषयः पूर्ववाक्यतद्ग्रहणात् नि
चयः प्रतिगृहः अव्रतघ्नान्याह देवलः मदनरत्ने सर्वभूतभयं व्याधिः प्रसादो गुरुशासनं अव्रतघ्नानि पथ्या
४ सकृत्सेवितानि चेत् ते सकृदेतानि शास्त्रतः स्कांदेपि अष्टैतान्यव्रतघ्नानि आपो मूलं पयः हविर्ब्राह्मणकाम्या च गुरोर्वचन
मौषधं इच्छातिसंकष्टविषयं नारदीये अनुकल्पो नृणां प्रोक्तः क्षीणानां वरवर्णिनि मूलं फलं पय
स्तोयमुपभोग्यं भवेच्छुभे नत्वेव भोजनं केचिदेकादश्यां बुधैः स्मृतं अस्यापवादः शयने च मद्दुल्याने मत्या
र्थपरिवर्तने नरो मूलफलाहारी हृदि सल्यममार्पयेत् एतच्चविरोधौ निर्णीया सर्वव्रतेषु ज्ञेयाः तत्र काश्यां सं
कल्पः गृहीत्वौदुंबरं पात्रं वारिपूर्णमुदङ्मुखः उपवासं तु गृह्णीयाद्यद्वा वार्यं वधारयेदिति माधवीये वाराहे तत्तैः
मंत्रस्तु विष्णूक्तः एकादश्यां निराहारः स्थित्वाहमपरेहनि भोक्ष्यामि पुंडरीकाक्ष शरणं मे भवाच्युत

हि २ नो ३

द्वितीयदिनोपवाससंकल्पे ५
विष्णवेनम इत्यादिना १

ति शैवादीनांतु माघे सौरपुराणे सावित्र्याप्यथवानाम्नासंकल्पंतुसमाचरेत् शिवादिगायत्र्योयजुर्वेदे
३२ प्रसिद्धाः वाराहे इत्युच्चार्यततोविद्वान्पुष्पांजलिमथार्पयेत ततस्तज्जलंपिबेत् अष्टाक्षरेणमंत्रेणत्रिर्ज
प्तेनाभिमंत्रितं उपवासफलंप्रेप्सुःपिबेत्पात्रगतंजलमितिकात्यायनोक्तेः मध्यरात्रेऽदपवादशमीविधे
रात्रौसंकल्पइतिमाधवः दशम्याःसंगदोषेणअर्द्धरात्रात्परेनतु वर्जयेच्चतुरोयामा(दिवा न)संकल्पार्चनयोस्तद
विद्धोपवासेस्नानंस्तुदिनंत्यक्त्वासमाहितः रात्रौसंपूजयेद्विष्णुंसंकल्पंचतदाचरेदितिनारदीयोक्तेः तत्रैवपूजाम्
विधाय देवस्यपुरतःकुर्याज्जागरंनियतोव्रती द्वादश्यांचनिवेदनमंत्रउक्तःकात्यायनेन अज्ञानतिमि
घस्यव्रतेनानेनकेशव प्रसीदसुमुखोनाथज्ञानदृष्टिप्रदोभवत् नारदीये ब्राह्मणान्भोजयेच्छक्त्यादद्याद्द
क्षिणांततः स्कांदे कृत्वाचैवोपवासंतुयोभुंक्तेद्वादशीदिने नैवेद्यंतुलसीमिश्रंहत्याकोटिविनाशनं
द्वादश्यांचवर्ज्यान्याहबृहस्पतिः दिवानिद्रांपरान्नंचपुनर्भोजनमैथुने क्षौद्रंकांस्यामिषंतैलंद्वादश्याम

षवर्जयेत् हेमाद्रौ ब्रह्माण्डपुराणे पुनर्भोजनमध्वानं भारमायासमैथुने उपवासफलं हन्युर्दिवानिद्रां च पंचमी
स्कांदे परान्नं कांस्यपात्रं तांबूलं लोभं वितथ्याभाषणं वर्जयेदिति शेषः विष्णुधर्मे असंभाष्यान् हि संभाष्य तुलस्य
तसिकादलं आमलक्याः फलं वापि पारणे प्राश्य शुध्यति बृहन्नारदीये रजस्वलां च चांडालं महापातकि
नं तथा सूतिकां पतितं चैवमुच्छिष्टं रजकादिकं व्रतादिमध्ये शृण्वन्याद्यघोषांध्वनिमुत्तमः अष्टोत्तरसह
स्रं तु जपेद्वै वेदमातरं एतद्व्रतं सूतके मृतके वापि न त्याज्यं द्वादशीव्रतमिति विष्णूक्तेः तत्रत्यक्तं दानादि सूतकां
ते कार्यं सूतकांते नरः स्नात्वा पूजयित्वा जनार्दनं दानं दत्वा विधानेन व्रतस्य फलमश्नुत इति मात्स्योक्तेः रजो
दर्शनेपि कार्यं एकादश्यां न भुंजीत नारी दृष्टे रजस्यपीति पुलस्त्योक्तेः यदा द्वादश्यां श्रवणर्क्षं तदा शुद्धाम
प्येकादशीं त्यक्त्वा तत्रैवोपवासः कार्यः शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणान्विता तयोरेवोपवासश्च त्रयो
दश्यां च पारणमिति नारदीयोक्तेः एते च नियमाः काम्यव्रते नियताः नित्यव्रते सति संभवे कार्याः शक्तिमात्तु

सूतकेपि कार्यं ५

ससंभवमिति १

पुनः कार्यो नियमः सविशेषोद्भवमिति कात्यायनोक्तेः अशक्तो तु माधवीये ब्रह्मवैवर्ते इति विज्ञाय कुर्वीतावश्यमेकाद
३३ शीव्रतं विशेषनियमाशक्तोऽहोरात्रं भुञ्जिवर्जितः इति अथाष्टौ महाद्वादश्यः तत्र शुद्धाधिकैकादशीयु क्ताद्वा
दशी उन्मीलनी संज्ञा द्वादश्येव शुद्धाधिका वर्द्धते चेत् वंजुली वासरत्रयस्पर्शिनी त्रिस्पृशा अमेन पर्वणाः सं
पूर्णाधिकत्वे पक्षवर्द्धिनी पुष्यर्क्षयुता जया श्रवणर्क्षयुता विजया पुनर्वसुयुता जयन्ती रोहिणीयुता पापना
शिनी एताः पापक्षयमुक्तिकाम उपवसेत् अत्र मूले हेमाद्र्युक्तेः एकादशीद्वादश्योरेकत्वे तत्रैकोपवासः का
र्यः पार्थिवेनूपवासद्वयं सक्तस्य एकादशीमुपोष्यैव द्वादशीं समुपोषयेदिति विष्णुरहस्यात् अथ कोऽद्वादश्या
मेव एवमेकादशीं त्यक्त्वा द्वादशीं समुपोषयेत् पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयमिति तत्रैवोक्तेः यदा त्व
ल्पा द्वादशी तदोक्तं मात्स्ये यदा भवति स्वल्पापि द्वादशी पारणादिने उषःकाले द्वयं कुर्यात्प्रातर्माध्याह्निकं तदा
नारदीयेऽपि अल्पायामथ विप्रेन्द्र द्वादश्यामरुणोदये स्नानार्चनक्रियाः कार्या दानहोमादिसंयुता इति संक्षे

अमायाः पूर्णिमायाश्च संपूर्णत्वेऽधिकत्वे वा २

तुदेवले माधवीये संकटे विषमे प्राप्ते द्वादश्यां पारयेत्कथं अद्भिस्तु पारणं कुर्यात्पुनर्भुक्तं न दोषकृदिति सं
कटे त्रयोदशीश्राद्धप्रदोषादौ अत्र केचिदाहुः अपकर्षवाक्यान्यनाहिताग्निविषयाणि अग्निहोत्रादीनां श्रौ
स्मार्तानामेवापकर्षः ३
तत्वेनापकर्षायोगादिति द्वादश्यां च प्रथमपादमतिक्रम्य पारणं कार्यं द्वादश्याः प्रथमपादो हरिवासरसंज्ञकः
तमतिक्रम्य कुर्वीत पारणं मतिमान्नर इति निर्णयामृते मदनरत्ने च विष्णुधर्मोक्तेः अत्र केचित्संगिरंते यदाभू
प्रथमपादरहितेत्यर्थः ५
यसी द्वादशी तदापि प्रातर्मुहूर्त्तत्रये पारणं कार्यं सर्वेषामुपवासानां प्रातरेव हि पारणेति वचनादिति अस्मद्गु
रवस्तु बहूनां कर्मकालानां विना कारणं बाधापत्तेः प्रागुक्तवचनैश्चात्यल्पद्वादश्यामेवापाकर्षविधानादपरा
ह्णे एव कार्यं प्रातःशब्दस्तु सायंप्रातर्द्विजातीनामशनं श्रुतिचोदितमितिवदपराह्णवाचित्वेप्युपपन्नः नैव वाक्यवै प्रातरेव ३
यर्थ्यं पुनर्भोजनसाम्यं पारणानिवृत्त्यर्थत्वात्तस्येत्याहुः प्रमादेनैकादश्युपवासातिक्रमे पराकें वाराहे एकादशीविद्ध
तावै द्वादशीपरतः स्थिता उपोष्या द्वादशी तत्र यदीच्छेत्परमं पदमिति केचित्तु विष्णुना चेदिति पठंति अत्राविधिनो नि

विष्णुनास्थाने। तत्र विष्णुना द्वादश्येत्यर्थः १

अत्र यथा प्रातःशब्दो नित्यकर्मेतरकालपर स्तथेहापि अपराह्णपरः ३

यमाःसर्वव्रतेषुवोधव्याः अन्यच्चनवरात्रेवक्ष्यंतइतिदिक् इतिश्रीरामकृष्णात्मजकमालाकरभट्टकृतेनिर्णयसिं
२४ धौएकादशीनिर्णयः द्वादशीतुपूर्वैव युग्मवाक्यात् द्वादशीतुप्रकर्त्तव्याएकादश्यांयुताप्रभो इतिस्कांदाच्च त्रयोद
शीतुसर्वमतेशुक्लापूर्वाकृष्णोत्तरा त्रयोदशीतिथिः पूर्वासिताप्यासितापश्चादितिदीपिकोक्तेः शुक्लात्रयोदशीपू
र्वापरान्हव्यापित्रयोदशीतिमाधवाच्च चतुर्दशीतुसर्वमतेकृष्णापूर्वाशुक्लोत्तरा उपवासेतुद्व्यापिपरेतिमदनरत्ने
पूर्णिमामावास्येतुसावित्रीव्रतंविनापरेग्राह्ये भूतविद्धेनकर्त्तव्येदर्शपूर्णेकदाचन वर्जयित्वामुनिश्रेष्ठसावित्री
व्रतमुत्तमम् इतिब्रह्मवैवर्त्तात् अमायांयोगविशेषोऽपरार्केशातातपः अमावास्याभवेद्वारेयदाभूमिसुतस्यवै
जान्हवीस्नानमात्रेणगोसहस्रफलंलभेत् अमावासोमवारेणरविवारेणसप्तमी चतुर्थीभूमिपुत्रेणविषुवत्सदृशंफ
लं तत्रैवव्यासः सिनीवालीकुहूर्वापियदिसोमदिनेभवेत् गोसहस्रफलंदद्यात्स्नानंवैमौनिकाकृतं हेमाद्रौब्रह्मांडे ना
नुः श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तके यद्यमारविवारेणव्यतीपातःसउच्यते नागदैवतमश्लेषा मस्तकामृगशिरः

दृष्टचंद्रासिनीवालीनष्टचंद्राकुहूर्मता। अमेत्यर्थः२

श्रवणादीनां प्रथमपादे दृश्यस्तन्मतेन मृगशीर्षे नास्ति तदेवाह सचेति १

अन्वाधानव्याः १ प्रतिपदः १

प्रथमपाद इत्यन्य सचसर्वेषां अथेष्टिकालः गोभिलः पर्वान्ता उपवस्तव्याः पर्वादयोभियष्टव्या इति उप
वासोन्वाधानं तत्र मध्यान्हे तत्पूर्वे वा पर्वप्रतिपत्संधौ तद्दिने यागः पूर्वान्हे वाथ मध्यान्हे यदि पर्व समाप्यते उ
भूते संधिदिने
अन्वाधाय ३ पोष्य तत्र पूर्वेद्युस्तदहर्याग इष्यते इति लौगाक्षिवचनात् अत्र च दिनस्य द्वेधा विभागः आवर्तनात्तु पूर्वाह्णो ह्यपराह्ण
स्ततः परः मध्यान्हस्तु तयोः संधिर्यदावर्तनमुच्यते इति मदनरत्ने वचनात् मध्यान्हादूर्ध्वं संधौ माधवमते परे
अन्वाधाय
न्हि यागः अपरान्हेऽथवा रात्रौ यदि पर्व समाप्यते उपोष्य तस्मिन्नहनि श्वोभूते याग इष्यत इति लौगाक्षि
रोक्तेः हेमाद्रिस्त्वपरान्हसंधावपि परदिने प्रतिपच्चतुर्थांशे चंद्रोदये च सति द्वितीयादिष्वंत्येंऽशे सति पूर्वे
द्युर्यागः पर्वणोंऽशो द्वितीये तु यष्टव्यं तु द्विजातिभिः द्वितीयासहितं यस्माद्दूषयंताश्वलायनाइति द्वितीये त्विति कौ
मुतिकन्यायेन तुर्यांशपरं तुरीये त्विति मूलपाठेः स्पष्टार्थ एव तथाभूता पंचदशी पूर्णा द्वितीयाद्वयगामि
नी चरमरिष्टिरमायांस्याद्भूतकव्यादिको क्रियेति बौधायनवचनाच्चेत्यूचिवान् मदनरत्नेपि चतुर्दशीचतुर्यामा

आवर्त्तनादूर्ध्वंप्रवृत्ताऽस्तादर्वाक्समाप्ताप्रथमार्धेर्विकासेवराश्रोसमाप्ताद्वितीयामध्यान्हादर्वाक्समाप्तानृतीयाएवंत्रिधाखर्वी ५

अन्वाहितिम् १ वाजसनेयिमतेन ४

३५ अमावास्यानदृश्यते रेवाभूते प्रतिपद्येत्स्यात्पूर्वातत्रैवकारयेदिति यत्तुमाधवः यस्तुवाजसनेयीस्यात्तस्य
संधिदिनात्पुरा नक्वाप्यन्वाहितिः किंतुसदासंधिदिनेहिसेत्याह यच्चकालादर्शेप्युक्तं आवर्त्तनादधःसंधिर्ये
धन्वाधायतद्दिने परेद्युरिष्टिरित्याहुर्विप्रावाजसनेयिनइति यच्चमदनरत्ने मध्यंदिनात्स्यादहनोह्यस्मि
न्नाकपर्वणःसंधिरियंतृतीया साखर्वविकावाजसनेयिमत्यातस्यामुपोष्यापरेद्युरिष्टिरिति एवंपौर्णमासी
परमितितत्रैव आवर्तनोर्द्ध्वमर्वागस्तात्प्रश्नेवासमाप्तेद्वे मध्यान्हादर्वाक्समाप्तात्तृतीयेत्यर्थः तत्कर्कभाष्य
देवजानीयश्री अनंतभाष्यादिसकलतच्छाखीयग्रंथविरोधादज्ञानादराद्वोपेक्ष्यं पौर्णमास्यांविशेषमाह
कात्यायनः संधिश्चेत्संगवादूर्ध्वंप्राक्परावर्त्तनाद्रवेः सापौर्णमासीविज्ञेयासद्यःकालविधौनरैः अमायांवि
शेषमाहबौधायनः द्वितीयात्रिमुहूर्त्ताचेत्प्रतिपद्यापराह्निकी अन्वाधानंचतुर्दश्यांपरतःसोमदर्शनात् का
त्यायनश्च यजनीयेन्हिसोमश्चेद्वारुण्यांदिशिदृश्यते तत्रव्याहृतिभिर्हुत्वादंडंदद्याद्द्विजातयइति एतच्चबोधा

सायमित्यर्थः २ यष्टिं १ तत्रैवान्वाधानमिष्टिश्च ३
~~अद्भिर्मार्गात्तुजनननमतिः~~ २

वृद्धिकरं तद्ध्यनं भवति २ ... आद्यपमीज्जमानं पश्चाच्चंद्रोभ्युदेति १

पनवाजसनेयिविषयं तैत्तिरीयश्रुतौ तु चंद्रदर्शनेपिजागउक्तः एषा वै सुमनानामेष्टिर्यमद्येईजानं पश्चाच्चंद्रमाअ
भ्युदेत्यस्मिन्नेवास्मैलोके ऋर्धुकं भवतीति श्रुत्यंतरेपि यदहः पश्चाच्चंद्रमाअभ्युदेतितदहर्येजन्निमांलोकानभ्युदेती
ति मदनरत्नेप्येवं आपस्तंबभाष्यार्थसंग्रहेप्येवं अतः पक्षद्वयस्य स्वस्वसूत्राद्यवस्थेतितत्वं द्रूषयंत्यास्वलाय
नाइत्येतत्तु पूर्वाह्नसंधिविषयमितिमाधवः पर्वशेष शेषपर्वणीष्टौ विशेषमाहमाधवीये गार्ग्यः प्रतिपद्यप्रविष्टायांयदि
पर्वशेषे चेदिष्टिः समाप्यते पुनः प्रणीय कर्त्तव्ये ष्टिः कर्त्तव्याजागवित्तमैः गृह्याग्नेनीयं नियमइति मदनरत्ने पारिजातः एवंप
र्वत्यांशः प्रतिपदश्चत्रयोंशायागकालउक्तः क्वचित्प्रतिपच्चतुर्थांशेपिजागः संधिर्यद्यपराह्णेस्यात्द्यागं प्रातः परे
हनि कुर्वीता प्रतिपद्भागे चतुर्थेपि न दुष्यतीति वृद्धशातातपोक्तेः एतत्पूर्णिमापरमिति मदनरत्ने पर्वणिप्रतिप
दः क्षयस्य वृद्धेश्चार्द्धं प्रक्षिप्य संधिर्ज्ञेयः तदाह माधवः वृद्धिप्रतिपदोयास्तितदर्धं पर्वणि क्षिपेत् क्षयस्यार्द्धं तथा
क्षिप्त्वा संधिं निर्णीयतां सदेति कात्यायनोपि परेह्नि द्विघटिकान्यूनास्तथैवाभ्यधिकाश्च याः तदर्द्धं क्लृप्त्वा पूर्वस्मि

पर्वांत्यांशप्रतिपदाद्यंशयोः संधिरित्यर्थः ४ ... पूर्वदिने ४

इष्टिरन्वाधानोत्तरः स्थालीपाकश्च गृहप्रवेशनीयहोमोत्तरम् १

न्मासरुद्धौ प्रकल्पयेतद्यति एवंस्मात्तस्थालीपाकेपिज्ञेयं तत्रेष्टिस्थालीपाकौ वाधानगृहप्रवेशनीयहोमा
३६ नंतरभाविन्यां पौर्णमास्यां प्रारंभणीयौ नतु दर्शे यद्यारंभे मलमासपौषमाससंक्रांत्यादि भवतितदाप्या
रंभः कार्यः यानितु ऽपराणोधिमासश्चेद्यदि प्रथमपर्वणि तथा मलिम्लुचे पौषेनान्वारंभणमिष्यते गुरुभा
र्गवयोर्मौढ्येचंद्रसूर्यग्रहेतथेति संग्रहवचनानि तानिश्रालस्यानाति क्रांतमुख्यकालप्रारंभविषयाणि ता नि ४
नामकर्मचदर्शेष्टिं यथाकालंसमाचरेत् अतिपातेशतितयोः प्रशस्ते मासिपुण्यदेत्यपरार्के गर्गवचना
दिप्रयोगपारिजाते ऽप्युक्तंचैतत्प्रयोगरत्नेभट्टैः कालादर्शेतुनामकर्मचजातेष्टिमितिपाठः यात्रकालस्त्राधा
नानंतरापौर्णमासीचेन्मलमासगा तस्यामारंभणीयादीन्नकुर्वीतकदाचनेति त्रिकांडमंडनवचनान्मुख्यका
लएवविभ्रमइष्टिः किंकृत्वारंभंकुर्यादित्याहुः कालादर्शेस्मृतिसंग्रहेपि आरंभंदर्शपूर्णेष्ट्योरग्निहोत्रस्यवा
दिमंप्रतिष्ठाः पंचकूर्मीघ्याम्मलमासेविवर्जयेदिति अथविकृतिः तत्रापस्तंबः यदीष्ट्यायदिपशुनायदि
प्रकृतिभूतदर्शपौर्णमासेष्टिकथनानंतरम् १

सोमेनयजेतसोमावास्यायांपौर्णमास्यांचेति अत्रपूर्णिमामावास्याशब्दाभ्यांतदंतपक्षोगृह्यते तेनतद्व्यत्य
होरात्रेइत्यर्थमाह रामांडारः माधवोपि इष्ट्यादिविकृतिःस र्वापर्वण्येवेतिनिर्णयइति अत्रविशेषमाहत्रिकां
डमंडनः कात्यायनश्च आवर्त्तनात्प्राग्यदिपर्वसंधिःकृत्वातुतस्मिन्प्रकृतिंविकृत्याः तदेवयागःपरतोयदिस्यात्तस्मि
न्विकृत्याःप्रकृतेःपरेद्युरितिधूर्तस्वाम्यादयोप्येवमाहुः यद्दृक्ष्यतिसंगाय्याविकृतेःपर्वकालत्वादावर्त्तनात्प्राक्सं
धौसंधिमभितोयजेतेतिप्रकृतेःप्रतिपदिसमाप्तिनियमात्प्रकृत्यनंतरंप्रतिपदिविकृत्ययोगात्पूर्वेद्युर्विकृति
रित्युक्तंतत्ररत्नेपर्थसारथिना यद्यपिप्रकृतेःपूर्वत्वादपूर्वमतेस्यादित्यापस्तंबेनोक्तं तथापिहेतुवादेनश्रुतिमू
लत्वाभावादंगांवासमभिव्याहारादितिवदप्रामाण्यमितितदाशयः आग्नेयणोविशेषंवक्ष्यामः अन्वारंभणी
यातुचतुर्दश्यांकार्येतिहिरण्यकेशिवृत्तौमातृदत्तीये अन्येषांपर्वण्येव यसौकालांतरमप्याहबौधायनः अमा
वास्येनवाहविष्येष्ट्वानक्षत्रेचेति शुक्लपक्षेकृत्तिकादिविशांतेषुदेवनक्षत्रेषुइतिकेशवस्वामीव्याचख्यौ वातु

सोमेच २

मासेष्वपि द्वादशाहं प्रयाप्रयोगपक्षयोर्नक्षत्रेष्वथारंभः यावज्जीवसांवत्सरप्रयोगयोस्तु फाल्गुन्यां चै
३० त्र्यां वारंभः यशीत्वनुविशेषमाह कात्यायनः अर्द्धादन्हो भवति नियतं पर्वसंधिः परस्तात्कृत्वा तस्मिन्नहनि
नुपस्थुं स एव ग्राह्यो वा आरभ्यो यः प्रकृतिरयं चेत्पर्वसंधिः पुरस्तात्कृत्वा तस्मिन्प्रकृतिमथ तु स्यात्पर्युः स
एव अधिकारपक्षस्त्वग्नीषोमीयेन समवनीये न वा समानतंत्रो वा कार्य इति त्रिकांडमंडनः सोमेत्वाह
पत्तवः अमावास्यायां दीक्षयं (प्रतिपदि) यजनीये वामावास्यायां यजनीये वा सुत्यमहः (सुत्योत्सवः) पौर्णमास्यां दीक्षायजनीये वा
पौर्णमास्यां यजनीये वा सुत्यमहरीतिलाघ्रायन सूत्रेपि पूर्वपक्षस्य प्रथमेहनि दीक्षेत नक्षत्रयोगेष्वपि पू
र्वपक्षः शुक्लपक्षः नक्षत्रयोगे वत्सयमर्थः चैत्र्यादिपूर्णिमायाश्चित्रादिनक्षत्रयोगे दीक्षेतेति आधानं तु
पर्वणि नक्षत्रेषु चोक्तं तत्र पर्वनक्तं गार्हपत्यमादधातीत्यादिकर्मकालव्यापि ग्राह्यं दिनद्वये तत्वे पूर्वमा
ह्यं संकल्पस्य पर्वणि लाभात्पर्वनक्षत्रयोगे तदेव ग्राह्यं यत्र त्रीणि संनिपातितान्यपि तु नक्षत्रं च पर्व तत्स

मध्ये विप्रतिषेधे क्रतुर्नक्षत्रं च वलीय इति हिरण्यकेशिसूत्रात् ऋतुर्वसंते ब्राह्मणोग्निमादधीतेत्यादिः
रेरण्यकारिकायां तु माघादिपंचमासेषु श्रावणे वाश्विने तथा मार्गशीर्षे शुक्लपक्षे आधानमथ कारयेदित्यु
क्तं अत्र मूलं मृग्यं आधाननक्षत्राणि आपस्तंबसूत्रे कृत्तिका रोहिणी मृगशीर्षं पुनर्वसु पुष्य पूर्वा उत्तरा
तरामाठ ४ पूर्वाषाढा हस्त चित्रा विशाखानुराधा श्रवणोत्तराभाद्रपदा इति सोमपूर्वाधाने विशेषमाह आपस्तंबः सो
मेन यक्ष्यमाण आदधानो नर्तुं न पृच्छेन्न नक्षत्रमिति अत्र प्रकरणादाधानकालबाधः तेन सोमस्य वसंत
कालतानबाध्यत इति रुद्रदत्तवृत्तौ चोक्तं धूर्त्तस्वामी तु सोमस्यापि यऋतुस्तस्यापि न सूत्रे दीक्षितिलेखनादु नाद्वियेत ४
भयकालबाधं मन्यते श्रीरामांडारस्तु कालांतरविधानं वा सर्वकालानादरो वेति पक्षद्वयमुक्तवान् तत्राद्ये कृत्तिकादिका
दिकालांतरस्य यथाधाने वसंताद्यबाधेन विधानं तथा सोमेप्युदगयनपूर्वपक्षपुण्याहसंनिपाते यज्ञकालो नादेशादि
ति छंदोगसूत्रोक्तोदगयनाबाधेन सोमाभिसंधिरूपकालांतरविधानादुदगयनं त्वपेक्ष्यत इत्युक्तं द्वितीयपक्षे तु य

देवैनं यज्ञ उपनमे दितिसर्वकालानादर उक्त इति भरद्वाजसूत्रात् सर्वसं(वेद)स्य च विश्वजित्सर्वपृष्ठ इति वृद्धयोर
३८ प्रयोगात्सर्वे सर्व कालवाध इति तेन दक्षिणायनेपि भवतीत्युक्तं यजुर्भाष्ये देवत्रातभाष्ये तंत्ररत्नेच षड्(द्व)पि सम
तुषु भवतीत्युक्तमितिदिक् श्राद्धं त्वमावास्यात्रेधाविभक्तदिनतृतीयांशेयोपरान्हभागस्तद्व्यापिनी साग्निकै
४ पिंडपितृयज्ञोत्तरं र्माह्यापिंडान्वाहार्यकं श्राद्धं क्षीणेराजनि शस्यते (अमायां) वासरस्य तृतीयंशे नातिसंध्यासमीपत इति कात्यायनोक्तेः
दर्शश्राद्धंतु यत्प्रोक्तं पार्वणं तत्प्रकीर्तितं अपरान्हे पितृणां च तत्र दानं प्रशस्यत इति शातातपोक्तेश्च दिनद्वये तं अपराह्णसत्त्वे ५
त्सत्वे सर्वापरान्हव्यापी दर्शो ग्राह्यः यद्युभयेद्युरेवं विहितः सर्वापरान्हे स्थित इति दीपिकोक्तेः यत्तु काष्र्णाजि
निः भूतविद्धाममावास्यां मोहादज्ञानतोपि वा श्राद्धकर्मणि येकुर्युस्तेषामायुः प्रहीयत इति तदपरान्हे चतुर्दशीवेध
परमिति हेमाद्रिः अपरान्हाव्याप्तिपरमिति माधवः दिनद्वयेऽपरान्हव्याप्त्यभावे शतो व्याप्तौ च तिथिद्वये पूर्वैति
हेमाद्रिः यदा चतुर्दशीयामं तुरीयमनुपूरयेत् अमावास्याक्षीयमाणा तदेव श्राद्धमिष्यत इति कात्यायनोक्तेः
अमायामापूर्वार्धः २ अपराह्णः ४

प्रथमाखवीतिस्टणांमध्ये२

चतुर्दश्यांश्चतुर्थयामंदर्शः प्रपूरयेत् चतुर्दशीयामत्रयं स्यादित्यर्थः क्षीणमारणापरदिनेपराह्नव्यापिनीनेत्यर्थः
व्यतिरेकमाह वर्द्धमानामामावास्यांलक्षयेदपरेऽहनि यामांस्त्रीनधिकान्वापिपितृयज्ञस्ततोभवेत् ततःश्राद्धं
च दिनद्वयेपराह्नव्यापिनीप्रायोदोतिथिर्वृद्धौ चसत्या हारीतः त्रिमूर्त्ताचकर्त्तव्यापूर्वोरववीचवह्वृचैः कुतूर्धयुभिः
कार्यायथेवंसामगीतिभिः त्रिमुहूर्त्ताभावेतुपूर्वानेत्यर्थः पिंडपितृयज्ञस्तुकात्यायनेर्यागदिनात्पूर्वेद्युःकार्यः
पूर्वोवांगत्वात्पिंडपितृयज्ञइतिततस्सूत्रात् व्याख्यातंचैतत्कर्काचार्यैः पूर्वएवदर्शात्पिंडपितृयज्ञोनपश्चात्
कुतः अंगत्वात् तथाचश्रुतिः तस्मात्पूर्वेद्युःपितृभ्यःक्रियतेऽत्तरमहर्देवान्यजतइति पूर्वेद्युःपितृभ्योयज्ञंनिप्रणीयप्रातर्देवेभ्यःप्रतनुतइतिच तेनतन्मतेंगमेवासौ तदुक्तं अंगंवासमभिव्याहारादिति तेनकर्कमतेचतुर्दशीयुक्तदर्शेपिंडपितृयज्ञइति श्रीअनंतभाष्येतुपरेद्युरित्युक्तं अत्रद्वेधाप्याचारोदृश्यते आपस्तंबानांतुपरदिनेमुहूर्त्तमपिदर्शेसत्वेतत्रैवपितृयज्ञः तदाहापस्तंबः अमावास्यायांयदहश्चंद्रमसंनपश्यंति

पितृयज्ञोभवेत्ततत
इत्यस्यार्थःश्राद्धंचेतिर
यजुर्वेदिभिः३

तदहः पिंडपितृयज्ञं कुरुत इति अस्य रुद्रदत्तोपव्याख्या पिंडैर्युक्तः पितृयज्ञः पिंडपितृयज्ञः चकर्मोकर्मांतरं न तु द
३८ र्शशेषः यथा वक्ष्यति पितृयज्ञः स्वकालविधानादनंगं स्यादिति न च यदहश्चंद्रमसं न पश्यंति पंचदश्यां प्रति
पदि वा तदहः कुरुते यदहस्तयोः संधिस्तदहरित्यर्थः श्रीरामांडारोप्याह पिंडपितृयज्ञस्तु पर्वसंधिमदहोरात्रा
परान्ह इति अतः पर्वसंधिदिने पितृयज्ञः शतपथश्रुतिरपि यदैवैष न पुरस्तान्न पश्चाद्ददृशे थैपि पितृभ्यो ददा
तीति पर्वसंधिदिने हि पूर्वतः पश्चाद्वा चंद्रो न दृश्यत एवेत्यर्थः सत्याषाढोपि पितृयज्ञं प्रक्रम्य दृश्यमाने तूपोष्य श्वो
नक्षधिवचनं
भूते यज्ञातेइत्याह हेमाद्रिस्तु अमावास्यायां सैव दीक्षिधिवचन एवं पूर्वोक्तापस्तंबसूत्रे यदुक्तं न पश्यंतीति तत्र क्षयेपि भि
प्रेतः अतश्चतुर्दश्यां चंद्रस्य क्षीणत्वेन तद्युक्तदर्शे पितृयज्ञः पितृयज्ञं तु निर्वर्त्य विप्रश्चंद्रक्षयेग्निमान् इति मनूक्तेः
यदुक्तं यदहस्त्वेव दर्शनं नैति चंद्रमाः तत्क्षयापेक्षयाज्ञेयं क्षीणो राजनि चेत्यपीति यदुक्तं दृश्यमाने पितृश्चतुर्दश्य
पक्षये ति च कात्यायनोक्तेः दृश्यमानेप्येकइतिगोभिलोक्तेः यस्यां संध्यागतः सोमो मरणालमिव दृश्यते अपरान्हे च

यस्तस्यापिंडानाकरणंध्रुवमितिहारीतोक्तेश्च चंद्रक्षयकालश्चोक्तः कात्यायनेन अष्टमेंशेचतुर्दश्याः क्षीणोभवति
(उत्पद्यते)
चंद्रमाः अमावास्याष्टमेंशेतुपुनः किलभवेदणुरिति तेनपूर्वेद्युरेवपितृयज्ञइत्यूचिवान् कर्काचार्यैरप्यपरान्हे
पिंडपितृयज्ञःचंद्रादर्शनेअमावास्यायामितिकात्यायनसूत्रेदर्शनेनक्षयएवोक्तः तस्मिन्क्षीणेददातीतिस्मृतेः
अतस्तन्मतेश्चतुर्दशीयुक्तदर्शेपितृयज्ञेसतिपरदिनेयागोयोक्तसिद्धः तदेतत्सर्वोत्कृष्टमपिहेमाद्रिकर्कादिव्याख्या
नमापस्तंबैरनभ्युपगमात्कातीयबौधायनादिविषयं आश्वलायनानामपिसंधिपर्वणिपिंडपितृयज्ञः तथाच
सूत्रं अमावास्यायामपरान्हेपिंडपितृयज्ञइति अत्रनारायणवृत्तिः अमावास्याशब्दःप्रतिपत्पंचदश्योःसंधि
वचनोप्यत्रापरान्हशब्दसमन्वयात् तद्युक्तस्याहोरात्रेवर्ततेतस्यापरान्हेन्हश्चतुर्थेभागेपिंडपितृयज्ञःकार्यः औपव
(प्रतिपदि)
अन्वाधानदिने२ संध्येयजनीयेवाहनियदात्वहोरात्रसंधौतिथिसंधिः स्यात्तदोपवसथ्यएवाहनिक्रियतइति अतएवमुहूर्त्तमप्यमा
वास्यैप्रतिपद्यपिचेद्भवेत् तद्गतमक्षयंज्ञेयंपर्वशेषंतुपर्ववदितिहेमाद्रौवचनंपिंडपितृयज्ञपरमुक्तं प्रयोगपारिजा

स्थालीपाकात्पिंडार्थमुद्धृत्य २

सप्तम्यां ३

ते अपंचस्मार्त्तोग्निमतासंपूर्णोदर्शश्राद्धव्यतिषंगेणकार्यः व्यतिषंगोनामोभयोःसहानुष्ठानं एतच्चस्थाली
४० पाकेनसहपिंडार्थमुद्धृत्येतिसूत्रेवृत्तिकृतोक्तं खंडपर्वणितुकेचिदाहुः पूर्वेद्युर्हिपिंडपितृयज्ञव्यतिषंगेणश्रा
द्धंकृत्वापरेह्निकेवलःपिंडपितृयज्ञःकार्यः वृत्तिकृतान्वष्टक्यंचपूर्वेद्युर्मा अमायां सिमास्यर्थपार्वणाकाम्यमा
भ्युदयेष्टम्यामेकोद्दिष्टमथाष्टममित्युदाहृत्यपूर्वेषुचतुर्षुस्थालीपाकादुद्धृत्याग्नौकरणमित्युक्तेर्दर्शश्राद्धे
स्थालीपाकोनियतइतिगम्यते स्थालीपाकश्चपितृयज्ञेएवेतिपूर्वेदिनेव्यतिषंगःसिद्धः प्रयोगपारिजातेतु
वार्षिकश्राद्धादेरपिव्यतिषंगउक्तः किमुतदर्शश्राद्धस्यान्यायविदस्त्वाहुः सूत्रस्यवृत्तेश्चसंपूर्णदर्शविषयत्वा
त्खंडपर्वणिपूर्वेदिनेकेवलंश्राद्धंपरदिनेचकेवलःपितृयज्ञःकार्यः अतएवोक्तंवृत्तिकृता नात्रापूर्वस्थालीपा
कश्चोद्यतेसर्वश्राद्धेषुप्रसंगादिति प्रयोगपारिजातोक्तिरप्येतद्विषयैव पूर्वेदिनेचश्राद्धेग्नौकरणमेवनपाणिहो
मः चतुर्थ्यादिषुसाग्नीनांवन्हौहोमोविधीयते पित्र्यब्राह्मणहस्तेस्यादुत्तरेषुचतुर्ष्वपीतिपरिशिष्टनियमात्

नचलौकिकाग्नौपक्वस्यकथंगृह्याग्नौहोमः नान्याग्नौपक्वमन्याग्नौजुहुयादितिनिषेधात् मेवं श्राद्धस्यगृह्येवि
नस्मार्त्ताग्नौ पाकाग्नौ पचनाग्नौवाकर्त्तव्यत्वात् तस्मात्पूर्वद्युःकेवलंश्राद्धंनव्यतिषंगः इदमेवचयुक्तं आहिताग्निनातुसर्वाधा
निनार्द्धाधानिनाचसंपूर्णेपिंडेवादर्शश्राद्धेताग्नौपृथगेवपितृयज्ञःकार्यो नदर्शश्राद्धव्यतिषंगोरोतिविस्तरभीतेर्विर
मामः संपूर्णादर्शेचविशेषमाहलौगाक्षिः पक्षांतकर्मनिर्वर्त्यवैश्वदेवंचसाग्निकः पिंडयज्ञंततःकुर्यात्ततोन्वाहा
र्यकंबुधइति पक्षांतकर्मान्वाधानं अन्वाहार्यकंदर्शश्राद्धं अपमेवसाग्नेर्जीवत्पितृकस्यपिंडपितृयज्ञकालोज्ञे
यः तस्यापिकात्यायनेननहोमात्तमनारंभोवेत्याम्नानात् पिंडपितृयज्ञाकरणेप्रायश्चित्तमाहपराशरमाधवीयेकात्या
यनः पितृयज्ञात्ययेचैववैश्वदेवात्ययेपिच भोजनेपतितान्नस्यचरुर्वैश्वानरोभवेत् इत्यलं प्रकृतमनुसरामः नि
रग्निकादिभिस्त्वमावास्यापराह्नव्यापित्वलाभेकुतपकालव्यापिनीग्राह्या भूतविद्धाप्यमावास्याप्रतिपन्मिश्रिता
पिवा पित्र्यकर्मणिविद्वद्भिर्ग्राह्याकुतपकालिकीतिहारीतोक्तेः इदंचनिरग्निकादिविषयं सिनीवालीद्विजैःकार्यासा

यदिक्रियतेतर्हिहोमोनेतत्स्यानारंभोवा ४

ग्निकैः पितृकर्मणि स्त्रीभिः शूद्रैः कुहूः कार्या तथा चानग्निकैर्द्विजैरिति लोगाक्षिवचनात् अत्र साग्निरौपासनाग्नि
४१ रपीति मदनपारिजाते उक्तं कुतपश्चापरान्हव्याप्त्यलाभेनुकल्पः अपरान्हद्वयव्यापीयादर्शोस्ति तिथिद्वये आ
हिताग्नेः सिनीवाली निरग्न्यादेः कुहूर्मतेति जाबालिर्नाभावे विधानात् तेन साग्नीनां निरग्नीनां वापरान्हव्यापि
न्येवममुख्यां तिथिसाम्यवृद्धिद्वयेः समव्याप्तौ खर्वादिनानिर्णयः वैषम्येधिका दिनद्वये परान्हास्पर्शे कुतपव्यापिनी
ति माधवः इदमेव युक्तं हेमाद्र्यादिमते कुतपव्यापिन्येव निरग्न्यादेर्मुख्या सिनीवाली दृष्टचंद्रा तथा च व्यासः दृ
ष्टचंद्रा सिनीवाली नष्टचंद्रा कुहूः स्मृतेति पूर्वदिने परदिने एकदेशव्यापित्वे सैव ग्राह्या अंशव्यापित्ववैषम्ये धिक
कालव्यापिनी ग्राह्या दिनद्वये सत्तः समव्याप्तौ तिथिद्वये पूर्वा वृद्धौ साम्ये वा परा तिथिक्षये सिनीवाली तिथिवृद्धौ
कुहूः स्मृता साम्येप्येवं च कुहूर्ज्ञेया वेदवेदांगवादिभिरिति प्रचेतोवचनात् दिनद्वये संपूर्णकुतपव्याप्तिस्तु तिथिवृद्धावेव
भवतीत्यनंतवचनात्परेवेति कुतपस्तु अन्हो मुहूर्ता विज्ञेया दश पंच च सर्वदा तत्राष्टमो मुहूर्तो यः स कालः कुतपः स्मृ

सांवत्सरिकस्य २ एकत्राब्दिकशब्दः प्रथमाब्दिक १९:२

तइतिमात्स्योक्तेः तुलादानपितृदेवप्रीत्यर्थोपवासादौतुपरागाह्येत्यन्यत्रविस्तरः दर्शेचमासिकवार्षिकादिश्राद्धप्राप्तौकालादर्शेविशेषउक्तः दर्शस्यचोत्कुंभस्यदर्शमासिकयोरपीति नित्यस्यवार्षिकस्यापिदार्सिकाब्दिकयोरपीत्युक्तासंपातेदेवताभेदाच्छ्राद्धयुग्मंसमाचरेत् निमित्तानियतिश्चात्रपूर्वानुष्ठानकारणमिति निर्णयदीपेपि नष्टचंद्रेयदाकालेक्षयाहदिवसोभवेत् वैश्वदेवंदर्शपश्राद्धंकुर्यात्प्राग्दर्शकर्मणः अमाश्राद्धंचानुपनीतोपिकुर्यात् श्राद्धकल्पारो अमावास्याष्टकाकृष्णपक्षपंचदशीषुचेत्युपक्रम्य एतच्चानुपनीतोपिकुर्यात्सर्वेषुपर्वसु श्राद्धंसाधारणंनामसर्वकामफलप्रदं भार्याविरहितोप्येतत्प्रवासस्थोपिनित्यसः शूद्रोप्यमंत्रवत्कुर्यादनेनविधिनाबुधइतिमात्स्योक्तेः अमाश्राद्धातिक्रमेप्रायश्चित्तमुक्तमग्निविधाने न्यूषवाचं जपेन्मंत्रंशतवारंदिनेदिनेदिने अमाश्राद्धंयदानास्तितदासंपूर्णमितितत् अत्रपूर्वोक्तसाग्निपदेनाहिताग्निःस्मार्ताग्निमांश्चगृह्यतेविधिनाग्निकादिश्चनिरग्निकः तथाचहेमाद्रिरग्नौकरणप्रकरणे साग्निरग्नावनग्निस्तुद्विजपाणावथाप्सुचा

रात्रेः प्रथमयामादधस्तदावित्यर्थस्तदादिनप्रथमयामेभोजनम् ६ रात्रि प्रथमयामादूर्ध्वम् ५

रात्रि ३

कुर्यादग्नौक्रियांनित्यंलौकिकेनेतिनिश्चितमितिस्मृतिवाक्यमुदाहृत्ययस्त्वसौकृतोपासनतपासमुच्छिन्नाग्नि

४२ तयाभार्याविधुरतयावाग्निरहितस्तस्यद्विजपाणौजलादौवाहोमइतिव्याचक्षते मदनपारिजातेप्येवं इदमे

वसाग्निकानग्निकस्वरूपंसर्वत्रज्ञेयं अथग्रहणेनिर्णीयते तत्रचंद्रग्रहणेयस्मिन्यामेग्रहणंतस्मात्पूर्वंप्रहरत्रयं

नभुंजीत सूर्यग्रहेतुप्रहरचतुष्टयेनभुंजीत सूर्यग्रहेतुनास्नीयात्पूर्वंयामचतुष्टयं चंद्रग्रहेतुयामांस्त्रीन्बा

लवृद्धातुरैर्विनेतिमाधवीयेवृद्धगौतमोक्तेः ग्रहणात्पूर्वदिवसेप्रथमादधियामतः भुंजीतवर्तनात्पूर्वंप्र

थमेप्रथमादधइतिमार्कंडेयोक्तेश्च अधिऊर्द्ध्वं नतुचंद्रग्रहेयामचतुष्टयनिषेधउचितोनतुसूर्यग्रहे सू

रात्रौ ३ र्योदयात्प्राग्भोजनाप्राप्तेःमैवं वचनस्यप्रथमयामेसूर्यग्रहेसतिपूर्वेद्युःपूर्वरात्रेभोजननिषेधपरत्वात्

चंद्रग्रहेविशेषमाह माधवीयेवृद्धवशिष्ठः ग्रस्तोदयेविधोःपूर्वंनाहर्भोजनमाचरेत्इति ग्रस्तास्तेतु

माधवीयेव्यासः अमुक्तयोरस्तगयोरद्यादृष्ट्वापरेहनीति विष्णुधर्मेपि अहोरात्रंनभोक्तव्यंचंद्रसूर्यग्रहे

प्रथमप्रहरे ३

चंद्रग्रहात्प्राग्यामत्रयस्यैवनिषेधात्ततः पूर्वभोजनसंभवात्फलितमाह १
वेधत्वात्तेनभोजनंविधेयम् ५

यदा मुक्तिंदृष्ट्वातुभोक्तव्यंस्नानंकृत्वाततःपरं अहोरात्रनिषेधःसूर्यग्रस्तास्ते मदनरत्नेगार्ग्यः संध्याकालेय
दाराहुर्ग्रसतेशशिभास्करौ तदहर्नैवभुंजीतरात्रावपिकदाचन सायंसंध्यायांसूर्यस्यग्रस्तास्तेपूर्वेन्हिरात्रौचन
भोक्तव्यं प्रातःसंध्यायांचंद्रस्यग्रस्तास्तउत्तरदिनेसंध्याहोमादौनदोषः तदाहोशनांग्रस्तचास्तेगतेलिंदे
ज्ञात्वामुक्त्यवधारणं स्नानहोमादिकंकार्यंभुंजीतंदूषंपुनः एतदनाहिताग्निविषयं अपरान्हेव्रतोपाय
नीयमश्नीतइतिकात्यायनोक्तेः व्रतस्यश्रौतत्वेनविहितत्वेनचप्रबलत्वात् अग्निर्व्रतंकुर्यादितिनिर्णयदीपः
रागप्राप्तभोजनेकालनियमोयं तेनज्वरादौविवनभोजनमितिककान्नुसारिणः वालवृद्धातुराणांतुग्रहणाया
मात्पूर्वमेकयामोनिषिद्धः सायान्हेग्रहणंचेत्स्यादपरान्हेनभोजनं अपरान्हेनमध्यान्हेमध्यान्हेनतुसंगवे
भुंजीतसंगवेचेत्स्यान्नपूर्वंभोजनक्रियेतिमार्कंडेयोक्तेः इदंचवालादिविषयं वालवृद्धातुरैर्विनेतिपूर्वोक्तेः वेध
कालग्रहणोवापक्वमन्नंत्याज्यं सर्वेषामेववर्णानांसूतकंराहुदर्शने स्नात्वाकर्माणिकुर्वीतशृतमन्नंविवर्जयेत् इति

व्रतांगभूतंभोजनंकुर्यात् ५
पक्षांतरमाह ४
दर्शान्वयी २
प्रमादाद्धोमार्थव्रीहीयतच्छिद्रम् १

लग्नभोजनार्थं ग्रहणम् २ अपराह्णे विहितः ४
प्रातः २
सतिज्वरेयथाहिताग्निनानभुज्यतएवमिहापि ४

ग्रहभांडोदकम् । तच्च गांगमिति वक्ष्यति ३ तेन ग्रहणेनांतरितस्य व्यवहितस्य । तेन यावद्ग्रहणं विनियोजनीयं ग्रहणोत्तरं शिष्टं त्याज्यम् १

हेमाद्रौ षड्विंशन्मतात् भुक्तमिति तदंतरितस्योपलक्षणं नवश्राद्धेषु यच्छिष्टं ग्रहपर्युषितं च यदिति मिताक्ष-
४३ रायां वचनात् भार्गवार्चनदीपिकायां ज्योतिर्निबंधे च मेधातिथिः आरनालं पयस्तक्रं दधिस्नेहाज्यपाचि- स्नेहमाज्यपाचितं चेति द्वंद्वः २ सचेलम् ३
तं मणिकस्थोदकं चैव न दुष्येद्राहुसूतके मन्वार्थमुक्तावल्यां अन्नं पक्वमिह त्याज्यं स्नानं सवसनं ग्रहे
वारितक्रारनालादि तिलदर्भैर्न दुष्यति जलेत्वदोषो गांगविषयः ग्रहोषितं जलं पीत्वा पादकृच्छ्रं समाचरेदि-
ति तत्रैव चतुर्विंशतिमतेन्यजलस्य दोषोक्तेः वेधकाले ग्रहणे वा भोजने प्रायश्चित्तमाह माधवीये कात्यायनः
चंद्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुध्यति तस्मिन्नेव दिने भुक्त्वा त्रिरात्रेणैव शुध्यतीति ग्रहणे च त्रिरात्रमेकरात्रं ४ विषयांतरमाह
चोपवासः श्रेयोर्थिना कार्यः एकरात्रमुपोष्यैव स्नात्वा दत्वा च शक्तितः कंचुकादिव सर्पस्य निर्वत्तिः पापकोसितः
त्रिरात्रं समुपोष्यैव ग्रहणे चंद्रसूर्ययोः स्नात्वा दत्वा च विधिवन्मोदते ब्रह्मणा सह इति हेमाद्रौ गालवोक्तेः इदं च पुत्र-
वतिरिक्तविषयं आदित्यहनि संक्रांतौ ग्रहणे चंद्रसूर्ययोः पारणं चोपवासं च न कुर्यात्पुत्रवान्गृही इति जैमिनिवच-

वेधे इत्यर्थः ४

तेनात्रापिभक्ष्यंकिंचित्प्रकल्पयेदित्यर्थः ४

संगवात् २

नात् यदातुरवेर्ग्रस्तास्तस्तदापुत्रिणःप्रहरद्वयंहित्वाबालादिवद्भोजनंनतूपवासः सायान्हेग्रहणंचेत्यादितिपू
र्वोक्तमार्कंडेयवचनात्सायान्हेसंगवेग्रस्तेयाम्यार्धेरदेशंगवादधः मध्यान्हेपरतोग्रस्तेयामान्नोपवासोरविग्रहेइतिले
माद्रिः शारदापरान्हः माधवमतेतुपुत्रिणापितत्रोपवासएव अहोरात्रंनभोक्तव्यमितिपूर्वोक्तनिषेधस्यतेनापि
पालनीयत्वात् उपवासनिषेधस्तुव्रतरूपोपवासपरः कृष्णैकादश्यांनिषेधवदिति मदनरत्नेप्येवं इदमेव
चयुक्तं वर्द्धमानस्त्वहोरात्रंनभोक्तव्यमितिशातातपीयामेसूर्याचंद्रमसोर्लोकानन्द्यायान्यातिमानवइतिफल
श्रुतेर्मुक्तादर्शनेउपवासःकाम्यःनत्वयंनिषेधइत्याह तन्न अवतत्वेपिप्रागुक्तविष्णुधर्मनिषेधावश्यंभाव
३विषयांतरमाह त् तथाव्यासः रविग्रहःसूर्यवारेसोमेसोमग्रहस्तथा चूडामणिरितिख्यातस्तत्रदत्तमनंतकं वारेष्वन्येषुयत्पु
रायंग्रहणेचंद्रसूर्ययोः तत्पुन्यंकोटिगुणितंयोगेचूडामणौस्मृतं अत्रवाद्यंतयोःस्नानंकुर्यात् ग्रस्यमानेभवे
त्स्नानंग्रस्तेहोमोविधीयते मुच्यमानेभवेद्दानंमुक्तेस्नानंविधीयतेतिहेमाद्रौवचनात् स्नानंस्यादुपरागादौम

५४

ध्योहोमः सुरार्चनमितिब्रह्मवैवर्त्तवचनाच्च सर्वेषामेववर्णानां सूतकं राहुदर्शने सचैलं च भवेत्स्नानं सूतकान्नं च वर्जे
येदिति वृद्धवसिष्ठोक्तेश्च सचैलत्वं मुक्तिस्नानपरमिति मदनरत्नेऽक्तं भार्गवार्चनदीपिकायां चतुर्विंशतिमते
सुप्तो यस्तु न कुर्वीत स्नानं ग्रहणसूतके स सूतकी भवेत्तावद्यावत्स्यात्परो ग्रहः इदं च स्नानममंत्रकं कार्यं इति
स्मृतिरत्नावल्यां तत्र तीर्थविशेषे भारते गंगास्नानं तु कुर्वीत ग्रहणे चंद्रसूर्ययोः महानदीषु चान्यासु स्नानं कु
र्याद्यथाविधि महानदीष्वपि मासविशेषे काश्चिच्छ्रेष्ठाः प्रयागं देविकां रेवां रत्नां सरस्वतीं चंद्रभागां कौशिकीं
तापिकां तथा सिंधुं गंडकिकां चैव सरयूः कार्त्तिकादितः मूलं हेमाद्रौ स्पष्टं व्यासः इंदोर्लिंदगुरौ पुरौ परवेदेश्वा
गुरौ ततः गंगातोये तु संप्राप्ते इंदोः कोटीरवेर्दश गवां कोटिसहस्रस्य यत्फलं लभते नरः तत्फलं लभते मर्त्यो ग्र
हणे चंद्रसूर्ययोः असंभवे माघवैशाखः वापीकूपतडागेषु गिरिप्रस्रवणेषु च नद्यां नदे देवखाते सरसीषूद्धृतांबु
नि उष्णोदकेन वा स्नायाद्ग्रहणे चंद्रसूर्ययोः अत्र तारतम्यमाह मार्कंडेयः शीतमुष्णोदकात्पुण्यमपराकं परोदकात्

गंगा था: २

सन्निहत्यांचवा ५

तीर्थितोयंततःपुरांपमहानद्यंबुपावनं ततस्ततोपिगंगांबुपुरापंपुरापस्ततोंबुधिरिति उष्मोदकमातुरविषयं

तथागोदावरीमहापुण्या चंद्रेराहुसमन्विते सूर्येचराहुणाग्रस्तेतमोभूतेमहामुने नर्मदातोयसंस्पर्शीकृतकृत्या

भवंतिहिं पृथ्वीचंद्रोदयेप्रभासखंडे गावोनागास्तिलाधान्यंरत्नानिकनकंमहीं संप्रदायकुरुक्षेत्रेयत्फलंलभ्यतेन इंदुग्रहणेऽ त्यनेनान्वयः३

रैः तदिंदुग्रहणेंभोधौस्नानाद्भवतिषड्गुणं तत्रैवसौरपुराणेंबुधिस्नानमुपक्रम्य दानानियानिलोकेषुविख्याता

निमनीषिभिः तेषांफलमवाप्नोतिग्रहणेचंद्रसूर्ययोः देवीपुराणे गंगाकनखलंपुरांपप्रयागंपुष्करंतथा कुरु

क्षेत्रंमहापुण्यंराहुग्रस्तेदिवाकरे स्नानायंभवेस्मरणंवाकार्यं स्मृत्वाशतक्रतुफलंद्दष्ट्वासर्वाघनाशनं स्पृष्ट्वागो

मेधफलंतुपीत्वासौत्रामणींलभेत स्नात्वावाजिमखंपुरांपप्राप्नुयादविचारतः रविचंद्रोपरागेचअयनेचोत्तरेतथेति

मार्कंडेयोक्तेः अत्रश्राद्धमाह व्यासः गः चंद्रसूर्यग्रहेयस्तुश्राद्धंविधिवदाचरेत् तेनैवसकलापृथ्वीदत्ताविप्रस्य

वैकरे भारते सर्वस्वेनापिकर्त्तव्यंश्राद्धंवैराहुदर्शने अकुर्वाणस्तुनास्तिक्यात्पंकेगौरिवसीदति विस्मुराहुदर्शनदत्तंहि

असंशयात्३

पक्वेनौदनादिना १ साग्निकेनाग्न्यभावे आमश्राद्धं कार्य्यम् १

हेम्नावाकार्य्यनित्यन्नेन १

४५ सार्द्धमाचंद्रतारकं इदं चैमान्नेन आपद्यनग्नौ तीर्थे च चंद्रसूर्यग्रहे तथा आमश्राद्धं प्रकुर्वीत हेमश्राद्धमथापि चेति शात
तपोक्तेरिति हेमाद्रिमाधवादयः अपरार्कस्तु एतद्द्विजानां पाकाभावे ज्ञेयं तीर्थश्राद्धवत् पाकाभावे द्विजातीनामाम
श्राद्धं विधीयते इति स्मृत्युक्तेः सैंहिकेयो यदा सूर्यं ग्रसते पर्वसंधिषु गजच्छायातु सा प्रोक्ता तस्यां श्राद्धं प्रकल्प
येत् घृतेन भोजयेद्विप्रानन्नं तो भूमौ समुत्सृजेत् इति वायवीयोक्तेश्चेत्याह विज्ञानेश्वरोप्याह ग्रहणश्राद्धभोक्तु
र्दोषो दातुस्त्वभ्युदय इति सूतके मृतके भुंक्ते ग्रहीते शशिभास्करे छायायां हस्तिनश्चैव न भूयः पुरुषो भवेदित्याप
स्तंबेन भोजननिषेधाच्च अयं च निषेधः श्राद्धभोक्तुः हस्तिच्छायासाहचर्यात् अत्र ग्रहणनिमित्तकश्राद्धेनैवामा
वास्यासंक्रांतिनिमित्तिकानां सिद्धिः दार्शिकालभ्यपौरपित्तिकालादर्शोक्तेः अत्राशौचमध्येपि स्नानश्राद्धादिका
र्यमेव सूतके मृतके चैव न दोषो राहुदर्शने तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते इति माधवीये वृद्धवशिष्ठोक्तेः स्म
तिकर्मपरित्यागो राहोरन्यत्र सूतके इति व्याघ्रपादोक्तेश्च कालादर्शे प्ययं गिरः सर्ववर्णाः सूतकेपि मृतके राहुदर्शने

महोदयाद्यलभ्यम् ३ तस्याश्च श्राद्धसूचकत्वात् साहि श्राद्धे एव प्रशस्ता अन्यथा य
जमानस्यापि सूतके मृतके च भोजननिषेधः संभाव्येत ४

यात्रार्तौ दीनां ते नीर्थप्राप्ते
त्रावपि कुर्यात् पित्रादिमृत

इदं निर्मूलं वचनं तद्वलेन वदंतः २

स्नात्वा श्राद्धं प्रकुर्वीरन्दानं सायं विवर्जितं मदनपारिजातेप्येवं तेन स्नानमात्रं प्रकुर्वीत दानं श्राद्धं विवर्जितमिति नि
र्मूलं वदंतो गौडाः परास्ताः इयं च शुद्धिर्विशेषान्मंत्रदीक्षापुरश्चरणादि सर्वस्मार्तकर्मविषया मदनरत्नेप्ये
वं रजस्वलायास्तु भार्गवार्चनदीपिकायां सूर्योदयनिबंधे न सूतकादिदोषोस्ति ग्रहे होमजपादिषु ग्रस्ते
स्नायादुदक्यापि तीर्थोद्धृतवारिणेति अत्र स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला पात्रांतरिततोयेन स्नानं
कृत्वा व्रतं चरेदित्यादिर्मितान्तरोक्तो विधिर्ज्ञेयः तथा ग्रहणे रात्रावपि श्राद्धादिकार्यं ग्रहणोद्वाहसंक्रांतियात्रा
र्तिप्रसवेषु च दानं नैमित्तिकं ज्ञेयं रात्रावपि तदिष्यते इति अपरार्के व्यासोक्तेः चंद्रग्रहे तथा रात्रौ स्नानं दानं प्रशस्यते
इति देवलोक्तेश्च यदा च ज्योतिःशास्त्रगम्यो दिने चंद्रग्रहो रात्रौ च सूर्यग्रहस्तदा स्नानादि न कार्यं सूर्यग्रहो यदा रा
त्रौ दिवा चंद्रग्रहस्तथा तत्र स्नानं न कुर्वीत दद्याद्दानं च न क्वचित् ग्रहणादिने वार्षिकश्राद्धप्राप्तौ प्रयोगपारिजाते गोभि
लः दर्शे रविग्रहे पित्रोः प्रत्याब्दिकमुपस्थितं अन्नेनासंभवे हेम्ना कुर्यादामेन वा सुत इति अत्र दर्शे रविपितृसुतशब्दाः

अन्नासंभवे १ इतिषट्त्रिंशन्मतात् २

अन्येषामप्युपलक्षकाः १ औचित्यसाम्यात् १ अस्तात्प्रागारभ्योदयो यस्य तस्मिन् ४
अस्तम् ५

४८ प्रदर्शनार्थाः न्यायसाम्यात् तेन चंद्रग्रहणेपि सपिंडादिवार्षिकमन्वादिनातद्दिन एव कार्यमिति मदनपारिजाते
व्याख्यातं पश्चीचंद्रोदयेप्येवं तेन यानि आमश्राद्धं प्रकुर्वीत माससंवत्सरादृते इति अन्नेनैवाब्दिकं कुर्याद्धेम्ना
वामेन न क्वचिदिति मरीचिलोगाक्षिवचनानि तानि ग्रहणादिनातिरिक्तविषयाणि निर्णयामृतेप्येवं यानि तु
ग्रहणात्तु द्वितीये न्हि रजोदोषात्तु पंचमे तथा ग्रस्तोदये यदा चंद्रे प्रत्यब्दं समुपस्थितं तद्दिने चोपवासः स्यात्प्रत्य
ब्दं तु परेहनि तथा ग्रस्तावेवास्तमानं तु रवींदू प्राप्नुतो यदि प्रत्यब्दं तु तथा कार्यं परेहन्येव सर्वदा चंद्रसूर्योपरागे
च तथा श्राद्धं परेहनीत्यादीनि वचनानि तानि महानिबंधेष्वप्यनुपलंभान्निर्मूलानि प्रत्युत पूर्वोक्तानिबंधेषु त
द्दिन एव श्राद्धमुक्तमित्यलं ग्रहणादिसप्तदिनपर्यंतं रामगोपालाद्यागमदीक्षोक्ता शिवार्चनचंद्रिकायां ज्ञा
नार्णवे मंत्राद्यारंभणं कुर्याद्ग्रहणे चंद्रसूर्ययोः ग्रहणाद्यपि देवेशि कालास्सप्तदिनावधीति रत्नसागरे स
तीर्थेर्के विधुग्रसे तंतुदामनपर्वणि मंत्रदीक्षां प्रकुर्वाणो मासर्क्षादीन्न शोधयेत् अत्र सूर्यग्रहणमेव मुख्यं

तत्र केनचित्प्रक्षिप्तानीति फलितम् २ सांवत्सरिकम् ५

स्वराशेरष्टमादिसंख्यास्थंतत्तीयादिम् ३

राशिषु ४ ब्रह्मचारिणाम् २

तः प्रवृत्तपूर्वविद्धाविधायक वचनेन तस्य बाधाष्टदशनाडीवेधेपि पूर्वैवत्यपंचपंचक्याः साधुः अत्रपूर्णिमानुरोधेनैव
यथा त्रिरात्रिसंपत्तिर्भवति तथात्रयोदश्यादिग्राह्या तस्याः प्रधानत्वात् अयंनिर्णयोऽमायामपि ज्ञेयः पारणंतु
पूर्णिमांत्ये कार्या अत्रस्त्रीव्रतेषु विशेषः परिभाषायामुक्तः अत्र विशेषो भविष्योक्ते गृहीत्वा वालुकां पात्रे प्रस्थमा
त्रां युधिष्ठिर ततो वंशमये पात्रे वस्त्रयुग्मेन वेष्टिते सावित्री प्रतिमां कुर्यात्सौवर्णीं वापि मृण्मयीं सांङ्गसत्यवताः साध्वीं
फलनैवेद्यदीपकैः रजन्या कंठसूत्रैश्च पुष्पैः कुंकुमकेशरैः पूजयेदिति शेषः रजनी हरिद्रा कंठसूत्रं सौभाग्यतंतुः सावि
त्र्याख्यानकं चापि वाचयीत द्विजोत्तमं रात्रौ जागरणं कृत्वा प्रभाते विमले ततः तामपि ब्राह्मणे दत्वा प्रणिपत्य क्षमा

पपेत् मंत्रस्तु सावित्रियं मया दत्वा सहिरण्या महासती ब्रह्मणः प्रीणनार्थाय ब्राह्मणप्रतिगृह्यतां व्रतेनानेन राजेंद्र वै
७१ धव्यं नाप्नुयात्क्वचित् इति ज्येष्ठपौर्णिमास्यां विशेष आदित्यपुराणे ज्येष्ठमासि तिलान्दत्वा पौर्णमास्यां विशेषतः अ
श्वमेधस्य तत्पुण्यं तत्प्राप्नोति न संशयः विष्णुरपि ज्येष्ठी ज्येष्ठयुता चेत्स्यात्तस्यां छत्रोपनत्प्रदानेन नरो नराधिपत्वमवा
प्नोतीति हेमाद्रौ ज्योतिषे ऐंद्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा पूर्णिमा ज्येष्ठमासस्य महाज्येष्ठी प्रकीर्तिता इयं
मन्वादिरपि सा पौर्वाह्निकी ग्राह्या विशेषस्तु वैवे उक्तः तथा पराके वामनपुराणे उदकुंभांबुदानं च तालवृंतं सचंद
नं त्रिविक्रमस्य प्रीत्यर्थं दातव्यं ज्येष्ठमासि लिखिति इति भट्टकमलाकरकृते निर्णयसिंधौ ज्येष्ठमासः मिथुनशंक्रांतौ परः
षोडशघटिकाः पुण्यकालः रात्रौ तु प्राग्वेवोक्तं आषाढस्य द्वितीयायां रथोत्सवः तदुक्तं तिथितत्वे स्कांदे आषाढस्य सितपक्षे
द्वितीया पुष्यसंयुता तस्यां रथे समारोप्य रामं मां भद्रया सह यात्रोत्सवं प्रवर्त्याथ प्रीणायेत द्विजान्बहून् तथा ऋक्षाभा
वेतिथौ कार्या यात्रा सा प्रीतये मम आषाढशुक्लदशमी पौर्णमासी च मन्वादिः सा च पूर्वाह्नव्यापिनीति प्रागुक्तं आषाढशु

क्वद्वादश्यामनुराधयोगरहितायांपारणांकुर्यात् तदुक्तंभविष्ये आभाकासितपक्षेषुमैत्रश्रवणरेवती संगमेनहिभो
क्तव्यंद्वादशद्वाशीहरेत् अस्यार्थः आषाढभाद्रपदकार्त्तिकेशुक्लद्वादशीष्वनुराधाश्रवणरेवतीयोगेपारणंनकुर्यादि
ति अत्रयद्यप्येतावदेवोक्तंतथाप्यनुराधाप्रथमपादएववर्ज्यः तदुक्तंविष्णुधर्मे मैत्राद्यपादेस्वपितीहविष्णुःपौष्णात्य
पादेप्रतिबोधमेति श्रुतेश्चमध्येपरिवर्त्तमेति सुप्तिप्रबोधपरिवर्त्तनमेववर्ज्यमिति वस्तुतस्तुपूर्ववचनमिदंनिर्मूलमेव
अत्रैवविष्णुशयनोत्सवउक्तोहेमाद्रौ एकादश्यांतुशुक्लायामाषाढेभगवान्हरिः भुजंगशयनेशेतेक्षीरार्णवजलेस
देति कल्पतरौयमः क्षीराब्धौशेषपर्यंकेआषाढ्यांसंविशेद्धरिः निद्रांत्यजतिकार्त्तिक्यांतयोस्तंपूजयेत्सदा ब्रह्महत्या
दिकंपापंक्षिप्रमेवव्यपोहति हिंसात्मकैस्तुकिंतस्ययज्ञैःकार्यंमहात्मनः प्रस्वापेचप्रबोधेचपूजितोयेनकेशवः द्वा
दशानंदेपिस्कांदे आषाढशुक्लैकादश्यांकुर्यात्स्वप्नमहोत्सवं अयंद्वादश्यामप्युक्तः आभाकासितपक्षेषुमैत्रश्रवणरेव
ती आदिमध्यावसानेषुप्रस्वापावर्त्तजागराः निशिस्वापोदिवोत्थानंसंध्यायांपरिवर्त्तनं अन्यत्रपादयोगेपिद्वादश्यां

मेव कारयेत् आभाकाद्येषु मासेषु मिथुने माधवस्य च द्वादश्यां शुक्लपक्षे च प्रस्वापावर्त्तनोत्सवो इति भविष्योक्तेः द्वादश्यां
८२ संधिसमये न स्वत्रारामसंभवे आभाकासितपक्षेषु शयनावर्त्तनादिकमिति वाराहोक्तेश्च द्वादश्यामित्यत्रापि पारणाहो
मात्रं विवक्षितं पारणाहे पूर्वरात्रे घंटादीन्वादयन्मुहुरिति रामार्चनचंद्रिकोक्तेः अत्र मूलं चिंत्यं आदित्यपुराणे विष्णु
र्दिवा न स्वपिति न च रात्रौ विबुध्यते द्वादशी ऋक्षसंयोगे पादयोगो न कारणं अत्रैकादशीद्वादशीदेशभेदेन व्यवस्था
इदं च मलमासे न कार्यं ईशानस्य व्रते विघ्नोः शयनं परिवर्त्तनमिति कालादर्शे निषेधात् यदपि एकादश्यां तु गृह्णीया
त्संक्रांतौ कर्कटस्य वा आषाढ्यां वा नरो भक्त्या चातुर्मास्यव्रतक्रियामिति हेमाद्रौ ब्रह्मवैवर्त्ते तदपि मलमासे सति हि एवं
मिथुनस्थो यदा भानुरमावास्याद्वयं स्पृशेत् द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे इति तत्रैव मोहचूलोत्तरोक्तेः
अत्रैव चातुर्मास्यव्रतारंभ ऽ उक्तो भारते आषाढे तु सितपक्षे एकादश्यामुपोषितः चातुर्मास्यव्रतं कुर्याद्यत्किंचिन्निय
तो नरः इति अस्य नित्यत्वं तत्रैवोक्तं वार्षिकांश्चतुरो मासान्वाहयेत्केनचिन्नरः व्रतेन नो चेदाप्नोति किल्बिषं वत्सरोद्भवं

असंभवे तुलार्केपि कर्त्तव्यं तत्प्रजैत्त्नतइति अस्यारंभश्चशुक्लास्तादावपिकार्यः नशौचावं नूमौढ्यं चशुक्रगुर्वोर्निवातिथेः
खंडत्वं चिंतयेच्चादौ चातुर्मास्यविधौनरइति हेमाद्रौवृद्धगार्ग्योक्तेः आशौचमध्येपि द्वितीयंरंभोभवति अशुचिर्वाशुचि
र्वापियदिस्त्रीयदिवापुमान् व्रतमेतन्नरःकृत्वामुच्यतेसर्वपातकैरिति भार्गवार्चनदीपिकायांस्कांदोक्तेः आरब्धेसूत
केनस्यादनारब्धेतुसूतकमितिविष्णुवचनात् यत्तुअसंक्रांततयामासंदैवेपित्र्येचकर्मणि मलमासमसौवंचवर्ज
येन्मतिमान्नरइतिहेमाद्रौचातुर्मास्यव्रतप्रकरणेभविष्यवचनं तत्पूषानुमंत्रणमंत्रवदसंबंद्धमध्येपठितमितिज्ञे
यं अन्यथापित्र्यस्यपूर्वोक्तस्यविवाहेदश्चचातुर्मास्येव्रतेकःप्रसंगः प्रकरणानिवेशोपिवाप्रथमारंभविषयंज्ञेयं केचित्तु
प्रतिवर्षंचातुर्मास्यव्रतप्रयोगाणांभिन्नत्वादाशौचादिपाते द्वितीयादिप्रयोगोनभवत्येवेत्याहुः तन्न प्रतिवर्षंचयःकुर्यादे
वं वैसंस्मरन्हरिं देहांतेतिप्रदीप्तेनविमानेनार्कवर्चसा मोदतेविष्णुलोकेसौयावदाभूतसंप्लवमितिहेमाद्रौभविष्यवचना
दित्यालंविस्तरः इदंचशिवभक्तादिभिरपिकार्यं शिवेवाभक्तिसंयुक्तोभानौवागणनायके कृत्वाव्रतस्यनियमंयथो

७३ त्ताफलभाग्भवेत् इति ब्रह्मवैवर्त्तात् व्रतग्रहणप्रकारस्तु हेमाद्रौ भविष्ये महापूजां ततः कुर्याद्देवदेवस्य चक्रिणः जाती
कुसुममालाभिर्मंत्रेणानेन पूजयेत् समेत्यापि जगन्नाथे जगत्सुप्तं भवेदिदं विबुद्धे च विबुद्ध्येत प्रसन्नो मे भवाच्युत ए
वं तां प्रतिमां विष्णोः पूजयित्वा स्वयं नरः प्रभाषेताग्रतो विष्णोः कृतांजलिपुटस्तथा चतुरो वार्षिकान्मासान्देवस्योत्थापना
वधि इमं करिष्ये नियमं निर्विघ्नं कुरु मेच्युत इदं व्रतं मया देव गृहीतं पुरतस्तव निर्विघ्नं सिद्धिमायातु प्रसादात्तव केशव
गृहीतेस्मिन्व्रते देव पंचत्वं यदि मे भवेत् तदा भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन गृहीतेस्मिन्व्रते देव यद्यपूर्णे म्रियेह्यहं
तन्मे भवतु संपूर्णं त्वत्प्रसादाज्जनार्दनेति तत्र भार्गवार्चनदीपिकायां नरसिंहपरिचर्यायां च भविष्ये श्रावणे वर्जयेच्छाकं
दधि भाद्रपदे तथा दुग्धमाश्वयुजे मासि कार्त्तिके द्विदलं त्यजेदिति स्कांदेपि चातुर्मास्यकल्पे चत्वार्येतानि नित्यानि च
तुराश्रमवर्णिनां प्रथमे मासि कर्त्तव्यं नित्यं शाकव्रतं नरैः द्वितीये मासि कर्त्तव्यं दधिव्रतमनुत्तमं पयोव्रतं तृतीये तु चतुर्थे
तु निशामय द्विदलं बहुवीजं च वृंताकं चापि वर्जयेत् नित्यान्येतानि विप्रेंद्र व्रतान्याहुर्मनीषिणः जंवीरं राजमाषाश्च म

नतिषेधः निषेधो हि विध्यभावव्रतप्रकरणे चाभावस्यानुपयोगात्पर्युदासः पर्युदासस्सदृग्ग्राही तद्भिन्नस्तत्सदृशः इत्यर्थः स चेह व्रतो भिन्नो व्रतसदृशः त्योस्त्येव ५

लकं रक्तमूलकं कूष्मांडं चेक्षुदंडं च चातुर्मास्ये त्यजेद्बुधः अन्नमूलं चिंत्यं तथा विशेषाद्बदरीं धात्रीं कूष्मांडं तिंतिडीं त्यजेत् जीर्णधात्रीफलं ग्राह्यं कथंचित्कायशोधनमिति तीर्थसौख्ये स्कांदे वार्षिकांश्चतुरो मासान्प्रसुप्ते देवजना

द्वा३ र्दने मंचखट्वादिशयनं वर्जयेद्भक्तिमान्नरः अन्यतो वर्जयेद्भार्यां मांसं मधु परौदनं पटोलं मूलकं चैव वृंताकं च न भक्षयेत् अभक्ष्यं वर्जयेद्दूरान्मसूरं सितसर्षपं राजमाषान्कुलस्थांश्च आसुधान्यं च संत्यजेत् शाकं दधि पयो माषान् आवणादिषु संत्यजेत् अन्नत्यज्येदिति वर्जनसंकल्परूपः पर्युदासो ज्ञेयः व्रतानौक्रमात् अत्र केचित्साकाख्यपत्रपुष्पादीत्यमरकोशस्य शक्यतेऽशितुमनेनेति शाक इति क्षीरस्वामिना व्याख्यानात् व्यंजनमात्रस्य निषेधमाचक्षते अन्ये तु शाकशब्दस्य पत्रादि दशविध शाके योगरूढत्वात् योगाच्च रूढेर्बलीयस्त्वात्सूपादीनामपि त्यागापत्तेश्च तन्नत्याचक्षते तेन मूलपत्रकरीराग्रफलकांडाधिरूढकाः त्वक्पुष्पकवचं चेति शाकं दशविधं स्मृतं इति क्षीरस्वामिनोक्तस्य शाकस्य निषेधमाहुः इति अधिरूढकोंकुरः वस्तुतस्तु तत्तत्कालोद्भवाः शाका वर्जनीयाः प्रयत्नतः बहुबीजमवीर्यं च

वर्जनस्य व्रतरूपतापेक्षितेत्यर्थः नहि व्रतोपक्रमेऽभावोपदेशो युज्यते ५

विकारीं च विवर्जयदिति भविष्यवचनात्तत्कालोत्पन्नानां दशविधशाकानां निषेधः अत्र तत्कालोद्भवजातीयत्वं
७५ विवक्षितं तेनातयादिशोषितानां वर्षांतरोद्भवानामपि निषेधः अत्र तत्कालोद्भवत्वमात्रं विवक्षितं न तु तन्मात्रका
लोद्भवत्वं गौरवात् तेनान्यकालोद्भवानां तत्कालोद्भवानां च विंवादीनां निषेधः अत्र तत्तत्कालोद्भवा इति वीप्साव
शात्स्वस्वकालोद्भवानां सर्वेषां निषेध इति निष्कर्षः बहुबीजमित्यनेकबीजमिति केचित् इतरावयवापेक्षया
बीजावयवा यत्र बहवस्तदित्यन्ये आर्विंजकदल्यादि वस्तुतस्तु इदं महानिबंधेष्वभावान्निर्मूलमेव आचार
प्रदीपे वृंताकं च कलिंगं च बिल्वोदुंवरभिःसटः उदरे यस्य जीर्यंति तस्य दूरतरो हरिः तथापरार्के देवलः अ
न्नवर्यं तथा शौचं सत्यमामिषवर्जनं व्रतान्येतानि चत्वारि वरिष्ठानीति निश्चयः आमिषाणी चोक्तानि रामार्चन
चंद्रिकायां पाद्मे प्राणंगपूर्णी चर्मांबुजं वीरं वीजपूरकं अयज्ञसिद्धमाषादि यच्छिलोपरनिवेदितं दग्धमन्नं मसू
रं च मांसं चेत्यष्टधामिषं रुच्यं तत्तद्देशलभ्यं स्वप्नेदेवे विवर्जयेत् पाद्मे कार्तिकमाहात्म्ये गोच्छागीमहिषी दु

दग्धान्नं ४

ग्धादन्यदुग्धादि चामिषं धान्येरनिवेदितं मसूरिकाप्रोक्ता अन्नं पर्युषितं तथा द्विजक्रीता रसाः सर्वे लवणं भूमि
जं तथा ताम्रपात्रस्थितं गव्यं जलं पल्वलसंस्थितं आत्मार्थं याचितं चान्नमामिषं तत्समं तं बुधैः तथा निष्पावान् रा
जमाषांश्च मसूरं संधितानि च वृंताकं कौलिंगं च सूपे देवे विवर्जयेत् संधितानि लवणशाकादीनि तत्रैव विष्णुध
र्मे चतुर्ष्वपीह मासेषु हविष्याशी न पापभाक् हविष्याणि तु पथ्यौ च व्रतोदये भविष्ये हैमंतिकं सिता स्विन्नं धान्यं
मुद्गास्तिला जवाः कलापं कंगुनीवारं वास्तुकं हिलमोचिका षष्ठिका कालशाकं च मूलकं कमुकेतरत् कंदः सैं
धवसामुद्रे गव्ये च दधिसर्पिषी पयोनुद्धृतसारं च पनसाम्रहरीतकी पिप्पलीजीरकं चैव नागरंग जपिप्पली
कंदलीलवलीधात्रीफलान्यगुडमैक्षवं अतैलपक्वं मुनयो हविष्याणि प्रचक्षते इति मदनरत्नेप्येवं सितमस्वि
न्नं अन्नमपक्वं धान्यं तंडुलाः कमुकं केमुकं त्वाड् इति प्राच्येषु प्रसिद्धः कंदः कलापस्तु सतिनक इत्यमरः मटुरी इति प्र
सिद्धं धान्यं आगस्तिसंहितायां हैमंतान्युक्तानि नारिकेलफलं चैव कदलीलवली तथा आम्रमामलकं चैव पनसं

चहरीतकी व्रतांतरप्रशस्तंचहविष्यंमन्वतेबुधाः अन्यान्यपिव्रतान्युक्तानिहेमाद्रौभविष्ये स्त्रीवानरोवामद्भक्तोधर्म्मा
७५ र्थीसुदृढव्रतः गृह्णीयान्नियमानेतान्दंतधावनपूर्वकान् तेषांफलानिवक्ष्यामितत्कर्तृणांपृथक्पृथक् मधुरस्वरो
भवेद्राजापुरुषोगुडवर्जनात् तैलस्यवर्जनाद्भजन्सुंदरांगःप्रजायते योगाभ्यासीभवेद्यस्तुसब्रह्मपदमाप्नुयात् तां
बूलवर्जनाद्भोगीरक्तकंठश्चजायते घृतत्यागाच्चलावण्यंसर्वस्निग्धतनुर्भवेत् शाकपत्राशनाद्रोगी अपक्वाशोम
लोभवेत् भूमौप्रस्तरशायीचविप्रोमुनिवरोभवेत् एकांतरोपवासेनब्रह्मलोकेमहीयते धारणान्नखरोम्णांचगंगा
स्नानफलंलभेत् मौनव्रतीभवेद्यस्तुतस्याज्ञास्खलिताभवेत् भूमौभुंक्तेसदायस्तुसपृथ्व्याःपतिर्भवेत् प्रदक्षिणा
शतंयस्तुकरोतिस्तुतिपाठकः हंसयुक्तविमानेनसचविष्णुपुरंव्रजेत् अयाचितेनप्राप्नोतिपुत्रान्धर्म्यानशेषतः
तृतीयदिनकृत्यर्थः २ षष्ठान्नकालभोक्तायाः कल्पस्थायीभवेद्दिवि पर्णेषुयोनरोभुंक्तेकुरुक्षेत्रफलंलभेत् गुडवर्जीनरोदद्यात्तद्भक्तं
ताम्रभाजनं सहिरण्यंनरश्रेष्ठलवणस्याप्ययंविधिः सुप्तेदेवेतुयोविष्णोःशिवस्यागणामर्चयेत् पंचवर्णैस्तुयो

नित्यंस्वस्तिकैःपद्मकैस्तथा सयातिरुद्रलोकंहि गरणापत्यप्रवाप्नुयात् अथैवासमाप्तौकार्तिक्यांदानानिन

क्तेवस्त्रयुगं एकांतरोपवासेगौः भूशयनेसय्या षष्ठकालभोजनेगौः व्रीहिगोधूमादित्यागेहेमव्रीह्यादिकंधे

गायुगं शाकाशनेगौः पयोव्रतेच मधुदधिघृतव्रतेषुवासोगौश्च ब्रह्मचर्यव्रतेस्वर्णमूर्तिः तांबूलव्रतेवासोयु

गं मौनव्रतेघृतकुंभोवस्त्रयुगंघंटाच देवाग्रेरंगमालिकाकरणेधेनुर्हेमपद्मंच दीपव्रतेदीपिकावासोयुगंच भू

मिभोजनेपर्णभोजनेच कांस्यपात्रंगौश्च चतुःपथदीपेगोग्रासेचगोवृषौ प्रदद्यात् गोघातेवस्त्रं अनुक्तेषुस्वर्णंगौ

श्चेत्यादिहेमाद्रौज्ञेयं तथाभार्गवार्चनदीपिकायांपाद्मे शयनीबोधनीमध्येशमीदूर्वापमार्गकैः भृंगराजेनदे

वांस्तुनार्चयीतकदाचन हेमाद्रौपाद्मे आषाढादिचतुर्मासानभ्यंगंवर्जयेन्नरः समाप्तौचपुनर्दद्यात्तिलतैलंसुतंबटं

आषाढादिचतुर्मासंवर्जयेन्नावकृंतनं वृंताकंभजनंचैवमधुसर्पिर्घटान्वितं कार्त्तिक्यांतत्सुनर्हेमंब्राह्मणायनि

वेदयेत् अन्यान्यपिवर्जनसंकल्परूपाणिपृथ्वीचंद्रोदयेज्ञेयानि टोडरानंदेस्कांदे एकांतरंद्व्यंतरंवाकुर्यान्मासोप

नरीतुं४ ह४ आयुधानि ३ निसानि ४ ब्रह्म २ अपक्कः २

वासकं अनोदनं फलाहारं नक्तव्रतमथापि वा अत्रैव तप्तमुद्राधारणमुक्तं रामार्चनचंद्रिकायां भविष्ये शयन्यां चै
७६ व बोधिन्यां चक्रतीर्थे तथैव च शंखचक्रविधानेन वह्निपूतो भवेन्नर इति अतप्ततनूर्न तदामो अश्नुत इति ऋग्वेदात्
सहोवाच याज्ञवल्क्यश्च स्मात्पुमानात्महिताय हरिं भजेत् शुलोकमौलेर्वर्माणि रायपग्निनासंदधत इति सतपथश्रुतेः
व्र४ प्रतद्विष्णो अजवक्रे सुतप्तजन्मा भोधीतते वे च पिरणीं द्रु मूलेवा धृदं धन्ये पुराणानि लिंगान्यंगे तप्तान्यायुधान्यर्पये
तीति सामवेदात् अग्निहोत्रं यथा नित्यं वेदस्याध्यायनं यथा ब्राह्मणस्य तथैवेदं तप्तमुद्रादिधारणमिति प
द्मपुराणे चेति ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वाप्यदि वेतरः शंखचक्रांकिततनुस्तुलसीमंजरीधरः गोपीचंदन
लिप्तांगो दृष्टश्चेत्तदघं कुतः इति काशीखंडे चेति तत्प्रकारस्तु रामार्चनचंद्रिकातो ज्ञेयः पथ्वीचंद्रोदपादयस्तु य
स्तु संतप्तसंस्कारिलिंगचिह्नतनुर्नरः स० सर्वयातनाभोगी चंडालो जन्मकोटिषु द्विजं तु तप्तसंस्कारिलिंगांकितत
नुं नरः संभाष्य रौरवं याति यावदिंद्राश्चतुर्दश इति वृहन्नारदीयोक्तेः शंखचक्राद्यंकनं च गीतनृत्यादिकं तथा एकया

तथाच चक्रांकितो विप्रः सर्वकर्मसु २

अर्थांतरत्वात् ३

तेरयं धर्मो न जातु स्याद्द्विजन्मनः शंखं च चक्रं मृत्स्नायस्तु कुर्यात्तप्तायसेन वा स सूद्रवद्बहिकार्यः सर्वस्माद्द्विजकर्म
णः यथा श्मशानजं काष्ठमनर्हं सर्वकर्मसु गर्हितः तथा शिवकेशवयोरंकान् शूलचक्रादिकान् द्विजः नधारये
त मतिमान्वैदिके वर्त्मनि स्थित इति विष्णु शैवलायनवचनादृग्वेदादिश्रुतीनामन्यार्थत्वादन्यश्रुतीनां चासत्वाच्चक्रा
दिधारणं शूद्रविषयमित्यूचुः सूतसंहितायां च विष्णागमादितंत्रेषु दीक्षितानां विधीयते शंखचक्रगदापद्मैरं
कनं नान्यदेहिनां वेदमार्गैकनिष्ठस्तु मोहेनाप्यंकितो यदि पतत्येव न संदेहस्तथा मुद्रांतरादपि इत्युक्तं न्तत्युस्वाद
रार्थं निबद्धमिति श्रीधरः यद्यपि निषेधस्य प्राप्तिसापेक्षत्वाद्विधिं विना च तदयोगादुपजीव्यविरोधेन तोपसौकरोती आद्यभागे ४ पञ्चयागे ५
ति वद्विकल्पो युक्तस्तथाप्येकजातेरयं धर्म इत्यनेन सामान्यवाक्यानामुपसंहाराद्द्विजातिनिषेधो नित्यानुवाद इति तदा
शयः अत्र शिष्टाचार एव संकटपाशनिःसरणास्त्रणीति संक्षेपः आषाढपौर्णमास्यां कोकिलाव्रतमुक्तं हे मार्ज भवि
ष्ये आषाढपौर्णमास्यां तु संध्याकाले ह्युपस्थिते संकल्पयेन्मासमेकं श्रावणे प्रत्यहं ह्यहं स्नानं करिष्ये नियतो ब्रह्म

अत्र यथा निषेधस्य प्राप्तिपूर्वकत्वादनुक्तविध्याक्षेपेण विकल्प उच्यते तथेत्यर्थः ३

ननु पण्डिता अपि केचिद्धारयंति तत्राह २

चर्यस्थितास्मतिं भोक्ष्यामि नक्तं भूसय्यां करिष्ये प्राणिनां दयामिति अस्य नक्तव्रतत्वात्सायान्हव्यापिनी ग्राह्या अ
७७ त्रैव शिवसयनोत्सव उक्तो हेमाद्रौ वामनपुराणे पौर्णमास्यामुमानाथः स्वपते चर्मसंस्तरे मदनरत्नेप्येवं इयं प्रदोषव्या
पिनी अत्रैव व्यासपूजोक्ता तत्र त्रिमुहूर्ताश्चेत्परैवेति संन्यासपद्धतौ त्रिमुहूर्ताधिकं ग्राह्यं पर्वेद्धौ रप्रणामयेरिति वच
नात् इति कमलाकरभट्टकृते निर्णयसिंधौ आषाढमासः कर्कटसंक्रांतौ पूर्वास्त्रिंशद्दंडाः पुण्यकालः सूर्योदयो
त्तरं संक्रमे तु परत एव पुण्यं रात्रौ तु निशीथात्प्राक् परतश्च संक्रमे परार्कहेमाद्र्यनंतभट्टादिमते पूर्वोत्तरदिनयोः पंच
नाड्यः पुण्यकालः सूर्योद धनुर्मीनावतिक्रम्य कन्यां च मिथुनं तथा पूर्वापरविभागेन रात्रौ संक्रांते रविः दिनांतपं म४
चनाड्यस्तु तदा पुण्यतमाः स्मृताः उदयेपि तथा पंच दैवे पित्र्ये च कर्मणीति स्कांदोक्तेः पूर्वापरविभागेनेति मकरकर्क
भिन्नसंक्रांतिपरं वक्ष्यमाणवचोविरोधादित्युक्तं मदनरत्ने तेनायमर्थः रात्रौ पूर्वभागे मकरे उदये पंचनाड्यः पुण्याः
रात्रावपरभागे कर्कसंक्रमे दिनांते पंचनाड्यः पुण्याः विषुवतोस्तु पूर्वदिने परदिने पंचेति वाक्यांतरानुरोधात्

तेनहेमाद्रिमाधवयोः सर्ववचनानांचविरोधः माधवमतेतु अर्द्धरात्रेतदूर्द्ध्वंवासंक्रांतौदक्षिणायनेपूर्वमेवदिनं
माह्यंयावन्नोदयेतरविरितिवृद्धगार्ग्योक्तेर्मिथुनात्कर्कसंक्रांतिर्यदिस्यादंशुमालिनः प्रभातेवानिशीथेवाना
दापुण्यंतुपूर्वतः इतिभविष्योक्तेश्चपूर्वदिनएवपुण्यं दक्षिणायनस्यत्वेतदेवाद्रियते अत्ररात्रावपिस्नानादिभवती नारे
त्युक्तंप्राक् अन्नदानोपवासादिपूर्वमुक्तं तथाकर्केकेशादिकर्त्तनंनिषिद्धं कुंभेककर्टकेवापिकन्यायांकार्मुकेर
वौ रोमखंडंमहस्यस्यपितृन्प्राशयतेयमः इतिसुमंतुवचनाद्युक्तंजीवत्पितृकनिर्णयेगुरुभिः अथनदीनांरजो
दोषः हेमाद्रौअत्रिः सिंहकर्कटयोर्मध्येसर्वानद्योरजस्वलाः नस्नानादीनिकर्माणितासुकुर्वीतमानवः इदंचक्षुद्रनदी
षु सिंहकर्कटयोर्मध्येसर्वानद्योरजस्वलाः तासुस्नानंनकुर्वीतवर्जयित्वासमुद्रगाः इतिव्याघ्रोक्तेः मात्स्येत्वगस्त्यपाद
यावधित्वमुक्तं यावन्नोदेतिभगवान्दक्षिणाशाविभूषणं तावद्रजोमहानद्यः करतोयाःप्रकीर्त्तिताः करतोयाःअ
ल्पतोयाः तथाकात्यायनः याःशोषमुपगच्छंतिग्रीष्मेकुसरितोभुवि तासुप्रावृषिनस्नायादपूर्णोदशवासरेइदं

नि॰सिं॰ ७८ वायदिस्मृतिसंग्रहे धनुःसहस्राण्यष्टौतु गतिर्यासां न विद्यते न ता नदीशब्दवहा गर्त्तास्ते परिकीर्त्तिताः महानदीषु
भविष्येउक्तं आदौतु कर्कटे देवि सर्वा नद्यो रजस्वलाः त्रिदिनंतु चतुर्थेह्नि शुद्धाः स्युर्जाह्नवीयथा महानद्यश्च ब्राह्मे गोदा
र३ वरीभीमरथीतुंगभद्राचवेणिका तापीपयोष्णीविंध्यस्य दक्षिणेतु प्रकीर्त्तिताः भागीरथीनर्मदाचयमुनाचसरस्वती
विशोकाच वितस्ताच विंध्यस्योत्तरतःस्थिताः द्वादशैता महानद्योदेवर्षिक्षेत्रसंभवाः मदनरत्ने पुराणांतरे महानद्यो
देविकाचकावेरीवंजरातथा रजसातु प्रदुष्याःस्युः कर्कटादौ त्र्यहंनृप कात्यायनः कर्कटादौ रजोदुष्टागोमतीवास
रत्रयं चंद्रभागासतीसिंधुः सरजूर्नर्मदातथा इदं गंगाद्यतिरिक्तविषयं गंगाचयमुनाचैव प्लक्षजातासरस्वती रजसा
नाभिभूयंते ये चान्येनदसंज्ञिताः शोणसिंधुहिरण्याख्यः कोकिलोहितघर्घराः शतद्रुश्च नदाःसप्तपावनाः परिकी
र्त्तिताइतिदेवलोक्तेः यत्तु प्रथमंकर्कटेदेवित्र्यहंगंगारजस्वलेत्यादिवचनं तज्जाह्नवीभिन्नगोदावर्यादिगंगांत
रपरमिति मदनरत्ने अन्येत्वंतर्गतरजोविषयं गंगाधर्मद्रवःपुण्यायमुनाचसरस्वती अंतर्गतरजोवस्थाःसर्वावस्था ७८

सुधामला इति निगमोक्तेः तीरवासिनां तु रजोदोषो नास्ति न तु तत्तीरवासिनामिति निगमोक्तेः रजोदुष्टमपीं जलं गां
गजलं योगे पावनं गांगांभसा समायोगात् दुष्टमप्यंबु पावनमिति मात्स्योक्तेः नूतनकूपादौ तु याज्ञवल्क्यः अजा गावो
महिष्यश्च ब्राह्मणी च प्रसूतिका भूमेर्नवोदकं चैव दशरात्रेण शुध्यतीति कश्चित्त्वदोषमाह व्याघ्रपादः अभावे
कूपवापीनां मनपायिपयोभृतां स्यौ दुष्टोपि पयसि स्नानभोगो न दुष्यति गौडास्तु अन्येनापि समुद्धृते इति द्विती
यपादे पाठस्तेनोद्धृते न दोषः तथा च नासु स्नानं नेति प्रागुक्तमित्याहुः वशिष्ठोपि उपाकर्मणि चोत्सर्गे प्रेतस्ना
ने तथैव च चंद्रसूर्यग्रहे चैव रजोदोषो न विद्यते इमं लं विलिखेत् श्रावणशुक्लतृतीया मधुस्रवाख्या गुर्जरेषु प्र
सिद्धा सा परयुता ग्राह्येति दिवोदासः श्रावणशुक्ल चतुर्थी पूर्वयुता मातृविद्धा गणेश्वरे इत्यादिवचनात् श्रावण
शुक्लापंचमी नागपूजायां परैवेति सामान्यनिर्णये उक्तं चमत्कारचिंतामणौ पंचमी नागपूजायां कार्या षष्ठीसम
न्विता तस्यां तु तुषिता नागा इतरा सचतुर्थिके ति श्रावणे पंचमी शुक्ला संप्रोक्ता नागपंचमी तां परित्यज्य पंचम्यश्चतु

उ१ रि१

७८ र्यीसहितांहिताइतिमदनरत्नेभिधानाद्व्रतेनपरैवेति अत्रविशेषोहेमाद्रौभविष्ये श्रावणेमासिपंचम्यांशुक्लप
क्षेनराधिप द्वारस्योभयतोलेख्यागोमयेनविषोल्बणाः पूजयेद्दधिवक्षीरदधिदूर्वांकुरैःकुशैः गंधपुष्पोपहारै
श्चब्राह्मणानांचतर्पणैः येतस्यांपूजयंतीहनागान्भक्तिपुरस्सराः नतेषांसर्पतोवीरभयंभवतिकुत्रचिदिति श्रा
वणशुक्लद्वादश्यांदधिव्रतंप्रागुक्तं तक्रादीनांत्वनिषेधः तत्रदधिव्यवहाराभावादितिवदंते अत्रैवविष्णोःप
वित्रारोपणमुक्तं द्वादश्यांश्रावणेवापिपंचम्यामथवाद्विज आनुकूल्येषुकर्त्तव्यंपंचदश्यामथापिवेति शिवेतुत
त्रैवकालांतरे आषाढांतेचतुर्दश्यांनभस्यनभसोस्तथा अष्टम्यांचचतुर्दश्यांपक्षयोरुभयोःसममिति अन्यदे
वतानांतुवक्ष्यते अधिवासनंतुदीपिकायां गोदोहांतरितेकालेपूर्वेद्युर्वाधिवासनमिति गौणकालोरामार्चनचं
द्रिकायां पवित्रारोपणंविष्णोश्चावणेनभवेद्यदि कार्तिकावधिशुक्लास्तेकर्त्तव्यमितिनारदः हैम्यरौप्यताम्रक्षौ
मैःसूत्रैःकौशपद्मजैः कुशैःकाशैश्चकार्पासैर्ब्राह्मण्याकर्तितैःशुभैः कृत्वात्रिगुणितंसूत्रंत्रिगुणीकृत्यसोधयेत्

पवित्रारोपणदिनेप्रातरित्यर्थः ३
सतिर

तु२

तत्रोत्तमं पवित्रं तु षष्ठ्या सहस्रशतैस्त्रिभिः सप्तत्यासहितं द्वाभ्यां शताभ्यां मध्यमं स्मृतं साशीतिना शतेनैव कनिष्ठं तत्समा
चरेत् साधारणपवित्राणि त्रिभिः सूत्रैः समाचरेत् उत्तमं तु शतग्रंथि पंचाशद्ग्रंथि मध्यमं कनिष्ठं तु पवित्रं स्यात् ष
ट्त्रिंशद्ग्रंथिशोधनं षट्त्रिंशच्चतुर्विंशं द्वादशेति च केचन चतुर्विं द्वादशाष्टावित्येके मुनयो विदुः हेमाद्रौ विष्णुरह
स्ये त्वन्यथोक्तं अष्टोत्तरशतं कुर्याच्चतुःपंचाशदेव वा सप्तविंसतिर्वाथ ज्येष्ठमध्यकनीयसा अधमं नाभिमात्रं स्या
दूरुमात्रं द्वितीयकं प्रलंबं तो जानुमात्रं प्रतिमायां निगद्यते शिवपवित्रं तु तत्रैव शैवागमे एकादशीत्यथ वा सूत्रैस्त्रिंश
ता वा प्रयुक्तया पंचाशता वा कर्तव्यं तुल्यमध्यं तरालकं द्वादशांगुलमानानि व्यासादष्टांगुलानि वा लिंगविस्तारमा
नानि चतुरंगुलकानि वेति अधिकारिणोपि तत्रैव विष्णुरहस्ये ब्राह्मणाः क्षत्रिया वैश्यस्तथा स्त्रीशूद्र एव च स्वधर्माव
स्थिताः सर्वे भक्त्या कुर्युः पवित्रकं तथा अतो देवेति मंत्रेण द्विजो विष्णोर्निवेदयेत् शूद्रस्य मूलमंत्रेण वायनेन वा पूजयेद्धरिं
एतच्च नित्यं न करोति विधानेन पवित्रारोपणं तु यः तस्य सांवत्सरी पूजा निःफला मुनिसत्तम तस्माद्भक्तिसमायुक्तैर्नरैः

अतो देवा अवंतु नो यतो विष्णुर्विचक्रमे पृथिव्याः सप्तधामभिः २

प्रायश्चित्तार्थमृ५

वेदिकायां ४

विष्णुपरायणैः वर्षे वर्षे तु कर्त्तव्यं पवित्रारोपणं हरेः इति तत्रैवोक्तेः देवताविशेषे तिथयोऽपि तत्रैव धनदश्रीरमा गौरी गणेशः सो
८० मराङ्गुरुः भास्करं चंडिकाम्बा च वासुकिश्च तथार्षयः चक्रपाणिः स्वनंगश्च शिवो ब्रह्मा तथैव च प्रतिपत्प्रभृति ख्याताः पूज्या
स्तिथिषु देवताः यथोक्ताः शुक्लपक्षे तु तिथयः आवलास्य चेति तथा हेमाद्रौ कालोत्तरे चतुर्दश्यामथाष्टम्यां सर्वसाधार
णं तु तदिति तत्प्रकारस्तु रामार्चनचंद्रिकायां यथा ततस्तानि पवित्राणि वेश्मवपटलेषु शुभे संस्थाप्य शुचिवस्त्रेणापिधाय
स्तम ५ पुरतो न्यसेत् अरत्निसंमितां वेणिं कुर्यात् षड्विंशतां कुशैः क्रियालोपविघातार्थं यत्त्वया विहितं प्रभो मयैतत्क्रियते देवत
वतुष्ट्यै पवित्रकं न मे विघ्नो भवेदत्र कुरु नाथ दयां मयि सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः उपवासेन देव त्वां तोषयि
ष्यामि जगत्पते कामक्रोधादयोऽप्येते न मे स्युर्व्रतघातकाः अद्यप्रभृति देवेश यावद्वैशेषिकं दिनं तावद्रक्षा त्वया कार्या सर्वस्या
स्य नमोऽस्तु ते इति देवं संप्रार्थ्य कुंभे संस्थाप्य तत्र वंशपात्रे ॐ सांवत्सरस्य यागस्य पवित्रीकरणाय भोः विष्णुलोकात् वि
त्राघ आगच्छ नमोऽस्तु ते अनेन मूलेन चावाह्य तन्मध्ये एकं निक्षिप्य विष्णुर्ब्रह्मा रुद्रान्सत्वरजस्तमांसि वेदत्रयं वनमाला

पवित्रार्प्पणादिनमृ ३

यांप्रकृतिंचावाह्यत्रिसूत्रांब्रह्मविष्णुरुद्रान्ग्रंथिषुक्रिया पौरुषी वीरा विजया ईशा अपराजिता मनोन्मनी जया
भद्रा मुक्तिश्चेत्यावाह्यसंपूज्य ओंसांवत्सरकृतार्च्चायाः संपूर्णफलदायियत् पवित्रारोपणायैतत्कुरु कंधरतेनमः सुखकर२
विष्णुतेजोभवंरम्यंसर्वपातकनाशनं सर्वकामप्रदंदेवतवाग्रेधारयाम्यहमितिदेवकरेमंगलसूत्रंबध्वादेवंसंपूज्य
निमंत्रयेत् आमंत्रितोसिदेवेशपुराणपुरुषोत्तम प्रातस्त्वांपूजयिष्यामिसांनिध्यंकुरुकेशव क्षीरोदधिमहाना
गशय्यावस्थितविग्रह प्रातस्त्वांपूजयिष्यामिसंनिधौभवतेनमः निवेदयाम्यहंतुभ्यंप्रातरेत्पवित्रकं सर्वथास
र्वदाविष्णोनमस्तेस्तुप्रसीदमे ततःपुष्पांजलिंदत्वारात्रौजागरणंकुर्यात् इत्यधिवासनं प्रातर्नित्यपूजांकृत्वागं
धदूर्वाक्षतयुक्तंपवित्रमादाय ओंदेवदेवनमस्तुभ्यंगृहाणेदंपवित्रकं सर्वथासर्वदाविष्णो पवित्रीकरणायवर्ष
पूजाफलप्रदं पवित्रकंकुरुष्वाद्ययन्मयादुःकृतंकृतं शुद्धोभवाम्यहंदेवत्वत्प्रसादात्सुरेश्वर मूलसंपुटितेनानेनद
त्वांगदेवताभ्योनाम्नासमर्प्यमहानैवेद्यंदत्वानीराजनमणिविद्रुममालाभिरित्यादिदमनारोपोक्तमंत्रैःप्रार्थयित्वा

वेदस्वीकारः ३ सर्वेपिक्षाःपौर्णमासीस्नावकाः ५

गुरवेब्राह्मणेभ्यश्चदत्त्वास्वयंधारयेत् तथा मासंपञ्चमहोरात्रंत्रिरात्रंधारयेत्तथा देवेतसूत्रसंदर्भेदेशकालविवक्षया

८१ अकरणेतुतत्रैव पवित्रारोपणंकानकरोतिकथंचन तदायुतंजपेन्मंत्रंस्तोत्रंवापिसमाहित इत्युक्तं इतिपवित्रारोपः

श्रावण्यामृक्चतुर्दशीपूर्वयुताग्राह्या अत्रवक्तव्योविशेषश्चैवचतुर्दश्यामुक्तः अथोपाकर्म तत्रबह्वृचानांप्रयो

गपारिजाते शौनकः अथातःश्रावणेमासिश्रवणान्वयुतेदिने श्रावण्यांश्रावणेमासिपंचम्यांहस्तसंयुते दिवसे वि

दधीतेतदुपाकर्मेत्यचोदितं अध्यायोपाकृतिंकुर्यात्तत्रोपासनवह्निनेति अत्रपौर्णमास्युपसंहारन्यायेनयजु

र्वेदपरेतिहेमाद्रिः अत्रहस्तयुक्तापंचम्युक्ता कारिकापि तन्मासेहस्तयुक्तायांपंचम्यांवातदिष्यते इतिकेवलपंचम्यां

हस्तयुतेन्यस्मिन्दिने इतितुहेमाद्रिः उपासनवह्निनेतितुकर्मद्वयमिदंकेचिल्लौकिकाग्नौप्रकुर्वत इति कारिकोक्तेर्लौ

किकाग्निना विकल्पते तत्राप्यध्यायैरन्वारब्धः इतिसूत्रात्सशिष्यत्वतदधिकारिकस्याचार्यस्याग्नौनान्यस्याग्नाव

न्योजुहुयादितिनिषेधाल्लौकिकएव तद्भावेतुस्मार्त्त इतिनिर्णयः यद्यपिदीपिकायांवेदोपाकृतिरोषधिप्रजननेपद्दोसि

शिष्यैः २ उपाकर्मोत्सर्गरूपम ३ होमेत्राणे २

तेश्रावणोऽइतिशुक्लपक्षोपिसर्वेषांमुख्यकालत्वेनोक्तः वक्ष्यमाणगार्ग्यवचनेनछंदोगान्प्रतिविहितस्याविरोधि
नः सर्वान्प्रतिवृत्तश्च तथापिश्रावणमाससंबंधस्य सूत्रोक्तत्वात्कृष्णपक्षेपिकार्यमितिवृद्धाः तथाचसूत्रं अ
थातोध्यायोपाकरणमोषधीनांप्रादुर्भावेश्रावणेनश्रावणस्यपंचम्यांहस्तेनवा अत्रश्रवणोमुख्योन्येगौणाःत
श्रावणस्य ४ स्याहर्द्वययोगेहेमाद्रौव्यासः धनिष्ठासंयुतंकुर्यात्श्रावण्यांकर्मयद्भवेत् तत्कर्मसफलंज्ञेयमुपाकरणसंज्ञि
तं श्रवणेनतुयत्कार्यमुत्तराषाढसंयुतं संवत्सरकृतोध्यायस्तत्क्षणादेवनश्यति गार्ग्योपि उदयव्यापिनित्त्वविश्र
णेद्विघटिकाह्वये तत्कर्मफलंज्ञेयंतस्यपुण्यत्वमनंतकमिति पूर्वद्युरुत्तराषाढयोगेपरेद्युःश्रवणाभावेद्विघटिकाद्वयन्यूनेवा
पंचम्यादौकार्यं श्रवणयुतदिनेसंक्रांत्यादौतु उपाकर्मनकुर्वीतक्रमात्सामगर्यजुर्विदः ग्रहसंक्रांतियुक्तेषुहस्तश्र
वणपर्वसुइतिहेमाद्रौ निषेधात्पंचम्यादयोग्राह्याः मदनरत्नेपि यदिस्याच्छ्रावणंपर्वग्रहसंक्रांतिदूषितं स्यादुपा
करणंशुक्लपंचम्यांश्रवणस्यतु स्मृतिमहार्णवे संक्रांतिग्रहणंवापियदिपर्वणिजायते तन्मासेहस्तयुक्तायांपं

स ४

पंचम्यांवातदिष्यते तत्रापिप्रयोगपारिजातेवृद्धमनुकात्यायनौ अर्द्धरात्रादधस्ताच्चेत्संक्रांतिग्रहणंतथा
८२ उपाकर्मनकुर्वीतपरतश्चेन्नदोषकृत्इति मदनरत्नेगार्ग्योपि यद्यर्द्धरात्रादर्वाक्तुग्रहःसंक्रमएववा नोपाकर्म
तदाकुर्याच्छ्रावण्यांश्रवणेपिवा यत्तुप्रातिपन्मिश्रितेनैवनोत्तराषाढसंयुते श्रवणेश्रावणेकुर्युर्ग्रहसंक्रांतिव
र्जिते इतिप्रतिपन्मिश्रनिषेधकंवचनं तन्निर्मूलं अत्रच वेदोपकारणेप्राप्ते कुलीरेसंस्थितेरवौ उपाकर्मनकर्त्त
ना।चचन५ व्यंहस्तयुक्तेर्केइतिवचनं देशांतरविषयं नर्मदोत्तरभागेतुकर्त्तव्यंसिंहयुक्तके कर्कटेसंस्थितेभानावुपाकर्म
कुर्यात्तुदक्षिणेइतिबृहस्पतिवचनादितिप्रयोगपारिजातेनोक्तं पराशरमाधवीयेप्येवं सामगानांसिंहस्थेरवा
वुक्तेस्तद्विषयं इदंपुरोडाशचतुर्द्धाकरणवदुपसंह्रियते इतितुवयंपश्यामः यत्तुकालादर्शे अध्यायानामुपाक
र्मश्रावण्यांतैत्तिरीयकाः बह्वृचाःश्रवणेकुर्युःसिंहस्थोर्कोभवेद्यदि सहस्तस्यतुपंचम्यांवातद्ग्रहणसंक्रमे अ
सिंहार्केप्रोष्ठपद्यांश्रवणेनव्यवस्थयेति तन्मूलालिखनाच्चिंत्यं श्रावणोसस्यानुत्कामीयौतुबह्वृचपरिशिष्टे अ

~~इदंचजमासनेचिमासिरिणागंदौसनेचिनांविद्येयेरमदंचनीक्षीणेक्षिपते~~

वर्षोद्योषधयः स्तस्मिन्मासे तु न भवंतिचेत् तदा भाद्रपदे मासि श्रवणेन तदिष्यत इति तत्रापि नुद्धमेतुकु
र्यादेव तद्वार्षिकमित्याचक्षत इति सूत्रात् वर्षर्तौ भवं वार्षिकं एतच्च शुक्रास्तादावपि कार्यं उपाकर्मोत्सर्ज
नं च पवित्रदमनारोपणमिति दमनारोपे लिखितवचनात् नित्यनैमित्तिके जप्यहोमयज्ञक्रियासु च उपाकर्म
णि चोत्सर्गे ग्रहदोषो न विद्यत इति ॥ प्रयोगपारिजाते संग्रहोक्तेः पर्वणि यो ग्रहो ग्रासति पूर्वं त्रितत्रादिवेधाभा
वे वकुर्मिदं तेन पर्वणि ग्रहणे होमापि चतुर्दश्यां कार्यमिति हेमाद्रिः प्रथमारंभस्तु न भवति गुरुभार्गवयोर्मौढ्ये वा
ल्ये वा वार्द्धकेपि वा तथाधिमासे संसर्पे मलमासाधिपे द्विजे प्रथमोपाकृतिर्न स्यात्कृतं कर्मविनाशकृदिति तत्रैव
कश्यपोक्तेः अथ प्रथमारंभे वृद्धिश्राद्धं कुर्यादिति नारायणवृत्तौ एतच्चाधिमासे न कार्यं उपाकर्म तथोत्सर्गः प्रसवा
होत्सवाष्टकाः मासवृद्धौ परे कार्या वर्जयित्वा तु पैतृकमिति ज्योतिःपराशरोक्तेः उत्कर्षे कालवृद्धौ स्यादुपाकर्मादि
कर्मणि अभिषेकादिवृद्धीनां न तूत्कर्षो युगादिष्विति कात्यायनोक्तेश्च यत्तूपाकर्मवोत्सर्गश्चेतदिष्टेवृषादित

॥१

इतिऋषथ्यंगवच्चस्तत्सामगविषयं तेषांसिंहार्कैएवोक्तेः एतच्चापराह्णेकार्यं उपाकर्मापराह्णेस्यादुत्सर्गःप्रातरेव
८३ त्विति अध्यापनामुपाकर्मकुर्यात्कालेपर्वाह्णके पूर्वाह्णेतुविसर्गःस्यादितिवेदविदोविदुरितिचहेमाद्रौगोभिलोक्तेः
वस्तुतस्तु भवेदुपाकृतिःपौर्णमास्यांपूर्वाह्णएवत्वितिप्रचेतोवचनात्पूर्ववाक्यं सामगविषयं तेषामपराह्णए
वोक्तेरित्यनुपदेवक्ष्यते दीपिकापि अस्यतुविधेःपूर्वाह्णकालःस्मृतइति याजुषास्तु पर्वणिकुर्युः तच्चापस्तंबे
रौदयिकं ग्राह्यमन्येस्तुपूर्वम पर्वणोपोदयिकेकुर्युःश्रावणेतैत्तिरीयकाः बह्वृचाःश्रवणेकुर्युःग्रहसंक्रांतिवर्जि
तेइतिगार्ग्योक्तेः संप्राप्तवान्स्मृतीर्ब्रह्मापर्वणपोदयिकेपुनः अतोभूतदिनेतस्मिन्नोपकरणमिष्यतेइतिकालि
कापुराणाच्च अत्रसिंगाभट्टीयेविशेषः अवराःश्रावणीपर्वसंगवस्पृग्यदाभवेत् तदैवौदयिकं कार्यंनान्यदौदयि
कंभवेत पराशरमाधवीयेपिगार्ग्यः श्रावणीपौर्णमासीतुसंगवेत्परतोयदि तदैवौदयिकीग्राह्यानान्यदौदयि
कीभवेत कर्मकालमाहंकात्यायनिगमः श्रावणेप्रौष्ठपद्यांवाप्रतिपत्सर्पणमुहूर्त्तकेः विद्धास्यात्तंछंदसांतत्रो

८३

पाकर्मोत्सर्जनं भवेत् अत्र पौर्णमासी श्रवणाहस्तयोरुपलक्षणं तेन तावपि संगवस्पर्शो उदये संगवस्पर्शे श्रुतोप
वेशिाचार्कर्मे कुर्युर्नभस्युपाकर्म ऋग्यजुःसामगाः क्रमादितिपृथ्वीचंद्रः एतच्छुद्धाधिकपरं कात्यायनादीनां तु दि
नद्वये पूर्वाह्नव्याप्तौ एकदेशस्पर्शे वा पूर्वैवेति हेमाद्रिः यद्यपि श्रावणी दुर्गानवमी दूर्वा चैव हुताशनी पूर्वविद्धा प्रकर्त
व्या शिवरात्रिर्बलेर्दिनमिति ब्रह्मवैवर्त्ते तद्व्रतपवित्रारोपणकर्मादिदैवकर्मविषयमिति हेमाद्रिः अतएव वचनात्
कुलधर्मव्रतादावपि पूर्वैव मदनरत्नेप्येवं मदनपारिजातेपि पूर्वविद्धायां श्रावण्यां वा जशनेयिनामुपाकर्मेत्यु
क्तं मदनरत्ने तु पर्वणो पादयि के कुर्युः श्रावण्यां तैत्तिरीयका इति बह्वृचपरिशिष्टाद्बह्वृचान्प्रति कर्मविधानार्थं प्रवृत्ते
तत्र तैत्तिरीयककर्मविध्ययोगात् पूर्वोक्तकालिकापुराणादौ सामान्यत औदयिकपर्वप्राप्तेस्तन्निषेधेन बह्वृचा
नां श्रवणाविधानात्तैत्तिरीयकपदं अनुवादत्वात्तस्य च प्राप्त्यधीनत्वात् प्राप्तेश्च यजुर्वेदमात्रपरत्वात्सर्वयजुर्वेदोप
लक्षणार्थं अव्युत्पत्त्यानुवादो वा न तु विधायकं येन विशेषविधिनोपसंहारः स्यात् अनुवादत्वोल्लक्षणे न दोषः अन्यथा

पृथक्कृत्य १

कित्रा ३

औदयिकपर्वविशिष्टोपाकर्मोद्देशेन कर्त्तव्यविधौ कर्त्तव्यविशिष्टं वा औदयिकपर्वविधौ वाक्यभेदापत्तेः तस्मात्तैत्ति
८५ रीयकपदाविवक्षया सर्वयजुर्वेदिनामौदयिकमेव पर्वेत्युक्तं तत्र न तावत्परिशिष्टे बह्वृचान्प्रत्येव विधिः धनिष्ठा
प्रतिपद्युक्तं त्वाष्ट्रं अक्षसमन्वितमित्यादि तदुदाहृत एव परिशिष्टे वेदान्तरधर्मविधौ नादर्शनात् नाप्यनुवादोऽपि
कालिकापुराणादौ बह्वृचादीनामपि तदापत्तेः कुर्युरित्यस्य विधित्वेन तस्यैवार्थवादत्वेनैतत्प्राप्तानुवादित्वाच्च नच
तैत्तिरीयकाणां गृह्ये तद्विधिरस्ति येनानुवादः स्यात् नच वाक्यभेदः तैत्तिरीयकमात्रस्य कर्ममात्रस्य वाऽद्देश्यता
योगेन हविरार्त्तिवदष्टवर्षब्राह्मणमुपनयीतेतिवच्चागत्या विशिष्टस्योद्देश्यत्वात् अन्यथोत्तरार्द्धे बह्वृचपद
स्याप्यविवक्षापत्त्या श्रवणस्य सर्वसाधारण्यापत्तेः तस्माद्धेमाद्रिमतमेव युक्तमिति दिक् इदं च शिष्यानध्या
पयत आवसथ्येऽग्नौ अनध्यापयतो नाधिकार इति कर्कः श्रावण्यामपि ग्रहणादिदुष्टायां कार्तीयाभिन्नैः
प्रोष्ठपद्यां कार्यं तैत्तिरीयैस्तु श्रावणपञ्चम्यां संक्रान्तिग्रहणं वापि पौर्णमास्यां यदा भवेत् उपाकृतिस्तु पञ्चम्यां का

र्णावाजसनेयिभिरितिस्मृतिमहार्णवेवाजसनेयिग्रहणादितिहेमाद्रिः यत्तुबौधायनः श्रावणांपौर्णमास्यां
माघस्यांवोपाकृत्येत्यूचे तत्रप्रौष्ठपद्यामपिदोषेआषाढ्यांकार्यमित्येवमर्थंतच्छाखीयविषयंवा सामगानां तु
श्रावणेहस्तेकुर्युः बह्वृचाःश्रवणेचैवहस्तेतुसामवेदिनइतिनिर्णयामृतेगोभिलोक्तेः सोऽप्युक्तः धनिष्ठाप्रतिप
द्युक्तंत्वाश्वमदृसमन्वितं श्रावणेकर्मवैरिन्त्रअगपङ्गुःसामपाठकाइतिमदनरत्नेपरिशिष्टोक्तेः गार्ग्योऽपि सिंहस्थेतु
पुष्यर्क्षेपूर्वाह्णेविचरेद्वहिः छंदोगाभिलताःकुर्युःउत्सर्गस्वस्वछंदसां शुक्लापक्षेतुहस्तेनउपाकर्मापराह्णिकमि
ति पुष्यर्क्षेपूर्वाह्णेउत्सर्गः अपराह्णिकमुपाकर्मेत्यन्वयः अन्यस्तुविशेषःपूर्वमेवोक्तः प्रयोगपारिजातेगोभि
लः उपाकर्मोत्सर्जनंचवनस्थानामपीष्यते धारणाध्ययनांगत्वाद्गृहिणांब्रह्मचारिणां उत्सर्जनंचवेदानामुपा
करणाकर्मच अकृत्वावेदजप्येनफलंनाप्नोतिमानवः अथप्रसंगाद्वेदोत्सर्जनमुच्यते तत्रपौषमासेरोहिण्यां च२
मध्यकायामथापिवा जलांतेछंदसांकुर्यादुत्सर्गविधिवद्वहिरितियाज्ञवल्क्योक्तेः श्रावणंप्रौष्ठपद्यांवोपाकृत्ये
पौषमासेचरोहिण्यांमध्यमाष्टम्यांवाकार्यं२

क्रमेणापोष्ठमाघशुक्लप्रतिपदि वा कार्यं अर्द्धपंचमान्मासानधीयीयतेति तेनैवोक्तेः यत्तु हारीतः अर्द्धपंचमा
८५ न्मासानधीत्योर्ध्वमुत्सृजेत् पंचार्द्धषष्ठान्वेति तदाषाढ्युपाकर्मविषयं बौधायनात्तु पौष्यां माघ्यां वा कुर्युः
पौष्यां माघ्यां वोत्सृजेदिति तत्सूत्रात् तैत्तिरीयैस्तु तैष्यां कार्यं तैष्यां पौर्णमास्यां रोहिण्यां वा विरमेदिति तत्सूत्रात्
वह्वृचैस्तु माघ्यां कार्यं अध्यायोत्सर्जनं माघ्यां पौर्णमास्यां विधीयते इति कारिकोक्तेः कातीयास्तु भाद्रप
दे कुर्युः उत्सर्गस्त्वेतदा तिष्यतिथ्यां प्रोष्ठपदे पि वा इति कात्यायनोक्तेः सामगास्तु सिंहार्के पुष्ये कुर्युः तथा
च सिंहरवौ त्विति गार्ग्यवचनं पूर्वमुक्तं सर्वैरुपाकर्मदिने वा कार्यं पुष्ये तूत्सर्जनं कुर्यादुपाकर्मदिनेथवेति हे
माद्रौ रवादिरमृतयोक्तेः यदा सिंहस्थसूर्ये पौ ति तन्मध्यस्थहस्तनक्षत्रात्प्राक् पुष्यः कर्कस्थो भवति तदा तस्मि
न्पुष्ये उत्सर्गं कृत्वा तदुत्तरहस्ते उपाकर्म सामगाः कुर्युः मासे प्रोष्ठपदे हस्तात्पुष्यः पूर्वो यदा भवेत् तदा च श्राव
णे कुर्यादुत्सर्गं छंदसां द्विजः इति तत्रैव परिशिष्टोक्तेः अत्र द्वावपि सौरौ मासौ ज्ञेयौ तेषां सौरस्यैवोक्तेः अत्र विशेष

इदं वाजसनेयिव्यतिरिक्तानाम् । वाजसनेयिनां विशेषेण पंचमी स्वीकरिष्यते ३

त्रि १

माहकार्ष्णाजिनिः उपाकर्मणि चोत्सर्गे यथाकालं समेत्य च । ऋषीन्दर्भमयान्कृत्वा पूजयेत्तर्पयेत्ततः इति उपाकर्मन्युत्स
र्गे च त्रिरात्रं पक्षिणी महोरात्रं वानध्याय इति मिताक्षरायामुक्तं अत्र नदीनां रजोदोषो नास्ति उपाकर्मणि चोत्सर्गे रजो
दोषो न विद्यत इति गार्ग्योक्तेः अत्रैव रक्षाबंधनमुक्तं हेमाद्रौ भविष्ये ततोपराह्णसमये रक्षापोट्टलिकां शुभां कारये
दक्षतैः शस्तैः सिद्धार्थैर्हेमभूषितैरिति इदं भद्रायां न कार्यं भद्रायां द्वे न कर्त्तव्ये श्रावणी फाल्गुनी तथा श्रावणी नृप
तिं हंति ग्रामं दहति फाल्गुनीति संग्रहोक्तेः तत्सत्वे तु रात्रावपि तदंते कुर्यादिति निर्णयामृते येन बद्धो बली राजा दा सत्येन ५
नवेंद्रो महाबलः तेन त्वामपि बध्नामि रक्षे माचल माचल ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च मानवैः कर्त्तव्यो रक्षि
काचारो द्विजान्संपूज्य शक्तित इति अत्रैव हयग्रीवोत्पत्तिः तदुक्तं कल्पतरौ श्रावण्यां श्रवणे यातः पूर्वं हयशिरा हरिः
जगाद सामवेदं तु सर्वकल्मषनाशनं स्नात्वैव संपूजयेत्तं तु शंखचक्रगदाधरं आश्वलायनेन श्रवणाकर्मोक्तं श्राव
णां पौर्णमास्यां श्रवणाकर्मेति अत्रास्तमयपर्याग्निनीत्याद्या अस्तमिते स्थालीपाकं श्रपयित्वेति सूत्रात् अत एव निशी

स्तु० शर्वोयं २
मेत्र सु ५

ष्टोदर्शीप्रयोगांतःपातनियमात्तदंगैःप्रसंगसिद्धिरुक्ता द्वांदशे अन्यथापरेद्युःप्राप्तौकःप्रसंगःप्रसंगस्य याज्ञको
८६ स्तुपूर्णिमादर्शशब्दयोःपर्वतिथ्यह्नवदहोरात्रवाचित्वात्तत्रैवकर्मकालव्याप्तिर्ग्राह्येति विकृतित्वाच्छेषपर्वेष्टंति
श्रावणादिमासचतुष्टयएकाक्षपक्षद्वितीयासुअशून्यशयनव्रतं तच्चंदोदयव्यापिनीदिनद्वयेतत्त्वेपरेतिनिर्णयामृते
इतिश्रीकमलाकरभट्टकृतेनिर्णयसिंधौश्रावणमासः सिंहेपराःषोडशघटिकाःपुण्यकालः अन्यत्पूर्ववत् अथगोप्र ५४
सवेद्भुतसागरेनारदः भानौसिंहगतेचैवयस्यगौःसंप्रसूयते मरणंतस्यनिर्दिष्टंषड्भिर्मासैर्नसंशयः तत्रशांतिंप्र
वक्ष्यामियेनसंपद्यतेशुभं प्रसूतांतत्क्षणादेवतांगांविप्रायदापयेत् ततोहोमंप्रकुर्वीतघृताक्तैराजसर्षपैः आहु
तीनांघृताक्तानामष्टुतंजुहुयात्ततः व्याहृतिभिस्त्रयोहोमः सोपवासःप्रयत्नेनदद्याद्विप्रायदक्षिणामिति तथा सिंह
राशौगतेसूर्येगोप्रसूतिर्यदाभवेत् पौषेचमहिषीसूतेदिवेवाश्वेतरातथा तदानिष्टंभवेत्किंचित्तच्छांत्यैशांति
२१ कंचरेत् अस्यसामेतिसूक्तेनतद्विष्णोरितिमंत्रतः जुहुयाच्चतिलाज्येनशतमष्टोत्तराधिकं मृत्युंजयविधानेनजुहुया

घृतयायुतं श्रीसूक्तेनततःस्नाया छंदांतिसूक्तेनवापुनः मध्यरात्रेनिशीथेवायदागोःक्रंदतेसदा ग्रामेवास्वगृहेवापिशां
तिकेपूर्ववदृिशेत् एवंश्रावरोवडवाप्रशवोदिनेनिषिद्धः तदुक्तामथर्ववेदिनांपरिशिष्टे माघेवुधेचमहिषीश्रावरोवडं
वादिवा सिंहेगावःप्रसूयंतेस्वामिनोमृत्युदायकाइति अत्रतदुक्तामृतात्याशांतिःकार्या भाद्रकृष्णतृतीयाकज्जलीसंज्ञा
सापरामाह्येतिदिवोदासीयेउक्तं भाद्रकृष्णचतुर्थीवहुलाख्यामध्यदेशप्रसिद्धा सायान्हव्यापिनीग्राह्यादिनद्वयेतत्वेपूर्वा
गोपीश्चतुर्थीवटधेनुपूजाउर्गार्चनंदुर्भरहोलिकाच वत्सस्यपूजाथिवरात्रिरेताःपरान्विताद्वंतिनृपंसराष्ट्रमितिदिवोदा
सीयवचनात् अत्रवत्सपूजायाःपयगुपादानाधेनुपूजाशब्देनवहुलाख्यागृह्यतइतिसएवव्याचख्यौ मदनरत्नेप्येवं
अत्रगोपूजायवान्नासिंनंचतत्रैवोक्तं भाद्रकृष्णषष्ठीसप्तमीयुतेतिदिवोदासः भाद्रकृष्णसप्तम्यांशीतलाव्रतंतत्रपूर्वा
माह्येतिहेमाद्रौ अथजन्माष्टमी सावकृष्णादिमासेनभाद्रपदकृष्णाष्टमी तथाभाद्रपदेमासिकृष्णाष्टम्यांकलौ
युगे अष्टाविंशतिमेजातःकृष्णोसौदेवकीसुतइतिकल्पतरौब्राह्मोक्तेः अत्रेदंमाधवमतं अष्टमीद्विधाजन्माष्टमीज

यंतीचेति तत्राद्याकेवलाष्टमी येनकुर्वंतिजानंतःकृष्णजन्माष्टमीव्रतं तेभवंतिनराःप्रेत्य व्यालाव्याघ्राश्चकाननइति
८० स्कांदात् दिवावायदिवारात्रौनास्तिचेद्रोहिणीकला रात्रियुक्तांप्रकुर्वीतविशेषेणेंदुसंयुतामितिपुराणांतरात् आ
वर्णोवहुलपक्षेकृष्णजन्माष्टमीव्रतं नकरोतिनरोयस्तुभवतिक्रूरराक्षसइतिभविष्योक्तेश्च केवलाष्टम्याएवोपो
ष्यत्वावगतेःसैवरोहिणीयुताजयंती कृष्णाष्टम्यांभवेद्यत्रकलैकारोहिणीयदि जयंतीनामसाप्रोक्ताउपोष्यासा
प्रयत्नतइतिवह्निपुराणात् अष्टमीकृष्णपक्षस्यरोहिणीऋक्षसंयुताभवेत्प्रौष्ठपदेमासिजयंतीनामसास्मृतेतिवि
ष्णुरहस्यादिवचनाच्च ज्योतिरादिवत्संज्ञयाकर्मभेदः रोहिणीयोगश्चाहोरात्रेमुख्यः निशीथमात्रेमध्यमः दिवसाद्य
वधमः अहोरात्रेतयोर्योगोह्यसंपूर्णोभवेद्यदि मुहूर्तमप्यहोरात्रेयोगश्चेत्तामुपोषयेदितिवशिष्ठसंहितोक्तेः
अर्द्धरात्रेतुयोगोयंतारापत्युदयेसति नियतात्मासुचिःस्नातःपूजांतत्रप्रवर्त्तयेदितिविष्णुधर्मोक्तेः वासरेवानिशा
यांवायत्रस्वल्पापिरोहिणी विशेषेणनभोमासेसैवोष्यामनीषिभिरितिपुराणांतराच्च विशेषणातिस्मृतर्भाद्रपदपी

अथेयमजातिरथैषविश्वज्योतिः ५

पो १

भ
दं श्रावणे वा नैस्येत्तिविद्ध्यमानात् गौडांत्तु निशीथ एव रोहिणी विशेषेणनभोमासे योगे जयंती नान्यथेत्याहुः
तत्र वासरे वा निशायां वेति विरोधात् तत्र जन्माष्टमीव्रतं नित्यं पूर्वोक्तवचनेष्वकरणे निंदाश्रुतेः वर्षे वर्षे तु या ना
री कृष्णजन्माष्टमीव्रतं न करोति महाप्राज्ञ व्याली भवति कानने इति स्कांदे देवीस्याश्रुतेश्च मदनरत्ने स्कांदे त्वत्र फल
मप्युक्तं जन्माष्टमीव्रतं ये वै प्रकुर्वंति नरोत्तमाः कारयंत्यथवा लोकान् लक्ष्मीस्तेषां सदा स्थिरा सिद्ध्यंति सर्वकार्या
णि कृते जन्माष्टमीव्रते इति जयंतीव्रतं तु नित्यं काम्यं महाजयार्थं कुरु तां जयंती मुक्तये ऽनघ धर्ममर्थं च कामं च मोक्षं
च मुनिपुंगव ददाति वांछितानर्थान् ये चान्येऽपि सुदुर्लभा इति स्कांदादौ फलश्रुतेः शूद्रान्नेन तु यत्पापं शवहस्तस्य भोजने
तत्पापं लभते कुंती जयंती विमुखो नरः न करोति यदा विष्णो जयंती संभवं व्रतं यमस्य वशमापन्नः सहते नारकीं व्यथामि
त्यकरणे निंदाश्रुतेश्च यदा च पूर्वेद्युः परेद्युर्वा रोहिणीयोगस्तदा जन्माष्टमी जयंत्यामंतर्भूता ज्ञेया न तु जन्माष्टमी
व्रतं पृथक्कार्यं तदुक्तं माधवेनैव यस्मिन्वर्षे जयंत्याख्ये योगो जन्माष्टमी तदा अंतर्भूता जयंत्यां स्यादिति योगप्रशस्ति
ति२

तदुक्तं मदनरत्ननिर्णयामृते गौडमैथिलमते प्येवं हेमाद्रिस्तु रोहिणीसंयुतोपोष्या सर्वबाधविनाशिनी अर्द्धरा

८८ त्रादधश्चोर्द्ध्वं कलयापि यदा भवेत् जयंती नाम सा प्रोक्ता सर्वपापप्रणाशिनी त्यग्निपुराणादर्द्धरात्रे एव रोहिणीयोगस्य लक्ष्मी २

प्राशस्त्यात् मुहूर्त्तमपि लभ्यते त्यादीनां चार्द्धरात्रयोगे चोपपत्तेर्न जयंतीव्रतं भिन्नं तन्मतं तु हेमाद्रिमतेपि जयंतीव्र

तं भिन्नमेव उदये वाष्टमीत्यस्य तेन जयंतीपरत्वोक्तेः किंच रोहिण्यामर्द्धरात्रे च यदा कृष्णाष्टमी भवेत् तस्यामभ्य

र्चनं शौरेर्हंति पापं त्रिजन्मजमिति विष्णुधर्मोक्तेः समायोगे तु रोहिण्यां निशीथे राजसत्तम समजायत गोविंदो

बालरूपी चतुर्भुजः तस्मात्तं पूजयेत्तत्र यथावित्तानुरूपत इति वह्निपुराणाच्चार्द्धरात्रस्य कर्मकालत्वमवशीयते

अतः कर्मणो यस्य यः काल इत्यादिवचनात् पूर्वेद्युरेव प्राप्तेः परदिने सतोपि रोहिणीयोगस्य न प्रयोजकत्वं अन्यथा

बुधवारादेरपि तत्त्वापत्तेः किंच जयंतीशब्दो रात्रिविशेषवचनः अभिजिन्नाम नक्षत्रं जयंती नाम शर्वरी मुहू

र्त्तो विजयो नाम यत्र जातो जनार्दन इति ब्रह्मांडपुराणात् तेन तद्योगे रोहिण्यां गौणत्वान्न व्रतभेदः यत्तु वासरे वै

यो २

निशायांवेतितत्वेसुतिकन्यायेननिशीथयोगस्यैवस्तुत्यर्थंपूर्वदिनेर्द्धरात्रयोगाभावेवाप्राशस्त्यार्थं यद्यपिदि
वापियदिवारात्रौनास्तिचेद्रोहिणीकला रात्रियुक्तांप्रकुर्वीत विशेषेणेंदुसंयुतामित्यनेनरोहिणीयोगाभावेर्द्धरा
त्रव्यापिन्याह्यःतेनोक्ता तथापियस्मिन्वर्षेजयंतीयोगोनास्तितत्रजयंतीव्रतलोपेप्राप्तेष्टमीमात्रेपिजयंती
व्रतंकार्यमित्येवंपरमितितदाशयः अतएवतांजयंतीनामसर्वरीति यत्तूक्तंदेवोदयेवाष्टमीकिंचिन्नवमीसक
लायदिभवेत्तत्रबुधसंयुक्ताप्राजापत्यर्क्षसंयुता अपिवर्षशतेनापिलभ्यतेवायवानवेति यच्चपाद्मे प्रेतयोनि
गतानांचप्रेतत्वंनाशितंतुतैः यैःकृताश्रावणेमासिअष्टमीरोहिणीयुता किंपुनर्बुधवारेणसोमेनापिविशेषतः
किंपुनर्नवमीयुक्ताकुलकोट्यास्तुमुक्तिदेति तद्दानादिविषयं उपवासाश्रवणादित्यनंतभट्टः जयंतीपरमितिहे
माद्रिः उदयेचंद्रोदयेइतिकेचित् तन्न मानाभावात् तेनपूर्वेद्युःसप्तमीवेधेपरदिनेसूर्योदयेघटिकापिनाह्यान १२
पूर्वविद्धाष्टमीतिपाद्मोक्तेरित्युक्तं अतोनव्रतभेदोनाप्यंतर्भावइत्यूचिवान् गोडास्तुनवमीद्वयपरमिदंवचनं

नवमीसकलायदीतिविशेषणोक्तेः एतत्पूर्वदिनेजयंत्यभावपरमित्याहुः जयंत्यादिसर्वोपवादोपमितिचूडामन्या
८८ दयः वयंतु सत्यंव्रतभेदः लोकास्तुजन्माष्टमीमेवानुतिष्ठंति नहिश्रावणोवानभस्येवारोहिणीसहिताष्टमी
यदाकृष्णाष्टमीलब्धासाजयंतीतिकीर्तिता श्रावणेनभवेद्योगोनभस्येतु भवेद्ध्रुवमितिमाधवीयवशिष्ठसंहि
तोक्तापिभाद्रेजयंतीकेनापिनक्रियते यद्वागुणात्फलंप्राप्तमेवब्रह्मचर्यसकाममुपनयेदितिवदित्यन्ये तन्न
अकरणेदोषनित्यत्वानुपपत्तेः वयंतुसत्यंव्रतभेदः लोकास्तुजन्माष्टमीमेवानुतिष्ठंति अतोजयंतीव्रतस्यापि
नित्यत्वादुपवासद्वयंकार्यमितिब्रूमः अतएवहेमाद्रिमदनरत्नादौजन्माष्टमीव्रतंजयंतीव्रतंचभिन्नमित्युक्तं भि
न्नकालत्वात्सर्वथातावदंतर्भावोनेतिसिद्धं तत्वंतुपूर्वापरावाल्यापिरोहिणीयुतैवकार्येतिमन्मथानां तज्जयंतीप
रं द्वैधंकाम्यमेवतत्पंनतभट्टस्तुदूषणांहेमाद्रौजयं नित्यकाम्यमितितुबहवः अत्रनिशीथव्याप्येवग्राह्यः पूर्वोक्त
वचनस्तुतस्यैवमुख्यकालत्वोक्तेः अष्टमीशिवरात्रिश्च अर्द्धरात्रादधोयदि दृश्यतेघटिकाप्येकासापूर्वविद्धाप्रकीर्तितेति
६२

माधवीयेपुराणांतरात् अर्द्धरात्रेतुरोहिण्यांयदाकृष्णाष्टमीभवेत् तस्यामभ्यर्चनंसौरेर्हंतिपापंत्रिजन्मजामितिभ
विष्योक्तेः अष्टमीरोहिणीयुक्तानिश्यर्द्धेदृश्यतेयदि मुख्यकालइतिख्यातस्तत्रजातोहरिःस्वयमितिवशिष्ठसंहितो
क्तेश्च तत्राष्टमीद्वेधा रोहिणीरहितातद्युता [illegible] युताच आद्यापिचतुर्द्धापूर्वेद्युरेवनिशीथयोगिनीपरेद्युरेवाभयेद्यु
रनुभयेद्युश्चेति तत्राद्योरसंदेह एव कर्मकालव्याप्तेः जन्माष्टमीरोहिणीशिवरात्रिस्तथैवच पूर्वविद्धैवकर्तव्या
तिथिभांतेचपारणमितिभृगूक्तेश्च अस्मात्केवलरोहिण्युपवासोपिसिद्धः अंत्ययोःपरैव प्रातःसंकल्पकालव्या
प्तेराधिक्यात् वर्जनीयाप्रयत्नेनसप्तमीसंयुताष्टमीतिब्रह्मवैवर्ताच्च एवमंत्येतःसमव्याप्तावपिविषमव्याप्तौत्वाधिक्ये
ननिर्णयः रोहिणीयुतापिचतुर्धा पूर्वेद्युरेवनिशीथेरोहिणीयुतापरेद्युरेवोभयेद्युरनुभयेद्युश्च अत्राप्याद्योरसं यो ३
देहः कार्याविद्धापिसप्तम्यारोहिणीसहिताष्टमीतिपाद्मोक्तेः जयंत्यांपूर्वविद्धायामुपवासंसमाचरेदितिगारुडात्
सप्तमीसंयुताष्टम्यांनिशीथेरोहिणीयदि भवितासाष्टमीपुण्यायावच्चंद्रदिवाकरावितिवह्निपुराणाच्च तृतीयपक्षेपरैव

इदंपूर्वेद्युरेवनिशिरोहिणाष्टमीयोगस्याल्पस्याप्य
भावेज्ञेयं ।। एकाशीतिपत्रेऽनंतभट्टोक्तप्रथम
पंक्तौ । सप्तमीसंयुताष्टम्यामितिस्कंदवा
क्यस्य । मुहूर्तेनापिसंयुक्तेतिपाद्मवाक्यस
चसत्वात् १

पूर्वेद्युः सप्तमीवेधरहिताष्टमीनिशीथे चेदस्ति रोहिणीरहिता। परेद्युश्चाष्टमी सनक्षत्रा तदोपवासद्वयम्। पूर्वेद्युर्निशीथे सनक्षत्रापि सप्तमीयुता चेत्तां त्यक्त्वा परेद्युरल्पापि सनक्षत्रा कार्या। नक्षत्राभावे परैव। पूर्वेद्युर्निशीथे सप्तम्याविद्धा सनक्षत्राष्टमी परेद्युश्च सनक्षत्रा तदा पूर्वैवेति तत्त्वम् २

न्यं २ रोहिणयष्टमीयोगस्य २

केवला २

वर्जनीया प्रयत्नेन सप्तमीसंयुताष्टमी। सऋक्षापि न कर्त्तव्या सप्तमीसंयुताष्टमी इति ब्रह्मवैवर्त्तात् चतुर्थ्यपि त्रेधा पूर्वे
८० द्युर्निशीथेऽष्टमी परेऽह्नि रोहिणी परेऽह्न्यष्टमी पूर्वेऽह्नि रोहिणी उभयेद्युरुभयस्य निशीथासंबंधो वेति आद्ये परेद्यु
र्जयंतीयोगस्य सत्वात्परैवेति माधवः तदुक्तं तत्रैव यस्मिन्वर्षे जयंत्याख्ययोगो जन्माष्टमीतदा अंतर्भूता जयं
त्यां स्यादृक्षयोगप्रशस्तितः इति पूर्वविद्धाष्टमी या तु उदये नवमीदिने मुहूर्त्तमपि संयुक्ता संपूर्णाष्टमी भवेत् सा० ४
कलाकाष्ठामुहूर्त्तापि यदा कृष्णाष्टमीतिथिः नवम्यां सैव ग्राह्या स्यात्सप्तमीसंयुता नहि पाद्मोक्तेश्च केचित्तु हेमा
द्रौ अष्टम्याः प्राधान्यात्तस्याश्च पूर्वेद्युः कर्मकालव्यापित्वात्पूर्वैव पाद्मं तु पूर्वेऽह्नि निशीथेऽष्टम्यभावे ज्ञेयं अंतर्भावो
क्तिस्तु पूर्वबंधं व्रतमात्रमित्याहुः तत्त्वं तु अष्टम्याः कर्मकालव्याप्तौ दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणी कला रात्रि
युक्तां प्रकुर्वीतेति पूर्वोक्तवाक्यैः रोहिणीयोगाभावे ग्राह्यत्वोक्तेर्वचनात्कर्मकालव्यापिनीं त्यक्त्वा पूर्वा परा वाल्पापि रोहिणी
युता ग्राह्या माधवमदनरत्ननिर्णयामृतानंतभट्टगौडमैथिलग्रंथादिष्वप्येवमिति युक्तं तु उपवासद्वयं द्वयोर्नित्यत्वा

केवलाम् २

उभयेष्वुरनुभयोपुरिति १ अक्षेरण २ आभ्यांस्कांदपाद्मवाक्याभ्यांपूर्वेक्ति निर्णीये रोहिराष्टमीयोगो बाध्यते २

दितिवचं अन्त्ययोःपरैवंसप्तमीसंयुताष्टमयांभूत्वाऋक्षं द्विजोत्तम प्राजापत्यं द्वितीये हि मुहूर्त्तार्द्धे भवेद्यदि तदाष्टम्या
मिकंपुराणंप्रोक्तं व्यासादिभिःपुरेतिस्कांदात् मुहूर्त्तेनापिसंयुक्तासंपूर्णास्याष्टमीभवेत् किंपुनर्नवमीयुक्ताकुलको
ट्यास्तुमुक्तिदेतिपाद्माश्चेतिदिक् पारणंतु तिथिरक्षगुणांहंतिनक्षत्रंचचतुर्गुणं तस्मात्प्रयत्नतःकुर्यात्तिथिभां
तेचपारणमितिब्रह्मवैवर्त्तात् तिथ्यृक्षयोर्यदाछेदोनक्षत्रांतमथापिवा अर्द्धरात्रेथवाकुर्यात्पारणंत्वपरेहनी
तिहेमाद्रिवचनाच्चार्द्धरात्रेप्युभयांतेन्यतरांतेवेतिमुख्यःपक्षः सर्वेष्वेवोपवासेषुदिवापारणमिष्यतेइतिब्रह्म
वैवर्त्तात्वन्यविषयं दिनेमुख्यकालेलाभेन्यतरांतेवाज्ञेयं गौडास्तुनरात्रौपारणंकुर्यादृतेवैरोहिणीव्रतात् तत्रनि
श्यपितत्कुर्याद्वर्जयित्वामहानिशामितिब्रह्मांडपुराणात् रात्रौसार्द्धप्रहरमध्येकार्यं महानिशातुविज्ञेयामध्यमं
मध्यायामयोः तयामध्यमप्रहरमात्रेविज्ञेयातुमहानिशेतिस्मृत्यंतरात् कल्पतरौमदनरत्नेचैवंकामधेनौगर्ग
स्तु महानिशातुविज्ञेयामध्यमंप्रहरद्वयमित्याहेह वृद्धसातातपस्तु महानिशाद्वेघटिके रात्रौमध्यमयामयोरित्याह

वेदपाठपरमित्यनो महानिशायामन्यतरांतेतत्तीयदिनेपारणं अपरेहनीतिपारणोत्तरदिनपरत्वात्ऽभयांता
८१ पेक्षणादित्याहुः तत्वंतुमहानिशातोर्वागन्यतरांतलाभेमहानिशानिषेधः महानिशायामेवलाभेतत्रैवपार
णमिति अशक्तौतुवन्हिपुराणे भांतेकुर्यात्त्रिथर्वापिसैसंभारतपारणमितिगारुडेविष्णुधर्मेच जयंत्यांपूर्वविद्धा
यामुपवासंचरेत् तिथ्यंतेवोत्सवांतेवाव्रतीकुर्वीतपारणमितिकालादर्शोक्तेरिंसंक्षेपः अष्टम्यांविशेषोवाह्ये
माद्रेभविष्ये ततोष्टम्यांतिलैःस्नातोनघादौविलेजले सुदेशेशोभनंकुर्याद्देवक्याःसूतिकागृहं तन्मध्येप्रति
मांस्थाप्यसाचाप्यष्टविधास्मृता कांचनीराजतीताम्रीपैत्तलीमृन्मयीतथा वार्क्षीमणिमयीचैववर्णकैर्लि
खिताथवा सर्वलक्षणसंपूर्णापर्यंकेचपटावृते देवकींतत्रचैकस्मिन्प्रदेशेसूतिकागृहे प्रसूतांचप्रसूतांचस्था
पयेन्मंचकोपरि मांतत्रवालकंसुप्तंपर्यंकेस्तनपायिनं यशोदांतत्रचैकस्मिन्प्रदेशेसूतिकागृहे तद्वच्चकल्पय
त्पार्श्वप्रसूतवरकन्यकां कश्यपोवसुदेवोयमदितिश्चैवदेवकीशेषोवायंवलभद्रोयंयशोदादितिरन्वभूत नंदःप्रजा

पतिर्दक्षो गर्गश्चापि चतुर्मुखः गोवर्धनः कुंजरश्चैव दानवाः शस्त्रपाणयः लेखनीयाश्च तत्रैव कालियो यमुनाह्रदे य
त्येवमादि यत्किंचिच्छक्यते चरितं मम लेखयित्वा प्रयत्नेन पूजयेद्भक्तितत्परः मंत्रेणानेन कौंतेय देवकीं पूजयेन्नरः
गायद्भिः किंनरौघैः सततपरिवृता वेणुवीणानिनादैः शृंगारादर्शकुंभप्रवरधृतकरैः किंकरैः सेव्यमाना पर्यंकेस्वा
स्तते या मुदिततरमुखी पुत्रिणी सम्यगास्ते सा देवी देवमाता जयति सुतनया देवकी कांतरूपा पादौ संवाहयं
ती श्रीर्देवक्याश्चरणांतिके निषण्णा पंकजे पूज्या नमो देव्यै श्रियै इति शंखे तोयं समादाय सपुष्पकुशचंदनं जा
नुभ्यां धरणीं गत्वा चंद्रायार्घ्यं निवेदयेत् अर्द्धरात्रे वसोर्धारां पातयेद्गुडसर्पिषा नाडीवर्द्धापनं षष्ठीं का नामादेः कौर्ति
मम ततो मंत्रेणानेन दद्याच्चंद्राय अर्घ्यं समाहितः क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव गृहाणार्घ्यं शशांक मे रोहिण्या
सहितो मम ज्योत्स्नायाः पते नमस्तुभ्यं नमस्ते ज्योतिषां पते नमस्ते रोहिणीकांत अर्घ्यं नः प्रतिगृह्यतां प्रभाते ब्राह्मणान्
शक्त्या भोजयेद्भक्तिमान्नरः ॐ नमो वासुदेवाय गोब्राह्मणहिताय शांतिरस्तु शिवं चास्तु इत्युक्त्वा तां विसर्जयेत् इदं

प्रतिमासकृष्णाष्टम्यामप्युक्तं मदनरत्ने वह्निपुराणे प्रतिमासं व्रते पूजामष्टम्यां यः करिष्यति मम भैरवाखिलान्का
८२ मान्स संप्राप्यपत शंसपं तथा अनेन विधिना यस्तु प्रतिमासं नरेश्वर करोति वत्सरं पूर्णं यावदागमनं हरेः दध्या
ष्टम्यां स संपूर्णो गोभीरत्नैरलंकृतां इति जन्माष्टमीव्रतं भाद्रामावास्यायां कुशग्रहणमुक्तं हेमाद्रौ हारीतेन मा
सेन भस्यामावास्या तस्यां दर्भोच्चयो मतः अयातयामास्ते दर्भा विनियोज्याः पुनः पुनः नभः श्रावणः तेन दर्शांतमा
से जन्माष्टम्यनंतरं दर्शो लभ्यते मदनरत्ने तु मासे नभस्यमावास्या तस्यां दर्भोच्चयो मत इति मरीचिवाक्यमुक्तं नभ
स्यो भाद्रपदः तेन महालयांतर्गतदर्शो लभ्यते गौणमुख्यचांद्राभ्यामेक एव दर्श इत्यन्ये भाद्रशुक्लतृतीयायां ह
रितालिकाव्रतं तत्र परा ग्राह्या मुहूर्तमात्रत्वेपि दिने गौरीव्रतं परे शुद्धाधिकायामप्येवं गणनाथप्रशंसनात् इति
माधवोक्तेः आद्यामधुश्रावणिका कज्जली हरितालिका चतुर्थीमिश्रिता स्त्रीभिर्दिवा नक्ते विधीयते तृतीया नभ
सः शुक्ला मधुश्रावणिका मता भाद्रस्य कज्जली कृष्णा शुक्ला च हरितालिकेति दिवोदासोदाहृतवचनाच्च भाद्र

शुक्लचतुर्थीसिद्धिविनायकव्रतं तत्रमध्यान्हव्यापिनीग्राह्या प्रातःशुक्लतिलैःस्नात्वामध्यान्हेजयेन्नृपतिहेमा
द्याभविष्येतत्रैवपूजोक्तेः मदनरत्नेप्येवं परदिनेएवांशेनसाकल्येनवामध्यान्हव्याप्त्यभावेसर्वपक्षेषुपूर्वाग्राह्या
तथाचबृहस्पतिः चतुर्थीगणनाथस्यमातृविद्धाप्रशस्यते मध्यान्हव्यापिनीचेत्स्यात्परतश्चेत्परेहनीति मातृ
विद्धाप्रशस्तास्याच्चतुर्थीगणनायके मध्यान्हेपरतश्चेत्स्यान्नागविद्धाप्रशस्यतेइतिमाधवीयेस्मृत्यंतराच्च तत्रगणे
शध्यानं स्कांदे एकदंतंशूर्पकर्णंनागयज्ञोपवीतिनं पाशांकुशधरंदेवंध्यायेत्सिद्धिविनायकमिति इयंरविभौमयोर्
तिप्रशस्ता भाद्रशुक्लचतुर्थ्यांयाभौमेनार्केणवायुता महतीसात्रविघ्नेशमर्चित्वेष्टंलभेन्नरइतिनिर्णयामृतेवाराहो
क्तेः अत्रचंद्रदर्शननिषिद्धं तथाचपराशरमार्कंडेयः सिंहादित्येशुक्लपक्षेचतुर्थ्यांचंद्रदर्शनं मिथ्याभिदूषणंकुर्यात्तस्मा
स२ त्पश्येन्नतंदेति चतुर्थ्यांनपश्येदित्यन्वयः प्रधानक्रियान्वयलाभात् तेनचतुर्थ्यामुदितस्यपंचम्यांननिषेधः गौडास्त्व
प्येवमाहुः पराशरोपि कन्यादित्येचतुर्थ्यांतुशुक्लेचंद्रस्यदर्शनं मिथ्याभिदूषणंकुर्यात्तस्मात्पश्येन्नतंतदा तद्दोषक्षा

तयोसिंहःप्रसेनमवधीदितिपठेत् श्लोकस्तुविष्णुपुराणे सिंहःप्रसेनमवधीत्सिंहोजांववताहतः सुकुमारकमारोदी
२३ स्तवह्येषस्यमंतकइति भाद्रशुक्लपंचमीऋषिपंचमीसामध्यान्हव्यापिनीग्राह्या पूजाव्रतेषुसर्वेषुमध्यान्हव्यापिनी
तिथिरितिमाधवीयेहारीतोक्तेः दिनद्वयेतत्वेहेमाद्रिमतेपरा सितापरयुतास्यात्पंचमीतिदीपिकोक्तेः माधवमतेपूर्वाम
र्वत्रपंचमीपूर्वैवतुयुक्ता ऋषिपंचमीषष्ठीयुतैवेतिदिवोदासः युग्मवाक्यान्निर्णयस्तुयुक्तः अत्रऋषीन्प्रतिमासुपूजयि
त्वाऽकृष्टभूमिजशाकेनवर्त्तनं एवंसप्तवर्षाणिकृत्वासप्तकुंभेषुप्रतिमासुसंपूज्यपरेन्हितन्मंत्रेणाष्टोत्तरशतंतिला
न्हुत्वासप्तब्राह्मणान्भोजयेदितिनिर्णयामृते भाद्रशुक्लषष्ठीसूर्यषष्ठीसासप्तमीयुतेतिदिवोदासः शुक्लेभाद्रपदेष
ष्ठ्यांस्नानंभास्करपूजनं प्राशनंपंचगव्यस्यअश्वमेधफलाधिकमितिवचनात् कल्पतरौभविष्ये यःभाद्रपदेमासिषष्ठी
स्याङ्करतर्षभ योऽस्यांपतिगांगेयंदक्षिणापथवासिनं ब्रह्महत्यादिकंपापैस्तुमुच्यतेनात्रसंशयः गांगेयःस्वामिका
र्त्तिकेयः भाद्रशुक्लाष्टमीदूर्वाष्टमीसापूर्वाग्राह्या श्रावणीदुर्गनवमीदूर्वाचैवहुताशनी पूर्वविद्धातुकर्त्तव्याशिवरात्रिर्व

नव ३

लेर्दिनमितिहेमाद्रौ ब्रह्मोक्तेः शुक्लाष्टमी तिथिर्यानुमासिभाद्रपदेभवेत् दूर्वाष्टमीतुसाज्ञेयानोत्तरासाविधीय
तइतिपुराणसमुच्चयाच्च यत्तुमुहूर्त्तरोहिण्योष्टम्यांपूर्वावायदिवापरा दूर्वाष्टमीतुसाकार्याज्येष्ठांमूलंच वर्जयेदि
तितत्रैवपराकार्येत्युक्तंपूर्वदिनेज्येष्ठादियोगेदृष्टव्यं दूर्वाष्टमीसदात्याज्याज्येष्ठामूलर्क्षसंयुता तयोरेंद्रर्क्षेपू
ज्यु ५ जितादूर्वाहंतिपत्यानिनोंध्या भर्तुरायुर्हरामूलेतस्मात्तांपरिवर्जयेदितितत्रैवतन्निषेधात् इदमगस्त्योदयेक
कन्यार्केचनकार्यं शुक्लेभाद्रपदेमासिदूर्वासंज्ञातथाष्टमी सिंहार्कएवकर्त्तव्यानकन्यार्केकदाचन सिंहस्थेसोत्तमा
सूर्येत्वनुदितेमुनिसत्तमे इतिमदनरत्नेस्कांदोक्तेः अगस्त्यउदितेतातपूजयेद्यस्तुदूर्वां वैधव्यंपुत्रशोकंचदशजन्मानि
पंचचेति तत्रैवदोषोक्तेश्च भाद्रशुक्लाष्टम्यामगस्त्योदयेभाविनिसतिपूर्वकुर्यात्साष्टम्यामेवकुर्यातइतिहेमाद्रिः दी
पिकायामेवं इदंचव्रतंस्त्रीणांनित्यं यानपूजयतेदूर्वांमोहादिहयथाविधि त्रीणिजन्मानिवैधव्यंलभतेनात्रसंशयः
तस्मात्संपूजनीयासाप्रतिवर्षंवधूजनैरितिपुराणसमुच्चयात् यदाज्येष्ठादियोगादिकंविनाष्टमीनलभ्यतेतदातत्रैवोक्तं

अतान्निपक्वभक्षणलक्षणं व्रतं न कुर्यादेकभक्तं तु कुर्यात्। एकभक्तपक्षे ज्येष्ठामूलसद्भावेपि दूर्वां पूजयेत्। प्रतिवर्षविधूजनैरित्युक्तेः ऐंद्रर्क्ष इति निषेधस्तु व्रतांगदूर्वापूज्या विषय
इति विवेकः। महादेवाद्यर्यं चेन्मन सेव पूजयेन्नित्यत्वात्पूजायाः। यथा सूतके मानसमेव संध्यावंदनादि क्रियते १
अनाग्निपक्वं भक्षयेत्। एकभक्तकालश्च मध्याह्नः। सच पंचधा विभक्तदिनस्य मध्यभागः १

कर्त्तव्या चैकभक्तेन ज्येष्ठामूलं यदा भवेत् दूर्वामभ्यर्चयेद्भक्त्या नवंध्यं दिवसं नयेदिति अत्र विधिर्मदनरत्ने भविष्ये
९६ अचौदेशे प्रजातायां दूर्वायां ब्राह्मणोत्तम स्थाप्य लिंगं ततो गंधैः पुष्पैर्धूपैः समर्चयेत् दध्यक्षतैर्द्विजैश्चार्घ्यं दद्यात् म०२
द्यात्त्रिलोचने दूर्वा समीप्यां विधिवत्पूजयेच्छ्रद्धयान्विता मंत्रस्तु त्वं दूर्वे अमृतजन्मासि वंदितासि सुरासुरैः सौ
भाग्यं संततिं देहि सर्वकार्यकरी भव यथा शाखाप्रशाखाभिर्विस्तृतासि महीतले तथा ममापि संतानं देहि त्वमज
रामरमिति अत्रानग्निपक्वं भक्षयेत् अनग्निपक्वमश्नीयाद्दध्यन्नं दधिफलं तथा अक्षारलवणं ब्रह्मन्नश्नीयान्मधु
नान्वितमिति तत्रैव भविष्योक्तेः भाद्रपदेधिमासे सति निर्णयदीपे स्कांदे अधिमासे तु संप्राप्ते नभस्य उदये मुनेः
अर्वाग्दूर्वाव्रतं कार्यं परतो नैव कुत्रचित् अत्रैव ज्येष्ठापूजोक्ता माधवीये स्कांदे मासि भाद्रपदे शुक्लपदे ज्येष्ठर्क्षसं
युता राशिर्जस्मिन्दिने कुर्यात् ज्येष्ठायाः परिपूजनमिति एवं ज्येष्ठायोगवशेन पूर्वापराग्राह्या दिनद्वये योगे परा पू
र्वेन्हि राशियोगपूर्वकं नवम्यां सह कार्या स्यादष्टमी नात्र संशयः मासि भाद्रपदे शुक्लपदे ज्येष्ठर्क्षसंयुता राशियः

स्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनमिति तत्रैवोक्तेः अस्यापवादः ॐ स्मिन्दिने भवेज्ज्येष्ठा मध्याह्नादूर्ध्वमप्यणुः त
स्मिन्हविष्यं पूजा च न पूर्ना चेत्पूर्ववासरे इति इदं केवलतिथौ न तत्रैवोक्तं तत्राद्यं केवलतिथौ कार्यं अन्त्यं केवलर्क्षे तदुक्तं
मात्स्ये प्रत्याब्दिकं तिथावुक्तं यज्ज्येष्ठादेवतं व्रतं प्रतिज्येष्ठाव्रतं यच्च विहितं केवलोडुनि तिथावेवाचरेदाद्यं द्वितीयं के
वलर्क्षत इति अत एव मदनरत्ने भविष्ये नक्षत्रमात्र उक्तं मासि भाद्रपदे पक्षे शुक्ले यदा ज्येष्ठा भवेत् रात्रौ जागरणं कृ
त्वा षष्ठिभिर्मन्त्रैश्च पूजयेत् इति दैत्यारिणा त्वयास्त्वत्र एव कुर्वंति हेमाद्रौ स्कांदेपि मासि भाद्रपदे शुक्लपक्षे ज्येष्ठर्क्षसंयुते
यस्मिन्कस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनमिति तथा मंत्रेणावाहयेद्देवीं ज्येष्ठायां तु प्रपूजयेत् मूले विसर्जयेद्दे
वीं त्रिदिनं व्रतमुत्तममिति मंत्रस्तु एह्येहि त्वं महाभागे सुरासुरनमस्कृते ज्येष्ठे त्वं सर्वदेवानां मत्समीपगता भवत्या
वाह्य तामग्निवर्णामिति संपूज्य ज्येष्ठायै तेन नमस्तुभ्यं ज्येष्ठायै ते नमो नमः शर्वायै ते नमस्तुभ्यं शाकंभर्यै ते नमो नमः
ज्येष्ठश्रेष्ठ तपोनिष्ठे ब्रह्मिष्ठे ब्रह्मवादिनि एह्येहि त्वं महाभागे अर्घ्यं गृह्ण सरस्वतीति भाद्रपदशुक्लपक्ष पर्णाश्रवणा

योगरहितायांपारणांकुर्यात् आभाकासितपक्षेष्विति दिवोदासोदाहृतवचनात् उपोष्यैकादशींमोहात्पारणा
२५ श्रवणेयदि करोतिहंतितत्पुण्यंद्वादशद्वादशीभवमिति तत्रैवस्कांदाच्च अस्यतत्रैवप्रतिप्रशवः मार्कंडेयः विशे
षेणमहीपालश्रवणंवर्द्धतेयदि तिथिक्षयेनभोक्तव्यंद्वादशीलंघयेन्नहीति केचित्तु यदात्वपरिहार्येयोगस्त
३४ दाश्रवणानक्षत्रेत्रेधाविभक्तेमध्यमांत्रिघटिकायोगंत्यक्त्वापारणांकार्यमित्युक्तंविष्णुधर्मे श्रुतेश्चमध्येपरिवर्त्त
मेति सुप्तिप्रबोधपर्वर्त्तनमेववर्ज्यमिति केचित्तुचतुर्द्धाविभज्यमध्यमपादद्वयंवर्ज्यमाहुः अत्रमूलंचिंत्यं अत्रै
वविष्णुपरिवर्त्तनोत्सवंकुर्यात् संध्यायांविष्णुंसंपूज्यप्रार्थयेत् मंत्रस्तुतिथितत्वेउक्तः श्रीवासुदेवजगन्नाथप्रा
प्तेयंद्वादशीतव पार्श्वेनपरिवर्त्तस्वसुखंस्वपिहिमाधवेति अत्रैवशक्रध्वजोत्थापनमुक्तमपरार्केगर्गेण द्वादश्यां
तुसितपक्षेमासिप्रोष्ठपदेतथा शक्रमुत्थापयेद्राजाविश्वश्रवणवासवे इयमेवश्रवणद्वादशी तत्रैकादश्यांद्वाद
शीश्रवणयोगेसैवोपोष्या एकादशीद्वादशीचवैष्णव्यमपितत्रचेत् तद्विष्णुसृंखलंनामविष्णुसायुज्यकृद्भवतीति

उत्तरणबा ८२

८८

विष्णुधर्मोक्तेः नारदीयेपि संस्पृशेयेकादशीं राजन्द्वादशीं यदि संस्पृशेत् श्रवणं ज्योतिषां श्रेष्ठं ब्रह्महत्यां व्यपोह
ति द्वादशी श्रवणास्पृष्टा स्पृशेदेकादशीं यदि स एव वैष्णवो योगो विष्णुशृंखलसंज्ञित इति हेमाद्रौ मात्स्योक्ते
श्च दिनद्वये द्वादशीश्रवणयोगेपि पूर्वा निर्णायमते त्वस्य पूर्वार्द्धमन्यथा पठितं द्वादशी श्रवणर्क्षं च स्पृशे
देकादशीं यदीति तेन हेमाद्रिमते एकादश्याः श्रवणयोगाभावेपि तद्युक्तद्वादशीयोगमात्रेण विष्णुशृंखलं भ
वति निर्णयामृतमदनमते तु श्रवणयोगे एकादशीद्वादशीभ्यां योग एव विष्णुशृंखलं नान्यथेति यदा निशीथानंत
रं सूर्योदयावधि वा द्विकलामेत्रमपि श्रवणर्क्षं भवति तदापि पूर्वैव तदुक्तं तत्रैव द्रष्टांप्रकृत्य तिथिनक्षत्रयोर्यो
गो योगश्चैव नराधिप द्विकलो यदि लभ्येत स ज्ञेयो ह्यष्टयामिक इति द्वादशी श्रवणास्पृष्टा कृत्स्नापुण्यतमा ति
थिः न तु सा तेन संयुक्ता तावत्येव प्रशस्यत इति मदनरत्ने मात्स्याच्च दिवा वा यदि वा रात्रौ प्रथमया मध्ये च श्रवणो हरि
वासरे तदा पूर्वामुपवसेत्प्रातर्भानौ च पारणमिति त्युक्तं इदं तु निर्मूलत्वात्पूर्ववि रोधाच्चोपेक्ष्यं इदं बुधवारे

श्रा२ भि३ उदयकालभिन्ने ५

तिप्रशस्ता बुधश्रवणासंयुक्ता शैव चेद्द्वादशी भवेत् अत्यंतमहतीसास्याद्दत्तं भवति चाक्षयम् इति हेमाद्रौ स्कांदा
८६ त् यानितु पठंति उत्तराषाढसंमिश्रा एणामध्याह्नगापिच आसुरी सैव तारास्यादिति पुराणपुराकृतं उदयव्यापि
नीमाघाश्रोणाद्वादशी संयुता विष्णुवृद्धिसंयुता चेत्स्यान्नैवोपोष्यामघे सुरैरित्यादि निवचनानि तानि निर्मूलानि
यदपिस्मृत्यर्थसारे उदयव्यापिनी ग्राह्येत्युक्तं यच्च वृहन्नारदीये उदयव्यापिनी माघाश्रवणाद्वादशीव्रतेइति
तद्यदा श्रुत्याधिका द्वादशी परदिने एवोदये श्रवणायोगः पूर्वेद्युश्च तद्दिने कालेयोगस्तत्परं दिनद्वये उदययो
गे पूर्वैव बहुकालव्याप्तेरित्युक्तं मदनरत्ने यदात्वेकादश्येव श्रवणायुता नाद्वादशी तदापि पूर्वैव यदा न प्राप्यते श्र
वणं द्वादश्यां वेलमवं क्वचित् एकादशीं ततोपोष्य प्राप्य श्रीश्रवणान्वितामिति मदनरत्ने नारदीयोक्तेः यदापरैव वृद्धियुता त
दापरैव वृद्धियुता तत्र शक्तेनोपवासद्वयं कार्यं एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् न चात्र विधिलोपः स्यादु
भयोर्दैवतं हरिरिति भविष्योक्तेः यत्तु विष्णुधर्मे पारणांतं व्रतं ज्ञेयं व्रतांते विप्रभोजनं असमाप्ते व्रते पूर्वं नैव कुर्याद्व्र

नांतरमितितदेतद्भिन्नपरं अत्रगौडाः भगुराजन्यरंकामंग्रवणाद्वादशीव्रतमितिस्थूलशीर्षवचनात्काम्य
मेवेदं तेनाशक्तस्यनित्यैकादशीव्रतमेवेतिमन्यंते द्वादश्यामुपवासेनशुद्धात्मानपसर्वशः चक्रवर्त्तित्व
मतुलंसंप्राप्नोत्यतुलांश्रियमितिगौडनिबंधेमार्कंडेयोक्तेश्च दाक्षिणात्यास्तु एकादश्यांनक्तंरोभुक्त्वा
द्वादश्यांसमुपोषणात् व्रतद्वयकृतंपुण्यंसर्वंप्राप्नोतिपुष्कलमितिवामनपुराणोक्तेः श्रवणाद्वादशीव्र
तमेवेत्याहुः भुंक्तेतिफलाद्याहारपरंनत्वन्नपरं अन्नाश्रितानिपापानीतिनिषेधात् उपवासद्वयंकर्त्तुंनश
क्तोतिनरोयदि प्रथमेन्हिफलाहारीनिराहारोपरेहनीतिद्विवोदासीयेभविष्योक्तेश्च अशक्तोनुगृहीतैकादशी
व्रतोऽस्तिप्रत्युक्तंमात्स्ये द्वादश्यांशुक्लपक्षेतुनक्षत्रंश्रवणंयदि उपोष्यैकादशींतत्रद्वादश्यांपूजयेद्धरिमिति पू
जयेन्नतूपवसेदित्यर्थः अगृहीतैकादशीव्रतश्चेदेकादश्यांभुक्त्वाद्वादश्यामुपवसेत् एवमेकादशींभुक्त्वाद्वादशीं
समुपोषयेत् पूर्ववासरजंपुण्यंसर्वंप्राप्नोत्यसंशयमितिनारदोक्तेः पारणंतिथिभांत्येन्यतरांतेवाकुर्यात् तिथिनक्ष

त्रानियमेतिथिभांतेचपारणमितिस्कांदात् तिथिनक्षत्रसंयोगेउपवासोयदाभवेत् पारणंतुनकर्त्तव्यंयावन्नै
६० कस्यसंक्षयइतिनारदीयादितिहेमाद्रिः यद्यप्यत्रनक्षत्रमात्रांतेपिपारणंप्रतिभातितथापितिथिमात्रांते
ज्ञेयं नचऋक्षांतेतिथिमध्येपि याःकाश्चित्तिथयःप्रोक्ताःपुण्यानक्षत्रयोगतः ऋक्षांतेपारणंकुर्यात्तविनाश्र
वणारोहिणीमितिविष्णुधर्मेश्रवणांतमात्रपारणनिषेधात् रोहिण्यांतुभांतेकुर्यात्तिथ्यंतेवापीतिविष्णुपु
राणात् तदंतेप्यस्तु नत्वत्रैवमस्तीतिऋक्षांतोविकल्पइतिमदनरत्ने द्वादशीविद्धोश्रवणाविद्धोवाश्रवणांतए
वपारणंकुर्यात् पारणंतिथिवृद्धौतुद्वादश्यामुडुसंक्षयात् वृद्धौकुर्यात्त्रयोदश्यांतत्रदोषोनविद्यतइतिवाह्नि
पुराणादित्युक्तं तत्प्रकरणादेतस्यामेवश्रवणयुतैकादश्यांविहितविजयैकादशीव्रतपरंनतुश्रवणयुक्तद्वादशीप
रमितिमदनरत्ने गौडास्तुश्रवणद्वादशीपरमाहुः अत्रविधिर्मदनरत्नेविष्णुधर्मे तस्मिन्दिनेतथास्नानंयत्रक्वच
नसंगमे तथा दध्योदनयुतंतस्मैजलपूर्णंघटंद्विजे वस्त्रसंवेष्टितंदत्वाछत्रोपानहमेवच नदुर्गतिमवाप्नोतिना

तिमग्न्यांचविंदति मंत्रस्तु भविष्ये घटेजनार्द्दनपूजामभिधाय नमोनमस्तेगोविंद बुधश्रवणसंज्ञक अघौघसं
क्षयंकृत्वासर्वसौख्यप्रदोभव प्रीयतांदेवदेवेशोममसंशयनेशनः वामनावतारनिमित्तोपवासस्तुहेमाद्रौभ
विष्ये द्वादश्यामेविधिःप्रोक्तःश्रवणेनयुधिष्ठिर सर्वपापप्रशमनःसर्वसौख्यप्रदायकः एकादशीयदासास्या
च्छ्रवणेनसमन्विता विजयासातिथिःप्रोक्ताभक्तानांविजयप्रदेत्युपक्रम्य अथकालेवहुतिथेगतेसागुर्वि
णीभवत् सुषुवेनवमेमासिपुत्रंसावामनंहरिमित्याद्युक्त्वा एतत्सर्वंसमभवदेकादश्यांयुधिष्ठिर तेनेयंदेवदे
वस्यसर्वथाविजयातिथिः एषा व्युष्टिःसमाख्याता एकादश्यांमयातव पूर्वमेवसमाख्याता द्वादशीश्रवणान्विते
त्युपसंहारादेकादश्यामेव व्युष्टिःफलं भागवतेऽष्टमस्कंधेतु द्वादश्यांवामनोत्पत्तिरुक्ता श्रोणायांश्रवणद्वादश्यां
मुहूर्त्तेऽभिजितिप्रभुः ग्रहनक्षत्रताराद्याश्चक्रुस्तज्जन्मदक्षिणं द्वादश्यांभवितातिथ्यमध्यंदिनगतेनृप विजयानामसाप्रोक्ता
यस्यांजन्मविदुर्हरेः श्रोणायांचंद्र अभिजित्श्रवणप्रथमांशः गौणाप्येवं अत्रकल्पभेदाद्व्यवस्था तद्विधिस्तुहेमाद्रौवह्नि

९८ पुराणे नदीनांसंगमेस्नात्वाऽर्चयेद्वामनं सौवर्णंवस्त्रसंयुक्तंद्वादशांगुलमुच्छ्रितं ततोविधिवत्संपूज्य हिरण्मयेन
पात्रेणादद्यादर्घ्यंप्रयत्नतः नमस्तेपद्मनाभायनमस्तेजलशायिने तुभ्यमर्घ्यंप्रयच्छामिबालवामनरूपिणे नमः
कमलकिंजल्कपीतनिर्मलवाससे देवेश्वरायदेवायदेवसंभूतिकारिणे प्रभवेसर्वदेवानांवामनायनमोनमः ए
वंसंपूजयित्वातंद्वादश्यामुदयेरवेः शृंगारसहितंतत्तुब्राह्मणायनिवेदयेत् वामनःप्रतिगृह्णातिवामनोहंददामिते
वामनंसर्वतोभद्रंद्विजायप्रतिपादयेइति अनंतभट्टोप्याह श्रवणाद्वादश्यांजनार्दननामाविष्णुःपूज्यते श्रवणाद्वा
दश्यांवामनावतारइति श्रवणायुतशुद्धैकादश्यलाभेतुदशमीविद्धापिश्रवणायुताकार्या दशम्येकादशीयत्रसानो
पोष्याभवेत्तिथिः श्रवणेनतुसंयुक्तासाचेत्स्यात्सर्वकामदेतिवन्हिपुराणादित्युक्तंमदनरत्ने पूजाचमध्यान्हेकार्या
अन्हामध्येवामनोरामरामावितिपूर्वोक्तवचनात्भगवताश्च अत्रैवदुग्धव्रतंसंकल्पयेत् तदुक्तंदुग्धमाश्वयुजेमा
सीति अत्रेदंचिंत्यते दुग्धव्रतेपायसादिवर्ज्यंनवेति नेतिकेचित् नहिप्रकृतिवर्ज्जनेविकारवर्जनंयुक्तं दधितक्रादिना

खुरेति भाषायां ४

मांसविकारेऽप्यौष्ट्रदध्नि च प्रकृतिरसानुपलंभान्मांसवर्जनेन
औष्ट्रपयोवर्जने च तत्तद्विकारवर्जनं न स्यात् १
प्रकृत्यननुवृत्तिज्ञाने २

मपि वर्जनापत्तेः न च यत्र प्रकृतिरसोपलंभस्तद्वर्जनमिति वाच्यं मांसविकारस्यौष्ट्रदध्यादेश्च वर्जनापत्तेः तस्माद्दध्या
दिवत्पायसादि भक्ष्यमिति अत्र ब्रूमः यत्र विकारे प्रकृतिरसोपलंभस्तत्प्रत्यभिज्ञा वा तत्र विकारस्यापि निषेधः अ
स्ति च मांसविकारे मांसप्रत्यभिज्ञा मांसत्वानपायात् यत्तु औष्ट्रदध्यादेरनिषेधापत्तिरिति तन्न औष्ट्रमिति विका
रतद्धितेन निषेधात् तथा च विज्ञानेश्वरः औष्ट्रमैकशफं स्त्रैणमारण्यकमथाविकमित्यत्र औष्ट्रमिति विकारत
द्धिताच्छकृन्मूत्रादीनामपि निषेध इत्याह नन्वेवं संधिन्यनिर्दशावत्सागोपयः परिवर्जयेदिति संधिन्यादेः क्षीर
निषेधेऽपि दध्यादिग्रहणं स्यात् सत्यं प्राप्ते वचनेन परं निषेधः तथा च पराशरः क्षीराणि यान्यभक्ष्याणि तद्वि
काराशने बुधः सप्तरात्रं व्रतं कुर्यात्प्रयत्नेन समाहितः इति व्रतं गोमूत्रयावकं तस्मात्पायसे दुग्धरसोपलंभाद्वर्जनं अ
त एवामिक्षायां दधित्वेऽपि माधुर्योपलंभात्पयोरूपत्वमुक्तं मीमांसकैः तदुक्तं पय एव घनीभूतमामिक्षेत्यभिधीय
ते इति दध्यादिषु तदभावादवर्जनमिति इति दुग्धव्रतं भाद्रशुक्लचतुर्दश्यामनंतव्रतं तत्र त्रिमुहूर्तव्याप्योदयकी ग्राह्या

न हि हयपयोनिषेधः किंतूष्ट्रविकारः सर्वोऽपि ३

जीवन्यजमानोनुकूयादुपरिसमिधं धारयति। अत्र यथाविध्यभावेपि वाक्यान्यथानुपपत्त्या विधिः कल्प्यते तथेत्यर्थः २

५८ तिमाधवः तदुक्तं उदये त्रिमुहूर्त्तोपि ग्राह्योनंतव्रते तिथिरिति मध्याह्ने भोज्यवेलायामिति कथायामग्निवरागादुपरिहि दे
वेभ्यो धारयतीति वद्विधिकल्पना पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिरिति माधवीये वचनान्मध्याह्नव्यापिनी
ग्राह्येति तु दिवोदासः मार्तंडेप्येवं निर्णयामृते तु घटिकामात्राप्युदयिकी त्युक्तं तथाभाद्रपदस्यांते चतुर्द
श्यां द्विजोत्तम पौर्णमास्याः समायोगाद्व्रतं चानंतकं चरेदिति भविष्योक्तेः मुहूर्त्तमपि चेद्भाद्रे पूर्णिमायां चतुर्दशी
संपूर्णां तां विदुस्तस्यां पूजयेद्धि ध्रुवमव्ययमिति स्कांदाच्चेति अत्र मूलं चिंत्यं तत्वं तु विध्यर्थवादयोर्भिन्नार्थत्वे एकवा
क्यताऽयोगात्संदिग्धेषु वाक्यशेषादिति न्यायेन पूर्वापरा वा मध्याह्नव्यापिनी मुख्या माधवस्तु सामान्यवाक्यान्नि
र्णयं कुर्वन् भ्रांत एव अनंतव्रतस्य पुराणांतरेष्वभावान्निबंधांतरेष्वभावाच्च वचनं निर्मूलमेवेति इह औदयिकत्वे
पूर्णत्वात्पूर्वेति युक्तं अथागस्त्यार्घः तत्कालो व्रतहेमाद्रौ भविष्ये कन्यायामागते सूर्ये अर्वाग्वै सप्तमे दिने कन्यायां
समनुप्राप्ते यद्वै कालो निवर्तते तेन उदयोत्तरं सप्तदिनमध्ये इत्यर्थः यत्पाद्मे आसप्तरात्रादुदयपाद्यमस्य दातव्यमेत

मात्स्येनु० अंगुष्ठमात्रंपुरुषंतथैवसौवर्णमत्यायतबाहुदंडं। काशमयत्वमगस्त्यो। चतुर्भुजंकुंभमुखेनिधायधान्यान्वितसप्तांकुरसं
युतानि। सकाशपुष्पाक्षतभक्तियुक्तो मंत्रेणदद्यात् ६

सिंह २

तसकलंनरेण यावत्समाःसप्तदशाथवास्युरथोर्द्धमप्येनवदंतिकेचित् यमस्यागस्त्यस्य उदयकालश्च
दिवोदासीयेउक्तः उदेतियाम्यांहरिसंक्रमाद्रवेरकाधिकेविंशतिमेष्यगस्त्यः सप्तसप्तमेस्तंवृषसंक्रमाच्चप्रया
तिगर्गादिभिरभ्यभाणि। अत्रविधिर्विष्णुरहस्ये काशमूर्तिमगस्त्यांकृत्वामूर्तिंतुवारुणः प्रदोषेविन्यसेत्तां
तुपुष्पधूपविलेपनैः दध्यन्नतवलिंदद्याद्रात्रौकुर्यात्प्रजागरं पूजावदप्यमाणार्घ्यमंत्रेणकार्या प्रभातेतंसमा
दायययायात्पुरांपजलाशयं निशावशानेतांपश्यन्नजलांतेप्रतिमांमुनेः अर्घ्यंदद्यादगस्त्यायभक्त्यासम्यगुपोषि
तः द्विजपुंगवायधेनुंबहुक्षीरवतींवदद्यात्सवस्त्रवंशाभरणांद्विजाय भविष्ये विरूढैःसप्तधान्यैश्चवंशपात्रंनिधा
पितैः सौवर्णरूप्यपात्रेणताम्रवंशमयेनवा मूर्द्धिस्थितेननम्रेणजानुभ्यांधरणींगतः काशपुष्पप्रतीकाशवह्नि
मारुतसंभव मित्रावरुणयोःपुत्रकुंभयोनेनमोस्तुते वातापिर्भक्षितोयेनसमुद्रःशोषितःपुरा लोपामुद्रापतिः
श्रीमान्योसौतस्मैनमोस्तुते येनोदितेनपापानिविलयंयांतिव्याधयः तस्मैनमोस्त्वगस्त्यायसशिष्यायसपुत्र

णो अगस्त्यः खनमानेति विप्रोऽर्घ्यं विनिवेदयेत् राजपुत्रि महाभागे ऋषिपत्नि वरानने लोपामुद्रे नमस्तुभ्यम
१०० र्घ्यं मे प्रतिगृह्यतां दत्वैवमर्घ्यकौ ख्यप्रणिपत्य विसर्जयेत् अर्चितः स्वयथाशक्त्या नमोऽगस्त्य महर्षये ऐ
हिकामुष्मिकीं दत्वा कार्यसिद्धिं व्रजस्व मे विसर्जयित्वागस्त्यं तं विप्राय प्रतिपादयेत् अगस्त्यो मे मनःस्थोऽस्तु
अगस्त्योऽस्मिन् घटे स्थितः अगस्त्यो द्विजरूपेण प्रतिगृह्णातु सत्कृतः दानमंत्रः अगस्त्यः समजन्मा वै नाशयि
त्वावयोरलं अतुलं विमलं सौख्यं प्रयच्छ त्वं महामुने प्रतिग्रहमंत्रः विष्णुरहस्ये त्यजेदगस्त्यमुद्दिश्य धान्यमेकं
फलं रसं होमं कृत्वा ततः पश्चाद्वर्जयेन्मानवः फलं होमश्चार्घ्यमंत्रेणाज्येन भविष्ये दत्वार्घ्यं सप्तवर्षाणि कामलो
नेन पांडव ब्राह्मणः स्याच्चतुर्वेदः क्षत्रियः पृथिवीपतिः वैश्यश्च धान्यनिष्पत्तिः शूद्रश्च धनवान्भवेत् यावदायुश्च
यः कुर्यात्स परं ब्रह्म गच्छति इत्यगस्त्यार्घः भाद्रपौर्णमास्यां प्रपितामहात्परांस्त्रीनुद्दिश्य पश्चाद्धं कार्यं तदुक्तं हेमाद्रौ
ब्राह्ममार्कंडेययोः नांदीमुखानां प्रत्यब्दं कन्याराशिगते रवौ पौर्णमास्यां तु कर्तव्यं वराहवचनं यथेति नांदीमुख

वक्तुप्रज्ञत्वात् २

वर्गमातव्युत्रस्यवंशेसंदेहात् १

तेचोक्तंप्राग्वे पितापितामहश्चैवतथैवप्रपितामहः त्रयोह्यश्रुमुखाह्येतेपितरःपरिकीर्तिताः तेभ्यःपूर्वतरायेचप्रजा
वंतःसुखैधिताः तेतुनांदीमुखानांदीसमृद्धिरितिकथ्यते एतच्चप्रत्यब्दमित्युक्तेःपक्षश्राद्धपक्षेसकृन्महालयपक्षे
चैवश्यकमितिप्रयोगपारिजाते अत्रमातामहापिकार्याः पितरोयत्रपूज्यंतेतत्रमातामहाअपिकार्याःइतिधौम्योक्तेः
पितृशब्दस्यवजनकपरत्वेवहुवचनविरोधेन पितृभावापन्नपरत्वात् वार्षिकेतुवचनान्निवृत्तिः नचजीवत्पितृ मातामहादीनाम् ४
कस्यान्वष्टकायांमातृश्राद्धेतदापत्तिः इष्टापत्तेः अतएवसर्वत्रश्राद्धेषुस्वमातृमातामहयोर्दद्यादितिमदनरत्नका
नं.६ लादर्शौ एतज्जीवत्पितृकश्राद्धेवक्ष्यामः केचित्तुअजहल्लक्षणयापित्रादयोयत्रतत्रमातामहास्तेनात्रनेत्याहुः नचा
नांदीति २ त्रनाम्नानांदीश्राद्धातिदेशः वैश्वदेववद्धिसंबद्धदेवतापेक्ष्यकर्मनामत्वाभावात् नापिनांदीमुखत्वेपितृविशेषणत्वं पा मातृपदसत्वात् ४
रिभाषिकत्वादितिदिक् तथानिर्णयदीपेगार्ग्यः पौर्णमासीषुसर्वासुनिषिद्धंपिंडपातनं वर्जयित्वाप्रोष्ठपदींयथा
दर्शस्तथैवसेति इतिकमलाकरभट्टकृतेनिर्णयसिंधौभाद्रपदमासः कन्यासंक्रमेपराःषोडशघटिकाःपुण्याःशेषंप्रा

तथाचापिंडकंसंख्यादिनावस्यात् ३

वैश्वदेवश्राद्धशब्दोयथादेवतासंबंधात्प्रवृत्तिमात्रनकर्मपरस्तथा ३

माय२

गवत् अथमहालयः तत्रपृथ्वीचंद्रोदयेवृद्धमनुः आषाढीमवधिंकृत्वापंचमंपक्षमाश्रिताः कांक्षंतिपितरःक्लिष्टाअन्न

१०१ मप्यन्वहंजलं कन्यायोगेपुराणेतमत्वमाहसार्द्धोनिः कन्यास्थार्कोन्वतःपक्षःसोत्यंतंपुराणउच्यतेइति अत्रविशेष

माहवृद्धमनुः मध्येवायदिवाप्यंतेयत्रकन्यांव्रजेद्रविः सपक्षःसकलःश्रेष्ठःश्राद्धषोडशकंप्रति तथाब्रह्मांडमार्कंडेय

योः कन्यागतेसवितरिदिनानिदशपंचच पार्वणेनेहविधिनाश्राद्धंतत्रविधीयते तथातत्रैवषोडशदिनान्युक्तानि

कन्यागतेसवितरियान्यहानितुषोडश क्रतुभिस्तानितुल्यानिदेवोनारायणोब्रवीत् अत्रहेमाद्रिःषोडशत्वंत्रेधा

व्याचख्यौ तिथिवृद्ध्यापक्षस्यषोडशदिनत्वेश्राद्धावृत्त्यर्थमित्येकःपक्षः भाद्रपूर्णिमायासहेतिद्वितीयःपक्षः

आश्विनशुक्लप्रतिपदासहेतितृतीयः अंत्यएवयुक्तः अहःषोडशकंयत्तुशुक्लप्रतिपदासह चंद्रक्षयाविशेषेण

सापिदर्शात्मिकास्मृतेतिदेवलोक्तेः अत्रपंचपक्षाः तदुक्तंहेमाद्रौब्राह्मे अश्वयुक्कृष्णपक्षेतुश्राद्धंकार्यंदिनेदिने दिनेदिनइतिसर्वपि सेव्यन्वैति२

त्रिभागहीनंपक्षंवात्रिभागंत्वर्द्धमेववा दिनेदिनेइतिपक्षपर्यंतत्वमुक्तं त्रिभागहीनमितिपंचम्यादिपक्षः भोजगी

यातिथिर्वृद्धाभवतितन्निमित्तश्राद्धाविभ्रमंचपि

पंचमपक्षावक्ष्यतेएकस्मिन्नपिवासरेइति १

लघुकालत्वाभावात् ५

तन्मते गोतमादिविरोधात् ५ निकल्पनरुः अत्रदिनपदं तिथिपरम् । वीप्सया न त्वक्षीयतिथित्वं श्राद्धव्याप्यतावच्छेदकम् २

श्राद्धेन याव्याप्यता तस्या अवच्छेदकं नि

मित्तं त्रिभागद्वय

तिथिमारभ्य यावच्चन्द्रार्कसंगममिति वाक्यात् अर्द्धमित्यष्टम्यादिपक्षः त्रिभागमिति दशम्यादिः त्रिभागहीनमिति

महालयांतरेति च २ चतुर्दशीसहितप्रतिपदादिचतुष्टयवर्जनाभिप्रायेणैतेन पंचदशतिथिव्यापि श्राद्धं सिध्यति तेन चतुर्दशीनिषेधोन्य

कृष्णपक्षपरस्तु गौडाः तन्न श्राद्धं सशस्त्रहतस्यैव चतुर्दश्यां महालय इत्यादिविरोधात् यत्तु कश्चित् पूरणप्रत्ययलोपेन

तृतीयभागहीनं षष्ठ्यादि पक्षं ततो भागमेकादश्यादि तदर्द्धं त्रयोदश्यादि उत्तरोत्तरलघुकालोक्तेरिति तन्न गोतमा भौजंगमिति ४

दिवसेन मूलकल्पनालाघवात् पक्षमित्यनन्वयापत्तेश्च पंचमूर्ध्वं तु ऊर्ध्वं दशम्यूर्ध्वं ततोप्यतीतीति विष्णुधर्मोक्तेः

षष्ठ्याद्येकादश्यादिपक्षावपि ज्ञेयाविति तत्त्वं कालादर्शेपि पक्षाद्यादिचदर्शान्तिं पंचम्यादिदिशादिच अष्टम्यादि

यथाशक्ति कुर्यादापरपक्षकं पक्षादिः प्रतिपत् दिग्दशम्यो दर्शान्तमिति सर्वत्र अथापरपक्षे श्राद्धं पितृभ्यो दद्यात्

पंचम्यादि दर्शान्त षष्ठ्यादि दशम्यादि सर्वेस्मिंश्चेति तथैकस्मिन्नपि दिने श्राद्धमुक्तं हेमाद्रौ नागरखंडे ब्रह्मणाः

पंचमे पक्षे कन्यासंस्थे दिवाकरे यो वै श्राद्धं नरः कुर्यादेकस्मिन्नपि वासरे तस्य संवत्सरं यावत् संतृप्ताः पितरो

मतभेदात् ४ पंचमं पक्षमाह २

त्रयोदश्यादिपक्षस्यैवाऽयोगोव्यवच्छिद्यतेऽन्येषांतुयोगोऽयोगोवास्तु २

अश्वयुजि २ शुक्लाशक्तः १

ध्रुवमिति अत्र आकाशक्तपराव्यवस्थेतिप्रांचः तन्न तद्वाचकपदाभावात् त्रयोदश्यादिपक्ष एवनित्यः तत्रैवनिंदाश्रु यदकरणेनिंदातन्नित्यं निंदाचन श्रूयते १
१०२ तेः आसेत्एवकारेणतस्यैवपंचम्यपक्षायोगव्यवछेदोक्तेरितिगौडाः तन्न एकस्मिन्नपीतिविरोधात् तेनफलभूमा
र्थिनान्यानिकार्याणीतितत्वं तत्रचतुर्दशीश्राद्धाभावेपंचम्यादिदशम्यादिपक्षौ तत्सत्वेपक्षादेकादश्यादिकौ
एवंचतुर्दश्यभावेद्वादश्यादिः तत्सत्वेत्रयोदश्यादीतिव्यवस्था विधवायास्तुविशेषःस्मृतिसंग्रहे चत्वारःपार्वणाः
प्रोक्ताविधवायाःसदैवहि स्वभर्तृश्वशुरादीनांमातापित्रोस्तथैवच ततोमातामहानांचश्राद्धदानमुपक्रमेत् तथा
श्वश्रूणांतुविशेषेणमातामह्यास्तथैवच अप्रक्तोनुस्मृतिवाल्यां स्वभर्तृप्रभृतित्रिभ्यःस्वपितृभ्यस्तथैवच विधवा
कारयेच्छ्राद्धंयथाकालमतंद्रिता विधवास्वयंसंकल्पकृत्वान्याद्ब्राह्मणाद्वाराकारयेदित्युक्तंप्रयोगपारिजाते सकृ
न्महालयेवर्ज्यतिथ्याद्युक्तंप्रयोगपारिजातादिषु वशिष्ठः नंदायांभार्गवदिने चतुर्दश्यांत्रिजन्मसु एषुश्रा
द्धंनकुर्वीतगृहीपुत्रधनक्षयात् जन्मभंतत्पूर्वोत्तरेचत्रिजन्मानि वृद्धगार्ग्यः प्राजापत्येचपौष्णेचपित्र्यर्क्षेभार्गवेत

तथाचषट्फलिता:४ रत्ना४

~~स्वभर्तृश्वशुरादीनांमातापित्रोस्तथैवच ततोमातामहानांचश्राद्धदानमुपक्रमेत् तथा श्वश्रूणांतुविशेषेणमातामह्यास्तथैवच~~

जनःत्रिममाणेमासिकादो ४

ध्या यस्तुश्राद्धंप्रकुर्वीततस्यपुत्रोविनश्यति प्राजापत्यंरोहिणी पौष्णंरेवती पित्र्यंमघा अन्यान्यपिप्रत्यरादीनितथैव ति प १

ज्ञेयानि केचित्तु नंदाश्वकामरव्यारभगवग्निपितृकालभे गंडेवैधृतिपातेच पिंडास्त्याज्याःसुतेप्सुभिरिति संग्रहात

नंदाःप्रतिपत्षष्ठ्येकादश्यः अश्वःसप्तमी कामस्त्रयोदशी आरोभौमः भृगुःशुक्रः अग्निभंकृत्तिका कालभंभरणी

अत्रपिंडात्याज्यइत्याहुः तन्नमूलंमृग्यं एतच्चसकृन्महालयविषयं सकृन्महालयेकाम्येपुनःश्राद्धेरविलेऽपिच अतीतविषयेचैवसर्वमेतद्विचिंतयेदितिपृथ्वीचंद्रेनारदोक्तेश्च सर्वेष्वतीतनिमित्ते ४

अस्यापवादोहेमाद्रौपृथ्वीचंद्रोदयेच अमापेतभरण्यां

वद्वादश्यांपक्षमध्येकेतथातिथिंचनक्षत्रंवारंचनविचारयेत् पराशरमाधवीयमदनपारिजातादिष्वेवं निर्णयदीपिका

यांतुपितृमृताहेनिषिद्धदिनेपिसकृन्महालयःकार्यइत्युक्तं आषाढ्याःपंचमपक्षेकन्यासंस्थेदिवाकरे मृताहनिपितुर्यो

वैश्राद्धंदास्यतिमानवः तस्यसंवत्सरंयावत्तृप्ताःपितरोध्रुवमितिनागरखंडोक्तेः यातिथिर्यस्यमासस्यमृताहेतुप्रवर्त

ते सातिथिःपितृपक्षेषुपूजनीयाप्रयत्नतः तिथिच्छेदोनकर्तव्योविनाशौचंयदृच्छया पिंडश्राद्धंचकर्तव्यंविच्छित्तेनवका

मार्गादौसांगश्राद्धाभावेपिंडमात्रेदेयमितिपिंडरूपेश्राद्धे ६

तथा च पक्षे प्रत्यहं क्रियमाणमपि न भिन्नं किंतु पक्षश्राद्धमित्येकमेव। तत्र च प्रतिपदि महालये श्राद्धं करिष्य इति संकल्प्य प्रत्यहं संकल्पं विनैव कुर्यात्। ब्राह्मणाश्च ये प्रथमदिने भोजितास्त एव प्रत्यहं भोजनीयाः दक्षिणा च पक्षान्ते इति ४

रयेत अशक्तः पक्षमध्ये तु करोत्येकदिनं यदा निषिद्धेपि दिने कुर्यात्पिंडदानं यथाविधीति कात्यायनोक्तेश्च अत्र मू
१०३ लं चिंत्यं तथा पक्षश्राद्धकरणेपि न नंदादिषु पिंडनिषेध इत्याह पराशरमाधवीये कार्ष्णाजिनिः नभस्यस्यापरे पक्षे
श्राद्धं कार्यं दिने दिने नैव नंदादि वर्ज्यं स्यान्नैव निंद्या चतुर्दशीमिति अत्र श्राद्धमित्येकवचनाद्दिने दिने इति वीप्सा
वशाच्च सोमयागवदेकस्याभ्यासेनैकप्रयोगपरमिदं अतः प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीमिति याज्ञव
ल्कीयं पंचम्यादिपक्षविषयं पृथ्वीचंद्रोदये मदनपारिजाते चैवं अतो नंदादौ सपिंडकश्राद्धे पुत्रवतोप्यधिकारः
अत्रिरपि महालये गयाश्राद्धे च दर्शे पुत्रस्य जन्मनि तीर्थेपि निर्वपेत्पिंडान् रविवारादिकेष्वपि पूर्वोक्तनंदादिनिषेध
स्तु मृताहातिक्रमे पौर्णमास्यादिमृतश्राद्धे च ज्ञेयः यत्तु स्मृत्यर्थसारे विवाहव्रतचूडासु वर्षमर्धं तदर्धकं पिंडदा अत्र त्रितयेन क्रमः ३
नं मृदा स्नानं न कुर्यात्तिलतर्पणमिति तस्यापवादो दिवोदासीये बृहस्पतिः तीर्थे संवत्सरे प्रेतपितृयोगे महालये दो २
पिंडदानं प्रकुर्वीत युगादिभरणीमघे महालये गयाश्राद्धे मातापित्रोः क्षयेहनि कृतोद्वाहोपि कुर्वीत पिंडनिर्वपणं

क्रमात् ३ साग्निकस्य पिंडपितृयागे २

सूर्ये ५
निषेधायवादस्यामायातइत्यादिवचनस्यसत्वात् ३ यानिश्राद्धानिषोडशेतिवक्तव्यात्प्रत्यहंक्रियमाणानिभिन्नानीतिपक्षे १ महालये ४

सदेति निर्णयदीपेतुनंदादिनिषेधःप्रत्यहंभिन्नश्राद्धविषयः षोडशाहव्यापिश्राद्धप्रयोगैकत्वेतुप्रत्यहंपिंडदानंकार्यमेवेत्युक्तं तदयमर्थःसंपन्नः षोडशाहव्यापिश्राद्धैकेनपिंडनिषेधः मृताहेसकृन्महालयेपिनथा प्रत्यहंश्राद्धभेदेपिव्यतीपातादौतथा अन्यत्रमृताहातिक्रमेचपिंडनिषेधइति सन्यासिनांतुद्वादश्यांश्राद्धंकार्यं यतीनांचवनस्थानांवैष्णवानांविशेषतः द्वादश्यांविहितंश्राद्धंकृष्णपक्षेविशेषतइति पृथ्वीचंद्रोदयेसंग्रहोक्तेः अत्रपक्षश्राद्धाकरणेगौणकालमाह हेमाद्रौयमः हंसेकन्यासुवर्षासुसाकेनापिरहेवसन् पंचम्यांरंतरेदद्यादुभयोरपिपक्षयोः आश्विनकृष्णशुक्लपंचम्योर्मध्यइत्यर्थः तत्रापिसंभवेभविष्ये यपंदीपान्वितारात्रिःख्यातापंचदशीभुवि तस्यांदद्यान्नचेद्दत्तंपितॄणांवैमहालये तत्राप्यसंभवेभारते यावच्चकन्यातुलयोःक्रमादास्तेदिवाकरः शून्यंप्रेतपुरंतावद्वृश्चिकंयावदागतः आगते वृश्चिकेसमतिक्रांतेपितरोदैवतैःसह निःश्वस्यप्रतिगच्छंतिशापंदत्वासुदारुणं यत्तुजातूकर्ण्यः अर्कांछंतिस्मपितरःपंचमंपक्षमाश्रिताः तस्मात्तत्रैवदातव्यंदत्तमन्यत्रनिःफलमिति

तातां वात्मतां भगिनी सा चापि धवयुक् अत्रैव वचनं बहुधम् ४

मातजननीस्वानां भ्रातरस्तेषां भ्रातृणां स्त्रियश्च ४

तातां वयोस्त्रितयं ३

सखीतनयाद्यश्च ४

एकं महालयनिमित्तमेकं कन्यामहालययोगनिमित्तम् १

२०८ तत्फलातिशयहानिपरं कन्यागच्छतुवानवेति वा पाठः तेन कन्यायोगप्राशस्त्यमात्रमतः श्राद्धविवेकोक्तं श्रा=

द्धद्वयेहेयं इदं च श्राद्धमन्नेनैव कार्यं नामान्नादिना मृताहं च सपिंडं च गयाश्राद्धं महालयं आपन्नोपि न कुर्वी

तश्राद्धमामेन कर्हिचित् इति स्मृतिदर्पणे गालवोक्तेः अथात्र देवताः संग्रहे तातांबात्रितयं सपत्नजननी मा

तामहादित्रयं सखिस्त्रीतनयादि तातजननी स्वभ्रातरस्तत्स्त्रियः तातांबात्मभगिन्यपत्य धवयुग्जायापि

ता सद्गुरुः शिष्याप्ताः पितरो महालयविधौ तीर्थे तथा तर्पणे अस्यार्थः तातत्रयी पितृत्रयी अंबात्रयी च

मृतपर्यायोरपि माहालये मातृश्राद्धं पृथक् प्रशस्तमिति अत्र विशेषः स्मृतिदर्पणे गालवः अनेका मातरो

यस्य श्राद्धं वा परपाक्षिके अर्घ्यदानं पृथक् कुर्यात् पिंडमेकं तु निर्वपेत् जीवन्मातृकस्य सापत्नमातुरेकोद्दिष्टं

कुर्यान्न पार्वणं श्राद्धदीपकलिकायां तु पार्वणमुक्तं अन्वष्टकं च यन्मातुर्गयाश्राद्धं महालयं पितृपत्नीष्व

च श्राद्धं कार्यं पार्वणं विद्वद्भवत इति वहन्मनूक्तेः सखीति मातामहानां सपत्नीकत्वे पि विभवसति मातामह

मातामहश्च मातामहद्वय मातामहास्तत्स्त्रियश्च ३

श्वशुरः ४

त्रयः पित्रादयः। मातामहादयः। मात्रादयो मातामह्यादयश्चेति १ १ नवदैवत्यपक्षे मातामहा

न्नेयं हि दशदैवत्यं तीर्थश्राद्धमखासु चेति निगमोक्तेः। हेमाद्रिमते तु नवदैवत्यमेव। महालयगयाश्राद्धे वृद्धौ चान्वष्टकासु च १

जीवंतीषु ३ मृतस्य ३

हीनां पृथक्कार्यं महालयगयाश्राद्धे वृद्धौ चान्वष्टकासु च नवदैवत्यमत्रेष्टं शेषं षाट्पौरुषं विदुरिति विष्णुधर्मोक्तेः
तातभ्राता पितृव्यः जनीभ्राता मातुलः तत्स्त्रियः पितृव्यस्त्री मातुलानी भ्रातृजाया पितृष्वसृमातृष्वसृभगिन्यो
पत्यभर्तृयुताः तेन सापत्याये सधवायै इति प्रयोगो ज्ञेयः एतासु सतीषु नतदुक्तौ दर्दीनं द्वारलोपात् जायापि
तास्वशुरः श्वश्रूरप्यत्रोपलक्ष्या अत्रमूलं स्मृतिचंद्रिकायां ज्ञेयं अत्र पार्वणैकोद्दिष्टव्यवस्था त्वाह हेमाद्रिः पुराणां
तरे उपाध्यायगुरुश्वश्रूपितृव्याचार्यमातुलाः श्वशुरभ्रातृतत्पुत्रपुत्रर्त्विक्‌शिष्यपोषकाः भगिनी स्वा
मिदुहितृ जामातृ भगिनीसुताः पितरौ पितृपत्नीनां पितुर्मातुश्च या स्वसा सखिवद्व्यदशिखाघात्तीर्थे चैव महाल
ये एकोद्दिष्टविधानेन पूजनीयाः प्रयत्नतः इति इतरेषामपि त्रादीनां पार्वणमर्थसिद्धं अत्र कर्मान्यत्वप्याचाराद्व्य
वस्था अशक्तौ तु पृथ्वीचंद्रोदये चतुर्विंशतिमते एकस्मिन्ब्राह्मणे सर्वानाचार्यादीन्प्रपूजयेत् दर्शाद्यादर्वापिंडानदद्या
दकरणं न तु एकोद्दिष्टस्वरूपं चाह याज्ञवल्क्यः एकोद्दिष्टं दैवहीनमेकार्घैकपवित्रकं आवाहनाग्नौकरणरहि

नतु त्रीणि स्थानांतरे उत्क्रमादितरक्रमस्तत्रेपि ३
अर्घपात्रे १ पार्वणत्रयं सर्वेद्विशेनैकः। पार्वणचतुष्टयम् २

पितामहीनां चाष्टकासु मातामह्यादयश्च मातामहीनां पृथक्पाणी ...

चत्वारि प्राग्गुक्तानि २
पार्वणेन सहैकोद्दिष्टे तु ३ पिंडास्तत्र(?) वर्हिः १ महालये ३
पित्र्यश्राद्धेन वैश्वदेवामपि सिद्धं एकदीयेद्दि प्रयोजनवत् १

तंत्रापसव्यवत् अत्रैकः पाको वैश्वदेवं तंत्रं पिंडवर्हिश्चैकमिति स्मृत्यर्थसारोक्तं अत्र पाणिहोमः पिंडश्चात्रद्विजां
तिक इत्याह प्रयोगपारिजाते आचार्यः काम्यमभ्युदयेष्टम्यामेकोद्दिष्टमथाष्टमं चतुर्ष्वेषु करे होमः पिंडश्चात्र वि
जातिकमिति पार्वणैकोद्दिष्टयोः समानतंत्रत्वे तु अग्निसमीपएव अत्र धूरिलोचनौ विश्वदेवौ अपि कन्यागते
सूर्ये काम्ये च धूरिलोचनाविति हेमाद्रावादित्यपुराणात् अत्र प्रतिदिनं भिन्नप्रयोगत्वाद्दक्षिणाभेदो वा प्रयोगे वा
दंते एव वा दक्षिणेति हेमाद्रावुक्तं एतच्च संन्यस्तपितृकादिना जीवत्पितृकेणापि कार्यं वृद्धौ तीर्थे च संन्यस्ते ताते
च पतिते सति येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुत इति कात्यायनोक्तेः यत्तु कौंडिन्यः दर्शश्राद्धं गयाश्राद्धं श्राद्धं
चापरपक्षिकं नजीवत्पितृकः कुर्यात्तिलैस्तर्पणमेव चेति तत्संन्यस्तपित्राद्यतिरिक्तविषयं काम्यश्राद्धपरं वा अ
त्र वक्तव्यं श्रीपितृकृत्(?)जीवत्पितृकनिर्णयेज्ञेयं एतच्च जीवत्पितृकेणापिंडरहितं कार्यं मुंडनं पिंडदानं च प्रेत
कर्म च सर्वशः नजीवत्पितृकः कुर्याद्गुर्विणीपतिरेव चेति दक्षिणोक्तेस्तस्य पिंडनिषेधात् अन्वष्टक्यमात्रत्वार्षिकादौ तु

पितृविसर्गकालेयदनुव्रजनंतत्कृत्वेतिश्राद्धांतइत्यर्थः ४

वचनंभिवतीविद्यमानैः तथाघ्राणंलेपः पिंडोपत्रनिर्वर्तितमवादिभिकर्थंचन संकल्पंतुतदाकार्यंनियमाद्ब्र
ह्मवादिभिः सांकल्पस्वरूपंचवदन्मते अत्रश्राद्धागतपितॄणांपक्षश्राद्धेप्रतिदिनंश्राद्धोत्तरंसकृन्महालयेतुपरेह्नि
कार्यं तदुक्तंनारदीये पक्षश्राद्धंयदाकुर्यात्तर्पणंतुदिनेदिने सकृन्महालयेचैवपरेहनितिलोदकं गार्ग्योपि
पक्षश्राद्धहिरण्यैच अन्वनुव्रज्यातिलोदकमिति तथाप्रयोगपारिजातेगर्गः कृष्णेभाद्रपदेमासिश्राद्धंप्रतिदिनं
भवेत् पितृणांप्रत्यहंकार्यंनिषिद्धोहिपितृतर्पणं सकृन्महालयेश्वःस्यादष्टकास्वंतएवहि इदंनिषिद्धदिनेपि तर्प्पणम् ५
कार्यं तिथितीर्थविशेषेषुकार्यंप्रेतेचसर्वदेतिस्मृत्यर्थसारोक्तेः तीर्थेतिथिविशेषेचगयायांप्रेतपक्षके निषिद्धे
पिदिनेकुर्यात्तर्पणंतिलमिश्रितमितिस्मृतिरत्नावल्यांवचनाच्च एतच्चश्राद्धंमलमासेनकार्यं वृद्धिश्राद्धंतथा
सोमसग्न्याधानंमहालयं राजाभिषेकंकाम्यंचनकुर्याद्भानुलंघितइति हेमाद्रौनागरखंडेपि नभोवाथनभ
स्योवामलमासोयदाभवेत् सप्तमःपितृपक्षःस्यादन्यत्रैवतुपंचमः एतच्चपित्रोर्मरणोप्रथमाब्देकृताकृतमि वैकल्पिकम् १

पं४ भद्दे १

फलश्रुतेः काम्यं प्रायश्चित्तश्रुतेर्नित्यम् १

प्रत्यहं दशमासपर्यन्तं जपेदष्टोत्तरशतम् ३

तिथिस्थलीसेतो महाः इदं च नित्यं काम्यं पुत्रानायुस्तथारोग्यमैश्वर्यमतुलं तथा प्राप्नोति पंचमे दत्वा श्राद्धं का

१०६ मांश्च पुष्कलानि तिजाबाल्युक्तेः वृश्चिके समतिक्रांते पितरो दैवतैः सह निःश्वस्य प्रतिगच्छंति शापं दत्वा सुदारुण

मिति कार्ष्णाजिनिवचनाच्च तदतिक्रमे प्रायश्चित्तमुक्तमग्निविधाने दुरोश्वस्य मंत्रं च दश मासं द्विमासयोः

महालयं यदा नूनं तदा संपूर्णमिति तन्न दिति द्विमासयोः कन्यातुलयोर्महालयश्राद्धं यदा हीनमित्यर्थः अत्र भ

रण्यां श्राद्धमतिप्रशस्तं तदुक्तं पृथ्वीचंद्रोदये मात्स्ये भरणी पितृपक्षे तु महती परिकीर्तिता अस्यां श्राद्धं कृतं ये

नस गयाश्राद्धकृद्भवेत् पृथ्वीचंद्रे श्रीधरीये बृहस्पतिः नभस्यापरपक्षस्य द्वितीयाद्यदि याम्यभे त्वग्नेयांश्चि नक्ष भरण्यां ४ कृत्तिकाभिः ४

त्राभिः सहिता प्रीतिदा पितुः एतत्पक्षे षष्ठी योगविशेषेण कपिलासंज्ञा तदुक्तं वाराहे नभस्य कृष्णपक्षे तु रो

हिणीपातभूसुतैः युक्ताषष्ठी पुराणज्ञैः कपिला परिकीर्तिता व्रतोपवासनियमैर्भास्करं तत्र पूजयेत् कपिलां

च द्विजाग्र्याय दत्वाक्रतुफलं लभेत् पुराणसमुच्चये भाद्रमासि सितपक्षे भानौ चैव करे स्थिते पातकुजेच रोहिण्यां

महालये ३

करस्य सूर्य्यः पातः कुतरोहिरगीत्येवाम् २ कपिलषष्ठ्यां २ भानौचैववरोहिन्यांतइति १

साषष्ठीकपिलाभवेत् मन्वदर्शीतत्वेनमहालये भाद्रकृष्णपक्षेज्ञेय इत्युक्तं निर्णयामृते हेमाद्रौच हेमाद्रिस्तु
फलातिशयार्थिः संयोगेनुवंतुगौरवे निर्दिष्टापरमे छिन्नेति तत्रैवाके: अत्रविशेषो हेमाद्रौस्कांदे देवदारुतथोशीरं
कुंकुमैलामनःशिलाः पत्रकं पद्मकं षष्ठी मधुगव्येनपेषयेत् क्षीरशालोध्रकल्केन स्नानंकुर्यादिमंमंत्रकं आपस्त्व
मसि देवेशज्योतिषांपतिरेवचपापंनाशयमेदेववाङ्मनःकायकर्मजं पंचगव्यकृतस्नानःपंचभंगैस्तुमार्जयेत्
पंचभंगैःपंचपल्लवैः तथा रत्नैर्नानाविधैर्युक्तं सौवर्णीकारयेद्रविं शक्तितस्तुफलादूर्ध्वं तदर्द्धंकर्षतोपिवा सौ
वर्णमहरांकुर्यान्नौकांचैवतथारथं तथा अल्पवित्तोपियःकश्चित्सोपिकुर्यादिमंविधिं प्रभासखंडे स्थापयेद्व्रणं
कुंभंचंदनोदकपूरितं रक्तवस्त्रयुगच्छन्नंताम्रपात्रेणसंयुतं रथोरौक्मपलस्यैवएकचक्रःप्रचित्रितः सौवर्णपलसं
युक्तांमूर्त्तिंसूर्यस्यकारयेत् ततःसूर्यंकपिलांचषोडशोपचारैःसंपूज्यदद्यात् दिव्यमूर्त्तिर्जगच्चक्षुर्द्वादशात्मादिवाकरः
कपिलासहितोदेवाममुक्तिंप्रयच्छतु यस्मात्वंकपिलेपुण्यासर्वलोकस्यपावनी प्रदत्तासहसूर्येणममुक्तिप्रदाभवति

भाद्रपूर्णिमायाः अग्रिमपक्षे ४ माध्यावर्षसंज्ञं ४

विशेषांतरं तत्रैव ज्ञेयमिति दिक् इयमेव चंद्रषष्ठी सा चंद्रोदयव्यापिनी ग्राह्या उभयत्र तद्व्याप्तौ पूर्वा तदुक्तं म
१०७ विष्ये तद्वद्भाद्रपदे मासि षष्ठ्यां पक्षे सितेतरे चंद्रषष्ठीव्रतं कुर्यात्पूर्वविधः प्रशस्यते चंद्रोदये पराषष्ठी पूर्वान्हे
वापरेहनि चंद्रषष्ठ्यसितपक्षे शैवापौष्या प्रयत्नत इति अष्टम्यामाश्वलायनेन माध्यावर्षसंज्ञं श्राद्धमुक्तं ए
तेन माध्यावर्षे प्रौष्ठपद्या अपरपक्षे इति इदं सप्तम्यादिषु त्रिष्वहःसु कार्यमिति नारायणवृत्तिः हरदत्तस्तु म
माध्यावर्षसंज्ञे ५ घापुक्तवर्षासंभवं त्रयोदशीश्राद्धमिति व्याचख्यौ षष्ठीचंद्रोदये ग्राह्ये अष्टकाख्याः पंचमे पक्षे गयामध्या गयामध्यतुल्या ५
ष्टमी स्मृता त्रयोदशी गजच्छाया गयातुल्या तु पैतृके आश्विनकृष्णाष्टम्यां महालक्ष्मीव्रतं तत्र निर्णय
मते पुराणसमुच्चये श्रियोर्चनं भाद्रपदे सिताष्टमीं प्रारभ्य कन्यामगते च सूर्ये समापयेत्तत्र तिथौ च यावत्सू
र्यस्तु पूर्वार्द्धगतोऽपि वत्या इति तत्रैव कन्यागते प्रारभ्य कर्तव्यं न श्रियोर्चनं हस्तप्रांतदलस्थे केतद्व्रतं न समा
पयेत् पूजनीयाग्रहस्थानामष्टमी प्राग्विषि श्रियः दोषैः चतुर्भिः संत्यक्ता सर्वसंपत्करी तिथिः तथा पुत्रसौभा

कन्यायाः २ पूर्वान्वयि ३

अत्रत्नामहोरात्राणांतिथित्रयस्यस्पर्शो भवतितत्त्रिद्युस्पृक्त्रिदिनस्पृक् ४

गपराज्यायुर्नाशिनीसाप्रकीर्त्तिता तस्मात्सर्वप्रयत्नेनत्याज्याकन्यागतेरवौ विशेषेणापरित्याज्यानवमीदूषिता
यदीति दोषचतुष्टयंतत्रैवोक्तं त्रिदिनेवावमंचैवनाष्टमींनोपवासयेत् पुत्रहानवमीविद्धा स्वर्णालेहलाद्युगेरवा
विति त्रिदिनावमलक्षणंचरत्नमालायां यत्रैकास्पृशतितिथित्रयावसानेवास्थेदवमंदिनंतदुक्तमार्यैः य
त्स्पर्शोभवतितिथित्रयस्यवानृता विद्युस्पृक्कथितमिदंद्वयंवनेष्टं एतच्चसर्वंनिषेधाःप्रथमारंभविषयाः मध्येतु
तुलतिसंभवेज्ञेयाः व्रतस्यषोडशाब्दसाध्यत्वेनमध्येत्यागायोगात् इयंचंद्रोदयव्यापिनीग्राह्या तत्रैवपूजाद्युक्तेः
परदिनेचंद्रोदयादूर्ध्वंत्रिमुहूर्तव्यापित्वेपरैवग्राह्या अन्यथापूर्वैव पूर्वावापराविद्धावाग्राह्याचंद्रोदयेसदा त्रिमुहू
र्तापिसापूज्यापरतश्चोर्ध्वगामिनीतिमदनरत्नेनिर्णयामृतेचसम्महोक्तेः अर्द्धएवमतिक्रम्यवर्ततेयातुराणितिथिः
तदातस्यांतिथौकार्यंमहालक्ष्मीव्रतंसदेतिवचनाच्चेतिसंक्षेपः इतिमहालक्ष्मीव्रतनिर्णयः अथनवम्यामन्वष्टकाश्रा
द्धं तत्रकात्यायनः अन्वष्टकासुनवभिःपिंडैःश्राद्धमुदाहृतं पित्रादिमातृमध्यंचततोमातामहांतिकं पत्नीचं

कदाचित्काइत्यर्थः। ननुनियतामूर्तिष्टे याः। कदाचित्कत्वेन तत्संभवेपिव्रतंकार्य मेवेत्यर्थः ४

श्राद्धे ब्रह्माण्डे पितॄणां प्रथमं दद्यान्मातॄणां तदनन्तरं ततो मातामहानां च अन्वष्टक्ये क्रमः स्मृतः श्राद्धहेमाद्रौ छा
१०८ गलेयः केवलां तु तृतीये कार्या वृद्धावादौ प्रकीर्तिताः अन्वष्टकासु मध्यस्थानां तयाः कार्या सु मातृः दीपिका
यां तु मातृश्राद्धमादौ कार्यमित्युक्तं मातृयजनं त्वष्टकास्वादित इति हेमाद्रौ शालेपि अन्वष्टकासु नतो मातृ म३
पूर्वं तदिष्यत इति अत्र शाखाभेदेन व्यवस्थेति पृथ्वीचन्द्रोदयादयः जीवत्पितृकविषयमपि निर्णयदीपः इदं जी
नि वे पितृकेपि कार्यं तदुक्तं निर्णयामृते मैत्रायणीयपरिशिष्टे आन्वष्टक्यं गयाप्राप्तौ सत्यां पूर्व मृतेहनि
मातुः श्राद्धं सुतः कुर्यात्पितर्यपि च जीवतीति यद्यपि जीवत्पितृकस्य पञ्चाप्यन्वष्टका अवश्यकर्तव्यास्तथाप्य
शक्तस्य पूर्भावशिपको प्रोष्ठपद्यष्टका भूयः पितृलोके भविष्यसीति हेमाद्रौ पाद्मोक्तेः सर्वासामेव मातॄणां श्रा
द्धं कन्यागते रवौ नवम्यां हि प्रदातव्यं ब्रह्मलब्धवरा यत इति सुमन्तुना वस्यकत्वतोत्र अत्र सर्वासामित्युक्तेः स्वमातरि जी
वन्त्यामपि सपत्नमातृभ्यो दद्यात् तन्मरणोसति तस्यै ताभ्यश्च दद्यादित्युक्तं जीवत्पितृकनिर्णये गुरुभिः अत्र

मे मध्यामृ २ किंतुभर्त्तरिजीवत्येकार्य्यम् ३

सर्वासांनाम्नानिर्द्देनैकोब्राह्मणोबर्हिःपिंडश्च नामैकेतुद्धिवचनादिप्रयोगइत्युक्तंनारायणवृत्तौ अन्वष्टकाश्राद्धं

साग्निकस्यान्वष्टका निमित्तोयागश्च २ तथागश्चगश्चगोभिलीयानां मध्यमायामेवनसर्वासु आन्वष्टक्यंमध्यमायामितिगोभिलगौतमाविति

छंदोगपरिशिष्टात् अत्रभर्तृमरणोत्तरंपूर्वमृतमातृश्राद्धंनकार्यमितिकेचिदाहुः पठंतिच श्राद्धंनवम्यांकुर्या

भर्त्तरि ४ तुमृतैरिलुप्यतइति तदेतन्निर्मूलत्वान्मूर्खप्रतारणमात्रं श्राद्धदीपकलिकायांब्राह्मे पितृमातृकुलोत्पन्नायाः

काश्चिकाश्चित्तुमृतास्त्रियः श्राद्धार्हामातरोज्ञेयाः श्राद्धंतत्रप्रदीयते अत्रदेशाचाराद्व्यवस्था इदंचानुपनीतेना

पिकार्यं तदुक्तंश्राद्धमूलपाणौमात्स्ये अमावास्याष्टकाकृष्णपक्षपंचदशीषुचेत्यभिधाय एतच्चानुपनीतो

पिकुर्यात्सर्वेषुपर्वसु श्राद्धंसाधारणंनामसर्वकामफलप्रदं भार्याविरहितोप्येतत्प्रवासस्थोपिनित्यशः शूद्रो

प्यमंत्रवत्कुर्यादनेनविधिनाबुधइति तेनसाग्नेर्गृह्येग्नावेवदमितिपरास्तं अन्वष्टक्यःपृथगेवंदमातुःश्रा

द्धमित्यपिपरास्तं लाघवेनमूलेकैयादष्टकायदाविशेषाच्च तेनान्यत्रान्वष्टकाश्राद्धस्यांगस्याप्यत्रप्रधानत्वेन

मृतभार्य्यस्यगृह्याग्न्यभावेन २ सप्तम्यादिदिनत्रयस्यांगित्वात् १

४ एतस्याष्टकातःपृथक्त्वेमूलवचनमन्यत्कल्पनीयंस्यादष्टकाश्राद्धस्यचार्थांतरेणनभिधायत्वाच्च १

ननव ४
तेषां छंदोगानां कर्षूविधानश्रवणमन्वष्ट
काविधानान्नवपिंडा इत्यर्थः ४

योषित्क्षयाहदिनं विना २

कर्षूः कुल्याभिधायिनीत्यमरात्। तोहिं दधिमधु
घृतपूरितास्तिस्रः कुल्या विधाय तासमीपे श्रा
द्धं क्रियते ३

चनात् अत्राष्टकान्वष्टकापूर्वानुरोधात् तथाग्निपुराणे अन्वष्टकासु वृद्धौ च गयायां च क्षयेऽहनि अत्र मातुः
२०८ पृथक् श्राद्धमन्यत्र पतिनाशौ आस्तंबानां त्वष्टकासु च वृद्धौ चेति भाष्यकारैः पाठादष्टकायां मातृश्राद्धं छंदोगै
स्तत्र मातृमातामहश्राद्धं न कार्यं किंतु त्रिपूरुषमेव तथा विष्णुः पृथग्दद्यादन्वसौ दिनाहते कर्षूसमन्वितं मकु
शुक्ला ४ तथा घेऽद्रं षोडशं प्रत्याब्दिकं च शेषेषु पिंडाः स्युः षडिति स्थितिरिति छंदोगपरिशिष्टात् अन्वष्टकासु तेषां क
र्षूविधानादिति शूलपाणिः यत्तु तमिश्रपक्षे नवमी पुराणे भाद्रपदे स्त्रिया चत्वारः पार्वणाः कार्याः पितृपक्षे
मनीषिभिरिति तद्देशाचारतो व्यवस्थितं ज्ञेयं इदं जीवत्पितृकेणापि सपिंडकं कार्यं हेमाद्रौ विष्णुधर्मोत्तरे अ
न्वष्टकासु स्त्रीणां श्राद्धं कार्यं तथैव च वे तु पक्वमपि पिंडनिर्वपणं कार्यं तस्याम पितृसत्तमेति वचनं श्राद्धविधिना
पिंडदाने प्राप्ते पुनरुक्तौ कीर्तनं यस्य जीवत्पितृ गर्भिणी पतितत्वादिना पिंडदानं निषिद्धं तस्य तत्प्राप्त्यर्थमिति श्री
नाथचरणाः अत्र सुवासिनीभोजनमुक्तं मार्कंडेयपुराणे मातुः श्राद्धे तु संप्राप्ते ब्राह्मणैः सह भोजनं सुवासिन्यै

मेमत्तेएतदष्टकाश्राद्धं कर्त्तव्यमत
ष्टकस्तु नैव भवेत् ३

प्रदातव्यमितिसाताति ... पोब्रवीत् भर्त्तुरग्रेमृता नारी सहदाहेन वा मृता तस्याः स्थाने नियुंजीत विप्रैः सहस्व
वासिनीं तथैवमदालसावाक्यं स्त्रीश्राद्धे पुत्रदेयाः स्युरलंकारास्त्रयोषिते मंजीरमेखलादाममुद्रिकाकंकणा
दय इति अत्राशक्तावनुकल्पमाहाश्वलायनः अनडुहोयवसमाहरेदग्निनावाकक्षमुपोषेदेषामेष्टकेति नत्वेवा
नष्टकः स्यादिति हेमाद्रौपितामहः अमावास्याव्यतीपातपौर्णमास्यष्टकासुच विद्वान्श्राद्धमकुर्वाणो नरकं प्रति
पद्यते अकरणेच प्रायश्चित्तमुक्तं मदनविधाने एभिर्द्युभिर्जपेन्मंत्रं सैतवारं तु तद्दिने अन्वष्टकं पयदासून्यं संपूर्णयाति
महालये ५ सर्वदेति एतत्पक्षे द्वादश्यां विशेषः पृथ्वीचंद्रोदये वायवीये संन्यासिनोप्यादाद्दिकादिप्रवः कुर्याद्यथाविधि महा
लयेतु पुष्पश्राद्धं द्वादश्यां पार्वणेन तु तदिति अत्रत्रयोदशीश्राद्धं तत्रचंद्रिका त्रयोदशी भाद्रपदे कृष्णा मुख्या पितृ
प्रियाः तृप्यंति पितरस्तस्यां स्वयं पंचशतं समाः मघायुतायां तस्यां तु जलाद्यैरपितोषिताः तृप्यंति पितरस्तद्वद्वर्षा
णामयुतायुतं प्रयोगपारिजाते शंखः प्रोष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीं प्राप्य श्राद्धं तु कर्त्तव्यं मधुनापा

एकोद्दिष्टविधिना ५

पृथक्स्थितिं विना ४

यसेनच प्रजामिष्टांजनः स्वर्गमारोग्यंचधनंतथा नराणांश्राद्धसदाप्रीताःप्रयच्छंतिपितामहाः एतन्नित्यमितिपृथ्वी
१२० चंद्रेविष्णुधर्मे प्रौष्ठपद्यामतीतायांतथायुक्तमघात्रयोदशी त्युक्तौ एतांस्तुश्राद्धकालान्वैनित्या[illegible]नाहप्रजाप
तिः श्राद्धमेतेष्वकुर्वाणोनरकंप्रतिपद्यत इत्युक्तेः एतच्चापिभक्तैरपिपृथक्कार्यं तथाचहेमाद्रौ विभक्ताविभक्तावाश्रा
द्धंकुर्युः पृथक्सुताः मघासुचततोन्यत्रनाधिकारःपृथग्विनेति अपरार्के वायवीये हंसेहस्तस्थितेयातुमघायुक्ता
त्रयोदशी तिथिर्वैवस्वतीनामसाच्छायाकुंजरस्यतु अत्रच अपिनःसकुलेभूयाद्योनोदद्यात्त्रयोदशीं पायसंमधुस
अपरार्केइत्यर्थः ४ र्पिर्भ्यांप्राक्छायेकुंजरस्यचेति विष्णुमनुवचनेकेवलत्रयोदशीश्रुतेर्मघागुणः इतिकल्पतरुः शूलपाणिस्तुकेवल
वाक्यानामर्थवादत्वाद्विधौचमघायोगश्रुतेर्विधिलाघवात् विशिष्टमेवनिमित्तमित्याह वस्तुतस्तु मधुमांसैश्च
शाकैश्चपयसापायसेनच एषनोदास्यतिश्राद्धंवर्षासुचमघासुचेति वर्षावचनेकेवलमघाश्रुतेर्विनिगमकाभा
वादुभयंभिन्नंनिमित्तं पूर्वोक्तवचनाच्चयोगाधिकेफलाधिक्यं अतएवयाज्ञवल्क्यः तथावर्षात्रयोदश्यांमघासुच

त्रयोदश्यांमघासत्त्वेऽधिकफलत्वाद्गुणः ४

श्रिष्याद्युपस्थिति हेतुकम् ५

विशेषत इति त्रयोदशीश्राद्धं नित्यं अन्यत्काम्यं अत्र त्रयोदश्यां वहुपुत्राः पुत्रमारिणश्च भवंतीत्यापस्तंबोक्तिर्युवमादि त्वमपत्यदोषसहिष्णोरपत्यमात्रार्थिनः स्मत्यंतरोक्तधनार्थिनो वाधिकार इति कल्पतरुः अपत्यनिंदयात दर्थिनो न धिकार तत्फलांतरकामस्यैवाधिकार इति हलायुधः एतत्पिंडरहितं कार्यं मघायुक्तत्रयोदश्यां पिंडनिर्वपणाद्धि जः ससंतानो नैव कुर्यान्नित्यं तेकवयो विदुरिति वृहत्पराशरोक्तेः इदं मलमासेपि कर्त्तव्यं मघात्रयोदशीश्राद्धप्र त्युपस्थितिहेतुकं अनन्यगतिकत्वेन कर्त्तव्यं स्यान्मलिम्लुचे इति काष्ठकर्णीघोक्तेः यानितु अंगिरसः त्रयोदश्यां श्राद्धपदो यः श्राद्धं कुरुते नरः पंचत्वं तस्य जानीयाज्ज्येष्ठपुत्रस्य निश्चितं वामनपुराणे त्रयोदश्यां तु वैश्राद्धं नकु र्यात्पुत्रवान्गृहीत्यादीनि वचनानि तानि पुत्रवद्धिषयाणि वा महालयस्याभिन्नत्रयोदशी विषयाणि वं काम्यश्रा द्धविषयाणि वा सपिंडश्राद्धविषयाणि चेति केचित् हेमाद्रिप्रमुखास्त्वेकवर्गश्राद्धविषयाणि श्राद्धं नैवैकवर्ग स्य त्रयोदश्यामुपक्रमेत् न तस्मात्सत्त्रयं यस्य प्रजां हिंसंति तस्य ते इति कार्ष्णाजिनिस्मृतेः यद्यपि पितरो यत्र पूज्यं

मातामहाद्याः १ पित्रादित्रयमेकवर्गः २

एकास्मिन्नहनेसर्वसिद्धिरेकप्रयोजनार्थंकृतेद्विपेप्रयोजनांतरवत् ४

तेतत्र मातामहा अपीतिधौम्योक्तेर्नकेवलपितृवर्गस्यप्राप्तिस्तथापिव्यामोहादिप्राप्तनिषेधोयमित्याहुः व
१२१ यंतु पश्यामः पुत्रवद्धिषयायापेवेति असंतानस्तुयस्तस्यश्राद्धेप्रोक्तात्रयोदशी। संतानयुक्तोयःकुर्यात्तस्यवंसदा
योभवेदितिहेमाद्रौनागरखंडोक्तेः पूर्ववाक्यमप्यसंतानस्यैवैकवर्गनिषेधकमिति अत्रमघात्रयोदशीमहाल
ययुगादिश्राद्धानां तंत्रेणप्रयोगः नतुप्रसंगसिद्धिरितिप्रन्यत्रविस्तरः अथचतुर्दशी पृथ्वीचंद्रोदयेप्रचेताः
वृक्षारोहणलोहाद्यैर्विद्युज्वालाविषाग्निभिः नखिदंष्ट्रिविपन्नानांतेषांशस्ताचतुर्दशी ब्राह्मे युवानःपितरोयस्य युवान एवमृताः संतःपितरः ५
मृताःशस्त्रेणवाहताः तेनकार्यंचतुर्दश्यांतेषांतृप्तिमभीप्सिता नागरखंडे अपमृत्युर्भवेद्येषांशस्त्रमृत्युरथापि
वा श्राद्धंतेषांप्रकर्तव्यंचतुर्दश्यांनराधिप मरीचिः विषशस्त्रश्वापदाहितिर्यग्ब्राह्मणघातिनांचतुर्दश्यांक्रियाका
र्या अन्येषांतुविगर्हिता ब्राह्मणाद्घातीतेनहतोनतुब्रह्महा तस्यपतितत्वादितिशूलपाणिः अत्रोद्देश्यगतविशे
उं स्त्यविशिष्टस्य१ षणस्याविवक्षितत्वात्स्त्रीणामपिशस्त्रादिहतानामेकोद्दिष्टंकार्यमितिश्रीदत्तोपाध्यायाः इदंविषादिहतानामे

प्रयागादौ। तत्र दुर्मरणाभावात् २

प्रसवसमयेयामृताये वामृताः शिशवस्तेषाम् १

वनप्रसवादिमृतानामितिवाचस्पतिः यत्तुशाकटायनः जलाग्निभ्यांविपन्नानांसंन्यासेवागृहेपथि श्राद्धंकुर्वीत

तेषांवैवर्ज्येपित्वाचतुर्दशीमितितत्प्रायश्चित्तार्थंजलादिमृतविषयमित्याकरेउक्तं अतएवचवैधत्वात्सहगमनेपि

नकार्यमितिहेमाद्रिः एतच्चदैवयुक्तमेकोद्दिष्टंकार्यमित्युक्तंप्रयोगपारिजाते प्रेतपक्षेचतुर्दश्यामेकोद्दिष्टंविधान

तः दैवयुक्तंतुतच्छ्राद्धंपितृणामक्षयंभवेत् तच्छ्राद्धंदैवहीनंचेत्पुत्रदारधनक्षयः एकोद्दिष्टंदैवयुक्तमित्येवंमनुरब्रवी

सपिण्डीकरणेन त् भविष्येपिसमत्वमागतस्यापिपितुःशस्त्रहतस्यच चतुर्दश्यांतुकर्त्तव्यमेकोद्दिष्टंमहालये चतुर्दश्यांतुयच्छ्राद्धंस

पिंडीकरणेकृते एकोद्दिष्टविधानेनतत्कार्यंशस्त्रघातिनः इतिसंवत्सरप्रदीपेहारीतः विश्वेदेवांश्चतत्रापिपूजयेत्

दितामलान् येवैशस्त्रहतास्तेषांश्राद्धंकुर्यातिद्वितः अत्रैकोद्दिष्टवचनानांनिर्मूलत्वं समूलत्वेपिपार्वणाशक्तपर

त्वा विरिञ्चादिवचनैःप्रकरणात् कृष्णपक्षीयपार्वणावगतेरितिशूलपाणिः तन्न वाक्येनप्रकरणस्यबाधात् पित्रा

दीनांपार्वणंभ्रातादीनामेकोद्दिष्टमितिगौडार्वाचः तन्न पितुरित्यनेनविरोधात् विशेषवाक्यवैयर्थ्यापत्तेश्च अ

पितुःशस्त्रहतस्यचेति १

११२

त्रसंस्त्रहतस्यैव चतुर्दश्यामितिनियमोनतुचतुर्दश्यामेवशस्त्रहतस्येति श्राद्धंसंस्त्रहतस्यैवचतुर्दश्यांमहालयेऽ
तिकालादर्शात् वार्षिकादीनामकरणात्पित्रेश्च तेनमहालयएवदिनांतरेपार्वणंमातामहादित्रयार्थंकार्य
मेव पितामहोशस्त्रहतश्चेदेकोद्दिष्टद्वयंकार्यं तदुक्तंहेमाद्रौस्मृत्यंतरे एकस्मिन्द्वयोर्वैकोद्दिष्टमिति त्रिषुश
स्त्रहतेषुपार्वणमेवकार्यं यत्तुदेवस्वामिनोक्तं त्रिष्वपिसंस्त्रहतेषुपृथगेकोद्दिष्टत्रयंकार्यं नतुपार्वणमाहत्यव
चनाभावादिति तदुक्तं पित्रादयस्त्रयोयस्यशस्त्रेर्णतास्त्वनुक्रमात् सम्भूतपार्वणंकुर्यादाद्विकानिपृथक्पृथक्
इतिवृहत्पराशरोक्तेः एकस्मिन्वाद्वयोर्वापिविद्युच्छस्त्रेणवाहते एकोद्दिष्टंसुतःकुर्यात्त्रयाणांदर्शवद्भवेदिति
स्मृत्यंतराच्चेति पृथ्वीचंद्रोदयेऽप्युक्तं अपरार्केहेमाद्रौचैवं यस्त्वत्रैवं शस्त्रादिनाहतस्यवार्षिकमेवपार्वणमेकोद्दि
ष्टंवाकार्यं नतुश्राद्धद्वयं प्रसंगासिद्धेरितिपृथ्वीचंद्रोदये अत्रश्राद्धकरणेग्निभयद्दादिनांतरेपार्वणेनैवकार्यमि
तितत्रैवोक्तं यद्यपिशस्त्रविप्रहतानांचसंगिदंक्षिप्रसरीसृपैः आत्मनस्त्यागिनांचैवश्राद्धमेषांनकारयेदितिछा

महालयचतुर्दशामेव२

आहिताग्नेर्यतो लौकिकाग्नौ होमो न विधीयते ऽतो दर्शं विना श्राद्धं न विधीयते ५

लाक्षणिकम् २ दुष्टमहारोगादीनां मरण विधानात् १

गलेपाद्यैः शस्त्रादिहतानां श्राद्धं निषिद्धं तथापि प्रमादमृतानां श्राद्धार्हत्वात्कार्यं वृद्धादिभिन्नबुद्धिपूर्वमृतानां तु न का
र्यं यत्तु चतुर्दशीं यत्र पर्णीयाः लुप्तपिंडोदकक्रिया इति ब्राह्मं तत्क्रौर्याणामिति शूलपाणिः लक्षणायां मानाभावात् पतिते
नापि कर्त्तव्यं पतितस्यैव तिग्रयादिवद्विशेषविधिबलात् पतितानामपि कार्यमिति न व्यासोऽयः तत्त्वं तु समत्वमागतस्य
त्यादिवशात् क्रतु क्रियाणां कार्यं नान्येषामिति वयं प्रतीमः यत्तु मनुः नैपितृयज्ञियो होमो लौकिकाग्नौ विधीयते न दर्शेन
ता ५ विना श्राद्धमाहिताग्नेर्विधीयते इति अत्र पूर्वार्द्धहेतुत्वेनोक्तं तद्यथाश्रुतमेव मन्यते पृथ्वीचंद्रोदयादयः आहिताग्निपि
ण्डपितृयज्ञकल्पेन श्राद्धनिषेधार्थमिदं न तु संकल्पादेरपीति अस्मद्गुरवः कृष्णपक्षश्राद्धमन्यदिनेषु प्राप्तमाहिताग्ने
र्दर्शे नियम्यते इति तत्त्वं दर्शनपार्वणेन विना श्राद्धं न तेन क्वापि वार्षिकादावेकोद्दिष्टं नेति हरिहरः इति चतुर्दशी साग्ने: ३
अमायां विशेषमाह पराशरः सूर्यकरस्थिते यातु अमावस्या करान्विता सा ज्ञेया कुंजरच्छाया इति बोधायनोऽब्रवीत्
वनस्पतिगते सोमे या छाया प्राङ्मुखी भवेत् गजच्छाया तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत् भारते अजनं सर्वलोहेन वर्षा सर्वश्यामेन छागे
नतमासेन १

अपराह्णे १

क्रियाविशेषणम् १ प्रतिपद्याश्विने सिते इति ५ आर्यस्य मातामहस्य प्रतिपत्प्रतिपच्छ्राद्धकृत् ४

सुनियतव्रतः हस्तिच्छायासु विधिवत्कर्णव्यजनवीजितं श्राद्धं दद्यादिति शेषः आश्विनशुक्लप्रतिपदि दौहित्रस्य माता
१२३ महश्राद्धमुक्तं हेमाद्रौ संग्रहे च यातमात्रोपि दौहित्रो विद्यमानेपि मातुले कुर्यान्मातामहश्राद्धं प्रतिपद्याश्विने सिते
इति इयं संगवव्यापिनी ग्राह्येति निर्णयदीपे उक्तं प्रतिपद्याश्विने शुक्ले दौहित्रस्त्वेकपार्वणं श्राद्धं मातामहे कुर्या
जीवत्पितृकः ४ त्सपिता संगवे सदा जातमात्रोपि दौहित्रो जीवत्यपि च मातुले प्रातः संगवयोर्मध्ये आर्यस्य प्रतिपद्भवेत् इति वच
नात् अत्र समूलत्वं विमृश्यं इदं च मलमासे न कार्यं स्पष्टमासविशेषाख्याविहितं वर्जयेन्मले इति निषेधात्
व८ इदं जीवत्पितृकेणैव कार्यमिति शिष्टाः इदं च शिष्टाचारात् सपिंडकं कार्यमिति केचित् पिंडरहितं तद्युक्तं जीव
त्पितृकस्य मुंडनं पिंडदानं च प्रेतकर्म च सर्वशः न जीवत्पितृकः कुर्याद् गुर्विणीपतिरेव च इति वचनेनापि
डनिषेधात् आनुष्ठव्यवहितविशेषवचनाभावाच्चेति संक्षेपः इति श्रीकमलाकारभट्टकृते निर्णयसिंधौ महालय
निर्णयः अथाश्विनशुक्लप्रतिपदि नवरात्रारंभस्तन्निर्णयः तत्र भार्गवार्चनदीपिकायां देवीपुराणे सुमेधाः

वाचस्पत्युराजन्वक्ष्यामि चंडिकापूजनक्रमं आश्विनस्यसितपक्षेप्रतिपत्सुशुभेदिने शङ्कुंकंभ्योक्तं शुद्धेति
योग्रकर्तव्यंप्रतिपच्चोर्द्धगामिनी आद्यास्तुनाडिकास्त्यक्त्वाषोडश्याद्वादशापिवा अपरान्हेतकर्तव्यंशुद्धसंत
तिकांक्षिभिः इदंचापरान्हयोगिन्याःप्रशस्तंद्वितीयादिनेप्रतिपदोऽभावेज्ञेयं तथातत्रैवदेवीपुराणेऽमरतंत्रेदेवी
वचः अमायुक्तानकर्तव्याप्रतिपत्पूजनेमम मुहूर्त्तमात्रकर्तव्याद्वितीयादिगुणान्विता आद्याःषोडशनाडीस्तुल
ब्ध्वायाकुरुतेनरः कलशस्थापनंतत्र ह्यरिष्टंजायतेध्रुवं मार्कंडेयपुराणे अमाविद्धातुयाशुक्लाभवेत्प्रतिपदाश्वि
नी नवरात्रव्रतंतस्यांनकार्यंशुभमिच्छता देशभंगोभवेत्तत्रदुर्भिक्षंचोपजायते नंदायांदर्शयुक्तायांयत्रस्यान्मम
पूजनमिति स्कांदेपि प्रतिपद्याश्विनेमासिसाशुक्लाशुभदाभवेत् भाद्रपंचदशीकृष्णातयायुक्तानशस्यते विरुद्धफल
दासाहिपुत्रदारभयावहेति तथा वर्जनीयाप्रयत्नेनअमायुक्तानुपार्थिव द्वितीयादिगुणोर्युक्ताप्रतिपत्सर्वकामदा
तथादेवीपुराणे योमांपूजयतेनित्यंद्वितीयादिगुणान्वितां प्रतिपच्चारदीं ज्ञात्वासोश्नुतेसुखमव्ययं यदिकुर्यादमायुक्ता

तस्या
प्रतिपत्स्थापनं मम तत्प्रसादापायुतं दत्वा भस्मशेषं करोम्यहं आग्नमहाकुरुते यस्तु कलशस्थापनं मम तस्य
११५ संपद्विनाशः स्याज्ज्येष्ठः पुत्रो विनश्यति अमायुक्ता न कर्त्तव्या प्रतिपच्चंडिकार्चने धनार्थिभिर्विशेषेण वंश
हानिश्च जायते न दर्शकलया युक्ता प्रतिपच्चंडिकार्चने उदये द्विमुहूर्त्तापि ग्राह्या सोदयगामिनीति देवीपुराणे
या चाश्वयुजि मासे स्यात्प्रतिपद्धस्तयान्विता शुद्धा ममार्चनं तस्यां सर्वयज्ञफलप्रदं रुद्रयामले अमायुक्ता स
दा चैव प्रतिपन्निंदिता मता तत्र चेत्स्थापयेत्कुंभं दुर्भिक्षं जायते ध्रुवं प्रतिपत्सु द्वितीयायां तु कुंभारोपणकर्मणि य
द्यपि रुद्रयामलं डामरं च निर्मूलं तथाप्यविरोधात्प्रचाराच्च तद्वचनानि लिख्यंते तिथितत्वे देवीपुराणेपि
प्रातरावाहयेद्देवीं प्रातरेव प्रवेशयेत् प्रातः प्रातस्तु संपूज्य प्रातरेव विसर्जयेत् तत्रैवाशरत्काले महापूजा क्रि
यते या च वार्षिकी सा कार्योदयगामिन्यां न तत्र तिथियुग्मता तथा कुहूकाष्ठोपसंयुक्तां वर्जयेत्प्रतिपत्तिथिं
राज्यनाशा जया पापा प्रोक्ता निंदिता चाश्वपूजने इति एषु वचनेषु कलशस्थापनमहाशाने देवप्रथमदिने नि बि

५५१ ध्येतेनतूपवासादि तस्यप्रतिपद्यमावस्येतियुग्मवाक्यात् अलाभ्यात्प्रतिपत्तिथिः प्रथमतइतिदीपिकोक्तेः शु
क्लेपक्षेदर्शविद्धेतिमाधवोक्तेश्चपूर्वदिनेप्राप्तस्यवाधमानाभावात्इतिकेचित् वस्तुतस्तु पूर्वोक्तवाक्येषुचं
डिकार्चनपूजनग्रहणादुपवासादेश्चांगत्वात्प्रधानदेवीपूजादावपिपरेयुक्तं कलशस्थापनग्रहणात्पलन्द
रां अतएवदेवलः व्रतोपवासनियमघटिकैकापियाभवेत् सातिथिस्तद्दिनेपूज्याविपरीतातुपैतृके इति अ
त्रघटिकामुहूर्त्तैइतिगौडाः यदातुपूर्वदिनेसंपूर्णाश्चभूत्वापरदिनेवर्द्धते तदासंपूर्णत्वाद्दमायोगाभावाच्च
पूर्वैव यानियुग्मद्वितीयायायोगनिषेधकानिवचनानिकेचित्पठंतितान्यपिशुद्धाधिकनिषेधपराणि परदिनप्रतिपदा
त्यंतासत्वेतुदर्शयुक्तातुपूर्वैवग्राह्या तदाहल्लः तिथिः शरीरंतिथिरेवकारणंतिथिःप्रमाणंतिथिरेवसाधनमिति
यानित्वमायुक्ताप्रकर्त्तव्येत्यादीनिनृसिंहप्रसादवचनानितानिसमूलत्वेसत्येतद्विषयाणि अन्येतुतत्वं पूर्वोक्तसर्ववा
क्यानांहेमाद्र्यादावलिखितत्वेननिर्मूलत्वात्तैश्चान्यनिर्णयस्यानुक्तेः सामान्यनिर्णयात् पूर्वत्रप्राप्तावपिगौडनिबंधेषु

विशेषनिर्णयदीपिकीग्नात्वा तत्रापिद्वैदिकेकेतपस्यद्विमुहूर्त्तास्तुतिकोर्द्विमुहूर्त्तीग्राह्या॰ उदितेदैवतंभानावित्यत्र
द्विमुहूर्त्तोत्त्विरन्हश्चेतिश्रोदयिकाद्विमुहूर्त्तत्वनियमात् तेनउदयेद्विमुहूर्त्तापिइत्याद्यनुशारेपि मुहूर्त्तमात्राकर्त्तव्येति
तद्विमुहूर्त्तास्तुतिः अन्यथाद्विमुहूर्त्तविधिवैयर्थ्यात् केचित्तुमुहूर्त्तमात्रेतिवचनात्ततोन्यूनत्वपरानत्याहुः गौडास्त्वेवं
अत्रदेवीपूजैवप्रधानं उपवासादित्वंगं अष्टम्यांचनवम्यांचजगन्मातरमंबिकां पूजयित्वाश्विनेमासिविशोको
जायतेनरइतिहेमाद्रौभविष्ये तस्याएवफलसंबंधात् नवमीतिथिपर्यंतंवृध्यापूजाजपादिकमिति तत्रैवदेवीपुरा
णान्च शरत्कालेमहापूजाक्रियतेयाचवार्षिकीतिमार्कंडेयपुराणाच्च पूर्ववचनादष्टमीनवमीपूजैवप्रधानमन्यत्सर्वे
मंगमितिगौडाः एकः पक्षोपिकालिकापुराणे यस्त्वेकस्यामथाष्टम्यांनवम्यामथसाधकः पूजयेद्वरदांदेवींमहावि
भवविस्तरैरिति रूपनारायणोध्धृतदेवीपुराणे महानवम्यांपूजेयंसर्वकामप्रदायिका सर्वेषुवत्सवर्णेषुतवभक्त्याप्र
कीर्त्तिता कृत्वाप्नोतियशोराज्यंपुत्रायुर्धनसंपदः साचकाम्यानित्याच एवमन्येपराजितयादेव्याःकार्यंप्रपूजनं विम्

तिमतुलां लब्ध्वा चतुर्वर्गप्रदायकमिति यो मोहादथवालस्याद्देवीं दुर्गां महोत्सवे न पूजयति दंभाद्वा द्वेषाद्वाप्यथ
भैरवां क्रुद्धा भगवती तस्य कामान्निहन्ति वै इति कालिकापुराणे फलनिंदाश्रुतेः वर्षे वर्षे विधातव्यं स्थापनं च
विसर्जनमिति तिथितत्वे देवीपुराणाच्च अत्रोपवासाधिकमुक्तं हेमाद्रौ भविष्ये एवं विंध्यवासिन्यां नवरात्रोपवास
तः एकभक्तेन नक्तेन तथैवायाचितेन च पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे गृहे गृहे शक्तिपरैर्ग्रामे ग्रामे वने वने
तैस्तैः प्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैरिति यत्तु रूपनारायणीये भ
विष्ये एवं नानाम्लेच्छगणैः पूज्यते सर्वदस्युभिरिति तत्तामसपूजापरं विना मंत्रैस्तामसी स्यात्किरातानां संमतेति उ
तत्रैवोक्तेः मदनरत्ने देवीपुराणेपि कंन्यासंस्थे रवौ शक्रमुक्तामारभ्य नंदिकां अयाची त्वथवैकाशी नक्ताशी वाथवा
ग२ घृतः भूमौ शय्यां चामंत्र्य कुमारीभोजयेन्मुदा वस्त्रालंकारदानैश्च संतोष्याः प्रतिवासरं बलिं च प्रत्यहं दद्यात् आदनं मां
समाषवत् त्रिकालं पूजयेद्देवीं जपस्तोत्रपरायणा इति नंदिका प्रतिपदिति मैथिलाः षष्ठीति गौडाः तच्च पूजनं रात्रौ कार्यं

आश्विने मासि मेघांते महिषासुरमर्दिनीं निशासु पूजयेद्भक्त्या सोपवासादिकः क्रमात् इति देवीपुराणात् संग्रहे
११९ पि आश्विने मासि मेघांते प्रतिपद्या तिथिर्भवेत् तस्यां नक्तं प्रकुर्वीत रात्रौ देवीं च पूजयेत् रात्रिरूपा यतो देवी दिवारूपो
महेश्वरः रात्रिव्रतमिदं देवि सर्वपापप्रणाशनं सर्वकामप्रदं नृणां सर्वशत्रुनिवर्हणं रात्रिव्रतमिदं तस्य रात्रौ कर्तव्य
तिष्यते नक्तव्रतमिदं यस्मादन्यथा नरके गतीः इत्यादिवचनाच्च रात्रिव्रतत्वमेवाभिप्रेत्य माधवेनोक्तं तस्य नक्तव्र
तत्वादिति न तु रात्रिभोजनात् ननु मासि चाश्वयुजे शुक्ले नवरात्रे विशेषतः संपूज्य नवदुर्गां च नक्तं कुर्यात्समाहितः
नवरात्राभिधं कर्म नक्तव्रतमिदं स्मृतं आरंभे नवरात्रस्येत्यादि स्कांदात् माधवोक्तोऽस्त्व नक्तमेव प्रधानमिति चेत् न
नवरात्रोपवासस्येत्यादेरनुपपत्तेः तेन पाक्षिकनक्तानुवादोयं ननु रात्रेः कर्मकालत्वेन तद्व्यापिनी पूर्वैव प्रतिपद्ग्राह्या स्यात्
मैवं न्यायतः प्राप्तः पूर्वोक्तवचनेन बाधात् यथा पूर्वेद्युः कर्मकालव्यापिनीमपि त्यक्त्वा स्वल्पापि परैव रामनवमीति प्रागु
क्तं यथा वा निशीथे सतीमपि पूर्वां जन्माष्टमीं त्यक्त्वा रोहिणीयुक्तापरैवेति माधवेनोक्तं तथात्रापि वस्तुतस्तु रा

त्रेः कर्मकालत्ववचसांहेमाद्र्याद्युल्लिखनात्समूलत्वंविमृश्यमेव त्रिकालंपूजयेदित्यादिपूर्वविरोधाच्चमाधवोक्तिस्तु
पाद्मिकनक्तानुवादइत्युक्तं तस्मात्सर्वमतेषुपरैवप्रतिपदितिसिद्धं अत्रकेचिन्नवरात्रशब्देनवाहोरात्रपरः वृद्धौस
माप्तिरष्टम्यांन्हासेमाप्रतिपन्निशि प्रारंभोनवचंद्रास्तुनवरात्रमतोर्थवदितिदेवीपुराणादित्याहुः तन्न अतिन्हास
वृद्ध्योन्यूनाधिकत्वापत्तेः अत्रमूलाभावाच्चतेनतिथिवाच्योवेयं तदुक्तं तिथिवृद्धौतिथिन्हासेनवरात्रमपार्थकं अष्ट
रात्रेनदोषोयंनवरात्रतिथिक्षयेइति सचनवरात्रशब्दःक्वचिल्लक्षणयाकर्मवाचीयथाप्रारंभोनवरात्रस्यतत्रेतिक्वचि
प्रतिपदिचवैधृत्यादियोगनिषेधोभार्गवार्चनदीपिकायांदेवीपुराणे त्वाष्ट्रवैधृतियुक्ताचेत्प्रतिपच्चंडिकार्चने
तयोरंत्येविधातव्यंकलशारोपणंगृहेइति चित्रावैधृतियुतापिद्वितीयायुताचेत्सैवग्राह्येत्युक्तं दुर्गोत्सवे भंडान्वि द्वितीया२
तावत्प्रतिपत्तुलभ्यतेविरुद्धयोगैरपिसंगतासतीसैवापरान्हेविबुधैर्विधेया श्रीपुत्रराज्यादिविवृद्धिहेतुरिति यत्त
तुवैधृत्यादिपरिहारेणप्रतिपन्नलभ्यतेतदोक्तं तेनैवकात्यायनेनप्रतिपद्याश्विनेमासिभवेवैधृतिचित्रयोः आद्य

पादोपरित्यज्यप्रारंभेनवरात्रकमिति भविष्येपि चित्रावैधृतिसंपूर्णाप्रतिपच्चेद्भवेन्नृप त्याज्यैकांशा द्वयस्त्वाद्या
११८ स्तुरीयांशेतुपूजनमिति रुद्रयामलेपि वैधृतौपुत्रनाशःस्याच्चित्रायांधननाशनं तस्मान्नास्थापयेत्कुंभं चित्रायांवैधृ
तौतथा संपूर्णप्रतिपद्येवचित्रायुक्तायदाभवेत् वैधृत्यावापियुक्तास्यात्तदामध्यंदिनेरवौ अभिजित्तुमुहूर्तेयत्तत्र
स्थापनमिष्यतेइति चित्रादिनिषेधेमूलंचिंत्यं इदंकलशस्थापनंरात्रौनकार्यं नरात्रौस्थापनंकार्यंनचकुंभाभिषेचनमि
तिमात्स्योक्तेः भास्करोदयमारभ्ययावच्चदशनाडिकाः प्रातःकालइतिप्रोक्तःस्थापनारोपणेष्विति विष्णुधर्मोक्ते
श्चरुद्रयामले स्नानंमांगलिकंकृत्वाततोदेवींप्रपूजयेत् शुभाभिर्मृत्तिकाभिश्चपूर्वंकृत्वातुवेदिकां यवान्वैवाप
येत्तत्रगोधूमैश्चापिसंयुतान् तत्रसंस्थापयेत्कुंभंविधिनामंत्रपूर्वकं सौवर्णंराजतंवापिताम्रंमृन्मयमेववेति वा२
अथपूजाविधिः साचजयंतीमंत्रेणनवार्णेनवाकार्यातदुक्तंदुर्गाभक्तितरंगिण्यांदेवीपुराणे कुर्याद्देव्यास्तुमंत्रे
र्णैराद्यैरथवादिभिरित्युक्ता जयंतीमंगलाकालीभद्रकालीकपालिनी दुर्गाक्षमाशिवाधात्रीस्वाहास्वधानमोस्तुते

नै॰१

मैनेवतुमंत्रेणजपहोमौतुकारयेत् इति ॐदुर्गेदुर्गेरक्षिणिस्वाहेतिनवार्णमंत्रः तत्रप्रतिपदिप्रातरभ्यंगंकृत्वादेशका
लौसंकीर्त्यममेहजन्मनिदुर्गाप्रीतिद्वारासर्वापच्छांतिपूर्वकदीर्घायुर्विपुलधनपुत्रपौत्राद्यनवच्छिन्नसंततिवृद्धि
स्थिरलक्ष्मीकीर्तिलाभशत्रुपराजयसदभीष्टसिद्ध्यर्थंशारदनवरात्रप्रतिपदिविहितकलशस्थापनदुर्गापूजाकु
मारीपूजनादिकरिष्ये इतिसंकल्प्यमहीद्यौरितिभूमिंस्पृष्ट्वा ॐओषधयःसमितियवान्निक्षिप्य कलशेनेतिकुंभं
संस्थाप्यइमंमेगंगेइतिजलेनापूर्यगंधद्वारामितिगंधम्॥याओषधीरितिसर्वौषधीःकांडात्कांडादितिदूर्वाःअश्व
त्थेवइतिपंचपल्लवान्स्योनापृथिवीतिमृदः॥याःफलिनीरितिफलं॥सहिरत्नानीतिपंचरत्नानिहिरण्यंचनिक्षिप्य॥
युवासुवासाइतिवस्त्रेणावेष्ट्यपूर्णादर्वीतिपूर्णपात्रंनिधाय॥तत्रवरुणंसंपूज्य॥जीर्णायांनूतनायांवाप्रतिमायांदुर्गा
मावाह्यपूजयेत् तद्यथा पूर्वोक्तमंत्रमुक्त्वा॥आगच्छवरदेदेविदैत्यदर्पनिषूदनि पूजांगृहाणसुमुखीनमस्तेशंक
रप्रिये सर्वतीर्थमयंवारिसर्वदेवसमन्वितं इमंघटंसमागच्छतिष्ठदेवगणैःसह दुर्गेदेविसमागच्छसांनिध्यमि

हकल्पय वलिंपूजांगत्वाशास्त्रमष्टाभिःशक्तिभिःसहैतथावाह्यपूर्वोक्तमंत्रेणषोडशोपचारैःपूजयित्वामाषभक्त
११८ वलिंकूष्मांडादिवलिंवानिवेदयेत् ततःकुमारीपूजा तस्तुतंहेमाद्रौस्कांदे एकैकांपूजयेत्कन्यामेकवृद्ध्यातथैवच द्विगु
णांत्रिगुणांवापिप्रत्येकंनवकंतुवा तथा नवभिर्लभतेभूमिमैश्वर्यंद्विगुणेनतु एकवृद्ध्यालभेद्भवत् त्रयोमेकैकेन ४३
श्रियंलभेत् एकवर्षातुयाकन्यापूजार्थेतांविवर्जयेत् गंधपुष्पफलादीनांप्रीतिस्तस्यानविद्यते तेनद्विवर्षामा
रभ्यदशवर्षपर्यंताएवपूज्यानत्वन्याः तासांचक्रमेणाकुमारिकात्रिमूर्त्तिः कल्याणीरोहिणीकालीचंडिकाशां
भवीदुर्गासुभद्रेतिनामभिःपूजाकार्या आसांचप्रत्येकंपूजामंत्राःफलविशेषाश्चतत्रैवज्ञेयाः सामान्यतस्तु
मंत्राक्षरमयींलक्ष्मींमातॄणांरूपधारिणीं नवदुर्गात्मिकांसाक्षात्कन्यामावाहयाम्यहं एवमभ्यर्चनंकुर्यात्कुमा
रीणांप्रयत्नतः कंचुकैश्चैववस्त्रैश्चगंधपुष्पाक्षतादिभिः नानाविधैर्भक्ष्यभोज्यैर्भोजयेत्पायसादिभिः तथा॥
ग्रंथिस्फुटितशीर्णांगीं रक्तपूयव्रणांकितां जात्यंधांकेकरांकाणांकुरूपांतनुरोमशां संत्यजेद्रोगिणींकन्यांदा

सीगर्भसमुद्भवां तथा ब्राह्मणींसर्वकार्येषुजयार्थेन एवंसंजां लाभार्थे वैश्यवंशोत्थां सुतार्थे शूद्रवंशजां
दारुणे चांत्यजातीनां पूजयेद्विधिवन्नर इति अत्र वेदपारायणमप्युक्तं रुद्रयामले एवं चतुर्वेदविदो विप्रान्
सर्वान्प्रशादयेत् तेषां च वरणं कार्यं वेदपारायणाय वै इति तथा एकोत्तराभिवृद्ध्या तु नवमीं यावदेव हि चं प२
डीपाठं जपेच्चैव जापयेद्वा विधानतः तिथितत्त्वे वाराहीतंत्रे प्रणवं चादितो जप्त्वा स्तोत्रं वा संहितां पठेत् अंते च
प्रणवं दद्यादित्युवाचादिपूरुषः आधारे स्थापयित्वा तु पुस्तकं प्रजपेत्सुधीः हस्तसंस्थापनाद्देवि यस्माद्भवति विफलं
भवेत् स्वयं च लिखितं यच्च शूद्रेण लिखितं भवेत् अब्राह्मणेन लिखितं यच्चापि विफलं भवेत् ऋषिच्छंदादि
कं न्यस्य पठेत् स्तोत्रं विचक्षणः स्तोत्रं वा गीयते यत्र प्रणवं तत्र विन्यसेत् सर्वत्र पाठो विज्ञेयस्त्वन्यथा भवेत् विफलं
एवं नवमीपर्यंतं प्रत्यहं कुर्यात् अत्र विशेषो हेमाद्रौ देवीपुराणे यदाघोरे दिवसे कुर्याच्चंडिकापूजनादिकं द्विगुणं तु
द्वितीये ऽह्नि त्रिगुणं तत्परे ऽहनि नवमीतिथिपर्यंतं वृद्ध्या पूजा जपादिकमिति एतन्नवरात्रे पूजैव प्रधानं उपवासा

दित्वगमिति गम्यते तिथिह्रासेतुतिथिद्वयनिमित्तंपूजादिकमहालयश्राद्धवदेकदिनेआवृत्त्याकार्यंता
१२८ ध्यापूजायैर्धार्यादि वृद्धौतद्वदेवावृत्तिः ततोनवरात्रोपवासादिसंकल्पंकुर्यात् स्वस्याशक्तावन्येनवापूजादिकार
येत् स्वयंवाप्यन्यतोवापि पूजयेत्पूजयीतवेतितुरंगिरापादेवीपुराणात् इदंचदेवीपूजनंशुक्रास्तादावपिकार्यं
तदुक्तंधर्मप्रदीपे नष्टेशुक्रेतथाजीवेसिंहस्थेचवृहस्पतौ कार्याचैवस्वदेव्यर्चाप्रत्यब्दंकुलधर्मतइति मलमासे
तुवचनाभावान्नभवति अत्रसास्वस्याश्वपूजनमुक्तंमदनरत्नेदेवीपुराणे आश्वयुक्शुक्लप्रतिपत्स्वातियोगे
शुभेदिने पूर्वमुच्चैःश्रवानामप्रथमंश्विरूपमावहत् तस्मात्सास्वैर्नरैस्तत्रपूज्योसोश्वद्वयासहैः पूजनीयाश्वदुर्गा
नवमींयावदेवहि शांतिःस्वस्त्ययनंकार्यंतथातेषांदिनेदिने धान्यंभल्लातकंकुष्ठंवचासिद्धार्थकास्तथा पंचव
र्णानिसूत्रेणाग्रंथितेषांतुवंधयेत् वायव्यैर्वारुणैःसौरैःशाक्रमंत्रैःसवैष्णवैः वैश्वदेवैस्तथाग्नेयैर्होमः कार्योदिने
दिने कल्पतरावेतदग्रेन्यदपि ज्येष्ठायोगेपुरा तत्रगजाश्वाश्चैमहाबलाः पृथिवीमवहन्पूर्वंसशैलवनकान
तो २

ना कुमुदैरावणोपद्मः पुष्पदंतो धवामनः सुप्रतीकोंजनी नीलस्तस्मा नां तत्र पूजयेत् शाका द्वादश्यामारभ्य
नवम्यंतं च पूर्ववत् अश्ववन्होमादितयर्थः अथ प्रतिपदादिषु विशेषो दुर्गाभक्तितरंगिण्यां भविष्ये केशसं
स्कारद्रव्याणि प्रदद्यात्प्रतिपद्दिने पक्वतैलं द्वितीयायां केशसंजमहेतवे पट्टडोरमिति गौडपाठः दर्पणं च
तृतीयायां सिंदूरं ललाटकं तथा मधुपर्कं चतुर्थ्यां तु तिलकं नेत्रमंडनं पंचम्यामंगरागं शक्त्यालंकाराणि च षष्ठ्यां
विल्वतरौ बोधं सायं संध्यासु कारयेत् सप्तम्यां प्रातरानीय गृहमध्ये प्रपूजयेत् उपोषणं महाष्टम्यां मातृशक्त्या
च पूजनं नवम्यामुग्रचंडायाः पूजां कुर्याद्बलिं तथा संपूज्य प्रेषणं कुर्याद्दशम्यां शारदोत्सवैः अनेनविधिना यस्तु
देवीं प्रीणयते नरः स्कंदवन्यालये देवी तं पुत्रधनकीर्त्तिभिः कृत्यतत्त्वार्णवे लिंगे कन्यायां कृष्णपक्षे तु पूजयित्वाष्टमे पूर्वाषाढा
पि वै नवम्यां बोधयेद्देवीं महाविभवविस्तरैः शुक्लपदे चतुर्थ्यां तु देवीकेशविमोक्षणं प्रातरेव तु पंचम्यां स्नानीयं तु ५२
शुभैर्जलैः षष्ठ्यां सायं प्रकुर्वीत विल्ववृक्षेधिवासनं सप्तम्यां पत्रिकापूजा अष्टम्यां वाप्युपोषणं पूजा च जागरश्चै

वनवम्यां विधिवद्बलिः विसर्जनं दशम्यां तु क्रीडाकौतुकमंगलैः अत्र नवम्यां बोधनासामर्थ्ये षष्ठ्यां बोधनमिति स्मार्त्ताः
१२ फलभूमाधिनः समुच्चय इत्यन्ये नवम्यां मंत्रः कालिकापुराणे इषमासि सितपक्षे नवम्यामार्द्रभेदिवा श्रीवृक्षे बोधया
मि त्वां यावत्पूजां करोम्यहं अत्र स्त्रीव्रते विशेषः परिभाषायां ज्ञेयः अथाशौचे विशेषनिर्णयः मत्ते विश्वरूपनिबंधे आश्वि
ने शुक्लपक्षे तु प्रारब्धे नवरात्रके शावाशौचे समुत्पन्ने क्रिया कार्या कथं बुधैः सूतके वर्त्तमाने च तत्रोत्पन्ने सदा बुधैः
देवीपूजा प्रकर्त्तव्या पशुयज्ञविधानतः सूतके पूजनं प्रोक्तं दानं चैव विशेषतः देवीमुद्दिश्य कर्त्तव्यं तत्र दोषो न वि
द्यते इति कालादर्शे विष्णुरहस्येपि पूर्वसंकल्पितं यच्च व्रतं सुनियतव्रतैः तत्कर्त्तव्यं नरैः शुद्धं दानार्चनविवर्ज्जितमिति
गौडनिबंधे तिथितत्वेप्युक्तं आश्विनकृष्णनवम्यादि शुक्लप्रतिपदादि षष्ठ्यादि सप्तम्यादिष्वेकं कर्म अतस्तन्मध्ये
आशौचपातेपि न दोषः संकल्पो व्रतश्चात्र पारिरिति विष्णूक्तेरिति आरब्धं स्वयमेव कार्यं अनारब्धं त्वसेन कारयेदि
ति दिवोदासः रजस्वला त्वन्येन कारयेत् सूतकादिवद्विशेषवचनाभावात् स्त्रीणां नवरात्रे तांबूलादि च वर्ज्यं भवति

तदुक्तंव्रतेहेमाद्रौगारुडे गंधालंकारतांबूलपुष्पमालानुलेपनं उपवासेनदुष्यंतिदंतधावनमंजनमिति एतत्स
भर्त्तृकोपवासविषयं अन्यच्चात्रविशेषःपरिभाषायामुक्तः आश्विनशुक्लपंचम्यामुपांगललिताव्रतं मह
राष्ट्रेषुप्रसिद्धं तत्रयद्यपिकथायांकालविशेषोनोक्तस्तथापिरात्रौजागरणंकुर्यात् गीतवादित्रनिस्वनैरितिरा
त्रौजागरोक्तेः शक्तिपूजायांरात्रौप्रशस्त्याच्चरात्रिव्यापिनीग्राह्येतिकेचित् वस्तुतस्तु वचनंविनारात्रिपूजायांमा
नाभावात्जागरस्यचांगत्वायुग्मवाक्यात् भक्त्याजागरणेनक्तेचंद्रार्घव्रतेतथा ताराव्रतेषुसर्वेषुरात्रियोगोविशि
ष्यते इतिकालहेमाद्रौवचनाच्चपूर्वविद्धाग्राह्या रात्रिशब्दःपूर्वविद्धावचनइतिहेमाद्रिः अत्रपचभुक्त्याजागरणाव्रत
रूपत्वादितिसाधुप्रतीमः भुक्त्याजागरणंयत्रैकंपदंतस्मिन्व्रतेइत्यर्थः अन्यथाभुक्त्वेत्यसंगत्येः द्विवोदासीयेप्येवं आ
श्विनशुक्लपक्षेमूलनक्षत्रेसरस्वतीस्थापनं यथोक्तंनिर्णयामृतेदेवीपुराणे मूलेषुस्थापनंदेव्याःपूर्वाषाढासुपूजनं उ
त्तरासुबलिंदद्यात्श्रवणेनविसर्जयेत् इति रुद्रयामलेपि मूलर्क्षेचसुराधीशपूजनीयासरस्वती पूजयेत्प्रत्यहंदेवयाव

द्वैधमवमद्भक्तं नाध्यापयेन्नचलिखेन्नाधीयीतकदाचन पुस्तकेस्थापितेदेवविद्याकामोद्विजोत्तमः मूलस्यादिपादेस्था
वाहनमितिशिष्टाः श्रवणाद्यपादेचविसर्जयेत् आदिभागेनिशायांतुश्रवणस्ययदाभवेत् संपेषणांतदादेव्या
दशम्यांचमहोत्सवइतिचिंतामणौब्रह्मांडपुराणात् अथषष्ठीगौडनिबंधेदेवीपुराणे ज्येष्ठानक्षत्रयुक्तायांषष्ठ्यां
विल्वाभिमंत्रणं सप्तम्यांमूलयुक्तायांपत्रिकायाःप्रवेशनं पूर्वाषाढ़ायुताष्टम्यांपूजाहोमाद्युपोषणं उत्तरेणनव
म्यांतुबलिभिःपूजयेच्छिवां श्रवणेनदशम्यांतुप्रणिपत्यविसर्जयेत् कालिकापुराणे वोधयेद्बिल्वशाखायांषष्ठ्यां
देवींफलेषुच सप्तम्यांबिल्वशाखांतामावाह्यप्रतिपूजयेत् पुनःपूजांतथाष्टम्यांविशेषेणसमाचरेत् जागरंचस्वयंकु
र्याद्बलिदानंमहानिशि प्रभूतबलिदानंतुनवम्यांविधिवच्चरेत् विसर्जनंदशम्यांतुकुर्याच्चैवमहोत्सवैः धूलीकर्द्दम
निक्षेपैःक्रीडाकौतुकमंगलैः अथसर्वत्रतिथिनक्षत्रयोगादरोमुख्यःकल्पः तदभावेतुतिथिरेवग्राह्या तिथिःशरीरंदे
वस्यतिथिर्नक्षत्रमाश्रितं तस्मात्तिथिंप्रशंसंति विद्यापातिलिखितवचनात् तिथिनक्षत्रयोर्योगेद्वयोरेवानुपालनं

योगाभावे तिथिर्म्मोह्यादेव्याः पूजनकर्म्मणीति तत्रैव देवलोक्तेः श्वात्र च पत्रीप्रवेशात्पूर्वेद्युः सायंकाले षष्ठ्यभावेत
त्पूर्वदिने विवासनं कार्यं" काले त्यंतासत्वे त्वधिवासनलोपः" षष्ठ्यां सायं प्रकुर्वीत विल्ववृक्षे विवासनमिति पूर्ववे
चनादिति कल्पतरुः सायंस्मृतिः फलातिशयमात्रार्थी न तु कर्मलोप इत्याचार्यचूडामणिः अत्र क्रमः विल्वसमीपं
गत्वा देवीं विल्वं च संपूज्य प्रार्थयेत् तत्र मंत्रः रावणस्य वधार्थाय रामस्यानुग्रहाय च अकाले ब्रह्मणा वोधो देव्या
स्त्वयि कृतः पुरा अहमप्याश्रितः षष्ठ्यां सायाह्ने वोधयाम्यतः श्रीशैलशिखरे जात श्रीफललक्ष्मीनिकेतन नेतव्योसि
मया गच्छ पूज्यो दुर्गास्वरूपतः इति एवं देवीमधिवास्य परदिने निमंत्रित विल्वशाखापत्रीप्रवेशात्पूजां कुर्यात् तदु
क्तं हेमाद्रौ लैंगे मूलाभावे तु सप्तम्यां केवलायां प्रवेशयेत् युग्माभ्यां नव विल्वस्य फलाभ्यां शाखिकां तथा तथैव प्र सप्तमी २
तिमां देव्याः स्नात्वाभ्युदय प्रवेशयेत् अत्र चोपवास पूजायां रौद्र्यपि कीर्णमाह्या नतु युग्मवाक्यात्पूर्वा युग्माद्यावर्षवृद्धि
श्च सप्तमी पार्वतीप्रिया एवरूपमीक्षंतेन तत्रातिथियुग्मते ति कृत्यतत्वार्णवोदाहृतवचनात् भगवत्याः प्रवेशादिवि

सर्गान्तास्त्वयाःक्रियाः तिथिंबुदयगामिनींसर्व्वास्ताःकारयेद्बुधः इतितिथितत्वेनंदिकेश्वरपुराणाच्च दुर्गा
१२२ भक्तितरंगिणामप्येवं तत्रापिवटिकातोन्यूनत्वेपराऽनकापी व्रतोपवासनियमेवटिकैकापियाभवेदितिदे
वलोक्तेरितिगौडाः दाक्षिणात्यास्तुपूर्वेवचनमहद्वाद्युग्मवाक्यात्पूर्वांकुर्वन्ति पत्रिकापूजास्त्वपूर्वाह्णएवकार्या
नतुमूलानुरोधात्मध्याह्नादाविति कृत्यतत्वार्णवेउक्तं पत्रिकास्तुरंभाकचीहरिद्राचजयंतीविल्वदाडिमौ
अशोकोमानवःधान्यंचधान्यादिनवपत्रिकाइति तत्रैवोक्ताः अस्यामेवसप्तम्यां देवीत्रिरात्रमुक्तंहेमाद्रौ प्रतिप
दादिनवतिथिषुउपवासादिकरणासामर्थ्येसप्तम्यादिदिनत्रयेवाकुर्यात् तदाहधौम्यः आश्विनेमासिशुक्लेतु
कर्त्तव्यंनवरात्रकं प्रतिपदादिक्रमेणैवयावच्चनवमीभवेत् त्रिरात्रंवापिकर्त्तव्यंसप्तम्यादियथाक्रमं अतएवहेमाद्रौ
देवीपुराणेमंगलाव्रते आश्विनेवाथमाघेवाचैत्रेवाश्रावणेपिवा कृष्णाष्टम्यादिकर्त्तव्यंव्रतंशुक्लावधिंहरे यावच्छु
क्लाष्टमींशक्त्याउपोष्यनुविधानतः दानंहोमोजपःपूजा कन्याभोज्यानथान्वहं महाभैरवरूपेणासस्थिमालाधराम्बये

पूजनीयाविशेषैर्ब्रह्मवैवर्तनामपुराणे इतिमासचतुष्टयेऽभिधाय अथवानवरात्रंचसप्तपंचत्रिकं दिवा एकभक्तेन
नक्तेनायाचितोपोषितैःक्रमात् पूजयीताशिवेनशक्त्यावच्छुक्लाष्टमीभवेत् सर्वकार्याणिसिद्ध्यंतिशक्तिनात्यत्र
संशयः इत्युक्तं दिवेत्येकरात्रमुक्तं गोविंदार्णवेदेवीपुराणे नवरात्रव्रतंशक्त्यास्त्रिरात्रंचैकरात्रकं व्रतंचरतियोभक्त्या
तस्मैदास्यामिवांछितं तत्रापिसप्तम्याःपूर्वोक्तोनिर्णयः अत्रतिथियोगपद्येतंत्रेणोपवासःतिथिद्वयनिमित्तपू
जादिकंतुभेदेन अत्रविशेषोनिर्णयामृतेभविष्ये सप्तम्यांनवगेहानिदारुजानिनवानिच एकंवापितभावेनकार
येत्सुसमाहितः दुर्गागृहंप्रकर्तव्यंचतुरस्रंसुशोभनं तन्मध्येवेदिकांकुर्याच्चतुर्हस्तांसमांशुभां तस्यांसिंहासनंदद्या
न्मृदंकंबलाजिनसंयुतं तत्रदुर्गांप्रतिष्ठाप्यसर्वलक्षणसंयुतां भुजैश्चतुर्भीरुचिरैर्दशभिर्वाविभूषितां तप्तहाटकवर्णा
भ्यांत्रिनेत्रांशशिशेखरां अनेककुसुमाकीर्णांकपर्द्देनसुशोभितां नितंबबिंबसंनद्धकिंकिणीक्वाणनादिनीं शू
लचक्रादंडशक्तिवज्रचापासिधारिणीं घंटाक्षमालाकरकपालपात्रलसत्करां तदग्रेछिन्नशिरसंमहिषंवरुधिराक्तं

श्री ३

तानिःसृतार्द्दितनुं कंठनालच्चर्मासिधारिणां देवीध्वतकरग्रीवं शूलेनोरसिताडितं नागपाशेनविक्षिप्तं हर्य्यपि द्विणा सिंहेन १

१२३ पिविद्रुतं वमद्रुधिरवक्त्रेणाधुन्वतोर्ध्वसटान्रुषा सर्वतोमातृचक्रेणासेव्यमानांस्मरेत्तथेति तत्रदेवीप्रकर्त्तव्या

हैमीवाराजतीतथा मृद्दार्वीलिङ्गरोपेतावाखड्गशूलेचपूजयेत् वार्द्धीदानुभद्रेदेवीमूर्त्तिस्थापनेविशेषोदुर्गाभक्तितरं

गिन्यांदेवीपुराणे याम्यास्याशुभदादुर्गापूर्वास्याजयवर्द्धिनी पश्चिमाभिमुखीनित्यंनस्याप्यासौम्यादिङ्मुखी प्रति

माभावेविशेषस्तत्रैव हैमराजतमद्धातुशैलचित्रार्पितापिवा खड्गशूलेर्चितादेवीसर्वकामफलप्रदा यद्यद्यस्याप्यु

धंप्रोक्तंतस्मिंस्तांप्रतिपूजयेत् देवीभक्त्यार्चितापुंसांराज्यायुःसुखतोष्यदा कृत्यतत्त्वार्णवेकालिकापुराणे लिंगस्थां

पूजयेद्देवीं मंडलस्थांतथैवच पुस्तकस्थांमहादेवीपावकेप्रतिमासुच चित्रेचत्रिशिखेखड्गे जलस्थांवापिपूजयेत्

विल्वपत्रैर्यजेद्देवींतथाजातिप्रसूनकैः नानापिष्टकनैवेद्यैर्धूपदीपैर्मनोहरैः भगलिंगाभिधानैश्च भगलिंगप्र

गीतकैः भगलिंगक्रियाभिश्चप्रीणयेद्वरचंडिकां परैर्नाक्षिप्यतेयस्तुयःपरान्नाक्षिपत्यपि तस्यक्रुद्धाभगवतीशृणा

खड्गे ३

पंदद्यात्सुदारुणां चित्रमन्मथ्यादोस्तानाद्यसंभवेत्तत्रैवोक्तं ॐ तिकस्थापितेरवड्के स्नापयेद्दर्पणोधचेति अथसप्तमी
पूजाविधिः प्रतिपद्युक्तविधिना फलसंकीर्त्तनांतेनचपत्रिकामन्मथदुर्गापूजाबलिदानादिकरिष्यइति संकल्प्य पूर्वेनि
मंत्रित विल्वसमीपंगत्वासंपूज्यागच्छसर्वकल्याणीतिपूर्वोक्तमंत्रंपठित्वा विल्ववृक्षमहाभाग सदात्वंशंकरप्रियः
गृहीत्वातवशाखांचदेवीपूजांकरोम्यहं शाखाच्छेदोद्भवंदुःखंनचकार्यंत्वयाप्रभो गृहीत्वातवशाखांचपूजादुर्गेतिवि
स्मृतिः उत्तिष्ठपत्रिकेदेविसर्वकल्याणहेतवे पूजांगृहाणसकलामस्माकंवरदाभव मेरुमंदरकैलाशहिमवच्छिखरे
गिरौ जातःश्रीफलवृक्षत्वमंबिकायाःसदाप्रियः इतिसंप्रार्थ्य ॐ छिंधिफट् ॐ हुंफट् स्वाहेति छित्वासंपूज्य ॐ चामुं
डेचलचरइतिवाद्यघोषेणदेवींतांचगृहेप्रवेश्य आरोपितासिदुर्गेत्वंमन्मथ्याश्रीफलेपिच स्थिरानितांतंभूत्वाचगृहेत्वं
कामदाभवेत्स्थिरीकृत्यरंभादिपत्रिकाःपंचगव्येनपंचामृतेनचस्नापयित्वावस्त्रेणवेष्ट्यस्थापयेत् ततःपूर्ववत्संकल्पं
कृत्वाक्षतानादायदेवीमावाहयेत् तत्रमंत्रः आवाहयाम्यहंदेविमन्मथ्यांश्रीफलेतथा कैलाशशिखराद्देवि विंध्याद्रेर्हि

मपर्वतात् आगत्यविल्वशाखायांचंडिकेकुरुसन्निधिं स्थापितासिमयादुर्गेपूजयेत्वांप्रशीदमे आयुरारोग्यमैश्वर्य्यंदेहि
देविनमोस्तुते दुर्गेदुर्गस्वरूपासिसुरतेजोमयेर्चिते महानंदकरेदेविप्रशीदममसिद्धये एह्येहिभगवत्यंवशक्रदायज
यप्रदे भक्तितःपूजयामित्वांदुर्गेदेविसुरार्चिते पल्लवैश्चफलोपेतैःपुष्पैश्चसुमनोहरैः पल्लवसंस्थितेदेविपूजयेत्वांप्र
शीदमे दुर्गेदेविइहागच्छसांनिध्यमिहकल्पय यज्ञभागान्गृहीतात्वंयोगिनीकोटिभिःसहेति ततोमूलमंत्रेणपा
द्यादिगंधांतोपचारैः संपूज्यअमृतोद्भवंचश्रीवृक्षंशंकरस्यसदाप्रियं विल्वपत्रंप्रयच्छामिपवित्रंतेसुरेश्वरीतिविल्वपत्रं ब्र
ह्मविष्णुशिवादीनांद्रोणपुष्पंसदाप्रियं तत्तेदुर्गेप्रयच्छामिसर्वकामार्थसिद्धयइतिद्रोणपुष्पं नैवेद्यधूपादिदक्षिणांतांपू
जांमूलेनकृत्वाप्रार्थयेत् ॐमहिषघ्निमहामायेचामुंडेमुंडमालिनि आयुरारोग्यमैश्वर्यंदेहिदेविनमोस्तुते कुंकुमेनसमा
लब्धेचंदनेनविलेपिते विल्वपत्रकृतापीडदुर्गेहंशरणंगतः रूपंदेहियशोदेहिभगंभगवतिदेहिमे पुत्रान्देहिधनंदेहिस
र्वान्कामांश्चदेहिमे सर्वमंगलमांगल्यइतिवसंप्रार्थ्यपत्रिकाःप्रपूजयेत् कदल्यांब्रह्माणींदाडिमेरक्तदंतिकां धान्येलक्ष्मीं ह

रिद्राप्पां दुर्गीमानेचामुंडांकचौकालिकांविल्वेशिवांअशोकेशोकरहितांजयंत्यांकीर्त्तिकींचावाह्यसंपूज्यदुर्गायैवलिंदधा
त् अन्नशस्त्रादिपूजावक्ष्यते ततःस्तुतिंपठेत् तदुक्तंशिवरहस्ये दुर्गांशिवांशांतिकरींब्रह्माणींब्रह्मणःप्रियां सर्वलोकप्र
णेत्रींचप्रणमामिसदाशिवां मंगलांशोभनांशुद्धांनिःकलांपरमांकलां विश्वेश्वरींविश्वमातांचंडिकांप्रणमाम्यहं सर्वदेव
मयींदेवींसर्वरोगभयापहां ब्रह्मेशविष्णुनमितांप्रणमामिसदाऽमां विंध्यस्थांविंध्यनिलयांदिव्यस्थाननिवासिनीं
योगिनींयोगमातांचचंडिकांप्रणमाम्यहं ईशानमातरंदेवीमीश्वरीमीश्वरप्रियां प्रणतोस्मिसदादुर्गांसंसारार्णवतारिणीं
यइदंपठतिस्तोत्रं शृणुयाद्वापियोनरः समुक्तःसर्वपापैस्तुमोदतेदुर्गयासह अथमहाष्टमी साचपरयुता शुक्लपक्षेष्टमीचै
वशुक्लपक्षेचतुर्दशीपूर्वविद्धानकर्त्तव्याकर्त्तव्यापरसंयुतेतिब्रह्मवैवर्त्तात् मदनरत्नेस्मृतिसंग्रहे शरन्महाष्टमीपूज्यानवमीसं
युतासदा सप्तमीसंयुतानित्यंशोकसंतापकारिणी जंभेनसप्तमीयुक्तापूजितातुमहाष्टमी इंद्रेणनिहतोजंभस्तस्मोद्दानवपुं
गवः तस्मात्सर्वप्रयत्नेनसप्तमीमिश्रिताष्टमी वर्जनीयाप्रयत्नेनमनुजैःशुभकांक्षिभिः सप्तमीशल्यसंयुक्तांमोहादज्ञानतोपि

सप्तमीशल्यार्चिकोमामामुपहंता ४
वा महाष्टमीं प्रकुर्वाणो नरकं प्रतिपद्यते सप्तमीकलया यत्र परतश्चाष्टमी भवेत् तेन शल्यमिदं प्रोक्तं पुत्रपौत्रक्षयप्रदं तथा
१२५ पुत्रान्हन्ति पशून्हन्ति हन्ति राष्ट्रं सराजकं हन्ति जातानजातांश्च सप्तमीसहिताष्टमी तेन नात्र त्रिमुहूर्त्तवेधः तदा घटिकामात्राप्यौ
दयिकी ग्राह्या व्रतोपवासनियमे घटिकैकापि या भवेत् इति देवलोक्तेः गौडा अप्येवमाहुः अत एवोक्तं भोजराजेन न च स
प्तमीशल्यं सनोपि हंतेति इयं भौमेति शस्ता अष्टम्यामुदिते सूर्ये दिनांते नवमी भवेत् कुजवारो भवेत्तत्र पूजनीया प्रयत्नत इति
मदनरत्ने वचनात् सप्तमीशल्यसंविद्धा वर्जनीया सदाष्टमी स्तोकापि सा महापुण्या यस्यां सूर्योदयो भवेदिति मदनरत्ने स्मृ
तिसमुच्चयवचनात् अष्टमी नवमीयुक्ता नवमी चाष्टमीयुतेति पाद्मवचनाच्च इयमेव मूलयुक्ता चेन्महानवमीसंज्ञा आ
श्वयुक्शुक्लपक्षे याष्टमी मूलेन संयुता सा महानवमी प्रोक्ता त्रैलोक्येपि सुदुर्लभेति हेमाद्रौ स्कांदात् मूलयुक्तापि सप्तमी
युता चेत्त्याज्यैवेत्युक्तं निर्णयामृते दुर्गोत्सवे मूलेनापि हि संयुक्ता सदा त्याज्याष्टमी बुधैः लेशमात्रेण सप्तम्या अपि स्याद्यदि
दूषितेति महाष्टमी पूर्वविद्धा पूर्वाह्णव्यापित्वपूर्वा न्यथा परैवेति निर्णयदीपमतं एतच्चतुष्कत्वादुपदंप रूपनारायणधृत

देवीपुराणे सप्तमीवेधसंयुक्ता यैः कृता तु महाष्टमी पुत्रदारधनैर्हीना भ्रमंतीहि पिशाचवत् यत्तु सप्तम्यां मुहूर्तं स्यात् ये
यैपरतोयाष्टमी भवेत् तत्र दुर्गोत्सवं कुर्यात् न कुर्याद् अपरेऽहनीति विश्वरूपनिबंधवचनं तदाश्विन कृष्णाष्टमीविषयं
कन्यायां कृष्णपक्षे तु पूजयित्वाष्टमीदिने नवम्यां बोधयेद्देवीं गीतवादित्रनिस्वनैरिति देवीपुराणे तत्रापि पूजोक्ते
रितिहेमाद्रौ निर्णयामृते चोक्तं यानि तु भद्रायां भद्रकाल्याश्च मध्ये स्याद् अर्चनक्रिया तस्माद्धि सप्तमीविद्धा कार्या
दुर्गाष्टमी बुधैरिति यच्च मोहचूलोत्तरे ब्राह्मे च आश्विनस्य सिताष्टम्यां मध्यरात्रे तु पार्वती भद्रकाली समुत्पन्ना
पूर्वाषाढासमायुते तथा तत्राष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी प्रादुर्भूता महाघोरा योगिनीकोटिभिः सहे
ति यच्च मदनरत्ने महाष्टम्याश्विने मासि शुक्ला कल्याणकारिणी सप्तम्यापि युता कार्या मूलेनत्र विशेषतः इ
ति तानि परदिने ष्टम्यभावविषयाणीति मदनरत्ने उक्तं यत्तु तत्रैव परदिने ष्टमी सत्वेति पूर्वविद्धाविधायकं वच
नं यदाष्टमीं तु संप्राप्य ऽस्तं याति दिवाकरः तत्र दुर्गोत्सवं कुर्यात् न कुर्याद् अपरेऽहनीति दुर्भिक्षं तत्र यानीयात् नवम्यां

यत्रपूज्यतेइति तत्परदिनेदशम्यांनवम्यभावविषयं यदासूर्योदयेनस्यात्नवमीचपरेहनि तदाष्टमींप्रकुर्वीतस
मम्यासहितांनृपेति तत्रैवस्मृतिसंग्रहोक्तेः उत्तरांस्तिथयोयत्रस्वल्पंजातिनराधिपपूर्वाष्टमीतदाकुर्यादन्यथात्व
शुभंभवेदितिदुर्गोत्सवोक्तेश्चेतिमदनरत्ने वस्तुतस्तुइदंवचनद्वयं अष्टमीनवम्योःसूर्योदयद्वयासंबंधपरं अन्य
थापूर्वोक्तविरोधादितिदिक् यत्त्वअहंभद्राचभद्राहंनावयोरंतरंक्वचित् सर्वसिद्धिप्रदास्याभिभद्राप्रामर्चिता
स्त्वहमितिदेवीपुराणांतद्दिष्टिकरणमध्येपूजाविधानार्थं विष्टिंत्यक्त्वामहाष्टम्यांममपूजांकरोतियः तस्यपूजा
फलंनस्यात्तेनाहमवमानितेतितत्रैवोक्तेरितिनिर्णयामृते तथाकालिकापुराणे सप्तम्यांपत्रिकापूजाअष्टम्यां
चाप्युपोषणं पूजाचजागरश्चैवनवम्यांविधिवद्बलिरिति अष्टम्युपवासश्चपुत्रवतानकार्यः उपवासंमहाष्टम्यां
पुत्रवान्नसमाचरेत् यथातथापूजाचजागरश्चैवनवम्यांविधिवद्बलिरिति अष्टम्युपवासश्चपुत्रवतानकार्यः उप
वासंमहाष्टम्यां वापूतात्माव्रतीदेवींप्रपूजयेदितितत्रैवोक्तेः रूपनारायणीयेब्राह्मे अतोर्थंपूजनीयासातस्मिन्नहनि

मानवैः उपोषितैर्वस्त्रधूपमाल्यरत्नानुलेपनैः पशुभिःपानकैर्हृद्यैं रात्रौजागरोनच्च दुर्गागृहेचशस्त्राणिपूजितव्या
निपंडितैः वाद्येभांडानिचिन्हानिकवचान्यायुधानिच अत्रविशेषोहेमाद्रौ निर्णयामृतेचभविष्ये कन्यागतेसवितरि
शुक्लपक्षेष्टमीयुता मूलनक्षत्रसंयुक्तासामहानवमीस्मृता नवम्यांपूजितादेवीददात्यभिमतंफलं सापुण्यापवि
त्राचसाधन्यासुखदायिनी तस्यांसदापूजनीयाचामुंडामुंडमालिनी सदेत्युक्तेर्नित्यतापि तस्यांयेत्तुपयुज्यंतेप्राणि
नोमहिषादयः सर्वेतेस्वर्गतिंयांतिघ्नतांपापंनविद्यते यावन्नचालयेत्क्षात्रंपशुस्तावन्नहन्यते नतथावलिदानेनपु
ष्पधूपविलेपनैः यथासंतुष्यतेमेषैर्महिषैर्विंध्यवासिनी एवंचविंध्यवासिन्यांनवरात्रोपवासतः एकभक्तेननक्तेनस्व
शक्त्यायाचितेनच पूजनीयाजनैर्देवीस्थानेस्थानेपुरेपुरे स्नातैःप्रमुदितैर्हृष्टैर्ब्राह्मणैःक्षत्रियैर्नृपैः वैश्यैःशूद्रैर्भक्तियु
तैर्म्लेच्छैरन्यैश्चमानवैः स्त्रीभिश्चकुरुशार्दूलतद्विधानमिदंश्रृणु जयाभिलाषीनृपतिःप्रतिपत्प्रभृतक्रमात् लोहाभि
शारिकंकर्मकारयेद्यावदष्टमीमिति लोहाभिसारिकविधानन्तुनैवोक्तं प्रागुदक्प्रवणेदेशेपताकाभिरलंकृतं मंडपंका

रयेद्दिव्यंनवसमकरंपरं षोडशहस्तमित्यर्थः आग्नेय्यांकारयेत्कुंडंहस्तमात्रंसुशोभनं मेखलात्रयसंयुक्तंयोन्या श्व
१२७ त्यदलाभया राजचिन्हानिसर्वाणिशस्त्राण्यस्त्राणियानिच आनीयमंडपेतानिसर्वाण्यत्राधिवासयेत् ततस्तुब्राह्म
णःस्नातःशुक्लांवरधरःशुचिः ॐकारपूर्वकैर्मंत्रैःसलिंगैर्जुहुयाद्धृतं शस्त्रास्त्रमंत्रैर्होतव्यंपायसंघृतसंयुतं हुतशेषं
तुरंगाणांराजानमुपहारयेत् लौहाभिशारिकंकर्मतेनैतद्दीषिभिःस्मृतं घृतपल्ययनानश्वान् गजांश्चसमलंकृतां
भ्रामयेन्नगरेनित्यमेवंदिवसपुरःसरं प्रत्यहंनृपतिःस्नात्वासंपूज्यपितृदेवताः पूजयेद्राजचिन्हानिफलमाल्यविलेप
नैः तस्याभिशारणाद्राज्ञोविजयःसमुदाहृतः पूजामंत्रान्प्रवक्ष्यामिपुराणोक्तानहंतव येःपूजिताःप्रयच्छंतिकीर्त्तिमायु
र्यशोवलं अथमंत्राः विष्णुधर्मोत्तरोक्ताः छत्रस्येयथांवुदःछादयतिशिवायेमांवसुंधरां तथाछादयराजानंविजयारोग्य
वृद्धये चामरस्य शशांककरसंकाशक्षीरडिंडीरपांडुर प्रोत्सारयाशुदुरितंचामरामरदुर्लभ अथाश्वस्य गंधर्वकुलजा
तस्त्वंमाभूयाःकुलदूषकः ब्रह्मणःसत्यवाक्येनसोमस्यवरुणस्यच प्रभावाच्चहुताशस्यवर्द्धयत्वंतुरंगमान् तेजसाचैव

सूर्यस्य मुनीनां तपसा तथा रुद्रब्रह्मचर्येण पवनस्य बलेन च स्मर त्वं राजपुत्रस्त्वं कोस्तुभं च मणिं स्मर यां गतिं ब्रह्महा
गच्छेन्मातृहा पितृहा तथा भूमिहानृतवादी च दत्रियश्च पराङ्मुखः सूर्याचंद्रमसो वायुर्यावत्पश्यंति दुःकृतं व्रजाश्वतां
गतिं क्षिप्रं तच्च पापं भवेत्तव निःकृतो यदि वा छिन्नो युद्धाध्वनि तुरंगम रिपून्विजित्य समरे सह भर्त्रा सुखी भवेति अ
थ ध्वजस्य शक्रकेतो महावीर्य सुपर्णमवर्ण्णाश्रयाम्यहं पतत्रिराज नमस्तेस्तु तथा नारायणध्वज काश्यपेयामृताहर्त्तनागा
रे विष्णुवाहन अप्रमेय दुराधर्ष रणे देवारिसूदन गरुत्मान्मारुतगतिस्त्वयि सन्निहितो यतः साश्वं त्वायुधान्यत्र रक्ष
त्वं च रिपून्दह अथ पताकायाः हुतभुग्वसवो रुद्रा वायुः सोमो महर्षयः नागकिन्नरगंधर्वयक्षभूतगणा ग्रहाः प्रमथ
स्तु सहादित्यैर्भूतेशो मातृभिः सह शक्रः सेनापतिः स्कंदो वरुणश्चाश्रितास्त्वयि प्रदहंतु रिपून्सर्वान् राजा विजयमृच्छतु
यानि प्रयुक्तान्यरिभिर्भूषणानि समंततः पतंतु परि शत्रूणां हतानि तव तेजसा हिरण्यकश्यपोर्युद्धे युद्धे देवासुरे तथा काल
नेमिवधे यद्वत्तद्वत्त्रिपुरघातने शोभितासि तथैवाद्य शोभयास्मांश्च संस्मर नीलान्श्वेतान्परान्दृष्ट्वा नश्यंत्वाशु नृपार

यः व्याधिभिर्विविधैश्चौरैः शस्त्रैश्च युधि निर्जिताः पूतनारेवतीनाम्ना कालरात्रीश्च याः श्रुताः दहचाशु रिपून् सर्वा
१२८ न्पताके त्वं मयार्चिता अथ गजस्य कुमुदैरावणोपद्मः पुष्पदंतोथ वामनः सुप्रतीकोंजनो नील एते ष्टौ देवयो
नयः तेषां पुत्राश्च पौत्राश्च वर्नेन्यष्टौ समाश्रिताः मंदो भद्रो मृगश्चैव गजः संकीर्ण एव च वने वने प्रसूतास्ते यूथा
नि सुमहांति च पांतु त्वां वसवो रुद्रा आदित्याः समरुद्गणाः भर्त्तारं रक्ष नागेंद्र स्वामिवत् प्रतिपाल्यतां अवाप्नुहि जयं
युद्धे गमने श्वस्तिनो व्रज श्रीस्ते सोमाद्बलं विष्णोस्तेजः सूर्याज्जवो निलात् स्थैर्यं मेरोर्जयं रुद्राद्यशो देवात्पुरंदरात्
युद्धे रक्षंतु त्वा नागास्त्वां दिशाश्च सह देवतैः अश्विनौ सह गंधर्वैः पांतु त्वां सर्वतः सदेति अथ खड्गमंत्रः असिर्विशसिनः
खड्गस्तीक्ष्णधारो दुरासदः श्रीगर्भो विजयश्चैव धर्मधारस्तथैव च एतानि तव नामानि स्वयमुक्तानि वेधसा न
क्षत्रं कृत्तिका ते तु गुरुर्देवो महेश्वरः रोहिणं च शरीरं ते दैवतं च जनार्द्दनः पिता पितामहो देवस्त्वं मां पालय सर्वा
दा नीलजीमूतसंकाशस्तीक्ष्णदंष्ट्रः कृशोदरः भावशुद्धो मर्षणश्च अतितेजास्तथैव च इयं येन धृता क्षोणी हत

असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः। श्रीगर्भो विजयश्चैव धर्मपालस्तथैव च॥

श्चमहिर्खीसरः तीक्ष्णधाराय ध्रुद्धायतस्मैखड्गायतेनमः अथछूरिकायाः सर्वायुधानांप्रथमंनिर्मितासिपिनाकिना

शूलायुधाद्विनिःकृष्यकृत्वामुष्टिग्रहंशुभं चंडिकायाःप्रदत्तासिसर्वदुष्टनिवर्हणी तयाविस्तारिताचासिदेवा

नांप्रतिपादिता सर्वसत्वांगभूतासिसर्वाशुभनिवर्हणी छुरिकेरक्षमांनित्यंशांतिंयच्छनमोस्तुते अथकट्टारकपूजा

रक्षांगानिगजांरक्षरक्षवाजिधनानिच ममदेहंसदारक्षकट्टारकनमोस्तुते कट्टारकोमध्यदेशेकटारीइतिप्रसिद्धो ध

नुःपूजा सर्वायुधमहामात्रसर्वदेवारिसूदन चापमांसमरेरक्षसायकंसर्ववैरिरिह धृतंकृष्णेनरक्षार्थंसंहारायहरेण

च त्रयीमूर्त्तिगतंदेवधनुरस्त्वंनमाम्यहं कुंतपूजा प्रासपातयशत्रूंस्त्वमनयानाकमापया गृहाणजीवितंतेषांम

मशैन्यंचरक्ष्यतां चर्मपूजा प्रासपातयशत्रूंस्त्व शर्मप्रदस्त्वंसमरेचर्मसैन्येयशोधमे रक्षमांरक्षणीयोहंतापनीयन

मोस्तुते अथकनकदंडमंत्रः प्रोत्सारणायदुष्टानांसाधुसंरक्षणायच ब्रह्मणानिर्मितश्चासिव्यवहारप्रसिद्धये य

शोदेहिसुखंदेहिजयदोभवभूपतेः ताडयस्वरिपूनसर्वान्हेमदंडनमोस्तुते अथदुंदुभिमंत्रः दुंदुभेत्वंसपत्नानांबो

राष्ट्रपवर्द्धनः भवभूमिपसैन्यानांतथाविजयवर्द्धनः यथाजीमूतघोषेणप्रहृष्यंतिचवर्हिणः तथास्तुतव
१२९ शब्देनहर्षोस्माकंमुदावहः यथाजीमूतशब्देनस्त्रीणांत्रासोभिजायते तथात्रतवशब्देनत्रस्यंत्वस्मद्विषोरणे
अथशंखमंत्रः पुण्यस्त्वंपुण्यशंखानांमंगलानांचमंगलं विष्णुनाविधृतोनित्यंअतःशांतिप्रदोभव अथसिंहा
सनमंत्र विजयोजयदोजेतारिपुघातीशुभंकरः दुःखहाधर्मदःशांतःसर्वारिष्टविनाशनः एतेवैसंनिधौयस्मात्त
वसिंहामहावलाः तेनसिंहासनेतित्वंवेदैर्मंत्रैश्चगोप्यसे त्वयिस्थितःशिवःशांतस्त्वयिशक्रःसुरेश्वरः नमस्तेस
र्वतोभद्रभद्रदोभवभूपतेः त्रयलोक्यजयसर्वस्वसिंहासननमोस्तुते तथैवकर्मचिन्हानिस्वानिपूज्यानिशिल्पिभिः
लोहाभिसारिकंकर्मकृत्वैवंमंत्रपूर्वकं नियमंचतथाष्टम्यांपूर्वाह्नेस्नानमाचरेत् कुंकुमचंदनचंपकचतुःसमैःशैलपि
ष्टैश्चचर्चितगात्रींदेवींकुसुमैरभ्यर्च्य पद्मैःकुमुदैःसपद्मपुष्पैःसदीपधूपैःसनैवेद्यैः मांसैर्बल्युपहारैर्मंगलशब्दैःस
मुच्छ्रैं विहितच्छत्रैर्यानैःस्पंदनक्षितशालधारिजनलोकैः तुष्टैःपशवश्चादितुनिवेद्यतेसर्वमेवभगवत्यै दुर्गायासापूजनी
लिंगेः ९

याचतद्दिनेंद्रोराणुष्यकैः साचमान्यासुरेशान्यास्तस्यारूढापतोग्रतः ततःखड्गंनमस्कृत्यशत्रूणांवधसिद्धये
इच्छेतविजयंराज्यंसुत्तिद्वंचात्मनेनृपः पुनःपुनः प्रणम्यायांसंस्मरन्हृदयेशिवां सर्वंकृत्वेतिकौरव्यषष्ठ्यांजा
गरंनिशि नटनर्तकगीतैश्चकारयेच्चमहोत्सवं एवंषष्ठ्यांनिशांनीत्वाप्रभातेरुणोदये ब्रातपन्महिषान्मेषा
न्नरटतोनतकंधरान् शतमर्द्धशतंवापितदर्द्धंचापयेद्वया सुरासवभृतैःकुंभैस्तर्पयेत्परमेश्वरीं कापालिकेभ्य
स्तद्देयंदासीदासजनेतथा ततोपरान्हसमयेनवम्यांवैरथेस्थितां भवानींभ्रामयेद्याष्ट्रे स्वयंराजाशस्त्रवान्
कश्चिच्चोपोषितावीरोविध्यतोनेनखड्गवान् भूतेभ्यस्तुवलिंदद्यात्मंत्रेणानेनसौमिषं सरक्तंजलंचान्नंग
धपुष्पादितैर्युतं त्रींस्त्रीन्वारानसमूलेनदिग्विदिक्षुकिरेद्वलिं मंत्रश्च वलिंगृह्णंतुमेदेवाआदित्यावसवस्तथा
मरुतश्चाश्विनौरुद्राःसुपर्णाःपन्नगाग्रहाः असुरायातुधानाश्चपिशाचोरगराक्षसाः डाकिन्योयक्षवेतालायो
गिन्यःपूतनाःशिवाः जंभकाःसिद्धगंधर्वामालाविद्याधरानगाः दिक्पालालोकपालाश्चयेचविघ्नविनायकाः जग

तःशांतिकर्त्तारो ब्रह्माद्याश्च महर्षयः माविघ्नं मा च मे पापं मासंतु परिपंथिनः सौम्या भवंतु तृप्ताश्च भूतप्रेतासुखाव
१३० हा इति इति महाष्टमी महानवमी तु पूर्वयुता ग्राह्या पूर्वोक्तवचनात् नवमी दुर्गाव्रते श्रावणीति दीपिकोक्तेः श्रावणी
दुर्गनवमी दूर्वा चैव हुताशनी पूर्वविद्धा प्रकर्त्तव्या शिवरात्रिर्वलेर्द्दिनमिति हेमाद्रौ पाद्मोक्तेश्च भविष्येपि आश्व
युक्शुक्लपक्षे तु अष्टमी मूलसंयुता सा महानवमी नाम त्रैलोक्येपि सुदुर्ल्लभेति मूलमुपलक्षणं दुर्गापूजासु
स्र नवमी मूलाद्यृक्षत्रयान्विता महती कीर्त्तिता तस्यां दुर्गां महिषमर्द्दिनीमिति मदनरत्ने लैंगात् अत्र पूजयेदिति शे
षः यानि तु साकार्योदयगामिन्यां तिथावुदयगामिन्यामित्यादि प्रागुक्तानि तानि नवमीभिन्नतिथिपराणि
नवम्यां विशेषउक्तः वेधश्च मुहूर्त्तत्रयेणो वज्ञेयः यद्यपि हेमाद्रिमते मुहूर्त्तद्वयात्मापि वेधोस्ति तथापि सूर्योदयप्र
वसः सायं तु त्रिमुहूर्त्त एव तदुक्तं दीपिकायां त्रिमुहूर्त्तगा तु सकला साप्येइति माधवोपि सायं तूत्तरप्रातस्तन्न्यूनप्रातु
नविध्यत इति तेन त्रिमुहूर्त्तयोगे पूर्वा नवमी पूर्वोक्तवचनात् नकुर्यान्नवमीं तात दशम्यां तु कदाचनेति स्कांदे पर नि

पक्षेच ३

षेधाच्च त्रिमुहूर्त्तयोगाभावेतुनिषिद्धापिपरैवग्राह्येतितिनिष्कर्षः यत्तु नवम्यांचजपंहोमंसमाप्यव्रतवानपिवेति
संमहोत्तेः व्रतंचजागरश्चैवनवम्यांविधिवद्बलिरितिदेवीपुराणाच्च नवम्यांहोमवल्यादिविहितंतत्रश्रीश्चयु
क् शुक्लेनवमीमुहूर्त्तवाकलायदि सातिथिःसकलाज्ञेयालक्ष्मीविद्याजयार्थिभिरितिसौरपुराणात् सूर्योदये
परंरिक्तापूर्णास्यादपरायदि वलिदानंप्रकर्त्तव्यंतत्रदेशस्युभावहं वलिदानेकृतेष्टम्यांपुत्रभंगोभवेद्भूपेतिम
दनरत्नेदेवीपुराणाच्च वल्यादौपराकार्याउपवासादौपूर्वेतिमदनरत्नेउक्तं प्रतापमार्त्तंडेप्येवं यत्तुअष्टम्यां
वलिदानेनपुत्रनाशोभवेद्ध्रुवमितिकालिकापुराणं तत्संधिपूजापरं अष्टमीनवमीसंधौतत्तीपादवलुकस्यति
इति तत्रैवतदुक्तेः कामरूपनिबंधे अष्टम्याःशेषदंडश्चनवम्याःपूर्वएवच तत्रयाक्रियतेपूजाविज्ञेयासामहा
फला अष्टमीमात्रेभवत्येव आश्विनेपूजयित्वातुअर्द्धरात्रेष्टमीषुच घातयंतिपशून्भक्त्यातेभवंतिमहाफलाः
तथा कन्यासंस्थेरवौवीरंशुक्लाष्टम्यांप्रपूजयेत् सोपवासोनिशार्द्धेतुमहाविभवविस्तरैः तथा पशुघातश्चकर्त्तव्यो

संबोधनम् १

अष्टमीनवम्योर्द्वितीयासंधौ ४

१३२ गवलाजं वधस्तत्येति रूप नाश परोणीये देवीपुराणात् तत्रैव भविष्ये तस्मादियं महापुण्या नवमी पापनाशिनी
उपोष्या प्रयत्नेन सततं सर्वपार्थिवैः निर्णयदीपे तु महानवमी परदिने पराह्नव्यापित्वे परान्यथा पूर्वा श्रैवर्त्तनात्पू
र्वकालेन नवमी स्यात्परेहनि दुर्गावर्तिन्नपूर्वे घुः पूर्वाह्ने त्यष्टमीयदि इति धौम्यवचनादित्युक्तं अस्य तु सारदनवमीवि
षयत्वसमूलत्वं च विमर्श्यं यानि तु नंदायां ज्वलते वह्निः पूर्णायां पशुघातनं भद्रायां गोकुलक्रीडा तत्र राज्यं विन
श्यतीति नवम्यामपराह्ने तु बलिदानं प्रशस्यते दशम्यां वर्जयेत्तत्र नात्र कार्या विचारणा नंदायां दर्शने रक्ता
बलिदानं दशासु च भद्रायां गोकुलक्रीडा देशनाशाय जायते इति ब्रह्मवैवर्त्त नारदादिवचनानि तानि शुद्धाधिक
निषेधपराणीति मदनरत्ने तथा कालिकापुराणे नवम्यां बलिदानं तु कर्त्तव्यं वै यथाविधि जपं होमं च विधि
वत् कुर्यात्तत्र विभूतये केचित् पूर्वाषाढायुताष्टम्यां पूजाहोमाद्युपोषणमिति पूर्वोक्त देवीपुराणो दष्टम्यां होम
माहुः अन्ये तु विधिवाक्यवशादष्टम्यामारभ्य नवम्यां समापयंति समुच्चयस्तु युक्तः होमे च विशेषः उड्डामरतंत्रे पाय

उभयमुभयदिने १

जयंतीमंगलेति २

तथा स्तोत्रजपे होमे श्लोकेनैकेन साधयेत् २

नमः शंभवायेति १

संसर्पिषायुक्तं तिलैः शुक्लैः विमिश्रितं होमयेद्विधिवद्भक्त्या दशांशेन नपोत्तम रुद्राध्याये यथा होमं मंत्रेणैकेनैव साधयेत् यद्वा सप्तशतीजप्यहोमे मंत्रो नवार्णः ऐं ह्रीं क्लीं चामुंडायै विच्चे इति नवार्ण इति केचित् पूजोक्तो ग्राह्य इति तदुक्तं रुद्रयामलेपि प्रधानं द्रव्यमुद्दिष्टं पायसान्नं तिलास्तथा किंशुकैः सर्षपैः पूगैर्लाजादूर्वांकुरैरपि यवैर्वा श्रीफलैर्दिव्यैर्नानाविधफलैस्तथा रक्तचंदनखंडैश्च गुग्गुलैश्च मनोहरैः प्रतिश्लोकं च जुहुयात् सर्वद्रव्याणि च क्रमात् नवार्णेन वा कुर्वात नमो देव्या इतीति चेति रहस्ये तु प्रतिश्लोकं तु जुहुयात् पायसं तिलसर्पिषा युक्तं दुर्गाभक्तितरंगिण्यां तु तिलैर्जयंतीमंत्रेणैव होमः उक्तः पुरश्चरणकार्ये तु विल्वपत्रयुतैस्तिलैरिति कालिकापुराणाद्विल्वपत्रैश्चेति स्मार्त्तः तन्न श्रवमानाभावात् अथ वलिदानं तत्रैश्वमेषछागमहिषस्वमांसानामुत्तरोत्तरप्राशस्त्यं फलविशेषश्चान्यतोवसेय इति दिक् वलिप्रकारस्तु देवीपुराणे कन्यासंस्थे रवौ शक्रः शुक्लामष्टमीं प्रपूजयेत् द्रोणपुष्पैश्च विल्वाम्रजातीपुन्नागचंपकैः पंचाब्दं लक्षणोपेतं गंधपुष्पैः समन्वितं विधिवत्कालिकालीति जप्त्वा खड्गेन घातयेत् ॐ कालि

क्षत्रियेण २
महाकौशिकमंत्रेऽनुपदंवक्ष्यते २ हीना १

१३२ कालिजङ्घेखरिलोहदंडायैनमइतिमंत्रः तदुक्तरुधिरंमांसंगंधंतपूतनादिषु आदिशब्दाद्बकरीविदारीपापराक्षस्यः
नैऋतेभ्यःप्रदातव्यंमहाकौशिकमंत्रितं मंत्रस्तुवक्ष्यते तथा तस्याभ्रतोनृपःस्नायात्कृत्वाशत्रुंतुपैष्टकं खड्गे
नघातयित्वातुदद्यात्स्कंदविशाखयोः अशक्तोब्राह्मणोनचकूष्मांडादिभिर्वलिदानंकार्यं तदुक्तंकालिकापुराणे
कूष्मांडमिक्षुदंडंचमाखेसारंसमेवच एतेवलिसमाःप्रोक्तास्तृप्तोछागसमाःसदा रुद्रयामलेपि छागाभावेतु
कूष्मांडंश्रीफलंचमनोहरं वस्त्रसंवेष्टितंकृत्वा छेदयेच्छुरिकादिना तथा ब्राह्मणोनसदादेयःकूष्मांडवलिकर्म
णा श्रीफलंवास्तुराधीशच्छेदंनैवतुकारयेत् छेदेविकल्पः भावेनानेनवलिर्देयोब्राह्मणेनविजानता कालिकापुरा
णे उत्तराभिमुखोभूत्वा वलिंपूर्वमुखंतथा निरीक्ष्यसाधकःपश्चादिमंमंत्रमुदीरयेत् पशुस्त्वंवलिरूपेणममभाग्या
दुपस्थितः प्रणमामिततःसर्वरूपिणंवलिरूपिणं चंडिकाप्रीतिदानेनदातुरापद्विनाशनं चामुंडा वलिरूपायवले
तुभ्यंनमोस्तुते यज्ञार्थेवलयःसृष्टाःस्वयमेवस्वयंभुवा अतस्त्वांघातयाम्यद्यतस्माद्यज्ञेवधोवधः ऐंह्रींश्रीमिति
आदरेवीप्सा १

मंत्रेणतंवलिंमत्स्वरूपिणंचिंतयित्वान्यसेत् पुष्पंमूर्द्धितस्यतुभैरवारसनात्वंचंडिकायाःसुरलोकप्रसाधकः ह्रींह्रीं
खड्गेतिमंत्रेणध्यात्वाखड्गंचपूजयेत् पूजयित्वाततःखड्गंमांहूंफडितिमंत्रमाकैः गृहीत्वाविमलंखड्गंछेदयेद्बलिमुत्त
मं ॐह्रींऐंह्रींकौसिकीतिरुधिरेणाप्यायतामितिवलिदानंतुदुर्गायाःसर्वत्रायंविधिस्मृतः मत्स्यसूक्ते नवम्यांपूर्व
वत्पूजाकर्त्तव्याभूतिमिच्छता दक्षिणांवस्त्रयुग्मंचआचार्यायनिवेदयेत् अथात्रप्रसंगात्शतचंडीविधानमुच्यते
रुद्रयामले शतचंडीविधानंचप्रोच्यमानंशृणुष्वतत् सर्वोपद्रवनाशार्थेशतचंडींसमारभेत् षोडशस्तंभसंयुक्तंमंडपंपल्ल
वोज्वलं वसुकोणयुतांवेदींमध्येकुर्यात्त्रिभागतः पक्वेष्टकचितांरम्यामुच्छ्रायेहस्तसंमितां पंचवर्णरजोभिश्चकुर्यान्मंड
लकंशुभं पंचवर्णवितानंचकिंकिणीजालमंडितं आचार्येणसमंविप्रान्वरयेद्दशसुव्रतान् ऐशान्यांस्थापयेत्कुंभंपूर्वो
क्तविधिनाहरे वारुणांचप्रकर्त्तव्यंकुंडंलक्षणलक्षितं मूर्त्तिदेव्याःप्रकुर्वीतसुवर्णस्यपलेनवै तदर्द्धेनतदर्द्धेनतदर्द्धेनम
हामते अष्टादशभुजांदेवींकुर्याद्वाष्टकरामपि पट्टकूलयुगछन्नांदेवींमध्येनिधापयेत् देवींसंपूज्यविधिवज्जपंकुर्याद्दश

आवृत्ती:२

द्विजाः शतमारोशतंवांतेजपेन्मंत्रंनवार्णकं चंडींसमस्तांमध्येसंपुटोयमुदाहृतः एवंदेवीगणिचत्वारिंजपेद्दिनच

१३२ तुष्टयं रूपाणिक्रमसः तद्वत्पूजनादिकमाचरेत् पंचमेदिवसेप्रातर्होमोकुर्याद्विधानतः गुडूचीपायसंदूर्वांतिलान्

शुक्लानयवानपि चंडीपाठस्यहोमंतुप्रतिश्लोकंदशांसतः होमंकुर्याद्ब्रह्मादिभ्यःसमिदाज्यचरूंक्रमात् कृत्वापूर्णा

हुतिंदद्यात्विप्रेभ्योदक्षिणांक्रमात् कपिलांगांनीलमणिंश्वेताश्वंछत्रचामरे अभिषेकंततःकुर्युर्यजमानस्यऋ

त्विजः एवंकृतेनरेशानसर्वसिद्धिःप्रजायतेति अथसहस्रचंडी साचतंत्रेवोक्ता सहस्रचंडिविधिवत्शृणुविप्रो

महामते राज्यभ्रंशेमहोत्पातेजनमारेमहाभये गजमारेश्वमारेचपरचक्रभयेतथा इत्यादिविविधेदुःखेक्षयरोगा

दिजेभये सहस्रचंडिकापाठंकुर्याद्वाकारयेत्तथा जापकास्तुशतंप्रोक्ताविंशद्धस्तश्चमंडपः भोज्याःसहस्रंविप्रेंद्रा

गोशतंदक्षिणांदिशेत् गुरवेद्विगुणंदेयंशय्यादानंतथैवच समधान्यंचभूदानं श्वेताश्वसुमनोहरं पंचनिष्क्र

मितामूर्तिःकर्तव्यावर्द्धमानतः अष्टादशभुजादेवीसर्वायुधविभूषिता अवारितान्नंदातव्यंसहस्रंप्रत्यहंविभो श

एवंयत्र

तंवानियताहारःपयःपानेनवर्त्तयेत् चंडिकापाठंसहस्रंतुसमाचरेत् तस्यस्यात्कार्यसिद्धिस्तुनात्रकार्याविचारणेति
एतद्द्वयंयद्यपिमहानिबंधेषुनास्तितथापिप्रचरद्रूपत्वादुक्तमितिदिक् वाराहीतंत्रे संकटेसमनुप्राप्तेउच्छिन्नेवाकल्प्या
मयेतथाजातिध्वंसेकुलच्छेदेआयुषोनाशआगते वैरिवृद्धौव्याधिवृद्धौधननाशेतथाद्भये तथैवत्रिविधोत्पातेतथा
चैवातिपातके कुर्याद्यत्नाच्छतावृत्तिंततःसंपद्यतेशुभं श्रेयोवृद्धिःशतावृत्ताराज्यवृद्धिस्तथापरा मनसाचिंतितंदेवि
सिद्ध्येदष्टोत्तराच्छतात् सहस्रावर्त्तनाल्लक्ष्मीर्मामोतिस्वयंस्थिरं भुक्त्वामनोरथान्कामान्नरोमोक्षमवाप्नुयात् चंड्याः
शतावृत्तिपाठात् सर्वाःसिध्यंतिसिद्धयः इतिशतचंडीसहस्रचंडीविधिः अथनवरात्रपारणानिर्णयः सचदशम्यांका
र्यो आश्विनेमासिशुक्लेतुकर्तव्यंनवरात्रकं प्रतिपदादिक्रमेणैवयावच्चनवमीभवेत् त्रिरात्रंवापिकर्त्तव्यंसप्तम्यादि
यथाक्रममिति हेमाद्रौधौम्यवचनात् नवमीतिथिपर्यंतं वृद्ध्यापूजाजपादिकमिति प्रागुक्तवचनैर्नवमीपर्यन्तंप्रधा
नभूतं पूजाद्युक्तेरुपवासादेश्चांगत्वेनतत्पर्यंतत्वात् आदिशब्देनोपवासोक्तेः पूर्वोक्तत्रिरात्रव्रते नवम्याश्चुपोष्यत्वाच्च
नचपारणांतत्वेनत्रिरात्रत्वं। विद्धुत्रिरात्रादौतथाप्रसिद्धेः। नचात्रोपवासमानाभावइतिवाच्यम्। एवंचविंध्यवासिन्यांनवरात्रोपवास
तः। एकभक्तेननक्तेनतथैवायाचितेनच। पूजनीयायथनै देवीस्थानेस्थानेपुरेपुर इतिहेमाद्रौभविष्योक्तेः। नवरात्रसमाख्यातोनवम्याश्च श्चुपोष्यत्वाच्च १

वायुमत्तीति ४

नन्वतिथिह्रासेष्टावप्युपवासाभवंतीति कथंसमाख्यातेनकर्मविशेषेनवरात्रशब्दोरूढः अतएवोक्तं देवीपुराणेतिथि
१२५ वृद्धौ तिथिह्रासेनवरात्रमपार्थकमितिचेन्न तिथिह्रासेपिनवतिथीनामुपोष्यत्वान्नवरात्रत्वात्ततः एतेननवरात्रीणांप्र
धानत्यात् ह्रासेत्रमामादायनवत्वमितिमूर्खोक्तिः परास्ता यत्तुदेवीपुराणे कन्यासंस्थेरवौशक्रशुक्लामारभ्यनंदिकां
अयाचीह्यथवैकाशीनक्ताशीह्यथवा इतिव्रतचतुष्टयमुक्तं तल्लोहाभिसारिकविषयं तस्यजयाभिलाषीनृपतिःप्रति
पत्प्रभृत्यक्रमात् लोहाभिसारिकंकर्मकारयेघावदष्टमीमिति भविष्येष्टमीपर्यंतमेवोक्तेः रूपनारायणेनतुनंदादिव्र अष्टम्यादि ५
तप्रयोगांपृथगेवोक्तातस्यनवम्यांपारणमुक्तं यदपिनिर्णयदीपे आश्विनेशुक्लपक्षेतुनवरात्रमुपोषितः नवम्यांपारणं
कुर्याद्दशमीमिश्रितानचेत् दशमीमिश्रितायत्रपारणेनवमीभवेत् दुःखदारिद्र्यदाज्ञेयातथावंशविनाशिनीतिब्रह्मणा
ब्रह्मपुराणस्य नाम्ना २ लिखितंवचनं यच्चरुद्रयामले इतिवदंति अष्टम्यासहकार्य्यास्यान्नवमीपारणादिने योमोहाद्दशमीवेधेनवम्यांचंडिकां
जपेत् पारणंचप्रकुर्याद्धितस्यपुण्यंनिरर्थकं नवम्यांपारितादेवीकुलवृद्धिंप्रयच्छति दशम्यांपारितादेवीकुलनाशंकरोतिवै

तस्मात्तु पारणां कुर्यान्नवम्यां विबुधाधिपे त्यादीनि तानि यदि समूलानि तदा लोहाभिसारिकविषयाणि वा नंदा
दिव्रतचतुष्टयविषयाणि तस्याष्टमीपर्यंतमेवाकोरित्युक्तं प्राक् अन्यथा महाष्टम्यां परविद्धायां पारणाविधानेन
पूर्वनिबंद्धैर्विरोधो दुर्वारः स्यात् यानि तु कैश्चिल्लिखितानि नवम्यां पारणाविधायकानि वचनानि तानि हेमाद्र्यादि
विरुद्धत्वात् निर्मूलानि समूलत्वेपि यदा दिनद्वये नवमी तदा द्वितीयदिने ऽयोध्याऽतिथ्यंते पारणा न किंतु नवमीम
ध्ये कार्येत्येवं नेयानि शिवरात्रिपारणावत् अत्र केचित्पारणाहे सूतकादिप्राप्तौ तदतिक्रम्य पारणां कुर्यादित्याहुः
तन्न काम्योपवासे प्रक्रांते त्वंतरा मृतसूतके तत्र काम्यव्रतं कुर्याद्दानार्चनविवर्जितमिति माधवीये कौर्मोक्तेः व्रत
यज्ञविवाहेषु श्राद्धे होमेर्चने जपे प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकमिति विष्णुवचनाच्च आशौचमध्ये पितत्क
र्तव्यतावगतेः पारणां तत्वा इतस्य प्रारंभस्तु तेनैवोक्तः प्रारंभो वरणं यज्ञे संकल्पो व्रतशास्त्रयोः नांदीमुखं विवाहा
दौ श्राद्धे पाकपरिक्रियेति रुद्रयामलेपि सूतके पारणं कुर्यान्नवम्यां होमपूर्वकं तदंते भोजयेद्विप्रान्दानं दद्याच्च

माधवीये ऋष्यशृंगवचनाद्द्वादशीव्रतमिति २

पंचसंख्यानिदशसंख्यानिवायान्याशौचानितेषांपातेप्रवृत्तेमहदल्पानेकाशौचपातमित्यर्थः ३

शक्तितइति तदंतेसूतकांते एवंस्त्रीभिरपिरजोदर्शनमध्येकर्त्तव्यमेवपारणं संप्रवृत्तेपिरजसिनत्याज्यंद्वादशीव्रत
१३५ मितिउपलक्षणं प्रारब्धदीर्घतपसांनारीणांयद्रजोभवेत् नतत्रापिव्रतस्यस्यादुपरोधः कदाचनेतितत्रैवसत्यव्रतव
चनात् किंच एकादश्यादौपंचदशाशौचपातेमासांतेपारणापत्तिः मासोपवासांतेपंचदशाशौचपातेजीवना
संभवश्च यत्तुनियमस्थायदानारीप्रपश्येद्रजः उपोष्यैवतुतारात्रीःस्नात्वाशेषंचरेद्व्रतमित्यंगिरोवचनं
वैधव्यानियमस्था ५ यच्चहारीतवचनं नियमस्थाव्रतस्थास्त्रीरजःपश्येत्कथंचन त्रिरात्रंतुद्विपेदूर्ध्वंव्रतशेषंसमापयेदिति तद्विधवो
पवासविषयं तासांतत्रभोजननिषेधात् इतिकेचित् वयंतुप्रागुक्तसत्यव्रतवचनेदीर्घतपसामितिविशेषणोपादानाद्
द्वादशीव्यतिरिक्तसकलैकाहोपवासविषयोयंनिषेधः त्रिरात्रनवरात्रादिदीर्घव्रतेषुरजोमध्यएवपारणेतिब्रूमः आ
शौचमध्येतुसर्वापिपारणाभवति प्रागुक्तकौर्मवचनादितिसिद्धं अयंचोपवासपारणानिर्णयः सर्वव्रतेषुबोध्यः इत्यलं
भूयसा दशम्यांदेवीविसर्जयेत् तदुक्तंदुर्गाभक्तितरंगिण्यांदेवीपुराणे ततःप्रातःपूजयित्वादशम्यांविधिपूर्वकं संप्रेष

रां तु कर्त्तव्यं गीतवादित्रनिस्वनैः रूपं देहि यशो देहि भगं भगवति देहि मे पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे म
हिषघ्नि महामाये चामुंडे मुंडमालिनि आयुरारोग्यमैश्वर्यं देहि देवि नमोस्तु ते इति संप्रार्थ्य देवीं तु ततः उत्थापयेद्बु
धः उत्तिष्ठ देवि चंडेशि शुभां पूजां प्रगृह्य च कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह गच्छ गच्छ परं स्थानं देवीं विसि
के व्रजस्रोतोजलं वृद्धे स्थीयतां च जले त्विह इति उत्थाप्य जलं नीत्वा दुर्गे देवि जगन्मातः स्वस्थानं गच्छ पूजिते संवत्स स्वस्थानं २
रे व्यतीते तु पुनरागमनाय वै इमां पूजां मया देवि यथाशक्त्योपपादितां रक्षार्थं त्वं समादाय व्रज स्वस्थानमुत्तमम् इ
ति जले प्रवाहयेत् इयमेव विजयदशमी सा च द्वितीयदिने श्रवणायोगाभावे पूर्वी ग्राह्या तदुक्तं हेमाद्रौ स्कांदे द
शम्यां तु नरैः सम्यक् पूजनीयापराजिता ऐशानीं दिशिमाश्रित्य अपराह्ने प्रयत्नतः या पूर्णा नवमीयुक्ता तस्यां पूज्या
पराजिता क्षेमार्थं विजयार्थं च पूर्वोक्तविधिना नरैः नवमीशेषयुक्तायां दशम्यामपराजितां ददाति विजयं देवी पूजि
ता जयवर्द्धिनी तथा आश्विने शुक्लपक्षे तु दशम्यां पूजयेन्नरः एकादश्यां न कुर्वीत पूजनं चापराजितेमिति यस्तु पूर्वं

उदयेकोपिस्तारकोदये १

दिनेश्रवणायोगाभावः परदिनेचाव्यापितद्योगिनीतदापरैव तथाचहेमाद्रौव्रतकांडेकश्यपः उदयेदशमीकिंचित्
१३६ संपूर्णैकादशीयदि श्रवणर्क्षंयदाकालेसातिथिर्विजयाभिधा श्रवणर्क्षंतुपूर्णायांकाकुत्स्थः प्रस्थितोयतः उल्लंघ
येयुः सीमानंतद्दिनर्क्षंततोनराइति कालेपरान्हे परदिनेपरान्हेश्रवणाभावेतुसर्वपक्षेषुपूर्वैव मदनरत्नेप्येवं
ज्योतिर्निबंधेरत्नकोशेचनारदः ईषत्संध्यामतिक्रांतः किंचिदुद्भिन्नतारकः विजयोनामकालोयंसर्वकार्यार्थसिद्धि
दः इषस्यदशमींशुक्लांपूर्वविद्धांनकारयेत् श्रवणेनापिसंयुक्तांराज्ञांपट्टाभिषेचने सूर्योदयेयदाराजन्दृश्यते
दशमीतिथिः आश्विनेमासिशुक्लेतुविजयांतांविदुर्बुधाः अत्रायंनिर्गलितार्थः अपरान्होमुख्यः कर्मकालः
तत्रैवपूजाद्युक्तेः प्रदोषोगौणः तत्रदिनद्वयेअपरान्हव्यापित्वेपूर्वाप्रदोषव्याप्तेराधिक्यात् दिनद्वयेप्रदोषव्यापि
त्वेपरा अपरान्हव्याप्तेराधिक्यात्श्रवणस्तुरोहिणीवदप्रयोजकः दिनद्वयेपरान्हास्पर्शेतुपूर्वा तत्रापिपरदिनेपरा
न्हेश्रवणेसत्वेपरैवेतिदिक् अत्रविशेषोभार्गवार्चनदीपिकायांभविष्ये शमीपुक्तंजगन्नाथंभक्तानामभयंकरं अ

तस्यफलातिशयार्थत्वेपिद्वर्ष्वेपरविद्धाविधायकत्वाभावः २

वेष्टयित्वासिमीवृक्षमर्चयेच्चततःपुनः शमीमंत्रःस्तुहेमाद्रौगोपथब्राह्मणे ॥ अमंगलानांशमनींसमनींदुःकृतस्यच दुः
स्वप्ननाशिनींधन्यांप्रपद्येहंशमींशुभां तथाभविष्ये शमीशमयतेपापंशमीलोहितकंटका धारिण्यर्जुनेबाणा
नांरामस्यप्रियवादिनी करिष्यमाणयात्रायां यथाकालंसुखंमया तत्रनिर्विघ्नकर्त्रीत्वंभवश्रीरामपूजितेति तथा
गृहीत्वासाद्रतामार्द्रांशमीमूलगतांमृदं गीतवादित्रनिर्घोषैरानयेत्स्वगृहंप्रति ततोभूषणवस्त्रादिधारयेत्स्वज
नैःसहेति अत्रबलिनीराजनमुक्तंकृत्यरत्ने तत्रमंत्रः चतुरंगंबलंमह्यंनिरारिष्टंव्रजत्विह सर्वत्रविजयोमेस्तुत्वत्प्रसा
दात्सुरेश्वरीतिगौडनिबंधेज्योतिषे कृत्वानीराजनंराजाबलवृद्ध्यैयथाक्रमं शोभनंखंजनंपश्येज्जलगोगोष्ठसन्नि
धौ अस्यफलानिशुभाशुभदेशाश्चतत्रैवज्ञेयाः आश्विनपौर्णमासीपराग्राह्या सावित्रीव्रतमंतरेणभवतोमापौर्णिमा
स्या परेइतिदीपिकोक्तेः अत्रविशेषास्तिथितत्वेलैंगे ॥ आश्विनेपौर्णमास्यांतुचरेज्जागरणंनिसि कौमुदीसासमाख्या
ताकार्यालोकैर्विभूतये कौमुद्यांपूजयेल्लक्ष्मीमिंद्रमैरावतस्थितं सुगंधिर्निशिसद्वेषअक्षैर्जागरणंचरेत् तथा निशीथे

४ अत्रचाषदर्शनंकुर्वंतिशिष्टाः ॥ अशोकश्चविशोकश्चनंदनःपुष्टिवर्द्धनः
स्वर्णतुंडोमणिग्रीवःस्वस्तिकश्चाषरवचा। अष्टौचाषस्यनामानिचाषं
दृष्ट्वातुयःपठेत्। मिष्टमन्नंसदाश्रीयात्संपदःस्युःपदेपदे ॥ यत्रपश्यासिकौं
सन्त्वेवायस्य १

नंयेचाषंतत्रनमस्कुरु। नहिवैडूर्यविरलिस्यदर्शनंचा

आग्रयणमाश्वयुजीकर्मणोरुमानिर्णयत्वाग्रयणमुच्यते ४ सप्तम्यर्थेतृतीया ५ वेणुयवादिना ५

वरदा लक्ष्मीः कोजागर्त्तीति भाषिणी तस्मै वित्तं प्रयच्छामि अक्षैः क्रीडां करोति यः अत्रैवाश्वयुजीकर्मोक्तमाश्वलायनेन न
१३० आश्वयुज्या माघ्वयुजीकर्मेति तच्छेषपर्वणि कार्यमिति प्रागुक्तं तत्र दर्शपूर्णमासयोरेककर्मत्वेनैकद्रव्यनियमात् दर्श
ष्ट्याः परं पौर्णमास्येष्ट्याश्च प्राप्नोति इति हेमाद्र्यादयः दर्शेष्ट्याः परमुक्तमाग्रयणकं प्राक्पौर्णमासाच्च तदिति दी
पिकोक्तेश्च तच्चाग्रयणं त्रेधा व्रीह्याग्रयणं यवाग्रयणं श्यामाकाग्रयणं चेति एषां कालः स्मृतौ गृह्यमेधी व्रीहिय
कमेण ५ वाभ्यां शरद्वसन्तयोर्यजेत श्यामाकैर्नीवारैर्वर्षास्वापत्काले नान्येन पुराणैर्वेति आपस्तम्बोऽपि वर्षासु श्यामाकैर्यजेत
शरदि व्रीहिभिर्वसन्ते यवैर्यथर्तु वेणुयवैरिति तत्रापि श्यामाकाग्रयणमनित्यमितरे तु अनाहिताग्नेर्नित्ये यवाग्रयणं
च कार्यमिति स्मार्त्तैरुक्तत्वात् सूत्रे व्रीहियवदेवतासंबन्धानामेव मन्त्राणामाम्नानाच्च आहिताग्नेस्तु यवाग्रयणस्याप्य
नित्यत्वं अपि वा क्रिया यवेष्विति सूत्रात् यद्वा व्रीह्याग्रयणेन समानतन्त्रता श्यामाके तु प्रस्तरं कुर्यान्नाग्रयणं यद्विवा
तदपि समानतन्त्रमित्यादिना यवग्रयणाद्वृत्तौ परिश्रमवतां सुलभमित्यलं इदं च पर्वालाभे देवनक्षत्रे कृत्तिकादि विशाखान्ते का

सायंप्रातश्च ४

यीमितिस्मृत्यर्थसारे उक्तं बौधायनीये केशवस्वामिनाप्येवमुक्तं परिशिष्टे श्यामाके व्रीहिभिश्चैव यवैश्चान्योन्य
कालतः प्राग्यष्टुं युज्यते न वसंतेप्याग्रयणात्ययः त्रिकांडमंडनोप्येवं यदा त्वेतदाश्विनपौर्णमास्यां क्रियते तदैकका
लत्वात् आश्वयुजीकर्मणोस्य च समानतंत्रता भवति तदेतत् वृत्तिकृता एकबर्हिरिध्माज्येति सूत्रे स्पष्टमुक्तं अस्याक
रणे प्रत्यवायश्चोक्तः स्मृतिचंद्रिकायां कात्यायनेन नित्ययज्ञात्यये चैव वैश्वदेवक्षयेस्य च अनिष्ट्वा नवयज्ञेन नवान्नप्रा
शनेन तथा भोजने पतितान्नस्य चरुर्वैश्वानरो भवेत् कारिकापि अकृताग्रयणोश्नीयान्नवान्नं यदि वै नरः वैश्वानराय
कर्तव्यश्चरुः पूर्णाहुतिस्तथैवेति अग्निविधाने तु समिंद्रायामंत्रं च वर्षे वर्षे जपेदुक्तं आग्रयणं यदा भूतं तदा संपूर्णमेति
तदित्युक्तं एतच्चापदि मलमासे कार्यमन्यथा नेति प्रागुक्तं अन्योप्याहिताग्न्यादिविशेषः शौनकादेर्ज्ञेय इत्यलं भूयसा
इति श्रीभट्टकमलाकरकृते निर्णयसिंधौ आश्विनमासः अथ कार्तिकः तुलार्केमेषप्राग्परादशघटिकाः पुण्याः रात्रौ
प्रागुक्तं अथ कार्तिकस्नानं तत्र पृथ्वीचंद्रोदये विष्णुस्मृतिपाद्मयोः तुलामकरमेषेषु प्रातःस्नानं विधीयते हविष्यं ब्रह्मचर्यं

चमहापातकनाशनमितिसौरमासउक्तः प्राच्यास्त्वेतदेवाद्रियंते दाक्षिणात्यास्त्वाश्विनस्यतुमासस्ययाशुक्लैका
दशीभवेत् कार्त्तिकस्यकृतानीहतस्यांवैप्रारभेत्सुधीरितिपाद्मोक्तेः भार्गवार्चनेच प्रारभ्यैकादशींशुक्लामाश्विन
स्यतुमानवः प्रातःस्नानंप्रकुर्वीतयावत्कार्त्तिकभास्करइति विष्णुरहस्योक्तेर्हेमाद्रौचादित्यपुराणे पूर्णेत्वाश्वयु
जेमासिपौर्णमास्यांसमाहितः स्नायात्कामासंसंग्रंपरयाचभक्त्यासमाप्य तु कार्त्तिकपौर्णमास्यामित्यंतेभिधाना
च्चाश्विनशुक्लैकादश्यांपौर्णमास्यांवारभ्य कार्त्तिकशुक्लद्वादश्यांपौर्णमास्यांवासमापयेदित्याहुः मदनपारिजा
तेविष्णुः कार्त्तिकंसकलंमासंनित्यस्नायीजितेंद्रियः जपन्हविष्यभुक्शांतःसर्वपापैःप्रमुच्यते अत्रदेशविशेषाः
पाद्मेकार्त्तिकंप्रक्रम्य कुरुक्षेत्रेकोटिगुणोगंगायामपितत्समः ततोधिकःपुष्करेस्यात्द्वारवत्यांचभार्गव पुराणाः
पुर्यश्चसप्तैवसुनघोमथुराधिका दुर्लभःकार्त्तिकोविप्रमथुरायांनृणामिह यत्रार्चितःस्वकंरूपंभक्तेभ्यःसंप्रयच्छ
तीति इदंचस्नानंकाशीस्थपंचनदेप्यतिप्रशस्तं शतंसमास्तपस्तप्त्वाकृतेयत्प्राप्यतेफलं तत्कार्त्तिकेपंचनदेसकृ

तस्मात् २ विंदुमाधवतीर्थे १ लक्ष्मा ४

स्नानेनलभ्यते कार्त्तिकेविंदुतीर्थेयोब्रह्मचर्यपरायणः स्नास्यत्यनुदितेभानौभानुजात्तस्यभीःकुत इत्यादिका
शीखंडोक्तेः भानुजोयमः इदंचप्रातःस्नानंसंध्यांकृत्वाकार्यं तेनविनेतरकर्मानधिकारादिति वर्धमानः यद्य
पिप्रातःसंध्यायाःसूर्योदयेसमाप्तिस्तथापिवचनावलादनुदितहोमवद्भविष्यति स्नानमंत्रश्चतत्रैव कार्त्ति
केहंकरिष्यामिप्रातःस्नानंजनार्दन प्रीत्यर्थंतवदेवेशदामोदरमयासह इमंमंत्रंसमुच्चार्यमौनीस्नायाद्व्रतीन
रइति अर्घ्यमंत्रोपितत्रैव व्रतिनःकार्त्तिकेमासिस्नातस्यविधिवन्ममगृहाणार्घ्यंमयादत्तंदनुजेंद्रनिषूदन
नित्येनैमित्तिकेकृष्णकार्त्तिकेपापनाशिनेगृहाणार्घ्यंमयादत्तंराधयासहितोहरे इमौमंत्रौसमुच्चार्ययो [illegible] बौ
मद्यंप्रयच्छति सुवर्णरत्नपुष्पांबुपूर्णशंखेनपुण्यवान् सुवर्णपूर्णापृथिवीतेनदत्तानसंशयः इति एवंसंपू
र्णोस्नानोशक्तोऽप्यहंस्नायात् वाराणस्यांपंचनदेऽप्यहंस्नातस्तुकार्त्तिके अमीतपुण्यवपुषः पुण्यभाजोतिनिर्मलाः
इतिकाशीखंडोक्तेः अथमालाधारणं तत्रस्कांदेद्वारिकामाहात्म्ये निवेद्यकेशवेमालांतुलसीकाष्ठसंभवां

वहतेयोनरोभक्त्यातस्यनैवास्तिपातकं नजत्वातुलशीमालांधात्रीमालांविशेषतः महापातकसंहर्त्री
१३८ धर्मकामार्थदायिनी विष्णुधर्मे स्पर्शेतुयानिलोमानिधात्रीमालाकलौनृणां तावद्वर्षसहस्राणिवैकुंठेवस
तिर्भवेत् मालायुग्मंतुयोनित्यंधात्रीतुलसीसंभवं वहतेकंठदेशेतुकल्पकोटिदिवंवसेत् तुलशीकाष्ठसंभू
तेमालेकृष्णजनप्रिये बिभर्मित्वामहंकंठेकुरुमांकृष्णवल्लभं एवंसंप्रार्थ्यविधिवन्मालांकृष्णगलेर्पितां धार
येत्कार्त्तिकेयोवैसागच्छेद्वैष्णवंपदमिति अत्रमूलंचिंत्यं तथाकाशीखंडे कार्त्तिकेमासिमेयात्रायैःकृताभक्ति
तत्परैः विंदुतीर्थेकृतस्नानैस्तेषांमुक्तिर्नदूरतः भार्गवार्चनदीपिकायां नृसिंहपुराणे अगस्त्यकुसुमैर्देवंयो
पं३ र्चयेज्जनार्दनं दर्शनात्तस्यदेवर्षेर्नारकंनाप्नुतेनरः विहायसर्वपुष्पाणिमुनिपुष्पेणकेशवं कार्त्तिकेयोर्चयेद्भक्त्या
वाजपेयफलंलभेत् स्कांदेकार्त्तिकमाहात्म्ये मालतीमालयाविष्णुःकेतक्याचैवपूजितः समाःसहस्रंसुप्रीतोभव
तमधुसूदनः पृथ्वीचंद्रोदयेपाद्मे कार्त्तिकेनार्चितायेस्तुकमलैःकमलेक्षणः जन्मकोटिषुविप्रेंद्रनतेषांकमला

गृहे तथा कार्त्तिके केशवपूजायै बांनाम्नायुतैः कृता तेनिर्भं स्यर्वेःपुत्रं वसंतित्रिदिवे सदा तुलसीदललक्षेण
कार्त्तिकेयोर्चयेद्धरिं पत्रेपत्रेमुनिश्रेष्ठमौक्तिकंलभतेफलं तथास्कांदे कार्त्तिकमाहात्म्ये धात्रीछायासुयःकु
न र्यात्पिंडदानंमहामुने मुक्तिंप्रयांतिपितरः प्रसादान्माधवस्यतु धात्रीफलविलिप्तांगोधात्रीफलविभूषितः धात्री
फलकृताहारोनारायणोभवेत् धात्रीछायांसमाश्रित्ययोर्चयेच्चक्रधारिणं पुष्पेपुष्पेश्वमेधस्यफलंप्राप्नोतिमान
नरो ४ वः तथास्कांदे कार्त्तिकेमासिविप्रेंद्र धात्रीवृक्षोपशोभिते वनेदामोदरंविष्णुंचित्रान्नैस्तोषयेद्विभुं मूलेनपायसेनाथ
६ होमंकुर्याद्विचक्षणः ब्राह्मणान्भोजयेच्छक्त्यास्वयंभुंजीतबंधुभिरिति तथा कार्त्तिकेद्विदलव्रतप्राप्युक्तं कार्त्तिकेद्वि
दलंत्यजेदिति पाद्मेपि कार्त्तिकमाहात्म्ये राद्धिकांमादकंचैवनैवाद्यात्कार्त्तिकव्रती द्विदलंतिलतैलंचतथान्यन्मतिदू
षितं स्कांदेपि कार्त्तिकेवर्जयेच्चैवद्विदलंबहुबीजकं माषमुद्गमसूराश्च चणकांश्चकुलत्थकान् निष्पावाराजमाषा
श्चआढक्योद्विदलंस्मृतं नूतनान्यपिजीर्णानिसर्वाण्येतानिवर्जयेत् अत्रकेचित् उत्पत्यसमयेदलद्वयंयस्यभवतितत्

पर्युषितम् ३

भूतपूर्वंगमित्याद्विदलमुच्यते इत्याहुः उदाहरंति च बीजमेव समुद्भूतं द्विदलं वांकुरं विना दृश्यते यत्र सैस्येषु द्विदलं तं
निगद्यते इति अन्ये तु लक्षणाप्रमाणाभावात् वचनस्य च निर्मूलत्वाद्विदलात्मकं यस्य स्वरूपं तदेव वर्जयेदित्याहुः तथा
नारदीये कार्त्तिके वर्जयेत्तैलं कार्त्तिके वर्जयेन्मधु कार्त्तिके वर्जयेत्कांशं कार्त्तिके शुक्तसंधितं कांस्यं तत्पात्रभोजनं
शुक्तं पर्युषितं संधितं लवणशाकः तत्रैव कार्त्तिके विष्णुमूर्त्यग्रे दीपदानादिकं व्रजेत् तथा कार्त्तिके तु कृता दीक्षा नृणां ज
न्मविमोचिनी तथा कार्त्तिके कृच्छ्रशेवी यः प्राजापत्यपरोथवा एकांतरोपवासी वा त्रिरात्रोपोषितोपि वा षड्द्वादशपक्षं वा
मासं वाथ रवीराणि एकभक्तेन नक्तेन तथैवायाचितेन च उपवासेन भैक्षेण व्रजते परमं पदं अन्येपि नियमाः प्रागुक्ताः
माघमुक्तं स्कांदे व्रीहयो यवगोधूमाः प्रियंगुतिलशालयः एते हि सात्विकाः प्रोक्ताः स्वर्गमोक्षफलप्रदाः काशीखंडे ऊर्ज्जे य
वान्नमश्नीयात् व्रीह्यन्नमथवा पुनः वृंताकं सूरणं चैव शूकशिंबीश्च वर्जयेत् [illegible] नोर्ज्जं वंध्या विधानतो वा व्र
तिना केनचित् क्वचित् नारदीये अव्रतेन क्षयपक्षमासं दामोदरप्रियं तिर्यग्योनिमवाप्नोति नात्र कार्या विचारणा अन्या

चत्वारि दीपपात्राण्यष्टदलकमलाकाराणि चतुर्दिक्षु स्थापनीयानि ४

न्यपि तांबूलतैलकेशकर्त्तनादिवर्जनसंकल्परूपाणि प्रागुक्तानि तथा कार्त्तिके आकाशदीप उक्तो निर्णयामृते पुष्कर
पुराणे तुलायां तिलतैलेन सायंकाले समागते आकाशदीपं यो दद्यान्मासमेकं हरिं प्रति महतीं श्रियमाप्नोति रूपसौभा
ग्यसंपदमिति तद्विधिश्च हेमाद्रौ आदित्यपुराणे दिवाकरेस्ताचलमौलिभूते गृहाद्दूरे पुरुषप्रमाणं यूपाकृतिं यज्ञि
यवृक्षदारुमारोप्य भूमावथ तस्य मूर्ध्नि कृत्वा च तत्राष्टदलाकृतीस्तु याभिर्भवेद्दृष्टदिशानुसारी तत्कर्णिकायां तु महाप्रका
शो दीपः प्रदेयो दलगास्तथाष्टौ निवेद्य धर्माय हराय भूम्यै दामोदरायाप्यथ धर्मराज्ञे प्रजापतिभ्यस्त्वथ सत्पितृभ्यः प्रेतेभ्य एवा
थ तमःस्थितेभ्य इति अपरार्के त्वन्यो मंत्र उक्तः यथा दामोदराय नभसि तुलायां लोलया सह प्रदीपं ते प्रयच्छामि नमोऽनंताय वेध
से इति कार्त्तिककृष्णचतुर्थी करकचतुर्थी सा चंद्रोदयव्यापिनी ग्राह्या तत्रैव पूजाद्याम्नानात् कार्त्तिककृष्णद्वादशी गोवत्ससंज्ञा
सा प्रदोषव्यापिनी ग्राह्या दिनद्वये तद्व्याप्तौ पूर्वं युग्मवाक्यात् वत्सपूजा वटश्चैव कर्तव्या प्रथमे हनीति निर्णयामृते भिधानाच्च
अत्र विशेषो मदनरत्ने भविष्ये सवत्सां तुल्यवर्णां च शीलिनीं गां पयस्विनीं चंदनादिभिरालिप्य पुष्पमालाभिरर्चयेत्

१४१ अर्घंताम्रमयेपात्रेकृत्वादत्तैस्तिलैः पाद्यंस्थलेतुदद्याद्वैमंत्रेणानेनपांडव क्षीरोदार्णवसंभूतेसुरासुरनमस्कृते स
र्वदेवमयेमातर्गृहाणार्घंनमोनमः ततोमाषादिसंसिद्धान्वटकान्विनिवेदयेत् सुरभित्वंजगन्मातर्देविविष्णुपदेस्थि
ता सर्वदेवमयेग्रासंमयादत्तमिमंग्रस ततःसर्वदेवमयेदेविसर्वदेवैरलंकृते मातर्ममाभिलषितंसफलंकुरुनं
दिनिइतिप्रार्थयेत् तथा तद्दिनेतैलपक्वंचस्थालीपक्वंयुधिष्ठिर गोक्षीरंगोघृतंचैवदधितक्रंचवर्जयेत् ज्योतिर्निबंधेना
रदः आश्विनेकृष्णपक्षेचद्वादश्यादिषुपंचसु तिथिषूक्तःपूर्वरात्रेनृणांनीराजनाविधिः नीराजयेयुर्देवांस्तुविप्रान्गा
श्चतुरंगमान् ज्येष्ठान्श्रेष्ठान्जघन्यांश्चमातृमुख्याश्चयोषितः इति निर्णयामृतेस्कांदे कार्त्तिकस्यासितपक्षेत्रयो
दश्यांनिशामुखे यमदीपंवहिर्दद्यादपमृत्युर्विनश्यति मंत्रस्तु मृत्युनापाशहस्तेनकालेनभार्ययासह त्रयोदश्यांदीप
ये दानात्सूर्यजःप्रीयतांममेति कार्त्तिककृष्णचतुर्दश्यांप्रभातेचंद्रोदयेभ्यंगंकुर्यात् तदुक्तंहेमाद्रौनिर्णयामृतेचभविष्योत्तरे कार्त्ति
केकृष्णपक्षेतुचतुर्दश्यामिनोदये अवश्यमेवकर्तव्यंस्नानंनरकभीरुभिः इनश्चंद्रः मदनरत्नेविधूदयेइतिपाठः दिनोदय

इति पाठात् सूर्योदयात्तरं त्रिमुहूर्त्तं स्नानं वदतां गौडानां तदनुसारिणां चाज्ञतैव पूर्वविद्धचतुर्दश्यां कार्तिकस्यासितेतरे पक्षे
प्रत्यूषसमये स्नानं कुर्यात्प्रयत्नत इति स्मृत्यन्तरेपि चतुर्दशीयाश्वयुजस्य कृष्णा स्वात्यर्केयुक्ता च भवेत्प्रभा
ते स्नानं समभ्यज्य नरैः स्तु कार्यं सुगंधितैलेन विभूतिकामैरिति पृथ्वीचंद्रोदये ब्राह्मे आश्वयुक्कृष्णपक्षस्य चतुर्द
श्यां विधूदये तिलतैलेन कर्त्तव्यं स्नानं नरकभीरुणेति कर्त्तव्यं मंगलस्नानं नरैर्निरयभीरुभिरिति कालादर्शपाठः
उभयेत्राश्वयुगित्यमावास्यांतमासमभिप्रेत्योक्तं तथा तैले लक्ष्मीर्जले गंगा दीपावल्याश्चतुर्दशीं प्रात्य तिरोऽब्दः
प्रातःस्नानं तु यः कुर्याद्यमलोकं न पश्यतीति दिनद्वयेपि चंद्रोदये चतुर्दशीसत्वे तदभावे वारुणोदये संपूर्णा विधे
वा दिनद्वये चतुर्दशीसाम्येपि पूर्वदिनेभ्यंगं कुर्यात् पूर्वविद्धचतुर्दश्यामिति वचनात् पूर्वदिनपरदिनयोर्वा सत्वे सैव ग्रा
ह्या दिनद्वयेपि सत्वे रुणोदयमात्रव्यापिनी ग्राह्या पक्षे प्रत्यूषसमये इत्युक्तेः वक्ष्यमाणवचनाच्च तदभे तु चतुर्दशी क्षये वेर
पूर्णा वेद्युःप्रवेश पूर्वे निज्ञयोदशी मध्याह्ने वेभ्यंगं कुर्यात् इति दिवोदासः केचिदत्र वचनमिति साधकत्वेन वदंति तिथ्या

देतु भवेद्यावन्न ह्रासो वृद्धिः परेहनि तावन्न मा ग्राह्या स पूर्वं घुरहद्व्यापिस्वकर्मनीति तन्मंदं नहीदं वचनं पूर्वदिनस्य पूर्वग्रा
२४२ ह्यत्वविधत्वे नक्तैकभक्तजन्माष्टम्यादौ दिनद्वये कर्मकालव्याप्त्यभावे सर्वत्र पूर्वदिनस्य ग्राह्यत्वप्रसंगात् किंतु यत्रै
कभक्तादौ दिनद्वये कर्मकालव्याप्त्यभावे वाक्यांतरेण न्यायेन वा पूर्वदिनस्य ग्राह्यत्वमुक्तं तत्र मुख्यकालेतत्तिथेरभा
वेपि तत्रैवानुष्ठानबोधकमिदं न चात्र तदस्तीति यत्किंचिदेतत् तेन चतुर्थयामगामिनी ग्राह्या अत एव सर्वज्ञनारा
यणाः तथा कृष्णचतुर्दश्यामाश्विने कोदयात्पूर्वं यामिन्याः पश्चिमे यामे तैलाभ्यंगो विशिष्यत इति मत्गोंकोदय
वेलायां त्रयोदश्यां यदा भवेत् दर्शे वा मंगलस्नानं दुःखशोकभयप्रदमिति कालादर्शे त्रयोदशीनिषेधाच्च तेनाप्यम
र्षः यथाग्निहोत्रं यावज्जीवं सायंप्रातःकालेषु व्याप्यकालस्य गुरुत्वं तथात्र चतुर्दशी चतुर्थयामारुणोदयचंद्रोदयानामुत्त
रोत्तरस्य व्याप्यत्वाद्गुरुत्वमिति यदपि त्रयोदशी यदा प्रातः क्षयं याति चतुर्दशी रात्रिशेषे त्वमावास्या तदाभ्यंगस्त्रयोदशी
ति वचनं तद्धेमाद्रिनिर्णयामृताद्यलिखितत्वेन निर्मूलं समूलत्वेपि न चतुर्दश्याः सूर्योदयद्व्याप्तिसंबंधित्वरूपः क्षयोत्र वि

वक्षितः सूर्योदयात्प्राक्समाप्तौ चंद्रोदयकालस्यैवत्वस्यैवानंगीकारात् किंतु अभ्यंगकालात्प्राक्समाप्तिरूपोत्र ह्रासस्त
२८५ त्र्यसत्वेन विवक्षितः सचारुणोदयात् चतुर्थयामा द्यायदा ह्रासस्तत्परमिदं अत एव सर्वज्ञनारायणेन चतुर्थयाममा
त्रे स्नानमुक्तं तथा चोदाहृतं तथा कृष्णचतुर्द्दश्यामिति ज्योतिर्निबंधे नारदोपि इषासितचतुर्द्दश्यामिंदुक्षयतिथावपि
ऊर्जादौ स्वातिसंयुक्ते तदा दीपावली भवेत् कुर्यात्संलग्नमेतच्च दीपोत्सवदिनत्रयं येतु त्रयोदशी स्नानमाहुस्तेषामासयं
नविघ्न इत्यलंभूयसा यदपि अरुणोदयत्वन्यत्र रिक्तायां स्नानातियो नरः तस्याब्दिकभवो धर्मो नश्यते वनसंसेय इति दिवो
दासीये भविष्यवचनं तन्मुख्यकाले रुणोदये चतुर्द्दश्यभावेपि तत्रैव स्नातव्यमित्येवंपरं चतुर्घटिका त्मको रुणोदय इति तत्रै
वोक्तं तथा मदनरत्ने पाद्मे अपामार्गमथो तुंवीं प्रपुन्नाटमथापरं भ्रामयेत्स्नानमध्ये तु नरकस्य क्षयाय वै प्रपुन्नाटश्चक
मर्दः मंत्रस्तु सीतालोष्ठसमायुक्तं सकंटकदलान्वितं हर पापमपामार्ग भ्राम्यमाणः पुनःपुनरिति अस्यामेव प्रदोषे दीपा
न्दद्यादित्युक्तं हेमाद्रौ स्कांदे ततः प्रदोषसमये दीपान्दद्यान्मनोरमान् ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु चेति दिवोदा

सीयेपिंत्रले अमावास्याचतुर्द्दश्योः प्रदोषेदीपदानतः यममार्गांधकारेभ्योमुच्यतेकार्त्तिकेनरः खंडतिथौतुपूर्वेन्हिप्रदोषे
१५३ दीपानदद्यापरेघुः स्नायादितिदिवोदासीयेउक्तं तत्रैवलैंगे माषपत्रस्यशाकेनभुक्तातत्रदिनेनरः प्रेताख्यायांचतुर्द्दश्यांस
र्वपापैः प्रमुच्यते अत्रयमतर्पणमुक्तंमदनपारिजातेब्रह्ममनुना दीपोत्सवचतुर्द्दश्यांकार्यंतुयमतर्पणं मदनरत्नेब्राह्मे
अपामार्गस्यपत्राणिभ्रामयेच्छिरशोपरि ततश्चतर्पणंकार्यंधर्मराजस्यनामभिः यमायधर्मराजायमृत्यवेचांतकायच
मातुः कुमारस्य न कुर्याच्चौलकर्म तु पंचमासादधः कुर्यादत ऊर्ध्वं न कारयेत् गर्गः ज्वरस्योत्पादने यस्य लग्नं तस्य न कारयेत् दो
षान्निर्गमनात्पश्चात्तस्यैव धर्मं समाचरेत् लग्नमिति मंगलोपलक्षणम् ज्योतिर्गर्गः विवाहोत्सवयज्ञेषु माता यदि रजस्वला
तदा मृत्युमवाप्नोति पंचमं दिवसं विना वशिष्ठः यस्य मांगलिककार्ये तस्य माता रजस्वला अर्द्धं तदैव बृहस्पतिः प्राप्तमभ्युद तत्रैव ९
यश्राद्धं पुत्रसंस्कारकर्मणि पत्नी रजस्वला चेत्स्यान्न कुर्यात्पिता तदा पितेति कर्तृमात्रोपलक्षणम् संकटे तु वाक्यसारे उक्तं
मलाभे सुमुहूर्त्तस्य रजोदोषे ह्युपस्थिते श्रियं संपूज्य विधिवत्ततो मंगलमाचरेत् एतच्च मरणेनोत्तरं न कार्य्यम् न मंडनाच्चापि
हि मुंडनं च गोत्रके नायांयदिनाब्दमेदद्वति मदनरत्ने वशिष्ठोक्तेः तत्रैव कात्यायनः कुले ऋतुत्रयादर्वाक् मुण्डनान्न तु मुण्डनं
वध्वाः ४ प्रवेशान्निर्गमो नेष्टो न कुर्यान्मंगलत्रयमिति तथा वृद्धमनुः एकमातृजयोरेकवत्सरे पुरुषस्त्रियोः न समानक्रियां कुर्या
न्मातृभेदे विधीयते आपोचेत्तु संग्रहे संकटे समनुप्राप्ते सूतके समुपागते कूष्मा[illegible]डीभिर्घृतं हुत्वा गां च दद्यात्पयस्विनीम्
चूडोपनयनोद्वाहप्रतिष्ठादिकमाचरेदिति ज्योतिर्निबंधे षष्ठेऽब्दे षोडशे वर्षे विवाहाब्देनयेवच अन्तर्वत्न्यां च जायायां नेष्यते
मुण्डनं क्वचित् अन्योपि विशेषो विवाहप्रकरणे वक्ष्यते दीपिकायाम् न चूडा जन्मनाम्नेयदारुणेष्वृशुक्रेनोकुजे प्रतिपद्भद्रारि

कन्यायाः ४

मरणे नं विवाहाद्युत्सवः ६

एतन्नामकैर्मंत्रैः ३

शिखासूत्रः ३ अनाच्छादितशिरः ३

नि॰ सिं॰ १७७ काम्तु विद्यारंभस्तु पंचमे प्रयोगरत्ने मध्ये शिरसि चूडा स्यात् शिष्टानां तु दक्षिणे उभयोः पार्श्वयोरत्रिकश्यपानां शिखा मता माधवीये
प्येवम् आपस्तंबस्त्वाह तूष्णीं केशान्विनीय यथर्षि शिखा निदधाति यथर्षि प्रवरसंख्यया तासां मध्यशिखावर्जमुपनयने वपनं
कार्यम् प्रतिदिशं प्रवपतीत्युपनयनेनैवोक्तेः शिखा वाऽबोऽनपिहितो यज्ञसूत्रस्य तदपिधानं यच्छिखेति श्रुतेः विशिखो ह्युप
नीतश्च यत्करोति तदकृतमिति निषेधाच्च सत्रेनुवचनात्सशिखवपनमिति सुदर्शनभाष्ये उक्तम् यत्तु कुमारा विशिखा इवेति
लिंगं तच्छूद्रपरम् अपरार्के मदनरत्ने च लौगाक्षिः दक्षिणतः कमुजा वसिष्ठानामुभयतोऽत्रिकश्यपानाम् मुंडा भृगवः
पंचचूडा अंगिरसो वाजिमेके मंगलार्थं शिखिनोऽन्ये यथाकुलधर्मं वेति कमुजा शिखा वाजिः केशपंक्तिः स्मृतिदर्पणे एका शि
खा दक्षिणतो वसिष्ठगोत्रस्य पंचांगिरसां भृगोस्तु नैका शिखा कश्यपगोत्रजानां शिखा भयत्रापि यथाकुलं च एतच्छूद्रातिरिक्त
विषयं शूद्रस्यानियताः केशवेषा इति वसिष्ठोक्तेः यत्तु पाद्मे न शिखी नोपवीती स्यान्नाचरेत्स रक्तां गिरमिति शूद्रमुपक्रम्योक्तं
तदसच्छूद्रस्येति केचित् विकल्प इति तु युक्तम् अत एव हारीतः स्त्रीशूद्रो तु शिखां छित्वा क्रोधाद्वैराग्यतोऽपि वा प्राजापत्यं प्रकुर्वीत
निष्कृतिर्नान्यथा भवेत् एतत्परिग्रहपक्षे अत्र देशभेदाद्व्यवस्थेति दिक् ज्योतिर्निबंधे नर्मदोत्तरदेशे तु सिंहस्थे देवमंत्रिणि शुभ
कर्म न कुर्वीत निषेधो नास्ति दक्षिणे अत्र भोजने प्रायश्चित्तमुक्तं पराशरमाधवीये निवृत्ते चूडहोमे तु प्राङ्नामकरणात्तथा च
रेत्सांतपनं भुक्त्वा जातकर्मणि चैव हि अतोऽन्येषु तु संस्कारेषूपवासेन शुध्यति एते संस्काराः स्त्रीणाममंत्रकाः कार्याः होमस्तु
समंत्रक इति पारिजाते आश्वलायनोऽपि होमं कृत्वा तु पुंवत्स्यात् स्त्रीणां चूडाकृताऽवपीति मनुरपि अमंत्रिका तु कार्येयं स्त्रीणा
क्रिया ४ मावृदशेषतः इति होमोऽप्यमंत्रक इत्येके संस्काराः स्त्रीणामहोमकाः सूक्ष्मोस्तु रिति स्मृत्यर्थसारे होमोऽनेन निवृत्तिकृत् अथ वि
द्यारंभः मदनरत्ने नृसिंहः अक्षरस्वीकृतिं कुर्यात्प्राप्ते पंचमहायने उत्तरायणगे सूर्ये कुंभमासं विवर्जयेत् दीपिकायाम्
वर्षे पंचमे न्यकाले षष्ठीरिक्तोऽप्रातिकूजम् अनध्यायान्विनानंत्यादेव श्रथकृत गुरुम् श्रीधरः हस्तादित्यसमीरमित्रगुरुभि एमः
त्यो हस्ताश्विचित्राच्युतेश्वारों कृंप्रादनोदयादिरहिते रणे स्थिरे चोभये पक्षे हरौ निद्राकरे प्रतिपद्रिक्ता विहायाष्टमीं षष्ठी १७७

प्रयोग ५ शिखापरिग्रहपक्षे ८ छिन्नभावे १ फाल्गुनम् ३ शिख २
च २ भौमश्शन्योरंशोदिनं वारं उदयोऽस्तं च तद्दृष्टिं भाले १

अष्टमस्थानेसर्वग्रहशून्ये १ भगदेवत्यं ३

मष्टमशुद्धिमाज्ञिमेवनेप्रोक्ताःक्षरस्त्वीकृतिः विष्णुधर्मोत्तरे पूजयित्वाहरिंलक्ष्मीं तथादेवींसरस्वतीम् स्वविद्यासूत्रकारांश्च स्वांविद्यांच
विशेषतः एतेषामेवदेवानांनाम्नातुजुहुयाद्धुतम् दक्षिणाभिर्द्विजेन्द्राणांकर्त्तव्यंचात्रपूजनमिति अथधनुर्विद्या दीपिकायाम्
अदितिगुरुहस्तयमार्कस्वातिचित्राश्विपित्र्यध्रुवेहशिवसुमूलेष्विंदुभौगांत्यभेषु शनिशशिबुधवारेविष्णुबोधेविशेषाद्वसुसमयति
थियोगेचापविद्याप्रदानम् अथानुपनीतस्यविशेषः गौतमः प्रागुपनयनात्कामचारवादभक्षाहुति भक्षणालेषुनादरपीमिह ६४
रदत्तः अपरार्केविद्वद्वृत्तानानतपः शिशोरभ्युक्षणंप्रोक्तंबालस्याचमनंस्मृतम् रजस्वलादिसंस्पर्शेस्नानमेवकुमारके प्राक्चूडा
करणाद्बालःप्रागन्नप्राशनाच्छिशुः कुमारकेस्तुविज्ञेयोयावन्मौजीनिबंधनम् आपस्तंबोपि आअन्नप्राशनात्प्रयतोभव
त्यासंवत्सरादित्येकेइतियोगनमोपि नतदुपस्पर्शनादाशौचम् तस्यानुपनीतस्यचंडालादिस्पृष्टस्यापिस्पर्शनात्स्नानम् शूद्रंचव
ब्रवीत्प्राक् ऊर्द्ध्वंतुस्नानंभवत्येव बालस्यपंचमाद्वर्षादूर्ध्वंशोचमाचरेदितिस्मृतेः कामचारादिकेप्येवम् ऊनेकादशवर्ष आदिनावादभक्षौ ८
स्यपंचवर्षात्परस्यच चरेद्गुरुःसुहृच्चैवप्रायश्चित्तंविशुद्धये अतोबालतरस्यास्यनापराधोनपातकमितिस्मृतेरितिहरदत्तः
स्मृत्यर्थसारेप्येवम् अथोपनयनम् आश्वलायनः गर्भाष्टमेऽष्टमेवाब्देपंचमेसप्तमेपिवा द्विजत्वंप्राप्नुयाद्विप्रोवर्षेत्वेकाद
शेनृपः मनुः ब्रह्मवर्चसकामस्यकार्यंविप्रस्यपंचमे राज्ञोबलार्थिनःषष्ठेवैश्यस्यार्थार्थिनोष्टमे विष्णुः षष्ठेतुधनकामस्य
विद्याकामस्यसप्तमे अष्टमेसर्वकामस्यनवमेकांतिमिच्छतः आपस्तंबः गर्भाष्टमेषुब्राह्मणमुपनयीत बहुवचनंगर्भेष
ष्टगर्भसप्तमयोःप्राप्त्यर्थमितिसुदर्शनभाष्ये केचित्तुविप्रस्यषष्ठंनमन्यते आपस्तंबः अथकाम्यानिसप्तमेब्रह्मवर्चसकाम
मष्टमआयुःकामंनवमेतेजस्कामंदशमेन्नाद्यकाममेकादशइंद्रियकामंद्वादशेपशुकाममुपनयेत् गौणकालमाहमनुः
आषोडशाद्ब्राह्मणस्यसावित्रीनातिवर्त्तते आद्वाविंशात्क्षत्रबंधोराचतुर्विंशतेर्विशः ज्योतिर्निबंधे अग्रजावाकुजावेश्याःसर्वेवे
दैर्द्विजैःस्मृताः अकृतोपनयाःसर्वेवृषलाइवतेस्मृताः गर्गः विप्रंवसंतेक्षितिपंनिदाघेवैश्यंघनांतेव्रतिनंविदध्यात् माघादिम

ग २

तिथौ ३

नि॰ सिं॰ २७८ कार्तिकपंचमासाः । स्याधररणवासकलद्विजानाम् हेमाद्रौ ज्योतिषे माघादिषु पंचमासेषु मौंजी पंचसु शस्यते पारिजाते वृहस्पतिः
कर्कचापकुलीरस्थो जीवोप्यशुभगोचरः अतिशोभनतां दद्याद्विवाहोपनयनादिषु वृद्धगार्ग्ये नजन्मधिष्ण्ये न च जन्ममासे न
जन्मकाले यदि नैव विद्यात् ज्येष्ठेन मासि प्रथमस्य सूनोस्तथा सुताया अपि मंगलानि राजमार्तंडः जातं दिने दूषयते वशिष्ठ
श्चाष्टौ च गर्गो नियतं दशात्रिः जातस्य पक्षं किल भागुरिश्च शेषाः प्रशस्ताः खलु जन्ममासि जन्ममासे तिथौ भे च विपरीतद
लमति कार्यं मंगलमित्याहुर्गर्गभार्गवशौनकाः जन्ममासनिषेधेपि दिनानि दश वर्जयेत् आरभ्य जन्मदिवसाच्छुभाः
स्युस्तिथयः परे अथांतरे व्रते जन्मत्रिकोणस्थो जीवो पापोच्चादिनात्यंतकृत् शुभोऽतिकाले तु यो यद्वयस्यो द्विगुरुणार्चनात्
शुद्धिर्नैव गुरोर्यस्य वर्षे प्राप्तेष्टमे यदि चैत्रे मीनगते भानौ तस्योपनयनं शुभम् जन्मतोदष्टमे सिंहनीचे वा शत्रुभे गुरौ
मौंजीवंधः शुभः प्रोक्तश्चैत्रे मीनगते रवौ नारदः बालस्य बलहीनोपि शांत्या जीवो बलप्रदः यथोक्तवत्सरे कार्यमनु
क्ते चोपनायनम् शांतिश्चाग्रे वक्ष्यते ज्योतिर्निबंधे नृसिंहः तृतीया पंचमी षष्ठी द्वितीया वापि सप्तमी पक्षयोरुभयोः
चैव विशेषेण शुभप्रजिताः धर्मकामो सितेपक्षे कृष्णे च प्रथमा तथा कृष्णे त्रयोदशीं केचिदिच्छंति मुनयस्तथा टोडरा
नंदे वशिष्ठः नैमित्तिकमनध्यायं कृष्णे च प्रतिपद्दिनम् मेखलावंधने शस्तं चौले वेदव्रतेष्वपि प्रशस्ता प्रतिपत्कृष्णे
दुतेनारखण्डेत्यर्थः न पूर्वापरसंयुता एतदतीतकालस्यात्मस्य वटोरुपनयनविषयं प्रशस्ता प्रतिपत्कृष्णे कदाचिच्छुभगे विधौ चंद्रे बल
युते लग्ने वर्णानामतिलंघने इति व्यासोक्तेरित्याहुः एवं सप्तम्यपि तस्यां गलग्रहत्वात्तोक्तेः वृहस्पतिः शुक्लपक्षः शुभः
प्रोक्तः कृष्णश्चांत्यत्रिकं विना तथा मिथुनसंस्थिते भानौ ज्येष्ठमासो न दोषकृत् मदनरत्ने नारदः विनर्तुना वसंते न
कृष्णपक्षे गलग्रहे अपराह्णे चोपनीतः पुनस्संस्कारमर्हति अपराह्णस्त्रेधा भक्ते दिनस्य तृतीयांशः स्मृत्युक्तेनात्रैव वसंते
गलग्रहे न दोषायेत्यर्थः नारदः कृष्णपक्षे चतुर्थी च सप्तम्यादिदिनत्रयम् त्रयोदशी चतुष्कं च अष्टावेते गलग्रहाः एम:
वशिष्ठः पापांशकगते चंद्रे अरिनीचस्थितेपि च अनध्याये चोपनीतः पुनः संस्कारमर्हति अनध्यायस्य पूर्वेद्युस्तस्य चैव २७८

कायत्वापरिददामिइत्यादिकमंत्रानिरुक्तःकालश्च ८
अतीतकालनिर्णयनिरूपणं ५

व्रतबंधंविसर्गंचविद्यारंभंनकारयेत् राजमार्तंडः आरंभानंतरंयत्रप्रत्यारंभोनसिध्यति गर्गादिमुनयःसर्वेतमेवाकुशलंयथम् ज्योतिर्नि
बंधे अकालेसुचसर्वेषुयुगमन्वंतरादिषु अनध्यायंप्रकुर्वीततथासोपपदास्वपि सोपपदास्तुस्मृत्यर्थसारे सिताज्येष्ठद्वितीयाचआश्वि
नेदशमीसिता चतुर्थीद्वादशीमाघेएताःसोपपदाःस्मृताः एवंप्रदोषादिनेवर्ज्यम् प्रदोषस्वरूपमाहगोभिलः षष्ठीचद्वादशीचैवअर्द्ध
रात्रोननाडिका प्रदोषमिहकुर्वीतततृतीयात्रयामिका ज्योतिर्निबंधेव्यासः याचैत्रवैशाखसितानतृतीयामाघस्यसप्तम्यथफाल्गु
नस्य कृष्णेद्वितीयोपनयेप्रशस्ताःप्रोक्तामरद्वाजमुनींद्रमुख्यैः अत्रापिकृष्णप्रतिपद्वर्ज्यम् यत्तुवृद्धगार्ग्यः अनध्यायंप्रकुर्वीत
यस्तुनैमित्तिकोभवेत् सप्तमीमाघशुक्लेतुतृतीयाचाक्षयातथा बुधत्रयेदुवाराश्चप्रशस्तानिव्रतबंधनेइति तत्प्रायश्चित्तार्थोपन
अतीतकालिकः ६ यनविषयम् स्वाध्यायपियुक्तोसाःकृष्णप्रतिपदादयः प्रायश्चित्तनिमित्तेतुमेखलाबंधनेमताइतितेनैवोक्तेरितिनिर्णयामृतेका
लादर्शे यद्यप्यथोपेतपूर्वस्येत्युक्त्याअनिरुक्तंपरिदानकालश्चेत्याश्वलायनेनपुनरुपनयनेकालानियमउक्तस्तथापिनिमित्ता
नंतरमेवसः तदानीमकरणेतुपूर्वोक्तकालोज्ञेयः प्रतिवेदमुपनयनेकालानियमइतिमुक्तम् गर्गः ग्रहणेरवीन्द्वारवनिप्रकंपके
तुजमोल्कापतनादिदोषे व्रतंदशाहानिवदंतितज्ज्ञास्त्रयोदशाहंवदंतिकेचित् संकरेतुचराद्भुवरः दाहदिशाचैवधराप्रकम्पवज्र
अकस्माद्भूविदारणे ७ प्रपातेऽप्यविदारणेच केतोतथोल्काशुकराप्रपातेत्र्यहंनकुर्याद्व्रतमंगलानि तत्रैववेदव्रतोपनयनेस्वाध्यायाध्ययनेतथा नद
वाजपुत्रासोपपदास्वध्ययनेपिच हेमाद्रौज्योतिषे हस्तत्रयपुष्यधनिष्ठयोश्वपोष्णाश्विसाम्यादितिविष्णुमेषु शस्तेतिथौचप्र
बलेनयुक्तेकार्यो द्विजानांव्रतबंधमोक्षा ज्योतिर्निबंधेनारदः अष्टात्यर्कत्रयात्सेज्यचंद्रादित्युत्तराशाच विष्णुत्रयाश्विमित्रा
ब्रयोनिभान्युपनायने बृहस्पतिः त्रिषूत्तरेषुरोहिण्यांहस्तेमैत्रेचवासवे त्वाष्ट्रेसौम्येपुनर्वस्वोरुत्तमंह्युपनायनम् ज्योतिर्नि
बंधे पूर्वाहस्तत्रयेसार्पश्रुतिमूलेषुवह्निकेचमे यजुषांपाष्णमैत्रार्कादित्यपुष्यंसदाध्रुवे सामगानांहरीशार्कवसुपुष्यांतराश्विभे सि
धनिष्ठादितिमैत्रार्केच्छिदुद्योहेप्यथर्वणाम् राजमार्तंडस्तुश्रावणास्यपुनर्वसुनिषेधयति ताराचंद्रानुकूलेषुग्रहार्केषुशुभेषु
पुनर्वसौकृतेविप्रःपुनःसंस्कारमर्हति ज्योतिर्निबंधेनारदः सर्वेषांजीवशुक्रज्ञवाराःप्रोक्ताव्रतेशुभाः चंद्रार्कमिश्रमाज्ञेयाः सा सामग्रारवीयः १

नि० ८

प्रदोषानंतरं रात्रौ ब्रह्मौदनहोमकालः ८
अभ्रादिनुमिते ६

नि॰ सिं॰ १७८ मघाकुजयोः कुजः शाखाधिपतिर्यस्य शाखाधिपबलं तथा शाखाधिपतिलग्नं च दुर्लभं त्रितयं व्रते शाखाधिपाश्च रत्नसंग्रहे
ऋग्यर्वसामयजुषामधिपा गुरुसौम्यभौमसिताः जीवसितौ विप्राणां क्षत्रस्यारो रविर्भूविशाम् चंद्रद्युति पारिजाते बृहस्पतिः बहु
चानां गुरुरेवारियजुर्वेदजुषां बुधे सामगानां धरासूनो रथर्ववेदिनां रवेः अत्र लग्नमुख्यादिदेवज्ञेभ्यो ज्ञेयम् विस्तरभयान्नोच्यते
लल्लः व्रते हि पूर्वसंध्यायां यदि वा गर्जितं यदि तद्दिनस्याऽनध्यायो व्रतं तत्र विवर्जयेत् ज्योतिर्निबंधे नांदीश्राद्धकृतं चेत्स्यादनध्या
यस्तु कालिकः तदोपनयनं कार्यं वेदारंभं न कारयेत् एतच्च कृच्छ्रातिरिक्तानाम् तेषां तद्दिने वेदारंभाभावात् अनस्तेषामुपन
यनं भवत्येव एतच्च प्रातःस्तनिते सायंस्तनिते तु दिवैव चरुं श्रपयित्वा सायंसंध्योत्तरं होमं कुर्यात् न संध्यागर्जिते कालेन वर्षं स्यु
स्यात्तु दूषिते ब्रह्मौदनं पचेदस्तोपर्कं चेत्तन्निवर्तते ब्रह्मौदनं पचेदस्तोपर्कं मन्त्रं नदुप्यतीति संग्रहोक्तेरिति प्रयोगरत्ने भट्टचरणाः
अत्र शांतिरप्युक्ता नृसिंहप्रसादे ब्रह्मौदनविधेः पूर्वं प्रदोषे गर्जितं यदि तदा विघ्नकरं ज्ञेयं वटोरध्ययनस्य तत् तस्य शांतिं प्रकार
नवक्ष्ये शास्त्रानुसारतः प्रधानं पायसं साज्यं द्रव्यं शांतियज्ञे भवेत् सूक्तं बृहस्पतेर्विद्वान् पठेत्तत्राविकल्पये गायत्री चैव मंत्रः स्या
त्तायच्छ्रिंतंतु सर्पिषा धेनुं सवत्सकां दद्यादाचार्याय पयस्विनीम् ब्राह्मणान्भोजयेत्पश्चात्ततो ब्रह्मौदनं चरेत् उपनयनेऽधि
कारिणो माधवीये वृद्धमनुनोक्ताः पिता पितामहो भ्राता ज्ञातयो गोत्रजाग्रजाः उपायनेऽधिकारी स्यात्पूर्वाभावे परः परः प्रयो
गरत्ने पितैवोपनयेत्पुत्रं तदभावे पितुः पिता तदभावे पितुर्भ्राता तदभावे पिसोदरः पितेति विप्रपरं न क्षत्रियादेस्तेषां पुरोहित एव
उपनयनस्य द्वद्ध्यार्थत्वात् तेषां चाध्यापनेऽनाधिकारात् अत्र पितृव्यस्य ज्येष्ठभ्रात्रभावेऽधिकारः असंस्कृतास्तु संस्कार्या भ्रा
तृभिः पूर्वसंस्कृतैरिति ज्ञानवल्क्योक्तेः मातृर्ज्ञा दोषस्तु प्रागुक्तम् अथ मूकादीनां विशेषः प्रयोगपारिजाते ब्राह्मे ब्राह्मणा
ब्राह्मणाज्जातो ब्राह्मणः सद्धृतिस्मृतिः तस्माच्च बधिरकुब्जवामनपंगुषु जडगद्गदरोगार्तशुष्कांगविकलांगिषु मत्तोन्मत्ते
षु मूकेषु शयनस्थे निरिंद्रिये ध्वस्तपुंस्त्वेषु चैतेषु संस्काराः स्युर्यथोचितम् मत्तोन्मत्तौ न संस्कार्याविति केचित्प्रचक्षते कर्म
स्वनधिकाराच्च पातित्यं नास्ति चैतयोः तदपत्यं च संस्कार्यमपरे त्वाहुरन्यथा संस्कारमंत्रहोमादीन्करोत्याचार्य एव तु उपने राम॰ १७८
यांश्च विधिवदाचार्यः स्वसमीपतः आनीयाग्निसमीपं वा सावित्रीं स्पृष्ट्वा जपेत् कन्यास्वीकरणादन्यत्सर्वं विप्रेण कारयेत्

सतिहि कर्माधिकारे तदकरणे पातित्यम्

तिष्ठते आसीनाय वादमदुपदेशार्थं स्मर ३

गर्भाधानं ६

मातुःसाक्षाद्भगिनीं न तु सपत्नमातृजां ५

गुरुशिष्यो २

शांखायनाश्वलायनानां ६

योपत्यात्तु याक्षेत्रजो कुरु

तद्विषयानन्तु व्यभिचारोत्पन्न

एवमेव द्विजेर्जातो संस्कार्यो र्मकुंडगोलकाविति स्मृत्यर्थसारेण्येवम् कुण्डगोलकयोः संस्कार्यत्वमाहुनिषधश्चक्षेत्रजपुत्रविषयः अन्यथा व्यभिचारोत्पन्न
ब्राह्मणपुनोपनयनाद्यप्राप्तौ रस्त्वपराकैः गायत्र्युपदेशश्चात्तरतोग्नेः कार्यः उत्तरेणाग्निमुपविश्य ततः प्राङ्मुखश्च आचार्यः प्रत्यङ्मुखश्च इत
राधीहि भो इति शांखायनसूत्रोक्तेः यद्यपि कात्यायनेनाथास्मै सावित्रीमन्वाहोत्तरतोग्नेः प्रत्यङ्मुखायोपविष्टाय दक्षिणतस्तिष्ठते आ
सीनाय वैके इति विकल्प उक्तः तथापि कातीयानामेव सः बह्वृचानां तूत्तरत एव वेदैकत्वात् भिक्षायां विशेषमाह कात्यायनः
मातरमेवाग्रे भिक्षेत परश्चरमाधवीये मातरं स्वां स्वसारं स्वां मातुर्वा भगिनीं निजाम् भिक्षेत भिक्षां प्रथमं याचेनेन विमानयेत् अ
प्रमादादिना ६ थसंस्कारलोपे शौनकः आरभ्याधानमाचौलात्कालेतीतेनुकर्मणाम् व्याहृत्याज्यं सुसंस्कृत्य कुर्वाक्रमं यथाक्रमम् एतेष्वेकैकलो
पेतुपादकृच्छ्रं समाचरेत् चूडायां अर्द्धकृच्छ्रं स्यादापदीत्येवमीरितम् अनापदि तु सर्वत्र द्विगुणं द्विगुणं चरेत् पारिजाते कात्या
यनः लुप्ते कर्मणि सर्वत्र प्रायश्चित्तं विधीयते प्रायश्चित्ते कृते पश्चादतीतमपि कर्मैव कार्यमित्येक आचार्या नेत्यन्ये तु विपश्चितः इ
ति त्रिकाण्डमण्डनेन तु कालातीतेष्वकार्येषु प्राप्तवत्स्वपरेषु च कालातीतानि कृत्वैव विदध्यादुत्तराणि तु क्रमम् तत्र सर्वेषां
त्रेणानान्दीश्राद्धं कुर्यात् देशकालकर्त्रैक्यात् गणशः क्रियमाणानां मातृणां पूजनं सकृत् सकृदेव भवेच्छ्राद्धमादौ न पृथगा
दिष्विति छन्दोगपरिशिष्टात् एतद्बहूनामपत्यानां युगपत्संस्कारकरणविषयमिति वोपदेवः अतीतसंस्काराणां युगपत्करणे
ह्यन्ये तत्रापि चौलस्य उपनीत्या सह इति पक्षे उपनीतिदिने एवानुष्ठानं न पूर्वदिने सहत्वस्य दिवसैक्ये सन्निकृष्टतरत्वात् वृद्धाचा
राप्येवम् उपनीतिदिने मध्याह्नसंध्यामाह पारिजाते जैमिनिः यावद्ब्रह्मोपदेशस्तु तावत्संध्यादिकं न च ततो मध्याह्नसंध्या
दि सर्वं कर्म समाचरेत् ब्रह्मगायत्री यजुर्वचनम् उपायने तु कर्तव्यं सायं संध्योपासनम् आरभ्य ब्रह्मयज्ञं तु मध्याह्ने तु पर
हनीति तच्छाखान्तरविषयमिति पारिजातः विकल्प इति युक्तोपपश्यामः उपनयनाग्निस्त्रिरात्रं धार्यः अहमेतदग्निधारणं तौत्या
पस्तंबोक्तेः ब्रह्मयज्ञे विशेषमाह तत्रैव जैमिनिः अनुपाकृतवेदस्य कर्तव्यो ब्रह्मयज्ञकः वेदस्थाने तु सावित्री गृह्यते तत्समाय

अनतीतेषु ८

सायंकाले ३

अनधीतवेदस्य १

यद्यपि निषिद्धं मध्वाद्यो ग्रंथं न कुर्यात् गुरूच्छिष्टं त्वाचाराद्ग्राह्यम् २
पर्युषितं १

नि॰ सिं॰ १८० तद्धृति येषां तद्दिने एव वेदारंभस्तेषां नेदमिति दिक् अथ ब्रह्मचारिधर्माः याज्ञवल्क्यः मधुमांसांजनोच्छिष्टशुक्तस्त्रीप्राणिहिं
सनम् भास्करालोकनाश्लीलपरिवादादि वर्जयेत् मनुः अभ्यंगमंजनं चाक्ष्णोरुपानच्छत्रधारणम् वर्जयेदिति प्रकृतम्
पारिजाते कौर्मे नादर्शं चैव वीक्षेत नाचरेद्दंतधावनम् गुरूच्छिष्टं भेषजार्थं प्रयुंजीत न कामतः एतन्निषिद्धमध्वादि विषयम्
अन्यस्य गुरूच्छिष्टस्य सर्वदा प्राप्तेः स चेद्व्याधीयीत कामं गुरोरुच्छिष्टं भेषजार्थं सर्वं प्राश्नीयादिति वसिष्ठोक्तेः ज्येष्ठभ्रातुरि
त्यपि ज्ञेयम् पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोज्यमित्यापस्तंबोक्तेः गुरुपुत्रे तु स्मृत्यंतरे उक्तम् गुरुवद्गुरुपुत्रः स्यादन्यत्रोच्छि
ष्टभोजनात् प्रचेताः तांबूलाभ्यंजनं चैव कांस्यपात्रे च भोजनम् यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत् यमः मेखलामजि
नं दंडमुपवीतं च नित्यशः कौपीनं कटिसूत्रं च ब्रह्मचारी तु धारयेत् आग्नीध्रनं भैक्ष्यचर्यामधःशय्यां गुरोर्हितम् कुर्यादिति शे
षः मेखला माहाश्वलायनः तेषां मेखला मौंजी ब्राह्मणस्य धनुर्ज्या क्षत्रियस्य मौर्वी वैश्यस्येति आचार्यः त्रिवृन्मेखला
कार्या त्रिवारं स्यात्समावृता तदग्रयथस्त्रेयः कार्या पंचवा सप्तवा पुनः अत्र प्रवरसंख्यया नियम इति वृद्धाः अथ दंडः मनुः
ब्राह्मणो बैल्वपालाशौ क्षत्रियो वाटखादिरौ पैप्पलौदुंबरौ वैश्यो दंडानर्हति धर्मतः एषामभावे गौतमः यज्ञियो वा सर्वे
षां मूर्द्धललाटनासाप्रमाणा इति अजिनमाहाश्वलायनः अहतेन वाससा संवीतमैणेयेन वाजिनेन ब्राह्मणो रौरवेण
क्षत्रियो माजेन वैश्यमिति यद्यप्येणेयं कृष्णमृगचर्मेत्याच्यते चरणात्त्रिविधाणीति स्मृतेः एणेयमेणाश्चर्माथमे
णास्य राणभुभेत्रिब्वित्यमरकोशाच्च तथापि कृष्णरुरुबस्तान्यजिनानीति शंखोक्तेः सर्वेषां वा रौरवमिति यमोक्तेश्च मृगचर्म
णा सह विकल्पो ज्ञेयः वस्त्राजिनयोस्तु विकल्पः कार्पासं वाविकृतमिति गौतमोक्तेः अथ यज्ञोपवीतम् ग्रामान्निष्क्रम्य स
ख्या यवपर्वतप्ययुलीषुतं नावत्त्रिगुणितं सूत्रं प्रक्षाल्याब्दैवतैस्त्रिभिः ते चापो हि ष्ठादयः देवागारे नद्यां गोष्ठे नद्यां वान्यत्र राम:
वा शुचौ सावित्र्या त्रिगुणं कुर्यान्नवसूत्रं तु तन्तुवत् विल्वाश्वत्थादि जग्धार्क वृक्षस्याग्रेऽतमस्थं तु बध्नीयात्तत्स्रजीवं तु पितृभ्यो १८०
नमःप्रपद्य अमन्दा वक्षितवंशस्यापि तं दग्धोपनिदहितत् सव्यमंदग्रहीत्वा स्मिस्थापयेद्भूरिति ब्रुवन् पत्रपुष्पफलं वापि ग्राहनी

भिः परिक्षिपेत् अग्निमंत्राथ भूरग्निश्चेति च नवभिः तत्र मंत्राः भूरग्नये च पृथिव्यै च महते च स्वाहा भुवो वायवे चांतरिक्षाय च महते
च स्वाहा स्वरादित्याय च दिवि च महते च स्वाहेति हरिब्रह्मेश्वरेभ्यश्च वेदध्यानाय यज्ञोपवीतमित्यादिमंत्रस्यापदेव धारणे यज्ञोपवीत
मित्यादि व्याहृत्या वापि धारयेत् इति प्रयोगपारिजाते प्रतितंतुदेवताभेदमाह देवलः ॐकारः प्रथमतंतुर्द्वितीयोग्निस्तथैव च तृती
यो भगदेवत्यश्चतुर्थः सोमदैवतः पंचमः पितृदेवत्यः षष्ठश्चैव प्रजापतिः सप्तमो वसुदेवत्यो धर्मश्चाष्टम एव च नवमः सर्पदेवत्य इत्येता
नवदेवता इति य एवं नाभिजानाति ब्रह्मसूत्रसमुद्भवं वेदोक्तं निष्फलं तस्य स्नानदानजपादिकम् यज्ञाख्यः परमात्मा य उच्यते चै
व होतृभिः उपवीतं ततो स्येदं तस्माद्यज्ञोपवीतकम् ज्ञानं विज्ञेययोरैक्यमविज्ञानं द्विजोत्तमः तत्पजे दात्मनः सूत्रं ब्राह्मं ब्रह्मविनिर्मितम्
सिसृक्षुरेक एवाग्रे समासीनः शिवः स्वयम् इच्छागुणमयीं मायां स्वरूपामिवाकरोत् तयात्मके विष्णुस्रष्टापालं दिवौकसाम्
स्वयं ब्रह्माभवद्रुद्रो रुद्रश्चास्य जयाय सः ज्ञानात्मकेन हरिणा ब्रह्मात्मनि शिवेच्छया तत्सूत्रमुपवीतत्वाद्ब्रह्मसूत्रमिति स्मृतम् यज्ञेन
ज्ञोपवीतत्वाद्यज्ञसूत्रं विदुर्बुधाः तदाज्ञया तत्त्वाच्च ब्रह्मणा ब्रह्मसूत्रकम् तावल्लोकास्त्रयो वेदास्त्रयो देवास्त्रयोग्नयः शिवस्याज्ञा
यावर्णास्त्रिवृत्तत्सूत्रं समाश्रयत् तद्ग्रंथिमाश्रयत्तारस्त्रिमात्रो नादसंयुतः तद्ग्रंथ्यग्रे च सावित्री वेदमाता शिवाज्ञया एवं द्वादशदेव
त्वं ब्रह्मसूत्रं द्विजन्मनाम् ब्रह्माग्रे कल्पयामास वेदाहरणमनुत्तमम् यतो सेधत मात्रेण ब्रह्मसूत्रेण ते द्विजाः भवंति ब्राह्मणा नो
मवेदाही श्चत्रयस्त्विह यावत्प्रभृति चामासे ब्रह्मसूत्रं द्विजस्य तत् गुरुः प्रतिष्ठापयति कालेप्रभृति संयतः तावत्प्रभृति तस्यैव पित्रा
चार्य्यः स उच्यते कनिष्ठांगुष्ठवत्स्थूलं तदर्द्धं वा त्रिवृच्छुभम् आयुर्हरत्यतिकृशमतिदीर्घं तपोहरम् यशोहरमतिस्थूलमतिसूक्ष्मं
धनापहम् पवित्रं परमं शुद्धमायुष्यं च श्रियावहम् ओजस्यं ब्रह्मवर्चस्यं ब्रह्मसूत्रं यथोदितम् मनुः कार्पासमुपवीतं स्याद्विप्रस्योर्द्ध्व
वृतं त्रिवृत् पारिजाते देवलः कार्पासक्षौमगोवालशणवल्कतृणादिकम् यथासंभवतो धार्य्यमुपवीतं द्विजातिभिः तत्त्ववत्
तु कार्य्यम् सावित्र्या त्रिगुणं कुर्यान्नवसूत्रं तु तद्भवेत् इति तत्रैवोक्तेः भृगुः छंदोगपरिशिष्टे त्रिवृदूर्द्ध्ववृतं कार्य्यं तंतुत्रयमधोवृ
तम् त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रंथिरिष्यते ऊर्द्ध्ववृतं दक्षिणकरमूर्द्ध्वं कृत्वा वलितम् वामावर्त्तं वलितं त्रिगुणं कृत्वा दक्षिणा

वर्त्तं वलिकार्य्यम् स एक स्तंतुः एवं त्रितंतुकमित्यर्थः कात्यायनः पृष्ठदेशे च नाभ्यां च धृतं यद्विन्दते कटिम् तद्धार्य्यमुपवीतं स्यान्नातिलंबं
न चोच्छ्रितम् वशिष्ठः नाभेरूर्ध्वमनायुष्यमधो नाभेस्तपःक्षयः तस्मान्नाभिसमं कुर्यादुपवीतं विचक्षणः पारिजाते देवलः उ
पवीतं वटोरेकं द्वे तथेतरयोः स्मृते एकमेव यतीनां स्यादिति शास्त्रस्य निश्चयः स एव बह्वृचायुष्कामस्य तत्र मंत्रमाह स एव यज्ञोपवी
तमिति वा व्याहृत्या वापि धारयेत् हेमाद्रौ यज्ञोपवीते द्वे धार्य्ये श्रौते स्मार्ते च कर्मणि तृतीयमुत्तरीयार्थं वस्त्राभावे तदिष्यते देवलः
सावित्र्या दशकृत्वोऽभिमंत्रितानाभिस्तदुक्षयेत् विच्छिन्नं चाप्यधोजीर्णं भुक्त्वा निर्मितमुत्सृजेत् मनुः मेखलामजिनं दण्डमुप
वीतं कमंडलुम् अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मंत्रतः अथैतल्लोपे प्रायश्चित्तम् मनुः अकृत्वा भैक्ष्यचरणमसमि
ध्य च पावकम् अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत् अमत्या आपदि त्यागे तु याज्ञवल्क्यः भैक्ष्याग्निकार्य्ये त्यक्त्वा तु सप्तरात्रम
नातुरः कामावकीर्ण इत्याभ्यां जुहुयादाहुतिद्वयम् उपस्थानं ततः कुर्यात्समासिंचन्त्वनेन तु मंत्रास्तु मिताक्षरायां ज्ञेयाः चिं ८
सकृल्लोपे तु अग्निविधाने मानस्तोके जपेन्मंत्रं शतसंख्यं शिवालये अग्निकार्य्यं विना भुंक्ते येन पापं ब्रह्मचारिणः स्मृत्यर्थसारे तु सं
ध्याग्निकार्य्यलोपे स्नात्वाष्टसहस्रं जपः भिक्षालोपेऽष्टशतमभ्यासे द्विगुणं पुनः संस्कारश्चेत्युक्तम् आश्वलायने संवर्त्तः यः संध्यां
चैव नोपास्ते अग्निकार्य्यं यथाविधि गायत्र्यष्टसहस्रं तु जपेत्स्नात्वा समाहितः पारिजाते शातातपः ब्रह्मचारी तु योऽश्नीया
न्मधु मांसं तथैव च प्राजापत्यं चरेत्कृच्छ्रं व्रतशेषं समापयेत् अग्निविधाने तेवोधियाजपेन्मंत्रं लक्षं चैव शिवालये ब्रह्मचारी
स्वधर्मेषु न्यूनं चेन्मरणमेति तत् स्त्रीसंगे तु मनुः अवकीर्णी तु काणेन गर्दभेन चतुष्पथे स्थालीपाकविधानेन जपद्धुनिर्ऋ पगर्दभमेधं कृत्वा
तिं निशि विस्तरस्तु मिताक्षरादौ ज्ञेयः उपवीतनाशे तु हारीतः मनोव्रतपती भिक्षुस्तस्य आज्याहुती हुत्वा पुनः प्रतीयात् त निर्ऋतिरपि काराः
त्रैव मरीचिः ब्रह्मसूत्रं विना भुंक्ते विण्मूत्रं कुरुतेऽथवा गायत्र्यष्टसहस्रेण प्राणायामेन शुध्यति अभिवादने प्रत्यभिवाद
ने दोषविशेषः स्मृत्यर्थसारपारिजातादौ ज्ञेयः यमः ज्यायान्पिकनीयासं संध्यायामभिवादयेत् विना शिष्यं च पुत्रं च दौहि राम:
त्रं दुहितुः पतिम् अथ पुनरुपनयनम् पारिजाते शातातपः लशुनं गृंजनं जग्ध्वा पलांडुं च तथाशनम् उष्ट्रमानुषकभाश्व २०१

पित्रादिव्यतिरिक्तस्य प्रेतकर्मकर्तुः ८

रासमीक्षीरभोजनात् उपायनं पुनः कुर्यात् तप्तकृच्छ्रं चरेन्मुनिरिति हेमाद्रौ तत्रैव मनुः जीवन् यदि समागच्छेद् घृतकुम्भे निमज्य च उद्धृत्य
स्नापयित्वास्य जातकर्मादि कारयेत् तत्रैव पाद्मे प्रेतशय्याप्रतिग्राही पुनः संस्कारमर्हति चन्द्रिकायां बौधायनः सिन्धुसौवीरसौरा
ष्ट्रांस्तथा प्रत्यन्तवासिनः अङ्गवङ्गकलिङ्गांश्च गत्वा संस्कारमर्हति हेमाद्रौ प्रायश्चित्तकाण्डे गौतमः खरमुष्ट्रं च महिषमन
ड्वाहमजं तथा वृषमारुह्य मुखजः कोशं चान्द्रं विनिर्दिशेत् मार्कण्डेयः खरमारुह्य विप्रस्तु योजनं यदि गच्छति तप्तकृच्छ्रत्रयं प्रा
क्शरीरस्य विशोधनम् पुनर्जन्म प्रकुर्वीत च्छगगर्भविधानतः मदनरत्ने मिताक्षरायां स्नानमात्रमुक्तम् मनुः अज्ञानात्प्राश्य
विण्मूत्रं सुरासंस्पृष्टमेव च पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः मिताक्षरायां पराशरः यः प्रत्यवसितो विप्रः प्रव्रज्यातो विनि
र्गतः अनाशकनिवृत्तश्च गार्हस्थ्यं चेच्चिकीर्षति स चरेत् त्रीणि कृच्छ्राणि त्रीणि चान्द्रायणानि च जातकर्मादिभिः सर्वैः संस्कृतः
शुद्धिमाप्नुयात् तथा पित्रादिव्यतिरेके ब्रह्मचारिणः प्रेतकर्मकरणे पुनरुपनयनमित्यपरार्कादयः त्रिस्थलीसेतौ कर्मनाशा
जलस्पर्शात् करतोयाविलङ्घनात् गण्डकीबाहुतरणात् पुनः संस्कारमर्हतीति पठन्ति तन्न दानधर्मप्रकरणे करतोयास्नानप्राशस्त्या
संबोधनं ७ क्तेः करतोये सदानीरे सरिच्छ्रेष्ठेऽतिविश्रुते आप्लावयसि पारणं पापहरकरोद्भव इति स्मृतिदर्पणचन्द्रिकालिखितस्नानमन्त्रा
त्व पराशरः अजिनं मेखला दण्डो भैक्ष्यचर्याव्रतानि च निवर्तन्ते द्विजातीनां पुनः संस्कारकर्मणि हरदत्तस्तु यस्त्वेकवेदमधीत्या
न्यं वेदमध्येतुमिच्छति तस्य पुनरुपनयनं तेन प्रतिवेदमुपनयनं कर्तव्यमित्याह अन्येन तन्मन्यते सर्वेभ्यो वेदेभ्यः सावित्र्यनू
च्यत इत्यापस्तम्बोक्तेः तद्विधिः कारिकायाम् वेदान्तरमधीत्यैवमृग्वेदं येऽध्यधीयते उपनीतिरियं तेषामलङ्करणवर्जिता य
देतदुपनीतस्य प्रायश्चित्तं यदा भवेत् कृताकृतं च वपनं मेधाजननमेव च मेधाजननसञ्ज्ञा व्रतचर्या भवेदिह अनुप्रवचनी
यश्च तदभावे दृष्टं नहि परिदानं न कार्यं स्यात् त्रिमितानां तरत्विदम् पूर्वं सावाचयेत् तस्यानेन तत्सवितुर्वृणीमह इति यत्तु हारीतः
द्विविधाः स्त्रियः ब्रह्मवादिन्यः सद्योवध्वश्च तत्र ब्रह्मवादिनीनामुपनयनमग्नीन्धनं वेदाध्ययनं स्वगृहे च भैक्ष्यचर्येति सद्यो

गायत्र्याः २

अनध्यायाः ८   मात्रस्यां ७

ति॰ सिं॰ वधूनामुपनयनं कृत्वा विवाहः कार्य इति न युगान्तर विषयं पुराकल्पे तु नारीणां मौञ्जीबन्धनमिष्यते अध्यापनं च वेदानां सा
१८८ वित्रीवाचनं तथेति यमोक्तेः अथानध्यायाः पारिजाते हारीतः प्रतिपत्सु चतुर्दश्यामष्टम्यां पर्वणोर्द्वयोः श्वोऽनध्यायेऽद्यशर्व
र्यां नाधीयीत कदाचन नारदः अयने विषुवे चैव शयने बोधने हरेः अनध्यायस्तु कर्त्तव्यो मन्वादिषु युगादिषु निर्णयामृते
चातुर्मास्यद्वितीयासु मन्वादिषु युगादिषु अनध्यायस्तु कर्त्तव्यो याचसोपपदा तिथिः गर्गः शुचावूर्जे तपस्ये च या द्वितीया विधु
कृष्णपक्षे ५ क्षये चातुर्मास्यद्वितीयास्ताः प्रवदन्ति मनीषिणः स्मृत्यर्थसारेऽपि आषाढी कार्त्तिकी फाल्गुनी समीपस्थ द्वितीयासु चेति
मनुः उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतम् अष्टकासु त्व्यहोरात्रमृत्वन्तासु च रात्रिषु इति उत्सर्गे तु मनूक्त पक्षिणी पह
रात्राभ्यामहस्य विकल्प इति विज्ञानेश्वरः अष्टका शब्देन सप्तम्यादि त्रयं ज्ञेयम् तिस्रोऽष्टकास्त्रिरात्रं स्यात् मासिके इति गौतमोक्तेः
ऋत्वन्ता स्त्विति सौरचान्द्रमासेषु चान्त्यस्य पर्वत्वेन वनिषेधसिद्धिरिति सर्वज्ञ नारायणः एते नित्याः नैमित्तिकानप्याह याज्ञवल्क्यः
त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबन्धुषु उपाकर्मणि चोत्सर्गे स्वशाखाश्रोत्रिये तथा संध्यागर्जित निर्घातभूकम्पोल्कानिपात वज्रपाते ९
ने समाप्य वेदं द्युनिशमारण्यकमधीत्य च पञ्चदश्यां चतुर्दश्यामष्टम्यां राहुसूतके ऋतु संधिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च
पशुमण्डूकनकुलश्वाहिमार्जारमूषकैः कृतेऽन्तरे त्वहोरात्रं शक्रपाते तथोच्छ्रये यह रणे घुनिश्शकौ वपि अस्तास्तम्यहरस्तुम
प्राक् स्मृत्यर्थसारे तु रात्रौ ग्रहे तिस्रो रात्रीः दिवा च त्र्यहः इत्युक्तम् मनुः सोरः मुक्त्व सूत्सव विषयम् ऊर्द्धं भोजनाद्युत्सवे इति विवाहादौ ६
एकादश्याहे ५ गौतमोक्तेः आह्निकं मह्निको द्विष्टमितम् तत्र तु त्र्यहः इति मनुः स्मृत्यर्थसारे चैवम् यत्तु पश्चा धेत रण्ये त्र्यहं मुपवासो विप्रवास
श्वेति गौतमोक्तम् तत्प्रथमाध्ययने याज्ञवल्क्यः श्वक्रोष्टुगर्दभोलूक सामवाणार्त्तनिःश्वने अमेध्यशववशूद्रान्त्यश्मशा
नपतितान्तिके देशेऽशुचावात्मनि च विद्युत्स्तनितसंप्लवे भुक्त्वार्द्रपाणिरम्भोन्तरर्द्धरात्रेऽतिमारुते पांशुप्रवर्षे दिग्दाहे संध्यानीहार राम:
भीतिषु धावतः पूतिगन्धे च शिष्टे च गृहमागते खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणरोहणे सप्तत्रिंशदनध्यायानेतांस्तात्का १८८
लिकान्विदुः वाशिष्ठवंशः इति तत्र तु वीरमित्रोदये स्त्रेः अमेध्याः सूतिकादयः स्तनितं गर्जः वर्षातोऽन्यत्र गर्जवर्षविद्युतां योग

अनुवादे ८   राजकृतस्य शक्रध्वजस्य पाते ७

सचजानुभ्यां
गीयग्रामा
नरू

लभेनेतिप्रसिद्धस्य ५

कमरख ५

पघस्राकालिकः वर्षासुनात्कालिकः इतिनारायणः संध्यागर्जेतुहारीतः सायंसंध्यास्तनितेरात्रिः प्रातःसंध्यास्तनितेऽहोरात्रम्
पघस्राकालिकः वर्षासुनात्कालिकः इतिनारायणः संध्यागर्जेतुहारीतः सायंसंध्यास्तनितेरात्रिः प्रातःसंध्यास्तनितेऽहोरात्रम् दिनतृतीयांशेऽन्तरतुविद्युतिसर्वरात्रमित्याहसएव त्रिभागादि
रात्रौविद्युत्सपररात्रस्यवधिः विद्युतिनक्तेचापररात्रादितिगौतमोक्तेः दिनतृतीयांशोत्तरतुविद्युतिसर्वरात्रमित्याहसएव त्रिभागादि
प्रवृत्तोसर्वमिति अर्द्धरात्रमध्ययामद्वयेइतिविज्ञानेश्वरः मध्यंदिनेचतुष्टयेइतिनिर्णयामृते मनुः नविवादेनकलहेनसेनायां
नसंगरे नभुक्तमात्रेनाजीर्णेनवमित्वानसूतके रुधिरेचस्रुतेगात्राच्छस्त्रेणचपरिक्षते कौर्मे श्लेष्मातकस्यछायायांशा आच्छादनवस्त्रे
ल्मलेमधुकस्यच कदाचिदपिनाध्येयंकोविदारकपित्थयोः मनुः नयानःप्रौढपादश्चकृत्वाचैवावसक्थिकाम् नाधीयीतामि राशीतादोवद्ध
षंजग्ध्वासूतकान्नाद्यमेवच प्रौढपादः पादोपरिपाददानात्रासनारूढपादोवेतिहरदत्तः सोपपदास्वपिप्रागुक्तम् स्मृत्यर्थसारे हस्तनाम् ५
स्तनांतेयदधंत बृजगध्वा ६ श्रवणाद्वादशीमहाभरणीपाःश्रेतद्वितीयाशारथसप्तम्यामाकाशेशवदर्शनेचाहोरात्रम् असपिंडगुरौत्रिरात्रम्आचार्यउपाध्या
च येपक्षिणी आचार्यभार्यापुत्रशिष्येष्वहोरात्रम् अस्नुमातेगोविप्रसूतेत्रिरात्रम् अयनेविषुवेचैवपक्षिणी अकालवृष्टौच
आरण्यमार्जारसर्पनकुलपुंचुनखादरंतरागमनेत्रिरात्रम् आरण्यश्वसृगालादिवानररजकादौद्वादशरात्रम् खरवराहो
ष्ट्रचंडालसूतिकोदक्याशवादौमासम् रोगवयानास्तिकादेमासम् शशमेषश्वपाकादौषण्मासगजगडसारससिंहव्याघ्र
पापिकृतव्रात्यवद्धमनध्यायः शोभनदिनेचानध्यायः विवाहप्रतिष्ठोद्यापनादिष्वासमाप्तेःसगोत्राणामनध्यायः उदये
स्तमयेवापिमुहूर्तत्रययगामियत् तद्दिनंतदहोरात्रंचानध्यायविदोविदुः केचिदाहुःक्वचिद्देशेयावत्तद्दिननाडिकाः निर्णया प्रतिपदादिषुदिकाः४
मृते तावदेवत्वनध्यायोनतन्मिश्रेऽदिनांतरे प्रदोषस्त्वाहप्रजापतिः षष्ठीचद्वादशीचैवअर्द्धरात्रोननाडिका प्रदोषेनत्वधी
यीततृतीयानवनाडिका निर्णयामृतेगर्गः रात्रौयामत्रयादर्वाक्सप्तमीवात्रयोदशी प्रदोषःसतुविज्ञेयःसर्वविद्याविगर्हि
तः रात्रौनवसुनाडीषुचतुर्थीयदिदृश्यते प्रदोषःसतुविज्ञेयोवेदाध्ययनगर्हितः कौर्मे अनध्यायस्तुनांगेषुनेतिहासपुरा

द्वितीयादौ ३

उद्धारणे २

उपनयनांगभूतम् २

धि.सिं. यायोः नधर्मशास्त्रेष्वनेषुपर्वस्विपेनानिवर्जयेत् शौनकः नित्येजपेचकाम्येचक्रतोपारायणेपिच नानध्यायोस्तिवेदानांग्र
२८३ हणेग्रहणेस्मृतेः इत्यनध्यायाः अथमहानाम्न्यादिव्रतम् श्रीधरः तिथिनक्षत्रवारांशशुद्धौदयनिरीक्षणम् चौलवत्स
वैमाख्यातेसगोदानव्रतेषुच एतेषांलोपेशौनकः व्रतानिविधिनाकृत्वास्वशाखाध्ययनंचरेत् अकृत्वोप्यस्यनेयेनसपा
पीविधिपातकः प्रत्येकंकृच्छ्रमेकैकंचरित्वाद्याकृतीःशनम् कृत्वाचैवतुगायत्र्याःस्नायादित्याहशौनकः स्मृत्यर्थसारेतु
त्रीणिषट्द्वादशवाकृच्छ्रानिकृत्वापुनर्व्रतंचरेदित्युक्तम् अथसमावर्तनम् सुरेश्वरः सौम्यभानुजयोर्वारेनक्षत्रेचव्रतादिते
ताराचंद्रविशुद्धौचस्यात्समावर्त्तनक्रिया वशिष्ठः स्नानंमध्याह्नकालेनुरोहरणंकारयेच्छुभम् पूर्वाह्नेतदभावेतुकुर्यात्स्ना
नंयथाविधि सर्वर्त्तवाविवाहस्यतिमूत्राघृदाद्दक्षिणायने विवाहस्तदासमावर्त्तनमपितत्रैव अन्ययोदगयनेसमावर्त्तनेनना
श्मीननिष्ठतेनिविरोधःस्यादित्युक्तंसुदर्शनभाष्ये एतच्चब्रह्मचारिव्रतलोपप्रायश्चित्तंकृत्वाकार्यम् तदाहबौधायनः शौचस
ध्यादर्भभिक्षाग्निकार्यरहितस्यकौपीनोपवीतमेखलादंडाजिनधारणंदिवास्वापछत्रपादुकास्त्रग्विधारणवर्त्तनानुलेपना
जनघृतरत्नसंगीतवाद्याभिरतोब्रह्मचारीकृच्छ्रत्रयंचरेन्महाव्याहृतिहोमंपाहित्रयोदशहोमंचकुर्यात् समावर्त्तनोत्तरपूर्व
मृतानांत्रिरात्रमाशौचंकार्यम् आदिष्टीनोदकंकुर्यादाव्रतस्यसमापनात् समाप्तेतूदकंदत्वात्रिरात्रमशुचिर्भवेदितिमनूक्तेः
आदिष्टीब्रह्मचारीतिविज्ञानेश्वरः ब्रह्मचर्ययदिकश्चिन्मृतस्तदात्रिरात्रमध्येविवाहःकार्योन्यथानेतिसिद्धांति जननेतु अतीते ५
सत्यपिनत्रिरात्रम् तत्रातिक्रांताशौचाभावादुदकंदत्वेतिवचनाच्चेतिदिक् स्नातकव्रतान्याहव्यासः यज्ञोपवीतद्वितयंसोदकंच
कमंडलुम् छत्रंचोष्णीषममलंपादुकेचाप्युपानहौ रौक्मेचकुंडलेवेदकृत्तकेशनखःशुचिः वेदोदर्भवटुः मनुः उपानहौचवा
सश्चधृतमन्यैर्नधारयेत् उपवीतमलंकारंमृजंकरकमेवच अन्यान्यपिचकृच्छ्रचर्यस्मृत्यादिभ्योज्ञेयानि अथक्षुरिकाबंधः राम:
न्यानिर्निबंधेनारदः क्षुरिकाबंधनंवक्ष्येनृपाणांप्राक्करग्रहात् विवाहोक्तेषुमासेषुशुक्लपक्षेप्यनस्तगे जीवशुक्रेचभृगुत्रेच २८३

समावर्त्तनम् ८

पाहिनोअग्नएकया ७

सप्तदर्भमुष्टि: ३

सदः। तयातद्ग्रहणेन नैव तत्फलं बोध्यं ४

प्रवर ३ — नृप — अथ: ७

द्वाराबलान्विते मौंजीबंधर्क्षतिथिगुरुजीववर्जितवासरे संग्रहे गुरुद्वारेण राजपुत्राणां मौंज्यभावे सूत्रबंधनम् मौंजीबंधोक्ततिथ्यादौ का
र्यं भौमदिनं विना अथ विवाहः याज्ञवल्क्यः अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् अनन्यपूर्विकां कान्तामसपिंडां यवीयसीम्
अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम् लक्षण्यां बाह्यान्तरलक्षणैर्युक्ताम् बाह्यानि काश्यारेखरत्नादीप्रसिद्धानि अन्तराणि
बुद्ध्यादीनि पिंडान्कृत्वेत्याश्वलायनोक्तानि असपिंडां सापिंड्यरहिताम् तच्चैकशरीरावयवान्वयेन भवति एकस्य हि पितुर्मातुर्वा शरीर
स्यावयवाः पुत्रपौत्रादिषु साक्षात्परम्परया वा शुक्रशोणितादिरूपेण स्रुताः यद्यपि पत्न्याः पत्या सह भ्रातृपत्नीनां च परस्परं नैतत्सम्भ
वति यथाप्याधारत्वेनैकशरीरावयवान्वयस्त्वेवमेकस्य हि पितृशरीरस्यावयवाः पुत्रद्वारेण तास्वाहिता इति विज्ञानेश्वरादयः चन्द्रिका
परार्कमेधातिथिमाधवादयस्तु एकपिंडदानक्रियान्वयित्वं सापिंड्यं लेपभाजश्चतुर्थाद्याः पित्राद्याः पिंडभागिनः पिंडदः सप्तमस्तेषां सापिं
ड्यं सप्तपिंडकमिति मात्स्योक्तेः न च पितृव्यादिष्वेतन्नास्तीति वाच्यम् तत्कर्तृकश्राद्धदेवतैक्येन तत्सत्त्वात् एतज्जनकर्तृकश्राद्धे हि ये देवता
भूतास्तेषां मध्ये यः कश्चिदन्यकर्तृकश्राद्धेनु प्रविशति तेषां सापिंड्यं तद्भार्याणामपि भर्तृकर्तृकश्राद्धे सहाधिकारित्वेन तदन्वयात् न च
मातुलादिष्वेतन्नास्तीति वाच्यम् मातामहरूपदेवतैक्यात् ननु गुरुशिष्यादेरपि श्राद्धदेवतात्वात्सापिंड्यत्वं स्यात् किं वक्तुना सर्वाभावे
नृपतिः कारयेत्तस्य रिक्थेनेति मार्कंडेयपुराणात् राज्ञोपि श्राद्धकर्तृकत्वात् सापिंड्यप्रसंगः सत्यम् पंचमात्सप्तमादूर्ध्वं मातृतः पि
तृतस्तथेति याज्ञवल्क्यवचनेन मातापितृसंबंधे एव तत्सत्त्वात् ऊर्ध्वं सापिंड्यनिवृत्तेः प्रतिषेधः ननु पंचमाद्यवधिनियम्यतेन नमा
तृतश्चेत्यादिवाक्यभेदात् मैवम् मातृकुले पंचमत्वस्य पितृकुले सप्तमत्वस्य च बोधने तुल्यत्वात् पौरुषेयत्वाददोष इति चेत् तुल्यमन्य
त्रापि किंच अवयवान्वयपक्षे यथायोगरूढ्यापरिहारस्तथेहापि तेन मातृकुले चैकपिंडदानक्रियान्वयित्वं सापिंड्यमित्याहुः तेनैक
स्य पित्रादयः षट् पुत्रादयश्च षट् सपिंडा भवंति अत्र केचिदुभयतः सापिंड्यनिवृत्तावेवोद्वाहो नान्यथेत्याहुः हरदत्तादयस्तु सगो
त्रत्वेव सापिंड्यस्य सप्रतियोगिकत्वेन एकतो निवृत्तावन्यतो निवृत्तेरावश्यकत्वान्मूलपुरुषमारभ्याष्टमो वारः मूलपुरुषमार

सापिंड्यस्य लक्षणं — नमोक्तः ७ — साप्तपुरुषम् ८

एकशरीरान्व यित्वम् ५ ७

नसप्तमेपि ८

श्राद्धदेवतैक्यात्पि ... तु महि ... तृव्यादिकर्तृकश्राद्धदेवतैक्याद्वीतिवाक्यभेद

अतीता: २ — नहि पित्रादिभ्य एव पितृव्यादिभ्योयं पिंडान्ददाति ६ — कूटस्थभूतायामातुः कूटस्थापित्युश्च ६

अग्रिमा: २ — वाक्यभेददोषस्य ३ — पितृव्यादिकर्तृकश्राद्धे तज्ज्ञातपुत्रकर्तृकश्राद्धे च देवतैक्यात् ६

उभयोरपि ... यद्यपि पंचमत्वाद्यवनियम्यते तथापि अवध्याकांक्षायां मातृत एव पितृतएवेति वाक्य

त्यावरयो: २

आत्ममातापितॄणां बंधवो यथा। आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुः सुताः। आत्म×
मातुलपुत्राश्च विज्ञेया आत्मबांधवाः ।१। पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः×
पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबांधवाः ।२। मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः×
सुताः मातुर्मातुलपुत्राश्च विज्ञेया मातृबांधवा इति ६

यदा कूटस्थात्कन्ये पंचम्यौ तदा तत्पुत्रयोः षष्ठयोः सापिण्ड्यं×
निवृत्तं। यदा कन्ये एव कूटस्थे न तदा कन्यापेक्षया कन्यापुत्रा×
पत्ययोः सापिण्ड्यमस्ति। पूर्ववदिहापि सापिण्ड्यासापिण्ड्यप्रयु×
क्तो न दोषः ४

यदा सापिण्ड्यविचारे कन्यायाः प्रतियोगी वर
स्तदा सापिण्ड्यं। यदा तु न प्रतियोगी कूटस्थ
स्तदा सापिण्ड्यं। इत्यर्थः २

नोऽ

नि॰ सिं॰
१८४

अथ द्वितीयादिकामुद्वहेदित्याहुः शिष्टास्तु नवधूवरयोः स्वतः सापिण्ड्याभावेऽपि किं तु कूटस्थसंततित्वात्तत्सापिण्ड्ये नैव अत्र च मन्वरं प्रति
कन्यायाः असापिण्ड्येपि कन्यायाः कूटस्थेन तत्सापिण्ड्यात्तत्संततिस्थत्वाद्वरस्तां प्रति सपिण्ड एवेत्यविवाहः सापिण्ड्यासापिण्ड्ययोः प्र
तियोगिभेदेनाविरोधादित्याहुरिदमेव युक्तम् आशौचेप्येवं सापिण्ड्यं ज्ञेयम् यत्र तु मध्ये विच्छिन्नमपि सापिण्ड्यं मण्डूकप्लुतिवत्तद
नुवर्त्तते यथा कूटस्थात्पंचम्योः कन्ययोः पुत्रौ तत्र निवृत्तिः तदपत्ययोस्त्वनिवृत्तिस्तत्रापि न दोषः संबंधिभेदात् अत्र कूटस्थमा
रभ्य गणना कार्या तदुक्तम् वध्वा वरस्य वा तातः कूटस्थाद्यदि सप्तमः पंचमी चेत्तयोर्माता तत्सापिण्ड्यं निवर्त्तते इति कूटस्थो
मूलपुरुषः विश्वरूपनिबन्धे एवमुक्तप्रकारेणापि त्रिबंधुभ्यः सप्तमात् ऊर्ध्वमेव विवाह्यत्वं पंचमान्मातृबंधुतः संतानो भिद्यते य
स्मात्पूर्वजाद्युभयत्र च तस्माद्गणयेद्धीमान् वरयावधूकन्यकाम् स्मृतितत्त्वे नारदः आसप्तमात्पंचमाच्च बंधुभ्यः पितृमा
तृतः अविवाह्या सगोत्रा च समानप्रवरा तथा अत्र बंधुभ्य इति पंचमीनिर्देशात्पितुः पितृष्वसृपुत्रात्सप्तमी मातुः पितृष्वसृपुत्राच्च पंच
मी अपि त्यज्येते एवमन्यबंधुष्वपि ज्ञेयम् तत्रापि त्रिगोत्रान्तर्ये वर्गापि विवाहं कुर्यात् वक्ष्यमाणवचनात् त्रिगोत्रगणना च मातामहगो
त्रापेक्षया न तु स्वापेक्षया अन्यथा पितुः पितामहदुहितुर्दौहित्रीपुत्री परिणेया स्यात् वध्वा मातामहगोत्रापेक्षया तु त्रिगोत्रान्तर्ग
ते नैव विवाहप्रसंग इति संबंधत्वादयोगाद्यथा संबंधविवेके शूलपाणिरप्याह पंचमात्सप्तमाच्चार्वागपि त्रिगोत्रांतरेणाविवा
ह्या असंबंधा भवेन्मातुः पिण्डेनैवोदकेन वा सा विवाह्या द्विजातीनां त्रिगोत्रान्तरिता च या इति बृहन्मनूक्तेः सन्निकर्षेपि कर्त्तव्यं त्रि
गोत्रात्परतो यदीति देवलोक्तेश्चेति एतच्च दाक्षिणात्या न मन्यते यत्तु वसिष्ठः पंचमीं सप्तमीं चैव मातृतः पितृतस्तथेति यच्च
विष्णुपुराणम् पंचमीं मातृपक्षाच्च पितृपक्षाच्च सप्तमीम् गृहस्थ उद्वहेत्कन्यां न्याय्येन विधिना नृपेति तत्पंचमीं सप्तमीमतीत्येति व्याख्येय
म् पंचमसप्तमं चैव येषां वैवाहिकी क्रिया क्रियापरा अपि हि ते पतिताः शूद्रतां गताः इत्यपरार्के मरीचिवचनात् हारलतायां शंखलिखि
तौ सपिण्डता तु सर्वेषां गोत्रतः साप्तपौरुषी पिण्डश्चोदकदानं च आशौचं च तदानुगम् यत्तु पंचमीं मातृतः परिहरेत् सप्तमीं पितृत

तथैव तेषां संप्रदायः। पंचमात्सप्तमादूर्ध्वमिति वचन एव तेषां स्नेहात् ४

कूटस्थमारभ्य पंच
मीपर्यन्तमागत्य
पंचम्याः पुनः पंच
मीपर्यन्तं मंडूकव
त्सापिण्ड्यप्लुतिमि
व कृत्वा प्रस्थितम् ३

राम॰
१८४

नहि प्रत्यक्षे श्रुते बाधे यंनवेति विकल्पः संभवति एवमिहापि या पंचमी अविवाह्या सा विवाह्येति न संभवतीत्यर्थः । वचनाद्विकल्प इति चेन्न । उक्तदोषात् । तद्वचनानां गतिं वक्ष्यति

ये ३ मु६७

स्त्रीन्मातृतः पंच पितृतो वेति पैठीनसिस्मृतौ त्रीणि त्वनुकल्प इति माधवोक्तेः पंचमीं सप्तमीं चैव मातृतः पितृतस्तथा । दशभिः पुरुषैः
श्रो २ ख्याता श्रोत्रियाणां महाकुलात् । उद्वहेत्सप्तमादूर्ध्वं तदभावे तु सप्तमीम् । पंचमीं तदभावे तु पितृपक्षेप्ययं विधिः । सप्तमीं च तथा षष्ठीं
पंचमीं च तथैव च । एवमुद्वाहयेत्कन्यां न दोषः शाकटायनः । तृतीयां वा चतुर्थीं वा पक्षयोरुभयोरपि । विवाहयेन्मनुः प्राह पाराशर्यो गिरो
यमः । यस्तु देशानुरूपेण कुलमार्गेण चोद्वहेत् । नित्यं स व्यवहार्यः स्याद्वेदाच्चैतन्न दृश्यते इति चतुर्विंशतिमतात् । चतुर्थीमुद्वहे
त्कन्यां चतुर्थः पंचमोपि वा । पराशरमते षष्ठीं पंचमो न तु पंचमीमिति पराशरोक्तेश्चानुकल्पत्वेनापि पंचम्यादिपरिणयनेकार्थ्य
मिति प्रतीयते । अत्र हि तदभावे इति स्पष्टमेवानुकल्पत्वमुक्तम् । तन्न यथाश्रुतं ज्ञेयम् । पूर्वोक्तमरीचिवचोविरोधात् । वस्तुनि विक चतुरशीत्यधिक शतपत्रे कएष्ठाव धः द्वितीयपंक्तौ ज्ञेयम् ६
ल्पासंभवात् । पंचमात्सप्तमाद्धीनां यः कन्यामुद्वहेद्द्विजः । गुरुतल्पी स विज्ञेयः सगोत्रां चैव वहन्निति विघ्नुक्तेश्च तस्मान्मदनपा
रिजातनाद्युक्तदिशा दत्तकसापत्नसंबंधाद्यनुप्रवेशे ब्राह्मणादीनां क्षत्रियादिसपिंडविषये वा पूर्वोक्तानि नेयानि तत्त्वनुकल्प
इति भ्रमितव्यम् । यत्तु स्मृतिचंद्रिकामाधवादयः आहुः तृतीये संगच्छावहा इति शतपथश्रुतेः । तृप्ताजहुर्मातुलस्येव योषा
भागस्ते पैतृष्वसेयी वपामिवेति । गर्भे नु नौ जनिता दंपती क इति च मंत्रवर्णात् । मातृष्वसृसुतां केचित्पितृष्वसृसुतां तथा
विवहंति क्वचिद्देशे संकोच्यापि सपिंडतामिति शातातपोक्तेश्च मातुलकन्योद्वाहः कार्यः । यद्यपि पितृष्वसृकन्योद्वाहोपि प्राप्त
स्तथाप्यस्वर्ग्यं लोकविद्विष्टमिति निषेधाद्वचनांतरेण तदुद्वाहस्यानुविधानाच्च न कार्यः । अयं तु दाक्षिणात्यशिष्टाचारानुको
ध्य इति । न च पूर्वोक्तश्रुतीनामर्थवादमात्रतामानांतरेणासिद्धौ उपरि देवेभ्यो धारयतीतिवदनुवादानुपपत्त्या विकल्पनात् ।
यत्तु शातातपः मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च । समानप्रवरां चैव त्यक्त्वा चांद्रायणं चरेत् । यच्च मनुः पैतृष्वस्रेयीं भ
गिनीं स्वस्रीयां मातुरेव च । मातुश्च भ्रातुराप्तस्य गत्वा चांद्रायणं चरेत् । एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत्तु बुद्धिमान् । यच्च व्या
सः मातुः सपिंडा यत्नेन वर्जनीया द्विजातिभिरिति । तद्गांधर्वादिविवाहोढमातृविषयम् । तत्र पितृगोत्रानिवृत्तेः । अत एव मा
र्कंडेयपुराणम् । गांधर्वादिविवाहेषु पितृगोत्रेण धर्मवित् । ब्राह्म्यादिविवाहे तु परिणयेवेति भट्टसोमेश्वरेणापि मातुलक

उक्तामपि ४ पित्रादिभिः स्वगोत्राद्वियोज्यादानात् २

मातुलकन्याविवाहकारिणाम् ७ विवादः ३ देशो ३

नि. सिं. न्योद्वाहमुद्वाहस्य स्मृतिविरोधेपि पूर्वोक्तश्रौतलिंगबलीयस्त्वादस्य कर्त्तव्यतामाह तदेतदुक्तकस्यपालकदत्त्रिमम मातृसोदरकन्या
विषयत्वेनासवर्णा मातुलकन्याविषयत्वेन चोपपन्नमप्यविचारितरमणीयं यथा तथास्तु तथापि कलौ तावन्निषिद्धमेव
१८५ कात्मानात् सपिंडाच्च विनाहोगोवेध सत्येत्यादिपुराणात् माधवीये बौधायनोप्यस्य निंदामाह पंचधा विप्रतिपत्तिर्दक्षिणतः
देशो ४ तथोत्तरतः उदर्ग्गाविक्रयानुपेतेनस्त्रियाह्युपक्रम्यानुपेतेन स्त्रिया च सह भोजनं पर्युषितभोजनं मातुलपितृष्वसृदुहितृगम
नं इति मदनसोमेश्वरेणापि स्मृतिविरुद्धानां मातुलकन्योद्वाहादीनामस्माद्वचनाद्प्रामाण्यमित्युक्तमिति वृहस्पतिरपि उ
द्वहते दाक्षिणात्ये मातुलस्य सुतां द्विजैः मत्स्यादाश्च नराः पूर्वं व्यभिचाररताः स्त्रियः उत्तरे मद्यपाश्चैव स्पृश्या नृणां रजस्व
ला इत्यनाचारत्वमाह अतएव हेमाद्रौ मात्स्य कर्णाटकादीनां तत्कारिणां श्राद्धनिषेधः बोपदेवेनापि लिखितं ब्राह्मम् यत्र
मातुलजोद्वाही यत्र वेदवहली पतिः श्राद्धं न गच्छेत्तद्विप्राः कृतं यच्च निरामिषमिति तस्मान्मातृतः पंच पितृतः सप्त च त्यक्त्वोद्वह
दिति सिद्धम् संबंधविवेके सुमंतुः ब्राह्मणानामेकपिण्डस्वधानामादशमाद्धर्म्मविच्छित्तिर्भवति आसप्तमाद्रिक्थविच्छित्ति
र्भवति आतृतीयात्पिंडविच्छित्तिरन्यथा पिंडाशौचक्रियाविच्छेदाद्ब्रह्महतुल्यो भवति अस्यार्थमाह शूलपाणिः जीवत्पित्रा
दित्रिकस्य वृद्धप्रपितामहादयस्त्रयः श्राद्धदेवतात्वात्पिंडभाजो भवंति तदूर्ध्वं त्रयो नवपुरुषपर्यन्ता लेपभाजः श्राद्धकर्त्ता
च दशम इति दशमादूर्ध्वं सापिण्ड्यनिवृत्तिर्दशमादित्युपलक्षणम् तेन पितृपितामहजीवनेन नवपुरुषपर्यन्तं पितृजीवने चा
ष्टपुरुषपर्यन्तं सापिंड्यमिति ज्ञेयम् अपुत्रधनग्रहणे सन्निहितानामभावे सप्तपुरुषपर्यन्तमधिकारः धनग्राहिणमारभ्य तृतीयः
पौत्रस्तदूर्ध्वं श्राद्धविच्छेदः अन्यथा धनहारित्वे पुत्रे श्राद्धाद्यकरणे ब्रह्महत्यार्थः आतृतीयादित्यनूढकन्याविषयम् अप्रत्ता अविवाहितानां ४
नां तु स्त्रीणां त्रिपुरुषी विज्ञायते इति वशिष्ठोक्तेः एतच्चाशौचविषयं सापिंड्यं न तु विवाहादौ तत्र पूर्वोक्तवचनैः पंचमसप्तम
त्वान्नियमादिति मेधातिथिप्रमुखादाक्षिणात्याः वाग्दत्तोत्तरमेतदिति शुद्धिविवेकः मातृकुलविषयम् कानीनकन्यावि रामः
षयं चैतत् अन्यथाप्रत्तानां तथा स्त्रीणां सापिंड्यं साप्तपौरुषम् प्रत्तानां भर्तृसापिंड्यं प्राह देवः प्रजापतिरिति कौर्मेणावि १८५

रोधः स्यादिति रत्नाकरस्मृतितत्त्वादिगौडग्रन्थाः युक्तं चैतत् अन्यथा कन्योन्यत्वोऽत्र पुरुषत्रयपर्यन्तमेव स्मृतं कस्मान्नोर्ध्वं सापत्नमाता
महकुलेऽत्राह मिताक्षरायां संग्रहः यद्येकजाता बहवः पृथक्क्षेत्राः पृथग्जनाः एकपिण्डाः पृथक्शौचाः पिण्डस्त्वावर्त्तते त्रिषु पृथ
क्क्षेत्राः भिन्नजातीयस्त्रीषु जाताः पृथग्जनाः सजातीयभिन्नमातृषु जाताः अत्र त्रिपुरुषसापिण्ड्यमिति विज्ञानेश्वरव्या
चख्यो पृथ्वीचन्द्रोदये सापिण्ड्यदीपिकायां चैवम् मदनपारिजाते तु पृथक्क्षेत्राः भिन्नमातृजाः पृथक् भिन्नजातीयाः एतद्द्विजा
तीयसापत्नमातृकुलविषयम् न सवर्णसापत्नमातृकुलविषयम् सवर्णसापत्नमातृकुले चतुःपुरुषं सापिण्ड्यम् पंचमीं
सप्तमीं चैव मातृतः पितृतस्तथेति वशिष्ठोक्तेः सप्तमीति ब्राह्मणादीनां क्षत्रियादिदारोत्पन्नपितृकुलविषयं चेत्युक्तम् तन्न
कपालकल्पितत्वाद्ग्रन्थान्तरविरोधाच्च निर्मूलम् अतएव तेन स्मृतिकौमुद्यां सवर्णसापत्नमातामहकुलपरत्वेन तथैवैतद्व
चनव्याख्यानम् तेन वाशिष्ठपंचमीसप्तमीमनीन्त्येति व्याख्येयम् तस्मात्प्राच्यैव व्याख्या युक्ता प्रयोगरत्नेभट्टैः स्मृतितत्त्वादि
गौडग्रन्थेषु च सापत्नमातामहकुले यावदुक्तं वाचनिकमेव सापिण्ड्यमुक्तम् यथाह सुमन्तुः मातृपितृसंबंधा आसप्तमादवि
वाह्या भवंति आपंचमादन्येषाम् पितृपत्न्यः सर्वा मातरस्तद्भ्रातरो मातुलास्तद्भगिन्यो मातृष्वसारस्तद्दुहितरश्च भगिन्यस्त
दपत्यानि भागिनेयानि अन्यथा संकरकारिणः स्युस्तथाध्यापयितुरेतदेवेति आपंचमादिति मातृकुले त्रिगोत्रान्तरितावि
षयं चेति प्राच्याः मात्स्ये समानप्रवरा चैव शिष्यसंततिरेव च ब्रह्मदातुर्गुरोश्चैव संततिः प्रतिषिध्यते तद्भगिन्यो मातृष्वसा
र इति रत्नाकरेणापठितम् क्वचिद्वचनादविवाहः यथा गृह्यपरिशिष्टे ऽविरुद्धसंबंधामुपयच्छेतेत्युक्तो विरुद्धसंबंधः स्वयमेवो
क्तः यथा भार्यास्वसुर्दुहिता पितृव्यपत्नीस्वसा चेति बौधायनः मातुः सपत्न्या भगिनीं तत्सुतां च विवर्जयेत् पितृव्यपत्न्या
भगिनीं तत्सुतां च विवर्जयेत् अतो मातृष्वसुः सापत्नपुत्रकन्याद्यविवाह्या सापत्नमातृकुलजामिति मदनपारिजातोक्ते
रिति केचित् केचित्तु ज्येष्ठो भ्राता पितुः सम इति मनूक्तेः सपत्न्या मातृत्वात् पितुर्मातामहत्वात् ज्येष्ठभ्रातृपत्नी भगिनी नवि
वाह्या तथा उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदः पितेति मनूक्तेर्गुरुरण्या त्रिपुरुषं सापिंड्यम् सखापि निर्वाप्यः अतस्तेषां

नि॰ सिं॰ १८६ कन्यानोद्वाह्याः गायत्र्या उपदेष्टुश्च कन्यां नैवोद्वहेद्द्विजः गुरोश्च कन्यां शिष्यो वा तत्संतत्यापि नेष्यते पुरुषत्रयपर्य्यन्तं भ्रात्रादेर्नैतदि
ष्यते तत्संबन्धकृतानां तु स्नेहसंबन्धभागिनाम् विवाहोत्र न कर्त्तव्यो लोकगर्हाप्रसज्यत इति वचनाच्चेत्याकुलत्रमूलं चिंत्यम्
दत्तकविषये तूच्यते तत्र गोतमः ऊर्ध्वं सप्तमात्पितृबंधुभ्यो वीजिनश्च मातृबंधुभ्यः पंचमादिति अत्र स्मृतिचंद्रिका नियो — नपुंसकादिक्षेत्र
गादुत्पादयितेति तस्माद्वीजिनोप्यूर्ध्वं सप्तमादित्यर्थ इति दत्तकस्य जनकविषयमेतदिति सापिंड्यमीमांसायाम् तेन दत्तकस्य ज — स्वाम्याज्ञातः ३
नककुले साप्तपौरुषं जननीकुले पांचपौरुषं सापिंड्यम् दत्तक्रीतादिपुत्राणां वीजवप्तुः सपिंडता सप्तमी पंचमी चैव गोत्रित्वं पा
लकस्य चेति वृहन्मनूक्तेः वीजिनश्चेति गोतमोक्तेश्च पालकपितृकुले तु पंचपुरुषं पालकमातृकुले त्रिपुरुषं तथा चापरा
र्के पैठीनसिः त्रीन्मातृतः पंच पितृतः पुरुषानतीत्योद्वहेदिति एतत्सर्वव्याचख्यौ दत्तकादीन्पुत्रान्पितृपक्षतो निवृत्तपिंड
गोत्रार्षेयान् प्रत्येतदुच्यते पंच पितृत इति नान्यान्प्रतीति यत्तु वृद्धगोतमः स्वगोत्रेभ्यः कृता ये स्युर्दत्तक्रीतादयः सुताः विधिना
गोत्रमायांति न सापिंड्यं विधीयते यच्च वशिष्ठः अन्यशाखोद्भवो दत्तः पुत्रश्चैवोपनायितः स्वगोत्रेण स्वशाखोक्तविधिना
स्वशाखभागिति यच्च नारदः धर्मार्थं वर्द्धिताः पुत्रास्तत्तद्गोत्रेण पुत्रवत् अंशपिंडविभागित्वं तेषु केवलमीरितमिति
तत्पालककुले साप्तपौरुषसापिंड्यनिषेधपरं न तु सर्वथा सापिंड्यनिषेधपरमिति सापिंड्यमीमांसायाम् मदनपारिजातादिपद
त्तकानुप्रवेशात्यसापिंड्यं प्रतिभाति तथाहि तेन त्रीनतीत्येत्युद्वाहत्यस्य माता दत्तपुत्री प्रतिगृहीता पुत्रीकृता तस्याः प्रतिगृही
तुः कुले त्रीनतीत्येति पंचपितृत इति तु यस्य दत्तपुत्रः पिता तस्य दत्तस्य यज्जनककुलं तद्विषयमित्युक्तम् वस्तुतस्तु एवं वचसाम
हानिबंधेषु क्वाप्यनुपलंभात् परार्कादिलिखनाभावान्पूर्वोक्तव्यवस्थायाश्च प्रातिभज्ञानतुल्यत्वाद्धोरेतेह्निखितं तेषामेव शोभ
तेमम तु पालककुल एकपिंडदानक्रियान्वयित्वरूपसाप्तपौरुषमेव सापिंड्यम् वीजिनश्चेति गोतमोक्तेर्जनककुले पितावदेव सि — रामः
द्धं प्रतिभाति अत एवास्य द्व्यामुष्यायणत्वं हेमाद्रिप्रवरमंजरीवृत्तिकृन्नारायणादिभिरुक्तम् भट्टसोमेश्वरेणापि प्याया: — १८६

दत्तश्चासोपुत्रश्च ४ दत्ताचासोपुत्रीच ५

कुंतिभोजराजस्यपालककन्यात्वेपि ऊर्द्ध्वंसप्तमात्पितृबंधुभ्योबीजिनश्चेति गोतमोक्तेर्दत्त्रिमायाः पुत्र्याः जनकस्य महरसेनसकुलेपिसाप्त
पौरुषंसापिंड्यमुक्तमपिवाकारणाग्रहणेइत्यत्र सापिण्ड्यदीपिकायांतुदत्तक्रीतादीनांजनकगोत्रेणोपनयनेकृतेजनककुलेसाप्त
पौरुषंसापिण्ड्यम् पालकमातापितृकुलेत्रिपुरुषम् पिण्डवापान्विवाप्यलक्षणंत्रिपुरुषंसापिंड्यम् पालकगोत्रेणोपनयनेकुले
साप्तपौरुषमित्युक्तम् तन्न चूडोपायेनसंस्कारानिजगोत्रेणवैकृताः दत्ताद्यास्तनयास्तेस्युरन्यथादासउच्यते इतिकालिकापु
राणादुपनयनोत्तरंदत्तकनिषेधात्त्रिपुरुषमित्यत्रापिमूलंमृग्यमित्यलंवकुना मातापितृद्वारकसापिंड्यवतीनांकन्यानामि
यंसंख्या उद्वोढुः पितरोपितुश्चपितरोतज्जन्मकद्दंपतिद्वंद्वंतस्यचतुष्कमष्टचततोप्यस्यक्रमात्षोडश्यवरारम्भकदंपतिप्रमितिरि
त्यासप्तकक्षेरदाएके कान्वयकन्यकाःपितृकुलेवासप्तकक्षभुवे यद्यप्येकस्यबहवःसुताःस्युस्तदपीहतु संबंधसाम्यादेकैवगणनेम
त्यवधार्य्यताम् एकस्मान्मिथुनात्सुतोथदुहिताद्वंद्वंयतद्वयात्तस्माद्वंद्वचतुष्कमष्टचततोतःषोडशाणोरदाः यावत्सप्तमकक्षम
भिश्रातवः कन्याइहैकान्वयेतादतेगुणितारसैकखदृशोवृषोसपिंडाःपितुः मातुर्जन्मद्दंपतीचमिथुनद्वंद्वंतयोःसागरास्तस्याःप
चमकक्षमृषवमितिरित्येकान्वयःपुंसुते द्वंद्वाद्वंद्वयुगंततोन्वयइतोष्टौपंचकक्षेशरक्षोणयःसप्तगुणाःशराश्चविधवोमातुः
सपिंडाःकुले कुलद्वयस्यकन्यकायुगनामिथःसपिण्डकाः हिमांशुदग्धराद्दशोविवाहकर्मवर्जितादिति एतच्चसवर्णवर्णसाधा
रणम् सर्वत्रसापिण्ड्यसत्त्वादितिविज्ञानेश्वरोक्तेः पंचमात्सप्तमादूर्ध्वंमातृपितृतः क्रमात् सपिंडतानिवर्त्ततेसर्वव
र्णेष्वयंविधिरितिहरनाथधृतदेवलवचनाच्च संबंधतत्त्वेशुमनुः पितृष्वसृसुतांमातृष्वसृसुतांमातुलसुतांमातृसगो
त्रासमानार्षेयीञ्चिवाह्यचान्द्रायणंचरेत्परित्यज्यैनामातृवद्बिभृयादितिदिक् अथेदमार्षप्रवरः गोत्रंप्रसिद्धम् समा
नेत्रार्षगोत्रयस्यतस्माद्याताद्यानभवतिताम् अथसंक्षेपरणगोत्रप्रवरनिर्णयः तौचभिन्नौनिषेधेनिमित्तंसगोत्राय
दुहितरंनप्रयच्छेदित्यापस्तंबोक्तेः असमानप्रवरैर्विवाहइतिगोतमोक्तेश्च तत्रगोत्रलक्षणमाहप्रवरमंजर्य्यांबोधाय

अनादिसंसारे ४   प्रवियंते उच्चार्य्यंते होत्रध्वर्युभ्यामिति प्रवराः ५
गोत्राभावादेव ३
केवलभार्गवाद्येष्वार्षेयेणादयस्तेषु एवमग्रेपि २   उक्ताद्यापत्यत्वं २

नि॰ सिं॰ १२७

नः विश्वामित्रोयमदग्निर्भारद्वाजोऽथगौतमः अत्रिर्वशिष्ठः कश्यपइत्येते सप्तर्षयः सप्तानामृषीणामगस्त्याष्टमानां यदपत्यं तद्
गोत्रमिति यद्यपि केवलभार्गवेष्वार्षेयेणादिषु केवलांगिरसेषु च हरितादिषु नैतत् भृग्वंगिरसोरुक्तेष्वनन्तर्गतेः तथाप्यत्रेष्वा
पत्तिरेवेति केचित् अतएव स्मृत्यर्थसारे प्रवरैक्यादेवात्रैविवाह उक्तः यद्यपि वशिष्ठादीनामेगोत्रत्वमुक्तम् तेषां सप्तर्षित्वे
न तदपत्यत्वाभावात् तथापि तत्पूर्वभावि वशिष्ठाद्यपत्यत्वेन गोत्रत्वमुक्तम् अतएव पूर्वेषां परेषां चैतद्गोत्रम् अत्र विशेषो
स्मत्कृते प्रवरदर्पणे ज्ञेयः प्रवरास्तु प्रवरणानि प्रवराः कल्पकारा हि वा शिष्ठेति होता वशिष्ठवदित्यध्वर्युरित्यादिनाग्ने
र्या वरणमामनंतीति प्रवराः तेच्चवरणं यद्यपि गोत्रभूतस्यापि क्वचिद्दृश्यते तथापि पूर्ववदृषिभेदो द्रष्टव्यः अन्यथातं
त्रामार्षेयएकार्षेय इत्यादिनिर्देशानुपपत्तेः अन्ये तु तद्गोत्राणामार्षेय इति भेदमाहुरित्यादिक् अत्र विशेषमाह बोधा
यनः एकएवऋषिर्यावत्प्रवरेष्वनुवर्त्तते तावत्समानगोत्रत्वमन्यत्र भृग्वंगिरसां गणादिति स्मृत्यर्थसारे त्रियेमार्षा
णयावापिसन्तयावानुवर्त्तनम् एकस्य दृश्यते यत्र तद्गोत्रं तस्य कथ्यते भृग्वंगिरोगणेष्वनुमाधवीयस्मृत्यन्तरे पंचा
नां त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः भृग्वंगिरोगणेष्वेव वशेषेष्वेकोपि वार्य्यते बोधायनोपि भृग्वंगिरसावधिकृत्य आर्षेयसन्निपाते
ऽविवाहस्त्र्यार्षेयसन्निपातेऽविवाहः पंचार्षेयाणामिति भृग्वंगिरोगणेष्वपि जमदग्निगौतमभरद्वाजेष्वेकप्रवरसाम्ये सर्वेषामप्य
साम्येवासगोत्रत्वादेवाविवाह इत्यादिक् अत्र गोत्राणि प्रवराश्चोच्यंते तत्र बोधायनः गोत्राणां तु सहस्राणि प्रयुतान्यर्बुदानि च
ऊनपंचाशदेवैषां प्रवरा ऋषिदर्शनात् तत्र सप्त भृगवः वत्साविदा आर्ष्टिषेणा यस्का मित्रयुवा वैन्याः शुनकाइति वत्सानां भा
र्गवच्यावनाप्नवानौर्वजामदग्न्येति भार्गवौर्वजामदग्न्येतिवा भार्गवच्यावनाप्नवानेतिवा विदानां भार्गवच्यावनाप्नवानौर्ववैदेति भार्ग
वौर्वजामदग्न्येति वा एतौ द्वौ जामदग्न्यसंज्ञौ आर्ष्टिषेणानां भार्गवच्यवनाप्नवानार्ष्टिषेणानूपेति भार्गवार्ष्टिषेणानूपेति वा
एषां त्रयाणां परस्परमविवाहः वात्सानां भार्गवच्यावनाप्नवानेति वत्सपुरोधसयोः पंच भार्गवच्यावनाप्नवानवत्सापौरोधसे

यानुच्चार्यंते ६
एकोनपंचाशत् ४

उच्चार्य्यमाणानया ८
रामः १२७

वना ३   पंच ३

ति वैजवनिमथितयोः पंच भार्गवच्यावनाप्नवानवैजवनमथितेति एते त्रयः क्वचित् एषामपि पूर्वैरविवाहः अत्र तत्तद्गणस्थाऋषयो
न्यश्चविशेषा मत्कृतप्रवरदर्पणेज्ञेयः यस्कानां भार्गववैतहव्यसावेदसेति मित्रयुवानां भार्गववाध्र्यश्वदैवोदासेति भार्गवच्यावन
दैवोदासेतिवा वाध्र्यश्वेत्येकोवा वैणानां भार्गववैन्यपार्थेति एते एवरूपता: शुनकानां शौनकेतिवा गार्त्समदेतिवा भार्गवगार्त्समद
तिद्वौवा भार्गवशौनहोत्रगार्त्समदेति त्रयोवा वेदविश्वज्योतिषाम् भार्गववेदवैश्वज्योतिषेति शाठरमाठर[illegible]णाम् भार्गवशा
ठरमाठरेति एतावद्ध्येकेचित् यस्कादीनां स्वगणं त्यक्त्वा सर्वैर्विवाहः तदुक्तं स्मृत्यर्थसारे यस्कामित्रयुवावैणाः शुनकाः प्रवरैक्य
तः स्वं स्वं हित्वा गणं सर्वे विवहेयुः परावरैरिति अथांगिरसः ते गौतमाः भरद्वाजाः केवलांगिरसश्चेति त्रिधा तत्र गौतमाः दश
आयास्याः शारद्वताः कौमंडाः दीर्घतमसः औशनसाः कारेणुपालयः राहूगणाः सामराजकावामदेवावृहदुक्थाश्चेति तत्राया
स्यानामांगिरसायास्यगौतमेति शारद्वतानामांगिरसगौतमशारद्वतेति कौमंडानामांगिरसौतथ्यकाक्षीवतगौतमकौमंडेतिवा
आंगिरसायास्यौशिजगौतमकाक्षीवतेतिवा आंगिरसौतथ्यगौतमौशिजकाक्षीवतेति त्रयोवा दीर्घतमसामांगिरसौतथ्यका
क्षीवतगौतमदैर्घतमसेति आंगिरसौतथ्यदैर्घतमसेति त्रयोवा औशनसानामांगिरसगौतमौशनसेति त्रयः कारेणुपाला
नामांगिरसगौतमकारेणुपालेति त्रयः राहूगणानामांगिरसराहूगणगौतमेति सामराजकानामांगिरससामराजकगौ
तमेति वृहदुक्थानामांगिरसवार्हदुक्थगौतमेति एतावद्ध्येकेचित् एषां सर्वेषां गौतमानामविवाहः अथ भरद्वाजाः ते चत्वारः भ
रद्वाजाः गार्ग्याः रौक्षाः कपयश्चेति भरद्वाजानामांगिरसवार्हस्पत्यभारद्वाजेति त्रयः गर्गाणामांगिरसवार्हस्पत्यभारद्वाजसैन्यगार्ग्ये
ति पंच आंगिरससैन्यगार्ग्येतिवा अन्त्ययोर्व्यत्ययोवा भारद्वाजगार्ग्यसैन्येतिवा गर्गभेदानामांगिरसतैत्तिरिकापिभुवेति रौ
क्षाणां कपीनां चांगिरसवार्हस्पत्यभारद्वाजवांदनमातवचसेति पंच आंगिरसवांदनमातवचसेति त्रयोवा कपीनामांगिरसा
महीयवौरुक्षयसेति आत्मभुवामांगिरसभारद्वाजवार्हस्पत्यमैत्रवरात्मभवेति पंच अथ क्वचित् भरद्वाजानां सर्वेषामविवाहः

अथ केवलांगिरसः हरितानामांगिरसांबरीषयौवनाश्वेति आघोमांधातावा कुत्सानामांगिरसमांधातृकौत्सेति कण्वानामांगि
रसाजमीढकाण्वेति आंगिरसघोरकाण्वेतिवा रथीतराणामांगिरसवैरूपराथीतरेति आंगिरसवैरूपपार्षदश्वेतिवा अष्टा
दंष्ट्रपार्षदश्ववैरूपेतिवा अन्त्ययोर्व्यत्ययोवा मुद्गलानामांगिरसभार्म्यश्वमौद्गल्येति आद्यस्तार्क्ष्योवा आंगिरसतार्क्ष्यमौद्गल्य
इतिवा विष्णुवृद्धानामांगिरसपौरुकुत्सत्रासदस्यवेति एषांस्वगणं विहायसर्वैर्विवाहोभवति हरितकुत्सयोस्तुनभवति अथा
त्रयः तेचत्वारः आत्रेयाः वाद्भुतकाः गविष्ठिराः मुद्गलाइति आद्यानामात्रेयार्चनानसश्श्यावाश्वेतिवा अद्भुतकानामात्रेयार्च
नानसश्यावाद्भुतकेति धनञ्जयानामात्रेयार्चनानसधानञ्जयेति क्वचित गविष्ठिराणामात्रेयार्चनानसगाविष्ठिरेति आत्रे
यगाविष्ठिरपौर्वातिथेतिवा मुद्गलानामात्रेयार्चनानसपौर्वातिथेति वामरथ्यसुमंगलवैजवापानामात्रेयार्चनानश्या
तिथेति आत्रेयार्चनानसश्याविष्ठिरेतिवा सुमंगलानामत्रिसुमंगलश्यावाश्वेति केचित् अत्रेःपुत्रिकापुत्राणामात्रेयवाम
रथ्यपौत्रिकेति अत्रीणांसर्वैषामविवाहः अथविश्वामित्राः तेदश कुशिकालोहिताः रौक्षकाः कामकायनाः अजाः क
ताधनञ्जयाः अघमर्षणाः पूरणाः इन्द्रकौशिकाइति कुशिकानांवैश्वामित्रदेवरातौदलेति लोहितानांविश्वामित्राष्टकलो
हितेति अन्त्ययोर्व्यत्ययोवावैश्वामित्रमाधुच्छंदसाष्टकेतिवा विश्वामित्राष्टकेति द्वौवा रौक्षकाणांवैश्वामित्रगाथिनरैव
णेतिवा वैश्वामित्ररौक्षकरैवणेतिवा कामकायनानांवैश्वामित्रदेवश्रवसदेवतरसेति अजानांवैश्वामित्रमाधुच्छंदसा
केति वैश्वामित्राश्मरथ्यवाधूलेतिवा अघमर्षणानांविश्वामित्राघमर्षणकौशिकेति पूरणानांविश्वामित्रपौरणेति द्वौ
वैश्वामित्रदेवरातपौरणेतिवा इन्द्रकौशिकानांविश्वामित्रेन्द्रकौशिकेति द्वौ धनञ्जयानांविश्वामित्रमाधुच्छंदसधानं
जयेति वैश्वामित्रमाधुच्छंदसाघमर्षणेतिवा कतानांवैश्वामित्रकात्याक्षीलेति एतेवाधायिनोक्ताः रौहिणानांवैश्वा
मित्रमाधुच्छंदसरौहिणेति रेणूनांवैश्वामित्रगाथिनरैणवेति वेणूनांवैश्वामित्रगाथिनवैणवेति जह्नूनांवैश्वामित्र

शालंकायनकौशिकेति आश्मरथ्यानां वैश्वामित्राश्मरथ्यवाधूलेति उदवेणूनां वैश्वामित्रगाथिनरेणवेति एते आश्वलाय
नामात्स्योक्ताः अन्ये त्वन्यविषकृणा उक्ताः तेऽन्यत्र मन्तृतो ज्ञेयाः एषां विश्वामित्राणामविवाहः अथ कश्यपाः ते पञ्च निध्रु
वाः कश्यपाः शाण्डिलाः रेभाः लौगाक्षयश्च निध्रुवाणां काश्यपावत्सारनैध्रुवेति कश्यपानां काश्यपावत्सारासितेति रेभाणां
काश्यपावत्साररैभेति शाण्डिलानां कश्यपावत्सारशाण्डिल्येति अत्यस्थाने देवलो वाऽसितो वा शाण्डिल्यासितदेवलेति वा
काश्यपासितदेवलेति वा अत्ययोर्व्यत्ययो वा देवलासितेति त्र्यो वा लौगाक्षीन्वक्ष्यामः एषां कश्यपानामविवाहः अथ वशि
ष्ठाः ते पञ्च वशिष्ठाः कुण्डिना उपमन्यवः पराशरा जातूकर्ण्याश्चेति वाशिष्ठानां वाशिष्ठेन्द्रप्रमदाभरद्वाजस्त्विति वाशिष्ठेत्येको
वा कुण्डिनानां वाशिष्ठमैत्रावरुणकौण्डिन्येति उपमन्यूनां वाशिष्ठप्रमदाभरद्वाजसव्येति वाशिष्ठाभरद्वाजेन्द्रप्रमदेति वा
आद्ययोर्व्यत्ययो वा पराशराणां वाशिष्ठशाक्त्यपाराशर्येति जातूकर्ण्यानां वाशिष्ठात्रिजातूकर्ण्येति वाशिष्ठानां सर्वेषा
मविवाहः अत्यस्यात्रिभिश्च अथागस्त्याः ते चत्वारः इध्मवाहाः सोमवाहाः साम्भवाज्ञवाहाश्चेति आद्यानामागस्त्यदा
र्ढच्युतेध्मवाहेति अगस्त्य एको वा सोमवाहानामागस्त्यदार्ढच्युतसोमवाहेति साम्भवाहानां साम्भवाहोऽन्त्यः यज्ञवा
हानां यज्ञवाहोऽन्त्यः आद्यौ पूर्वोक्तावेव सारवाहानां नन्दनास्त्रयः दर्भवाहानां नन्दनास्त्रयः अगस्तीनामागस्त्यमायोभुव
ति पूर्णमासानामागस्त्यपौर्णमासपारणेति हिमोदकानामागस्त्यहैमवर्चिहैमोदकेति पाणिकानामागस्त्यपैना
यकपाणिकेति एते षट्क्वचित् अगस्तीनां सर्वेषामविवाहः अथ द्विगोत्राः शौङ्गशैशिरीणामाङ्गिरसबार्हस्पत्यभा
रद्वाजकात्याक्षीलेति पञ्च कात्याक्षीलयोः स्थाने शौङ्गशैशिरीवा आङ्गिरसकात्याक्षीलेति त्रयो वा एषां भरद्वाजैर्वि
श्वामित्रैश्चाविवाहः एवं कपिलानां कलानां च संकृतिपूतिमाषादीनामाङ्गिरसगौरिवीतसांकृत्येति शाक्त्यगौरिवी
तसांकृत्येति वा एषां स्वगणस्थैर्वशिष्ठैः शौङ्ग शैशिरैर्लौगाक्षिभिश्चाविवाहः कश्यपेरपीति प्रयोगपारिजाते लौ

[illegible]

८६

जातूकर्ण्यानां वसिष्ठैरत्रिभिश्चाविवाहः २
चार्य्यप्रवरेण वेति। आचार्य्यगोत्रप्रवरेणनिजस्तु द्विजः स्वयं। दत्वात्मानं तु कस्मैचित्तद्गोत्रप्रवरो भवेत्। यद्वा स्वगोत्रप्रवरविधुरो जमदग्निजः ७

काश्यपावत्साराश्रितेनिवा एते हर्वसिष्ठानर्त्तकश्यपाः एषां वसिष्ठैः कश्यपैः संकृत्याद्यैश्चाविवाहः देवरातस्य यौमदस्यै विश्वामित्रैश्चा
विवाहः इति प्रयोगपारिजाते धनंजयानां विश्वामित्रैरत्रिभिश्चाविवाहः एवं दत्तकक्रीतकृत्रिमस्वयंदत्तपुत्रिकापुत्रादीनामु
त्पादकपालकयोः पित्रोर्गोत्रप्रवरा वर्ज्या इति प्रवरमंजरीनारायणवृत्तिप्रयोगपारिजातादयः अत्र सर्वोपपत्तयः मूले
चमत्कृते प्रवरदर्पणे ज्ञेया इति दिक् क्षत्रियवैश्ययोस्तु पुरोहितगोत्रप्रवरावेवेति सर्वसिद्धांतः यद्यपि वध्र्यश्वपरिशिष्टे क
पिभरद्वाजयोर्विवाह उक्तस्तथापि भरद्वाजाश्वकपयोर्गौरीक्षायणादि इति चत्वारोपि भरद्वाजगोत्रेक्यान्नान्योन्यं मिथः
कपिलगर्गभरद्वाजा मिथो रौक्षायणा द्विजाः नोद्वहेयुः सगोत्रत्वात्प्रवरैक्याच्च कुत्रचिदिति स्मृत्यर्थसारादयुक्तेर्विवाह ए
वनयोरिति प्रवरमंजरी स्वगोत्राद्यज्ञानेतु सत्याषाढः अथानभिज्ञातबंधोः पुरोहितप्रवरेणार्षविवाहचनं तेनैव गोत्रेणा
नुसमाचरेदिति कश्चित् अथ मातृगोत्रनिर्णयः शातातपः मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च समानप्रवरां चैव
गत्वा चांद्रायणं चरेत् यद्यपि सगोत्रां मातुरप्येके नेच्छंत्युद्वाहकर्मणि जन्मनाम्नोरविज्ञाने उद्वहेदविशंकितः इति व्यासो
क्तेरज्ञातनामत्वेन सगोत्रत्वदोषस्तथापि नैदकेलो प्रवर्तते मातुर्गोत्रात्सपिंडाच्च विवाहो गोवधस्तथा इति कलिवर्ज्येनो
क्तेः इदं मातृगोत्रवर्जनं माध्यंदिनीयानामेव मातृगोत्रं माध्यंदिनीयानामप्रयोज्यमिति सत्याषाढोक्तेरिति कश्चित्
तन्निर्मूलम् अत एवाह प्रवरमंजरीकारः दोषस्यातिगुरुत्वात्सर्वेषां मातृगोत्रं वर्ज्यमिति यत्तु एकस्मिन्प्रवरे तुल्ये मा
तृगोत्रे वरस्य च नमुद्वाहं न कुर्वीत साकन्या भगिनी स्मृतेति मातृकुले प्रवरचिंतनमुक्तम् तत्सुतादिविवाहोपरमि
ति दिक् विस्तरस्तु ग्रंथांतरेभ्यो ज्ञेयः सगोत्रादिविवाहे प्रायश्चित्तं स्मृत्यर्थसारे इत्थं सगोत्रसंबंधविवाहविषये स्थि
ते यदि कश्चिज्ज्ञानतस्तां कन्यामुदुपगच्छति गुरुतल्पव्रतं कुर्याद्गर्भस्तज्जोंत्यतां व्रजेत् भोगतस्तां परित्यज्य पालये
ज्जननीमिव अज्ञानाद्द्वेदेवंशुद्धो त्रिभिर्गर्गस्तु कश्यपः एवं सापि एजुपि सपिंडापत्यदारेषु प्राणत्यागो विधीयते
इति कृह घमोक्तेः निथिनत्वे बौधायनः सपिंडा सगोत्रा चेदमत्योपयच्छेन्मातृवदेनां बिभृयात् कन्याविवाहकालत्

सत्वरश्चेद्धर्मे सीदति ५

कोऽप्यतिर्निर्बंधे षडब्दमध्ये नो ग्राह्या कन्या वर्षद्वयं यतः सोमो भुंक्ते ततस्तद्वद्गंधर्वश्च तथानलः राजमार्तंडः अयुग्मे दुर्भगा नारी
युग्मे तु विधवा भवेत् तस्माद्गर्भान्विते युग्मे विवाहे सा पतिव्रता मासत्रयादूर्ध्वमयुग्मवर्षे युग्मेपि मासत्रयमेव यावत् विवाहशुद्धिम्
वदंति संतो वात्स्यादयः स्त्रीजन्मजन्ममासात् पराशरमाधवीये तु जन्मतो गर्भाधानाद्वा पंचमाब्दात्परं शुभम् कुमारीवरणं दानं मे
खलाबंधनं तथेत्युक्तं मदनरत्ने यमः कन्या द्वादशवर्षाणि याऽप्रदत्ता वसेद्गृहे ब्रह्महत्या पितुस्तस्याः सा कन्या वरयेत्स्वयम्
भारते त्रिंशद्वर्षो षोडशाब्दां भार्यां विंदेत नग्निकाम् दशवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः अतोऽप्रवृत्ते रजसि कन्यां दद्यात्पिता स
कृत् तत्रैव सप्तसंवत्सरादूर्ध्वं विवाहः सर्ववर्णिकः कन्यायाः शस्यते राजन्नान्यथा धर्मगर्हितः राजमार्तंडः राहुग्रस्ते तथायु
ष्यपि नृणां प्राणसंशये अतिप्रौढा च या कन्या चंद्रलग्नबले न तु मनुः त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीम् अष्टवर्षोऽष्ट
वर्षां वा धर्मे सीदति सत्वरः यद्यपि विवाहस्त्वष्टवर्षायाः कन्यायाः शस्यते बुधैरिति संवत्सरात्परत ऊर्ध्वं रजस्वलेत्यादेश्च दशवर्षादूर्ध्वं
विवाहो निषिद्धस्तथापि दानुभवि द्वादशषोडशाब्दज्ञेयम् त्रीणि वर्षाण्यृतुमती कांक्षेत पितृशासनमिति पराशरमाधवीये बौ
धायनोक्तेश्च मनुः नर्क्षवृक्षनदीनाम्नीं नांत्यपर्वतनामिकाम् न पक्ष्यहिप्रेष्यनाम्नीं न च भीषणनामिकाम् यमः तस्मा
दुद्वाहयेत्कन्यां यावन्नर्तुमती भवेत् तथा मूलजादीनां फलं प्रागुक्तम् तथा वर्णवैश्यग्रहमैत्र्यादिद्वृटितिविचारो ज्योतिर्विदा
ज्ञेयः विस्तरात्तु नोच्यते अथ गुर्वर्कबलं ज्योतिर्निबंधे गर्गः स्त्रीणां गुरुबलं श्रेष्ठं पुरुषाणां रवेर्बलम् तयोश्चंद्रबलं श्रेष्ठमिति
गर्गेणाभाषितम् जन्मत्रिदशमारिस्थः पूजया शुभदो गुरुः विवाहेऽथ चतुर्थाष्टद्वादशस्थो मृतिप्रदः देवलः नष्टात्मजा धनव
र्जिता विधवा कुशीला पुत्रान्विता हतधवा सुभगा त्रिपुत्रा स्वामिप्रिया विगतपुत्रधवा धनाढ्या वंध्या भवेत्सुरगुरौ क्रमशोऽभिज
न्म बृहस्पतिः कर्कचापकुलीरस्थो जीवोप्यशुभगोचरः अतिशोभनतां दद्याद्विवाहोपनयनादिषु लल्लः द्वादशदशमच
तुर्थे जन्मनि षष्ठाष्टमे तृतीये च प्राप्ते पाणिग्रहणे जीवे वैधव्यमाप्नोति गर्गः सर्वत्रापि शुभं दद्याद्द्वादशाब्दात्परं गुरुः

रजस्वलायाः कन्यायागुरुशुद्धिंनचिंतयेत् अशुभोपिशुभंदद्याच्छुभदर्क्षेषुकिंपुनः १

नात २

नि-सिं. १९० पंचषष्ठाब्दयोरेवशुभगोचरतामता सप्तमाब्देचवर्षेषुस्वोच्चस्वर्क्षगतोयदि अशुभोपिशुभंदद्याच्छुभदर्क्षेषुकिंपुनः" रजस्वलायाः
कन्यायागुरुशुद्धिंनचिंतयेत् अष्टमेपिप्रकर्तव्योविवाहस्त्रिगुणार्च" अर्कगुर्वोर्बलंगार्ग्योसेहिरपर्कवलास्मृता कन्याचंद्रवलं
प्रोक्तावृषलीलग्नतोवला अष्टवर्षाभवेत्कौरीनववर्षाचरोहिणी दशवर्षाभवेत्कन्याअतऊर्ध्वंरजस्वला अथबृहस्पति
शांतिः शौनकः कन्यकोद्वाहकालेतुआनुकूल्यंनविद्यते ब्राह्मणस्थापनयनेगुरोर्विधिरुदाहृतः सुवर्णेनगुरुंकृत्वापीत
वस्त्रेणवेष्टयेत् ईशान्यांधवलंकुंभंधान्योपरिनिधायच दमनंमधुपुष्पंचपलाशंचैवसर्षपान् मांसीगुडूच्यपामार्गं
विडंगींशंखिनीवचा सहदेवीहरिक्रांतासर्वौषधिशतावरी बलाचसहदेवीचनिशाद्वितयमेवच कृत्वाज्यभागपर्यंतंस्व
शाखोक्तविधानतः ग्रहोक्तमंडलेभ्यर्च्यपीतपुष्पाक्षतादिभिः देवपूजोत्तरेकालेततःकुंभानुमंत्रणम् अश्वत्थस्यसमिध
आज्यंपायसंसर्पिषायुतम् यवव्रीहितिलाःसाज्यामंत्रेणैवबृहस्पतेः अष्टोत्तरशतंसर्वंहोमशेषंसमापयेत् उत्तरादस
मंतस्यअभिषेकंसमाचरेत् कुंभादिमंत्रणंकेचित्समुद्रज्येष्ठमंत्रतः प्रतिमांकुंभवस्त्रंचआचार्यायनिवेदयेत् ब्राह्मणा
न्भोजयेत्पश्चाच्छुभदःस्यान्नसंशयः इतिबृहस्पतिशांतिः शौनकः गुर्वादित्येव्यतीपातेवक्रातीचारगेगुरौ नष्टशशिनिश्च
क्रेवाबालेवृद्धेऽथवागुरौ पौषचैत्रेऽथवर्षाशुद्धरघाधिकमासके केतूद्गमेनिरंशेर्के सिंहस्थेऽमरमंत्रिणि विवाहव्रतया
त्रादिपुरहर्म्यग्रहादिकम् क्षौरंविद्योपविद्यांचयत्नतःपरिवर्जयेत् मदनपारिजातेज्योतिःसागरे बालेशुक्रेवृद्धशुक्रेवृद्धे
जीवेनष्टेजीवेबालेजीवेसिंहजीवेसिंहादित्येजीवादित्येतथामलिम्लुचेमासिसुरचार्येऽतिचारगे वापीकूपविवाहादिक्रियाः
प्रागुदितास्त्यजेत् सिंहस्थमकरस्थंचगुरुंयत्नेनवर्जयेत् लल्लः अतिचारगतोजीवस्तंराशिंनैतिचेत्पुनः लुप्तसंवत्स रामः
राज्ञेयःसर्वकर्मवहिःकृतः सिंहस्थगुरोरपवादमाहपराशरः गोदाभागीरथीमध्येनोद्वाहःसिंहगेगुरौ मघास्थसर्वे १९०
देशेषुतथामीनगतेरवौ वशिष्ठोपि विवाहोदक्षिणेकूलेगौतम्यानेतरत्रतु भागीरथ्युत्तरेकूलेगौतम्यादक्षिणेतथा विवा

अशः सर्वैर्देयः कर्त्तानुसंस्कृत एव ४
मातृकन्याभ्याम् ५ अविकलः १

ह्यप्रतंबंधश्च सिंहस्थेत्रेनदुष्यति कन्यादातृक्रममाह याज्ञवल्क्यः पिता पितामहो भ्राता सकुल्यो जननी तथा कन्याप्रदः पूर्वनाशे प्रकृतिस्थः
परः परः अप्रयच्छन्समाप्नोति भ्रूणहत्यामृतावृतौ गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयंवरम् भ्रातॄणामसंस्कृतानामेवाधिकार
माह सएव असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः भगिन्यश्च निजादंशाद्दत्वांशं तु तुरीयकम् अत्र चकारेण पूर्वसंस्कृतैरित्य
स्यानुवृत्तेर्विवाहपर्याप्तद्रव्यदाने स्वांशसमांशाचतुर्थभागदाने वा संस्कृतग्रहणं व्यर्थं स्यात् अतः कर्त्तृनियमोयम् तेनानुपनीत
भ्रातृमात्रादिसत्वे मात्रादेर्बाधिकारो न भ्रातुरित्युक्तं सवधतत्वादौ कन्यास्वयंवरे मातुर्हीनत्वे च ताभ्यामेव नांदीश्राद्धं कार्यम् तत्र
चु स्वयं प्रधानसंकल्पमात्रं कृत्वाऽन्यद्ब्राह्मणद्वारा कारयेदिति प्रयोगपारिजाते वरस्तु संस्कृतेभ्रात्राद्यभावे स्वयमेव नांदीश्राद्धं कुर्यात् माता
पुत्रेषु वर्त्तमानेषु नान्यो वै कारयेत्स्वधाम् इति निषेधादुपनयनेन कर्माधिकारस्य जातत्वाच्चेति पृथ्वीचंद्रोदयः माधवीये परार्के च नारदः
पिता दद्यात्स्वयं कन्यां भ्राता वानुमते पितुः मातामहो मातुलश्च सकुल्यो बांधवस्तथा माता त्वभावे सर्वेषां प्रकृतौ यदि वर्त्तते तस्याम
प्रकृतिस्थायां कन्यां दद्युः स्वजातयः सकुल्याः पितृपक्षीयाः बांधवो मातृवंश्यः मदनपारिजाते कात्यायनः स्वयमेवौरसीं दद्यात् पित्र
भावे स्वबांधवः मातामहस्ततोऽन्यां हि माता वा धर्मजां सुताम् ततोन्यामौरसीं भिन्नां धर्मजां नियोगात्क्षेत्रजां मातामहो माता मातुलो पौगंडं पंचमाद्वर्षात्
वा दद्यात् तेनौरसी दत्ता पितृबंधुषु सत्सु मातामहादीनां नाधिकारः अस्यापवादस्तत्रैव दीर्घप्रवासयुक्तेषु पौगंडेषु च बंधुषु माता
तु समये दद्यादौरसीमपि कन्यकाम् मनुः यस्तु नैव कश्चित्स्यात्कन्या राजानमाव्रजेत् परकीयकन्यादाने विशेषो मदनरत्ने स्कांदे
आत्मीकृत्य सुवर्णेन परकीयां तु कन्यकाम् धर्मेण विधिना दानमसगोत्रेपि युज्यते अत्र प्रकृतिस्थग्रहणादप्रकृतिस्थेन कृतमकृ
तमेव स्वतंत्रो यदि तत्कार्यं कुर्यादप्रकृतिंगतः तदप्यकृतमेव स्यादस्वातंत्र्यस्य हेतुतः इत्यपरार्के नारदोक्तेः यदि तु सप्तपदी विवाहहोमादि प्र
धानं ज्ञातं तदा गवे कल्पेपि नावृत्तिर्विवाहस्य गौडास्त्वप्येवमाहुः तत्रैव मरीचिः गौरीं ददन्नाकपृष्ठं वैकुंठं रोहिणीं ददत् कन्यां ददद्ब्रह्म
लोकं रौरवं तु रजस्वलाम् अथ मासनिर्णयः तत्र जन्ममासादिविशेषः मार्तंडः ज्योतिःप्रकाशे व्यासः माघफाल्गुनवैशाखज्येष्ठमार्ग
शीर्षके उपयच्छाषाढमासे च शुभगा वित्तसंयुता श्रावणे वापि पौषे वा कन्या भाद्रपदे तथा चैत्राश्वयुक्कार्त्तिकेषु याति वैधव्यतां लघु शीघ्रं १

दातरि ५

नारदः माघफाल्गुनवैशाखज्येष्ठमासाः शुभावहाः कार्त्तिको मार्गशीर्षश्च मध्यमौ निंदिताः परे वशिष्ठः पौषेपि कुर्यान्मकरस्थितेऽर्के चैत्रे
भवेन्मेषगतो यदा स्यात् प्रशस्तमाषाढकृते विवाहं वदंति गर्गा मिथुनस्थितेऽर्के चण्डेश्वरः मार्गमासि तथा ज्येष्ठे सौरपरिणय
व्रतम् ज्येष्ठपुत्रदुहित्रोस्तु यत्नेन परिवर्जयेत् कृत्तिकास्थरविं त्यक्त्वा ज्येष्ठपुत्रस्य कारयेत् उत्सवादिषु कार्येषु दिनानि दश वर्जये
त् रत्नकोशे जन्मर्क्षे जन्मदिवसे जन्ममासे शुभं त्यजेत् ज्येष्ठमासाद्यगर्भस्य शुभं वर्ज्यं स्त्रिया अपि पराशरः अज्येष्ठा कन्यका य
त्र ज्येष्ठपुत्रो वरो यदि व्यत्ययो वा तयोस्तत्र ज्येष्ठामासः शुभप्रदः मिहिरः ज्येष्ठस्य ज्येष्ठकन्याया विवाहो न प्रशस्यते तयोरन्यतरे
ज्येष्ठे ज्येष्ठो मासः प्रशस्यते द्वौ ज्येष्ठौ मध्यमौ प्रोक्तावेकज्येष्ठं सुखावहम् ज्येष्ठत्रयं न कुर्वीत विवाहे सर्वसंमतम् यत्तु सार्वकालमेके
विवाहमिति तदसुरविवाहविषयम् धर्म्येषु विवाहेषु कालपरीक्षणस्याधर्म्येष्वनियमस्य परिशिष्टात् रत्नमालायामप्येवम् अथ
दशदोषाः व्यवहारोच्चये वेधश्च लत्ता च तथैव पातः खार्जूरवेधो दशयोगचक्रम् युतिश्च यामित्रमुपग्रहश्च वाणाख्यवज्रे च दशैव
दोषाः एषां लक्षणं ज्योतिषे ज्ञेयम् अनीचारगे गुरौ नु वशिष्ठः अनीचारगते जीवे वर्ज्ये तदनंतरम् विवाहादिषु कार्येषु अष्टावि
शतिवासरान् रत्नमालायाम् एकपंचनवयुग्मषट्दशत्रीणि सप्तचतुरष्टलाभगः द्वादशाजवृषभादिराशितो घातचंद्र इति कीर्ति
तो बुधैः नारदः भूवाणनवहस्ताश्वरसाग्निवह्निशैलगाः वेदाष्टशिवादित्या घातचंद्रा यथाक्रमम् यात्रायां युद्धकार्येषु घातचंद्रं
विवर्जयेत् विवाहे सर्वमांगल्ये चौलादौ व्रतबंधने घातचंद्रो नैव चिंत्य इति पाराशरोऽब्रवीत् ज्योतिर्निबंधे विवाहचौलव्रतबंधयज्ञेषु महाभिषे
कृषत्येव राज्ञाम् सामंतयात्रासु तथैव जाते नाचिंतनीयः खलु घातचंद्रः नारदः अकालजा भवेयुश्चेद्विद्युन्नीहारवृष्टयः प्रत्यर्कपरिवे
षेंद्रचापाभ्रध्वनयो यदि दोषाय मंगले नूनमदोषायैव कालजाः अकालवृष्टिस्वरूपमाह लल्लः पौषादिचतुरो मासाः प्रोक्ता वृ
ष्टिरकालजेति शार्ङ्गधरः निर्घाते क्षितिचलने ग्रहयुद्धे राहुदर्शने चैव आपंचदिनात्कन्या परिणीता नाशमुपयाति उल्कापाते
न्द्रचापप्रबलघनरजोधूमनिर्घातविद्युद्वृष्टिप्रत्यर्कदोषादिषु सकलबुधैस्त्याज्यमेवैकरात्रम् दुःस्वप्नदुर्निमित्तेष्वशुभफलदृशो
द्गमेनोन्मांतवृष्टौ चौले मौंजीविधे परिणये न विधौ सर्वदा त्याज्यमेव ज्योतिःप्रकाशे अर्वाक् षोडश नाड्यः संक्रांतेः पुण्यदाः परतः

उपनयनव्रतयात्रापरिणयनोद्यादिविवर्ज्जास्ताः गर्गः दिग्दाहे दिनमेकं च ग्रहे सप्तदिनानि तु भूकम्पे च समुत्पन्ने त्र्यहमेवं तु वर्जयेत् उल्कापाते
त्रिदिवसं धूमे पंचदिनानि च वज्रपाते चैकदिनं वर्जयेत्सर्वकर्मसु दृष्टे नादर्शनात्प्राक् केतोः सप्तदिनं त्यजेत् यावत्केतूदमस्तावद्दृश्यो भः सम
यो भवेत् अस्यापवादोऽद्भुतसागरे अथ दिवसत्रयमध्ये मधुपानीयं यदा भवति उत्पातदोषशमनं तद्वदेशं प्राहुराचार्याः सर्वधनत्वे भू
कंपादेर्न दोषोऽस्ति वृद्धिश्राद्धे कृते सति अथापरिहार्य्यकन्याया वैधव्ययोगे विशेष उच्यते मार्कण्डेयपुराणे बालवैधव्ययोगे तु कुंभद्रुप्र
तिमादिभिः कृत्वा लग्नं ततः पश्चात्कन्योद्वाह्येति चापरे तत्र पुनर्भूदोषाभाव उक्तो विधानखण्डे स्वर्णाम्बुपिप्पलानां च प्रतिमा विष्णुरूपि
णी तया सह विवाहे तु पुनर्भूत्वं न जायते सूर्यारुणसंवादे विवाहात्पूर्वकाले च चन्द्रताराबलान्विते विवाहात्केचमसन्याकुंभेनसहवाद्वहेत्
सूत्रेणावेष्टयेत्पश्चाद्दृश्यं तत्तु विधानतः कुंकुमालंकृतं देहं तयोरेकान्तमंदिरे ततः कुंभं च निःसार्य प्रभञ्ज्य शलिलाशये ततोऽभिषेचनं कुर्या
च्च पञ्चपल्लववारिभिः कुंभप्रार्थना तत्रैव वरुणाङ्गस्वरूपाय जीवनानां समाश्रय पतिं जीवय कन्यायाश्चिरं पुत्रसुखं कुरु देहि विष्णो वरं देव क
न्यां पालय दुःखतः ततो लंकारवस्त्राद्यं आवरणाय प्रतिपादयेत् इति कुंभविवाहः मूर्त्तिदानमपि तत्रैवोक्तम् ब्राह्मणं साधुमामन्त्र्य संपूज्य विवि
धार्हणैः तस्मै दद्याद्विधानेन विष्णोर्मूर्त्तिं चतुर्भुजाम् शुद्धवर्णसुवर्णेन वित्तशक्त्याथवा पुनः निर्मितां रुचिरां शंखगदाचक्राब्जसंयुता
म् दधानां वाससी पीते कुमुदोत्पलमालिनीम् सदक्षिणां च तां दद्यान्मंत्रमेतमुदीरयेत् यन्मया प्राचि जन्मनि ध्नन्त्या पतिसमागमम् विवा
पविषशस्त्राद्यैर्हतो वापि विरक्तया प्राप्यमानं महाघोरं यशःसौख्यधनापहम् वैधव्याद्यतिदुःखौघनाशाय सुखलब्धये बहुसौभाग्य
लब्ध्यै च महाविष्णोरिमां तनुम् सौवर्णीं निर्मितां शक्त्या तुभ्यं संप्रददे द्विज अनघाद्याहमस्मीति त्रिवारं प्रजपेदिति एवमस्त्विति तस्याशि
ग्गृहीत्वाऽस्य गृहं विशेत् ततो वैवाहिकं कुर्याद्विधिं दातात्मगोत्रजः अत्रेयपरस्त्यविवाहवृक्षसेचनादयस्तत्रैव ज्ञेयाः विस्तरभयान्नोच्यते अथ
प्रतिकूलादि ज्योतिर्निबंधे गर्गः कृते तु निश्चये पश्चान्मृत्युर्भवति कस्यचित् तदा न मंगलं कुर्यात्कृते वैधव्यमाप्नुयात् ज्योतिर्मेधातिथिः वधू
वरार्थं घटितो तु सुनिश्चिते वरस्य गेहेऽप्यथ कन्यकायाः मृत्युर्यदि स्यान्मनुजस्य कस्यचित्तदा न कार्यं खलु मंगलं बुधैः मंगलं विवाहः स्मृ
ति चंद्रिकायाम् कृते वाग्निश्चये पश्चान्मृत्युर्मर्त्यः सगोत्रिणः तदा न मंगलं कार्यं नारी वैधव्यदं ध्रुवम् मनुः वाग्दानानन्तरं यत्र कुलयोः कस्य

चिन्मतिः तदोद्वाहो नैव कार्यः स्ववंशक्षयदो यतः शौनकः वरवध्वोः पिता माता पितृव्यश्च सहोदरः एतेषां प्रतिकूलं च महाविघ्नप्रदं भवेत्
पिता पितामहश्चैव माता चैव पितामही पितृव्यस्त्री सुतो भ्राता भगिनी वा विवाहिता एभिरत्र विपन्नैश्च प्रतिकूलं बुधैः स्मृतम् अन्येष्वपि वि
पन्नेषु केचिदूचुर्न तद्भवेत् मार्तण्डः वाग्दानानन्तरं माता पिता भ्राता विपद्यते विवाहो नैव कर्तव्यः स्ववंशहितमिच्छता संकटेनुमेधाति
थिः वाग्दानानन्तरं यत्र कुलयोः कस्यचिन्मृतिः तदा संवत्सरादूर्ध्वं विवाहः शुभदो भवेत् स्मृतिरत्नावल्याम् पितुरब्दमशौचं स्यात्तदर्द्धमा
तुरेव च मासत्रयं तु भार्यायास्तदर्द्धं भ्रातृपुत्रयोः अन्येषां तु सपिण्डानामाशौचं मासमीरितम् तदन्ते शान्तिकं कृत्वा ततो लग्नं विधीयते
ज्योतिःप्रकाशे प्रतिकूलेपि कर्त्तव्यो विवाहो मासतः परः शान्तिं विधाय गां दत्वा वाग्दानादि चरेत्सुतेः शान्तिर्विनायकशान्तिम् तथा च मे
धातिथिः संकटे समनुप्राप्ते याज्ञवल्क्येन योगिना शान्तिरुक्ता गणेशस्य कृत्वा तां शुभमाचरेदिति प्रतिकूलेन कर्त्तव्यो गच्छेद्यावदृतु
त्रयम् प्रतिकूलेपि कर्त्तव्यमित्याकुर्वज्जुविप्लवे प्रतिकूले सपिण्डस्य मासमेकं विवर्जयेत् ज्योतिःसारे दुर्भिक्षे राष्ट्रभंगे च पित्रोर्वा प्राणसं
शये प्रौढायामपि कन्यायां नानुकूल्यं प्रतीक्ष्यते मेधातिथिः पुरुषत्रयपर्यन्तं प्रतिकूलं स्वगोत्रिणाम् प्रवेशान्निर्गमस्तद्वत्तथा मुण्डन
मण्डने प्रेतकर्माण्यपि निर्वर्त्य चरेन्नाभ्युदयिकक्रियाम् आचतुर्थं ततः पुंसि पञ्चमे शुभदं भवेत् अथ रजोदोषनिर्णयः माधवीये प्रा
रंभात्प्राग्विवाहस्य माता यदि रजस्वला निवृत्तिस्तस्य कर्तव्या सहत्वश्रुतिचोदनात् प्रारंभोन्त्यादीश्राद्धात् नांदीमुखविवाहादावित्यादि
नातस्यैव प्रारंभोक्तेः मेधातिथिः चौले च व्रतबंधे च विवाहे यज्ञकर्मणि भार्या रजस्वला यस्य प्रायस्तस्य न शोभनम् वधूवरान्यतम
योर्जननी चेद्रजस्वला तदा न मंगलं कार्यम् शुद्धौ कार्यं शुभेप्सुभिः गर्गः यस्योद्वाहादि मांगल्ये माता यदि रजस्वला तदा न तत्प्रकर्तव्यमा
युःक्षयकरं यतः नांदीश्राद्धोत्तरं रजोदोषे तु कर्पर्दिकारिकासु सूतिकोदक्ययोः शुद्ध्यै गायत्र्या होमपूर्वकम् प्राप्ते कर्मणि शुद्धिः स्यादि
तरस्मिन्न मुह्यति अलाभे सुमुहूर्तस्य रजोदोषे च संगते श्रियं संपूज्य तत्कुर्यात्साग्निग्रहणमङ्गलम् हैमीं माषमितां पद्मां श्रीसू
क्तविधिनार्चयेत् मन्त्रं च पायसं हुत्वा अभिषेकं समाचरेदिति अथैककार्यानिर्णयः ज्योतिर्निबन्धे मनुः एकमातृजयोरेकवत्स राम:
रे पुरुषस्त्रियोः न समानक्रियां कुर्यान्मातृभेदे विधीयते एतन्न एकस्य पुंसो विवाहद्वयमेकदिने निषिद्धं मातृभेदाभावात् नारदः पु १९२

यत्कर्त्तव्यं तदनयासहेतिस्मृतेश्च ७

होमत्रयम् ७

प्रवेशयेत् ६ नाग्निकार्यत्रयं भवेत्। भिन्नोदरप्रसूतानां ७

त्रोद्वाहात्परं पुत्रीविवाहो नऋतुत्रये न तयोर्व्रतमुद्वाहान्मंडनादपिमुण्डनम् वराहः विवाहस्त्वेकजातानां षण्मासाभ्यंतरे यदि असंशयं
त्रिभिर्वर्षैस्तत्रैका विधवा भवेत् मदनरत्ने वशिष्ठः नपुंविवाहोर्ध्वमृतुत्रयेपि विवाहकार्य्यं दुहितुः प्रकुर्यात् न मण्डनाच्चापि हि मुण्डनं च गो
त्रे कनाया यदि नाब्दभेदः एकोदरभ्रात्रोर्विवाहकन्यायास्त्वसुनैपाणिग्रहणं विधेयम् षण्मासमध्ये मुनयः समूचुर्न मुण्डनं मण्डनतो
पि कार्य्यम् एतदपवादस्तत्रैव ऋतुत्रयस्य मध्ये चेदन्याब्दस्य प्रवेशनम् तदाप्येकोदरस्यापि विवाहस्तु प्रशस्यते सारावल्यां फाल्गु
ने चैत्रमासे तु पुत्रोद्वाहोपनायने भेदादब्दस्य कुर्वीत नर्तुत्रयविलंबनम् संहिताप्रदीपे ऊर्ध्वं विवाहात्तनयस्य नैव कार्यो विवाहो दु
हितुः समार्द्धम् अप्राप्य कन्या स्वसुरालयं च वधूप्रवेशात्स्वगृहं न चाहो मदनरत्ने वशिष्ठः द्विशोभनं त्वेकगृहेपि नेष्टं शुभं तु पश्चान्नव
भिर्दिनैस्तु आवश्यकं शोभनमुत्सवो वा द्वारेथवाचार्य्यविभेदतो वा एकोदरप्रसूतानां नेति शातातपोब्रवीत् ज्योतिर्निबंधे कात्याय
नः कुले ऋतुत्रयादर्वाक् मुण्डनान्नतु मण्डनम् प्रवेशान्निर्गमो नेष्टो न कुर्यान्मंगलत्रयम् कुर्वन्ति मुनयः केचिदन्यस्मिन्वत्सरे ल
घु लघु वा गुरु वा कार्यं प्राप्तं नैमित्तिकं तु यत् पूर्वोद्वाहः प्रवेशाख्यः कन्योद्वाहस्तु निर्गमः मुण्डनं चौलमित्युक्तं व्रतोद्वाहौ तु मंगल
म् चौलं मुंडनमेवोक्तं वर्जयेन्मण्डनात्परम् मौञ्जी चोभयतः कार्या यतो मौञ्जी न मुण्डनम् अभिन्नेवत्सरेपि स्यात्तदहस्तत्र भेद
यन् अभेदे तु विनाशः स्यान्न कुर्यादेकमण्डपे संकटे तु कपर्द्दिकारिकासु वराहमिहिरश्च उद्वाह्य पुत्रीं न पिता विदध्यात्सुतान्तरस्या
द्वहनं कदापि यावच्चतुर्थदिनमत्रपूर्वं समाप्य चान्योद्वहनं विदध्यात् कश्यपः मौञ्जीबन्धस्तथोद्वाहः षण्मासाभ्यंतरेपि वा पुत्र्यु
द्वहनं कुर्वीत विभक्तानां न दोषकृत् ज्योतिर्निबंधे विवाहमारभ्य चतुर्थिमध्ये श्राद्धं दिने दर्शदिने यदि स्यात् वैधव्यमाप्नोति तदा
शु कन्या जीवेन्न तिष्ठेद्दनपत्यता स्यात् तथा विवाहमध्ये यदि चेत्क्षयाहस्तत्र स्वसुरख्याः पितरो न यान्ति कृते विवाहपरतस्तु कु
र्याच्छ्राद्धं स्वधाभिन्नं तु दूषयेत्तम् येवाभद्रं दूषयन्ति स्वधाभिरिति श्रुतेश्च मासिकविषये हेमाद्रौ शाट्यायनिः प्रेतश्राद्धानि

विवाहम् २

नि॰ सिं॰ १९३

सर्वाणि सपिण्डीकरणं तथा अपकृष्यापि कुर्वीत कर्त्तुर्नान्दीमुखं द्विजः वृद्धिं विनापकर्षे दोषमाह तत्रैव उशना वृद्धिश्राद्धवि
हीनस्तु प्रेतश्राद्धानि यश्चरेत् स श्राद्धी नरके घोरे पितृभिः सह मज्जतीति मेधातिथिः प्रेतकर्माण्यनिर्वर्त्य चरेन्नाभ्युदयक्रिया
म् आचतुर्थं ततः पुंसि पंचमे शुभदं भवेत् स्मृत्यन्तरे सपिण्डीकरणादर्वाग् अपकृष्य कृतान्यपि पुनरप्यपकृष्यन्ते वृद्ध्युत्तरनिषे
धनात् स्मृतिसारावल्याम् भ्रातृयुगे स्वसृयुगे भ्रातृस्वसृयुगे तथा एकस्मिन्नरणे पुंसि चैव न कुर्यान्मङ्गलद्वयम् सोदरवि
षयमेतत् यमः एकोदरप्रसूतानामेकस्मिन्वासरे पुनः विवाहं नैव कुर्वीत मंडनोपरि मुण्डनम् गार्ग्यः भ्रातृयुगे स्वसृ
युगे भ्रातृस्वसृयुगे तथा न कुर्यान्मङ्गलं किंचिदेकस्मिन्मण्डपे हनि एकस्मिन्वासरे प्राप्ते कुर्याद्यमलजातयोः क्षौरं चैव वि
वाहं च मौञ्जीबन्धनमेव च ज्योतिर्निबन्धे एकोदरयोर्द्वयोरेकदिनोद्वहनं भवेन्नाशः न घनैरेकदिने कन्याद्वः संकटं शुभ
म् ऊर्ध्वं विवाहात्तु शुभदो नरस्य नारीविवाहोनन्तु त्रयं स्यात् नारीविवाहान्तरहं पिशास्तनरस्य पाणिग्रहमाहुरार्याः नि
त्नमातृजयोस्तु एकवासरे विवाहमाह मेधातिथिः पृथङ्मातृजयोः कार्यो विवाहस्त्वेकवासरे एकस्मिन्मंडपे कार्यः पृ
मोत ७ थग्वेदिकयोस्तथा पुष्पपट्टिकयोः कार्यं दर्शनं न शिरस्ययोः भगिनीभ्यामुभाभ्यां च यावत्सप्तपदी भवेत् यमयोस्तु विशेषः
भट्टकारिकायाम् एकस्मिन्वत्सरे चैव वासरे मंडपे तथा कर्त्तव्यं मङ्गलं स्वस्त्रोर्भ्रात्रोर्यमलजातयोः ज्योतिर्निबन्धे नारदः
अन्तु द्वाहो नैव कार्यो नेकस्मिन्नुद्वहनद्वयम् नैवैकजन्मयोः पुंसोर्नैकजन्मतु कन्यके नैव कदाचिदुद्वाहो नेकदा मुण्डनद्वयम्
नैकजन्मतु कस्येह पुत्रयोर्नैकजन्मयोः नपुत्रीद्वयमेकस्मै प्रदद्यात्तु कदाचन ति कन्यायां रजोदर्शने तु अपरार्के संवर्त्तः मा
ता चैव पिता चैव ज्येष्ठभ्राता तथैव च त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् हारीतः पितुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता
सा कन्या वृषली ज्ञेया तत्पतिर्वृषलीपतिः देवलात्रिकश्यपाः पूर्वार्द्धं तदेव भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता राम:
यस्तां समुद्वहेत्कन्यां ब्राह्मणो ज्ञानदुर्बलः अश्राद्धेयमपाङ्क्तेयं तं विद्याद्वृषलीपतिम् माधवीये बौधायनः श्रीशिवशरण् १९३

आङ्करिति शेषः २ पितुर्गेह इत्यादि २
उत्तरार्द्धं भ्रूणेत्यादि २

ज्ञानात् ३
तस्माच्छुल्कादृहितो भवेत् ४ शुद्धचित्तः ५
प्रतीक्ष्य १ वरः ४ अलंकारम् २

ऋतुमतीकांक्षेत पितृशासनम् विष्णुः ऋतुत्रयमुपास्यैव कन्याकुर्यात्स्वयंवरम् अत्रवरस्य दोषाभावमाह यमः कन्याद्वादश
वर्षाणि याप्रदत्तावसेद्गृहे ब्रह्महत्यापितुस्तस्याः साकन्यावरयेत्स्वयम् एवं चापनतापत्नीनावमन्येत्कदाचन ननुतावेन्यकी
विद्यान्मनुः स्वायंभुवोब्रवीत् मनुः अलंकारंनाददीत पितृदत्तंस्वयंवरे पितृदत्तमातृदत्तंस्तेयंस्याद्यदितंहरेत् वरमप्याह पि
त्रेणादद्याच्छुल्कंतुकन्यामृतुमतींहरन् सहितस्मादतिक्रामेद्दतूनांप्रतिबोधनात् अत्रप्रायश्चित्तमुक्तमाश्वलायनेन क
न्यामृतुमतींशुद्धांकृत्वानिष्कृतिमात्मनः शुद्धिंचकारयित्वातांमुद्वहेदान्तशस्तुधीः पिताअनृत्स्वपुत्र्यास्तुगणयेदादितः
शुद्धीः दानावधिगृहेयत्नात्पालयेच्चरजोवतीम् दद्यात्तदृतुसंख्यागाः शक्तः कन्यापितायदि दातव्यैकापिनिःस्वेनदानंत
स्यायथाविधि दद्याद्ब्राह्मणेभ्यऋतुमतिनिःस्वः सदक्षिणाम् तस्यातीतर्तुसंख्येषुवरायप्रतिपादयेत् उपोष्यत्रिदिनंकन्या
रात्रौपीत्वागवांपयः अदृष्टरजसेदद्यात्कन्यायैरत्नभूषणाम् तामुद्वहन्वरश्चापिकूष्माण्डैर्जुहुयाद्द्विजः इति मदनपारि
जाते जातूकर्ण्यः विवाहेविततेतंत्रेहोमकालेउपस्थिते कन्यामृतुमतींदृष्ट्वाकथंकुर्वन्तियाज्ञिकाः स्नापयित्वातुतांकन्या
मर्चयित्वायथाविधि युंजानामाहुतिंकृत्वाततस्तंत्रंप्रवर्त्तयेत् अत्रगांधर्वाद्यौविवाहास्त्ववस्थाचाकरेज्ञेया संकट
स्त्रियस्वपैशाचमाह माधवीये वत्सः सर्वोपायैरसाध्यास्यात्तुकन्यापुरुषस्यया चौर्येणापिविवाहेनसाविवाह्यारहः
स्थिता गांधर्वादिविवाहेष्वप्युदकपूर्वकंदानमाह तत्रैवयमः नोदकेननवावाचाकन्यायाःपतिरुच्यते पाणिग्रहणा
संस्कारात्पतित्वंसप्तमेपदे पराशरमाधवीये देवलोपि गांधर्वादिविवाहेषुपुनर्वैवाहिकोविधिः कर्त्तव्यश्चत्रिभिर्वर्णैः
समर्थेनाग्निसाक्षिकम् तत्रैवपरिशिष्टे गांधर्वासुरपैशाचाविवाहाराक्षसश्चयः पूर्वंपरिग्रहस्तेषांपश्चाद्धोमोवि
धीयते अतोहोमादावकृतेभार्यात्वाभावाद्गुरांतरायदेया तथाचतत्रैववशिष्ठबौधायनौ बलादपहृताकन्याम
न्त्रैर्यदिनसंस्कृता अन्यस्मैविधिवद्देयायथाकन्यातथैवसति मदनपारिजातेनारदः पाणिग्रहणिकामंत्रानि

कन्याविवाहं कर्तुमिच्छोर्दातुः। प्रतिग्रहीतुर्लाजादिहोमे ३

सूतकमितिशेषः ३ वरणोत्तरं हि मधुपर्कोदीयते ५

नि॰ सिं॰ १९४ पर्कं दारलक्षणाम् तेषां निष्ठा च विज्ञेया विद्वद्भिः सप्तमे पदे स्मृतिचन्द्रिकायामपरार्के चैवम् आशौचे तु याज्ञवल्क्यः दाने विवाहे
यज्ञे च संग्रामे देशविप्लवे आपद्यपि च कष्टायां सद्यःशौचं विधीयते केषामित्यपेक्षिते ब्रह्मपुराणे उक्तम् दातुः प्रतिग्रहीतुश्च
कन्यादाने च नो भवेत् विवाह विघ्नाः कन्याया लाजाहोमादिकं मरणेति व्रतयज्ञविवाहेषु श्राद्धे होमे च नेजपे आरब्धे सूतक
न स्यादनारब्धे तु सूतकमिति विष्णुवचनाच्च प्रारम्भस्तेनेवोक्तः प्रारम्भो वरणं यज्ञे संकल्पो व्रतसत्रयोः नान्दीमुखं विवाहादौ
श्राद्धे पाकपरिक्रियेति वरणमिति मधुपर्कपरम् गृहीतमधुपर्कस्य यजमानाच्च ऋत्विजः पश्चादशौचपतिते न भवेदिति निश्च
यइति प्रायश्चित्तः मधुपर्कात्पूर्वं तु भवेत्येवाशौचमिति शुद्धिविवेकः रामाण्डारभाष्येप्येवम् नान्दीमुखाव धिश्च स्मृत्यन्तरे एक
विंशत्यहर्यज्ञे विवाहे दशवासराः त्रिषट्चौलोपनयने नान्दीश्राद्धं विधीयते आरम्भाभावेपि लग्नान्तराभावेप्यथ विष्णुः नदे
८ संपादितसंभारयोः वप्रतिष्ठाविवाहयोः पूर्वसंभृतयोरपीति अत्र प्रायश्चित्तमाह मदनपारिजाते विष्णुः अनारब्धविशुद्ध्यर्थं कूष्माण्डैर्जुहुयाद्घृतम् सूतकमितिशेषः ७
गां दद्यात्पंचगव्याशी ततः शुद्ध्यति सूतकी संग्रहेपि संकटे समनुप्राप्ते सूतके समुपागते कूष्माण्डीभिर्घृतं हुत्वा गां च दद्यात्पय
स्विनीम् चूडोपनयनोद्वाहप्रतिष्ठादिकमाचरेत् यदेव सूतकप्राप्तिस्तदैवाभ्युदयक्रिया अन्नादिषु विप्रोषः षड्त्रिंशन्मते
विवाहोत्सवयज्ञेषु अन्तरा मृतसूतके परैरन्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैः परैरसगोत्रैः भुंजानेषु तु विप्रेषु त्वन्तरा मृतसू
तके अन्यगेहोदकाचान्ताः सर्वे ते शुचयः स्मृताः एतदाशौचात्पूर्वमपृथक्कृतान्नविषयम् तत्र शेषमन्नं त्याज्यमित्यर्थः पृथ
क्कृते तु बृहस्पतिराह विवाहोत्सवयज्ञेषु त्वन्तरा मृतसूतके पूर्वसंकल्पितान्नेषु न दोषः परिकीर्तितइति धर्मार्थं विवाहकर
णे फलमुक्तं महाभारते ज्ञात्वा स्ववित्तसामर्थ्यादेकं चोद्वाहयेद्द्विजाम् तेनाप्याप्नोति तत्स्थानं शिवभक्तेर्न संशयम् अप
रार्के दक्षः मातापितृविहीनं तु संस्कारोद्वाहनादिभिः यः स्थापयति तस्येह पुण्यसंख्या न विद्यते मदनरत्ने भविष्ये विवाहा
क्रियाः दिकाले तत्क्रियासिद्धिकारणम् यः प्रयच्छति धर्मज्ञः सोश्वमेधफलं लभेत् कन्यागृहे भोजननिषेधोपि तत्रैव अप्रजायां राम॰
तु कन्यायां न भुंजीत कदाचन दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचति अपरार्के आदिपुराणे विष्णुर्जामातरं मन्यतस्य को १९४

द्रव्यम् २ तदेवमग्र्यात्तरणभोजनार्थं याचितम् ७ असंकल्पितान्नविषयम् ६

एवमेकपात्रे स्त्रिया सह भुङ्क्ते इत्यन्वयः। तत्रैकयाने पक्वान्नादिभोजनं ज्ञेयम्। तत्रोदनादेरसंभवा...
ब्राह्मविवाहे ऽनयादीयते तां कन्यां। एतेन गांधर्वादिविधूढायाः कन्यायाः गृहे भोक्तव्यमिति फ...
समरण्डमपि

स्त्रियासहभोजनम् ४

स्त्रियाऽरहितः ४

पनं कारयेत् अप्रजायां तु कन्यायां नाश्नीयात्तस्य वै गृहे ब्राह्मदेयां वे कन्यां दत्वा स्त्रीभिः दावने अथ भुञ्जीत होमाच्चेत्स पापो नरके
वसेत् तत्रैव कश्यपः अहतं यत्र निर्मुक्तं वासः प्रोक्तं स्वयंभुवा शस्तं तन्मांगलिकेषु तावत्कालं न सर्वदा यत्र निर्मुक्तं तत्र नम्
विवाहमध्ये स्त्रिया सह भोजनेपि न दोष इत्याह हेमाद्रौ प्रायश्चित्तकाण्डे गालवः विवाहकाले यात्रायां पथि चोरसमाकुले अ
सहायो भवेद्धि अस्तदा कार्यं द्विजन्मभिः एकयानसमारोहे एकपात्रे च भोजनम् विवाहे पथि यात्रायां कृत्वा विप्रो न दोषभा
क् अन्यथा दोषमाप्नोति पश्चाच्चान्द्रायणं चरेत् मिताक्षरायामप्येवम् रत्नमालायाम् मूलमैत्रमृगरोहिणीकरैः पौष्ण
माहतमघोत्तरान्वितैः भौमसौरिरविवारवर्जितैः पाणिपीडनविधिर्विधीयते अत्रानिष्टनक्षत्रादौ दानमुक्तं ज्योतिषे विप
तारे गुडं दद्यान्निधने तिलकाञ्चनम् प्रत्यरे लवणं दद्याच्छाकं दद्यात्रिजन्मसु चंद्रे च शंखलवणं चैतारतियोविरुद्धं चय
तण्डुलांश्च धान्यं च दद्यात्करणे च वारे योगविरुद्धे कनकं प्रदेयम् विवाहे मण्डपमाह वशिष्ठः षोडशारत्निके कुर्या
च्चतुर्द्वारोपशोभितम् मण्डपं तोरणैर्युक्तं तत्र वेदिं प्रकल्पयेत् अष्टहस्तं तु रचयेन्मण्डपं वा द्विषट्करम् दैवज्ञमनोहरः
चित्राविशाखाश्रवणा तारकाश्विनीज्येष्ठाभरण्यो पौष्णेशभाच्चतुष्टयम् हित्वा प्रशस्तं फलतैलवेदिकाप्रदानकंकनं मण्डपा
दिकम् हेमाद्रौ व्यासः कण्डनं दलनं यवारकं मण्डपं दिवरणीकाघस्विलम् तत्सर्वं विगताग्नमपि सर्वे वैवाहिके कुर्यात्
यवारकं चिकसाइणि प्रसिद्धमुद्धननम् वैवाहिके तु दिवसे शुभे चाथ तिथौ शुभे चातुर्थिकं प्रकुर्वीत विधिदृष्टेन कर्मणा वेदीमा
ह नारदः हस्तोच्छ्रिता चतुर्हस्तैश्चतुरस्रा समन्ततः स्तम्भैश्चतुर्भिः सुश्लक्ष्णा वामभागे तु सद्मनि समा तथा चतुर्दिक्षु शोभा
नैरन्तिशोभिताम् प्रागुदक्प्रवणारम्भा स्तम्भहंसशुकादिभिः एवंविधामारुरुक्षेन्मिथुनं साग्निवेदिकामिति सप्तर्षिमते
मंगलेषु च सर्वेषु मण्डपो गृहमानतः कार्यः षोडशहस्तो वा न्यूनो हस्तो दशावधिः स्तम्भैश्चतुर्भिरेवात्र वेदीमध्ये प्रतिष्ठिता।
हस्तैर्बध्वाः सोपानं पश्चिमतो परिभागे उक्तपरिमाणाद्विन्नम् अथ मण्डपोदाहरणम् ज्योतिर्निबन्धे नारदः कर्त्तव्यं

मन्वर्थयोश्च चतुर्थदिने इत्यर्थः ५

वरस्य पित्रादिः ६

विवाहदिनात्प्राक् १ इदानीम् २

ति॰ सिं॰ २९५

म्लेच्छवादे मंगलायांकुरार्प्पणम् नवमे सप्तमे वापि पंचमे दिवसेपि वा तृतीये बीजनक्षत्रे शुभवारे शुभोदये सम्यगा
ग्पलंकृत्य वितानध्वजतोरणैः सहवादित्रनृत्याद्यैर्गत्वा प्रागुत्तरां दिशम् तत्र मृत्सिकतोः श्लक्ष्णां गृहीत्वा पुनरागतः म
ण्मयेष्वथवा वैणवेषु पात्रेषु योजयेत् अनेकबीजसंयुक्तं तोयपुष्पोपशोभितम् शौनकः आधानं गर्भसंस्कारं जात
कर्म च नाम च हित्वान्यत्र विधानव्यं मंगलंकुरवापनम् बृहस्पतिः आन्यत्रिकेषु कार्येषु कार्येषु सद्योंकुरार्प्पणम् अत्रैव
वाग्दाने हरिद्रावंदनं च कार्यम् ज्योतिःप्रकाशे चतुर्थी मंडपः श्रेष्ठा सप्तमः पंचमस्तथा नवमैकादशश्रेष्ठौ नेष्टौ षष्ठतृ
तीयकौ विवाहमेष्वोदये वा कन्यावरणमाचरेत् वरस्यापि वरणमाहच्चरणेश्वरः उपवीतं फलं पुष्पं वासांसि विविधानि
च देयं वराय वरणे कन्याभ्रात्रा द्विजेन चेति वाग्दानोत्तरं वरमरणेऽपरार्के स्मृतिचंद्रिकायां च वशिष्ठः आद्भिर्वाचा च दत्ता
यां म्रियेतादौ वरो यदि न च मंत्रोपनीता स्यात्कुमारी पितुरेव सा यच्च नारदः उद्वाहितापि सा कन्या न चेत्संप्राप्तमैथुना
पुनः संस्कारमर्हति यथा कन्या तथैव सेति यच्च कात्यायनः वरोयघन्यजातीयः पतितः क्लीव एव वा विकर्मस्थः सगोत्रो
वा दासो दीर्घरोगमयोपि वा ऊढापि देया सान्यस्मै सहावरणभूषणेति इदं कलौ निषिद्धम् देवरेण सुतोत्पत्तिर्दत्ता कन्या न दी
यते इत्यादिस्मृतिपुराणेषु कलौ निषेधात् दत्ताशब्द ऊढापरः ऊढायाः पुनरुद्वाहमिति हेमाद्रावुक्तेः देशान्तरगमने तु कात्याय
नः वरयित्वा तु यः कश्चित्प्रणश्येत्पुरुषो यदा ऋत्वागमांस्त्रीनतीत्य कन्यान्यं वरयेत्पतिम् अपरार्के नारदोपि प्रतिगृह्य
तु यः कन्यां वरो देशान्तरं व्रजेत् त्रीनृतून्समतिक्रम्य कन्यान्यं वरयेत्पतिम् शुल्कदाने तु मनुवशिष्ठौ कन्यायां दत्तशुल्का
यां म्रियेत यदि शुल्कदः देवराय प्रदातव्या यदि कन्यानुमन्यते चंद्रिकायां कात्यायनः प्रदाय शुल्कं गच्छेद्यः कन्यायाः
स्त्रीधनं तथा धार्यासौ वर्षमेकं तु देयान्यस्मै विधानतः अनेकेभ्यो हि दत्तायामनूढायां तु तत्र वै सर्वागतेष्वसर्वेषां लभे राम: २९५
ताद्यवरस्तु ताम् पश्चाद्धरणाय दत्तेन तस्याः प्रतिलभेत सः अथागच्छेत्तु वोढायां दत्तं पूर्ववरो हरेत् याज्ञवल्क्यः दत्ताम

दूरदेशगमनेनादर्शनं गच्छेत् ५ वाचा १

सगत्तनिर्णयः ८

पित्रादिभिर्यत्नेकृतेपि ३ नाम्नकुर्यां ८ ज्येष्ठानामित्यर्थः। अत्रवंशोऽल्पसामर्थ्य

पिहरेत्पूर्वांश्चेद्यांश्चेद्दूरस्थाव्रजेत् एर्वस्यदोषसत्त्वेइदमितिविज्ञानेश्वरः संबंधतत्त्वेवशिष्ठः कुलशीलविहीनस्यपंढ्यादि
पतितस्यच अपस्मारिविधर्मस्यरोगिणांवेषधारिणाम् दत्तामपिहरेत्कन्यांसगोत्रोढांतथैवच मनुः परोढाधवधिरादी
नांविवाहोऽस्मिन्यथोचितम् विवाहासंभवेतेषांकनिष्ठोविवहेत्तदा पितृस्यपुत्रेसापत्न्येपरदारसुतेषुच विवाहाधानयज्ञा
दौपरिवेदोनदूषणम् अन्यदुक्तंव्येविस्तरभीतेर्नोच्यतेइतिदिक् अत्रनांदीश्राद्धविशेषंचाग्रेवक्ष्यामः इदंचाद्यविवाहवि
ताकुर्यांद्द्वितीयादौवरएव नांदीश्राद्धंपिताकुर्यादाद्येपाणिग्रहेपुनः अतऊर्ध्वंप्रकुर्वीतस्वयमेवतुनांदिकमितिस्मृतेः
त्रिकांडमंडनोपि पित्रोस्तुजीवतोःकुर्यात्पुनःपाणिग्रहंयदा पितुर्नांदीमुखंश्राद्धंनोक्तंतस्यमनीषिभिरितिरेणुककारि
का उक्तेकालेविवाहंकुर्यान्नांदीमुखंपिता देशांतरेविवाहश्चेत्तत्रगत्वाभवेदिदम् लग्नघटीस्थापनमाहनारदः षडं
गुलमितोत्सेधंद्वादशांगुलमायतम् कुर्यात्पात्रंतालवत्ताम्रपात्रंतद्दशभिःपलैः ताम्रपात्रेजलैःपूर्णेमृत्पात्रेवाथवाम्भ | नांद ८
मे मंडलार्द्धदियंवीक्ष्यरवेस्तत्रविनिक्षिपेत् तत्रमंत्रः मुख्यत्वमसियंत्राणांब्रह्मणानिर्मितंपुरा भावाभावायदंप | शुभाशुभविचा
त्योःकालसाधनकारणमिति वरस्यमधुपर्कमाहजातूकर्ण्यः प्रतिसंवत्सरंत्वर्च्याःस्नातकाचार्यपार्थिवाः विप्रोवि | रार्थम् ८
वाह्यश्चतथाजन्तुप्रत्यृत्विजःपुनः अत्रविशेषोगृह्यपरिशिष्टे वरस्यप्राभवेच्छाखातच्छाखागृह्यचोदितः मधुपर्कःप्र
दातव्योह्यन्यशाखेपिदातरि अत्रवरदातृशब्दाभ्यांत्विग्गाद्युपलक्षणम् तदाहुः अर्च्यशाखयामधुपर्कइति अर्च्यस्य
यच्छाखीयंकर्मतच्छाखयामधुपर्कइतिजातिकाः जयंतस्तुवर्णयन्त्सर्वत्रयजमानशाखयैवमधुपर्कइत्याहतन्मुना
द्वियंतेवृद्धाः अत्रपंचाशतामवद्दूलातदर्हनंतुविष्टरइत्यादिगृह्यपरिशिष्टादविष्टरादिक्षणमधुपर्कादिवि धिश्च
स्वगृह्याद्ज्ञेयः कन्यादानेपितामहपूर्वकंतेत्युक्तंस्मृत्यर्थसारे नांदीमुखेविवाहेचप्रपितामहपूर्वकतेत्युक्तम् नामसंकी
र्तयेद्विद्वानन्यत्रपितृपूर्वकम् नांदीमुखइतिवक्तृचाद्यतिरिक्तविषयम् गृह्यपरिशिष्टेपित्राद्यानुलोम्यान्नानात्

कुंभेः ३

अत्र प्राच्यादिविवाहे मूदकपूर्वं कन्यादानमुक्तं ततः पूर्वं कन्यावरणे वरपक्षैः कृते कन्यादातृकर्तृकं वाग्दानमपि प्रतिग्रहवरणरूपं परिशिष्टादावुक्तम् । तद्यथा । वधूवरयोः श्वं द्वनारावलं पंचाँ
गशुद्धियुक्ते दिने विवाहनक्षत्रलग्नेषु समसंख्यानाष्टान्नरूपानुशिष्टान्ब्राह्मणांस्तादृशीभिः स्वपुरंध्रीभिः सहितान्मंगलगीतवाद्यपुरःसरं कन्याग्रहं प्रति वरः प्रहिणुयात् ते च तद्गृहं गत्वा दान
बांधवोपेतां प्राङ्मुखासीनां कन्यां गंधपुष्पतांबूलवस्त्रभूषणैर्नीराजनादिभिरलंकृत्य तस्याः पाणौ पानीलिकेरादि फलं निधाय प्राङ्मुखासीना भूत्वा कन्यादानोऽर्थं प्रति वरणीयं । अमुकप्रपौत्राया
मुकपौत्रायामुकपुत्रायामुकवराय अमुकप्रपौत्रीममुकपौत्रीममुकपुत्रीमिमां कन्यां भार्यात्वाय वृणीमहे इति । अथ दाता स्वभार्याज्ञात्यादिसमेतो यथोक्त मनम्र वरणीयान्ध्व ... त्रिर्ब्रूयात् । पुनर्य

प्रति २

नि॰ सिं॰
२९६

भुक्त्वा समुद्वहेत्कन्यां सावित्रीगृह्यसंज्ञया उपोषितः सुतां दद्यादर्चितायद्विजायतु भुक्ते ति मधुपर्केविधभोजनपरम् गृह्यपरिशिष्टे
कन्यावरयमारणानामेवधर्मोविधीयते प्रत्यङ्मुखाव रयतिष्ठ क्रृति प्राङ्मुखाः मदनरत्ने कृष्णभट्टः वरगोत्रं समुच्चार्य प्रपिता
महपूर्वकम् नामसंकीर्तयेद्द्विमान्कन्यायाश्चैवमेवहि तिष्ठन्पूर्वमुखो दाता वरः प्रत्यङ्मुखो भवेत् मधुपर्कार्चितायेनां तस्मै प
द्यात्सदक्षिणाम् उदपात्रं ततोगृह्य मंत्रेणानेन दापयेत् गौरीं कन्यामिमां विप्र यथाशक्ति विभूषिताम् गोत्राय शर्मणे तुभ्यं द
त्तां विप्र समाश्रय भूमिगाश्चैव दासीं च वासांसि च स्वशक्तितः महिषीं वाजिनश्चैव दद्यात्स्वर्णमणीनपि ततः स्वगृह्यविधि
ना होमाद्यं कर्म कारयेत् यथाचारं विधेयानि मांगल्यकुतुकानि च एतत्कन्यादानं त्रिःकार्यमिति शौनकः गृहप्रवेशनीय
होमे विशेषमाहाश्वलायनः अर्द्धरात्रे व्यतीते तु परेद्युः प्रातरेव हि गृहप्रवेशनीयः स्यादिति जज्ञे विदो विदुरिति अपराग्ने
होमे विशेषमाह शौनकः यदि राज्ञो विवाहाग्निरुत्पन्नः स्यात्तथा सति उपक्रम्यान्तरस्याङ्कः सायं परिचयेदमुम् यदि रा
त्रौ नवनाडीमध्येऽग्न्युत्पत्तिस्तदा तदैव होमारम्भः तदुत्तरं चेत्परदिने सायमारम्भ इति सुदर्शनभाष्ये उक्तम् अथ देवको
त्थापनम् समे च दिवसे कुर्याद्देवकोत्थापनं बुधः षष्ठं च विषमं नेष्टं मुक्त्वा पंचमसप्तमौ निर्णयदीपे गार्ग्यः नान्दीश्रा
द्धे कृते पश्चाद्यावन्मातृविसर्जनम् दर्शश्राद्धं क्षयश्राद्धं स्नानं शीतोदकेन च अपसव्यं स्वधाकारं नित्यश्राद्धं तथैव च ब्रह्म
यज्ञं चाध्ययनं नदीसीमातिलंघनम् उपवासव्रतं चैव श्राद्धभोजनमेव च नैव कुर्युः सपिंडाश्च मंडपोद्वासनावधि बृ
हस्पतिः तीर्थविवाहयात्रायां संग्रामे देशविप्लवे नगरग्रामदाहे च स्पृष्टास्पृष्टिर्न दुष्यति योगयाज्ञवल्क्यः न स्नायादुत्सवेती
तमंगलं विनिवर्त्य च अनुव्रज्य सुहृद्बंधूनर्चयित्वेष्टदेवताम् ज्योतिषे स्नानं सचैलं तिलमिश्रकर्म प्रेतानुयानं कलशप्रदानं
म् अपूर्वतीर्थामरदर्शनं च विवर्जयेन्मंगलतोऽब्दमेकम् मासषट्कं विवाहादौ व्रतप्रारंभणेन च जीर्णभाण्डादि न त्याज्यं गृहसं
मार्जनं तथा ऊर्द्ध्वं विवाहात्पुत्रस्य तथा च व्रतबंधनात् आत्मनो मुण्डनं नैव वर्षं वर्षार्द्धमेव च अभ्यंगे सूतके चैव विवाहे पुत्र
जन्मनि मांगल्येषु च सर्वेषु न धार्यं गोपिचन्दनम् ज्योतिर्निबंधे उद्वाहात्प्रथमे षष्ठे चौथदिवसे भर्तुर्गृहे कन्यका हन्यात्तज्जननीं

पोक्त मुक्त्वा श्रद
स्वामीति चाश्वलि
र्ब्रूयात् । प्राल्लगाश्च
स्वस्त्ययनमुक्त्वा एत
द्रुः सत्यमस्त्विति त्रि
र्ब्रूयुः पुरंध्रश्च देश
कुलधर्मान्मंगला
चारान्कुर्युरिति ।
वाग्दानानंतरं चवि
वाहयावत्कन्या श
चीयथाविमवेद्ध्वज
यित्वा प्रत्यहम् । दे
वेन्द्राणि नमस्तुभ्यं
देवेन्द्रप्रियभामिनि ।
विवाहभाग्यमारो
ग्य पुत्रलाभं च देहि
रामः मे । इति प्रा
र्थयेत् । त
२९६ नः कन्या
नकाले । तिष्ठन्त
खो दाता वरः
मुखो भ

त्रिर्वाक्यमुच्चार्येत्यर्थः १२
आपा ६१

मासे १ अयुग्मे ५

ष्येनिजननंज्येष्ठेपतिंज्येष्ठकम् पौषेचश्वशुरंपतिंचमलिनेचैत्रेस्वपित्रालये तिष्ठंतीपितरंनिहंतिनभयंतेषामभावेभवेत् निबंधे॥
विवाहात्प्रथमेपौषेआषाढेचाधिमासके नसाभर्त्तुर्गृहेतिष्ठेच्चैत्रेपितृगृहेतथा हेमाद्रेस्मृत्यंतरे विवाहव्रतचूडासुवर्षमर्द्धंतदर्द्ध
कम् पिण्डदानंमृदास्नानंनकुर्यात्तिलतर्प्पणम् अथवधूप्रवेशः ज्यपतुंगेमार्गशीर्षेतथामाघेमाधवेज्येष्ठसंज्ञके शुभशंसे
भवेद्वेश्मप्रवेशोनवयोषिताम् नारदः आरभ्योद्वाहदिवसात्षष्ठेवाप्यष्टमेदिने वधूप्रवेशःसंपत्त्यैदशमेथसमेदिने सप्तमे
विवाहमारभ्यवधूप्रवेशोयुग्मेतिथौवाथोडशवासरांतात् ऊर्ध्वंतथाऽब्देयुजिपंचमासादतःपरस्तान्नियमोनचास्ति नारदः
समेवर्षेसमेमासेयदिनारीगृहंव्रजेत् आयुष्यंहरतेभर्तुःसानारीमरणंव्रजेत् प्रयोगरत्नेतु वधूप्रवेशःप्रथमेतृतीयेप्र
थमप्रदःपञ्चमकेथवाह्नि द्वितीयकेवाथचतुर्थकेवाषष्ठेवियोगामयदःखदःस्यात् इत्युक्तम् वृद्धवशिष्ठोपि षष्ठाष्टमेवाष्ट
मेदिनेवाविवाहमारभ्यवधूप्रवेशः पञ्चाङ्गतःशुद्धिदिनंविनापिविधावसङ्कोचरणेपिकार्य्यः लल्लः स्वभवनपुरप्र
वेशेदेशनाविप्लवेतथोद्वाहे नववध्वागृहगमनेप्रतिशुक्रविचारणानास्ति माण्डव्यः नित्ययानेगृहेजीर्णेप्राशने
१० अन्नप्राशनांतेषु तेषुसप्तसु वधूप्रवेशमांगल्येनमौञ्ज्यांगुरुशुक्रयोः ज्योतिःप्रकाशे वामेशुक्रेनवोढायाःसुखहानिश्चदक्षिणे धन
धान्यंचपृष्ठस्थेसर्वनाशःपुरःस्थिते नवोढायास्तुवैधव्यंयदुक्तंसम्मुखेभृगौ तदेवविबुधैर्ज्ञेयंकेवलंतुद्विरागमे
पूर्वतोभ्युदितेशुक्रेप्रयायाद्दक्षिणापरे पश्चादभ्युदितेचैवयायात्पूर्वोत्तरेदिशो व्यवहारतत्त्वे पौष्णमाङ्क्रमाश्वश्रवणाद्व
युग्मेहस्तत्रयेमूलमघोत्तरासु पुष्येचमैत्रेचवधूप्रवेशोरिक्तेतरेव्यर्ककुजेचशस्तः गर्गः व्यतीपातेचसंक्रांतौग्रहणे
वैधृतौवपि आद्यंविनाशुभंनैवप्राप्तकालेपिमानवः तथा अमासंक्रांतिविष्ट्यादौप्राप्तकालेपिनाचरेदिति अथद्वि
रागमनम् अक्षोच्चये माघफाल्गुनवैशाखेशुक्लेपक्षेशुभेदिने गुर्वादित्यविशुद्धौस्यान्नित्यंपत्नीद्विरागमः बादरा
यणः नीहारांशुदिनात्तराद्दितिगुरुब्रह्मानुराधाश्विनीशक्रेभास्करवायुविष्णुवरुणत्वाष्ट्रेप्रशस्तेतिथौ कुंभाजा
लिगतेरवौशुभेकरप्राणोदयेभार्गवेजीवज्ञास्फुजितांदिनेनववधूवेश्मप्रवेशःशुभः अथपुनर्विवाहः औपरीये

कुर्यादितिशेषः ४ आस्फुजिच्छुक्रः १

तदुपर्यन्याविवाहात् २   लग्नेंदुस्थलग्नं चतेनयोः १ उपयापि २   अन्यवर्णा ८

मि॰ सि॰ १९७ पुनर्विवाहं वक्ष्यामि दंपत्योः प्रभवच्छिदम् लग्नेंदुलग्नपोर्द्धीषु ग्रहतारादिसंभवे अन्येष्वप्यशुभकालेषु दुष्टयोगादिसंभवे वि-
वाहे वापि दंपत्योरात्मेऽचादिसमुद्भवे तत्सदोषस्य शांत्यर्थं पुनर्वैवाह्यमिष्यते याज्ञवल्क्यः सुरापी व्याधिता धूर्त्ता वंध्यार्थ-
घ्न्यप्रियंवदा स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा मनुः वंध्याष्टमेऽधिवेत्तव्या दशमे तु मृतप्रजा एकादशे स्त्रीजन-
नी सद्यस्त्वप्रियवादिनीति संग्रहे तु अप्रजां दशमे वर्षे स्त्रीप्रजां द्वादशे त्यजेत् मृतप्रजां पंचदशे सद्यस्त्वप्रियवादिनी-
म् एकामुत्क्रम्य कामार्थमन्यां लब्धुं य इच्छति समस्तस्तामपि त्वार्थैः पूर्वोढामपरां वहेत् याज्ञवल्क्यः आज्ञासंपादि-
नीं दक्षां वीरसूं प्रियवादिनीम् त्यजन्दोष्यस्तृतीयांशमद्रव्यो भरणं स्त्रियाः मनुः अधिविन्ना तु या नारी निर्गच्छेद्रुषि-
ता गृहात् सा सद्यः सन्निरोद्धव्या त्याज्या वा कुलसन्निधाविति हेमाद्रौ कात्यायनः अग्निशिष्टादिशुश्रूषां बहुभार्य्यः
सवर्णविकृत्वं चेत् ८ सवर्णया कारयेत्तद्बहुत्वं चेज्ज्येष्ठया गर्हितानचेदिति याज्ञवल्क्यः सत्यामन्यां सवर्णायां धर्म्मकार्य्यं न कारयेत्
वह्नीषु सतीषु ९ सवर्णासु विधौ धर्म्ये ज्येष्ठया न विनेतरा द्वितीयेविवाहहोमेऽग्निमाह कात्यायनः सदारोन्यान्पुनर्दारानुद्वोढुं कारणां-
तरात् यदीच्छेदग्निमान्कर्त्तुं क्व होमोस्य विधीयते स्वेग्नावेव भवेद्धोमो लौकिके न कदाचन त्रिकांडमण्डनोपि आ-
धायां विद्यमानायां द्वितीयामुद्वहेद्यदि तदा वैवाहिकं कर्म कुर्यादावसथेग्निमान् सुदर्शनभाष्ये तु द्वितीयविवाह-
लौकिके एव न पूर्वोपासने इत्युक्तम् इदं चासंभवे तत्र चाग्निद्वयसंसर्गः कार्य्यः तं चाह शौनकः अथाग्न्योर्गृह्य-
योर्योगं सपत्नीभेदजातयोः सहाधिकारसिद्ध्यर्थमहं वक्ष्यामि शौनकः अरोगामुद्वहेत्कन्यां धर्मलोपभया-
त्स्वयम् कृते तत्र विवाहे च व्रतांते तु परेहनि पृथक्स्थंडिलयोरग्नी समाधाय यथाविधि तंत्रं कृत्वाज्यभागांत- राम॰
मन्वाधानादिकं ततः जुहुयात्पूर्वपत्न्यग्नौ तयान्वारब्ध आहुतीः अग्निमीडे पुरोहितं सूक्तेन तु नवर्चेन तु सं- १९७
मिध्येन समारोप्य अयं ते योनिरित्यृचा प्रत्यवरोहेत्यनया करी वाग्नौ निधायतम् आज्यभागांततंत्रादि कृत्वा

धि। २ १   कनिष्ठां सवर्णा ८   तदेवाह ६
वन्ध्या २ पूर्वपत्न्या असंमत्यादिना ग्रामांतरादिना वा ५

समन्वारब्धएताभ्यांपत्नीभ्यांजुहुयाद्धुतम् चतुर्गृहीतमेताभिरग्निभिःपद्भिर्यथाक्रमम् अग्नावग्निश्चरतीत्यग्निनाग्निःसमिध्य
ते अस्तोदमितितिसृभिःपाहिनोअग्नएकया ततःस्विष्टकृदादिहोमशेषंसमापयेत् गोयुगंदक्षिणांदद्याच्छ्रोत्रियायाहिताग्नये
पत्न्योरेकायदिमृतादग्ध्वातेनैवतांपुनः आदधीतान्ययासार्द्धमाधानविधिनागृहीति द्वितीयादिविवाहकालउक्तःसंग्रहे प्र
मदामृतिवासरादितःपुनरुद्वाहविधिर्वरस्यच विषमेऽब्दयुग्मवत्सरेष्वयोयुग्मलेचापिमृतिप्रदोभवेत् तृतीयाविवाहनिषेधो
मात्स्ये उद्वहेद्यदिसिद्ध्यर्थंतृतीयांनकदाचन मोहादज्ञानतोवापियदिगच्छेत्तुमानुषीम् नश्यत्येवनसंदेहोगर्गस्यवचनं
यथेतिसंग्रहे तृतीयांयदिचोद्वाहेत्तर्हिसाविधवाभवेत् चतुर्थादिविवाहार्थंतृतीयेऽर्कंसमुद्वहेत् तद्विधिस्तुरविशान्त्योक्त्वास्म
वावरः संकल्पस्वस्तिवाचननान्दीश्राद्धंकृत्वाचार्यंवृत्वा आकृष्णेनेतिच्छायायुतंसूर्यमर्कंसंपूज्यगुडौदनंदत्त्वावस्त्रेणातंतुभिर्वा
वेष्ट्यत्रिलोकवासिन्सप्ताश्वच्छायायासहितोरवे तृतीयोद्वाहजंदोषंनिवारयसुखंकुरु इतिसंप्रार्थ्यजलेनत्रिःसिंचेत् ममप्रीति
कारायेयंमयासृष्टापुरातनी अर्कजाब्रह्मणासृष्टाअस्माकंप्रतिरक्षतु नमस्तेमंगलेदेविनमःसवितुरात्मजे त्राहिमांकृ
पयादेविपत्नीत्वंमेइहागता अर्कत्वंब्रह्मणासृष्टःसर्वप्राणिहितायच वृक्षाणामादिभूतस्त्वंदेवानांप्रीतिवर्द्धनः तृती
योद्वाहजंपापंमृत्युंचाशुविनाशयेति ततआचार्यः काश्यपगोत्रामादित्यप्रपौत्रींसवितुःपौत्रींममपुत्रीमर्ककन्याममुक
गोत्रायवरायदास्येइतिवाग्दानंकृत्वावरस्यमधुपर्कंकृत्वान्तःपटंधृत्वास्वस्तिनइतिसूक्तंजप्त्वापूर्ववत्कन्यांदत्त्वाऽर्ककन्यामि
मामितिसूक्तेनकन्यादानमन्त्रमुक्त्वादक्षिणांदद्यात् ततोगायत्र्यावेष्टितसूत्रेणवृहत्सामेतिमन्त्रेणार्ककण्ठंबध्वाऽर्कस्यचतु
र्दिक्षुकुंभेषुविष्णुंसंपूज्याग्निंप्रतिष्ठाप्याघारान्तेसंगोभिरितिवृहस्पतयेयस्मैत्वाकामकामायेत्यृचाग्नयेत्वमस्तसमस्तत्वा
हेतिभिराज्यंहुत्वाचार्यायगोयुगंदत्त्वाममाकृतमिदंकर्मस्थावरेषुजरायुषु अर्कापत्यानिनोदेहितत्सर्वंक्षन्तुमर्हसीतिन
मेदितिदिक् इतिनिर्णयसिन्धौविवाहः अथाधानम् रत्नमालायाम् प्राजापत्यपूषभेसद्विदैवपुष्येज्येष्ठासुवैदवकृत्तिकासु
अग्न्याधानंपुत्ररारात्रयेपि चित्रादित्येकीर्तितंगर्गमुख्यैः आश्वलायनः अग्न्याधेयंकृत्तिकासुरोहिण्यांमृगशिरसि
फाल्गुनीषुविशाखयोरुत्तरयोःप्रोष्ठपदयोरेतेषांकस्मिंश्चिद्वसन्तेपर्वणिब्राह्मणआदधीतग्रीष्मेवर्षाशरत्सुक्षत्रियवै

उदिते ऽनुदिते सूर्ये विद्युदुषिते तथा सर्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिः एवं स्वरूपं तत्रैव रात्रेस्तु षोडशे भागे ग्रहनक्षत्रभूषिते कालं त्वनुदितं ज्ञात्वा होमं कुर्याद्विचक्षणः ततः प्रभात
समये त्वन्नक्षत्रमण्डले रविर्यावन्न दृश्येत समयाध्युषितं च तत् रेखामात्रं प्रदृश्येत रश्मिभिश्च समन्वितः उदितं तं द्विजानीयात्तत्र होमं प्रकल्पयेत् आश्वलायनः उपोदयं व्युषिते उदिते
वास्तमितेत्सुल्व अस्तमिते होममिति सर्वप्रदोषान्तो होमकालः संगवान्तः प्रातरिति छंदोगपरिशिष्टे ५
वैश्यस्तत्क्षत्रकर्मोपजीवी उपकृष्टा तत्स्वशरादि १

नि. सिं. स्यापूर्व्वं स्यायुस्मिन्कस्मिंश्चिदन्तावादधीत सोमेन यक्ष्यमाणो नर्त्तुं पृच्छेन्न नक्षत्रं सोमाधाने च त्वाधाने लोचनमार्त्तपरम् सोमेन यक्ष्य
१९८ नः माणो नर्त्तुं प्रेच्छेन्न नक्षत्रं तदेतदाहितस्याग्निवेलं वा प्रदृष्टा युक्तस्य भवतीति बोधायनोक्तेरिति मदनरत्ने कृष्णगार्ग्यः पुष्यास्येषु अनूत्तरा
दित्यपौष्णमैत्र्याचित्राकैहिदैवेषु भेषु कुर्य्यादग्न्याधानमाघवसन्तग्रीष्मोत्तेष्ववेविसादिवरणः कालादर्शे अग्निहोत्रदर्श
पौर्णमासावप्युत्तरायणे उपक्रम्य यथाकालमुपासीरन्द्विजातयः सोमं च पशुबन्धं च सर्वाश्च विकृतीरपि सौम्यायने यथा उत्तरायणे ४
कालविद्युद्गृहमेधिनः अत्र विशेषः पूर्वमुक्तः अग्निहोत्रकाल उक्तः छंदोगपरिशिष्टे यावत्सम्यङ् भाव्यते नभस्यृक्षा
णि सर्वतः न च लोहितिमापैति तावत्सायन्तु हूयते औपासनेप्येवम् तस्याग्निहोत्रेण प्रादुष्करणं होमकालो व्याख्यातो
ति आश्वलायनोक्तेः अथावसथ्याधानम् पारस्करः आवसथ्याधानं दारकाले दायाद्यकाले एके इति दायाद्यकालो पृ ७
विभागकालः मदनरत्ने व्यासः अग्निर्वैवाहिको येन न गृहीतः प्रमादिना पितर्य्युपरते तेन गृहीतव्यः प्रयत्नतः योगृही
त्वा विवाहाग्निं गृहस्थ इति मन्यते अन्नं तस्य न भोक्तव्यं वृथापाको हि स स्मृतः ज्येष्ठभ्रातरि पितरि वा साग्नौ कनिष्ठस्य पुत्र
स्य वा स्याभावेपि न दोषः तदाह तत्रैव गार्ग्यः पितृपाकोपजीवी वा भ्रातृपाकोपजीवकः ज्ञानाध्ययननिष्ठो वा न दुष्येताग्निना
विना गृहस्थस्याप्यध्ययनमाह सत्यव्रतः अनधीत्य द्विजो वेदं स्नात्वा दारांश्च यथा तथा अधीते ब्रह्मचर्य्येण सांगवेदं गुरो
र्गृहे इदं चाधानं ज्येष्ठेऽकृताधाने न कार्य्यम् तदाग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्व
ज इति मनुशातातपयोरुक्तेः स्मार्त्तेप्येवम् सोदर्ये तिष्ठति ज्येष्ठे न कुर्याद्दारसंग्रहम् आवसथ्यं तथाधानं पतितस्तु तथा
भवेदिति तत्रैव गार्ग्योक्तेः आज्ञायां च दोषमाह सुमन्तुः ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैव चाश्रयेत् अनुज्ञातस्तु कुर्वीत
शंखस्य वचनं यथा कृष्णवशिष्ठः अग्रजस्तु यदा नाग्निराददीतानुजः कथम् अग्रजानुमतः कुर्यादग्निहोत्रं यथाविधि
हारीतः सोदराणां तु सर्वेषां परिवेत्ता कथं भवेत् दारैस्तु परिविद्यन्ते नाग्निहोत्रेण नेज्यया अधिकारिणोपि भ्रातुर रामः
नुज्ञया कुर्यादिति मदनपारिजातः विवाहस्त्वनुज्ञयापि नेत्यर्थः सोदरोक्तेरसोदराणां सापत्न्यदत्तकादीनां न दोषः दत्त १९८

दशतंदश॰एतेनद्विहस्ततोन्कार्ऽ

कस्यापिसोदरविवाहाभावेऽदोषएवतदाह हेमाद्रौवशिष्ठः पितृव्यपुत्रान्सापत्न्यान्परनारीसुतांस्तथा दाराग्निहोत्रसंयोगे
नदोषःपरिवेदने परनारीसुतादत्तकादयः देशांतरेविशेषमाहसएव अष्टौदश द्वादशवर्षाणिवाज्येष्ठभ्रातरमनिवि
ष्टमप्रतीक्षमाणःप्रायश्चित्तीभवतीति क्लीवादावप्यदोषमाहकात्यायनः देशांतरस्थक्लीवैकवृषणानसहोदरान् ८२
वेश्यातिसक्तांश्चपतितशूद्रतुल्यातिरोगिणः जडमूकांधबधिरकुब्जवामनखंजकान् अतिवृद्धानभार्यांश्चकृषिस
क्तान्नृपस्यच धनवृद्धिप्रसक्तांश्चकामतोकारिणस्तथा कुटिलान्मत्तचोरांश्चपरिविंदन्नदुष्यति एवंज्येष्ठेछिन्नह
स्तादावपिनपरिवित्तत्वंतदाहत्रिकांडमण्डनः दर्शेष्टिपौर्णमासेष्टिसोमेज्यामग्निसंग्रहम् अग्निहोत्रविवाहंचप्रयोगमपृथ
मेस्थितम् नकुर्याज्जनकज्येष्ठसोदरश्चाप्यकुर्वति क्षेत्रजादावनौजानेविद्यमानेपिसोदरे नाधिकारविघातोस्तिभिन्नोदर्येपि
पिचौरसे पंग्वंधमूकबधिरपतितोन्मादद्रूषणे सन्यस्तछिन्नहस्तादोयद्वाषणादिदूषणे जनकेसोदरेज्येष्ठेकुर्यादेवे
तरःक्रियामिति आरोहतंदशतंशक्वरीर्ममेत्याधानेमंत्रवर्णाच्च शाक्वरीरंगुलीः तत्ररत्नप्युक्तम् अंगवैकल्यात्पूर्व
माहिताग्नित्वेधिक्रियेतेवनित्येषु आधानंतुनकुर्यात्तस्यनैमित्तिकत्वादिति एवंचतुरंगुलोपि षडंगुलकर्णविकर्णा
दस्त्वस्यैवाधिकारः एकादशासुदशांतर्गमःमैरकंतर्भवेचेविप्रतिषिद्धमितिहिरण्यकेशिसूत्रेकर्मशक्तिहेतोरंगां
वैकल्यस्यनिषेधात् अतएवद्राह्यायणसूत्रे याज्यश्चप्रथमैस्त्रिभिर्गुणैर्यतिन्यूनांगस्याप्यधिकारउक्तः अपरा
र्केउशना पितापितामहोयस्यअग्रजोवाथकस्यचित् तपोग्निहोत्रमंत्रेषुनदोषःपरिवेदने पितुरनुज्ञायामप्यदोष
माह मदनरत्नेसुमंतुः पित्रायस्यतुनाधानंकथंपुत्रस्तुकारयेत् अग्निहोत्राधिकारोस्तिप्रोक्तःस्वस्यवचनेनयथेति
नाधानंकृतमित्यर्थः एतदाज्ञायामेवेतिहेमाद्रिः यत्तुपितुः सत्यप्यनुज्ञानेनादधीतकदाचनेतितन्नत्सन्यधिकारेज्ञे
यम् अथसंस्काराः यमः शूद्रेप्येवविधःकार्योविनामंत्रेणसंस्कृतः नकेनचित्समसृजच्छंदसातंप्रजापतिः छंदसामंत्रेण

उनराधानम् ७

नपआदिरहितः ५

अर्थिसमर्थविधान ५

द्विजन्मभ्योऽस्याल्पमित्यर्थः १०

नि॰सिं॰ १९९ आसेपि गर्भाधानं पुंसवनं सीमंतो जातकर्म्मच नामक्रियानिष्क्रमोन्नप्राशनं वपनक्रिया कर्णवेधो व्रतादेशो वेदारंभक्रियाविधिः
केशांतः स्नानमुद्वाहो विवाहाग्निपरिग्रहः त्रेताग्निसंग्रहश्चेव संस्काराः षोडशस्मृता इत्युक्त्वाह नवैताः कर्णवेधांताः मंत्रवर्ज्जं क्रियाः
स्त्रियाः विवाहो मंत्रतस्तस्याः शूद्रस्यामंत्रतो दशेति मदनरत्ने हिरण्यगर्भदानेतु गर्भाधानपुंसवनं सीमंतोन्नयनं तथा कुर्य्याद्धिरण्य
गर्भस्य ततस्तो द्विजपुंगव इत्युक्त्वा जातकर्मादिकाः कुर्यात्क्रियाः षोडशचापराः इत्यत्र स्त्रियाजातकर्मनामकरणनिष्क्रमान्नप्राशनं चू
डा विवाहाः षट् शूद्राणां तु षडेते पंचमहायज्ञाश्चेत्येकादशेत्युक्तम् रूपनारायणहरिहरभाष्ययोरप्येवम् शार्ङ्गधरस्तु द्विजानां षो
डशैव स्युः शूद्राणां द्वादशैव हि पंचैव मिश्रजातीनां संस्काराः कुलधर्मतः वेदव्रतोपनयनमहानाम्नीमहाव्रतम् विनाद्वादश शूद्रा
णां संस्काराना ममंत्रतः इत्याह अपरार्केतु गर्भाधानमृतौ पुंसः सूत्यत्राह एतच्चातुर्वर्ण्यपरम् नद्विजातिमात्रपरम् तथा सत्युप
नयनं विधायवाच्यस्यादिति तेन तन्मते ब्योभवति आह्नेतु विवाहमात्रसंस्कारः शूद्रोपि लभतां सदेत्युक्तम् अत्र सदसच्छूद्रगो शूद्रगोत्र ५८
चरत्वेन देशभेदाद्वाव्यवस्था यत्तु मनुः नशूद्रे पातकं किंचिन्नचसंस्कारमर्हतीति तदर्थमाह मेधातिथिः यत्सामान्यतो निषि
द्धं स्तेयान्नतादि न तदतिक्रमे स्य पापं यथा द्विजातीनामुपनयनरूपसंस्कारं च नार्हतीति तेचन्नमीकार्याः शूद्रावर्णश्चतुर्थोपि वर्णत्वा निषेधातिक्रमे १०
द्धर्म्ममर्हति वेदमंत्रस्वधास्वाहावषट्कारादिभिर्विनेति व्यासोक्तेः अमंत्रस्य तु शूद्रस्य विप्रो मंत्रेण गृह्यते इति मरीच्युक्तेश्च शू
द्रपरिभाषा सर्वार्था तेन शूद्रधर्म्मेषु सर्वत्र विप्रेणामंत्रः पठनीयः सोपि पौराणएवेति शूलपाणिः एवं स्त्रीणामपीति दिक् इतिस
मस्तकृष्णभट्टात्मजकमलाकरभट्टकृते निर्णयसिंधौ संस्कारनिर्णयः अथ वास्तुद्रकालाः तत्र जलाशयस्य वराहः हस्तो मघाऽनुरा
धा पुष्यधनिष्ठोत्तराणि रोहिण्यः शतभिषगित्यारंभे कूपानां शस्यते भगणः हेमाद्रौ भविष्ये तस्मिन्सलिलसंपूर्णे कार्तिके तु विशे
षतः मुनयः केचिदिच्छंति व्यतीते चोत्तरायणे नकालनियमस्तत्र सलिलं तत्र कारणम् दीपिकापि मार्त्तण्डइज्यद्वीशमुरजिद्व
शायने माघमृत्युकस्यमृत्यो मूलाषाढोत्तराश्विव्यश्रवणगुरुकरे पाह्यमर्क्कार्क्कजचंद्रे मंत्रव्राह्मेवपूर्णा मदनरवितिथौ सोद्भुतीयान्तीये राम॰ १९९
कार्यातोयप्रतिष्ठा ज्ञगुरुसिततद्दिने कालशुद्धे सुलग्ने वराहः आग्नेये यदि कोणे ग्रामस्य पुरस्य वा यदि भवति कूपः नित्यं सकरोति
भयं च निताक्षयं च वायव्ये दिग्त्रयमतत्पन्त्वाशेषा सुशुभावहाः कूपाः वास्तुशास्त्रे भूतिपुष्टिपुत्रहानिपुरंध्रीनाशमृत्युसम्पदश्च

इहं च समानसंज्ञायः । नैऋत्ये वालभयं १

रुद्रान्याम् ५

तुवाधाम किंचित्सोरवं शंभुकोणादिकुर्यात् कूपोमध्येगेहमध्येसयंच उत्सर्गविधिश्चोक्तोवह्वृचपरिशिष्टे अथातोवापीकूपतडागजु
तंव्याख्यास्यामः पुराणपल्लुदकसमीपेअग्निंसमाधायवारुणंचरुंश्रपयित्वाज्यभागौ तेअग्ज्याहुतीर्जुहुयात्समुद्रज्येष्ठेतिप्रत्यृचं
न्यु ३ ततोहविषाष्टौतत्त्वायामीतिपंचत्वन्नोअग्नेइतिद्वेममेवरुणेतिच स्विष्टकृतंनवमंमार्जनांतेधेनुंतारयेत्तामनुमंत्रयेदिदंसलिलं
पवित्रंकुरुष्वशुद्धाःपूताअमृताःसंतुनित्यम् मांतारयंतीकुरुतीर्थाभिषेकंलोकाल्लोकंतरतेतीर्यतेच पुच्छाग्रेऽन्वारब्धउ
त्तीर्यापोऽस्मान्नित्यथापरेणजितायांदिश्युत्थापयेत्तत्रूपवसाऽद्भगवतीतिहिंकृतंचद्विःकृतावतीत्यलंकृतामविप्रायदद्यादितरं
वाशक्त्यादक्षिणांततउत्सृजेदेवपितृमनुष्याःप्रीयंतामितिब्राह्मणान्भोजयित्वास्वस्त्ययनंवाचयीत विस्तरस्तुमात्स्यपाकोक्त
त्कृतेजलाशयोत्सर्गविधौज्ञेयः कूपादेरुत्सर्गाकरणेदोषउक्तोभविष्ये सदाजलंपवित्रंस्यादपवित्रमसंस्कृतम् अपेयंतद्भवेत्स
र्वंपीत्वाचांद्रायणंचरेत् अथवृक्षारोपणम् चंडेश्वरः आदित्यचंद्रपितृतिष्यविशाखापौष्णमूलोत्तरात्रयेतुरंऽमवारुणं
श्व एतेषुनारकगणेषुहितेनराणांवृक्षादिरोपणमिहापदिशंतिधीराः अथमूर्तिप्रतिष्ठा वशिष्ठः हस्तत्रयेमित्रहरित्रये
चपौष्णद्वयादित्यसुरेज्यभेषु तिष्येजराधातृशशांकभेषुसर्वामरस्थापनमुत्तमंस्यात् मात्स्ये चैत्रेवाफाल्गुनेवापिज्येष्ठे
वामाधवेतथा माघेवासर्वदेवानांप्रतिष्ठाशुभदाभवेत् नारदस्तु विचैत्रेष्वेवमासेषु माघादिषुच पंचसु इति ततोऽत्रविकल्पः
अत्रमाघमासोविष्णुप्रतिष्ठाव्यतिरिक्तविषयः माघेकर्तुर्विनाशाय फाल्गुनेशुभदाभवेदितिविष्णुधर्मोक्तेरितिहेमाद्रिः
मात्स्ये प्रतिपत्सुद्वितीयायांतृतीयायांधनप्रदा चतुर्थ्यांनाशमाप्नोतियमस्यस्यात्सुखावहा विनायकस्यदेवस्यतथातत्र
हितप्रदा पंचम्यांश्रीयुताकर्तुर्वरदाचतथाभवेत् षष्ठ्यांलक्ष्मीयुतानित्यंसप्तम्यांरोगनाशिनी अष्टम्यांधान्यवकुलान
वम्यांचविनश्यति भद्रकाल्याःकृतानतत्रकर्तुर्भवतुनष्टये धर्मवृद्धिकरीज्ञेयादशम्यांतुतथातिथौ एकादश्यांतथाकर्तु
द्वादश्यांसर्वकामदा त्रयोदश्यांतथाज्ञेयाचतुर्दश्यांविनश्यति कृष्णपक्षेपंचदश्यांकर्तुःक्षयकरीभवेत् पंचदश्यांतथाकृ

यमस्येवसुखावहाप्रतिष्ठा ५

नि॰सिं॰ २०० गणेश ४

ष्ठे सर्वकामकरो भवेत् आषाढे हन्तयामूलमुत्तरात्रयमेव च ज्येष्ठाश्रवणरोहिण्यः पूर्वभाद्रपदा तथा हस्ताश्विनीरेवती च पुष्यो मृग
शिरस्तथा अनुराधा तथा स्वाती प्रतिष्ठासु प्रशस्यते श्रीपतिः रोहिण्युत्तरपौष्णमैन्द्रमथ वैष्णवं करादित्याश्विनीवासवानूराधेन्दवजीवभे
भृगूदितेविधौ प्रतिष्ठापनम् पुष्यश्रुत्यभिजित्सुरेश्वरकयोर्विघ्नाधिपस्कन्दयोर्मैत्रे तिग्मरुचेः करे निरृतिभे दुर्गादिकानां मम
गणपरिवृढरक्षोयक्षभूतासुराणां प्रथमफणिसरस्वत्यादिकानां च पौष्णे श्रवसि मृगते नाम्नो वा सवे लोकपानां निगदितम
खिलानां स्थापनं च स्थिरेषु तेजस्विनी क्षेमकृदग्निदाहविधायिनी स्याद्धनदा दृढा च आनंदकृत्कल्पविनाशिनी च सूर्यादिवारे
षु भवेत्प्रतिष्ठा माधवीये वैखानसः मीनभैरववाराहनरसिंहत्रिविक्रमाः महिषासुरहंत्र्याश्च स्थाप्या वै दक्षिणायने वैश
ब्दोऽप्यर्थे लिंगप्रतिष्ठायां विशेषः हेमाद्रौ लक्षणसमुच्चये उत्तरायणगते भानौ लिंगस्थापनमुत्तमम् दक्षिणे त्वयने पूज्य
त्रिवर्षाद्भयावहम् स्वगृहे स्थापनं नेष्टं तस्माद्दक्षिणायने स्थापनं तु प्रकर्तव्यं शिशिरादावृतुत्रये प्रावृषि स्थापितं लिं
गं भवेद्रुद्रयोगदम् हेमंते ज्ञानदं चैव लिंगस्यारोपणं मतम् रत्नावल्याम् माघफाल्गुनवैशाखज्येष्ठाषाढेषु पंचसु मासे
षु शुक्लपक्षेषु लिंगस्थापनमुत्तमम् विष्णोरप्याह तत्रैव वैखानसः मार्गशीर्षादिमासौ द्वौ निंदितौ ब्रह्मणा पुरा मासेषु फा
ल्गुनः श्रेष्ठश्चैत्रो वैशाख एव च ज्येष्ठे वाप्याश्वयुग्मासे श्रावणे मासि वा भवेत् बौधायनसूत्रे विष्णुप्रतिष्ठामुपक्रम्य द्वादश्यां
श्रवणायां वा यानि चान्यानि पुण्यनक्षत्राणीति कृत्तिकादिविशाखांतेष्वित्यर्थः सर्वदेवेषु मासविशेषमाह हेमाद्रौ विष्णुधर्मे
माघे कर्तुर्विनाशाय फाल्गुने शुभदो भवेत् लोकानंदकरी चैत्रे वैशाखे धनसंयुता आज्ञायुता सदा ज्येष्ठे आषाढे धर्मवृद्धि
दा श्रावणे धनहीना स्यात् प्रोष्ठपादे विनश्यति आश्विने नाशमाप्नोति वह्निना कार्तिके तथा सौम्ये सौभाग्यमतुलं पौषे पुष्टि
रनुत्तमा दोषान्विताधिमासे स्यात्कर्तुरन्यमनस्य चेति अत्र श्रावणाश्विनयोर्निषेधो मार्गशीर्षविधिश्च विष्णुव्यतिरिक्तवि राम॰
षयः पूर्वोक्तवचनादिति हेमाद्रिः माघश्रावणभाद्रपदनिषेधः शिवव्यतिरिक्तविषयः तत्र तस्योक्तेः देवीस्थापने तत्रैव २००

कारयितुः २ पुण्यनक्षत्रेषु ५ मार्गशीर्षे ३

विशेषोदेवीपुराणे देव्यामाद्येऽश्विनेमासेउत्तमासर्वकामदा तथा नतिथिर्नचनक्षत्रंनोपवासोत्रकारणम् सर्वकालंप्र
कर्त्तव्यंकृष्णपक्षेविशेषतः अन्यश्चात्रविचारोहेमाद्रौज्ञेयः नारदः हस्तपादहीनाकर्त्तारमंत्रहीनास्तुऋत्विजम् स्त्रियंलक्षण
हीनास्तुनप्रतिष्ठासमारिपुः अत्राधिकारिणउक्ताः हेमकल्पतरौदेवीपुराणे वर्णाश्रमविभेदेनदेवाःस्थाप्यास्तुनान्य
था ब्रह्मातुब्राह्मणैःस्थाप्योगायत्रीसहितःप्रभुः चतुर्वर्णैस्तथाविष्णुप्रतिष्ठाप्यःसुखार्थिभिः भैरवोपिचतुर्वर्णैरन्त्यज
नातथामताः मातरःसर्वलोकेतुस्थाप्याःपूज्याःसुरोत्तमाः लिंगंगृहीयतिर्वापिसंस्थाप्यपूजयेत्सदा शिवसर्वस्वेभवि
ष्य यस्तुपूजयतेलिंगंदेवादिमांजगत्पतिम् ब्राह्मणःक्षत्रियोवैश्यःशूद्रोवामत्परायणः तस्यप्रीतःप्रदास्यामिप्रभूमान्लो
कानतुत्तमान् लिंगिनंचस्कांदे शूद्रःकर्मणियोतुस्त्रीयानिकुरुतेप्रिये तस्याहमर्चांगृह्णामिचंद्रखंडविभूषिते ब्रह्म
चारीगृहस्थोवावानप्रस्थश्चभिक्षुकः एवंदिनेदिनेदेवंपूजयेदंबिकापतिम् सन्यासीदेवदेवंशंप्रणवेनैवपूजयेत् नमो
न्तेनाथवेनैवस्त्रीणांपूजाविधीयते एतच्चपुराणप्रसिद्धज्योतिर्लिंगपूजाविषयम् यानितुत्रिस्थलीसेतौ नारदीये यःशूद्र
स्त्रेणार्चितंलिंगंविष्णुंवाप्रणमेन्नरः नतस्यनिष्कृतिर्दृष्टाप्रायश्चित्तायुतैरपि नमेच्छूद्रसंस्पृष्टंलिंगंवाहरिमेववा स
र्वयातनाभोगीयावदाचंद्रतारकम् पाखंडपूजितंलिंगंनत्वापाखंडतांव्रजेत् आभीरपूजितंलिंगंनत्वानरकमश्नुते
यामिद्भिःपूजितंलिंगंविष्णुंवापिनमेत्तुयः सकोटिकुलसंयुक्तआकल्पंरौरवेवसेत् इत्यादीनितानितुनस्थापितलिं
गादिविषयाणि यदाप्रतिष्ठितंलिंगंमंत्रविद्भिर्यथाविधि तदाप्रभृतिशूद्रश्चयोषिद्वापिनसंस्पृशेत् इतितत्रैवोक्तेः प्रति
ष्ठायांतुशूद्रादीनानाधिकारः स्त्रीणामनुपनीतानांशूद्राणांचनरेश्वर स्पर्शनेनाधिकारोस्तिविष्णौवाशंकरस्यवा
यःशूद्रसंस्पृष्टंलिंगंविष्णुंवापिनमेन्नरः इहैवात्यन्तदुःखानिप्राप्नोत्यामुष्मिकेकिमु शूद्रोवानुपनीतोवास्त्रियोवापतिता
पिवा केशववाशिवंवापिस्पृष्ट्वानरकमश्नुते इतिस्कांदोक्तेरितित्रिस्थलीसेतौपितामहचरणाः चतुर्वर्णैरितिपूर्वोक्त
वचनाद्धिरण्यादिप्रतिष्ठायांशूद्रस्यविकल्पइतितुयुक्तंपश्यामः तत्रैववर्गोत्तमः शिवार्चनंसदाप्येवंशुचिःकुर्यादुदङ्मुखः

यथासंख्यम् १ देवगृहे १

नि. सिं. २०१ वाचस्पतिधृतम् प्राक्पश्चिमोदगास्यस्तु प्रातः सायं निशासु चेति प्रयोगपारिजाते गृह्यपरिशिष्टे प्रतिमाः प्राङ्मुखीरुदङ्मुखो
यजेतान्यत्र प्राङ्मुखः एतच्च स्थिरप्रतिमाविषयम् अन्यत्र चलार्चासु अथ प्रतिमाः भार्गवार्चनदीपिकायां भविष्ये सौवर्णी
राजती ताम्री मृन्मयी चैव तथा भवेत् पाषाणधातुयुक्ता वा रीतिकांस्यमयी तथा रीतिः पित्तलम् शुद्धदारुमयी वापि देवतार्चा
प्रशस्यते अङ्गुष्ठपर्वादारभ्य वितस्तिं यावदेव तु गृहेषु प्रतिमा कार्या नाधिका शस्यते बुधैः पंचरात्रे तु मृद्दारुलाक्षागोमेदम मणि ४
शिकंथं धूच्छिष्टमयीं न त्विति निषेधोक्तेः भागवते शैली दारुमयी लौही लेप्या लेख्या च सैकती मनोमयी मणिमयी प्रतिमाष्ट
विधा स्मृता काष्ठमध्ये कस्यैव तत्र काष्ठं शुभं शुभकमानीय च वसुंधरे कृत्वा तु प्रतिमां चैव प्रतिष्ठाविधिनार्चयेदिति वारा
हात्तेः देवीपुराणे सप्ताङ्गुलसमारभ्य यावद्द्वादशाङ्गुलम् गृहेष्वर्चा समाख्याता प्रासादे चाधिका शुभा तिथितत्त्वे का
लिकापुराणे प्रतिमायाः कपोलौ द्वौ स्पृष्ट्वा दक्षिणपाणिना प्राणप्रतिष्ठां कुर्वीत तस्य देवस्य वा हरेः अन्येषामपि देवा
नां प्रतिमासु च पार्थिव प्राणप्रतिष्ठा कर्तव्या तस्यां देवत्वसिद्धये वासुदेवस्य बीजेन तद्धि ह्रीं मारित्यनेन वा तथैव हृदये
गुल्फं दत्वा प्राग्वच्च मंत्रवित् एभिर्मंत्रैः प्रतिष्ठां तु हृदये पि समाचरेत् अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च अ
स्यै देवत्वमर्चायै महेति यच्च कश्चन हयशीर्षपञ्चरात्रे अर्चकस्य तपोयोगादर्चनस्यातिशायनात् आभिरूप्याच्च वि
म्बानां देवः सान्निध्यमृच्छति प्रयोगपारिजाते व्यासः प्रतिमापटयन्त्राणां नित्यस्नानं न कारयेत् कारयेत्पर्वदिवसे य
दा वा मलधारणम् लिंगे विशेषमाह तिथितत्त्वे भविष्ये मृन्मयं गोशकृत्पिष्टं ताम्रकांस्यमयं तथा कृत्वा लिंगं सकृत्पू
ज्य वसेत्कल्पायुतं दिवि वार्क्षं वित्तप्रदं लिंगं स्फाटिकं सर्वकामदम् कृत्वा पूजय विप्रेन्द्र लभ्यसे वांछितं फलम् तत्रैव
कालकौमुद्यां स्कांदे अक्षादल्पपरीमाणं न लिंगं कुत्रचिन्नरः कुर्वीतांगुष्ठतो ह्रस्वं न कदाचित्समाचरेत् अक्षा रामः
शीतिगुंजाः गुंजाः पंचाद्यमाषक स्ते षोडशाक्षः कर्षोस्त्रीत्यमरकोशात् प्रयोगपारिजाते क्रियासारे न चाष्ट २०१

दुमर्वीकारस्यपीठस्यविस्तारंपीठमध्येसूत्रपातनमितं।नसमंतान्मितम्। इत्युभयतश्च ४ विस्तारेयासः सचूतसमंततोमानविषयः किंतुमध्येसूत्रमानम् २ तन्मेखलामध्येसं-
काकारपीठवर्णनम् ४ ४पार्थिवचिंतामणौ। ऊर्ध्वपीठसमंपीठंदीर्घविस्तारसंयुतम्।तदर्द्धंगोमुखाकारंपंचसूत्रमिदंस्मृतम् २ लासमंगर्त्तम् ५
मस्तकम्।लिंगोच्छ्रायः।तस्योत्पपीठं।प्रणालिकाचेतिपंच।सूत्रमानाहारितेषांनिर्णयः।ततः कंठवप्रमेखलागर्त्तप्रणालि २
इतिपीठोच्चताकथनम् ४ अत्राल्पेऽप्यग्रेर्यांतरसंमत्येत्यर्थः ३ चेश्राकारावयवयोर्मध्येइत्यर्थः ४

इतिपीठोच्चताकथनम् ४ सप्तांगुलिकंलिंगंश्रेष्ठमिहोच्यते षट्पंचकचतुर्मानंमध्यमंत्रिविधंस्मृतम् त्रिद्व्येकांगुलमानंयत्त्रिविधंतत्कनीयसम् एवंनवविधंप्रोक्तंचरलिंग ५
मथाऽक्रमम् अथपंचसूत्रनिर्णयः गौतमीतंत्रे लिंगमस्तकविस्तारोलिंगोच्छ्रायसमोमतः परिधिस्तत्त्रिगुणितस्तद्दपीठंव्यवस्थितम् प्रणा
लिकानथैवस्यात्पंचसूत्रविनिर्णयः अत्रेदंतत्त्वम् लिंगमस्तकविस्तारंलिंगोच्चतासमंकृत्वातत्त्रिगुणसूत्रवेष्टनाहंलिंगस्याल्पंकृत्वा इतिसमस्तकलिं ४
तत्समंवृत्तंचतुरस्त्रंवापीठविस्तारमधश्चोर्ध्वंचकुर्यात् पीठोच्चतातुलिंगोच्चताद्विगुणंपीठमध्येलिंगाद्विगुणस्थूलंपीठोच्चतातत्तीयांशे गनिर्माणंतस्यो
वलयाकारः इतिपंचसूत्रानिरिक्तंकंठवर्णनम् ५ नकंठंकृत्वातस्याधश्चमधश्चसमंवप्रद्वयंत्र्यंशवाकृत्वालिंगविस्तारबष्ठांशेनपीठपरिवाह्यमेखलांकृत्वातदंतःसलंश्रेतत्समखातंकृत्वापि ल्पकथनम् ३
ठाद्बहिर्लिंगसमदीर्घांपीठार्द्धदीर्घांवामूलेदसमविस्ताराममग्रेतदर्द्धविस्तारांतत्तीयांशेनमध्यखातांपीठवत्समेखलांप्रणालिकांकुर्यादि
ति अत्रमूलसिद्धांतशेखरेश्चोवागमेचज्ञेयंतत्रैवब्राह्मे सर्वत्रैवप्रशस्तात्रुःशिवस्यार्चनंविना तत्रैववाराहपाद्मयोः गृहेलिंगद्वयंनार्च्यं
वलयाकारमेव ५ शालग्रामद्वयंतथा द्वेचक्रे द्वारकायास्तुनार्च्यंसूर्यद्वयंतथा शक्तित्रयंतथानार्च्यंगणेशत्रयमेवच द्वौशंखौनार्चयेच्चैवभग्नांचप्रति
पीठेपरिचक्राकारा बहिःस्थितम् ६ मांतथा नार्चयेच्चतथामत्स्यकूर्मादिदशकंतथा गृहेऽग्निदग्धाभग्नाश्चनार्चाःपूज्याःवसुंधरे एतासांपूजनान्नित्यमुद्वेगंप्राप्नुयाद्
ही शालग्रामाःसमाःपूज्याःसमेषुद्वितयंनहि विषमानैवपूज्यास्तुविषमेष्वेकमेवहि शालग्रामशिलाभग्नापूजनीयासचक्रि
का खंडितात्रुटितावापिशालग्रामशिलाशुभा वाराहे यःपुनःकायये देविशालग्रामशिलानरः सुवर्णमहितोद्दिव्यापृथ्वी
नफललभेत् अत्रैव यःपुनःपूजयेद्भक्त्याशालग्रामशिलांशेनमं तत्फलंनैवशक्नोहंवक्तुंवर्षशतैरपि विष्णुपुराणे ब्राह्मणाः
क्षत्रियोवैश्यःशूद्रश्चपृथिवीपते स्वधर्मतत्परोविष्णुमाराधयतिनान्यथा अविभक्तोनामपिपृथग्देवपूजामाह प्रयोगपा
रिजाते आश्वलायनः पृथगग्न्येकपाकानांब्रह्मजज्ञोद्विजातिनाम् अग्निहोत्रसुरार्चाचसंध्यानित्यंभवेत्पृथक् तत्रैवविष्णुध
र्मे शालग्रामशिलांवापिचक्रांकितशिलांतथा ब्राह्मणःपूजयेन्नित्यंक्षत्रियादिर्नपूजयेत् इदंस्पर्शसहितपूजाविषयम
शूद्रोवानुपनीतोवास्त्रियोवापतितोपिवा केशवंवाशिवंवापिस्पृष्ट्वानरकमश्नुते ब्राह्मणोपिहरेर्विष्णुनस्पृशेच्छपिमिच्छती
सनाथामन्तनाथावातस्यानास्तीहनिष्कृतिः स्त्रीणामनुपनीतानांशूद्राणांचजनेश्वर स्पर्शनेनाधिकारोस्तिविष्णौवाशं
मूलेस्वमूलेसदैर्घ्यसमविस्तारां अग्रेप्रणालिकाग्रेस्वदैर्घ्यार्द्धविस्तारां देर्घ्यार्द्धतत्तीयांशेनमध्येकृतगर्त्तां। पीठमेखलासमकृतमेख उच्चामित्यर्थः १३ पीठेपरिचक्राकृत्यवप्रवस्त्वाह्यप्रांतभागेसमंतान्मेखलां इतिमेखला १३
ला एवंचपंचसूत्रातिरिक्तंकंठवप्रमेखलागर्त्तप्रणालिकावर्णनंकृतमितिज्ञेयम् १२
तत्समेखलाम् १२

गर्त्तेमध्ये· इतोन्यूनाधिकाभ्यांनेत्यर्थः।नचोपलक्षणं।प्रमाणविशेषग्रहणावैयर्थ्यात् ८

शालग्रामोपरि ८

त ८

नि· सिं· २०२

कस्यचेतिस्कांदात् स्पर्शरहितानुनयोर्भवस्येव शालग्रामंनस्पृशेत्तुहीनवर्णोवसुंधरे स्त्रीशूद्रकरसंस्पर्शोवज्रस्पर्शाधिकोमतः मोहा
द्यः संस्पृशेच्छूद्रोयोषिद्वापिकथंचन सपतेन्नरकेघोरेयावदाभूतसंप्लवम् यदिभक्तिर्भवेत्तस्यस्त्रीणांवापिवसुंधरे दूरादेवास्पृश्य
पूजांकारयेत्सुसमाहितः इतिवाराहोक्तेः शालग्राममात्रेतिवैधानप्रतिमादौ सर्ववर्णैस्तुसंपूज्याःप्रतिमाः सर्वदेवताः लिंगा
न्यपिचपूज्यानिमणिभिःकल्पितानिचेयत्तितत्रैवोक्तेः चत्वारोब्राह्मणैःपूज्यास्त्रयोराजन्यजातिभिः वैश्यैर्द्वौविवसपूज्योनयेकः
शूद्रजातिभिः शिभिरितिस्कांदात् अन्येतुदीक्षितादीक्षितविषयत्वेनव्यवस्थामाहुः विष्णुधर्मे तयोरसंभववाचीवैसाचहृ
नवधास्मृता रत्नजाहेमजाचैवराजताताम्रजातथा रैतिकाचीनथालोहीशैलजादारुजातथा अधमाधमाचविज्ञेयामृन्मयीप्र
तिमाचया एवफलानितत्रैवज्ञेयानितत्रैवपाद्मेशालग्रामप्रक्रमम् तत्राप्यामलकीतुल्यापूज्यासूक्ष्मैवज्ञाभवेत् यथायथाशि
लासूक्ष्मातथास्यात्तुमहत्फलम् तथा यवमात्रनुगर्त्तैःस्याद्यवार्द्धलिंगमुच्यते शिवनाभिरितिख्यातस्त्रिषुलोकेषुदुर्लभः तत्रैव
शालग्राममयीमुद्रासंस्थितायत्रकुत्रचित् वाराणस्यांयवाधिक्यंसमन्ताद्योजनत्रयम् क्षेत्रंतावत्समीपेतुमंत्रवान्तीर्यते
निकम् सर्वमोक्षमवाप्नोतिसत्यंसत्यंनचान्यथा तत्रैव चक्रांकमिथुनंपूज्यंनैकचक्रांकमर्चयेत् चक्रांकमिथुनात्माद्दृशालग्रा
मंप्रपूजयेत् तत्रैववाराहे म्लेक्षदेशेऽप्यचौवापिचक्रांकोयत्रतिष्ठति योजनानांतथात्रीणिममक्षेत्रंवसुंधरे तत्रैवशालग्राम
प्रक्रम्य अयचक्रीनापरिज्ञेयामध्यमाऽयाचिताऽधमा प्रयोगपारिजाते वाराहे एवंलक्षणसंपन्नापारंपर्यक्रमागता उत्त
मासातुविज्ञेयागुरुदत्ताद्वितत्समा अथपार्थिवपूजा नंदिपुराणे आयुष्मान्बलवान्श्रीमान्पुत्रवान्धनवान्सुखी वरमिष्ट
मवाप्लिंगंपार्थिवंयःसमर्चयेत् तस्मात्तुपार्थिवंलिंगंज्ञेयंसर्वार्थसाधकम् तत्रैव गोभूहिरण्यवस्त्रादिबलिपुष्पानिवेदनं ज्ञेयोन
मःशिवायेतिमंत्रःसर्वार्थसाधकः सर्वमंत्राधिकश्चायमोंकाराद्यःषडक्षरः भविष्ये मूर्त्तयोष्टौशिवस्येताःपूर्वादिक्रमयोगतः
आग्नेयान्ताःप्रपूज्यास्तुवद्धोलिंगशिवंयजेत् अत्रतत्प्राचीमग्रतःशंभोरितिरुद्रयामले निषेधान्नानरालेप्राचीकिंतुप्रसिद्धैव
तिथितत्त्वेदेवीपुराणे सद्योहरणसद्बुद्धप्रतिष्ठाह्वानमेवच स्नपनंपूजनंचैवविसर्जनमतःपरम् हरोमहेश्वरश्चैवशूलपाणिः
पिनाकधृक् पशुपतिःशिवश्चैवमहादेवइतिक्रमः स्कांदे शुष्काण्यपिचपत्राणिश्रीवृक्षस्यनिवेदयेत् तत्रैवभविष्ये धत्तू

लिंगशालग्रामयोः ५ एतच्छिवलिंगविषयं· तत्रमद्ःश्राशास्योक्तेः ६

राम: २०२

हृदः १

द्वारकाचक्रम ६

चे२

माकुरि २ फालरि १

रकेस्तुयो लिंगं सहस्रं जपते नरः स गोलक्षफलं प्राप्य शिवलोके महीयते योगिनीतंत्रे शिवागारे भल्लकं च सूर्यागारे च शंखकम् दुर्गागारे
वंशवाद्यं मधुरीं च न वादयेत् आद्रहेमाद्रौ स्कान्दे स्फटिकरुद्रस्य निर्माल्यं सवासा आप्लुतः शुचिः प्रभाते पारिजाते क्रियासारे मध्यमा
नामिकामध्ये पुष्पं संगृह्य अंगुष्ठतर्जन्यग्राभ्यां निर्माल्यमपनोदयेत् अपनीतं च निर्माल्यं चण्डेशाय निवेदयेत् अशक्त्या मस्त
कलिंगे सदा कुर्वीत पूजकः शालग्रामे लिंगे वरं प्रासादपरित्यागः शिरसा वापि कर्त्तनम् न चैवाधूप्य भुञ्जीत शिवलिंगे महेश्वरम्
सूतके मृतके चैव न त्याज्यं शिवपूजनम् त्रिपिटके चैव लिंगे विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया पूजितोपि महादेवो न स्यात्तस्य फ
लप्रदः तस्मान्मृदापि कर्त्तव्यं ललाटे वै त्रिपुण्ड्रकम् रुद्राक्षधारणे विशेषः शिवरहस्ये एकवक्त्रः शिवः साक्षाद्ब्रह्महत्यां व्यपोहति अ
वध्यत्वं प्रतिष्ठां वह्निस्तम्भं करोति च द्विवक्त्रो हरगौरी स्यात् गोवधाद्यघनाशकृत् त्रिवक्त्रो ह्यग्निजन्माद्यपापराशिं प्रणाशयेत् च
तुर्वक्त्रः स्वयं ब्रह्मा नरहत्यां व्यपोहति पंचवक्त्रस्तु कालाग्निरगम्याभक्ष्यपापनुत् षड्वक्त्रस्तु गुहो ज्ञेयो भ्रूणहत्यादिनाशयेत् सप्तव
क्त्रस्त्वनन्तः स्यात् स्वर्णस्तेयादिपापहृत् विनायकोऽष्टवक्त्रः स्यात् सर्वानन्तविनाशकृत् भैरवो नववक्त्रस्तु शिवसायुज्यकारकः
दशवक्त्रः स्मृतो विष्णुर्भूतप्रेतभयापहः एकादशमुखो रुद्रो नानायज्ञफलप्रदः द्वादशास्यस्तथादित्यः सर्वरोगनिवर्हणः त्रयो
दशमुखः कामः सर्वकामफलप्रदः चतुर्दशास्यः श्रीकण्ठो वंशोद्धारकरः परः इति तथा विना मन्त्रेण यो धत्ते रुद्राक्षं भुवि मानवः
स याति नरकान् घोरान् यावदिन्द्राश्चतुर्दश पंचामृतं पंचगव्यं स्नानकाले प्रयोजयेत् रुद्राक्षस्य प्रतिष्ठायां मन्त्रं पंचाक्षरं तथा त्र्य
म्बकादिमन्त्रेण तथा तत्र प्रयोजयेत् यद्वा ॐ अघोरेभ्य इति मन्त्रेण धारयेत् तथा अष्टोत्तरशतं कार्यं चतुःपञ्चाशदेव वा सप्तविंशति
मानं वा ततो हीनाधमा स्मृता प्रजापतिः मोक्षार्थी पंचविंशत्या धनार्थी त्रिंशता जपेत् पुष्ट्यर्थी पंचविंशत्या पंचदशाभिचारके संतिमुखानिय
सप्तविंशतिरुद्राक्षमालया देहसंस्थया यत्करोति नरः पुण्यं सर्वं कोटिगुणं भवेत् यो ददाति द्विजेभ्यश्च रुद्राक्षं भुवि सन्मुखम् तस्य स्लिन ४
प्रीतो भवेद्रुद्रः स्वपदं च प्रयच्छतीति वोपदेवः रुद्राक्षान् कंठदेशे दशन ३२ परिमितान् मस्तके विंशती ४० षट् ६ षट् ६ कर्णप्रदेशे क
रयुगलकृते द्वादश १२ द्वादशैव १२ बाह्वोरिन्दोः कलाभिः १६ नयनयुगकृते ४ एक १ मेकं १ शिखायां वक्षस्यष्टोत्तरं यः कलयति शत
कं १०८ स स्वयं नीलकंठः तत्रैव हेमाद्रौ शिवधर्मे स्नानं पलशतं ज्ञेयमभ्यंगः पंचविंशतिः पलानां द्वे सहस्रे तु महास्नानं प्रकीर्ति

ॐ अघोरेभ्यः ॐ ह्रां ह्रीं नमस्ते रुद्ररूपेभ्यः स्वाहा अनेन ६

केशव॰ विष्णु॰ गोविंद॰ वामन॰ दामोदर॰ पद्मनाभि॰ हृषीकेश॰ उपेंद्र॰ प्रद्युम्न॰ जनार्दन॰ अच्युत॰ कृष्ण॰ मधुसूदन॰ माधव॰ त्रिविक्रम॰ नारायण॰
वासुदेव॰ अधोक्षज॰ नृसिंह॰ हरि॰ संकर्षण॰ अनिरुद्ध॰ श्रीधर॰ पुरुषोत्तम॰ ८

सर्वदेवमूर्त्तिनाम ४

नि॰ सिं॰ नम पंचविंशत्पलं लिंगे अभ्यंगं कारयेदथ शिवस्य सर्विधास्नानं प्रोक्तं पलशतेन च तावतामधुना चैव दध्ना चैव तथा पुनः तावतैव च क्षीरे
२०३ णगव्येन घृतेनतु ततः भूयः सार्द्धसहस्रेण पलानां मेक्षवेन च रसेन कारयेत्स्नानं भक्त्या चोष्णाम्बुना ततः विष्णवादीनुत्कादे क्षीरादष्टगुण
दध्नाज्ञ तेन दशोत्तरम् घृतादष्टगुणं साक्षौद्रं क्षौद्रादिक्षवजं तथा ग्राह्य देवानां प्रतिमा यत्र च जाम्यंग क्षमा भवेत् पलानि तत्र देयानि अ
ष्टयापंचविंशतिः इदं कोटीकृताभिप्रायेण तत्रैव सप्तग्रह विष्वक्सेनाय दातव्यं नैवेद्यस्य पृष्णांशकम् पादोदकं प्रसादं च लिंगे चंडेश्व
रायतु पंचायतनसंनिवेशमाह वोपदेवः पदार्थादर्शे शम्भो मध्यगते हरीनहरभूदव्याहरो शंकरे भास्वनागसुनाखो हरगणे
शाजाविकाः स्थापिताः देव्याविघ्नहरेभवक्त्ररवयोलंबोदरजेश्वरे नांवाः शंकरभागेतो नित्पमुखदा व्यस्तास्तुहानिप्रदाः शंकरभाग
तः ईशानकोणादारभ्य प्रदक्षिणामित्यर्थः अत्रदिक्तत्त्वरूपमुक्तं प्रयोगपारिजाते मंत्रशास्त्रे देवस्य मुखमारभ्य दिशं प्राचीं प्रकल्प देवमुखसंमुखी
ग येत् तदादिपरिवाराणामंगाद्यावरणस्थितिः अत्र क्रमः पाद्मे रविविनायकस्त्रराड्ईशाविष्णुस्तु पंचमः अनुक्रमेणाष्टज्यं तत्यु दिक्प्राचीतत्र्क
क्रमेणमहद्भयम् तथा पूज्यापूजकयोर्मध्ये प्राचीं प्राकामविचक्षणे अथ केशवादिमूर्त्तयः वोपदेवपदार्थादर्शे केविगोवादापु मरणान्याश्च ७
कृपपश्रज्ञोच्युतकृममात्रिनावाधान्हसानिश्रीपशाचगेविगिपच्चप अत्र केविइत्याद्येः केशवविष्णवादिचतुर्विंशतिमूर्त्तयोभिधीयंते
शातशंखान् चगाचक्रगदेज्ञेयइत्यर्थः शिष्टे भुजे पद्मं त्वर्थतः सिद्धम् अत्र दक्षिणोर्ध्वकरक्रमेण ज्ञेयम् दक्षिणोर्ध्वकरक्रमादि
तिहेमाद्रौवचनात् विशब्देन विपरीतं गचेइत्यर्थः अत्रापि शादित्यनुवृत्तिः शंखाब्जगदाचक्रेइत्यर्थः गपइत्यत्र शादित्यनुवर्तते श
खाब्जदात्यश्चइत्यर्थः विपरीते पद्मगदे अत्रापि शंखाब्जयेचपचक्रपद्मशंखाच्चक्रपद्मइत्यर्थः विइत्यत्रापि तेन शंखात्पश्च चते इत्य
र्थः तेनगपे इत्यष्टौ मूर्तयः चपइत्यत्र च अत्रेदं मूले हेमाद्रौ ज्ञेयम् अथ बौधायनसूत्रम् त्रैविक्रमीं चानुसृत्य लिंगार्चाप्रतिष्ठां व्याख्यास्यामः
यजमानः पूर्वोक्तकाले पूर्वेद्युर्द्वादशहस्तं द्वादशबाहुशान्यतरहस्तमंडपं कृत्वा तन्मध्ये हस्तमात्रे चतुरस्रकुंडं स्थंडिलं वा पूर्ववत्तो हस्तमात्रां वेदिं
नेत्रमतेन वास्तुमंडलं मध्यवेद्यां तदुपरि सर्वतोभद्रं चक्रं कृत्वा प्राणानायम्यास्यां मूर्तौ देवस्य सांनिध्यसिद्ध्यर्थं दीर्घायुर्लक्ष्मीसर्वका एम॰
मसमृद्ध्यक्षय्यसुखकामो ममुकमूर्तिप्रतिष्ठां करिष्य इति संकल्प्य गणेशपूजनपुण्याहवाचनमातृकापूजनानांदीश्राद्धानि कृत्वा २०३

पद्धतिं ४

	वै	कु
	नै	
		वा

चार्य्यचतुरोऋत्विजश्चवृत्वावस्त्राद्यैःपूजयेत् अथाचार्य्यो यदत्रसंस्थितमितिसर्षपान्विकीर्य्यापोहिष्ठेति कुशोदकेन भूमिं प्रोक्ष्य वाशद्दात्कृत्वापि २
देवाआयान्तुयातुधाना अपयान्तुविघ्नोदेवजयनंरक्षस्वेति भूमौ प्रादेशं कृत्वा समन्तात्तुलापरुतिमार्गेण मण्डपप्रतिष्ठां कृत्वा वा पं
चगव्यहिरण्ययवदूर्वाश्वत्थपलाशपर्णैरापोहिष्ठेतितिसृभिर्हिरण्यवर्णा इति चतसृभिः पवमानः सुवर्जन इत्यनुवाकेनाभिषि
च्याहृतिभिरिदंविष्णुरिति फलयवदूर्वाः समर्प्य रक्षोहणमिति हस्ते कंकणं बध्वा वाससाच्छाद्य अवतेहेड उदुत्तममिति जलेधि
वासयेत् इदंवोधायनोकम् ततश्चललिंगेऽर्चायां वात्राग्निं प्रतिष्ठाप्य गोक्षीरे नीवारचरुं कृत्वा आज्यभागान्ते पलाशोदुम्बराश्वत्थ
वटापामार्गसमिद्भिः आज्येनचरुणातिलैर्वा प्रत्येकमष्टाविंशतिमष्टौ वा कृत्वा लोकपालमूर्त्तिपतिभ्यो कृत्वा स्थाप्य देवमन्त्रेण
पूर्वोक्तसमित्तिलनैवारचवीज्यैरष्टसहस्रमष्टशतमष्टाविंशतिं वा कृत्वा अग्निर्यजुर्भिरित्यनुवाकेन दशाहुतीर्जुहुयात् प्रतिद्रव्य
होमान्ते देवपादनाभिशिरः सुस्पृशेत् आज्यहोमे चोत्तरतः सजलकुंभे संपातान्नयेत् तेषां मन्त्राः इन्द्रायेन्दोरितीन्द्रस्य स्योनेति पृथि
वीमूर्त्तेः अघोरेभ्य इति तत्पतेः शर्वस्य अग्न आयाहि अग्नेः अग्निं दूतमित्यग्निमूर्त्तेः नमः शर्वाय पशुपतेः यमाय सोमं यमस्य चपशुपतयेचेति ८
असिहिवीरेति यजमानमूर्त्तेः स्तुहि श्रुतं तं स्तोतरुग्रस्य असुन्वन्तं निर्ऋतेः आकृष्णेन सूर्यमूर्त्तेः यो रुद्रो अग्नौ इति तत्पते रुद्रस्य
इमंमेवरुणस्य शन्नोदेवीः जलमूर्त्तेः नमो भवायेति भवस्य आनो नियुद्भिः वायोः वात आवातु वायुमूर्त्तेः नमो ईशान तत्पते
रीशानस्य आप्यायस्व कुबेरस्य वयं सोम सोममूर्त्तेः तत्पुरुषायेति महादेवस्य अभित्वा ईशानस्य आदित्प्रत्नस्य रेतसः आकाश
स्य नम उग्रायेति तत्पतेर्भीमस्य ततो देवस्य पादौ स्पृशेत् एवं द्वितीये कृत्वा नाभिम् तृतीये मध्यम् चतुर्थे उरः पंचमे शिरः स्पृष्ट्वा
प्रतिपर्णाय संपातजलेन देवमभिषिंचेत् ततः स्विष्टकृदादि होमशेषं समाप्य अर्चां शोधयेत् स्थिरलिंगार्चादौ तु नेदानीमग्निस्थापनहो
मादिकार्य्यम् ततो देवं नत्वा स्वागतं देवदेवेश विश्वरूप नमोऽस्तु ते शुद्धिपित्वदधिष्ठाने शुद्धिकुम्भैः सरस्वतीमिति संप्रार्थ्य उत्तिष्ठ ब्र
ह्मणस्पते इति संस्मृत्य विगुणत्वाप्यपूर्वमकृते न्यूनतारणेऽधुनाकार्य्यम् अग्निः सप्तिमिति सूक्तमन्त्रपदहीनं पठित्वा तत्सहितं पु
नः पठेत् एवमष्टसहस्रमष्टशतमष्टाविंशतिं वा पठन् जलं पातयेत् ततोर्चां द्वादशवारं मृदाजलेन च प्रक्षाल्य समन्त्रवस्त्रचन्द

अधिवासनकाले ४

त्रि·सिं·
२०४

यं हुत्वा पयः पृथिव्यामा वो राजानमिति च संस्नाप्य आप्यायस्व दधिक्राव्णो तेजोसि मधु वाता आयं गौरिति पंचामृतैः संस्नाप्य लिंगे चेन्न
मस्ते रुद्र मन्यव इत्यष्टाभिः संस्नाप्य चेन्नाभ्यङ्गोद्वर्तनेनोद्वर्त्योष्णोदकेन प्रक्षाल्य गंधं दत्वा सम्पातोदकेनाभिषिच्य सपल्लवैश्चतुर्भिः
कुंभैरापो हि ष्ठेति त्रिभिराकलशेष्विति च प्रत्येकं समुद्रज्येष्ठेति चतुर्भिराकलशेष्विति चैभिर्मिलितैः संस्नाप्योदुंबरादिपीठे चामुं पूर्ववत् स्थाप्य पूरि
तोष्टदिक्षु सजलकुंभान्संस्थाप्य तेषु गंधपुष्पदूर्वाः क्षिप्त्वा घे सप्तमृदः द्वितीये पुष्करपर्णं समीविकंकताश्मंतकत्वच पल्लवाश्वत्थ ती
याद्विषु सप्तधान्यपंचरत्नफलपुष्पाणि कुशदूर्वारोचनाः सम्पातोदकं गंधफलसर्वौषधीः क्षिप्त्वा क्रमेणापो हि ष्ठेति त्रिभिर्हिरण्यवर्णा इति
चतुर्भिः पवमानानुवाकेन चाभिषिच्य ककुंभे शमीपलाशवटखदिरबिल्वाश्वत्थविकंकतपनसाम्रशिरीषोदुंबराणां पल्लवान्कषायांश्च क्षिप्त्वा
इत्यव स्वस्वयं इत्यभिषिच्य पंचरत्नोदकेन हिरण्यवर्णा इति संस्नाप्य वाससी दत्वोपवीतादिदीपांतं कृत्वा हिरण्यगर्भः यस्मान्न जातः यः प्राणतः य इमे
यन घोः यं क्रंदसी आपो ह यत् यश्चिदापा इत्यष्टाभिरष्टौ पानदत्वा सुवर्णशलाकया तेजसपात्रस्थं मधुघृतं च गृहीत्वा चित्रं देवानां तेजोसीति
मंत्राभ्यां ॐ नमो भगवते तुभ्यं शिवाय हरये नमः हिरण्यरेतसे विष्णो विश्वरूपाय ते नमः इति दक्षिणसव्ये देवनेत्रे मंत्राभ्यामालिखेत् अंजंति त्वां जने
न मधुना वा ङ् त्वा देवस्य त्वेति मध्वाज्यशर्कराभिरं त्वा तेनेवांजनेन पुनरंजनेन पुनरंजयेत् अभ्यानज्मीति शेषः स्थिरलिंगे तु स्वर्णसूच्या गंधेन
ॐ नमो भगवते रुद्राय हिरण्यरेतसे पराय परात्मने विश्वरूपायोमाप्रियाय ते नमः इत्यंजनादिनांजयेत् ततः आदर्शमस्या दर्शयेत् ततः क
र्ताचार्याय गामृत्विग्भ्यश्च दक्षिणां दद्यात् अथाचार्यः प्रत्यंचमादोषं प्रणवं वदन् पुरुषसूक्तेन स्तुत्वा वंशपात्रं पंचवर्णोदनेन नैवेद्यं नीराजनं का
रयित्वा रुद्राय चतुर्थ्यां दोहं दद्यात् मंत्रस्तु ॐ नमो रुद्राय सर्वज्ञनाथाधिपतये दीप्तस्थलधराय उमादयिताय विश्वाधिपतये रुद्राय वै नमो नमः
शिवमगर्हितकर्मास्तु स्वाहेति अश्वत्थपर्णीभूतेभ्यो नमः इति केचित् तत्राचार्यो स्थिरप्रतिष्ठायामिच्छति अथाचार्यः सर्वतोभद्रे देवानावाहयेत्
मध्ये ब्रह्माणं पूर्वादिदिक्षु इंद्रादिलोकपालान् ईशानेन्द्राद्यंतरालेषु वसून् रुद्रानादित्यानाश्विनौ विश्वान्देवान्पितॄन् नागान् स्कंदवृषौ
ब्रह्मेशानाद्यंतरालेषु दक्षविघ्नदुर्गास्वधाकारमृत्युरोगान् समुद्रान्सरितः मरुतः गणाधिपतिं चेति मध्ये एवं देवान् संस्थाप्य देवं चा
वाह्य प्राग्वादिवज्रशक्तिदंडखड्गपाशमंकुशगदात्रिशूलं तद्बाह्ये गौतमं भरद्वाजं विश्वामित्रं कश्यपं जमदग्निं वशिष्ठमत्रिमरुंधतीं च

रामः
२०४

बुद्धितः ४

नदाद्येन वस्त्रहान् नदाद्यैरैन्द्रीं कौमारीं ब्राह्मीं वाराहीं चामुण्डां वैष्णवीं माहेश्वरीं वैनायकीमिति एतानामभिरावाह्य संपूज्य प्राच्यां देवं तन्मन्त्रेण
वायुमण्डलमध्ये सर्वांगसुप्रतिष्ठो भवतीति निवेश्य सहस्रपद्मं सोममण्डलं देवानां नामभिः शिलाद्येन दशदलाकृतीं ऐशान्यां देवमारोप्य पुरुषसू
क्तेन रत्नाराधनान्यासं तत्त्वादेवन्यासं कुर्यात् यथा पुरुषात्मने नमः प्राणात्मने नमः प्रकृतितत्त्वात्मने नमः बुद्धितः अहंकारतः
मनस्तत्त्वेति सर्वांगे प्रकृतं हृदि शब्दतः शिरसि स्पर्शतः त्वचि रूपतः हृदि एवं रसगन्धश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादप
यूपस्थपृथिव्यप्तेजोवाय्वाकाशसत्त्वरजस्तमो देहतत्त्वानि विन्यसेत् ततः पुरुषसूक्तस्याद्यमन्त्रद्वयं करयोः तदुत्तरं जान्वोः तदुत्त
रं कट्योः तं जज्ञमिति तिस्रो नाभिहृत्कण्ठेषु तस्माद्विति द्वयं बाह्वोः ब्राह्मणोस्येति द्वयं नासयोः नाभ्या इति द्वयमक्ष्णोः अन्त्यां शि
रसि केचित्तत्त्वन्यासमन्यथाहुः पुरुषप्रकृतिमहदहंकारतत्त्वानि शब्दस्पर्शरूपरसगन्धतन्मात्राणि आकाशवायुतेजोऽप्पृथि
व्यः श्रोत्रत्वक्चक्षूरसनघ्राणवाक्पाणिपादपायूपस्थमनस्तत्त्वानीति केचिदेतानि स्थिरलिंगादावेवेच्छन्ति ततः सुखशायीभ
वेति शय्यायां देवं स्थापयित्वा मण्डलशय्ययोरन्तरालेन गन्तव्यमिति प्रवदत्वा मण्डलदेवतानां नामभिः पायसेन चरुणा वा बलीन्
दद्यात् नीवारचरुं प्रोक्षणादिबलिमिन्द्रे स्थिरप्रतिष्ठायाम् स्थिरलिंगार्चादौ त्वयं विशेषः अग्निस्थापनहोमवर्जं सर्वं पूर्ववत्
कृत्वा इदानीमग्निस्थापनं कृत्वा पूर्वोक्तहोमं कुर्यात् नात्र नीवारचरुः विष्णुसूक्तं सर्वं होमं कृत्वा पुरुषसूक्तेन प्रत्यृचमाज्यं कृत्वा
द विष्णुरिति पादौ स्पृष्ट्वा पुनस्तावत् एवं कृत्वा अतो देवा इति शिरः स्पृष्ट्वा पुनस्तावत् एवं कृत्वा पुरुषसूक्तेन सर्वांगं स्पृशेत् स्थिरलिंगं चेदग्नि
अग्निस्थापनादिपूर्ववत् समिदाज्यतिलाहुतीः कृत्वा प्रातः प्रभृति त्वनुवाकांते रुद्रायेति सहस्रमाणां तत्तनुवाकान्याज्यं च प्रत्यृचमाज्यं कृत्वा
सर्वो वै रुद्र इति मूलं स्पृशेत् पुनस्तावत् एवं कृत्वा कद्रुद्रायेति मध्यम् पुनस्तावत् एवं कृत्वा नमो हिरण्यबाहव इत्यग्रम् पुनस्तावत् एवं कृ
त्वा सर्वं रुद्रेण सर्वांगं स्पृशेत् ततो धामतः प्रतिपूर्णाहुतिं जुहुयान्नवा एवमधिवासनं कृत्वा परेद्युः सद्योवा पीठिकां स्नापयित्वा
महीमूषुवित्यावाद्यादिति घोरिति स्नुत्वा ऋक्षो नमइति सप्तभूयस्ते नैव पूर्णाहुतिं कृत्वा तिष्ठ ब्रह्मणस्पते इति देवमुत्थाप्य पुष्पांजलिं
दत्त्वा पुरुषसूक्तेन स्तुत्वा उत्थाप्य कनिक्रददिति सूक्तेन विष्णुं सद्योजातमिति पञ्चानुवाकैर्लिंगं गृहं प्रवेश्य पीठिकायां इत्या

नि·सिं० दिनामभिरष्टरत्नानि क्षिप्त्वा सप्तधान्यपञ्चपल्लवमनःशिलाः क्षिप्त्वा पायसेन संलिप्य प्रणवेनांगन्यासं कृत्वा सुवर्णशलाकामे
२०५ नरितां कृत्वा ॐ कुलये प्रतितिष्ठ परमेश्वरेत्युक्त्वा तो देवेति वि ह्नमु हृद्रेण च लिंगं स्थापयेत् ततः प्राणप्रतिष्ठा चलार्चायां स्वधिवा
सनानंतरे घुरुतित्रिब्रह्मणस्पत इति देवमुत्थाप्य पुरुषसूक्तो नरनारायणाभ्यां स्तुत्वा हृ नेत्री ह्रीं च रुं कृत्वा तद्देवतामन्त्रेण दशाहुतीर्हुत्वा
नामभिर्जुहुयात् अग्नये स्वाहा सोमाय· धन्वन्तरये· कुह्वै· अनुमत्यै· प्रजापतये· परमेष्ठिने· ब्राह्मणे· अग्नये· सोमाय·
अग्नये त्वोदाय· अग्नयेन्नपतये प्रजापतये· विश्वेभ्यो देवेभ्यः सर्वेभ्यो देवेभ्यः भूर्भुवः स्वः अग्नये स्विष्टकृते इति ततः सप्तनेपुन
स्त्वमाभ्यां सार्षाहुति ततः अचेयांया आवधी इति सवैविषधीः उत्तिष्ठेति देवमुत्थाप्य विश्वतश्चक्षुरित्युपस्थाय देवं ध्यात्वा जप
न ब्रह्मणे नमः एवं विष्णवे रुद्राय इंद्रादीनष्टौ वसुभ्यो रुद्रेभ्य आदित्येभ्यो श्विभ्यां मरुद्भ्यः कुबेराय गंगादिमहानदीभ्यो
सीबो माभ्यामिंद्राग्निभ्यां द्यावापृथिवीभ्यां धन्वन्तरये सवैश्रायपि विश्वेभ्यो देवेभ्यो ब्रह्मणे नमः इति ततः संपातोदकेन यज
मानमभिषिच्य देवं ध्यात्वा प्रतितिष्ठ परमेश्वरेति पुष्पाञ्जलिं निवेद्य सच्चिदानन्दब्रह्मैव भक्तानुग्रहाय गृहीतविग्रहकरचर
णाद्यवयवविनिशंखचक्राद्यायुधवंतं निजवाहनाद्युपेतं निजहृत्कमले वसिष्ठं सर्वलोकसाक्षिणं मरणीयासपरमेष्ठ
सिपरमात्मियगमयेति मंत्रेण पुष्पांजलावागतं विभाव्यार्चायां विन्यस्य प्राणप्रतिष्ठां कुर्यात् यथा प्राणप्रतिष्ठामंत्रस्य
ब्रह्मविष्णुरुद्रा ऋषयः ऋग्यजुःसामानि छन्दांसि क्रियामयवपुः प्राणाख्या देवता आं बीजं क्रों शक्तिः प्राणप्रतिष्ठायां विनि
योगः ततो ऽङ्गन्यासादीन् क्रमेण शिरोमुखहृदयगुह्यपादेषु विन्यस्य ॐ कं खं गं घं ङं अं पृथिव्यप्तेजोवाय्वाकाशात्मने आं हृद
याय नमः ॐ चं छं जं झं ञं इं शब्दस्पर्शरूपरसगंधात्मने इं शिरसे स्वाहा ॐ टं ठं डं ढं णं उं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने उं शिखायै ॐ तं थं दं
कु पाणिपादपायूपस्थात्मने ऐं कवचाय हुं ॐ पं· ॐ वचनादानविहरणोत्सर्गानंदात्मने औं नेत्रत्रयाय ॐ यं रं लं वं शं षं
सं हं लं क्षं च मनोबुध्यहंकारचित्तात्मने अः अस्त्राय फट् एवमात्मनि देवे च कृत्वा देवस्य पुरो जपेत् आं ह्रीं क्रों यं रं लं वं राम: २०५
शं षं सं हं सः देवस्य प्राणा इह प्राणाः ॐ आं· हंसः देवस्य जीव इह स्थितः ॐ आं हंसः देवस्य सर्वेन्द्रियाणि ॐ आं ह

सः देवस्य वाङ्मनश्चक्षुः श्रोत्रघ्राणप्राणा इहागत्य स्वस्त्येसुखेन सुचिरं तिष्ठन्तु स्वाहेति ततोर्चाहृदयं स्पृष्ट्वा जपेत् अस्य प्राणाः
प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च अस्य देवत्वमर्चायै मामहेति च कश्चनेति ततः प्रणवेन सरूपं सजीवं ध्यात्वा ध्रुवा द्यौरिति ऋचं
जप्त्वा करणागायत्रीं देवमन्त्रं च जप्त्वा पुरुषसूक्तेनोपस्थाय पादनाभिशिरः सुस्पृष्ट्वा इह वै धौति त्रिर्जपेत् ततः कर्त्ता स्वागतं देव दे
वेश मद्भाग्यात्त्वमिहागतः प्राकृतं त्वं मदृष्ट्वा मां बालवत्परिपालय धर्मार्थकामसिद्ध्यर्थं स्थिरो भव शुभाय नः सान्निध्यं तु स
दा देव स्वार्चायां परिकल्पय यावच्चन्द्रावनी सूर्या स्तिष्ठन्त्यप्रतिघातिनः तावत्त्वयात्र देवेश स्थेयं भक्तानुकंपया भगवन्देव देवेश
त्वं पिता सर्वदेहिनाम् येन रूपेण भगवंस्त्वया व्याप्तं चराचरम् तेन रूपेण देवेश स्वार्चायां सन्निधो भवेति नमेत् एतदन्तं सर्व
देवानां समानम् देवमन्त्रस्य मूलमन्त्रो वैदिको वा ग्राह्यः अथाचार्य्यः कर्त्ता वा लिंगमर्चां वा ॐ भूः पुरुषमावाहयामि ॐ भुवः ॐ
स्वः ॐ भूर्भुवः स्वः यामीत्यावाह्य प्रणवेनासनं दत्वा तेनैव दूर्वाश्यामाकविष्णुक्रान्तापद्मानिश्रपाद्यम् इमा आपः शिवतमाः
पूताः पूततमा मेध्या मेध्यतमा अमृतरसाः पाद्यास्ता जुषतां प्रतिगृह्यतां प्रतिगृह्णातु भगवान्महाविष्णुर्विष्णवे नमः इति पाद्यम्
भगवान्महादेवरुद्राय नमः इति लिंगे इमा आपः आचमनीयास्ता जुषतामित्याचमनीयम् एष अर्घः अर्घम् ततो वेदमन्त्रैः संस्नाप्य देवविष्णुरिति
विष्णोर्नमो अस्तु नीलग्रीवायेति लिंगे प्रतिसरं विन्यस्य इमे गंधाः शुभा दिव्याः सर्वगंधैरलंकृताः पूता ब्रह्मपवित्रेण पूताः सूर्यस्य
रश्मिभिः पूता इत्यादि एवं वक्ष्यति गंधम् इमं माल्यं इत्यादि इति माल्यम् इमे पुष्पा इति पुष्पम् वनस्पतिरसो धूपो गन्धाढ्यो धूप उत्त
मः आघ्रेयः सर्वभूतानां धूपोयं प्रतिगृह्यताम् प्रतिगृह्णातु इत्यादि धूपम् ज्योतिः शुक्रं च तेजश्च देवानां सततं प्रियः प्रभाकरः सर्व
भूतानां दीपोयं प्रतिगृह्यतामिति दीपम् दत्वा विष्णो संकर्षण वासुदेव प्रद्युम्नानिरुद्ध पुरुषोत्तमाधोक्षज नृसिंहाच्युत जनार्दनोपेन्द्र
हरि कृष्णेति द्वादशनामभिः पुष्पाणि समर्प्य तेनैव तर्प्पणं कृत्वा पायसं गुडोदनं चित्रोदनानि पवित्रं तेविततमिति मनेव घृतकृशर एवं
के नामभिः कृत्वा तेनैव शार्ङ्गिणं प्रियेसरस्वत्यै विष्णवे इति कृत्वा विष्णोर्नुकम् तदस्य प्रियं प्रतद्विष्णुः परो मात्रया विचक्रमे त्री
ण्येव इति जुहुयात् लिंगे तु दीपान्ते कृत्वा भवाय देवस्य शर्वाय ईशानाय पशुपतये रुद्राय उग्राय भीमाय महते देवाय नमः इति पु
ष्पाणि दत्वा तेनैव तर्प्पणं कृत्वा पवित्रेणेति पायसं गुडोदनं च निवेद्य पूर्वोक्तनामभिः कृशरं कृत्वा भवस्य देवस्य पत्न्यै स्वाहा

जलाभावात् ८ मात्रं कार्त्स्न्ये ७

नि०सिं० २०६ साघृष्ठभिर्गुडोदनं कृत्वा भवस्य देवस्य सुताय च स्वाहेत्याघेहि रिद्रोदनं कृत्वा त्र्यंबकम् मानो महान्तम् मानस्तोके आरात्तेगोघ्नं विकि
रिद्रविलोहितसहस्राणिसहस्रशो रुद्राद्दश एतैः कृत्वा शिवाय शंकराय सहमानाय शितिकंठाय कपर्दिने ताम्राय अरुणा
य अपगुरमाणाय हिरण्यबाहवे शष्पिंजराय बभ्लुशाय हिरण्यायेति च जुहुयात् ततः स्विष्टकृदादिहोमं समाप्य पूर्णा
सर्वहविर्भिर्बिंबे बलिं गायत्र्या च बलिं दद्यात् मंत्रस्तु त्वामेकमाद्यं पुरुषं पुरातनं नारायणं विश्वसृजं यजामहे त्वमेव यज्ञो विहितो विधेय
स्त्वमात्मनात्मन् प्रतिगृह्णीष्व हव्यमिति लिंगे तु नारायणपदे रुद्रं शिवमिति वदेत् ततोऽश्वत्थपर्णे भूर्भुवः स्वरोमिति कृतशेषबलि
धाय प्रदक्षिणीकृत्य विश्वभुजे सर्वभुजे आत्मने परमात्मने नमः इति नत्वाचार्याय शतं तदर्द्धं तदर्द्धं द्वादश तिस्र एकं वा गां दत्वा अ
न्येभ्योपि दक्षिणां दत्वा दश द्वादश वा विप्रान्भोजयेदिति संक्षेपः मासादमात्रेन्यूने तु मासात्कृजलाभावप्रतिष्ठाविधिमेव कुर्यात्
गोरुत्तारणपात्रीप्रक्षेपादि तु न भवति द्वारलोपात् वारुणहोमस्थाने वास्तुहोमः अन्यत्तु देव इति भट्टकमलाकरकृते लिंगार्चाप्र
तिष्ठाविधिः अथ पुनःप्रतिष्ठा तामधिकृत्य हयशीर्षपंचरात्रे चंडालमद्यस्पर्शदूषिता वज्रिणाथवा अपुण्यजनसंस्पृष्टा विप्रह
तजदूषिता संस्कार्येति शेषः पदार्थादर्शे ब्राह्मे खंडिते स्फुटिते दग्धे भ्रष्टे मानविवर्जिते यागहीने पशुस्पृष्टे पतिते दुष्टभूमिषु
अन्यमंत्रार्चिते चैव पतितस्पर्शदूषिते दशस्वेतेषु नो चक्रुः सन्निधानं दिवौकसः यागः पूजा पशुर्गर्दभादिः पंचरात्रे खंडितास्फु
टितादग्धाय स्मादर्चाभयावहा तस्मात्समुद्धरेत्तां तु पूर्वोक्तविधिना नरः अर्चाभिगादावुपवासः कार्यः नराज्ञोविघ्नमेवस्तीयात्तु
अर्चाविघ्नमेव तु यतिविनष्टधर्माणः सिद्धान्तशेखरे चौरचंडालपतितश्वोदक्यास्पर्शने सति शिवाद्युपहतौ चैव प्रतिष्ठा पुनराप्य पंचरात्रे रेत ६
अंगादंगादिसंधानप्रतिष्ठां पुनराचरेत् जलाधिवासविहितनेत्रोन्मीलनवर्जिताम् शुद्धिविवेके विष्णुः द्रव्यवत्कृतशौचानां देवतार्चानां
भूयः प्रतिष्ठापनेन शुद्धिरिति अर्चाः प्रतिमास्तद्द्रव्यस्य ताम्रादेः कृतशौचं कृत्वा पुनः प्रतिष्ठां कुर्यादित्यर्थः स्मृतिसारे एवम् तद्वि
धिर्बौधायनसूत्रे पूर्वप्रतिष्ठितस्याबुद्धिपूर्वमेकरात्रं द्विरात्रमेकमासं द्विमासं वार्चनादिविच्छेदे शूद्ररजस्वलाद्युपस्पर्शने जलाधिवा राम: २०५
सं कृत्वा कलशेन स्नापयेत् ततः पंचगव्येन तत्परं शुद्धोदकेन स्नापयेद्दश सहस्रमष्टशतमष्टाविंशतिं वा कलशैः पुरुषसूक्तेन ततः पु
ष्पाणि दत्वा गुडोदनं निवेदयेदिति बुद्धिपूर्वं तु विच्छेदे पूर्वोक्तां प्रतिष्ठां पुनः कुर्यात् पूर्वोक्तविष्णुवचनात् इदमलमासमुक्तास्ताद

शृगालादि ६

वापिकार्य्यमिति मदनरत्ने हेमाद्रौ च देवार्चाप्रासादभेदने प्रायश्चित्तंनुस्थलपाराणे काश्यपः वापीकूपारामसेतुसतडागवप्रदेवतायतनभेदने प्राय
श्चित्तं चनसत्त्वाकृतिं तु कुर्यात् इदं विष्णुमानस्तोके विष्णोः कर्माणि पादोस्य तियादेवतामुत्साद्य तितस्यै देवतायै ब्राह्मणान्भोजयेदिति श्रीखलि
खिते प्रतिमायां स कूपस्तम्भध्वजसेतुनिपातनभंगेषु तत्समुत्थानप्रतिमासम्प्रोक्ष्य शतं च निपातितनामिति समुच्छ्रानप्रतिक्रिया प्रतिसंस्का
रः पुनः प्रतिष्ठा अष्टशतं परार्द्धं तु अथ तेषु व्यर्थः अथ जीर्णोद्धारः सर्वलिंगादेर्दग्धे भग्ने चलिते वा कार्य्यः अथ वानादिसिद्धप्रतिष्ठितलिंगादे भ
गादिदुष्टे पुनकार्य्ये तत्र नु महाभिषेकं कुर्यादिति त्रिविक्रमः कर्त्ता मुकदेवस्य जीर्णोद्धारं करिष्ये इति तु सङ्कल्प्य पुण्याहवाचयित्वाचार्य्यमृत्विजश्च
वृत्वा लिंगे ॐ व्यापकेश्वरहृदयाय नमः ॐ व्यापकेश्वरशिरसे स्वाहेत्येवं षडंगं कृत्वा ऽघोरमन्त्रशतं जप्त्वाग्निप्रतिष्ठाप्याघोरेण घृततिलसर्षपैः
सहस्रं हुत्वेन्द्रादिभ्यो नाम्नाबलिं दत्वा जीर्णदेवं प्रणवेन संपूज्य ब्रह्मादिमण्डलदेवानां होमशेषं कृत्वा देवं प्रार्थयेत् जीर्णभग्नमिदं चैव
सर्वदोषावहं नृणाम् अस्योद्धारे कृते शान्तिः शास्त्रेस्मिन् कथिता त्वया जीर्णोद्धारविधानं च अतः परं शृणु हितावहम् तदधितिष्ठतादेवप्रहर
मितवान्नयेति ततः क्षीराज्यमधुदूर्वाभिः समिद्भिश्चाष्टोत्तरशतं देवमन्त्रेण हुत्वा सहस्रं च हुत्वा पायसेन शतं हुत्वा लिंगं प्रार्थयेत् लिं
गरूपं समागत्य येनेदं समधिष्ठितम् यायात्त्वं समतस्थानं सह पूज्यैव शिवाज्ञया अत्र स्थाने च या विद्या सर्वविद्येश्वरैर्युता शिवेन सह सं
तिष्ठति मन्त्रितजलेनाभिषिच्य विसर्जयेत् ततोस्त्रमन्त्रेण खनित्रेण खात्वा लिंगमादाय नघादौ वामदेवेन लिंगं प्रणवेन मूर्त्तिं क्षिपेत्
दारुजं तु मधुनाभ्यज्याघोरेण दहेत् हेमरत्नादिमयं तु दग्धं चलितं वा पुनस्तत्रैव स्थापयेत् ततः शान्त्यर्थमघोरेण तिलैः सहस्रं हु
त्वा प्रार्थयेत् भगवन् भूतभव्येश लोकनाथ जगत्पते जीर्णलिंगसमुद्धारः कृतस्त्वदाज्ञया मया अग्निना दारुजं दग्धं क्षिप्तं शैला
दिकं जले प्रायश्चित्ताय देवेश अघोरास्त्रेण तर्पितम् ज्ञानतोऽज्ञानतो वापि यथोक्तं न कृतं यदि तत्सर्वं पूर्णमेवास्तु त्वत्प्र
सादान्महेश्वरेति ततो यजमानः प्रार्थयेत् गोविप्रशिल्पिभूपानां माचार्य्यस्य च यज्वनः शान्तिर्भवतु देवेश अच्छिद्रं जायतामि
दम् मूर्त्तौ तु विशेषः त्वत्प्रसादेन निर्विघ्नं देहं निर्मापयत्यसौ वासं कुरु सुरश्रेष्ठ तावत्त्वं बालके गृहे वसलोकांसहितस्त्वं हे मूर्त्तिर्वै नव पूर्व
वत् यावत्कारयते भक्तः कुरु तस्य च वाञ्छितमिति ततो नवां मूर्त्तिं लिंगं वा कृत्वोक्तविधिना स्थापयेत् मूलं च अग्निपुराणे स्पष्टम् इति जी
र्णोद्धारः अथ तुलसीग्रहणम् देवजाज्ञिककृते स्मृतिसारे वैधृतौ च व्यतीपाते भौमभार्गवभानुषु पर्वद्वये च संक्रान्तौ द्वादश्यां

स्तकद्वये तुलसीं ये विचिन्वंति ते छिंदंति हरेः शिरः विष्णुधर्मोत्तरे रविवारं विना दूर्वां तुलसीं द्वादशीं विना जीवितस्याविनाशाय प्रविचि
न्वीत धर्मवित् तथा संक्रांतावर्कपक्षांते द्वादश्यां निशि संध्ययोः ये छिंदंति तुलसीपत्रं ते छिंदंति हरेर्मस्तकम् पाद्मे द्वादश्यां तु
लसीपत्रं धात्रीपत्रं च कार्त्तिके लुनाति स नरो गच्छेन्निरयानतिगर्हितान् रुद्रयामले द्वादश्यां च दिवास्वापस्तुलस्यवचयस्त
था विष्णोश्चैव दिवास्नानं वर्जनीयं सदा बुधैः विष्णुधर्मे न छिंद्यात्तुलसीं विप्रो द्वादश्यां वैष्णवः क्वचित् देवार्थं तुलसीच्छेदो
होमार्थं समिधां तथा इंदुक्षये न दुष्येत गवार्थं तु तृणस्य च अहरणमंत्रस्तु पाद्मे तुलस्यमृतनामासि सदा त्वं केशवप्रिये केशवा
र्थं विचिन्वामि वरदा भव शोभने इति पारिजाते दक्षः समित्पुष्पकुशादीनां द्वितीयः प्रहरो मतः अथ पुष्पादेः पर्युषितत्वम् भा
र्गवार्चनभविष्ये अहरतिक्ष्णते ज्ञातीकरवीरमहर्निशम् तुलस्या विल्वपत्रेषु सर्वेषु च जलेषु च न पर्युषितदोषोस्ति मालाका
रगृहेपि च कह्लारदीपे वर्ज्यं पर्युषितं पुष्पं वर्ज्यं पर्युषितं जलम् न वर्ज्यं तुलसीपत्रं न वर्ज्यं जाह्नवीजलम् तत्रैव पाद्मे तुलसी
पर्युषिता नैव विल्वं तु त्रिदिनावधि पद्मं पंचदिनान्त्याज्यं शेषं पर्युषितं विदुः स्कांदे पालाशं दिनमेकं तु पंकजं च दिनत्रयम्
पंचाहं विल्वपत्रं च दशाहं तुलसीदलम् पदार्थादर्शे वायवीये अन्यथाह विल्वापामार्गजातीतुलसीशमीशताकेतकीभृंगदू
र्वामद्र्भोजाद्दिर्भीमुनिततेलनगरवृक्षकह्लारमल्ली चंपाशोरातिकुंभीदमनमरुवकाविल्वतोऽह्नानिशस्ता त्रिंश ३० अर्क ३
कार्त्तिके इति ६ शा १२ दधि ४ निधि ९ वसु ८ भू १ भू १ यमा २ भूय एवम् अस्यार्थः शता शतावरी मदः मंदारः अहिर्नागकेसरः
मुनिरगस्त्यः अश्वारातिः करवीरः कुंभी पाटलेति कदेवनिर्बुंदुः अर्कः षट् ईशा एकादश उदधयश्चत्वारः निधयो नव
वसवोष्टौ भू एका यमौ द्वौ विल्वमारभ्याहिपर्यंतं गणयित्वा दर्भमारभ्य पुनस्त्रिंशदादिगण्यायेदित्यर्थः एतद्दिनोत्तरं पर्यु
षितानीत्यर्थः दोऽयन्नं देस्कांदे मदनमुपक्रम्य तस्य माला भगवतः परमप्रीतिकारिणी शुष्का पर्युषिता वापि न दुष्टा भवति
क्वचित् तिथितत्वे मात्स्ये विल्वपत्रं च माध्यं च तमालामलकीदलम् कह्लारं तुलसी चैव तु पद्मं च मुनिपुष्पकम् एतत्पर्युषितं न
स्यात् कुशांश्च कलिकास्तथा स्मृतिसारावल्याम् जलजानां च सर्वेषां पत्राणां महतस्य च कुशपुष्पस्य रजतसुवर्णकृतयोरपि

नवर्षसुविततदोषोऽस्ति नीर्यतोयस्यचैवहि मुकुलैर्नार्चयेद्देवं चंपकैर्नलजैर्विना अथ शिवनिर्माल्यनिर्णयः सिद्धांतशेखरे धराहिरण्यगोर
त्नताम्ररौप्यांशुकादिकान् विहाय शंभोर्निर्माल्यं चण्डेशाय निवेदयेत् अन्यद्दत्वादि पानीयं ताम्बूलं गंधपुष्पकम् दद्याच्चंडाय नि
र्माल्यं शिवभुक्तं तु सर्वशः आचार्यशिवचण्डनामाज्ञाभंगेन तु लक्षकम् धनस्य भक्षणे तेषां पादेन लक्षमीरितम् निर्माल्यभक्षि
ते लक्षपादतः शुद्धिरीरिता दाने च भक्षणे समं तद्दूनं तदुपेक्षणे अकामाद्भक्षणे यद्वा निर्माल्यस्य जपेत्सुधीः ब्रह्मपंचकसाह
स्रमेकेन सहितं ततः कामतो भक्षणे दीक्षा प्रायश्चित्तं न चान्यतः निर्माल्यलंघने घोरं प्रजपेदयुतं ततः स्पर्शेऽप्यलंघने सम्यक् क्रि
याभक्षणे न च स्मृत्यर्थसारेपि शैवसौरनिर्माल्यनैवेद्यभक्षणे चान्द्रम् अभ्यासे द्विगुणम् मत्याभ्यासे पतनम् अन्ये निर्माल्यप्य
नापद्येवमिति इदं च ज्योतिर्लिंगादिव्यतिरिक्तविषयम् तथा च पुरुषार्थप्रबोधे भविष्ये ज्योतिर्लिंगं विनालिंगेषु यः ह्यजयुतिसत्तमः
तस्य नैवेद्यनिर्माल्यभक्षणात्तप्तकृच्छ्रकम् शालग्रामोद्भवे लिंगे बाणलिंगे स्वयंभुवि रसलिंगे तथार्षे च सुरसिद्धप्रतिष्ठिते हृदय
चंद्रकान्ते च स्वर्णरूप्यादिनिर्मिते शिवदीक्षावता भक्तेनेदं भक्ष्यमितीष्यते तथा बाणलिंगे स्वयंभूते चंद्रकान्ते हृदि स्थिते चान्द्रा
यणसमं ज्ञेयं शंभोर्नैवेद्यभक्षणम् लिंगे स्वयंभुवे बाणे रत्नजे रसनिर्मिते सिद्धप्रतिष्ठिते चैव न चण्डाधिकृतिर्भवेत् यत्र च
ह्यधिकारोऽस्ति तद्भोक्तव्यं न मानवैः चण्डाधिकारो नायत्र भोक्तव्यं तत्र भक्तितः त्रैविक्रम्याम् बाणलिंगे च लोहे च सिद्धलिंगे स्वयंभु
वि प्रतिमासु च सर्वासु न चण्डोऽधिकृतो भवेत् अत्र ब्रह्महापि शुचिर्भूत्वा निर्माल्यं यस्तु धारयेत् तस्य पापं महच्छीघ्रं नाशयिष्यम
हाव्रते इति स्कान्दात् शुचिना न ग्राह्यं शिवनिर्माल्यं किंतु स्नात्वेति स्मार्ताः अनर्पणीतेनेन ग्राह्यमिति श्रीदत्तः शिवदीक्षाहीनेन ग्रा
ह्यमिति शैवाः निर्णीतं त्वेह माद्योपरि शिष्टे अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं जलं फलम् शालग्रामशिलासंगात्सर्वं याति पवित्रता
मु पंचायतनपूजायां तत्रैव निवेदनमित्यर्थः शिवपुराणे यथैव भद्रशापिताः शिवभक्तिपराङ्मुखाः शंभोरन्यत्र देवपुयुभ
क्तायेन दीक्षिताः तेषामनर्हमीशस्य तत्प्रसादचतुष्टयम् काशीखण्डे जलस्य धारणं मूर्ध्नि विश्वेशस्नानजन्मनः एषजालधा
राबंधः समस्तसुखवल्लभः तथा स्नापयित्वा विधानेन यो लिंगस्नपनोदकम् त्रिः पिबेत्त्रिविधं पापं तस्येहाशु विनश्यति लिं

नि॰ सिं॰ २०८

गरलपनवाभिर्य्यः कुर्यान्मूर्द्ध्नि सेचनम् गंगास्नानफलं तस्य जायते ऽत्र विपाप्मनः इदं पूर्ववाक्यावशाद्धुस्वेश्वरविषयमिति केचिन
काशीस्थपुराणात्रसिद्धसर्वलिंगप्रसिद्धसर्वलिंगविषयम् काशीखण्डे रत्नेश्वरप्रस्तावे तथैव दर्शनादित्यन्ये अथ कृषिः राजमा
र्त्तण्डः अश्लेषार्द्रा रपोहस्त्वेहस्तवमघामूलोत्तराधाश्विनीप्राजापत्यकरह्निद्वैवतगुरूप्रालेयपादे पुच निर्द्दिष्टं कर्षणे हलैश्च सुमनोमा
लाभिरभ्यर्च्य नैवेद्यं त्वा क्षेत्रपतेर्बलिं हलेऽधरः क्षेत्रं ततः कर्षयेत् प्राजेशश्रवणोत्तरादितिमघामार्तण्डतिष्याश्विनीपौष्णानुरा
मरीचयः शतभिषक्स्वातीविशाखास्तथा जीवार्केन्दुसितेन्दुनंदनदिने लग्ने च सौम्योदये सस्यानां वपने तथैव लवने शस्ता स
या राजपरो चंडेश्वरः हस्तचित्रादितिस्वातीरेवतीसाश्रवणत्रये स्थिरलग्ने गुरोर्वारे बीजं धार्य्यं तत्प्रक्रियोः ॐ धनदाय सर्वलो
काहिताय देहि मे धान्यं स्वाहा लेखयित्वाऽमुं मन्त्रं धान्यागारे निधापयेत् सस्यवृद्धिपरा कुर्यात् पूजिता प्रतिपूजयेत् दक्षिणादि
क्रमेणागमनं गमनं नमभिनवासु नारीषु अयमपि सस्यधनीनां नवधान्यधवासरे कुर्य्युः शनिवारश्च नो कार्यो धनधान्यव्ययावु
धेः अथ वस्त्रम् श्रीपतिः रोहिणीषु करपंचके श्रुभेत्युत्तरासु च पुनर्वसुद्वये रेवतीषु वसुदैवते च भेनव्यवस्त्रपरिधानमिष्य
ते जीर्णं रवौ सततमम्बुभिरार्द्रमिंदौ भौमे च चेद्बुधदिने तु भवेद्धनाय ज्ञानाय मंत्रिणि भृगोः प्रियसंगमाय मंदे मलाय च न वा व
स्त्रधारणं स्यात् रोहिणीगुरुपुनर्वसूत्तरेया विभर्त्ति नववस्त्रभूषणम् सानुयाति दवलेवतेपतिं स्नानमाचरति वारुरोगप्रिया
अथालंकारवलयादि दैवज्ञवल्लभः नासत्यपुष्यवसुभिः करपंचकेन मार्त्तण्डभौमगुरुदानवमंत्रिवारे मुक्तासुवर्णमणिवि
द्रुमशंखदंतरक्ताम्बराणि विधृतानि भवन्ति सिद्ध्यै ज्योतिर्निबन्धे हस्तानुराधमृगपुष्यधनिष्ठयुक्ते चित्रोत्तरासु च पुनर्वसुरो
हिणीषु लग्ने स्थिरे रविसुतेन्दुजजीववारे हेमादिधारणविधिः कथितो नराणाम् तत्रैव श्रीपतिः पौष्णाश्विनीवसुकरादिषु पंच
मेषु कौसुंभहेममणिविद्रुमकाचशंखाः नार्यो धृताः सुतसुखार्थकरा भवंति ब्राह्मोत्तरादितिगुरुष्वसुखाय भर्त्तुः तत्रैव श्री
स्वादिवररत्नानि सुप्याद्युत्तरासु च रोहिण्यां चैव वर्ज्यानि याज्ञस्तु जीवितकांक्षिणी अथ सूचीकर्म वासवादितिमत्स्याश्वमे
त्रचंद्राश्विनीषु च सूचीकर्म तनुत्राणमभिजित्क्षे प्रशस्यते अथ शय्या हस्तादिपंचब्रह्मगुरूत्तराणि पौष्णाश्विमूलेन्दुभविष्णु

राम: २०८

वारेषु जीवेंदुसितेंदुजानां शुभ्यास समारंभणमुत्तमं स्यात् अथ शस्त्रधारणम् पुष्ये चादितिचित्रपौष्णतनयेशक्रोत्तरा रेवतीस्वातीवा
जिविशाखमित्रसहिते भानौ गुरौ भार्गवे कुंभे कीटगृहे वृषे मृगपतौ चेद्गौ शुभैर्वीक्षिते सन्नाहः शरखड्गकुंतछुरिका धार्या नृपाणां
हिताः अथ स्वामिसेवा चंडेश्वरः रोहिणीपुनर्वपौष्णमैत्रध्रुववासववारुणयोरपि सेवेत स्वामिनं भृत्यः शुभवारोदये तथा ज्योतिर्निब
न्धे दासीदासादिभृत्यानां कुर्यात्संग्रहणं बुधे स्थिरलग्ने शुभे ह्वे मंदवारे विशेषतः अथ गजाश्वदोलाः सएव पौष्णप्रजे
शादितिमघ्यानिहस्तादियुग्मश्रवणोत्तराणि दोलादिमातंगतुरंगमाणामारोहणे भीष्टफलप्रदानि अथ नृत्यम् हस्तः
पुष्यो वासवं रोहिणी च ज्येष्ठा पौष्णं वारुणं चोत्तराश्च पूर्वाचार्यैः कीर्तितश्च नृत्यारंभे शोभनोयं भवर्गः अथ राज
दर्शनम् श्रीपतिः मृगाश्विनितिष्यश्रवणश्रविष्ठाहस्तध्रुवं चाप्यनुभानि मैत्रे गणाः प्रोक्तानि नरेश्वराणां विलोकने भा
निशुभप्रदानि अथ क्रयविक्रयौ भाद्रद्वयत्रिदशमत्रिदिवाकरेषु मूलानिलोत्तरतुरंगमरेवतीषु शाङ्गपाणिरजनीक
रमैत्रभेषु लाभः सदैव भवति क्रयविक्रयाभ्याम् वस्त्रं तु चित्राशतभिषास्वातीरेवतीचाश्विनीशुभा श्रवणश्च तथा प्रो
क्ता वस्त्राणां क्रयणे शुभः अथ सेतुः स्वातीयुक्ते मंदवारे च बलस्थे शुभे दिने सेतुं नावं धनं कार्यं ध्रुवमेवार्कजीवयोः अथ
पशुकृत्यम् श्रीपतिः चित्रोत्तरावैष्णवरोहिणीषु चतुर्दशीदर्शदिनाष्टमीषु स्यान्न प्रवेशं गमनं विदध्यात्पशूनामनूना
न कदाचिदेव चंडेश्वरः हस्तमूलविशाखासु रेवत्याश्वयुजे तथा मैत्रे च वारुणे श्रेष्ठं पशुक्रयणमुच्यते पूर्वात्रयाग्नि
नमघयमकृत्ताश्लेषु हद्रादित्यवाजिवसुवारुणशाक्रेषु एतेषु गोमहिषवृदतुरंगमादिनानाप्रकारपशुजातिगतिः प्रश
स्ता अथ गजदंतच्छेदः ज्योतिर्निबन्धे त्वाष्ट्रे वैष्णवे चाश्विन्यामादित्ये वसुदैवते इति नागभदकर्म पुष्ये हस्ते च कीर्तित
म् अथ निक्षेपः भरणीत्रीणि पूर्वाणि आर्द्राश्लेषा मघा तथा चित्राज्येष्ठाविशाखा च मूलं मृगपुनर्वसू एषु दत्तं प्रयुक्तं च
यन्निक्षिप्तं धनम् एष्यतो धावमानस्य धनिनो नोपपद्यते अथ ऋणमोक्षः श्रीधरः वागीशमंददिवसांशकलग्न
युक्ते रिक्तासु मंददिवसे कुलिकोदये च मैत्रद्वितीयपदमैत्रमुहूर्तयुक्ते एष्ठफमे च ऋणमोक्षमुशंति संतः अथ राजमुद्रा

नि॰सिं॰ २०९

मृदुध्रुवक्षिप्रचरे सुभे सुयोगे प्रशस्ते शनिचंद्रवर्ज्यम् वारे तिथौ पूर्णजयाह्वये च मुद्राप्रतिष्ठाम् भरणाहिराज्ञाम् अथ नौः चण्डेश्वरः
पौष्णाश्विनीतुरगवारुणमित्रचित्राशीतोष्णरश्मिवसवोनलवन्त्यमूर्ति वारे च जीवभृगुनंदनके प्रशस्ते नौकादिसंघटनवाहनमपु
कुर्यात् अथ पभोगः गुरुभरविभानुरंध्राविधानपौष्णाश्विरोहिणीषु स्यात् स्वात्युत्तरासु कुर्यात् पनाशनभोगभोगादि अथ श्म
श्रुकर्म श्रीपतिः पुष्यपौष्णे चाश्विनीष्वैंदवे च शक्रे हस्तादित्रिके भेष्वदितासाम् क्षौरकार्यमुक्तं सवादित्रेये च मुक्ताभौमादित्यपानि
शिवारान् नस्नातभुक्तो नकूटभूषितानाम् अभ्यक्तयात्रासमरोत्सुकानाम् क्षौरं विदध्यान्निशिसंध्ययोर्वा रिक्तो विष्टयां नवमे न चा क्षौरात ५
ह्नि त्रिस्थलीसेतौ वृद्धगार्ग्यः रव्यारसौरवारेषु रात्रौ पातेऽथ मृताहनि श्राद्धाह प्रतिपद्रिक्ताभद्राः क्षौरेषु वर्जयेत् गार्ग्यः षष्ठ्यमाष्ट
म्यौ मा पात चतुर्दश्यष्टमीं तथा आसु सन्निहितं पापं तैलमांसे भगे क्षुरे राजमार्तण्डः देवकार्ये पितुः श्राद्धे रवेरंशपरिक्षये
क्षौरकर्म न कुर्वीत जन्ममासे च जन्मभे बृहस्पतिः राजकार्यनियुक्तानां नराणां भूपजीविनाम् श्मश्रुलोमनखच्छेदे नास्ति का
लविशोधनम् तथा क्षौरं नैमित्तिककार्ये निषेधेष्वपि ध्रुवम् पित्रादिमृतदीक्षासु प्रायश्चित्ते च तीर्थके केचित्तु नारदमस्य थापि
ति सुरगुरुस्य निषेधेपि कर्तनं नतु विधीयते इति नारदः नृपविप्राज्ञया यज्ञे मरणे बंधमोक्षणे उद्वाहे खिलवारर्क्षतिथिषु
क्षौरमिष्यते मृ भारते प्राङ्मुखः श्मश्रुकर्माणि कारयीत समाहितः उदङ्मुखो वाथ भूत्वा तथायुर्विन्दते महत् अपरार्के उ
दङ्मुखः प्राङ्मुखो वा वापनं कारयेत्सुधीः केशश्मश्रुलोमनखान्युदकसंस्थाने निवापयेत् दक्षिणं कर्णमारभ्य धर्मार्थं वापयेत्
लये शिखाद्यं नवसंस्कारे शिखाघं तं शिरो वपेत् यतीनामनुविशेषोऽनिगमे कक्षोपस्थशिखावर्जमृतुसंधिषु वापयेदिति अन्यपि
विधिप्रतिषेधाः प्रागुक्ताः अथ धनसंग्रहः मृतलानिलार्कमैत्रमूलत्रिपूर्वरौद्रपौष्णमानुराधगुरुविष्णुविशाखयुक्ते वारे कुजार्कभृ
गुनंदनसोमजानां श्रेष्ठं धनस्य करणं भवति प्रशस्तम् अथ नवान्नम् श्रीपतिः रेवतीश्रुतिपुनर्वसुहस्तब्राह्मनः पैष्णवापि
हितेषु वा अनुत्तरेषु गदितं पृथुकानां प्राशनं नवनवान्नविधानम् अथ नवभोजनपात्रम् ज्योतिर्निबंधे भोज्यपात्रं सुधाभि राम: २०९
धौ वृद्धये हस्तसमाहरेत् तत्रान्नप्राशनप्रोक्तकाले भोजनमाचरेत् अथ नवपर्णफलादिभक्षणम् चंडेश्वरः मूलाश्विमैत्र
चंद्रे२

बुध २ सूर्य्यभुज्यमाननक्षत्रात् २ प्रतिग्रहं सूर्य्यादिक्रमेण २

करतिष्यहस्तेंदुमेषुपोष्णोत्तरेंदवपुनर्वसुवासवेषु वारेषुभूमितनयार्कजवारवर्ज्जे तांबूलनूतनफलाघशनं हिताय अथहोमेग्न्याकु
तिपातः ज्योतिषे नरणिविद्गुभास्करे चंद्रमाः कुजसुरेज्यविधुंतुदकेतवः रविभतोदिनभेगणयेत्क्रमात्त्रितिखेगत्रितयत्रितयत्रयं
सत् दिनकरार्किनमः कुजकेतवोकृतभुजोनशुभास्त्वितरेशुभाः दहनेचक्रमिदंप्रविलोक्यताहवनकर्मणिसर्वसमृद्धये अथशांति
स्नानविदमुधर्मे क्रूरग्रहमुखेचैव संजाते हवनेशुभे शांतिंविधायगोदघान्नास्तरणायकुर्द्विने आयसींप्रतिमाकृत्वानिक्षिपेत्ताम
धोमुखीम् गोमूत्रेमधुगंधाघैरर्च्चितांप्रतिमांततः स्वस्थानेनिधायसंपूज्यतत्रहोमोविधीयते अत्रापवादःक्रियासारे नित्येनैमित्ति
केदुर्गाहोमादौनविचारयेत् अथज्वरादिफलम् श्रीपतिः स्वात्पस्त्रेषार्द्राएवासुभात्त्के रोगोत्पत्तिर्जायतेयस्यपुंसः तन्नैवज्ञेया
एतोनिःप्रयत्नः स्यादुग्धाब्धेर्लब्धजन्मापिवैद्यः व्याध्युत्पत्तिर्यस्यपौष्णमैत्रेप्राणत्राणंजायतेयस्यकष्टात् वैश्वेसौम्येरोग
मुक्तिस्तुमासाद्विंशत्यांस्याद्वासराणांमघासु पक्षाद्धस्तेवासवेसद्धिदेवे मूलाश्विन्योरग्निधिष्ण्येनवाहात् याम्येत्वाष्ट्रेवैष्णवेवारुणेच
नरुज्यंस्यान्नूनमेकादशाहात् आहिर्बुध्न्येतिष्यसंज्ञेयमाख्येप्राजापत्यादित्यधोःसप्तरात्रात् ज्योतिषे एकाहोनिधनंदशाहम
निलाय५वारुणाय५वियत्पर्वता७ सप्त७का८विलयश्चमासयुगलंमासाम्रतिःपत्रकः द्वौमासावर्यविंशतिर्द्दशनिशाःपक्षांतप अंतोनाशः८
क्षोनखा२०मासोपक्षदशांतपक्षककुभः१०पीडादिनान्यश्विभात् देवज्ञः उरगवरुणरौद्रावासवेंद्रत्रिपूर्वायमदहनविशाखापा
पवारेणयुक्ता तिथिषुनवमिषष्ठीद्वादशीवाचतुर्थीभवतिमरणयोगोरोगिणांकालहेतुः अत्रकुंभेहमीनक्षत्रदेवताप्रतिमां
संपूज्यद्वादशदलेषुसकर्णरणादिद्वादशमूर्तीर्द्विदशादित्यानुवासरपूज्यदूर्वासमित्तिलक्षीराज्यैर्गायत्र्याचदेवतायैअष्टोत्तरशतं
कृत्वादध्योदनेनबलिंदत्वाचार्यायगांप्रतिमांचदत्वाविप्रान्भोजयेदितिसंक्षेपः विशेषस्तुव्रतहेमाद्रौपदार्थादर्शेचज्ञेयः अथभैष
ज्यम् चंडेश्वरः मूलानुराधमृगतिष्यपुनर्वसौचपौष्णाश्विनीश्रवणशक्रकरत्रयेच वारेषुवाक्पतिसितेंदुदिनेप्रशस्तंभैषज्य
भक्षणमनामयहितंनराणाम् अथारोग्यस्नानम् श्रीपतिः इंद्वर्कारेंभार्गवेचध्रुवेषुसार्पादित्यस्वातियुक्तेषुभेषु पैत्र्येचांत्येवा
पिकुर्यान्नकदाचित्स्नानंरोगनिर्मुक्तजंतुः चरेविलग्नेरविभौमवासरेरिक्तेतिथौस्याद्यदुलेचपक्षे धिष्ण्येचरेरोगनिपीडिता

श्राद्धे जन्मदिने चैव नियमेन तथा प्रोषितभर्तृका व्यतीपाते च संक्रांतौ नंदाभूताष्टपर्वसु तैलं क्षौरं रतिं मांसं दंतकाष्ठं विवर्जयेत् २

नि॰ सिं॰ २१० नांस्नानं नराणां निरुज्ञत्वकारि अथ दंतधावनम् पृथ्वीचंद्रोदये विष्णुः प्रतिपद्दर्शषष्ठीषु चतुर्दश्यष्टमीषु च नवम्यां भानुवारे च दंतकाष्ठं विवर्जयेत्
नारदः चतुर्दश्यष्टमी पौर्णमासीसंक्रमणेषु च नंदासु च नवम्यां च दन्तकाष्ठं विवर्जयेत् वसिष्ठः शन्यर्कशुक्रवारेषु कुजाह्वे जन्मवासरे जन्माहश्रा
द्धदिवसे दंतकाष्ठं विवर्जयेत् हेमाद्रौ स्कांदे असंगे जलधिस्नाने दंतधावनमैथुने जाते च निधने चैव तत्कालव्यापिनी तिथिः संवर्तः रवौ वि
वाहश्राद्धे चैव वर्जयेद्दंतधावनम् व्यासः अलाभे दंतकाष्ठानां निषिद्धायां तथा तिथौ अपां द्वादशगंडूषैर्विदध्याद्दंतधावनम् अथामलकस्ना
नम् व्यासः श्रीकामः सर्वदा स्नानं कुर्वीतामलकैर्नरः सप्तमीं नवमीं चैव पर्वकालं विवर्जयेत् चंद्रसूर्योपरागे च स्नानमामलकैस्त्यजेत् क्रतुः
षष्ठी च सप्तमी चैव नवमी च त्रयोदशी संक्रांतौ रविवारे च स्नानमामलकैस्त्यजेत् यत्तु नवमी दशमी चैव तृतीया च त्रयोदशी प्रतिपद्दार्दिपूर्णि
न॰ मास्यास्नानं तासु विवर्जयेत् यच्च दर्शे स्नानं कुर्वीत मातापित्रोस्तु जीवतोः पुत्रः कुर्वन्शिरश्चैष्टपित्रोरुन्नतिजीविते इति कारावमाघे स्नान
मात्रनिषिद्धम् तन्नागार्धस्नानपरं न नित्यनैमित्तिकमिति हेमाद्रिः अथ तैलनिषेधः कात्यायनः पक्षादौ च रवौ षष्ठ्यां रिक्तायां च तत
या तिथौ तैलेनाभ्यज्यमानस्तु चतुर्भिः परिहीयते गर्गः पंचदश्यां चतुर्दश्यामष्टम्यां रविसंक्रमे द्वादश्यां सप्तमीषष्ठ्योस्तैलस्पर्शं
विवर्जयेत् न च कुर्यात्तृतीयायां त्रयोदश्यां तिथौ तथा शाश्वतीं गतिमन्विच्छन्दशम्यामपि पीडितः तत्रैवायुर्वेदे षष्ठ्यादिनक्षये
ष्टम्यामेकादश्यां च पर्वसु द्वादश्यां च चतुर्दश्यां पंचम्यां प्रतिथौ व्रते श्राद्धदिने जन्मत्रितये श्रवणार्द्रयोः ज्येष्ठोत्तराफाल्गुनीषु व्यतीपा
ते च वैधृतौ विष्टियोगे च संक्रांतौ मन्वादिषु युगादिषु नाभ्यंगस्तत्र बालानां वृद्धानां तु न दोषकृदिति व्यवहारतत्त्वे संक्रांतिमद्राव्यति
पातवैधृतौ षष्ठ्यष्टमीपर्वसु नार्कभूसुते स्नाने द्वितीयादशमी च गर्हिताः षष्ठ्यादिमो घारदधावनेऽधमाः अस्यापवादमाह तत्रैव
प्रचेताः सार्षपं गंधतैलं च यत्तैलं पुष्पवासितम् अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन आयुर्वेदे निषिद्धतिथिवारर्क्षेष्वहरहोष्वपि
रात्रिषु किंचित्क्षाद्यतयुक्तं वा विप्रपादरजोन्वितम् मा नो दूर्वान्वितं भौमे भृगु कं पुष्पयुग्गुरौ सर्वेषां सर्वदा तैलमभ्यंगेषु न दुष्यति
मंगलस्नानप्रदेशः माङ्गल्यविघ्ने स्नाने वह्निपूर्वोत्सवेषु च स्नेहमात्रसमायुक्तमभ्यांगात्माकृतं नदिष्यते इति मदनपारिजाते
कात्यायनोक्तेः हेमाद्रौ वृहन्मनुः तैलाभ्यंगो नार्कवारे न भौमे नो संक्रांतौ वैधृतौ विष्टिषष्ठ्योः पर्वस्वष्टम्यां न चेष्टः स दृष्टः प्रोक्ता राम: २१०
न्मुन्क्तावासरे सूर्यसूनोः तिलस्नाननिषेधस्तु षड्विंशन्मते तथा सप्तम्यमावास्यासंक्रांतिग्रहजन्मसु धनपुत्रकलत्रार्थी ति

तिप८

तुला ४

मार्ग २ मार्गपौषेच ३ कर्क ७

लपिंडं न संस्पृशेत् अथ गृहारंभः ज्योतिर्निबंधे वादरायणः वैशाखे फाल्गुने पौषे श्रावणे मार्गशीर्षके सूत्रारंभः शिलान्यासः स्तंभा
रंभः प्रशस्यते नारदः सौम्यफाल्गुनवैशाखमाघश्रावणकार्तिकाः मासाः स्युर्गृहनिर्माणे पुत्रारोग्यधनप्रदाः ज्योतिस्तत्त्वे पूर्वापरा
फाल्गुन २ स्यतु नभोन्त्यपौषे याम्योत्तरास्यसहसद्वितीये कार्यं गृहं जीवबुधर्क्षगार्के नीचास्तगाजीवसितौ च हित्वा रत्नमालायाम् कर्कनक्रह
रिकुंभगतेऽर्के पूर्वपश्चिममुखानि गृहाणि तौलिमेषवृषवृश्चिकयाते दक्षिणोत्तरमुखानि वदंति दैवज्ञवल्लभः शाके धान्यपंच
तानिः प्रशस्तं स्वामिने स्वं संगरं भृत्यनाशनम् स्वश्री प्राप्तिं वह्निभीतिं चलक्ष्मीं कुर्युश्च त्वाद्याद्यगृहारंभकाले गर्गः श्रुत्तरामृगरोहिणी
पुष्यमैत्रकरत्रये धनिष्ठाद्वितये पौष्णे गृहारंभः प्रशस्यते रोहिण्याश्रवणात्र्यदितिपुष्ये हस्तत्रये मूलके रेवत्युत्तरफाल्गुनीमृग
मैत्रोत्तराषाढयोः शस्तो वास्तुकुजार्कवर्जितदिने गोकुंभसिंहे सुखे कन्यायां मिथुने नभः शुचिसहोराधोर्जके फाल्गुने व्यवहा
रसारे शिलान्यासः प्रकर्तव्यो गृहाणां श्रवणे मृगे पौष्णे हस्ते च रोहिण्यां पुष्याश्विन्युत्तरात्रये वास्तुप्रदीपे अथो मुखेर्भैर्विदधीत खात
पायोर्ध शिलास्तथैवोर्ध्वमुखेश्च पट्टम् तिर्यङ्मुखैर्द्वारकपाटयानं गृहप्रवेशो मृदुभिर्ध्रुवैश्च लल्लः स्नानं च पाकं शयनं च भोज्यं गजा
लयं वाजिगृहं धनस्य देवस्य पूर्वादि दिशि क्रमेण मध्ये सभा भूपनिवेशनाय शिल्पिशास्त्रे कन्यासिंहतुलायां भुजगपतिमुख
शंभुकोणेऽग्निखातं वायव्ये स्यात्तदास्यं चलिधनमकरे ईशखातं वदंति कुंभे मीने च मेषे खनिऋतिदिशि मुखं खातवायव्यकोणे
चाग्नेः कोणे मुखं वै वृषमिथुनगते कर्कटे रक्षःखातम् तत्त्वचिंतामणौ यत्र देवगृहादीनां द्वात्रिंशद्धस्ततोऽधिकम् नतत्र चिंत
येद्धीमान्युगणानायव्ययादिकान् राजमार्तंडः आयव्ययौ मासशुद्धिं न गणयेत्तृणगारेन चिंतयेत् शिलान्यासादिनौ कुर्यात्तथागारे प्र
शतने व्यवहारतत्त्वे निषिद्धेष्वपि कालेषु स्वानुकूलेषु भे दिने तृणकाष्ठगृहारंभे मासदोषो न विद्यते चंडेश्वरः पूर्णादिवष्ठ
मीं यावत्पूर्वास्यं वर्जयेद्गृहम् उत्तरास्यं न कुर्वीत नवम्यादि चतुर्दशीम् अमावास्यादिषष्ठीं यावत्पश्चिमास्यं विवर्जयेत् नवम्यादितथा
याम्यास्यां वत्कृष्णा च चतुर्दशी ध्रुवं दृष्ट्वाथ वास्तुत्वाकर्तव्यं वास्तुरोपणम् सायाह्नवर्जे दिवसे रात्रौ त्यक्त्वा महानिशाम् वराहः द
क्षिणपूर्वे कोणे कृत्वा पूजां शिलान्यसेत् प्रथमाम् शेषाः प्रदक्षिणेन स्तंभाश्चैवं समुत्थाप्याः अथ गृहप्रवेशः बृहस्पतिः
नंदायां दक्षिणद्वारं भद्रायां पश्चिमेन तु जयायामुत्तरद्वारं पूर्णायां पूर्वतो विशेत् वशिष्ठः कृत्वाग्रतः पृष्ठतो वामतोऽर्कं विशान्

नैर्ऋते ७

सूर्य्यदैवत्यलग्ने ३

सुप्रानन्तरं पूर्णकुंभम् हर्म्यरम्यं तोरणास्रग्वितानैः स्त्रीभिः स्त्रग्वीगीतवाद्यविशेषैश्च प्रवहारतन्त्रे सौम्यायने श्रावणमार्गपौषवर्ज्ज
न्मर्क्षलग्नोपचयोदयांशे वामगत्या कुंभं गृहवास्तुपूजां कृत्वा विशेद्गृहमभंकृतं शुद्धम् वास्तुशास्त्रे लग्नात्माणादितो दिक्षु द्वादशराशीन्
योजयेत् एकमेकत्र सत्कोणे सूर्य्यं वामं विचिन्तयेत् वशिष्ठः चंद्रजार्य सितवासरेषु तु श्रीकरसुतमहार्थलाभदम् सूर्य्यसूनुदिवसे
स्थिरप्रदं किं तु चौरभयमत्र निर्दिशेत् रत्नकोशे उत्तरो धनिष्ठाम्र द्रुवारुणो वस्वायुभुवर्क्षैस्त्रिषु चोत्तरासु अक्षीणचंद्रे शुभदो नृप
स्य तिथावरिक्ते च गृहप्रवेशः नारदः प्रवेशो मध्यमो ज्ञेयः सौम्यकार्त्तिकमासयोः माघफाल्गुनवैशाखज्येष्ठमासेषु शोभनः अ
कपाटमनाच्छिन्नमदत्तबलिभोजनम् गृहं न प्रविशेद्धीमानापदामाकरं हितत् प्रवेशश्च वास्तुपूजां कृत्वा कार्य्यः जीर्णे द्वारे तथो
द्याने तथा गृहनिवेशने नवप्रासादभवने प्रासादपरिवर्त्तने द्वाराभिवर्त्तने तद्वत्प्रासादेषु गृहेषु च वास्तूपशमनं कुर्यात्पूर्वमेव विच
क्षणः इति मात्स्योक्तेः तत्रैव कृत्वाग्रतो द्विजवरानथ पूर्णकुंभं दध्यक्षताम्रदलपुष्पफलोपशोभम् दत्वा हिरण्यवसनानि तथा द्वि
जेभ्यो मांगल्यशांतिनिलयं स्वगृहं विशेच्च गृह्योक्तहोमविधिना बलिहोमं कुर्यात्प्रासादवास्तुशमने च विधिर्य्य उक्तः संतर्पयेद्द्विजव
रानथ भक्ष्यभोज्यैः शुक्लाम्बरः स्वभवनं प्रविशेत्स्वरूपम् अथ कलिवर्ज्यानि बृहन्नारदीये समुद्रयातुः स्वीकारः कमंडलुविधार
त्तिकपिलस्तथा छिन्नोष्ठशिश्नछिन्नलिंगश्च नैव केतनमर्हति छिन्नः पित्रोर्वंशे त्रिपुरुषविच्छिन्नवेदाग्निः हेमाद्रौ मरीचिः
अविद्धकर्णः कृम्यश्च लंबकर्णस्तथैव च वर्जनीयाः प्रयत्नेन ब्राह्मणाः श्राद्धकर्मणि ब्राह्मे मूकश्वपूतिनासश्च छिन्नाग्रना
धिकांगुलिः गलरोगी च गण्डमालस्फुटितांगश्च सज्वरः षण्ढत्वरमदाश्च श्राद्धे वर्जयेत् लंबकर्णं चाह तत्रैव गो
भिलः हनुमूलादयः कर्णो लंबो नु परिकीर्तितः अंगुलो द्व्यंगुलोऽशस्तावितिशातातपोऽब्रवीत् चंद्रिकायां यमः अंगुलातीत
कर्णश्च भुंजते पितरो न तु षण्ढश्चात्र चंद्रिकोक्तः सप्तविधो याद्यः यथा षण्ढको वातजः ष्यंठः पंडः क्लीबो नपुंसकः कील
कश्चेति सप्तैवं क्लीबभेदाः प्रकीर्तिताः पराशरमाधवीये तु चतुर्दशविध उक्तः तेषां स्वरूपाणि तत्रैव ज्ञेयानि चंद्रिकायां शा
तातपः अग्निष्टोमादिभिर्जीर्णैर्यजंते स्वल्पदक्षिणैः तेषामन्नं न भोक्तव्यमपांक्तास्ते प्रकीर्तिताः एतच्चाशक्तौ सत्यामत्र
पराके भारते अव्रती कितवस्तेनः प्राणिविक्रयकोऽपि पश्चात्प्रतीतवान्सोमसोपिके न न महति श्राद्धदीपकलिकायां यमः
अपत्नीकश्च वर्ज्यः स्यात्सपत्नीकोप्यनग्निकः तत्रैवाश्वलायनः प्रतिमाविक्रयी यो वै करोति पतितस्तु सः जीवनार्थंप
रास्थ्योनिधुन्वातीर्थं प्रयाति यः माता पित्रोर्विना ग्रोपि पतितः परिकीर्तितः तत्रैव जातूकर्ण्यः यत्र मातुलयोर्ग्राहियत्र
प४ वार्द्धुषिपतिः श्राद्धं न गच्छेत्तद्विप्राः कृतं यत्र निरामिषम् पितापुत्रौ भ्रातरौ द्वौ निरग्नि गुर्विणीपतिम् सगोत्रप्रवरं चैव
श्राद्धेषु परिवर्जयेत् कल्हारदेवे शंखचक्रं मुद्राय स्तु कुर्यात्तप्तायसेन वा सशूद्रवद्बहिः कार्यः सर्वस्माद्द्विजकर्मणः
शंखचक्राद्यंकनं च गीतनृत्यादिकं तथा एकजातेरयं धर्मो न जातु स्याद्द्विजन्मनः तेन यत्तप्तमुद्रादिविधयस्ते शूद्रवि राम:
षया इति पृथ्वीचंद्रादयः शिवकेशवयोरंकान् शूलचक्रादिकान् द्विजः न धारयेत मतिमान्वैदिके वर्त्मनि स्थितः स्याश्व २२२

वा॰७ न॰१

लायनोक्तेश्च नत्वेवं चोदरायचर्ये निषिद्धमिति श्रीधरस्वामी अन्येपि निषेधानिदं येषुक्तेयाहुरिति दिक् अत्र विप्राणां ग्राह्यत्वोक्त्यैव तद्वर्जानां
निषेधे सिद्धे पुनर्वर्ज्यपरिगणनं निषिद्धवर्जनैर्गुणप्राप्त्यर्थमिति विज्ञानेश्वरः कुण्डिकारणादेरपवादो हेमाद्रौ वशिष्ठः अपि चेन्मंत्र
विद्युक्तः शारीरैः पंक्तिदूषणैः अदूष्यं तं यमः प्राह पंक्तिपावन एव सः क्वचिद्विप्राणां जातिमात्रेण ग्राह्यत्वमुक्तं चन्द्रिकायां मात्स्ये
यदि पुत्रो गयां गच्छेत् कदाचित्कालपर्य्ययात् तानेव भोजयेद्विप्रान् ब्राह्मणा ये प्रकल्पिताः ब्रह्मणा कृतसंस्थाना विप्रा ब्रह्म
समाः स्मृताः अमानुषा गयाविप्रा ब्रह्मणा ये प्रकल्पिताः तेषु तुष्टेषु संतुष्टाः पितृभिः सह देवताः तत्रैव न विचार्य्यं कुलं शील
विद्या च तप एव च पूजितैस्तैस्तु संतुष्टा देवाः सपितृगुह्यकाः गयायां निर्गुणा अपि तत्र एव भोज्या इति हेमाद्रिः अक्षयवटश्रा
द्धे एवं तन्नियमो नान्यत्रेति त्रिस्थलीसेतौ पितामहचरणाः पृथ्वीचन्द्रोदयेपि पाद्मे तीर्थेषु ब्राह्मणं नैव परीक्षेत कदाचन
अन्नार्थिनमनुप्राप्तं भोज्यं तं मनुरब्रवीत् स्कांदेपि ब्राह्मणान्न परीक्षेत तीर्थक्षेत्रनिवासिनः मनुः न ब्राह्मणं परीक्षेत दै
वकर्मणि धर्मवित् पित्र्ये कर्मणि तु प्राप्ते परीक्षेत प्रयत्नतः असंभवपरमेतदिति मेधातिथिः हेमाद्रौ व्यासः गायत्रीसा
रमात्रोपि वरं विप्रः सुयंत्रितः नायंत्रितश्चतुर्वेदी सर्वाशी सर्वविक्रयी कारणः कूटाश्च कुण्डाश्च मंठाश्च दरिद्रा व्याधितास्तथा
सर्वे श्राद्धे नियोक्तव्या मिश्रिता वेदपारगैः अथ विप्रनिमंत्रणम् चन्द्रिकायां वाराहे वस्त्रशौचादि कर्तव्यं श्वः कर्तास्मीति
जानता स्थानोपलेपनं कृत्वा ततो विप्रान्निमंत्रयेत् दंतकाष्ठं च विसृजेद्ब्रह्मचारी शुचिर्भवेत् तत्रैव प्रचेताः दक्षिणं चरणं
विप्रः सव्यं वै क्षत्रियस्तथा पादावादाय वैश्यो द्वौ शूद्रः प्रणतिपूर्वकम् बृहस्पतिः उपवीती ततो भूत्वा देवार्थं तु द्विजोत्तमान्
अपसव्येन पित्र्ये च स्वयं शिष्योथवा सुतः प्रचेताः सवर्णं प्रेषयेदाप्तं द्विजानां तु निमंत्रणे पृथ्वीचंद्रोदये स्कांदे यज्ञकार्ये नियु
क्तस्य वै धान्यग्रहवर्जितः व्यसनेषु च सर्वेषु श्राद्धं विप्रेण कारयेत् चन्द्रिकायां यमः अभोज्यं ब्राह्मणस्यान्नं वृषलेन निमंत्रि
तम् तथैव वृषलस्यान्नं ब्राह्मणेन निमंत्रितम् तत्रैव पैठीनसिः सप्त पंच च द्वौ वा श्रोत्रियान्निमंत्रयेत् आश्वलायनसूत्रे
एकैकमेकैकस्य द्वौ द्वौ त्रीन्त्रीन्वा वृद्धौ फलभूयस्त्वं त्वविनिवृद्धिश्राद्धे गौतमः नवावरान्भोजयेदयुजो वा यथोत्साहम् याज्ञ

स्वाचारनिरतैः ८
आधिक्यं १

ब्राह्मणेभ्यो दद्याद्भक्षयति श्राद्धभुक् प्रातरुत्थायेति ६
नवचेतेऽवरेचनान १ अयुग्मान् १

एकब्राह्मणश्राद्धम् ८ पित्रादीनां विश्वेदेवाभिन्नास्तथामातामहादीनां तत्रैणवेभयेषाम् १

प्राङ्मुखौ १ त्रयएकैकं वा १ तदेवं

नि॰ सि॰ २२३ वस्त्वा: द्वौदैवे प्राक् त्रय: पित्र्ये उदगेकैकमेव वा मातामहानामप्येवं तन्त्रं वा वैश्वदेविकम् दीपकलिकायां पराशर: संपन्नामप्येप

त्राणामेकैकस्य त्रयस्त्रय: पित्रादेर्ब्राह्मणा: प्रोक्ता श्चत्वारो वैश्वदेविके वृद्धयाज्ञवल्क्य: दशैकं पञ्च वा विप्रान्सार्वैर्णेणे विनियोज

येत् अत्र वैश्वदेवे द्वौ चतुरो वोपवेश्य पित्रादीनामेकैकस्य स्थाने एकं त्रीन् पञ्च सप्त नव वोपवेशयेदिति निष्कृष्टोऽर्थ: मनु: द्वौदै

वे पितृकृत्ये त्रीनेकैकमुभयत्र वा भोजयेत्सुसमृद्धोपि न प्रसज्जेत विस्तरे सत्क्रियां देशकालौ च शौचं ब्राह्मणसंपदम् पं

चैतान्विस्तरो हन्ति तस्मान्नेहेत विस्तरम् पृथ्वीचन्द्रोदये शातातप: द्वौ दैवे पूर्वेणेण विप्रा प्राङ्मुखावुपवेशयेत् पित्र्ये तूदङ्मुखां

स्त्रीन्बह्वृचाध्वर्युसामगान् अपरशाकोहमाद्रौ देवल: एकेनापि हि विप्रेण षट्पिण्डश्राद्धमाचरेत् षडर्घ्यान्दापयेत्तत्र षड्भ्यो द

द्यात्तथा हवि: गोभिल: यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत् अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य च देवतायतने कृत्वा तत: श्रा

द्धं समाचरेत् प्रास्येदग्नौ तदन्नं तु दद्याद्वा ब्रह्मचारिणे एतच्च सपिण्डीकरणवर्ज्यं ज्ञेयम् नन्वेवं सर्वेषां कामम नाद्यश्चेत्यास्व

लायनोक्ते: अस्यार्थ उक्तो नारायणवृत्तौ आद्यसपिण्डीकरणवर्ज्येषु सर्वश्राद्धेषु कामं त्वयाणमेकं भोजयेत् सपिण्डीकर

णे तु नियतं त्रिभिर्भवितव्यमिति अनाद्यपार्वणवर्जिते वा अभोजने आमहेमश्राद्धादौ वा अभाव एवेति व्याख्यांतरं तत्रैव ज्ञे श्राद्धसंपदभावे ८

यम् कारिकापि दैवपित्र्यथवैकैकं सपिण्डीकरणं विनेति अत्र कश्चिद्विशेषमाह पृथ्वीचन्द्रोदये प्रचेता: एकस्मिन्ब्रा

ब्राह्मणस्थाने ६ ह्मणे दैवे सार्गे रम्नि र्भवेत्सदा अनन्ते: कुशमुष्टि: स्याच्छ्राद्धकर्मणि सर्वत: सर्वथा विप्रालाभे तत्रैव हेमाद्रौ च सत्यव्रत:

निधाय दर्भनिचयमासनेषु समाहित: प्रैषानुप्रैष्यसंयुक्तं सर्वं श्राद्धं प्रकल्पयेत् अत्रौनत्यभावात्सत्रेङ्ग्वत्विक्कार्ययय यतीनपि संभोज्य द

जमानविधौ न दक्षिणेति केचित् तन्न अहर्च्छ्याया: दक्षिणाया: प्राप्ते: सर्वं तिष्ठिज्जेद्दत्तुं यत्तु श्राद्धमदक्षिणमितिपाञ्चा क्षिणान्यस्मै देय

त् विदध्याद्धौत्रमन्यश्चेद्दक्षिणार्द्धहरो भवेत् स्वयं चेदुभयं कुर्यादन्यस्मै प्रतिपादयेदिति छन्दोगपरिशिष्टाच्च एवं यतिश्राद्धे मिर्थ: ३

पि कात्यायन: ऊर्ज्जवस्तु निमुष्टाच स्तम्भेदर्भवद्बोनतथा दर्भसंख्यानविहिता विष्टरास्तरणेषु च मातृश्राद्धे तु विप्रालाभे तु एम: २२३

वासिन्यापि भोजनीयाइत्याहापरार्केद्वृद्धवसिष्ठ: मातृश्राद्धे तु विप्राणामलाभे पूजयेदपि पतिपुत्रान्विता भव्यायोषितो

होतु: कर्म ३ हौत्रमाध्वर्यवं च ३ नस्त्राद्यं भोज्यमस्मिन्नित्यनाद्यं तस्मिन् ८ पित्रादित्रयनिमित्तम् ६

स्वयमेव ५ रक्षसि ४ यथा सत्र संज्ञेयागे ऋत्विक्कार्य्यं यजमान: करोति ३

दक्षिणार्थिनाऽर्थिना न क्रियमाणाया अननेरर्च्छ्यस्याभावात् ५

केतनंनिमंत्रणंगृह्णीयाच्छ्राद्धे समर्थः सन्नस्त्रपक्रामेत्तन्नभोक्ता भवेत्

अगोत्रानर्थवरान् ५

ब्दोकुलोद्भवाद्भूति अब्दावितिकढिश्राद्धविषयम् पाद्मेउत्तरखण्डे सकृदभ्यर्चितंलिंगंशालग्रामशिलांचयः पीठेसंस्थापयित्वा नुश्राद्धंचकुरुतेनरः पितरस्तस्यतिष्ठंतिकल्पकोटिशतंदिवि चंद्रिकायांमात्स्ये पठन्तिमस्यनियमान्श्रावयेत्सत्कान्बुधः अक्रोधनैःशौचपरैःसततंब्रह्मचारिभिः भवितव्यंभवद्भिश्चमयाचश्राद्धकारिणा यत्तुमनुः सर्वायासविनिर्मुक्तैःकामक्रोधविवर्जितैः भवितव्यंभवद्भिर्नःश्वोभूतेश्राद्धकर्मणीतितत्पूर्वेद्युर्निमंत्रणपरंनतद्वहः तत्रैवदेवलः असंभवेपरेद्युर्वाब्राह्मणांस्तान्निमंत्रयेत् अक्रोधनैःशौचपरैःसततंब्रह्मचारिभिः कात्यायनः अनिघ्नेनिमंत्रितोनोपक्रामेत्केतनंगृहीतश्राद्धः

अथश्राद्धकर्तृभोक्तृनियमाः तत्रनिमंत्रितविप्रत्यागेपराशरेयमः केतनंकारयित्वातुयोनिपातयतिद्विजम् ब्रह्महत्यामवाप्नोतिशूद्रयोनौचजायते आमंत्र्यब्राह्मणंयस्तुयथान्यायंनपूजयेत् अतिकृच्छ्रासुघोरासुतिर्यग्योनिषुजायते प्रमादत्यागेतुहारीतः प्रमादाद्विस्मृतंज्ञात्वाप्रसादनप्रयत्नतः तर्पयित्वायथान्यायंसर्वंतत्फलमश्नुते प्रमादाभावेतुनारायणः एतस्मिन्नेनसिप्राप्तेब्राह्मणोनियतःशुचिः यतिचांद्रायणंकृत्वातस्मात्पापात्प्रमुच्यते यमः आमंत्रितस्तुयोविप्रोभोक्तुमन्यत्रगच्छति नरकाणांशतंगत्वाचांडालेष्वभिजायते तत्रैवदेवलः पूर्वंनिमंत्रितोन्यत्रनकुर्यादन्यस्यप्रतिग्रहम् भुक्त्वाहारोऽथवाभुंक्तेसुकृतंतस्यनश्यति यदितिप्राविलवतनदोनमादित्यपुराणे आमंत्रितश्चिरंनैवकुर्याद्विप्रःकदाचन देवतानांपितॄणांचदातुरन्नस्यचैवहि चिरकारीभवेद्द्रोहीपच्यतेनरकाग्निना पृथ्वीचंद्रोदयेयमः निमंत्रितस्तुयोविप्रोह्यध्वानंयातिदुर्मतिः भवंतिपितरस्तस्यतंमासंपांसुभोजनाः आमंत्रितस्तुयःश्राद्धेभारमुद्वहतेद्विजः पितरस्तस्यतंमासंभवंतिस्वेदभोजनाः आमंत्रितस्तुयःश्राद्धेसान्निध्यंकुरुतेद्विजः तंमासंपितरस्तस्यभवंतिरुधिराशनाः शंखः निमंत्रितस्तुयःश्राद्धेमैथुनंसेवतेद्विजः श्राद्धंदत्वाचभुक्त्वाचयुक्तःस्यान्मैथुनेनसः मैथुनंचकृतंतावापिनिषिद्धम् ऋतुकालेनियुक्तोवानैवगच्छेत्स्वयंक्वचित् तत्रगच्छन्नवाप्नोतिघ्नानिष्टानिफलानिचितितत्रैवमोधवीयचकदमनत्रुःश्राद्धंकरिष्यन्कृत्वावाभुक्त्वावापिनिमंत्रितः उपोष्यचतथाभुक्त्वानोपयाच्चश्रुतानावपिविवर्जयेदितितत्रैवाश्वलायनोक्तेश्च विज्ञानेश्वरेणतुश्राद्धेऽतौगच्छेत्तापिनदोषइत्युक्तम्

निमंत्रितस्तुयःश्राद्धेप्रकुर्यात्कलहंद्विजः भवंतिपितरस्तस्यतंमासंमलभोजनाः ५ संतानार्थंनियुक्तोनगच्छेत्स्वयमपिनगच्छेत ३

पारणंकृत्वा १

एकादश्यादौ २

भोक्ष्यन्करिष्यन्सेः श्राद्धंपूर्वेणत्रोप्रयत्नतः भवार्यभोजनंवापिस्त्रतानां

निमंत्रणश्राद्धदिनयोरित्यर्थः १ सप्तम्यर्थे द्वितीया ६

नि॰ सिं॰ २२४
नतयतिकालेज्ञेयम् वृहस्पतिः द्विनिर्शं ब्रह्मचारी स्यात् श्राद्धकृद्ब्राह्मणैः सह अन्यथा वर्त्तमानौतु स्यातां निरयगामिनौ पुनर्भोजन
मध्वानं भारमायासमैथुने श्राद्धकृच्छ्राद्धभुक्चैव सर्वमेतद्विवर्जयेत् स्वाध्यायं कलहं चैव दिवास्वापं तथैव च यत्तु श्राद्धकालि
कायां पुराणसमुच्चये कृत्वा तु रुधिरस्रावं विद्वान् श्राद्धं माचरेत् एकं द्वे त्रीणि वा विद्वान् दिनानि परिवर्जयेदिति तन्निमं
त्रणम् इच्छ्यावैद्यादयेष्टमः पुनर्भोजनमध्वानं भारमध्ययनं मैथुनम् संध्यां प्रतिग्रहं होमं श्राद्धभोक्ताष्टवर्जयेत् संध्या नि
षेधः प्रायश्चित्तानूर्वज्ञेयः यथाहोशना दशकृत्वः पिवेदापो गायत्र्या श्राद्धभुग्द्विजः ततः संध्यामुपासीत जपेच्च जुहु
यादपि गौडास्तु सायसंध्यापरान्नं च छेदनं चैव नस्यतेः अमावास्यां न कुर्वीत रात्रिभोजनमेव च धूतं च कलहं चैव सा
यसंध्यादिवाशयनम् श्राद्धकर्त्ता च भोक्ता च पुनर्भुक्तं च वर्जयेदिति कामधेनौ वराहपुराणे: कर्त्तुरपि सायंसंध्या निषेधमा
हुः शिष्टास्तु निर्मूलत्वमाहुः होमनिषेधस्तु स्वाविषयः सूतके च प्रवासे च अशक्तौ श्राद्धभोजने एवमादिनिमित्तेषु हो
वयेन्न तु हापयेत् इति छंदोगपरिशिष्टात् तत्रैवादिपुराणे निमंत्रितस्तु न श्राद्धं कुर्याच्छ्राद्धदिने दानम् चंद्रिकायां प्रचे
ताः श्राद्धभुक् प्रातरुत्थाय प्रकुर्याद्दंतधावनम् श्राद्धकर्त्ता न कुर्वीत दंतानां धावनं बुधः हेमाद्रौ याज्ञवल्क्यः दंतधावनताम्बू
लं तैलाभ्यंगमभोजनम् रत्यौषधपरान्नं च श्राद्धकृत्सप्त वर्जयेत् विष्णुरहस्ये श्राद्धोपवासदिवसे खादित्वा दंतधावनं
मू गायत्र्याशतसंपूतमम्बुप्राश्य विशुध्यति पुनर्भोजनमध्वानं यानमायासमैथुनम् दानं प्रतिग्रहं होमं श्राद्धभुक्त्वष्टव
र्जयेत् सामान्यतो वनस्पतिगते सोमे यस्तु हिंस्याद्वनस्पतिम् घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः एतन्निषिद्धधा
त्यतिरेकेण वनस्पतिगते सोमे नतु दोहयेत्तु वाहयेत् नाश्नंति पितरस्तस्य दश वर्षाणि पंच च वनस्पतिमध्यानयस्तु का
रयेत् गावस्तस्य प्रणश्यंति चिरकालमुपस्थिताः वनस्पतिगतस्वरूपमाह पृथ्वीचंद्रोदये व्यासः त्रिमुहूर्त्तं वसेदर्के त्रिमुहू
र्त्तं जले वसेत् त्रिमुहूर्त्तं वसेद्गोषु त्रिमुहूर्त्तं वनस्पतौ कलिकायां च मनुः निमंत्र्य विप्रांस्तदहर्वर्जयेन्मैथुनं क्षुरम् प्रम

केनचिद्धोमयेन्नतु न्या जयेत् ८

समिति ४
गते सोमे ३
राम:
२२४
नवमुहूर्त्तौत्रिंश
हूर्त्तं सरवभ्रा
रस्व २

दध्नः ३
सोमः २

किंचिदूनमुक्तं द्वयोत्तरमित्यर्थः ७

ततांश्च स्वाध्यायं क्रोधाशौचेन श्रान्ततम् केचिन्निमंत्रणात्पूर्वेमुख्ये पूर्वेद्युः क्षौरं कुर्वंति तत्रमूलं मृग्यं मरीचिः अष्टांपर्वसु पुष्ट्यां दे
रिक्तामघ्राति थिष्वपि पातेश्राद्धव्रताहे च क्षौरं वर्ज्यं निशासु च यदा कर्त्तुरशक्त्या तस्य त्रिशिष्यादिः श्राद्धं करोति तदा कर्त्रा प्रतिनिधिना
च प्रागुक्ता नियमाः कार्याः न शक्नोति स्वयं कर्तुं यदा ग्घनेव काशतः श्राद्धं शिष्येण पुत्रेण तदान्येनापि कारयेत् नियमानाचरेत्सो
पि नियताश्च वसुंधरे यजमानोपितान्सर्वानाचरेत्सुसमाहितः इति हेमाद्रौ वाराहोक्तेः स्त्रियास्तु पार्श्वे मुक्तकच्छा तु या नारी
मुक्तकेशी तथैव च हसते वदते चैव निराशाः पितरो गताः आश्वलायनः श्राद्धे हि भोजयेद्दास्तान वालान पियत्नतः प्राक्
पिंडदानात्कुधा घेनीलं कुर्यात्स्वविग्रहम् वासोगृहे अथ श्राद्धपरस्तूनि तत्रादौ कुशाः पृथ्वीचंद्रोदये दक्षः समित्पुष्प कुशादि
ना द्वितीयः परिकीर्त्तितः अष्टधा भक्ते दिने द्वितीयो भाग इत्यर्थः तत्रैव यमः समूलस्तु भवेद्दर्भः पितृणां श्राद्धकर्मणि
मूलेन लोकान्जयति शक्रस्य सुमहात्मनः व्यासः तर्प्पणादीनि कार्याणि पितृणां यानि कानि चित् तानि स्युर्द्विगुणैर्दर्भैः
सम्नपत्रैर्विशेषतः शालंकायनः सपिंडीकरणं यावदृजुदर्भैः पितृक्रिया सपिंडीकरणादूर्ध्वं द्विगुणैर्विधिवद्भवेत् शं
खः अनंतर्गर्भिणं साग्रं कौशं द्विदलमेव च प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् हारीतः पवित्रं ब्राह्मणस्यैव च तुर्भिर्दर्भैः
पिंजुलैः एकैकन्यूनमुद्दिष्टं वर्णे वर्णे यथाक्रमम् स्मृत्यर्थसारे सर्वेषां वामेव द्वाभ्यां पवित्रं ग्रथितं नवम् रत्नावल्याम् द्व
यास्तु पर्वणोर्मध्ये पवित्रं धारयेद्बुधः हेमाद्रौ स्कांदे अनामिकाधृता दर्भाः सुकानामिकयापि वा द्वाभ्यामनामिकाभ्यां तु
धार्य्यं दर्भपवित्रके पवित्राभावे तत्रैव सुमंतुः समूलाग्रौ विदर्भौ तु कुशौ द्वौ दक्षिणे करे सव्ये चैव तथा त्रीन्वै बिभृयात्सर्व
कर्मसु बौधायनः हस्तयोरुभयोर्द्वौ द्वावासने पितथैव च दर्भग्रहणमंत्रमाह शंखः विरंचिना सहोत्पन्नपरमेष्ठिन्नि
सर्गज नुद सर्वाणि पापानि दर्भस्वस्तिकरो भव स्मृत्यर्थसारे ॐ फट्कारेण मंत्रेण सकृच्छित्वा समुद्धरेत् भरद्वाजः
प्रेतक्रियार्थं पित्रर्थमभिचारार्थमेव च दक्षिणाभिमुखश्छिंद्यात्प्राचीनावीतिको द्विजः कुशाभावे परार्केसु मंतुः

अत्राकांक्षा· दक्षिणानामयाऽहो स्विद्वामयापीति· तत्राह· एकेति· द्वाभ्यामितिच ७५
तापसव्यः १

निमित्तचतुष्टयं

मध्यस्थपत्ररहितं
अनेकपत्रः कुशः
पिंजुलः ६

अत्र देशाचाराद्य
वस्था ४

ला ७

कुशावत २

नि॰ सिं॰ २२५ कुशाः काशाः शरो गुंद्रो यवा दूर्वाश्च बल्वजाः गोकेशमुंजकुंदाश्च पूर्वाभावे परः परः काशादौ विशेषमाह शंखः काशहस्तस्तु नाचामेत्
कदाचिद्विधिशंकया प्रायश्चित्तेन युज्येत दूर्वाहस्तस्तथैव च पृथ्वीचंद्रोदये यमः मासि मासि तु छिन्नाद्दर्भा मासि मासि प्रचोदिताः
मतांत्रिंशत्यते मासे ते स्यादमावास्यादर्भाग्रा येनवः स्मृताः गृह्यपरिशिष्टे ये च पिंडाश्रितादर्भा ये कृतपितृतर्पणाम् अमे
ध्याशुचिलिप्ताये ते वा त्याज्या विधीयते लघुहारीतः पथिदर्भाश्चितादर्भा यदर्भाजन्नभूमिषु स्तरणासनपिंडेषु षट्कुशान्प
रिवर्जयेत् ब्रह्मयज्ञेषु च ये दर्भा ये दर्भाः पितृतर्पणे हता मूत्रपुरीषाभ्यां तेषां त्यागो विधीयते हेमाद्रौ अन्यानि च पवित्राणि कुश
दूर्वात्मकानि च हेमात्मकपवित्रस्याग्रे कां नार्हति षोडशीं कलाम् अथ हविः हेमाद्रौ प्रचेताः कृष्णमाषास्तिलाश्चैव श्रेष्ठाः स्यु
मो॰ टी॰ ७ र्यवशालयः महायवा व्रीहियवास्तथैव च मधूलिकाः कृष्णाः श्वेताश्च लोहाश्च ग्राह्याः स्युः श्राद्धकर्मणि मधूलिका
यावनाला इति हेमाद्रिः कल्पतरौ च भारते वर्द्धमानतिलं श्राद्धमक्षय्यमनुरब्रवीत् सर्वकामैः स यजेत यास्तु तैर्यजेत पि
तॄन् चंद्रिकायां देवलः दृष्ट्वा स्त्रैन्मिताडितं च दर्भाच्छन्नकाश्च पात्रंभस्त्वंशुकालंशु देयं नैव कुभोजनम् सायणीये अ
गोधूमं च यच्छ्राद्धं माषमुद्गविवर्जितम् तैलपक्वेन रहितं कृतमप्यकृतं भवेत् हेमाद्रौ वसिष्ठः अगोधूमं च यच्छ्राद्धं कृ
तमप्यकृतं भवेत् तत्रैव प्रोक्तं यवव्रीहितिलैर्माषैर्गोधूमैश्चणकैस्तथा संतर्पयेत्पितॄन्मुद्गैः श्यामकैः सर्षपद्रवैः
नीवारैर्हस्तिश्यामाकैः प्रियंगुभिरथार्चयेत् हेमाद्रौ कार्ष्णाजिनिः यदि वा जीवतश्चासीत् तद्घातस्य यत्नतः सतु श्राद्ध
स्तरं मार्गेन्नाता यातिन संशयः कालिकायामाश्वलायनः कदल्यादिफलैः शस्तैर्मूलैराद्र्यादिकैरपि गोरसैर्मधुना दध्ना
श्राद्धं संतर्पयेत्पितॄन् कदल्याम्रफलादीनि श्राद्धे संपादयेत्सुधीः हेमाद्रौ पृथ्वीचंद्रोदये च मार्कण्डेयः गोधूमैरिक्षुभि
र्मुद्गैः सचीनैश्च चणकैरपि श्राद्धे दत्तैः प्रीयंते मासमेकं पितामहाः विदार्या च भरुंडैश्च तिलैः शृंगाटकैस्तथा केचुकैः रा॰ म॰ २२५
श्चनच्छाकैः कर्कंधुबदरैरपि पालेवतैरारुकैश्चाप्यक्षोटैः पनसैस्तथा काकोल्याक्षीरकाकोल्या तथा पिंडालकैः शुभैः

लाजाभिश्च सधानाभिस्त्रपुसैर्वारुचिभर्टैः सबैयाराजशाकाम्लाभिंगुदेराजजंबुभिः प्रियालामलकैर्मुख्यैः फल्गुभिश्च तिलंटकैः
वेत्रांकुरैस्तालकंदैश्च त्रिकाक्षीरकावचैः लोचैः समोचैर्लकुचैस्तथा वीजपूरकैः मुंजातकैः पद्मफलैर्भक्ष्यभोज्यैश्च संस्कृतैः
रागखाडवचोष्यैश्च त्रिजातकसमन्वितैः दत्तैस्तु मासं प्रीयंते श्राद्धेषु पितरो नृणाम् एषां काशाकेह माषाद्यादि व्याख्यावेधका
घनुसारेण मध्यदेशभाषया नामान्युच्यंते सचीनैः कलायैः कलायस्तु सचीनकं इत्यमरः वूटरीति प्रसिद्धेः विदयीतत्कंद
न भरुंडं जलजं मखाना इति प्रसिद्धम् इति श्राद्धमंजर्याम् कूष्मांडमित्यन्वं श्रृंगाटकं सिंघारा कंचुकः कचनारः कंदः सूरणः
श्रृंगीभ्रः सूरणः कंद इत्यमरः कर्कंधूर्वदरी स्यात् सूक्ष्मवदरम् पालेवतं कोशातकीम् आरुकं आरूई अक्षोटं अखरोटः काकोलीक्षी
रकाकोल्यौ गौडेषु प्रसिद्धे पिंडालुकं सुषनी महाशाकं शोणमोहलकंद इति प्रसिद्धम् त्रपुसादयस्त्रयः कर्कटीभेदाः चिर्भिटं खर्
वुंजसर्षपौ निर्दोषस्य छादसः प्रियालं चिरोंजी फल्गु उदुंवरम् तिलंटकं पटोलम् नालकंदः कंदविशेषः चक्रिकानि तिरीणि विंवा
क्षीरिका खिरणी मोचं कदलीफलम् लकुचं वडहरम् मुंजातं गौडदेशे पद्मफलम् कमलगट्टा रागखाडवः पानविशेषः पिप्प
लीशुंठियुक्तस्तु मुद्गरूषस्तु खाडवः रागखांडवं तोयान्तैः शर्करासंयुतं तनुतादिति त्रिजातं त्वग्वैलापत्रकाणि मदनरत्ने कौर्मे
कालशाकं च वास्तूकं मूलकं कृष्णनालिका प्रशस्तानीति शेषः हेमाद्रौ ब्रह्माण्डे च वायुपुराणे कालशाकं महाशाकं द्रोण
शाकं तथार्द्रकम् विल्वामलकं मृद्वीकां पनसाम्रातदाडिमम् चव्यं पालेवताक्षोटखर्जूरं च कसेरुकम् कोविदारश्च कंदश्च पटोल
वृहतीफलम् पिप्पलीमरिचं चैव एला शुंठी च सैंधवम् शर्करा गुड कर्पूर वदरी द्रोणपत्रकम् तथा मधुकं रामठं चैव कर्पूरं गुड
मेव च श्राद्धकर्मणि शस्तानि सैंधवं त्रपुसं तथा रामठं हिंगुः कसेरुः कोविदारश्च तालकंदस्तथा विसम् तमालं शतकंदश्च तन
था वशीतकंदकम् कालेयं कालशाकं च सुनिषण्णं सुवर्चलम् मांसं शाकं दधि क्षीरं चोचं वेत्रांकुरस्तथा कट्फलं काकरोद्रा
क्षालुकं च मोचमेव च अलावुं ग्रीवकं चार्ककर्कंधु मधुसाह्वयम् वैकंकतं नारिकेलं शृंगाटक परूषकम् पिप्पलीं मरिचं चैव पटोलं
वृहतीफलम् एवमादीनि चान्यानि स्वादूनि मधुराणि च नागरं चार्द्रकं देयं दीर्घमूलकमेव चेति तथा शर्करा क्षीरसंयुक्ताः प

कं ५

कि.सिं. २२६ पुकान्वित मृस्या द्रोणशाकं गमइति प्रसिद्धम् मृद्वीका द्राक्षा आम्रातं अंबाडा इति प्रसिद्धो वृक्षस्तत्फलम् पालिवतं जंबीरम् क
सेरुः जलकंदः कोविदारः कंचनारसदृशः नालकंदः नालमूली विसंभसींड शतकंदः शतावरी शीतकन्दः सालूकं सेरूकीतिप्रसि
द्धम् कालेयकं रालसंज्ञः शाकः दारुहरिद्रावेतिपद्ध्वाचंद्रः सुनिषण्णकः कर्कटीसदृशः मूलरीयाइतिगौडप्रसिद्धः सुवर्चलशाकविशे
षः कट्फलं श्रीपर्णीवृक्षफलम् कोकशी अम्लरसा द्राक्षा तिंदुकं डिंडिसमितिवैदेशानिचंद्रः तिंदुफलं वा श्रीवकफलविशेषः
चारं स्तु द्रनालम् मधुसाह्वयं मधूकपुष्पफलं वा परूषकं रसमिति प्रसिद्धम् नागरं शुंठी पथ्या चंद्रोदयवाले आम्रमाम्रातं
कं बिल्वं दाडिमं बीजपूरकम् प्राचीनामलकं क्षीरं नालिकेरं परूषकम् नारंगं च खर्जूरं द्राक्षा नीलकपित्थकम् एतानि फल
जातानि श्राद्धे देयानि यत्नतः मात्स्ये अन्नं तु सदधि क्षीरं गोघृतं शर्करान्वितम् मांसं प्रीणाति सर्वान्वै पितॄनित्याह केशवः
याज्ञवल्क्यः हविष्यान्नेन वै मासं पायसेन तु वत्सरम् मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः ऐणरौरववाराहशाशैर्मा
सैर्यथाक्रमम् मासवृद्ध्याभितृप्यन्ति दत्तैरिह पितामहाः खड्गामिषं महाशल्कं मधु मुन्यन्नमेव च लोहामिषं कालशाकं मांसं वा
र्ध्रीणसस्य च निगमः त्रिःपिबं त्विन्द्रियक्षीणं श्वेतं वृद्धमजातिम् वार्ध्रीणसं तु तं प्राहुर्याज्ञिकाः श्राद्धकर्मणि वार्ध्रीणसो जर
च्छाग इति मेधातिथिः कात्यायनः छागान्मेषानालभ्य शेषाणि क्रीत्वा लब्ध्वा वा स्वयं मृतानाहृत्य पचेत् कौर्मे क्रीत्वा लब्ध्वा
स्वयं वाथ मृतानाहृत्य वा द्विज दद्याच्छ्राद्धे प्रयत्नेन तदस्याक्षय्यमुच्यते श्राद्धे दत्तस्य मांसस्या भक्षणे दोषमाह मनुः नियुक्त
स्तु यथान्यायं यो मांसं नात्ति मानवः स प्रेत्य पशुतां याति सम्भवानेकविंशतिम् अत्र बहुवचनं तु श्राद्धमांसमधुनोः प्राशस्त्या
र्थः विना मांसेन यच्छ्राद्धं कृतमप्यकृतं भवेदिति हेमाद्रौ देवलोक्तेः यच्छ्राद्धं मधुना हीनं तद्रसैः सकलैरपि मिष्टान्नैरपि स
युक्तं पितॄणां नैव तृप्तये अणुमात्रमपि श्राद्धे यदि न स्यात्तु माक्षिकम् नामोपिकी तिनीयस्यापि पितॄणां प्रीतये नतु इति हेमा
द्राबाग्नेये तासु मांसमधुनोः श्राद्धे नियतत्वं गम्यते गौडनिबंधे मत्स्यसूक्ते मध्वभावे गुडादयः क्षीरस्य च तथा दधि न लभ्यते स्मृ: २२६
घृतं यत्र कुर्याद्धृतवतीं जपम् श्राद्धकलिकायां नागरखण्डे कथंचिद्यदि विप्रेभ्यो न दत्तं भोजनं मधु पिंडास्तु नैव दातव्याः क

करोञ्जलेनि पात्यमुखेन पिबन्ति हि ८ अभावे २

मधुपर्के गोवधः ५
अक्षतायाविवाहः ५

दाचिन्मधुनाविना एतत्पराशरस्तुमांसंनिषेधयति यस्तुप्राणिवधंकृत्वामांसेस्तर्प्पयतेपितॄन् सविद्वांश्चन्दनंदग्ध्वाकुर्यादंगारविक्रयम्
लिप्त्वाकूपेयथाकिंचिद्बालआशातृणंमिच्छति पतत्यज्ञानतःसोपिमांसेनश्राद्धकृत्तथा सएव सर्वयान्नेयदानस्यात्तदेवामिषमाश्रयेत् श्रे
ष्ठराशश्वस्यनाघ्नातच्चेश्वादिहन्तयदि भागवतेपि नदद्यादामिषंश्राद्धेनचाद्याद्धर्मतत्त्ववित् मुन्यन्नैःस्यात्पराप्रीतिर्यथानपशुहिंसया
वेतिप्रभवः अनेकचित् मुन्यन्नब्राह्मणस्यात्तमांसंक्षत्रियवैश्ययोः मधुप्रधानंशूद्रस्यसर्वेषांचाविरोधियदितिहमाद्रौपुलस्त्योक्त्या
व्यवस्थामाहुः एवंचेद्दायस्तु अक्षतागोपशुश्चैवश्राद्धेमांसंतथामधु देवराच्चसुतोत्पत्तिःकलौपंचविवर्जयेदितिनिगमोक्तेः वर्णाति
घिपितृभ्यश्चपशूपाकरणक्रियेतिकलिवर्ज्येषुहेमाद्र्यादिपुराणात् मांसदानंतथाश्राद्धेवानप्रस्थाश्रमस्तथेत्युक्त्वा इमान्धर्मान्कलि
युगेवर्ज्यानाहुर्मनीषिणइतिवृहन्नारदीयेनिषेधाच्चमांसविधिःकलिव्यतिरिक्तविषयः कलौमांसनिषेधानांदेशाचाराद्व्यवस्था
तथावृहन्नारदीयेश्राद्धंप्रकृत्य यथाचारंप्रदेयंतुमधुमांसादिकंतथा देशाचाराःपरिग्राह्यास्तत्तद्देशीयजैर्नरैः अन्यथापतितोज्ञेयःस
र्वधर्मबहिःकृतइति यस्मिन्देशेपुरग्रामेत्रैविध्यनगरेपिवा योयत्रविहितोधर्मस्तंधर्मंनविचारयेदितिमत्स्योक्तेश्चेत्याहुः तन्न होलाका
धिकरणन्यायेनदेशविशेषव्यवस्थापकपदकल्पनायोगात् निरूपितंचैतत्पितामहचरणैर्मीमांसायामितिदिक् मनुः संवत्स
रंतुगव्येनपयसापायसेनच वार्ध्रीणसस्यमांसेनतृप्तिर्द्वादशवार्षिकी त्रिपिबंत्विन्द्रियक्षीणंश्वेतंवृद्धमजापतिम् वार्ध्रीणसंतुतंप्राहु
र्याज्ञिकाःश्राद्धकर्मणि हेमाद्रौविशेषमाहहेमाद्रौसुमन्तुः पयोदधिघृतंचैवगव्यंश्राद्धेषुपावनम् माहिषंगर्हितंप्राहुःश्रेष्ठंनतुप
यःक्वचित् याज्ञवल्क्यः संधिन्यनिर्दशावत्सागोपयःपरिवर्जयेत् औष्ट्रमैकशफंस्त्रैणमारण्यकमथाविकम् हेमाद्रौहारीतः न
वसूतायाःसमुत्रात्रादिरत्येके दशरात्रादित्यपरेमासेनापेयुममवतीतिधर्मविदः एतद्गव्यमात्रपरम् देवलः अजाविमाहिषीणांतु
पयःश्राद्धेषुवर्जयेत् विकारान्पयसश्चैवमाहिषंतुहितंहितम् तत्रैवब्राह्मे माहिषंचामरंमार्गंमाविकंकैकशफाद्भवम् स्त्रैणमाद्भु
याचितंचदधिक्षीरंत्यजेद्दुतम् सगुडंमरिचाक्तंतुतथापर्युषितंदधि देयंतत्क्रमपतंचनष्टास्वादंचफेनवत् माहिषापवादोपरा
केब्राह्मे देयंतक्रंतुसघृतंनवनीतादनुद्धृतम् आरण्यंमाहिषंक्षीरंशर्कराघृतसंयुतम् मध्वक्तंतुहितंचैवदद्यान्नदम्नतयुतं
यद्यपिजाल्लवल्येनअन्नपर्युषितंभोज्यंस्नेहाक्तंचिरसंस्थितम् अस्नेहापिगोधूमयवगोरसविक्रियाइतिपर्युषितंदध्यादि
आचारप्राप्तहोलाकायुत्रकर्तव्यत्वाकांक्षायांयदिदेशविशेषोवाच्यस्तदास्यानुक्तत्वात्सर्वदेशेषुयथाक्रियतेनथेदम
पिस्यान्नतुनथास्तीतिदेशभेदव्यवस्थापकपदाभावान्नोक्तव्यवस्थासाध्वी ८

नष्टास्वादंजःस्रवतितावन्नग्राह्यमित्यर्थः ५
पयुषरहितंदुग्धंभवति ५ फूटदहीकीछाछि २ गतसारम् ३

नि॰सिं॰ २२७

भोज्यमुक्तं तथापि गुडमरीचाक्तस्य पर्युषितादोषाभाव इति हेमाद्रिः तत्रैव ब्राह्मे कालशाकं तंदुलीयं वास्तुकं मूलकं तथा शाक
मारिषकं चैव दद्याच्छ्राद्धे तु नित्यशः तंदुलीयं सूक्ष्मपत्रमिति हेमाद्रिः महाराष्ट्रारण्यमाठ इति प्रसिद्धम् आरिषकं काञ्जीचूचा
दि तत्रैव दाडिममामगधीं चैव नागरार्द्रकतित्तिडीं आम्रातकं जीरकं च कुंबरं चैव योजयेत् मागधी पिप्पली नागरं सुंठी कुं
बरं कुस्तुंबुरुम् धनियमिति प्रसिद्धम् वायवीये आगस्त्यपत्रशिखास्त्वाम्राः कषायाः सर्वएव तु शिखा नवपल्लवाः प्रभास
खण्डे आरामस्य तु सीमंताः कलायाः सर्वएव च सीमंता नवपल्लवाः कौर्मे तमालशतकंदं च मध्वालुशीतकंदली मध्वा
लुः कोहलकंदः शीतकंदली रतालु इति प्रसिद्धा अथ वर्ज्यम् मार्कंडेयपुराणे यच्चोक्तं चादिना प्राप्तं पतितनाद्यदुपार्जित
म् अन्यायकन्याशुल्कार्थं द्रव्यं चात्र विगर्हितम् पित्रर्थमेप्रयच्छस्व सुक्तायच्चाप्युपाहृतम् चंद्रोदये शंखः मसूरशणसुरसा
शिग्रुपालक्याम्लचुक्रं तथा कूष्मांडालाबुवार्ताककोविदारांश्च वर्जयेत् पिप्पलीमरिचं चैव तथा वै पिंडमूलकम् कृतं च लव
णं सर्वं वंशाग्रं च विवर्जयेत् राजमाषान्मसूरांश्च कोद्रवान्कोरदूषकान् लोहितांश्च सनिर्यासान्श्राद्धकर्मणि वर्जयेत् म
सूरणं काश्मीरदेशे प्रसिद्धम् सुरसा निर्गुंडीति माधवः तुलसीति पृथ्वीचंद्रः साच भक्ष्यत्वेन निषिद्धा न पुष्पत्वेनेति गौडाः
पालंकी पालख इति प्रसिद्धा म्लचुकं जलजः शाकः सम्लुकमिति पाठे खदिरफलकं इति हेमाद्रिः मरिचान्यार्द्राणीति हेमाद्रिः कृतं
लवणं सांभरमिति सैंधवं लवणं चैवं तथा मानससंभवम् यच्च सामुद्रिकं भवेदिति शूलपाणौ पाठः पवित्रं परमं ह्येतत्प्र
त्यक्षेपि नित्यशः इति वायवीयोक्तेः मानसं सांभरम् यत्तु भविष्ये तज्जन्यादन्तकाष्ठं च प्रत्यक्षलवणं तथेति तत्रक्षारल
वणं खारीति प्रसिद्धं निषिद्धम् मुक्तातुषारलवणं त्रिरात्रं तु न वसेदिति ब्राह्मोक्तेरिति शूलपाणिः क्षीरलवणमिति पाठान्तु क्षी
रमिश्रलवणं निषिद्धमिति वाचस्पतिः राजमाषाः रतार इति प्रसिद्धाः कोरदूषकः नवकोद्रवः चंद्रिकायां शंखः पिंडालुकं च
तुंडीरं करमर्द्दं च नालिकम् कूष्मांडवर्त्तुबीजानि श्राद्धे दत्त्वा व्रजत्यधः पिंडालुकं महाराष्ट्रेषु पेंढरमिति प्रसिद्धम् तुंडीरं बिंबी
फलमिति गौडाः करमर्द्दं करवंदमिति प्रसिद्धम् तत्रैव बिडालोच्छिष्टमाघ्रातं श्राद्धे यत्नेन वर्जयेत् कूष्मांडं महिषीक्षीर

एम॰ २२७

माढक्योराजसर्षपाः चणकाराजमाषाश्च म्रंतिश्राद्धेनसंशयः क्रतुपराशरौ करीरफलपुष्पाणिविडंगमरिचानिच जंभारिकास
जंबीरस्तुपर्कवीजपूरकम् जंबूलाबूनिपिप्पल्यः परोलपिंडमूलकम् मसूरांजनपुष्पंचश्राद्धेदत्वाधतत्समधः जंबुसृक्मम् माषवीयंच
नुर्विंशतिमते यावनालानकुलत्थाश्चवर्जयन्तिविपश्चितः जोवनालाजाउला: अत्रयानिचणकादीनिविहितनिषिद्धानितथा
विकल्पः अन्यथाश्यामाकैश्चणकैःशाकैर्नीवारैश्चप्रियंगुभिः गोधूमैश्चतिलैर्मुद्गैर्मासंप्रीणयतेपितॄनिति गोधूमैरिक्षुभि
मुक्तेः सतीगौधूमकरणीति चहेमाद्रौ कोमविहस्तु धर्मादिविरोधः स्यात् पिप्पलीमरिचादेस्तु प्रत्यक्षस्य निषेधान्त्वसद्द्रव्य
मिश्रस्य सौवीरतिक्तैलवणादिभिस्तु पाकस्यासिद्धिर्महतीहयस्तु नहीज्जहरान्मरिचादियोगात्सिद्धप्रदेयंननुदुष्यतीतिष्ट
खाचद्रव्येक्रतुपराशरोक्तैः नैवदत्तुश्वयस्मिन्मनसाभिलाषः श्रद्धामवघन्नचदीयमाने श्राद्धबुद्ध्याविधिवन्नदेवंदत्तमक्ष न
ष्यमितिब्रुवंति एतन्निषिद्धेतरविषयम् चंद्रिकायाम् कृष्णधान्यानिसर्वाणिवर्जयेच्छ्राद्धकर्मणि नवर्जयेत्तिलांश्चैवमुद्गमा
यांस्तथैवच मात्स्ये मसूरशणानिष्पावराजमाषकुसुंभिकाः पद्मविल्वार्कधत्तूरपारिभद्राटरूषकाः नदेयाःपितृकार्येषुपय
आजाविकंतथा कोद्रवोद्दारवरककपित्थमधुकातसी एतान्यपिनदद्यानिपितृभ्यःश्राद्धमिच्छता निष्पावाःवल्लाः यत्तुमार्क संधि
राड्यः प्रियंगवःकोविदारनिष्पावाश्चात्रशोभनाःइति तत्रनिष्पावाःश्वेतशिंवीति दानसागरे आढकप्रकाशेचोक्तम् विल्वंच
रक्तंनिषिद्धम् जंबीररक्तविल्वंचशालस्यापिफलंत्यजेदितिब्राह्मोक्तेः पारिभद्रोनिंवतरुरित्यमरः रक्तमंदारइतिहेमाद्रिः
आटरूषावासातत्पुष्पम् उद्दारःकंचनारः मधुकंज्येष्ठीमध्विति चंद्रिका वरकावनमुद्गाः हेमाद्रौब्राह्मे आसनारू
ढमन्नाद्यपादोपहतमेवच अमेध्येर्जगमेः स्पृष्टंशुष्कंपर्युषितंचयत् द्विःस्विन्नंपरिदग्धंच तथैवाग्रावलेहितम् शार्क
राकीटपाषाणैःकेशैर्यच्चाप्युपद्रुतम् पिण्याकंमथितंचैव तथातिलवणंचयत् सिद्धाःकृताश्चयेभक्ष्याःप्रत्यक्षलवणी
कृताः वाससाचावधूतानिवर्ज्यानिश्राद्धकर्मणि द्विःस्विन्नंयत्सकृत्पाकेनभक्ष्यमपिहिंगुजीरकादिसंस्कारार्थंपुनःप
च्यतेनतदूर्ज्यम् तेनपाकोद्यावंवर्ततेलक्षपःकार्यः यत्तुतिक्तशाकान्नविकारादिभिःपाकेनवभक्ष्येरणार्हंतन्ननिषिद्धम् अ

यथार्कंटकारीफलानितप्तानितक्रदुजलंनिष्पीडार्यं
साप्यतैलेहिंगुक्षिप्त्वाऽपुनःपच्यते १

नि॰सिं॰
२२८

दुर्गंधम् २

आवलेहितमात्स्यादिनखर्वम् पर्युषितस्य सदा निषेधे पिष्टकस्वेतनम् अश्वपाश्वकरंभाश्रधानम्वटकं भक्ताव: शाकंमांसमपूपंचसूपंकृस
रमेव च यवागूः पायसंचैवयच्चान्यत्स्नेहसंयुतम् सर्वपर्युषितंभोज्यंशुक्तंचेत्यपिवर्ज्येयेदितिमाधवीयेयमोक्तेः वटकादरपिपर्यु
षितस्यनिषेधार्थमितिचंद्रिकादयः वर्ज्येषु विश्वामित्रः कपित्थंकुतुकंचैवनालिकेरंचपैप्पलिकम् जंबूफलादिपक्वंचविरूपाक्ष
तण्डुलीयकम् हेमाद्रौ षड्त्रिंशन्मते वर्ज्या मर्कटकाः श्राद्धे राजमाषास्तथैव च मर्कटाः लंकाः पेठीलङ्किः ढेनाकनलिकापो
तकुस्तुंभाश्मंतकोनिशाकानामभस्याइति पातपोई इतिप्रसिद्धम् कुसुंभकरंड इतिमहाराष्ट्रप्रसिद्धम् मार्कण्डेयः वर्ज्याश्चा
भिषवानित्यंशतपुष्पागवेधुकाः जंबीरकफलवर्ज्यकोविदारश्चनित्यशः अभिषवः सुक्तमितिचंद्रिका संधानकमिति
पृथ्वीचन्द्रः शतपुष्पासोवाइतिप्रसिद्धम् शाट्यायनः मारिषनालिकाचैव रक्ताया चकलंबिका असुरान्नमिदंसर्वंपि
तॄणांनोपतिष्ठते मारिषमध्यदेशेमरुसाइतिमहाराष्ट्रेषुराजगिराइतिप्रसिद्धः कलंबिकावरवासाइतिपत्रा तत्रैव गांधा
रिकापटोलानिश्राद्धकर्मणिवर्जयेत् गांधारिकातंडुलीयमितिचंद्रिका जवासाख्यादुरालभेतिकेदेवः भारते हिंगुद्रव्ये
षुशाकेषुअलाबुलशुनंतथा कुकुडकान्यलाबूनि कूष्मांडलवणमेवच पुनरलाबुग्रहणमुभयालाबुनिषेधार्थमितिपृ
थ्वीचन्द्रः कुकुडकंवर्तुलच्छत्राकं तत्रैव कुस्तुंबुरुंकालिंगाद्यवर्जयेद्दलवेतसम् हेमाद्रौब्राह्मे वार्ताकंपंचशिंबंचलोमशानि
फलानिच कालिंगरक्तचारंचवीराणाकंधूर्तचारकम् कपालकाचमारीचंकरंजपिण्डमूलकम् गृंजनंचुक्रिकाचैवगाजरंजीव
कंतथा ढेनाकखद्वनम् केसूरश्वेतढेनाककूष्मांडंचविवर्जयेत् इति देवलोक्तेः तेनकूष्मांडस्यानिषेध इतिचंद्रिकामाधवौ वस्तु
तस्तुसदास्वेतनिषेधात्सतः श्राद्धेनिषेधोव्यर्थः तेनमहत्त्वस्यकूष्मांडेढेनाकस्यापिनिषेधार्थमिदमितिवयम् केशाडूरकपिकच्छूः
कूष्मांडढेनालाबुःपंचशिंबंबल्लमसूरराजमाषमठकुलत्थाः लोमशानिकपित्थानि रक्तचारंलोहितचारफलम् वीराणाकंद्रो
णीकर्कटी धूर्तचारकंचिरस्थितचारफलम् चारोलीतिप्रसिद्धम् कपालंनारिकेरम् काचंकचुकंफलम् मारीचमार्द्रम
रिचानि गृंजनंपलांडुभेदः पश्चिमदिशिप्रसिद्धः नतुगाजरम् तस्यपृथगुक्तेः हेमाद्रिणातुगृंजनंगाजरमेवोक्तम् गौड

एम॰
२२८

संवि ३

तत्रयदामिषंतत्कोमांसतुल्यंयद्धितन्मघतुल्यं अयोरजो
लोहरजस्तत्ताम्रपात्रेमघतुल्यम् ४

आर्द्रकौमुघामप्येवंतच्चिंत्यम् चुक्रिकाचिरकालमुक्तंपानकम् चंद्रिकायांहारीतः नवदञ्ज्ञोदुंवरश्लेलुदधित्यनीपमातुलिंगा
निभक्षयेत् शेलुःश्लेष्मातकेः भोकरसंज्ञः दधित्यकपित्थस्मृतिसारे क्षीरेतुलवणंदत्वा उच्छिष्टेपिचयद्धुतम् स्नानर
जकतीर्थंवुताम्रेगव्यंसुरासमम् गौडनिबंधेस्मृतिसारस्मृतिः नालिकेरोदकंकांस्येताम्रपात्रेस्थितंमधु गव्यंचताम्रपात्र
स्थंमघतुल्यंघृतंविना ताम्रपात्रेकृतंमांसंयच्चगव्यंघृतेतरत् आमिषंतुगवांमांसंदधिमघमयोरजः द्रव्यांतरयुतंमा
सपयसासंयुतंदधि पयोनुद्धृतसारंचताम्रपात्रेनदुष्यति अथजलम् याज्ञवल्क्यः शुचिगोतृप्तिकृत्तोयंप्रकृतिस्थं
महीगतम् वर्ज्यजलमुक्तंहेमाद्रौब्रह्माण्डे दुर्गंधिफेनिलंक्षारंपंकिलंपल्वलोदकम् नभवेयत्रगोतृप्तिर्नक्तंयच्चाप्युपाहृ
तम् यच्चसर्वार्थमुत्सृष्टंयच्चाभोज्यनिपानजम् तद्वर्ज्यंसलिलंतातसदैवश्राद्धकर्मणि निपानोजलाशयः शुद्धित
त्वेशंखः स्नानमाचमनंदानंदेवतापितृतर्पणम् शूद्रोदकेनकुर्वीततथामेघाद्विनिःसृतेः हेमाद्रावादित्यपुराणे
कात्यायनः अयोनिशिनग्रंकोयान्तपिवेच्चकदाचन उद्धृत्याग्निमुपर्यग्नेर्धान्नोधाम्नइतीरयेत् रजोदोषेतुप्राप्तु रजस्ततो ८
कम् नारदीये त्यजेत्पर्युषितंपुष्पंत्यजेत्पर्युषितंजलम् नत्यजेज्जाह्नवीतोयंतुलसीविल्वपत्रकम् अन्यान्यपिप
र्योचद्रोदयेमात्स्ये मध्याह्नः खड्गपात्रंचतथानेपालकंवलः रौप्यंदर्भास्तिलागावोदौहित्रश्चाष्टमःस्मृतः पापकुत्सि
पापनाशकाः ६ तमित्याहुस्तस्यसंतापकारिणः अष्टावेतेयतस्तस्मात्कुतपाइतिविश्रुताः आलेयतिस्त्रिदण्डःकरूणराजतपात्रेम
वच दौहित्रंकुतपःकालश्छागःकृष्णाजिनंतथा शस्तानीतिशेषः दौहित्रंखड्गपात्रमितिकल्पतरुः अपरार्केत्वन्त
तरे अपत्यंदुहितुश्चैवखड्गपात्रंतथैवच कृतंचकपिलायागोर्दौहित्रमितिकीर्तितम् ब्रह्माण्डे अमावास्यागतेसोमे
यातुखादतिगास्तृणम् तस्यागायद्भवेत्क्षीरंतद्दौहित्रमुदाहृतम् स्मृतिसंग्रहे उच्छिष्टंशिवनिर्माल्यंवांतंचमृतक
र्पटम् श्राद्धेसप्तपवित्राणिदौहित्रःकुतपस्तिलाः उच्छिष्टंवत्सस्यदुग्धमित्यर्थः शिवनिर्माल्यंगंगोदकम् वांतंमधु
मृतकंर्पटंटसरीपट्टं तिलश्चापस्तंवः अटव्यायेसमुत्पन्नाअकृष्टफलितास्तथा तेवश्राद्धेपवित्राःस्युस्तिलास्ते
लीवलिंगत्वादग्रिमश्लोकेतथादर्शनाच्च ५

एतैर्मंत्रैः ५
यदि संपन्नस्तर्हि अजेत· यद्यापन्नस्तर्हि प्रधानकर्मार्थं संस्कुर्यात् ४
एतोन्विंद्रम्। यद्देवाः। पावमानीः स्वस्त्ययनी· तरत्समंदी ५
पुष्पसमभिव्याहारात्करवीरेत्यूचितम् ७

नि॰ सिं॰ २२९

तिलास्तिलाः अभावेग्राम्याः गौराः कृष्णास्तथारण्यास्तथैव च त्रिविधास्तिलाइति श्राद्धोक्तेः अथ वर्ज्यानि चंद्रिकायां यमः
कुक्कुटो विड्वराहश्च काकश्चाथ बिडालकः वृषलीपतिश्च वृषलः षंडोऽवीरा रजस्वला एते तु श्राद्धकाले वै वर्जनीयाः प्रयत्नतः स्वजः
कारुः कुणिः श्वित्री दातुः प्रेष्यकुरस्तथा न्यूनांगोप्यतिरिक्तांगस्तमप्यपनयेत्ततः वायवीये अन्नप्रक्षेपयुरे ते तु यदि वै हव्य
कव्ययोः उन्त्रवद्व्यप्रधानार्थसंस्कारस्त्वोपदिश्यतेः सुमंतुः चंडालादिवीक्षितमन्नमभोज्यमन्यत्र भक्ष्यस्माहिरण्योपाद
कस्यस्पर्शात् तत्रैव धौम्यदर्शिः शुद्धवत्याथ कूष्मांडः पावमानस्तरत्समाः घृतेन वा हिरण्यादर्भैरन्नदोषमपानुदन् चंद्रोदये
पादुकोपानहौ छत्रं चित्रं रक्ताम्बरं तथा रक्तपुष्पं च मार्जारं श्राद्धभूमौ विवर्जयेत् निर्णयदीपे ब्रयात्तिन्नादोहयसन्निधानशं
वृकशशखंवाकंदलीदलं च उन्मत्तजात्यर्कहयारिजानि श्राद्धस्य वैगुण्यकराणि भूनि हयारिजं महिषीक्षीरादि अथ श्राद्धदिन
कृत्यम् चंद्रोदये उशनाः गोमयोदकैर्भूमिभाजनं शौचं कुर्यात् पराशरः कांजिकं दधि तक्रं च शुष्कं वा शुष्कमेव वा पूर्वमे
वनदातव्यमेकोद्दिष्टे च पार्वणे हेमाद्रौ पराशरः गृहाग्निशिशुदेवानां ब्रह्मचारितपस्विनाम् तावन्न दीयते किंचिद्यावत्पिं
डान्न निर्वपेत् कौर्मे तिलान्नवकिरेत्तत्र सर्वतो बंधयेदजान् तत्रैव देवलः तथैव यंत्रितो दाता प्रातःस्नातः सहांबरः आर
भेत नवैः पात्रैरन्नारंभं च बांधवैः अत्रात्मनेपदात्स्वयमेव पाकः कार्यः अशक्तोपपत्त्या तदभावे बांधवैः ततस्तानिष
पाचाभ्यसीताजनकनंदिनीति पाक्षलिंगादिति हेमाद्रिः श्राद्धदीपकलिकायामाश्वलायनः समानप्रवरैर्मित्रैः सपिंडै
श्च गुणान्वितैः कृतोपकारिभिश्चैव पितृकार्यं प्रशस्यते व्यासः गृहिणी चैव सुस्नाता पाकं कुर्यात्प्रयत्नतः निष्पन्ने तु
च पाके तु पुनः स्नानं समाचरेत् पृथ्वीचंद्रोदये ब्राह्मे रजस्वलां च षंढां पुंश्चलीं पतितां तथा त्यजेच्छूद्रां तथा वंध्यां
विधवां वान्यगोत्रजाम् व्यंगकरणीं चतुर्थाहःस्नातामपि रजस्वलाम् वर्जयेच्छ्राद्धपाकार्थं मातृपितृवंशजाम् मा
तृपितृवंशजभिन्नां त्यजेदित्यर्थः स्मृतिसारे न पाककारयेत्सुत्रीमित्वा वाप्यन्यगोत्रजाम् मृतवध्यां च गर्भिणीं गर्भिणींचै

कृषिकाम् ८
पिंडदानात्पूर्वकस्मै चिन्न दद्यादित्यर्थः ६

रामः
२२९

गृहाग्नौ वैश्वदेवः ८
कृतेउपकारे इत्यर्थः। उपकुर्वंतीति कृतोपकारिणस्तैः ४
पितृव्यादिकन्यां १

वडुर्मुखेषाम् पाकभांडानितु हेमाद्रौनागरखंडे सौवर्णान्यथरौप्याणिकांस्यताम्रोद्भवानिच मार्त्तिकान्यपिभव्यानिन्द्रतनाति
ह्मणानिच तत्रैवादित्यपुराणे पचेदन्नानिसुस्नातः पात्रेषुभूमिषुस्वयम् पर्णादिधातुजातेषुमृन्मयेष्वपिवाद्विजः अपि
द्र्ष्वविलिप्तेषुतथानुपहतेषुच नायसेषुनभिन्नेषुदूषितेष्वपिकर्हिचित् पूर्वंकृतोपयोगेषुमृन्मयेषुनतुक्कचित् वायुपुरा
णे नकदाचित्पचेदन्नमयःस्थालीषुपैतृकम् अयसोदर्शनादेवपितरोविद्रवंतिहि कालायसविशेषेणनिंदंतिपितृ
कर्मणि फलानांचैवशाकानांछेदनार्थानियानितु महानसेपिशस्त्राणितेषामेवहिसंनिधिः इष्यतेनेतरस्यात्रशस्त्र
मात्रस्यदर्शनम् श्राद्धदेशेतुविदुषापितृणांप्रीतिमिच्छता महानसोपयुक्तानामपिकार्य्यंनदर्शनम् तत्रैव पचमानं
स्तुभांडेषुभक्ष्याताम्रमयेषुच समुद्धरंतिवैघोराणपितृन्दुःखमहार्णवात् तैजसानामभावेतुपिठरेमृन्मयेपिच नवेषु
चोपकुर्वीतपाकंपित्रर्थमादरात् तत्रैवादिपुराणे पक्वान्नस्थापनार्थंतुअश्मस्यतेदारुजान्यपि दर्व्यादीन्यपिकार्याणियानि
यैरपिदारुभिः यमः विवाहेप्रेतकार्य्येचमातापित्रोःक्षयेहनि नवभांडानिकुर्वीतजन्तकालविशेषतः अथपाकाग्निः
हेमाद्रौप्रजापतिः औपासनेनान्नसिद्धिरग्नौकरणमेवच कथ्यौचंद्रदयेगिरा शालाग्नौतुपचेदन्नंलौकिकेवापिनित्य
शः यस्मिन्नग्नौपचेदन्नंतस्मिन्होमोविधीयते मनुः वैवाहिकेग्नौकुर्वीतगृह्यंकर्मयथाविधि पंचयज्ञविधानंचपक्तिं
चान्वाहिकींद्विजः श्राद्धस्यगृह्यत्वंचोक्तमपरार्केण अत्रविशेषः कर्मप्रदीपे प्रातर्होमंतुनिर्वर्त्यसमुद्धृत्यहुताशनात्
शेषंमहानसेकृत्वातत्रपाकंसमाचरेत् पाकान्तेऽग्निंतमाहृत्यगृह्याग्नौतुपुनःक्षिपेत् ततोस्मिन्वैश्वदेवादिकर्मकुर्याद
अग्निं ५ तंद्रितः तदभावेलौकिके ततःपचयुरन्नानिनिर्वापानंतरंशनैः वैवाहिकेग्नावन्यत्रलौकिकेनापिसयतइतिकलिकायांसे
ग्रहाके पित्रर्थंनिर्वापकुर्वीत तत्रार्थः अतएवहेमाद्रौवायुपुराणे पित्रर्थंनिर्वपेद्भूमौकूर्चेवादर्भसंस्कृते इतितत्रैवपाद्ममात्स्य
योः अग्निमान्निर्वपेत्पित्र्यंचरुंवासनमुष्टिभिः पितृभ्यानिर्वपामीतिसर्वंदक्षिणतोन्यसेत् चरुग्रहणमन्नशाकादीनां निर्वापइत्यर्थः २
हेमाद्रिः पिंडपितृयज्ञार्थंपाकविषयोयंनिर्वापइतितुयुक्तम् अथचेतरेषामग्निः आश्वलायनानांतुगुरुणाभिमता

अमायां १ निरग्निकेन ४ पात्रे २ दर्भकृते ३ अन्यत्रस्थिते ४ तेनसाग्निकस्यौपासनाग्निभिन्नोलौकिकाग्निरपिपा दिविशिष्टं ५

पितृभ्योनुवंनिर्वपमिति गृह्यपात्रस्थान्नात् चत्वार्थपाकार्थमात्यजकत्रियतेसतिजीवः ३ येषांगुरुर्मृतस्तेअन्यतः पुत्रपश्चाद्विरणादिभिरवक्षी

आवसथ्याग्निर्लौकिकोवा आश्वलायनभिन्नानाम् १ यमाणाः संतोमावास्यायांश्राद्धकर्म कुर्वीरन् १

स्था

यस्मात्तन्निरूढे एव कृत्स्नश्रौतविधिना संस्कुर्वते तेऽर्धाधानिनः। ये तु सर्वमेव संस्कुर्वते ते सर्वाधानिनस्तेषां स्मार्ताग्न्यभावादाहृतपचना
ग्नावर्धाधानिनां तु स्मार्ताग्नावेव तु स्मार्ताग्नौ स्मार्ताग्नेरभावेऽपि गृहे पचनाग्निरिति शिष्टाचारोऽस्ति ३

पाकार्थगृह्यग्रह्णाति आश्वलायनः आश्वलायनतः ३ कृत्वा दमग्निमित्यर्द्धेनचतुष्पथे लौकिकाग्निं यत्वा १
ग्रन्थे ४ नमित्ता द्वर्थः ३ भार्यारहित ६

नि॰ सिं॰ २३०

अन्यतो वा पक्षीयमारणाग्नमरावास्यायां शुंगंतिकर्मकुर्वीरन्नित्यादिसूत्रेणापचनाग्नेस्त्यागमुक्त्वा इहैवायमितरो जातवेदा इत्य
र्द्धर्चेन शर्मीमयीभ्यामरणिभ्यामग्निं मथित्वा स पचनाग्निर्भवतीति सूत्रेव जातोऽचोक्तेः पचनाग्नावेव पाकः बौधायनेनाप्युक्तं
आहृतपचनाग्निमौपासनं वाभिप्रव्रजतीति स्मार्ताग्नौ पाकस्त्वन्यशाखाविषय इति केचित् वस्तुतस्तु पूर्वोक्तस्य सर्वा
धानिविषयत्वं युक्तम् शिष्टाचारोऽपि तत्पचनोऽदृश्यते अडविलायामपि सर्वाधानपक्षे वैश्वदेवश्राद्धं च पचने कुर्यादन्य
थौपासने युक्तम् अग्नौकरणं तु प्रयोगपारिजातादिभिरग्निकादि सर्वश्राद्धपिण्डपितृयज्ञस्पतिषु गौक्ते लौकिके पच
नपाके कृते पिण्डदानेऽपि पक्षेचरणैव कार्यमिति प्रतिभाति मदनरत्नेऽप्येवम् विधुरच्छिन्नाग्न्यादेस्तु पृष्ठादिविधानेना
ग्निसंपादनमित्युक्तं हरिहरभाष्ये इति पाकाग्निः चन्द्रिकायां मार्कण्डेयः अद्भिः षट्सु मुहूर्तेषु गतेषु प्रयतान्द्विजान् प्र
त्येकं प्रेषयेत्तेषां प्रदापामलकोदकम् देवलः ततो निवृत्ते मध्याह्ने कृत्तरोमनखान्द्विजान् अभिगम्य यथान्यायं प्रयच्छे
द्दन्तधावनम् तैलमभ्यञ्जनं स्नानं स्नानीयं च पृथग्विधम् पात्रैरौदुम्बरैर्दद्याद्वैश्वदेविकपूर्वकम् औदुम्बरं स्नानमुम
ये: अत्र क्षौरामलकस्नानादि निषिद्धतिथ्यादिव्यतिरिक्तविषयमिति हेमाद्रिमाधवश्च यत्तु चन्द्रिकायां प्रचेताः तैल
मुद्वर्तनं स्नानं दद्यात्सर्वाङ्ग एव तु श्राद्धभुग्भ्यो नखश्मश्रुच्छेदनं तु न कारयेदिति तन्निषिद्धतिथ्यादिविषयम् निषि
द्धतिथ्यादि तु प्रागुक्तम् अभ्यंगं तु कलिकायां कात्यायनः तैलमुद्वर्तनं देयं ब्राह्मणेभ्यः प्रयत्नतः तैरभ्यंगश्च कर्त
व्यो वर्ज्यकालं न चिन्तयेत् अपरार्के प्रचेताः स्नातोऽधिकारी भवति दैवे पित्र्ये च कर्मणि आर्द्रकच्छुल्लवासाः स्यान्म
नोच विजितेन्द्रियः हेमाद्रौ जाबालिः ताम्बूलं दन्तकाष्ठं च स्नेहस्नानमभोजनम् रत्यौषधपरान्नानि श्राद्धकर्ता विवर्ज
येत् वस्त्रविशेषमाह तत्रैव भृगुः नग्नः स्यान्मलवद्वासा नग्नः कौपीनकेवलः द्विकच्छोऽनुत्तरीयश्च अकच्छोऽवस्त्र
एव च नग्नः काषायवासाः स्यान्नग्नश्चार्द्रपटः स्मृतः नग्नस्तु स्निग्धवस्त्रः स्यान्नग्नः स्यूतपटस्तथा नग्नः कर्तोऽ
र्ध्वपुण्ड्रकोऽपीत् जपे होमे तथादाने स्वाध्याये पितृकर्मणि तत्सर्वं नश्यति क्षिप्रमूर्ध्वपुण्ड्रं विना कृतमिति हेमाद्रौ
पूर्वं वै वैश्वदेविकब्राह्मणेभ्यो दद्यात् ६

एतच्छ्राद्धदिननिमन्त्रणे ६

अर्धाधाने ४
आहिताग्नौ ४
मिश्रणोक्ते ग्रन्थिकादिभिः सह वोक्तेः ५

राम॰
२३०

क्तेः जप्तोदानं जपोहोमः स्वाध्यायः पितृकर्म च वृथा भवति विप्रेंद्रा ऊर्ध्वपुंड्रं विना कृतम् इति वृहन्नारदीयात् ऊर्ध्वं च ति
लकं कुर्याद्दैवे पित्र्ये च कर्मणीति वृद्धपराशरोक्तेः अन्ये तु ऊर्ध्वपुंड्रं द्विजातीनामग्निहोत्रसमो विधिः श्राद्धकाले तु संप्रा
प्ते कर्त्ता भोक्ता च तत्त्यजेत् वामहस्ते च दर्भांस्तु गृहे रंगवलिं तथा ललाटे तिलकं दृष्ट्वा निराशाः पितरो गता इति संग्रहो
क्तेः ऊर्ध्वपुंड्रं त्रिपुंड्रं वा चंद्राकारमथापि वा श्राद्धकर्त्ता न कुर्वीत यावत्पिंडान्न निर्वपेदिति विश्वप्रकाशवचनाच्च न का
र्यमित्याहुः अत्राचारो व्यवस्था अत एव नारदीये ऊर्ध्वपुंड्रं च तुलसी श्राद्धे नेच्छन्ति केचनेति ऊर्ध्वपुंड्रविधिर्विप्र श्राद्धभोक्तृभिरूर्ध्वपुं
विषयः निषेधः कर्तृपरः तिथिपृथ्वीचंद्रः यत्तु हेमाद्रौ देवलः ललाटे पुंड्रकं दृष्ट्वा स्कंधे माल्यं तथैव च निराशाः पित ड्रं कार्यं न कर्त्रा तु न ५
रो यान्ति दृष्ट्वा च वृषलीपतिमिति तत्कृष्णत्रिपुंड्रविषयम् प्राक्पिंडदानात्कृधाब्जैर्नालं कुर्यात्स्वविग्रहमित्याश्व
लायनोक्तेः पुंड्रं वर्तुलमित्यपरार्के मदनरत्ने च पृथ्वीचंद्रस्तु ऊर्ध्वं च तिलकं कुर्यान्न कुर्याद्वै त्रिपुंड्रकम् निराशाः
पितरो यान्ति दृष्ट्वा चैव त्रिपुंड्रकमिति वृद्धपराशरोक्तेः भोगस्तु तिर्यग्गलपो भवत्येव वर्जयेत्तिलकं भाले श्राद्धकाले च सर्वदा तिर्यग्वापूर्ध्व
पुंड्रं वा धारयेत्तु प्रयत्नतः इति व्यासोक्तेरित्याह पृथ्वीचंद्रोदये ब्राह्मे सदर्भेण तु हस्तेन यः कुर्यात्तिलकं बुधः आचम्य स विशुध्येत दर्भत्यागेन च
वीह श्राद्धारंभकालमाहापरार्के गौतमः आरभ्य कुतपे श्राद्धं कुर्यादारौहिणं बुधः विधिज्ञो विधिमास्थाय रौहिणं तु न लंघयेत् एतद
काहि वै पार्वणे तूक्तं मात्स्ये ऊर्ध्वं मुहूर्तात्कुतुपाद्यन्मुहूर्तचतुष्टयम् मुहूर्तपंचकं ह्येतत्स्वधाभवनमिष्यते तथा मध्याह्ने सर्वदा यस्मा
न्मंदीभवति भास्करः तस्मादनंतफलदस्तत्रारंभो विशिष्यते अथ श्राद्धपरिभाषा चंद्रिकायां कात्यायनः दक्षिणं पातयेज्जानु देवा
न्परिचरन्सदा पातयेदितरज्जानु पितॄन्परिचरन्सदा बौधायनः प्रदक्षिणं तु देवानां पितॄणामप्रदक्षिणम् देवानामृजवो दर्भाः पि
तॄणां द्विगुणास्तथा पृथ्वीचंद्रोदये ब्राह्मे आवाहनार्घ्यसंकल्पे पिंडदानान्नदानयोः पिंडाभ्यंजनकाले तु तथैवाञ्जनकर्मणि
अक्षय्यासनयोः पाद्ये गोत्रनाम प्रकाशयेत् तत्रैव परिशिष्टे क्षणे च पिंडदाने च गंधधूपाक्षये तथा संकल्पे चासने दीपे अंजना
भ्यंजने तथा अन्नार्घ्यदानाद्यन्ते गोत्रनाम च कीर्तयेत् कलिकायां संग्रहे आसनावाहने पाद्ये अन्नदाने तथैव च अक्षय्ये पिंड

अष्टमे मुहूर्ते ७ आ नवममुहूर्त्तम् ७

अस्मत्पिताऽमुकगोत्रोऽमुकशर्मा वसुरूप इत्यादि २

नि॰सिं॰ २३१ दानेच षष्ठ्यन्तुनामानि कीर्त्तयेत् मत्स्यः संबंधं प्रथमं ब्रूयात्गोत्रं नाम ततस्तथैव च पश्चाद्रूपं विजानीयात्क्रमएष सनातनः तत्रैव
सकारेणानुवक्तव्यं गोत्रं सर्वत्र धीमता सकारः कुतपो ज्ञेयस्तस्माद्यत्नेन तं वदेत् यथा काश्यपसगोत्रेति पराशरसगोत्रेति
पराशरसगोत्रस्य वृद्धस्य च महात्मनः भिक्षोः पंचशिखस्याहं शिष्यः परमधार्मिक इति मोक्षधर्मेषु प्रयोगाच्च तेन गोत्र
सगोत्रयोः पर्यायत्वात् शाखाभेदाद्व्यवस्थेति शूलपाणिः एतच्चाम्नाततेषामेव हेमाद्रौ वृद्धचेताः गोत्रस्वरांतं सर्वे
त्र गोत्रस्याक्षयकर्मणि गोत्रस्तु तर्पणे प्रोक्तः एवं कर्त्ता न मुह्यति सर्वत्रैव पितः प्रोक्तः पिता तर्प्पणकर्मणि पितुरक्षय
दने ६ काले तु पित्रे संकल्पने तथा शर्म्मान्नदानादिके कार्य्ये शर्मा तर्प्पणकर्म्मणि शर्म्मरणाक्षयकाले तु पितृणां दत्तमक्षयम्
स्वरांतं संबुध्यंतमिति हेमाद्रिः तत्रैव चंद्रिकायां च स्मृत्यंतरे गोत्रस्य त्वपरिज्ञाने काश्यपं गोत्रमुच्यते यस्मादाह श्रुतिः
सर्वाः प्रजाः कश्यपसंभवाः यत्तु सत्याषाढः अथाज्ञातबंधोः पुरोहितगोत्रेण चार्य्यगोत्रेण वेति तद्विवाहपरम् ना
माज्ञाने विशेषमाह हेमाद्रौ बोधायनः शर्मन्ति ब्राह्मणस्योक्तं वर्मेति क्षत्रियस्य तु गुप्तेति चैव वैश्यस्य दासेति शूद्रज
न्मनः पित्रादिनामाज्ञाने तत्रैव पृथिवीषत्पितावाच्यस्तत्पिता चांतरिक्षसत् अभिधानापरिज्ञाने दिविषत्प्रपिताम
हः पित्रादीनां नाम यदा पुत्रैर्न ज्ञायते तदा आपस्तंबसूत्रेष्वेवम् एतदन्यशाखापरम् आश्वलायनानां तु क्रमम् तत्र
ते यद्दिनामान्यविज्ञाने ततः पितामहप्रपितामहेति ब्रूयात् तत्कारिकापि नामानि चेन्न जानीयात्ततस्त्वादिवेदतः मा
न ततेति संबंधमात्रपरम् न पितृत्वादावपितृत्वेति गौडाः स्त्रीणां दाने तु नाम ज्ञेयम् दानेनाम स्त्रीणामिति पृथ्वीचंद्रो
पितर्व्येव ५ दये गोभिलोक्तेः केचिद्देवी शब्दांतमाहुरन्ये तु दैवी दा इति द्वयोः समुच्चयमाहुः हेमाद्रौ नारायणः विभक्तिभिस्तु य
त्किंचिद्दीयते पितृदेवते तत्सर्वसफलं ज्ञेयं विपरीतेन निरर्थकम् चंद्रिकास्मृत्यर्थसारयोः नारदीये अक्षय्यासनयोः
षष्ठी द्वितीयावाहने तथा अन्नदाने चतुर्थी च शेषाः संबुद्धयः स्मृताः यत्तु व्यासः चतुर्थी चासने नित्यं संकल्पे च एम॰
विधीयते प्रथमातर्प्पणे प्रोक्ता संबुद्धिमपरे जगुरिति अत्र शाखाभेदाद्व्यवस्थेति हेमाद्रिः हेमाद्रौ मनुः अर्घ्यावने २३१

किंचिद्दक्षिणभागेंगे परिवर्त्य २

जनं पिंडमन्नं प्रत्यवनेजनम् संबुद्धिं तत्र कुर्वीत शेषे षष्ठी विधीयते तत्रैव मातुर्विशेषो नागरखंडे मातर्मात्रे तथा मातुरसनेक
ल्पने ऽक्षय्ये गोत्रे गोत्रायै गोत्राया: अथ माघाविभक्तय: हेमाद्रौ प्रभासखंडे यज्ञोपवीतिना कार्यं दैवं कर्म प्रदक्षिणम् प्राची
नावीतिना कार्यं पितृकर्म प्रदक्षिणम् अनुपनीतस्त्रीशूद्रादेस्तूत्तरीयेणैव सव्यापसव्ये ज्ञेये तस्योपवीतस्थानीयत्वात् अप
सव्यं कृ श्राद्धं स्वकृत्वा कश्चित्स्वगोत्रज इति प्राह्लाच्युति वाचस्पति: यत्तु केचित् सदोपवीतिना भाव्यमित्यस्य पुरुषार्थत्वात् प्राचीना
वीतकालेष्वुपवीतान्तरेणान्यत्कार्यमेवेति तन्न विशेषणबाधात् यमदग्नि: सूक्तस्तोत्रजपं त्यक्त्वा पिंडाघ्राणं च दक्षिणम् आ
क्रान्तं स्वागतमर्घ्यं विना च परिवेषणम् विसर्जने सौमनस्यमाशिषां प्रार्थनं तथा विप्रप्रदक्षिणं चैव स्वस्तिवाचनकं विना पि
तृनुद्दिश्य कर्तव्यं प्राचीनावीतिना सदा हेमाद्रौ संग्रहे आदौ विप्रांघ्रिशौचान्तेऽभ्यर्चने विकरे कृते पिंडानुप्यार्चयित्वा च विसर्ज्य
ब्राह्मणांस्तथा आचमेच्छ्राद्धकर्ता च स्थानेष्वेतेषु सप्तसु आद्यन्तयोर्द्विराचामेच्छेषेषु सकृत्सकृत् तत्रैव श्राद्धारंभेऽवसाने च पा
दशौचार्चनान्तयो: विकिरे पिंडदाने च षट्स्वाचमनमिष्यते आश्वलायन: दानाध्ययनदेवार्चाजपहोमव्रतादिकान् न कुर्या
च्छ्राद्धदिवसे प्राग्विप्राणां विसर्जनात् एतन्नित्यवर्जमिति वोपदेव: इदं विष्णुभिन्नदेवपरम् विष्णोर्निवेदितान्नेन यष्टव्यं देव
तान्तरम् पितृभ्यश्चापि तद्देयं तदानन्त्याय कल्पते पितृशेषं तु यो दद्याद्धरये परमात्मने रेतोधा: पितरस्तस्य भवन्ति क्लेशभागि
न इति स्कांदात् पितर: सर्वमनुष्या विष्णुनाशितमश्नन्तीति श्रुते: य: श्राद्धकाले हरिभुक्तशेषं ददाति भक्त्या पितृदेवतानां
तेनैव पिंडास्तुलसीविमिश्रा आकल्पकोटिं पितरस्तु तृप्ता इति प्राह्लोक्तेश्चेति श्रीधरस्वामिन्नृसिंहपरिचर्यायाम् एतत्सर्वं निषेध
विरोधान्निर्मूलम् अत्र विशेषो हेमाद्रौ विष्णुधर्मे श्राद्धं कृत्वा तु समभ्यर्च्य तु वराहं जनार्दनम् शिवपुराणे पूजयित्वा शि
वं भक्त्या पितृश्राद्धं प्रकल्पयेत् पूर्वो निषेधस्तु विहितभिन्नपर: तथाह हेमाद्रौ दैवार्चादक्षिणांगादि: पादजान्वंसमूर्द्धसु
शिरोंऽशयान्तपादेषु वामांगादिश्च पैतृके कालिकायामन्यतरे श्राद्धारंभे तु ये दर्भा: पादशौचे विसर्जयेत् अर्चनादौ तु ये दर्भा
उच्छिष्टान्ते विसर्जयेत् मार्जनादौ तु ये दर्भा: पिंडान्ते न विसर्जयेत् उत्तानादौ तु ये दर्भा दक्षिणान्ते विसर्जयेत् प्रार्थनादौ तु ये

दानाध्ययनेत्यादि: ३

श्रुतिर्वचनानि विकल्पितानीत्यर्थ: ४

ब्राह्मणभोजनोच्छिष्टम् १

प्रकृतावेकस्मिन् पितरि बहुवचनदर्शनमसमर्थत्वं तस्मात् यथा प्रकृतिभूतयागे एकस्मिन् प्रयोगे सति पाशानिति प्रयुक्तस्यासमर्थत्वं तत्र हृतः ३

शुन्धन्तां पितामहाः शुन्धन्तां प्रपितामहा इति २ अत्र याश्चत्वामिति तिनोहेन ७ वि

मातामहादीनामपितृत्वात् यत्रैकवचनान्तः पितृशब्दस्तत्र मातामहस्याप्यूहः कार्य्यः २

पिण्डचालनं ८

नोह इत्यर्थः ४

दर्भान्नमस्कारे विसर्जयेत् ऊहमाह विष्णुः मातामहानामप्येवं श्राद्धं कुर्याद्विचक्षणः मंत्रोहेन यथान्यायं शेषाणां मंत्रवर्जितम् यथा
न्यायमिति यत्र बहुवचनान्तः पितृशब्दस्तत्र सर्वपितृवाचित्वान्नोहः तत्रापि शुन्धन्तां पितर इत्यत्रोह एव सर्वपितृवाचित्वे उत्तरमंत्रे
द्वैयर्थ्यात् बहुवचनं तु नोह्यते प्रकृतावसमर्थत्वात् पाशानितिवत् आगातेत्यनोहः तस्मादूहं नोहेदिति निषेधात् एकोद्दिष्टेप्ये
वम् प्रेतैकोद्दिष्टे त्वेकवन्मन्त्रानूहेदेकोद्दिष्ट इति विष्णूक्तेरूहः अत्रैव बहुवचनेप्यूहो वचनात् वक्ष्यमाणे तु विशेषं वक्ष्यामः शेषा
णामिति पितृव्याद्येकोद्दिष्टे आवाहनादि मंत्रवर्ज्जं कार्य्यमिति कल्पतरुः ऊहयोग्यपितृपदवान् मंत्र एव तत्र न प्रयोज्यः न तूहः
नापि पितृपदरहितः प्रयोज्य इति शूलपाणिः अर्थान्तरं चोक्तं प्राक् बह्वृचकारिकापि अर्घ्यप्रदानमंत्रे तु मात्रादि पदमावपेत्
शुन्धन्तामिति पित्रादौ मात्रादि पदमावपेत् मातृश्राद्धे पिंडदाने ये चेत्वामत्रान्वित्यत्र नोह इति कृत्तिकृत् तथा मातुः श्राद्धेप्यनूह
न कुर्यात् पिंडानुमन्त्रणाम् दशादानमुपस्थानं न तु कार्य्यमिति स्थितिः प्रवाहनमनूहेन तद्वत् प्राशनमिष्यते तथा आयं तु नस्ति
लोसीति उशंतस्त्वेति यानि तु अनूह्यः पितृशब्दोत्र पितृसामान्यवाचकः आप्रसेवानो नु वक्ष्यते हेमाद्रौ मार्कण्डेयः स्ना
तः स्नातान् समाहूतान् स्वागतेनार्चयेत् पृथक् कालिकायां नारदीये प्रायश्चित्तविशुद्धात्मा तेभ्योऽनुज्ञां प्रगृह्य च दद्याद्ब्रह्मदण्डार्थं
हिरण्यं कुशमेव च तत्रैव संग्रहे तिथिवारादिकं ज्ञात्वा संकल्प्य च यथाविधि प्राचीनावीतिना कार्य्यं सर्वं संकल्पनादिकम् सं
बंधं प्रथमं ब्रूयान्नामगोत्रे तथैव च वस्वादिरूपता चापि स्वपितॄणामनुक्रमात् चन्द्रोदये नारदीये श्राद्धार्थं समनुप्राप्तान्विप्रा
न्भूयो निमंत्रयेत् आवसत्वं वसत्पूर्वैर्द्युनि मंत्रणं परे घृ द्वितीयं तृतीयमामंत्रणमित्याह पूर्वं मया निमंत्रणीया इति निवेदनरूपमा
पत्तद्विधिमाह शौनकः गृहीत्वामुकसंज्ञस्यामुकगोत्रस्य चामुके श्राद्धे तु वैश्वदेवार्थे करणीयः क्षणस्त्वया इत्येवं श्राद्धकर्तृ
यादत्तेनेति वदेत्स तु श्राद्धस्य कर्त्ता संब्रूयात् प्राप्नोतु भवानिति सर्वे देवाः प्राप्नवानीति इतरस्तं प्रति द्विजः एवां पार्वणे पुरूरवार्द्रवौ
वाच्यौ पित्रादिरूपेण न वक्तव्यं रणीनाविधिना द्विजान् ततः कर्त्ता च बह्वृचोऽनाहिताग्निः पिंडपितृयज्ञपरिस्तरणादौ ध्यानात् कुर्यात्
समूर्द्ध्वनिनाप्येवमिति प्रयोगपारिजाते परिशिष्टे च भाष्यकारमते आह्निकेप्येवम् कल्पतरुकारमतेनेदम् हेमाद्रौ यमः समम
र्जितोपलिप्ते तु द्वारि कुर्वीत मंडलं उदक्प्लवमुदीच्यां स्यात् दक्षिणे दक्षिणाप्लवं ब्राह्मः उत्तरे क्षतसंयुक्तानिहर्वीयान्विन्यसेत्तु

पितृपदस्थाने मात्रादिपदं प्रक्षिपेत् ६
आधत्तेति पत्न्येम
ध्यापिण्डप्राशनं ८

पादादित्यर्थः ५

प्राग्रान् दक्षिणेन दक्षिणाग्रांस्तु सलिलाच्चिन्यसेत्कुशान् तत्रैव बोधायनः चतुरस्रं त्रिकोणं च वर्त्तुलं चार्द्धचंद्रकम् कर्त्तव्यमा
नुपूर्व्येण ब्राह्मणादिषु मंडलम् तत्रैव लौगाक्षिः हस्तद्वयमितं कार्यं वैश्वदेविकमंडलम् तद्दक्षिणे चतुर्हस्तं पितॄणामविशे
षेण कलिकायां संग्रहे तु प्रादेशमात्रं देवानां चतुरस्रं तु मंडलम् त्र्यन्त्रामष्टांगुलं तस्माद्दक्षिणे वर्त्तुलं तथैवं तत्क्रमम् यत्तु स्मृत्यं
तरे गर्त्तः पंचांगुलो विप्रे जानुमात्रो महीभुजि प्रादेशमात्रो वैश्ये च साधिकः सतु शूद्रके निम्नमूर्ध्वप्रमाणेन व्याख्यातो
देवपित्र्ययोः चतुरस्रं वर्त्तुलं च कथितं गर्त्तलक्षणम् पादप्रक्षालनं प्रोक्तमुपवेश्यासने द्विजान् तिलैश्चैव क्षालनं कुर्यान्नि
राशाः पितरो गता इति तन्मूलत्वे मंडलाग्रपृथक्कृत्ययम् तत्र गोमये हेमाद्रौ भृगुः अन्यत्र जीर्णदेहाया वंध्यायाश्च विशे
षतः आर्त्तायानवसूतायां न गोगोमयमाहरेत् मात्स्ये अक्षताभिः सपुष्पाभिस्तदभ्यर्च्यापसव्यवत् विप्राणां क्षाल
येत्पादानभिवंद्य पुनः पुनः प्रत्यङ्मुखः स्थितः कुर्याद्विप्रपादाभिषेचनम् तत्रैव भविष्ये प्रक्षालयेद्विप्रपादान्नुशान्नो
देवीरिति त्र्यृच पृथ्वीचंद्रोदये वृद्धवशिष्ठः न कुशाग्रेषु हस्तस्तु पाद्यं दद्याद्विचक्षणः कलिकायां संग्रहे ततः प्रक्षाल
येत्पादौ भार्यास्राविततवारिणा तथा श्राद्धकाले यदा पत्नी वामे नीरप्रदा भवेत् आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठ
ति तत्रैव नाथः प्रक्षालयेत्पादौ कर्त्ता पित्रादिकं ससु पाद्यानंतरमर्घ्यमपि दद्यादिति हेमाद्रिः तत्रैव लौगाक्षिः मंडला
त्तरदेशे दद्यादाचमनीयकम् तत्रैव विधाय क्षालनं तेषां द्विराचमनमिष्यते स्वयं चापि द्विराचामेद्विधिज्ञः श्रद्धयान्वि
तः हेमाद्रौ नारदीये यत्राचमनवारीणि पादप्रक्षालनोदकैः संगच्छन्ते बुधाः श्राद्धं मासुरं तत्प्रचक्षते हेमाद्रौ व्यासः
सव्येनैवासनं दद्यात्वादक्षिणेन दक्षिणं करम् व्याहृतीभिः समस्ताभिरासने तूपवेशयेत् समाधूमिति चेवाक्यो दक्षि
णाजानु संस्पृशन् आस्यतामिति तान्ब्रूयादासनं संस्पृशन्नपि याज्ञवल्क्यः द्वौ दैवे प्राक्त्रयः पित्र्य उदगेकैकमेव
वा मनुः हेमाद्रौ हारीतः दक्षिणाग्रदर्भेषु प्राङ्मुखान्ब्राह्मणान्भोजयेदुदङ्मुखान्वित्येक इति तन्त्रेत्रायणीयविषयम् प्राङ्मुखान्भो
जयेदुदङ्मुखान्वित्येक इति तत्र परिशिष्टात् विकल्प इति हेमाद्रिः माधवीयमतः भिक्षुको ब्रह्मचारी वा भोजनार्थमुपस्थितः उ

पविष्टेष्वनुप्राप्तः कामं तमपि भोजयेत् कौर्मे अतिथिर्यस्य नाश्नाति न तच्छ्राद्धं प्रचक्षते विप्रनियमे माधवीये पवित्रपा
णयः सर्वे ते च मौनव्रतान्विताः उच्छिष्टोच्छिष्टसंस्पर्शं वर्जयेत्तु परस्परम् तत्रासनानि पृथ्वीचन्द्रोदये यमः आसने कुत कृष्णाजिनम् २
पे दद्यादितरे वा पवित्रकम् हेमाद्रौ नागरखण्डे अयः शङ्कुमयं पीठं प्रदेयं नोपवेशनम् कालिकायां संग्रहे क्षौमं दुकूलं ने
पालं माविकं दारुजं तथा तार्णं पार्णं च शैलं चैव विष्टरादि च विन्यसेत् अग्निदग्धान्यायसानि भग्नानि च विवर्जयेत् हेमाद्रौ
छागलेयः पश्चाद्गत्वा गाडुपक्रम्य प्राच्यां पङ्क्तिर्यथा भवेत् दक्षिणाग्रासु स्थिता ह्येषा पितृणां श्राद्धकर्मणि पुलस्त्यः श्रीपर्णी
वारुणी क्षीरी जम्बुकाम्रकदम्बकम् सप्तमं वा कुलं पीठं पितॄणां दत्तमक्षयम् संग्रहे शमी च काश्मरी शल्लुः कदम्बो वरणा
स्तथा पञ्चासनानि शस्तानि श्राद्धे देवार्चने तथा कालिका॰ द्वौ दैवे प्राङ्मुखौ पित्र्ये त्रीन्विप्रानुदगाननान् पैठीनसिः कुत
पः श्राद्धवेलायां श्रोत्रियो यदि दृश्यते आश्वलायनः नीवीं वासोदशां तेन स्वरक्षार्थं प्रबन्धयेत् कात्यायनस्तु दक्षिणा
कटिदेशे तु तिलैः सह कुशत्रयम् यजुःकातीयम् नीवीकार्यादशागुप्तिर्वामकुक्षौ कुशैः सह तिलैश्च श्राद्धे पितृणां दक्षि
णापार्श्वे विपरीतानु दैविके इति स्मृत्यन्तरात् वामदक्षिणयोर्वेत्याचाराद्व्यवस्थेति मदनपारिजाते आचार्यः प्राणायामत्रयं
कृत्वा गायत्रीस्मरणं तथा श्राद्धकर्तास्मीति वदेत् विप्रैर्वाच्यं कुरुष्वेति ब्राह्मे ततस्तिलान्गृहीत्वा तान्विकिरेच्चाग्रदक्षिणा
म् श्रद्धया परया युक्तो जपेदपहता इति स्मृत्यर्थसारे अपहता इति तिलान्विकीर्य उदीरितामिति चापोक्षेत् पराशरः
तद्विष्णोरिति मन्त्रेण गायत्र्या च प्रयत्नतः प्रोक्षयेदन्नजातं तु शुद्धं द्रव्यादिशुद्धये हेमाद्रौ ब्राह्मे श्राद्धभूमौ गयां ध्यात्वा
यत् देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च नमः स्वाहायै स्वधायै नित्यमेव नमो नमः आदिमध्यावसानेषु त्रिरावर्त्त
जपेद्बुधः पितरः क्षिप्रमायान्ति राक्षसाः प्रद्रवन्ति च तत्रैव स्कान्दे तिला रक्षन्त्वसुरान्दर्भा रक्षन्ति राक्षसान् पङ्क्तिं वै श्रोत्रियो राम॰
रक्षेदतिथिः सर्वरक्षकः वसिष्ठः शुद्धवतीभिः कूष्माण्डीभिः पावमानीभिश्च पाकादि प्रोक्षेत् अथ देवार्चा तत्र प्रस्तुप २३३
चारमाधातयोरपादद्यादित्युक्तं जो स्मृत्यर्थसारे च हेमाद्रौ ब्राह्मे आसनेष्वासनं दद्याद्वामे वा दक्षिणेऽपि वा पितृकर्मणि

स ५ परिभूयेतिशेषः ३ प्रतिगृह्य २

विश्वेषां देवानामिदमासनं विश्वेभ्यो देवेभ्य इति वा ४
शंखं ७
वामेच दैवे दद्यात्तु दक्षिणे प्रचेताः आसने ब्वासनं दद्यान्नतु पाणौ कदाचन धर्मासीत्यमंत्रेण गृह्णीयसेतु तान्कुशान् धर्मासिवि
शिरञ्जा प्रतिष्ठितमूलिमंत्रः गालवः दर्भमादाय हस्ताभ्यां गृहीत्वा दक्षिणे करे दैवेक्षणः क्रियतां तु निरगुष्ठकरं ततः ॐ तथेति द्विजा ब्रू
युस्ते प्राप्नानुभवानिति कर्तृक्रियात नो विप्रः प्राप्नवानीति वे वदेत् पृथ्वीचन्द्रोदये छन्दोगपरिशिष्टे यवदर्भैश्च विश्वेषां देवानामिदमास
नम् दत्वेति ब्रूयाद्दद्याद्दैवेक्षणेङ्गतिक्षणम् तच्च षष्ठ्या चतुर्थ्या वा कार्य्यमिति सएव ततोऽर्घ्यं कल्पयेदिति मन्त्रादयः शौनकजय
ताभ्याम वृंरहितस्य दैवार्चनस्योक्ते राश्वलायनानादेवेष्वर्घ्यदाननेतिवोपदेवः तन्नपरिशिष्टप्रयोगपारिजातविरोधात् कश्चित्राद्धे
नुदैवेप्यर्घ्यं दद्यात् दैवेष्वपि तत्र एकं यद्दद्यादिहार्घ्यमित्युतिचादनादिति शौनकोक्तेः अथार्घ्यपात्रम् पृथ्वीचन्द्रोदये मात्स्यपाद्मयोः
पात्रं वनस्पतिमयं तथा पत्रमयं पुनः जेलुजं वापि कुर्वीत तथा सागरसम्भवम् शाले सौवर्णं ताम्ररौप्याश्मस्फाटिकं शंखश्रृंगमय
भिन्नान्यपि हियोग्यानि पात्राणि पितृकर्मणि हेमाद्रौ प्रजापतिः सौवर्णराजतैस्ताम्रखाड्गमणिमयैस्तथा यज्ञियैश्चमसैर्वापि
अर्घ्योर्घ्यं प्रयच्छेद्बुधः अत्र विप्रैकत्वाद्वित्वचतुष्कादावप्यर्घ्यपात्रद्वयं मानवसूत्रे तु द्वे वैश्वदेविके त्रीणि पित्र्ये एकैकमुभयत्र वेत्
एकमितिः १० क्रमम् तदेकविप्रपरं पात्रालाभपरं वेति हेमाद्रिः मदनरत्ने तु दैवे एकपात्रमुक्तम् पृथ्वीचन्द्रोपि त्रीणि पैतृकपात्राणि द्वे वै
श्वदेविके इति बह्वृचपरिशिष्टे त्वेकं चाह बह्वृचानां तु दैवे विप्रद्वित्वेप्येकमेवार्घ्यपात्रं मदशोदद्यादित्युक्तम् परिशिष्टप्रयोगपारि
जाते च कलिकायां हारीतः दत्तमक्षय्यतां याति खड्गेनार्घ्यं तु यत्कृतम् कृष्णमनुः मृन्मयं दारुजं पात्रमयः पात्रं च यद्भवेत् राज्ञ
तं दैविके कार्य्ये शिलापात्रं च वर्जयेत् पुराणसमुच्चये मन्त्रा भवतयोकांस्यमारकूटं जतुसम्भवम् त्रपुसीसलोहमयं सदा पात्रं
विवर्जयेत् तत्रैव अष्टांगुलं भवेत्पात्रं पितॄणां राजतं शुभम् दशांगुलं तु देवानां सौवर्णं शक्तितः कृतम् स्थापयेद्दर्भपात्रे द्वे
न्युब्जं तत्र कुशोपरि द्वे द्वे पवित्रे विधिवत्पात्रयोश्चोपरि क्षिपेत् जलपार्श्वः पवित्रेस्थ इति मन्त्रेण पवित्रे छेदयेत्तु ते ओषधीम
न्तरे कृत्वा अंगुष्ठांगुलिपर्वणा न नखेन काष्ठेन लोहेन नमन्त्यन खादिभिः वसिष्ठः तूष्णीं प्रोक्ष्याभेसापात्रे कुर्याद्धर्व्वि
लं ततः पूरयेत्पात्रयुग्मं तु कृत्वोपरि पवित्रकं बह्वृचपरिशिष्टे पात्रद्वयं यथार्घ्यं तैजसं वैकवस्तुनः प्राङ्मुखो मरुतो थे नश्र
न्नादद्यादवेक्षिपेत् यवोसीति यवांस्तत्र तूष्णीं पुष्पाणि चन्दनम् मानवसूत्रे सुमनसः प्रक्षिप्यान्तूष्णीं यवानप्रक्षिप्यति य

अर्घमर्घे ८

नि॰ सिं॰
२३४

मंत्रेण ७

वोसीतिमंत्रः पाद्मे यवोसिधान्यराजोसिवारुणोमधुसम्मिश्रितः निरोदः सर्वपापानांपवित्रमृषिभिः स्मृतम् राजोवावारुणोम
धुसंयुत इतिपरिशिष्टेपाठः गोभिलेनतुयवोसिसोमदेवत्य इतितिलमंत्रोत्रस्वाहायुक्तउक्तः हेमाद्रौयमः यवहस्तस्ततोदे
वान्विज्ञाप्यावाहनंप्रति आवाह्येदनुज्ञातोविश्वेदेवासआगत विश्वेदेवाःशृणुतेममितिमंत्रद्वयंपठेत् श्राद्धविश्वे
विश्वेदेवानामज्ञानेहेमाद्रौबृहस्पतिः उत्पत्तिनामचैतेषानविदुर्येद्विजातयः अयमुच्चारणीयस्तैर्मंत्रः अद्यसमन्वि
तैः आगच्छंतुमहाभागाविश्वेदेवामहाबलाः येयत्रविहिताःश्राद्धेसावधानाभवंतुते इदंचावाहनमर्घ्यपात्रासाद
नात् प्राक् हेमाद्रिक्रमम् तत्रकातीयेःप्राक्कार्यम् तथैवतत्सूत्रात् अन्येस्तदुत्तरम् पृथ्वीचंद्रोदयेप्रचेताः स्वयं
वपुष्पमादायचरणादिशिरोन्तकम् अर्चेतत्पर्चनंकुर्यादंतरेचोदकंतथा पित्र्येतुमूर्द्धादिपादांत पादप्रभृतिमूर्द्धांतंदैवि
केपूजनंभवेत् शिरःप्रभृतिपादांतंनमोवइतिपैतृके इतिमदनरत्नेप्रचेतसोक्तेः कालिकायांसंग्रहे तिष्ठन्कृतांजलि
र्भूत्वापठेन्मंत्रौसमाहितः विश्वेदेवाःशृणुतत्यागच्छन्तुचपरंततः हेमाद्रौजातूकर्ण्यः ततोर्घ्यपात्रसंपत्तिंवाचयित्वा
द्विजोत्तमान् तदग्रेचार्घ्यपात्रंतुस्वाहार्घ्यइतिविन्यसेत् गार्ग्यः दत्वाहस्तेपवित्रंचकृत्वापूजांचपादतः यादिव्याइति
मंत्रेणहस्तेष्वर्घ्यंविनिक्षिपेत् संग्रहे विश्वेदेवाइदंवोर्घ्यमितिदानंसमादिशेत् तदन्तेस्वाहानमइतिवाच्यम् यादि
व्याइतिमंत्रेणस्वाहाकारनमोन्तकमितिहेमाद्रौनागरखंडात् आघ्रवेणासूत्रेतुपाद्यमर्घ्यमाचमनीयमितिद्विज
करेनिनयेदित्यस्यैवत्रयमुक्तम् गभस्तिः अर्घ्यंपिंडप्रदानंचस्वस्यपक्षस्यतथैवच गंधपुष्पादिकंसर्वंहस्तेनैवतुदाप
येत् प्रतिविप्रंयादिव्येत्यावृत्तिः बह्वृचानांत्वनेनदत्तार्घ्यानुमंत्रणम् ततःपात्रदक्षिणेदेवेभ्यःस्थानमसीतिन्युब्जमुत्ता
नवाकार्यमितिगारुडेउक्तम् एतदापस्तंबानांनियतमन्येषांन हेमाद्रौविष्णुधर्मे गंधैःपुष्पैश्चधूपैश्चवस्त्रैश्चाप्यथ
भूषणैः अर्चयेद्ब्राह्मणान्भक्त्याश्रद्दधानःसमाहितः पृथ्वीचंद्रोदयेमार्कंडेयः चंदनागुरुकर्पूरकुंकुमानिप्रदा
पयेत् विष्णुः चंदनकुंकुमकर्पूरागुरुपद्मकान्यनुलेपनार्थेति व्यासः अपवित्रकरोगंधैर्गंधद्वारेतिपूजयेत् कालि
कायांस्मृतिः गंधद्वारेतिवैगंधमायनेतेचपुष्पकम् धूरसीत्यमुनाधूपमुद्दीप्यस्वेतिदीपकम् युवंवस्त्राणिमंत्रेण

मंत्रः १

प्रदेशः ५

अस्मेवाद्यं जलस्येव कर्मत्रयम् ६

यादिव्या-विश्वेदेवा×
इदंवोऽर्घ्यं स्वाहानमः
नपात्रेण ६
श्राद्धकारयिता ६

रामः
२३४

वस्त्रं दद्यात्प्रयत्नतः आसनेस्वासनं कुर्यात् दर्भैस्तु द्विजोत्तमः सुगंधश्च सुपुष्पाणि सुमाल्यानि सुधूपकम् सुज्योतिश्चैव दीपेन तु स्ना
छादनमिति तत्र मः विप्राणां गंधेन वै तुलं त्रिपुंड्रं वा न कार्यम् हेमाद्रौ देवलः ललाटे पुंड्रकं दृष्ट्वा स्कंधे मालां तथैव च निरा
शाः पितरो यांति दृष्ट्वा चैव वलीपलितम् पुंड्रवर्तुलमित्यपरार्के मदनरत्ने च पुंड्रं त्रिपुंड्रं वर्तुलं मंडलं वेदृंच उर्ध्वं च तिलकं कुर्यान्न
कुर्याद्वै त्रिपुंड्रकम् उर्ध्वं च तिलकं कुर्यात् दैवे पित्र्ये च कर्मणि निराशाः पितरो यांति दृष्ट्वा चैव त्रिपुंड्रकमिति वृद्धपराशरोक्तेः
तिर्यक्प्रलेपो भवत्येव वर्जयेत्तिलकं भाले श्राद्धकाले च सर्वदा तिर्यक्प्रलेपो उर्ध्वं पुंड्रं वा धारयेत्तु प्रयत्नेनेति व्यासोक्तेरिति पृथ्वी
चंद्रः यत्तु कल्हारदीये उर्ध्वपुंड्रं च तुलसी श्राद्धे नेच्छंति केचन नेति तत्कर्तृपरम् हेमाद्रौ ब्राह्मे पूतिकं मृगनाभिं च रोचनां
रक्तचंदनम् कालेयकं तुरुष्कं गंधं तु रूक्षं चापि वर्जयेत् कस्तूर्या विकल्पः इति हेमाद्रिः वृद्धशातातपः पवित्रं तु करे कृत्वा यः
समालभते द्विजान् राक्षसानां भवेच्छ्राद्धं निराशैः पितृभिर्गतैः पुष्पेषु ब्राह्मे जातीचंपकलोध्राश्च मल्लिका बाणबर्बरी चू
ताशोकाटरूषं च तुलसीं शतपत्रकम् कुब्जकं तगरं चैव मृगमारण्यकेतकी यूथिकामतिमुक्तं च श्राद्धयोग्यानि भो द्विजाः
२८ कमलकुमुदपद्मपुंडरीकं यत्नतः इंदीवरं कोकनदं कल्हारं च निवेदयेत् हेमाद्रौ वायुभविष्ययोः सुकुमारैः किशलयैर्दू
र्वांकुरैरपि संपूजनीयाः पितरः श्रेयस्कामेन सर्वदा स्कांदे जातिश्च सर्वदा तत्र याम मल्लिकाश्वेतयूथिका जलोद्भवानि
सर्वाणि कुसुमानि च चंपकम् तत्रैव वृद्धमनुः नतिप्रुक्तः शिखावर्जं माल्यं शिरसि धारयेत् वर्ज्यानि पृथ्वीचंद्रोदये भ
विष्ये केतकी तुलसीपत्रं विल्वपत्रं च वर्जयेत् द्रोणं च करवीरं च धत्तूरं किंशुकं तथा माधवीये स्मृत्यर्थसारे तुलसीनि
षिद्धा तुलसीनिषेधानिर्मूल इति हेमाद्रिः पिंडपरः तुलसीगंधमाघ्राय पितरस्तुष्टमानसाः प्रयांति गरुडारूढास्तत्पदं च
क्रपाणिनः इति प्रयोगपारिजातपाद्मोक्तेरिति वापुदेवः वृद्धपराशरः न जाती कुसुमैर्विद्वान् विल्वपत्रैश्च नार्चयेत् जपा
दिकुसुमडिंडीरूपिकासकरंटिका पुष्पाणि वर्जनीयानि श्राद्धकर्मणि नित्यशः हेमाद्रौ शंखः उग्रगंधीन्यगंधीनि चै
त्यवृक्षोद्भवानि च पुष्पाणि वर्जनीयानि रक्तवर्णानि यानि च जलोद्भवानि देयानि रक्तान्यपि विशेषतः अंगिराः

श्रामचिन्नमूतोढ क्षमोत्य: १

श्राद्ध ६ शिखायामेव धारयेन्नान्यतः शिरसि ६

नजातीकुसुमानि घात्न कदलीपत्रमिति जात्यां विकल्प इति हेमाद्रिः निषेधः पिंडविषयः कुंदपुष्पं भोक्तृनोर्दद्यान्नोन्मत्तं
गरुडध्वजे पितृजातीं च नो दद्याद्देवीमर्कं च नान्यदैवियदिति कश्यपयाज्ञवल्क्यौ तोरिति वोपदेवः स्मृतिसारे अगस्त्यपुष्पं
भृंगराजं च तुलसी शतपत्रिका चंपकं तिलपुष्पं च षडेते पितृवल्लभाः केतकी करवीरं च बकुलं कुंदकं तथा पाटलां च
वर्जातीं च श्राद्धे यत्नेन वर्जयेत् केचित्पिंडे पितुलसीमाहुः पितृपिंडार्चनं श्राद्धे यैः कृतं तुलसीदलैः प्रीणिताः पितर
स्तेन यावच्चंद्रार्कमेदिनीति मार्कंडेयोक्तेः धूपस्तत्रैव विष्णुधर्मे धूपस्तु गुग्गुलो देयस्तथा चंदनसारजः अगरुश्च
सकर्पूरस्तुरुष्कस्तु कतथैव च विष्णुः घृतमधुयुक्तं गुग्गुलं श्रीखंडदेवदारुसरलादि दद्यादिति तत्रैव देवलः ये
हिमारण्यगजा धूपाह सर्वान्ताहतांश्चय न तु श्राद्धे नियोक्तव्याये च केचोग्रगंधयः घृतेन केवलं दद्याद्दुष्टं वात्र गुगु
ग्गुलम् दीपमाह विष्णुः घृतेन दीपो दातव्यस्तिलतैलेन वा पुनः वसामेदोद्भवं दीपं प्रयत्नेन विवर्जयेत् वस्त्रमाहे
कौशेयं क्षौमकार्पासं दुकूलमहतं तथा श्राद्धेष्वेतानि यो दद्यात्कामानाप्नोति चोत्तमान् हेमाद्रौ ब्राह्मे वेत्ति यज्ञो
पवीतं दातव्यं वस्त्राभावे विजानता पितृभ्यो वस्त्रदानस्य फलं तेनाश्नुते खिलम् तत्रैव पाद्मे नित्यं क्रियावा यथा
शक्ति वस्त्राभावे प्रदीयते अन्यान्यपि देयानि तत्रैव कालिकापुराणे धात्वादिनिर्मितारम्या दीपिकाः श्राद्धकर्मणि पितॄन्
दीप्त्या यो दद्यात्स भवेद्भ्राजतं प्रियः यो धूपदानपात्रं तु पात्रमारात्रिकस्य च दद्यात्पितृभ्यः प्रयतस्तस्य स्वर्गोऽक्षयाग
तिः विष्णुधर्मे यः कंचुकं तथोष्णीषं पितृभ्यः प्रतिपादयेत् ज्वराद्ध्वानि दुःखानि स कदाचिन्न पश्यति स्त्रीणां श्राद्धे
तु सिंदूरं दद्युरंजनकांनि च निमंत्रिताभ्यः स्त्रीभ्यो यत्तेस्युः सौभाग्यसंयुताः हेमाद्रौ वादित्यपुराणे नक्तं भवं गो
दातव्यं नापि कार्पाससंभवम् पितृभ्यो नापि मलिनं नापयुक्तं कदाचन नच्छिद्रितं नापदशं न धौतं कारुणापि च का
र्पासनिषेधोऽन्यसंभवे तत्रैव पितॄन्सत्कृत्य वासोभिर्दद्याद्यज्ञोपवीतकम् यज्ञोपवीतदानेन विना श्राद्धं तु निःफ
लम् एतद्यतिस्त्रीशूद्रश्राद्धेष्वपि देयमिति हेमाद्रिः तत्रैव नृसिंहपुराणे कमंडलुं ताम्रमयं श्राद्धेषु च ददाति यः

श्रीर्हरिकंवर स्त्रीरांगस्याचंडातक मंग्रकम् ४ पितृस्मृति ७

कपूरदानी ८ उग्गा ८ चौकी ८ चिलमची ८

काष्ठेननिर्मितंवापिनारिकेलमयापिवा दद्यात्कमंडलुंश्राद्धेसश्रीमानभिजायते योमृत्तिकाविरचितान्श्राद्धेषुचघट
न्नृमुमान् प्रदद्यात्करकान्वापिसोक्षयंविंदतेसुखम् तत्रैव उपानच्छत्रवस्त्राणिभुक्तिपात्रकमंडलुम् शयनास
यनानिदर्पणंव्यजनानिच अन्नेसुसंस्कृतंगंधास्ताम्बूलंदीपचामरे पितृभ्योयःप्रयच्छेत्तुविष्णुलोकंसगच्छति
सौरपुराणे चामरंतालवृन्तंचछत्रंतवस्त्रंचदर्पणम् दत्वापितृणामेतानिभूमिपालोभवेदिह तत्रैव नंदिपुरा
णे अलंकाराःप्रदातव्यायथाशक्तिहिरण्मयाः केयूरहारकटकमुद्रिकाकुंडलादयः स्त्रीश्राद्धेषुप्रदेयाःसुरत
कारास्तुयोषिताम् मंजीरमेखलादामकर्णिकाकंकणादयः तथा आदर्शव्यजनच्छत्रशयनासनपादुकाः
मनोज्ञाःपटवासाश्चसुगंधाश्चूर्णमुष्टयः अंगारधानिकाःप्रीतयोगपट्टाश्चयष्टयः कटिसूत्राणिरौप्याणिमेखला
श्चैवकेवलाः कर्पूरदश्चभांडानिताम्बूलायतनंतथा भोजनाधारयंत्राणिपतद्ग्राहास्तथैवच तथांजनशलाकाश्च
केशानांचप्रसाधनम् एतान्दद्यात्तुयेःसम्यक्सोश्वमेधफलंलभेत् स्कांदे सौवर्णंराजतंचापिकांस्यंताम्रमथापि
र्मितम् दत्वाभोजनपात्रंतुसम्राट्भवतिभूतले. वामनपुराणे वंदीकृतास्तुयेकेचित्स्वयंवायदिवापरैः येनकेना
प्युपायेनयस्तान्मोचयतेनरः पितरस्तस्यगच्छंतिशाश्वतंपदमव्ययम् पराशरः वाचयेत्परिशिष्टंवासादंत्वावि
धानतः नारदीये देवांश्चसमनुज्ञातोयजेत्पितृगणांस्तथ तत्रपित्र्ये आसनाद्यशेषंसमर्चनंकांडवैश्वदेविकेज्ञेय
विशेषस्तत्वात तत्रासनेद्विगुणभुग्नाःकुशाः अत्रावाहनमासनात्पूर्वंवाप्यएरणोत्तरंवेतिस्मृतिषुपक्षाउक्ताः
एकवाशाखाभेदेनव्यवस्था द्वितीयपक्षएववकुसंमतः तत्रार्घ्यमाहाश्वलायनः तैजसाश्ममयमृन्मयेषुत्रिषुपा
एकवस्तुकृतेषु ४ त्रेष्वेकद्रव्येषुवादर्भांतर्हितेष्वपःप्रसिच्यशन्नोदेवीरित्यनुमंत्र्यतिलानावपति तिलोसिसोमदेवत्योगोसवेदेवनिर्मि
तः प्रत्नवद्भिःप्रत्तःस्वधयापितृनिमांल्लोकान्प्रीणयाहिनःस्वधानमइति अश्ममयस्फाटिकादिमृन्मयहस्त
तेर कमेवकुलीलचक्रनिष्पन्नमासुरदेविकंततः तदेवहस्तघटितंदेविकंकेवलंतद्यतिछंदोगपरिशिष्टात् अन्या
न्यपिपात्राणिपूर्वमुक्तानि मनुः अन्नाभावेद्विजाभावेयद्येकोब्राह्मणोभवेत् पात्राणापादयेत्त्रीणि नतुब्राह्मणा

उत्तरतत्त्रारभ्यस्थापनेनदक्षिणादिकसमाप्ते
पुपात्रेषु ४

नि॰ सिं॰
२३६

संख्यया दत्तकादेः कर्तुर्द्विपितृत्वादावपिवचनात्त्रीण्येवपात्राणीतिहरिहरः माधवीयेवैजवापः अर्घ्येपितॄणांत्रीण्येवकुर्यात्पा
त्राणिधर्म्मवित् एकस्मिन्वाबहुष्वावाप्राणेणबुधयथाविधि हेमाद्राववप्येवम् अत्रानुमन्त्रणेसकृत् तिलोसीत्यस्यप्रतिपात्रम
वृत्तिः पितृशब्दस्यानूहश्चेतिवृत्तिकृत् दर्भैश्चत्रिगुणापवित्रम् तिस्रस्तिस्रः शलाकास्तुपितृपात्रेषुपार्वणे एकोद्दिष्टेशलाका
केकान्निधायोदकमाहरेदितिहेमाद्रौचतुर्विंशतिमतात् तत्रैवविष्णुः दक्षिणाग्रदर्भेषुदक्षिणापवर्गंचमसेषुपवित्रान्तर्हितेष्व
पआसिंचेच्छन्नोदेवीरितिमन्त्रेणजलासेचनवत्कुचभिन्नविषयम् अस्मिन्पक्षेप्रतिपात्रमन्त्रावृत्तिः कारिकायाम् गंधपु
ष्पाणिवेतेषुपात्रेषुप्रक्षिपेदथ ब्राह्मे जलंक्षीरंदधिघृतंतिलतण्डुलसर्षपान् कुशाग्रमधुपुष्पाणिदत्वाचामंत्रतः स्वयम्
जातूकर्ण्यः ततोर्घपात्रसंपत्तिंवाचयित्वाद्विजोत्तमान् तदग्रेचार्घ्यपात्राणिस्वधार्घ्याइतिविन्यसेत् ततस्तिलहस्तोविप्र
सव्यजानोर्दक्षिणाकरंस्पृष्ट्वावाहनंपृच्छेत् अत्रगोत्रसंबंधनामानीतिद्वितीयान्तत्वंचप्रागुक्तम् वैजवापगृह्ये तिष्ठन्पितॄन्ना
वाहयिष्यामीत्युक्त्वामन्त्र्य कौर्मे अपसव्यंततःकृत्वापितॄणांदक्षिणामुखः आवाहनंततःकुर्यादुशन्तस्त्वेत्यृचाबुधः आ
वाह्यतदनुज्ञातोजपेदायन्तुनस्ततः अत्रअपसव्यस्यापिप्रागुक्तोविकल्पः अत्राद्यमन्त्रावृत्त्याऽस्मत्पितरममुकशर्माणममुकगो
त्रंवसुरूपमावाहयामीत्याद्युक्त्वामूर्द्धादिपादान्तंतिलान्विकीर्य्यायन्तुनइतिसर्वान्तसकृज्जपेदितिनिबंधाः अत्रोपवेशन
संवेशनपाद्यार्घ्याचमनीयान्यपिहेमाद्रिणोक्तानि तान्यथर्ववेदिनांनियतानिनान्येषाम् तेषांचप्रपितामहादिपितृतत्पा
तिलोदकेनसर्वःप्रयोगः वाराहे गंधपुष्पार्चनंकृत्वादद्यादुष्णंतिलोदकम् गार्ग्यः शिरस्तःपादतोवापिसम्यगभ्यर्चयेत्ततः
ततः स्वधार्घ्याइतिपितृपितामहादिविप्राग्रेप्रत्येकंनिवेदयेदितिकारिकायामुक्तोच आश्वलायनः प्रसव्येनतरपाणापृ
ष्ठान्तरेणोपवीतित्वाद्दक्षिणेनवोसव्यापगृहीतेनपितरिदन्तेर्घ्यंपितामहेदन्तेर्घ्यंप्रपितामहेदन्तेर्घ्यमित्यपूर्वन्ताःप्रतिग्र
हयिष्यन्सकृत्सकृत्स्वधार्घ्याइतिप्रसृष्टाअनुमन्त्रयेतयादिव्याआपःपृथिवीसंबभूवुर्याअन्तरिक्ष्याउतपार्थिवीर्याः
हिरण्यवर्णायज्ञियास्तान्आपःशंस्योनाभवन्त्विति अर्घ्यादिप्रागगंधादेर्यज्ञोपवीतमेव अर्घ्यदानात्प्रागत्वा अपे राम:
ददात् यद्यप्यत्रसव्येनदक्षिणेनवार्घ्यंददायादित्युक्तम् तथापिदक्षिणेनत्यभिमतार्थः कारिकायामुक्तोचैवम् पित्र्यादे २३६

श्राद्धरोनितिनीता

पित्र्यंसर्वंकर्मप्राचीनावीतिनाकार्य्यमित्युक्तम् । अधुनोपवीतित्वादितिहेतोरतत्रारभ्यमत्रवीणगंधमाल्यादिप्रदानाद्यज्ञोपवीतिनाकार्य्यमितिश्चायिदः ।इतरस्यसव्यस्यपाशायुष्ठान्तरेणावृप्रय॰
च्छेत्॰ उपवीतित्वाद्धेताः येनपाणिनाकर्मकरोतिदक्षिणेनवासव्येनवातस्मिन्नंसेयज्ञोपवीतेस्थितेप्राचीनावीतीभवतितत्तोन्यस्मिन्नंसेस्थितेउपवीतीभवति। ततःसव्यपाणिपितृतीर्थेनदातव्यमि
सर्वः । अथवासव्यपाणिःशिष्ठगृहीतत्वाद्दक्षिणपाणिःसव्येनगृहीत्वादक्षिणेनवापाणिनायवीतोजनाअर्घ्यंप्रयच्छेत्॰ हिमाद्रिमतमाणांनिनिमेत्रेयघायाअमंप्रयच्छेत्॰ अपूर्वं अर्घ्यदाना

अर्घ्यपात्रस्थं जलं पात्रे किंचित्स्थापन ४
पुरःसरमादाय ४

यदा प्रतिविप्रमेकैकः पूजांगभूतपदार्थो दीयते तदा सपदार्थानुसमयः उच्यते यदा नु पदा
र्थः काण्डं प्रतिविप्रं दीयते तदा स काण्डानुसमय उच्यते काण्डसमूहः २

अर्पयेत् ४

त्रिभिः पात्रैर्दद्यात् पितुः स्थाने विप्रत्रयं चेदेकार्घ्यं विभज्य दद्यात् त्रयाणां स्वधार्घ्या इति सकृन्मन्त्रः एवं पैतामहादावपि अन्यज
लदानमर्घ्यमंत्रावृत्तिश्च प्रतिविप्रमावर्त्तते नेत्युगन्धादौ च प्रतिविप्रं पदार्थानुसमयः काण्डानुसमयो वा पित्रादित्रयाणामेकविप्र
पक्षे त्रिभिः पात्रैरेकस्यैवार्घ्यं दद्यादिति वृत्तिः कारिकापि स्वधार्घ्या इत्यपोह्यास्ता उपवीती निवेदयेत् निवेदनात्प्राक्प्रा
चीनावीतमेवेत्यर्थः अर्घ्यसंश्रवमादाय दक्षिणेन तु पाणिना सव्यहस्तगृहीतेन निनयेत्पितृतीर्थतः दत्त्वा दत्त्वाभि
नीतास्ता या दिव्या चानुमंत्रयेत् यत्तु या दिव्या इति मन्त्रेणाह स्तब्धार्घ्यं विनिक्षिपेदिति यच्च वाराह तिलाम्बुना चापसव्य
दद्यादर्घ्यादिकं द्विज इति यच्च व्यासः गोत्रसंबन्धनामानि पितृणामनुकीर्तयेत् एकैकस्य तु विप्रस्य अर्घ्यपात्रं विनिक्षि
पेदिति तदन्यचातिरिक्तविषयम् ततआचमनं एवमातामहस्यापि आश्वलायनः संस्रवान्समवनीय तानभिरद्भिः
पुत्रकामो मुखमनक्ति संस्रव शेषः संश्रवो हि परिशिष्टो भवतीति शतपथश्रुतेः केचित्तु हस्तगलितान्वदन्ति सम
वनीयां तद्धे पात्रे पितृपात्रे आसिञ्चेदिति वृत्तिः प्रथमे पात्रे संश्रवान् समवनीयेति कात्यायनसूत्राच्च श्राद्धे तु प्रतिविवादलोक
नमुत्क्रमं स्कान्दे त्वायुःकामस्य नेत्रासेचनमुत्क्रमम् पित्र्यविप्रः प्राङ्मुखस्य कर्तुरभिषेकः कार्य इति केचित् आश्वलायनः
नोद्धरेत्प्रथमं पात्रं पितॄणामर्घ्यपातितम् आवृतास्तत्र तिष्ठन्ति पितरः शौनकोऽब्रवीत् यावद्विप्रविसर्जनमिति नित्यमर्घ्यपादेय
मीयेः पाठः अत्र वृत्तिः पितृपात्रं समवनयनदेशान्न चालयेत् आश्राद्धसमाप्तेः यस्मात्तत्र तृतीयपात्रेणावृता इति यच्च
प्रथमपात्रमेवन्युब्जितं कुर्यादिति कामाभावेपीदमेव शेषप्रतिपादनम् हेमाद्रौ कौर्मे संश्रवांस्ततः सर्वान्पात्रे कुर्यात्समा
हितः पितृभ्यः स्थानमसीति न्युब्जं पात्रं निधापयेत् शूलपाणौ यमस्तु पैतृकं प्रथमं पात्रं तस्मिन्पैतामहं न्यसेत् प्रपिताम
हं ततो न्यस्य नोद्धरेन्न च चालयेदित्याह अथ संस्रवानानीय तृतीयेनाच्छाद्य न्युब्जीकुर्यादिति सर्वैकवाक्यतया पार्थ इति केचित् अ
भिः गन्धादिभिस्तदभ्यर्च्य तृतीयेनापिधापयेत् पितृभ्यः स्थानमसीति न्युब्जं चादर्शोर्चितेऽर्चयेत् कल्पतरुः विप्रवाम इति हला
युधः कर्तुर्वाम इति शूलपाणिः अर्चनं न्युब्जीकृते पितृत्वम् सुब्रमुत्तरतो न्यसेदिति प्रचेतसोक्तेः सर्वविप्रोत्तरतो न्यसेद्

मार्जयन्ति ८

पात्रीयपात्रावरण
रहितमेवाधोमुखं।

सम्यक् स्वयं तु दका
न्यभ्य इति संश्रवाः अ
र्घ्यपात्रस्थशेषजला
नितान्भिरभीकृत्य ७

आच्छादिताः पित
रस्तिष्ठन्तीत्यर्थः ६

मुखमनक्तीत्याद्येव ५

संस्रवसमूहेन ८

संस्रवसमूहे ६

पितृभ्यः स्थानमसीति वाक्ये पि अस्थानमसीत्यादिना ऊहेन २

अच्छादितमुखम् १

नि॰ सिं॰ २३७

तिहेमाद्रिः उत्तानं विन्यसेत्तं वापि पितृपात्रं न तु न्युब्जं वेदिस्पृष्टं न सोमेन्र्न्युब्जं तेन साधुः मातामहादिसंस्रवान् पि पितृपात्र एव गृहीत्वा प्र
याजे वृत्ते तु तान्युब्जीकुर्यादिति शूलपाणिः एकोद्दिष्टे तु हेमाद्रौ न्युब्जतेति पितृनर्को श्रीदत्तः यमोपि स्पष्टमुत्तानमन्यत्र नीत
मुच्छादितं तथा पात्रं दैवं चाप्युत्तानं त्याज्यं पितरस्तेन शापन्ति च वैश्वदेवे उत्तानमिति मदनपारिजातः वैजवापः तस्योपरि कुशा
न्दत्वा प्रदद्याद्दैवपूर्वकम् गंधपुष्पाणि धूपं च दीपं वस्त्रोपवीतके अत्र गंधादेर्दैवपित्र्ये च पदार्थानुसमयः स्याद्याज्ञवल्क्यो
क्तकांडानुसमयेन विकल्पो ज्ञेयः बह्वृचानां तु सूत्रे देवानुक्तेः कांडानुसमय एव अत्र प्राचीनावीतं नाम गोत्रं स्वधा
पुनः प्राक् अन्यद्देववत् तदन्ते चाचमनं च हेमाद्रौ कालिकापुराणे निर्वर्त्य ब्राह्मणादेशात्क्रियामेवं यथाविधि भाज
नोत्तितमो दद्याद्धस्तशौचं पुनः क्रमात् आदेशात्पात्राणि दद्यादित्यन्वयः तेन तत्रापि प्रश्नानुज्ञे ज्ञेये तत्रैव ब्राह्मे मंड
लानि च कार्याणि नैवारश्चूर्णकैः शुभैः गौरमृत्तिकया वापि भस्मना गोमयेन वा भृगुः भस्मना वारिणा वापि कारयेन्मंड
लं ततः चतुःकोणं द्विजाग्र्यस्य त्रिकोणं क्षत्रियस्य तु मंडलाकृति वैश्यस्य शूद्रस्याभ्युक्षणं स्मृतम् बह्वृचपरिशिष्टे दैवे च
तुरस्रं पित्र्ये वृत्तं मंडलं कृत्वा क्रमेणास्य यवान्सतिलांश्च दर्भान्दद्यादित्युक्तम् मार्कण्डेयः यातुधानाः पिशाचाश्च क्रूरा ये चैव
राक्षसाः हरंति रसमन्नस्य मंडलेन विवर्जितम् हेमाद्रौ हारीतः भूमौ च न निदध्यान्नापरि पात्राः सौवर्णानीह रौप्याणि
कांस्यानि तदसंभवे अन्यान्यपि हि कार्याणि दारुजान्यपि जानता नायसान्यपि कार्याणि पैत्तलानि न तु क्वचित् न च सी
समयानीह शस्यन्ते त्रपुजान्यपि अत्रिः पंचाशत्पलिकं कांस्यं तदधिकं भोजनाय वै गृहस्थेस्तु सदा कार्यमभावे हेमरा
ज्यतयोः पालाशेभ्यो विना न स्युः पर्णपात्राणि भोजने पृथ्वीचंद्रस्तु कांस्यपात्रे हविर्दैवानि राज्ञाः पितरो गता भूतिब्राह्म
केः कांस्यपात्रनिषेधमाह बोपदेवस्तु स्मृतिसंग्रहमुदाजहार श्राद्धे पलाशपत्राणि मध्येकोदुंबराणि च पारिकाकुट
कल्हारकंकचानि क्रमाज्जगुः कदलीचूतपनसजंबुपुन्नागचंपकाः अलाभे मुख्यपत्राणां ग्राह्याः स्युः पितृकर्मणि रामः २३७
हेमाद्रौ तु कदलीपत्रनिषेधमाहांगिराः नजाकुसुमानि दद्यान्न कदलीपत्रमिति क्रतुः असुराणां कुले जाता रंभा पूर्व

तो १

गृहे भवो गृह्यो लौकिकस्तस्मिन् ६ अग्नौकरणार्थम् ५
अग्नौकरणं ८

परिग्रहे तस्याद्दर्शनमात्रेणा निराशाः पितरो गताः एवं पात्राण्यासाद्य भस्ममर्यादां कृत्वा विप्रहस्तशोधनं कुर्यात् तत्र पि
शाचरक्षार्थं इति मंत्रद्वयं केचित् पठंति मात्स्ये अकृत्वा भस्ममर्यादां यः कुर्यात्पाणिप्रशोधनम् आसुरं तद्भवेच्छ्राद्धं पितॄ
णां नोपतिष्ठते तत्रैव ब्रह्माण्डे प्रक्षाल्य हस्तपात्रादि पश्चाद्दर्भविधानवत् प्रक्षालनजलं दर्भैस्तिलमिश्रं क्षिपेच्छुचौ म
पादप्रक्षालनमंडलो परि ४ ण्डले परि हेमाद्रिः अथाग्नौकरणम् हेमाद्रौ मार्कण्डेयः आहिताग्निस्तु जुहुयाद्दक्षिणाग्नौ समाहितः अनाहिताग्नि
आवसथ्ये श्चौपसदे अग्न्यभावे द्विजेऽप्सु वा वायवीये आहुत्य दक्षिणाग्निं तु होमार्थं वै प्रयत्नतः अग्न्यर्थं लौकिकं वापि जुहुयात्कर्म
सिद्धये आहिताग्निः सर्वाधानी तु गृह्य एवेति चंद्रिकापरः एवं मिताक्षरामाधवादयः तस्यापि दक्षिणाग्नौ लौकिके वा गृह्य इ
ति हेमाद्रिः कल्पतरुश्च आद्यपक्ष एव तु युक्तः बहुसमतत्वात् यद्यपि स्मार्तमग्नौकरणं श्रौते दक्षिणाग्नौ नयुक्तम् तथापि व
चनाद्भवेतीति हेमाद्र्यादिः चंद्रिकादयः दर्शश्राद्ध एव आब्दिकादिषु तु सर्वाधानी पाणावर्द्धाधानी गृह्ये कुर्यादिति हे
माद्रिमाधवश्च पक्षान्तकर्म निर्वर्त्य वैश्वदेवं च साग्निकः पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः इति लौगाक्ष्यादिभिः को
मात्कैर्विहितदक्षिणाग्नित्वात् अत एवात्र वचने साग्निकः आहिताग्निरुक्तो हेमाद्रिणा एतदापस्तम्बादीनामेव आश्व
लायनस्य त्वाहिताग्नेः पाणावेवेति वृत्तिः अर्द्धाधानिनः गृह्ये हव्यमिति वृत्तिकरणोक्तिः प्रयोगपारिजातपरिशिष्टे च वापद
वस्त्वाह हेमशब्दः पिण्डपितृयज्ञपरः पितृयज्ञे तु जुहुयाद्दक्षिणाग्नौ समाहितः आहुत्योपासनाग्नौ तु निरग्निर्लौकिके नले
अनग्निर्द्विजभार्यस्य पाणौ समुपस्थिते संधार्याग्निं ततः कुर्याद्धोममग्निसमुत्सृजेदिति त्रिकाण्डमण्डनोक्तेः आहुगृह्याग्न
वेवेति लौकिकाग्न्यादिविधानं चैतत्तित्तिरीयादिविषयम् बह्वृचस्य त्वनग्नेरपि पाणिहोम एव अग्निपाणिविना सूत्रे विधान
गानुक्तेः अस्य भावे तु विप्रस्य पाणावेवोपपादयेदिति मनूक्तेश्च कात्यायनादयः क्वचित्साग्नेरपि पाणिहोम उक्तो गृह्य
परिशिष्टे आन्वष्टक्यं च पूर्वेद्युर्मासिमास्यपार्वणम् काम्यमभ्युदयेऽष्टम्यामेकोद्दिष्टमथाष्टमम् चतुर्ष्वाद्येषु साग्नीनां
वह्नौ होमो विधीयते पित्र्यब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्वपीति एकोद्दिष्टं सपिण्डीकरणम् मृद्धतन्निषेधात् बह्वृचभा

गार्हपत्याद्दक्षिणाद्वानीतः ६ दर्शश्राद्धे ८
ग्ना

नि॰ सिं॰ २३८

अकारस्तु सर्वैकोद्दिष्टेषु पाणिहोममाह । इदं वहृचानामेव अत्रेदं तत्त्वम् स्थालीपाकेन सह पिण्डार्थमुद्धृत्येति सूत्रेणात्राश्वर्वः स्था
लीपाकश्चोद्यते सर्वश्राद्धेषु प्रसंगात्तेनानुवादोयमिति वृत्तिकारिकोक्तेः पार्वणे आर्थिकस्थानेयास्य वार्षिकादिष्वनेति देशादर्शधानि
नापि पाणिहोम एवेति वृत्तिस्वरसः एवमासिकादावपि षोडशेमासिके श्राद्धे सपिण्डीकरणे न तथा पाणावेव तु होतव्यमन्यत्राग्नौ तु
हूयते इति वा पदेवोदाहृतवचनाच्च भाष्यकारमतेन तु सूत्रे स्थालीपाकेनेति करणे त्वित्तपवच्छ्रवणात्पार्वणे सांगो ऽतः काम्यादिषु
९ तन्मावेकाध्ये सपिण्डदानस्याप्यभावः एतद्देवानुसृत्यापि वृत्तावपि वार्षिकादौ व्यतिषंग उक्तेः प्रयोगपारिजातपरिशिष्टे च तैनत
न्मते द्वीधानि नाग्नावेव वस्तुतस्तु स्थालीपाके सह शाखया प्रस्तरं प्रहरतीतिवत्सहभावमात्रश्रुतेः पत्नीवतेत्वधुरुपलक्षणमि
वनागतत्वम् नत्ववान्गानुरोधेन प्रधानभूतपिण्डदानस्यागो युक्तः तेन व्यतिषंगोभावेप्यग्नौ होमो भवतीति वा पदेवः अनाहि
ताग्नेर्गृह्याग्निमतस्तु सर्वमतेग्नावेव वार्षिकादौ वृत्तिमते व्यतिषंगो न अन्यमते त्वस्ति अत्र यथाचारमनुष्ठेयम् आश्वला
यनः उद्धृत्य घृताक्तमन्नमनुज्ञापयत्यग्नौ करिष्ये करवै करवाणीति वा प्रत्यनुज्ञा क्रियताम् कुरुष्व कुर्विन्यथाग्नौ यथोक्तं पुर
स्तादिति व्यतिषंगपक्षे इदमिति वृत्तिः करवै करवाणीत्यत्राग्नावित्यनुषंगः पुरस्तात्पिण्डपितृयज्ञे तच्चैवम् मेक्षणेनावदाया
वदानसंपदा जुहुयात्सोमाय पितृमते स्वधा नमोग्नये कव्यवाहनाय स्वधा नमः इति स्वाहाकारेण वाग्निः एवं यज्ञोपवीती मेक्षणमनु
अग्नौ प्रक्षिप्य ७ प्रहृत्येति अवदानसंपदा उपस्तरणाद्यर्थः व्यतिषंगपक्षे अग्निः प्रणीतेयं होमान्यथामुख्य अतिप्रणीतेग्नावेध्ममुपसमा
उपस्तरणं द्विरवदा धायेति वृत्तिश्च परिशिष्टात् केचित्तु स्तरणादि निर्वहणार्थत्वान्मुख्य वदंति तदेतद्धिरेपोधाद्वित्यम् प्रयोगपारिजातेप्येवम् शौनकः
नमभिघारणं चेत्य स्वाहाकारेण होमे तु भवेद्यज्ञोपवीतवान् तत्र प्रागग्नये कुर्यात्पश्चात्सोमाय हूयते अग्नौ यज्ञोपवीत्येव प्रक्षिपेन्मेक्षणं ततः छ
वदानसंपत्तिः ७ न्दोगपरिशिष्टे अग्नौकरणहोमश्च कर्तव्य उपवीतिना अपसव्येन वा कार्यो दक्षिणाभिमुखेन च कातीयानां त्वपसव्यमेव पि
ण्डपितृयज्ञवद्धुत्वेति सर्वत्रातिदेशात् सव्यं तु छन्दोगपरम् गोभिलेन तु उत्तरमेवापसव्यमुक्तेः कृत्वाग्नौ जुहुयुः सव्येनापसव्येन या
जुषाहुतिवत् याज्ञवल्क्योक्तेश्च अथ पाणिहोमः आश्वलायनः अग्न्यनुज्ञायां पाणिष्वेवेति पिण्डपितृयज्ञकल्पाभावे नाग्नौ रामः
भावे काम्यादिष्वित्यर्थः पाणिष्विति वहुवचनात्सर्वविप्रपाणिषु होम इति वृत्तिः एवमानामहे पिण्डेनेकोपि सर्वेषामुपवि २३८

ब्धानांविप्राणामथपाणिषु विभज्यजुहुयात्सर्वेसोमायेत्यादिमंत्रतः यत्तुहेमाद्रौकात्यायनः पित्र्येयःपंक्तिमूर्धन्यस्तस्यपाणा
वनग्निकः हुत्वामंत्रवदन्येषांतूष्णींपात्रेषुनिक्षिपेदिति तद्धुच्चातिरिक्तानाम् यत्तुतत्रैवमात्स्ये अग्न्यभावेतुविप्रस्यपाणावे
थवाजलेपिवा अजकर्णेश्वकर्णेवागोष्ठेवाथशिवान्तिके इतितत्तीर्थश्राद्धविषयम् तद्यदाप्रासमीपेस्याच्छ्राद्धकर्त्तेयोविधिस्तदे
तितत्रैवकात्यायनोक्तेः निर्ज्जलेजलकर्णादौ यत्तुचन्द्रोदयेयमः देवविप्रकरेनग्निः कृत्वाग्नौकरणंद्विजइति तदभार्यपरम् अ
पत्नीकोयदाविप्रः श्राद्धंकुर्वीतपार्वणम् पित्र्यविप्रैरनुज्ञातोविश्वेदेवेषुहूयतइतितत्रैवकात्यायनोक्तेः हूयतइतिछांद
सात्ययः हेमाद्रौवायवीये विधुरोदैविकेकुर्याच्छेषंपित्रेनिवेदयेत् देवविप्रानेकत्वेतत्रैवविश्वदेवेयदकेस्मिन्नेवयुग्मे
दयोद्विजाः तदैकपाणौहोतव्यस्याद्विधिविहितस्तदा सोप्याघःप्रथमंवानियम्येतेतिन्यायात् तेनसकृत्तभार्य्यस्यदेवेहोमः
अनुपनीतब्रह्मचार्यादेस्तुपित्र्ये अग्न्यभावःस्मृतस्तावद्यावज्जायांनविदतीतिहेमाद्रौजातूकर्ण्योक्तेः समाप्यनष्टोन्तर
पिपित्र्यकरेइतिपृथ्वीचन्द्रः उपवीतित्वेदेवेहोमः प्राचीनावीतेनपित्र्ये यद्यसर्वत्रदेवपित्र्यकरयोर्विकल्पइतिहेमाद्रौमदन
रत्नेपारिजातेच यदानुपितृमातामहयोर्देवपित्र्यविप्रभेदस्तदाभेदेनपाणिहोमइत्यपरार्कचंद्रिकादयः यदानुदेवतंत्रेण
दातंत्रेणसकृद्देवपाणिहोमइतिकेचित् हेमाद्रिस्तुमातामहस्यभेदेपिकुर्यात्तंत्रंचसाग्निकइतिकातीयस्मृतेर्भेदमाह
वपित्र्येपि माधवीयेप्येवम् एवंसान्तरपोविदश्राद्धेपाणिहोमात्रेयः यत्तुकर्केणाग्निविनाश्राद्धमेवनास्तीत्युक्तंतत्सपि
डीकरणवार्षिकाद्यकरणापरंतत्यक्तिविदेव यत्तुवृहन्नारदीये अनग्निर्दूरभार्य्यश्चपार्वणंसमुपस्थिते श्रौताभिःकार
यच्छ्राद्धंसाग्निकेर्विधिवद्द्विजाः क्षयाहदिवसेप्राप्तेस्वस्याग्निर्दूरगोयदि तत्रैवभ्रातरःस्युश्चेल्लौकिकाग्नावितिस्थितिः औ
पासनाग्नेदूरस्थेसमीपेभ्रातरिस्थिते यद्यग्नौजुहुयाद्वापिपाणौवासहिपातकी औपासनाग्नौदूरस्थेकेचिदिच्छन्तिसत्त
माः पाणावेवनुहोतव्यमितितेनतत्समंजसम् तद्धुनादराडुपेक्ष्य हेमाद्रौयमः अग्नौकरणवत्तत्रेहोमोविप्रकरेभवेत्
पर्युक्ष्यदर्भानास्तीर्य्ययतोह्यग्निसमोद्विजः मेक्षणेनकरेणवाहोमः मेक्षणप्रहरणतोतिवृत्तिः स्मृतिरत्नावल्याम्
नानुज्ञापाणिहोमस्यान्नस्तःपर्युहनोक्षेरो नाग्नेतमघादितिचनस्यान्तामिधनमेक्षणे कर्काचार्य्योप्येवमाह माधवी

ति॰ सिं॰ २३९ यच्चन्द्रिकायां चानुक्तादि सर्वं भवतीत्युक्तम् पाणिहोमप्रसङ्गाद्धोमपराः केशोनकः अनग्निश्चेदाज्यं गृहीत्वा भवत्स्वग्नौ करणमिति प
वैतेयाश्विति आश्वलायनः यदि पाणिष्वाचान्तेष्वन्यदन्नमनुदिश्य त्यन्नमन्नेन संसृष्टदत्तम् धृतकमिति पाणौ कृतपात्रे निधाय
विप्रेण चम्य कृतशेषपात्रेषु दद्यादित्यर्थः संसृष्टप्रभृतम् नैमित्तिके चेदमाचमनं न कृतभक्षणनिमित्तम् अन्नपाणितले दत्तं हु
तं मधुनं त्वनुदृयः पितरस्तेन तृप्यन्ति शेषान्नेन लभन्तीति यच्च पाणितले दत्तं यच्चान्यदुपकल्पितम् एकीभावेन भोक्तव्यं पृथग्भा
वो न विद्यते इति वह्वृचपरिशिष्टात् हेमाद्रौ वृष्याचमने हेतुश्चार्थवाद उक्तः पाण्यास्याहि द्विजः स्मृत इति भाष्यत्वाचान्तेषु भक्षि
तेषु च मुभक्षणे भक्षणान्तरे चनाचमनम् अग्निसाम्यात् एवं निवधस्तु सपिण्डीकरणाङ्गयः ददाति चादितत्वात् नत्वत्र जुहु
ति चोदितत्वादित्युक्तम् नत्वेन वृकुसमतम् यत्तु बौधायनेन तस्मिन्नशुमाशिते दद्याद्यदन्नं प्रकृतं भवेदिति भक्षणमुक्तम् तत्त
च्छाखीयानामेवेति हेमाद्रिः तत्रैव यमः पित्र्ये पाणौ कृताच्छेषं पितृपात्रेषु निक्षिपेत् एतदग्निहोमेऽपि समम् कर्के स्तु सूत्रे कु
तशेषं दत्वा त्वपाणिष्वाप्तासु वै विप्रेषु दद्यादित्याह तत्रैव वह्वृचपरिशिष्टः पित्र्ये विप्रकरे कृत्वा शेषं पात्रेषु निक्षिपेत् पिण्डेभ्यः शेषयेत्किंचि
न्न दद्याद्वैश्वदेविके अथापस्तम्बानां सूत्रे उद्ध्रियतामग्नौ च क्रियतामित्यामन्त्रयते काममुद्ध्रियतां काममग्नौ च क्रियतामित्यनु
तिसृष्टो जुहुयाच्च न चाग्निर्विधुरादेर्विप्रो वा बृहन्नारदीये न चाग्निर्दूरभार्यश्च प्रवासे समुपस्थिते संधायाग्निं तनौ
होमं कृत्वा तं विसृजेत्पुनः अथाश्वेति तत्कालेऽग्निं संधाय कृत्वा त्यजेदित्यर्थः एतदापस्तम्बानामेव पाणिहोमस्तु छन्दोगादी
नां विश्वप्रकाशेऽपि साग्निरौपासनेनाग्निरग्नौ कुर्वीत लौकिके पाणौ होमं प्रशंसन्ति न त्वापस्तम्बशाखिनाम् स्नातको विधुरो
वा सुर्यादि वा ब्रह्मचारिणः अग्नौकरणहोमं तु कुर्युस्ते लौकिकेऽनले अथाश्वाग्नेमनोज्योतिरुद्धुष्य व्याहृतीर्हुत्वा जुहुयात् ततोऽनुज्ञा
ताग्नींधनाद्याज्यभागान्त यन्मे मातातत्याये जुहुयात् तत्र सप्तान्नाहुतयः षडाज्यस्य त्रिंशतिः त्रयोदश व्यत्ययो वा यथा यन्मे माता प्र
लुलोभ तन्मे रेतः पिता वृङ्क्तां या तिष्ठतीति द्वाभ्यां अमुष्मै स्वाहेति पितुर्नाम्ना होमौ यन्मे पितामही प्रलुलोभ तन्मे पितामहो
वृङ्क्ताम् अत्र दधे इति तत्र मातापितामहाय द्वौ यन्मे प्रपितामही तन्मे रेतः प्रपितामहो वृङ्क्ताम् अत्र दधे नमोतुभिरिति तन्नाम्ना
प्रपितामही प्रपितामही वृहत्सर्वत्रामुष्मा इत्यत्र ऽंते तत्तन्नाम मेयाज्यम् तत्कृत्यसंग्रह योज्यः पित्रादिशब्दानां स्थाने मातामहादिकः राम: २३९

अन्नहोमे न तथा स्पर्शो जलपिंडादिदानके । यन्मे मातामहीत्यादि तत्रोदाहरणं भवेत् । ततो ये चेह त्येकान्नाहुतिः ततः स्वाहा पित्रे इत्याघारा
ज्यं कृत्वा स्विष्टकृतं कृत्वा सर्वं भक्ष्यं किंचिद्दद्यात् योऽदग्रुष्टं भस्मा पाद्यतत्र तु इमां स्वाहाकारेण जुहोति परिषेचनान्तं स्थालीपाकवत् । अ
यमन्नौकरणहोमो मासिश्राद्ध एव तच्च स्मार्त्ताग्न्यभावेन कार्य्यमिति केचित् कार्य्यमेवेति बह्वृचः । अत एव सर्वाधानिनो होमवर्जी
मासिश्राद्धमुक्तं सुदर्शनभाष्ये महालये नदित्यके प्रकरणं तरत्वात्कर्मान्तरत्वेन स्मार्त्ते पार्वणवत्कार्य्यमिति च स्मृत्युरवः । अ
ग्निकादिषु तु स्मार्त्ते पार्वणविधिरेव एवं मातृवार्षिकादिषु मासिश्राद्धविकृतावष्टकायां मासिश्राद्धवैकृतहोमेन प्राकृतहो
मबाधः । अन्वष्टकासु मातृश्राद्धं नेति भाष्ये तत्रापि श्राद्धान्तरवत्क्रियमाणे तु यन्मे मातेत्यादौ गुणत्वेऽपि मातुः प्राधान्यवि
वक्षितं मासिश्राद्धेन कल्याण्याख्यातमिति सूत्रात् आग्नेय्येवमनोता कार्य्येति वचनादग्निशब्दस्य वैकृतदेवताभिधायित्वम
तेनामुकश्राद्धेत्यत्रामुकशर्मभ्यां पितृभ्यामित्याद्यूहः कार्य्यः । तच्च मासिश्राद्धं जीवत्पित्रादिना व्युत्क्रममृतपित्रादिना च कार्य्य
मित्युक्तं सुदर्शनभाष्ये तत्प्रकारस्तु वक्ष्यते मातापित्रोर्द्वित्वादौ तु नोहः । तस्माद्वचनादिति निषेधात्प्रकृतावूहाभावाच्च
पत्नीसमन्वये तिवत् उपदेशिमनेनोहः । यथा यन्मे मातरौ प्रलुलुभतुश्चेरतुः स्वानव्रते इत्याद्यस्मत्पितृकृतमासिश्राद्धेति री
यज्ञेयमिति दिक् । अन्यत्प्रागवत् । अथ परिवेषणम् । तत्रापवीत्यवाज्येन दर्व्या वा मामा सुपक्वमिति पात्राण्युपस्तीर्य कुर्या
दिति हेमाद्रिः । भारते दानधर्मेपि आज्याहुतिं विना चैव यत्किंचित्परिविष्यते दुराचारैश्च यद्भुक्तं तं भागं रक्षसां विदुः । तत्रैव
शौनकः । विधिना देवपूर्वं तु परिवेषणमाचरेत् । तत्रैव धर्मः । फलं स्यात् ततो प्रोक्तो स्वयं चेत्परिवेषणे । तत्रैव वायुभविष्य
योः । भार्य्या या श्राद्धकाले तु प्रशस्तं परिवेषणम् । ब्रह्माण्डे । नापवित्रेण नैकेन हस्तेन न विना कुशम् । नायासेन नायसेन नैव
श्राद्धे तु परिवेषयेत् । वसिष्ठः । आयसेन तु पात्रेण यदन्नं संप्रदीयते भोक्ता विष्ठासमं भुंक्ते दाता च नरकं व्रजेत् । पैठीनसिः
सीसकायसरीतिपात्राण्ययज्ञियानि । तत्रैव हारीतः । सौवर्णराजताभ्यां च खड्गेनोदुम्बरेण वा दत्तमक्षय्यतां याति फल्गु
पात्रेण वा पुनः । कार्ष्णाजिनिः । दर्व्या देयं घृतं चान्नं समस्तव्यंजनानि च उदकं चैव पक्वान्नं न दर्व्या तु कदाचन । यमः । पंक्त्यां
विषमदानं तु श्वनिष्कृतिर्नैव विद्यते । पृथ्वीचंद्रोदये पराशरः । सर्वदा च तिला ग्राह्याः पितृकृत्ये विशेषतः । भोज्यपात्रे तिला

नि॰सि॰ नदृष्ट्वा निराशाः पितरो गताः चंद्रिकायाम् वृद्धशातातपः हस्तदत्तास्तु ये स्नेहा लवणव्यंजनादयः पितॄणां नोपतिष्ठंति भोक्ता भुंजीत कि-
२४० ल्बिषम् घृतपात्रे विशेषो ग्रंथांतरे श्राद्धे न परमोऽन्नं च पात्रं मासाद्य मुग्धधीः छेत्तेन प्ररयेत्पात्रं तच्छेत्तुं रुधिरं भवेत् छेत्तादिपात्राणि
भूमौ स्थापयेदन्नभोजनपात्रे इति मदनरत्ने संग्रहे हस्तदत्तं तु नाश्नीयाल्लवणव्यंजनादिकम् अपक्वं तैलपक्वं च हस्तेनैव प्रदीयते
पात्रालंभनमुक्तं चतुर्विंशतिमते उत्तानं दक्षिणं सव्यं नीचं पात्राणि उपस्पृशेत् याज्ञवल्क्यः दत्त्वान्नं पृथिवीपात्रमिति पात्राभिमंत्र-
णम् कृत्वेदं विष्णुरित्यन्ने द्विजांगुष्ठं निवेशयेत् बौधायनः विप्रांगुष्ठेनानखेनानुदिशंति पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य
मुखे अमृते अमृतं जुहोमि ब्राह्मणानां त्वा विद्यावतां प्राणापानयोर्जुहोम्यक्षितमसि मा मे पितॄणां क्षेष्ठ अमुत्रामुष्मिन्लोके इति
आद्यजुहोम्यग्रे स्वाहा शब्दः कातीयसूत्रे उक्तः मंत्रेः स्वधाशब्दः अंगुष्ठविशेषमाह हेमाद्रौ धौम्यः परिवृत्य तेन चांगुष्ठं
द्विजस्यान्ने निवेशयेत् तथा उत्तानेन तु हस्तेन द्विजांगुष्ठनिवेशनम् यः करोति द्विजो मोहात्तद्रक्षांसि भुंजते तत्रैव यमः
विद्द्मो हव्यं च कव्यं च ब्रूयाद्दक्षस्वचक्रमात् दैवे पित्र्ये चेत्यर्थः तत्रैवात्रिः संबंधनामगोत्राणि इदमन्नं ततः स्वधा पितृकर्मा-
दुद्दीप्येति स्वसत्ता विनिवर्तयेत् हस्तेनामुकमन्नाद्यमिदमन्नमुदीरयन् अत्रान्नदाने चतुर्थी स्यादित्यादि विशेषाः पूर्वमु-
क्ताः अत्र पूर्वोक्तां तेऽत्र पुरूरवाद्रवसंज्ञिका विश्वेदेवा देवता इदमन्नं सपरिकरं हव्यं अयं ब्राह्मणस्त्वाहवनीयार्थे दत्तं दास्व-
मानं चात्र प्रतः गयायां भूः गदाधरो भोक्ता सौवर्णपात्रस्थमन्नमक्षयवटच्छायास्थममुकेभ्यो विश्वेभ्यो देवेभ्यः स्वाहा न मा-
नममेति हेमाद्यनुमतः प्रयोगः एवं पित्र्ये अमुकगोत्र वसुरूपादितत्तन्नामज्ञेयम् ततो ये देवास इति देवे ये चेह पितर इति पि-
त्र्ये कोचिदुपति ततोऽच्छिद्रं वाचयेत् तत्रैव प्रचेताः अपोशानकरे विप्रे सकल्पाच्छिद्रभावणात् निराशाः पितरो यांति द-
वैः सह न संशयः पारस्करः संकल्प्य पितृदेवेभ्यः सावित्रीं मधुमज्जपः आहू निवघापोशानं जुषप्रेबोध्य भोजनम् निवृत्ते
ति ब्रह्मार्पणं कृत्वेत्यर्थः अत एव बृहन्नारदीये अन्नत्यागमुक्तोक्तम् दत्तं हविश्च तत्कर्म विघ्नं वचसमर्पयेदिति यत्तुक्त- रामः
म्पुरत्नेकादमीजिनिः अपसव्येन कर्त्तव्यं पित्र्यं कृत्यमशेषतः अन्नदानादृते सर्वमेवं मातामहेष्वपि तदप्यतत्परम् तत्र २४०

ब्रह्मार्पणं हरिर्दाता चतुर्भिश्चेति केचित्पठंति धर्मप्रदीपे ततोन्नं पितृदेवेभ्यः संकल्प्य च यथाविधि दत्तं यद्दास्यमानं च आत्मनेनेर्ममेति च
तथा श्राद्धान्नस्य तु संकल्पो भूमावेव प्रदीयते हस्ते सुदीयमानं तु पितृृणां नोपतिष्ठते वैश्वदेवस्य वामे तु पितृपात्रस्य दक्षिणे सं
कल्पोदकदानं स्यान्नित्यश्राद्धे यथारुचि प्रचेताः अपोशानं प्रदायाथ सावित्रीं त्रिर्जपेदथ मधुवाता इति तृचं मध्वित्येतत्त्रिकं तथा
मिताक्षरायां पारस्करः संकल्प्य पितृदेवेभ्यः सावित्रीं मधुमज्जपः आहूनिवेद्यापोशानं जुषध्वं बोध्य भोजनम् गायत्रीं त्रिः सकृद्वापि
जपेद्व्याहृतिपूर्विकम् मधुवाता इति तृचं मध्वित्येतत्त्रिकं तथा याज्ञवल्क्यः सव्याहृतिकां गायत्रीं मधुवाता इति तृचम् जप्त्वा
यथासुखं वाच्यं भुंजीरंस्तेपि वाग्यताः यथासुखं जुषध्वमिति वाच्यम् अत्रिः असंकल्पितमन्नाद्यं पाणिभ्यां यदुपस्पृशेत्
अभोज्यं तद्भवेदन्नं पितृृणां नोपतिष्ठते अन्नदत्तं नगृह्णीयाद्यावत्तोयं न संपिबेत् अपोशाने विशेषः स्मृतिसमुच्चये अपो
शानं वामभागे सुरापानसमं भवेत् दक्षभागे तु यः कुर्यात्सोमपानफलं लभेत् तथा पुनरापूर्य्यापोशानं सुरापानसमं भवेत्
हेमाद्रावत्रिः दत्ते वाप्यथवादत्ते भूमौ यो निक्षिपेद्बलिम् तदन्नं निष्फलं याति निराशैः पितृभिर्गतैः केचिदाज्येन कुर्वंति तन्न पा
यसेन तथाज्येन माषान्नेन तथैव च न कुर्याद्बलिदानं तु ओदनेन प्रकल्पयेदिति स्मृतिसारनिबंधात् शंखः श्राद्धे नियुक्तान्भु
ञ्जानान्न पृच्छेल्लवणादिषु उच्छिष्टाः पितरो यांति पृच्छतो नात्र संशयः कात्यायनः अश्नत्सु जपेत्सव्याहृतिकां गायत्रीं स
कृत्त्रिर्वा रक्षोघ्नीः पौरुषसूक्तमप्रतिरथमिति हेमाद्रौ सौरपुराणे ऐन्द्रं च पौरुषं सूक्तं श्रावयेद्ब्राह्मणांस्ततः मात्स्यपाद्मयोः
ब्रह्मविष्ण्वर्करुद्राणां स्तोत्राणि विविधानि च इन्द्रेशसोमसूक्तानि पावमानीश्च शक्तितः मंडलब्राह्मणं तद्वत्प्रीतिकारि च
यत्पुनः अभावे सर्वविद्यानां गायत्रीजपमाचरेत् पृथ्वीचन्द्रोदये ब्राह्मे वीणां वंशध्वनिं चाथ विप्रेभ्यः सन्निवेदयेत् जपे
न्पौरुषं सूक्तं नाचिकेतत्रयं तथा त्रिमधु त्रिसुपर्णं च पावमानीर्यजूंषि च हेमाद्रावत्रिः हुंकारेणापि यो ब्रूयाद्धस्तो वा
पिबदकुणान् भूतलाद्वाद्धरेत्पात्रं मुंचेद्धस्तेन वा पिबेत् प्रौढपादो बहिःकक्षो बहिर्जानुकरोपि वा अंगुष्ठेन विना अश्नाति

मुखशब्देनवापुनः पीतावशिष्टतोयानिपुनरुद्धृत्यवापिवेत् खादितार्द्धानिपुनः खादेन्मोदकानिफलानिच मुखेनवाधमेदन्नं निष्ठीवेद्भाजने
पिवा ह्यथमश्नन्द्विजः श्राद्धंहत्वाचगच्छत्यधोगतिम् जाबालिः मुष्टमुष्टमहविष्यंचदद्याद्दन्नंशनैः शनैः बृहच्छातातपः अपेक्षितंया
चितव्यंश्राद्धार्थमुपकल्पितम् नयाचतेद्विजोमूढः सभवेत्पितृघातकः यमः श्राद्धेद्विजोनवदद्यान्नयाचेन्नचदापयेदिति तदस
पादितवस्तुविषयमितिहेमाद्रिः हारीतः ऊर्ध्वपाणिश्चविहसन्नाक्रोधोविस्मयान्वितः भग्नपृष्ठश्चयभुङ्क्ते नतस्याश्नन्तिवैपितरः न
प्रचेताः नस्पृशेद्वामहस्तेनभुंजानोन्नंकदाचन नपादेनशिरोवस्तिनपदाभाजनंस्पृशेत् शंखः श्राद्धपंक्तौतुभुंजानोब्राह्मणोब्राह्म
णंस्पृशेत् तदन्नमत्यजन्भुक्त्वा गायत्र्यष्टशतंजपेत् उशनाः भोजनंतुननिःशेषंकुर्यात्प्राज्ञःकथंचन अन्यत्रदध्नःक्षीराद्वा
क्षौद्रात्सक्तुभ्यएवच ब्राह्मे नचाश्रुपातयेज्जातु नशुष्कांगिरमीरयेत् नचोद्वीक्षेतभुंजानान्नचकुर्वीतमत्सरम् यमः स्वाध्यायंश्रा
वयेत्सम्यक्धर्मशास्त्राणिचैवहि प्रचेताः भुंजानेषुतुविप्रेषुऋग्यजुःसामलक्षणम् जपेद्दानिमुखोभूत्वापित्र्यंचैवविशेषतः य
जूंषिचैवरुद्रंचरक्षोघ्नींश्चैवच रक्षोघ्नीः कुरुष्वरक्षोहणमित्याद्याः तत्रैवनिगमः भुंजत्सुजपत्पावमानीरुद्रीरंतामध्वन्नंव
तीश्च अन्नवन्तःपितृन्स्तोषमिति पृथ्वीचंद्रोदये भरद्वाजः भुंजानेषुतुविप्रेषुप्रमादात्स्ववनेगुदम् पादकृच्छ्रंततःकृत्वाअन्यंविप्रं
नियोजयेत् क्षणपाद्यादिदत्वेत्यर्थः विप्रवमनेतत्रैवदक्षः निमंत्रितस्तुयःश्राद्धेभोजनेमुखवांतःस्यात् तदैवहोमंकुर्वीतस्वाग्नौविप्रः
समाहितः प्राणादिपंचभिर्मंत्रैर्यावद्द्वात्रिंशसंख्यया ब्राह्मणस्तुततःकृत्वाच्छन्नप्राशनमाचरेत् अग्निविधानेतु इंद्रायसामसूक्तेन
श्राद्धविघ्नोयदाभवेत् अग्न्यादिभिर्भोजनेनश्राद्धसंपूर्णमेवहिस्मृतम् अग्न्यादिभिरितिलौकिकाग्निस्थापनेचरुंनिर्वापाज्यभागां
तेनाममगोत्रपूर्वमंत्रोपितृननावाह्यसंकल्प्यान्नत्यागंकृत्वा प्राणादिभिर्द्वात्रिंशदाहुतीर्हुनेदित्यर्थः भोजनेनपुनःश्राद्धेनतेनहोमः
पुनःश्राद्धंचेतिपक्षद्वयमुक्तम् सूक्तंजपस्तन्मयानुगमः स्मृतिसंग्रहे प्राधान्यंपिंडदानस्यभोजनस्यतदंगता अतोभुक्तिक्रियाहा
नौश्राद्धावृत्तिर्नमन्यते पिंडदानान्तरंवांतौहोमएवनावृत्तिः पिंडदानात्प्राग्वांतौतद्दिनेउपवासंकृत्वापरेद्युःपुनःश्राद्धंकार्यमि राम:
त्यर्थः तत्रैव श्राद्धपंक्तौतुभुंजानोब्राह्मणोवमनेयदि लौकिकाग्निंप्रतिष्ठाप्यअर्चयेच्चहुताशनम् तथा एकएवयदाविप्रोभो २५१

जनेच्छर्दितो यदि तदेवाग्निं समाधाय होमं कुर्याद्यथाविधि द्वितीयपक्षोक्तरविधाने भोजनोपक्रमादूर्ध्वं प्रक्रमात्पूर्वे तो यदि श्राद्धवि
घ्ने पुनः कार्यं जपहोमोन तृप्तिदो स्मृतिसंग्रहे अकृते पिण्डदाने तु भुंजानो ब्राह्मणो वमेत् पुनः पाकोनुकर्त्तव्यः पिण्डदानं यथाविधि
पिण्डदानं श्राद्धम् अकृते पिण्डदाने तु पिता यदि वमेत्तदा पुनः पाकं प्रकुर्वीत श्राद्धं कुर्याद्यथाविधीति तत्रैवोक्तेः तथा पित्रर्थी नात्र
याद्यार्हः पिता चेद्वमते यदि तद्दिने चोपवासः स्यात्पुनः श्राद्धं परेहनि तथा वमने वा विरेके वा तद्दिने परिवर्जयेत् एषु वचनेषु
मूलं चिन्त्यम् इदं मासिकादिकविषयम् दर्शादौ तु वान्तावमने तदेव कार्यम् श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्त्तितम्
अमावास्यादिनियतमाससंवत्सरादृते इति मरीचिस्मृतेः श्राद्धे पिण्डदानमेव प्रधानमिति कर्काचार्याः तन्मते दक्षोक्तो हो
म एव नावृत्तिः विप्रभोजनमिति मेधातिथिः भोजनपिण्डदानाग्नौकरणानीति कपर्दिधूर्त्तस्वामिहेमाद्र्यादयः तन्मते पूर्वो
क्तो निर्णयः अन्नत्यागमात्रं प्रधानम् भोजनं तु प्रतिपत्तिरूपमंगम् अतो वान्तौ न दाने पिनावृत्तिरिति गौडमैथिलादयः
श्राद्धस्य यागदानोभयरूपत्वात्संपूर्णदानाभावाद्भोजनस्यांगत्वेपि सोमवमन इव युक्तमत्र नैमित्तिकविधानमिति युक्तं प्रती
मः अत्रेदं तत्त्वम् वैश्वदेविकस्य वमने होम एव नावृत्तिः अंगत्वात्तच्चरक्षार्थत्वाद्दिवि श्राद्धक्रमे तु दक्षाविन्त्यादिस्मृतेस्त्व तत्र
जयाननुजुहुयादितिवत् पितामहादेरपि तथा पितृत्पुक्तेरिति केचित् तस्यापि प्रधानत्वात्पितृवदिति तु युक्तम् सपिण्डीकरणा
दौ वार्षिकवत् सपिण्डीकरणादीनि यानि श्राद्धानि षोडश तत्र पिण्डप्रधानत्वमत्रेत्वविनिवर्तकमिति स्मृतेः महैकोद्दिष्टादौ
तूभयप्राधान्यादावृत्तिरेव एक एव द्विजो भोज्यः पिण्डोप्येको विधीयत इति स्मृतेः वृद्धिसंकल्पनित्यश्राद्धादौ तु भोजनप्राधान्याद्वां
तौ वावृत्तिरेव वृद्धिश्राद्धविकल्पेन पिण्डदानं बुधैः स्मृतम् नित्यश्राद्धमदैवं स्यात्पिण्डदानविवर्जितमिति स्मृतेः भुजिक्रियायाः प्रा
धान्यं श्राद्धं संकल्पसंज्ञिके तत्रैव पितृविप्रस्य तूपघाते पुनः क्रियेति संग्रहोक्तेश्च महालयादावप्येवम् तीर्थमहालयादौ दर्शवदित्या
शार्काद्यालोचनेन प्रतीमः आश्वलायनः तृप्तान् ज्ञात्वा मधुमतीः श्रावयेदक्षन्नमीमदन्तेति च संपन्नं पृच्छाय दत्तमुपभुक्तं
तेन तु स्थालीपाकेन सह पिण्डार्थमुद्धृत्य शेषं निवेदयेदभिमते नुमते चेति अत्र गायत्रीमध्विति त्रिकजपोपि ज्ञेयः तृप्तान्बुद्ध्वान्न
मादाय सतिलं पूर्ववज्जपेदिति प्रचेतसोक्तेः व्यासः तृप्ताः स्थ इति तु पृष्ट्वा स्वत्रूयुस्तृप्ताः स्म इत्यथ अभिमत विप्रैः स्वीकर्तुमिच्छ

नि॰ सिं॰ २५२

शौनकोपि अन्नशेषैश्च किं कार्य्यमिति पृच्छत तान् स्नातः तेद्विजैः सह भोक्तव्यमिति प्रत्युक्तिः पूर्वकम् मदघुः सकलं तस्मै स्वीकुर्य्युर्व्वा यथा-
रुचि श्राद्धविशेषे प्रश्नभेदमाह हेमाद्रौ विष्णुः पित्र्ये स्वदितमिति गोष्ठ्यां सुशृतं संपन्नमित्यभ्युदये देवे रोचत इति आयुष्यमिति स्वस्ति-
षु स्वरमिच्छाश्राद्धम् याज्ञवल्क्यः अन्नमादाय तृप्ताः स्थ शेषं चैवानुमान्य च तदन्नं प्रकिरेद्भूमौ दद्याच्चापः सकृत्सकृत् इदं चात्र
विकिरदानमन्यशाखिनाम् आश्वलायनानां तु पिण्डानन्तरमेव सूत्रकृतोक्तम् कात्यायनस्तु विकिरोत्तरं गायत्र्यादिजपं त्रिःप्रथमं चा-
ह हेमाद्रौ देवलः ततः सर्वाशनं पात्रे गृहीत्वा विविधं बुधः तेषामुच्छिष्टपार्श्वस्थाने विकिरं भुवि निक्षिपेत् माधवीये प्रचेताः सार्व-
वर्णिकमादाय ये अग्नीति भुवि निक्षिपेत् स च कुशकार्य्यः दर्भेषु विकिरश्चायं स्मृतः मन्त्रः कातीयः अग्निदग्धाश्च ये जीवा ये प्य-
दग्धाः कुले मम भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिमिति अन्ये तु असोमपाश्च ये देवा यज्ञभागविवर्जिताः तेषामन्नं प्रदास्या-
मि विकिरं वैश्वदेविकमिति हेमाद्रौ गोभिलोक्तेन दैवे असंस्कृतप्रमीता ये त्यागिन्यो या याः कुलस्त्रियः दास्यामि तेभ्यो विकिरमन्नं
तोयं च पैतृकमित्यग्निपुराणोक्तेन पित्र्ये अन्नविकीर्य्य ये अग्निदग्धा इत्युच्छिष्टपिण्डकुशोपरि पृथक् दद्यादित्याहुः पृथ्वीचन्द्रो-
दयेप्येवम् श्राद्धे ततः प्रक्षाल्य हस्तौ चाद्भिराचम्य हरिं स्मरेत् माधवीये गौतमः विकिरमुच्छिष्टं प्रतिपादयेत् हेमाद्रौ व्यासः
उच्छिष्टमेव विकिरं सदैव प्रतिपादयेत् भृगुः पिण्डवत्प्रतिपत्तिः स्याद्विकिरस्येति नौल्वलिः श्राद्धकाशिकायाम् यजमानस्य दासादीनु-
द्दिश्य द्विजसत्तम तस्मादन्नं त्यजेद्भूमौ वामभागे पुपात्रके मनुः उच्छेषणं भूमिगतमजिह्मस्याशठस्य च दासवर्गस्य तत्पित्र्ये भा-
गधेयं प्रचक्षते विष्णुः उदङ्मुखेष्वाचमनमादद्यात् ततः प्राङ्मुखेषु पित्र्ये देवे चार्घ्यं शातातपः विश्वेदेवनिविष्टानां चरमं
हस्तधावनम् हेमाद्रौ वाराहे हस्तं प्रक्षाल्य यश्चापः पिबेद्भुक्त्वा द्विजः सदा तदन्नमसुरैर्भुक्तं निराशाः पितरो गताः मरीचिः हस्तप्र-
क्षाल्य गण्डूषं यः पिबेदविचक्षणः आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठते तत्रैव संग्रहे पवित्रग्रन्थिमुत्सृज्य मण्डलेषु विनिक्षि-
पेत् हस्तादीन्क्षालयेद्विप्रान्स्नायवादौ न कुत्रचित् व्यासः ताम्बूलोज्झिरणं चैव गण्डूषोज्झिरणं तथा कांस्यपात्रे तथा ताम्रे न कुर्वीत क- राम:
दाचन उष्णोदके धान्यचूर्णैः करौ सम्यग्विशोधयेत् अथ पिण्डदानम् तच्चार्चनोत्तरमग्नौकरणोत्तरं भोजनोत्तरं विकिरोत्तरं २५२

स्वधावाचनोत्तरं विप्रविसर्जनोत्तरं वेति हेमाद्रौ स्मृतिपक्षा उक्ताः तेषां शाखाभेदेन व्यवस्था प्रेतश्राद्धेषु पूर्वमन्येषु भोजनोत्तरमिति चं
द्रिकामाधवौ सर्वत्र भोजनोत्तरमिति बह्वृचः आश्वलायनः भुक्तवत्स्वनाचान्तेषु पिण्डान्निदध्यादाचान्तेष्वेके भुक्तवत्स्विति पूर्वं निषे
धार्थम् साग्निरिति प्रणीतसमीपेऽनग्निर्द्विजसमीपे हेमाद्रौ जातूकर्ण्यः व्याममात्रं समुत्सृज्य पिण्डांस्तत्र प्रदापयेत् प्रसारितभुजा
न्तरं व्यामः संकर्षणव्यासः अरत्निमात्रमुत्सृज्येति यत्तु तत्रैव वासिष्ठेनाभिहितं दावापि वेदीं दक्षिणानिम्नगेति तदन्यशाखिपरं देव
लः ततस्तैरभ्यनुज्ञातो दक्षिणां दिशमेत्य च चन्द्रिकायाम् पिण्डनिर्वपणं कार्यं कुशाभावे विचक्षणैः काशैः पुराणैर्दूर्वासु पवित्र
परमेहिते आश्वलायनः स्फ्येन लेखामुल्लिखेदपहता असुरा रक्षांसि वेदिषद इति तामभ्युक्ष्य सकृदाच्छिन्नैरवस्तीर्य प्राचीना
वीती रेखायां त्रिरुदकेनोपनयेच्छुन्धतां पितरः शुन्धन्तां पितामहाः शुन्धन्तां प्रपितामहाः इति तस्यां पिण्डान्निष्टणीयात्पराचीनेन पाणि
ना पित्रे पितामहाय प्रपितामहायैतत्तेसाय च त्वामत्रान्विति हेमाद्रौ पारस्करः कराभ्यामुल्लिखेत्स्फ्येन कुशेनापि महीं द्विजः वक्र
चानाकरेणावलेखा चाग्नेय्यभिमुखनिवर्तिः दक्षिणाप्राचीं वेदिमुद्धृत्य त्यापसव्यो नेम्र देवलः आवाहयित्वा दर्भाग्रेस्तेषां स्था
नानि कल्पयेत् तेष्वासीनेषु पात्रेण प्रयच्छेत्सतिलोदकम् पराचीनेन निम्नपितृतीर्थेन वायवीये मधुसर्पिस्तिलयुतान्व्रीहीन्पिं
डान्निर्वपेद्बुधः त्रिस्थलीसेतौ तिलमन्त्रं च पानीयधूपदीपं पयस्तथा मधुसर्पिः खण्डयुक्तं पिण्डमष्टाङ्गमुच्यते याज्ञवल्क्यः
सर्वमन्नमुपादाय सतिलं दक्षिणामुखः उच्छिष्टसन्निधौ पिण्डान्दद्याद्वै पितृयज्ञवत् केचित्पिण्डेषु माषान्वर्जयन्ति माषाः श्रा
द्धेषु देयाह्यावर्ज्याश्चैवाग्निपिण्डयोः ब्रीहयोथ यथा मधेन यामाषाग्निपिण्डयोः इति स्मृतिसारात् माषान्सर्वत्र वेदद्यात्पिण्डेष्वो
चाववर्जयेत् इति स्मृतेश्च अत्रमूलं चिन्त्यम् हेमाद्रावपि सर्वशाखस्य प्रकृतार्थत्वात्सर्वान्नग्रहणमुक्तम् अत्र प्रोक्षमन्त्र
मनुज्ञाप्य सर्वमेकत्रोद्धृत्योच्छिष्टसमीपे दर्भेषु त्रींस्त्रीन्पिण्डान्दद्यादिति गोभिलसूत्रे सर्वस्मात्प्रकृतादन्नात्पिण्डान्मधुतिला
न्वितानिति च शेषनियमात्तदभावे पिण्डनिवृत्तिरिति मैथिलवाचस्पतिः तन्न तुषापचापचत्परप्रयुक्तद्रव्यवत्त्वपित्र्यर्थक
मित्वाद्गुणविरोधेन प्रधानात्यागाच्च शेषलोपे द्रव्यान्तरेण कार्यम् अनेनैव प्रतिपत्तिः किन्तु प्रधानमित्युक्तं प्राक् अ
न्यथा सपिण्डीकरणादौ सयोजनादेः प्रधानस्य लोपापत्तेरिति दिक् अथ पिण्डप्रमाणम् हेमाद्रौ वराहः कपित्थबिल्वमा

भान्वापिंडान्दद्यादिधानतः कुक्कुटांडप्रमाणान्वामलकैर्वदरैः समानिति तत्रैवपक्षः कपित्थस्यप्रमाणेनपिण्डान्दद्यात्समाहितः
तन्त्रमेवविकिरेद्यात्पिंडांतेषुअंडगुले अत्येष्टिपदुतोमदास्तु एकोद्दिष्टे सपिंडेच कपित्थंतु विधीयते नालिकेरप्रमाणंतु प्रत्यब्दे मा
सिके तथा तीर्थेदर्शेचसंप्राप्ते कुक्कुटप्रमाणतः महालयेगयाश्राद्धं कुर्यादामलकोपमम् इत्याह्वः कलिकायामाचार्याः यत्रस्युर्
हवः पिंडास्तत्रविल्वफलोपमाः यत्रचैकोभवेत्पिंडस्तत्रखर्जूरसन्निभः प्रेतपिंडस्तु देयो वै राह्वादशांगुल उच्यते इति वायवीये
पत्नीपिंडास्तु मन्त्रीया त्रिवर्गस्य सहायिनी हेमाद्रौ लौगाक्षिः महालयेगयायां च प्रेतश्राद्धे दशाहिके पिंडशब्दप्रयोगस्यादन
मन्यत्र कीर्तयेत् शाखायामितिः असावेतत्ते इत्युक्त्वा तदंते च स्वधानमः असावित्यत्र संबंधरूपगोत्रादिविशिष्टपित्रादिनाम
संबुध्यंतमुक्त्वा पुनश्चतुर्थ्यंतं तदंते यपिंड इदमन्नंवा स्वधानमो न ममेति वदेदिति हेमाद्रिः पित्रादिनामाज्ञाने त्वापस्तंबः यदि ना
मानि न विद्यात्स्वधा पितृभ्यः पृथिवि षद्भ्य इति प्रथमं पिंडं दद्यात्स्वधा पितृभ्योंतरिक्षसद्भ्य इति द्वितीयं स्वधा पितृभ्यो दिविषद्भ्य इ
ति तृतीयम् एवं मातामहेषु मातृषु च वह्वृचानां तु कर्कप्राह कलिकायांस्मृतिः यावद्देवा चुरेन्मंत्रं तावत्प्राणान्निरोधयेत् येषां
तु गृहे दर्शमात्रश्राद्धं एषु गृह्योक्ते तेषां पितृभ्यः पश्चिमे मातृभ्यस्तत्पश्चिमे मातामहेभ्यः पिंडान्देयामिति शांखायनः अस्मिन्पक्षे
तत्पश्चिमे मातामहीभ्योपि दद्यादिति हेमाद्रिः पूर्वासु पितृभ्यो दद्यादपरासु स्त्रीभ्य इति सूत्राच्च एवं यत्र तीर्थे महालयादौ केचिद्
व्यक्ति नारीणां पृथक् श्राद्धं महर्षय इति चतुर्विंशतिमतात् पित्रादिनवदैवत्यं तथा द्वादशदैवतमित्यग्निपुराणाच्च मातृणां
पृथक्पक्षम् यत्रवा आचार्यगुरुशिष्येभ्यः सखिज्ञातिभ्य एवच तत्पत्नीभ्यश्च सर्वाभ्यस्तथैव च जलांजलीन् पिंडांस्तेभ्यः सं
दाद्दद्यात् स्वयं भाद्रपदे नरः तीर्थेषु चैव सर्वेषु माघे मासे मघासु चेति ति चतुर्विंशतिमतात् दौहित्रपुत्रदाराश्च येकनिष्ठाः सहो
दराः निःसंतानानां त्तायेचतेभ्योप्यत्र प्रदीयते इति भविष्ये चैकोद्दिष्टान्युक्तानि तत्रापि तत्पश्चिमे पिंडदानं ज्ञेयम् येषां तु प
यकैतैः सपत्नीकाः पित्रादयो वाच्याः अन्वष्टक्यां गयायां मातृश्राद्धं चैवमतेहनि एकोद्दिष्टं तद्यामुक्त्वा विष्णुनान्यत्पत्यप्रभवे
दितिप्रचेताः श्वमनुः तेषुदर्भेषु तं हस्तं निमृज्याल्लेपभागिनाम् हस्तलेपाभावेपि हस्तं निमृज्यादेवेति मेधातिथिः विष्णुः
अत्र पितरो मादयध्वमितित्दर्भमूले करावघर्षणम् कलिकायां सुमंतुः एकोद्दिष्टेषु सर्वासु दर्भलेपो न विद्यते सपिंडीकरणादौ

नुलेपः सर्वत्र शस्यते मनुः आचम्योदकं परावृत्य त्रिरायम्य शनैरसून् षड्ऋतूंश्च नमस्कुर्यात्पितॄनेव च मंत्रवत् उदकं निनयेच्छेषं श
नैः पिंडान्तिके पुनः त्रिः प्राणायामं कृत्वेति मेधातिथिः अमंत्रप्राणान्निरुध्येति कर्कोपाध्यायः मंत्रवत्त्वं सतायनमः नमो वः पितर इत्या
दिः शेषं पूर्वावनयनशेषम् आश्वलायनः निपृतानन्नुमंत्रयेतात्र पितरो मादयध्वं यथाभागमावृषायध्वमिति सव्यावृदु
दगावृत्य यथाशक्त्य प्राणानाशित्वा निपर्यावृत्यामीमदंत पितरो यथाभागमावृषायिषतेति चरोः प्राणभक्षं भक्षयेत्तिन्यानि
नयनमिति नित्यग्रहणाच्छेषाभावेऽपि कुर्यादित्यर्थः शौनकः अथैषामत्र पितर इत्यन्नानुमंत्रणम् अमीमदंत इत्यवनम
त्रेणाप्यनुमंत्रितान् पिंडशिष्टाच्चरोरन्नात्किंचिदाघ्राय तत्त्यजेत् प्रक्षाल्याचम्य शुद्धेनानित्याद्यैरेव पूर्ववत् मंत्रैः पिंडश्च पानीयं
निषिंचेत्पितृतीर्थतः व्यासः अद्भिः प्रक्षाल्य तत्पात्रं प्रतिपिंडं तु पूर्ववत् कृत्वावनेजनं कुर्यात्पिंडपात्रमधोमुखम् एतत्कातीयादौ
नाम आचार्यः ततः सम्यग्दिराचम्य नीवीं विस्रस्य वाग्यतः आश्वलायनः असावभ्यंक्ष्वासावंक्ष्वेति पिंडेष्वभ्यंजनांजनं वा
सोद्धृत्य दशाम् ऊर्णास्तुकां वा पंचाशद्वर्षे तायां ऊर्ध्वं स्वलोम एतद्वः पितरो वासो मा नोऽन्यत्पितरो युङ्ग्ध्वमिति आह्निकतामरणाब्राह्मे
एतद्वः पितरो वास इति जल्पन्पृथक्पृथक् अमुकामुकगोत्रेते तुभ्यं वासः पठेद्बुधः इदं कातीयानामतद्द्वति सूत्राणि प्रति पिं
डमिति तत्स्मृत्वात् हेमाद्रौ ब्राह्मे अक्ष्णोः माकुस्त्रैककुदमंजनं नित्यमेव हि तैलं कुष्ठं तिलं भूम्ना दद्यादभ्यंजने हितम् अंजनं प्राथम
मापस्तंबादिविषयम् तत्रैव व्यासः गंधपुष्पाणि धूपं च दीपं च विनिवेदयेत् देवलः दक्षिणाः सर्वभोगांश्च प्रति पिंडं प्रदापये
त् भक्ष्याणि पूपानि स्नेहांश्च व्यंजनान्यशनानि च तत्रैव शरदः यत्किंचित्पच्यते गेहे भक्ष्यं भोज्यमगर्हितम् अनिवेद्य न भोक्तव्यं
पिंडमूले कथंचन एतत्सव्येनेति केचित् युक्तं त्वपसव्येन मनुः अवजिघ्रेच्च तान्पिंडान्यथान्युप्तान्समाहितः ततो नमो वः पितर
इत्यादिनोपस्थानम् मात्स्ये अथाचांतेषु चाचम्य वारि दद्यात्सकृत्सकृत् तिलपुष्पाक्षतान्पश्चादक्षय्योदकमेव च अ
त्र देवे सव्यं पित्र्ये त्वपसव्यमिति कर्कः परिभाषोक्तवचनात्सव्यमिति युक्तम् अत्र शिवा आपः संतु सौमनस्यमस्त्वित्यादि
प्रयोगो ज्ञेयः मात्स्ये दत्त्वाशीः प्रतिगृह्णीयाद्द्विजेभ्यः प्राङ्मुखो बुधः अघोराः पितरः संतु संत्वित्युक्तः पुनर्द्विजैः गोत्रं तथा
वर्द्धतां नस्तथेत्युक्तः स तैः पुनः दातारो नोऽभिवर्धंतामन्नं चैवेत्युदीरयेत् स्वस्तिवाचनकं कुर्यात्पिंडानुद्धृत्य भक्तितः स्वस्ति

ति॰ सिं॰
२५५

वाचनात्स्वाकृपात्रचालनंकार्यम् हेमाद्रौबृहस्पतिः भाजनेषुचतिष्ठन्तुस्वस्तिकुर्वंतियेद्विजाः तदन्नमसुरैर्भुक्तंनिराशैःपि
तृभिर्गतैः शौनकः पात्राणिचालयेच्छ्राद्धे स्वयंशिष्योथवासुतः नस्त्रीभिर्नचबालेननासजात्याकथंचन याज्ञवल्क्यः
स्वस्तिवाच्यंततःकुर्यादक्षय्योदकमेवच तत्रैववृद्धशातातपः पितॄणांनामगोत्रेणकरेदद्यत्तिलोदकम् प्रत्येकंपितॄणांचै
वत्वक्षय्यमिदमस्त्विति अत्रषष्ठीप्रायुक्ता तत्रैवनागरखण्डे उत्तानमक्षय्यपात्रंतुकृत्वादद्याच्चदक्षिणाम् हिरण्यंदेवतां
नांचपितॄणांरजतंतथा बृहस्पतिः तस्मात्पणंकाकिणींवाफलंपुष्पमथापिवा प्रदद्याद्दक्षिणांजज्ञेतयासमफलोभवे
त् अत्रापिपित्रुद्देशेनदक्षिणादानेपसव्यम् पित्रोद्देशेनुसव्यमितिमाधवः कालिकायामाचार्यः दद्याद्यज्ञोपवीत्येवतांबूल
दक्षिणांतथा अत्रिः वदेच्चतांस्ततोविप्रान्पित्रादिभ्यःस्वधोच्यताम् गोभिलः अघोराःपितरःसंत्वित्युक्तेस्वधांवाच
यिष्यइतिपृच्छतिपितृभ्यःस्वधोच्यतामित्युक्तेस्तुस्वधेत्युच्यमानेधारांदद्यादूर्जंवहंतीति आपस्तंबेनतुपुत्रान्पात्रान्
भिनपर्यंतीरित्यपिपरिषेचनेमंत्रउक्तः आश्वलायनः अथैतान्नवाहयेत्परेतनपितरःसोम्यासोगंभीरेभिःपथि
भिःपूर्विणेभिः दत्वायास्मभ्यंद्रविणेहभद्रंरयिंचनःसर्ववीरंनियच्छतेति मात्स्ये वाजेवाजइतिजपनकुशाग्रे
णविसर्जयेत् प्रचेताः स्वस्तिवाच्यंततःकृत्वापितॄन्पूर्वंविसर्जयेत् आश्वलायनः अन्नंप्रकीर्यउपवीतोस्वधे
तिविसृजेदस्तुस्वधेतिवा ब्रह्मवैवर्ते आमावाजेतिमंत्रंतुपठित्वाचप्रदक्षिणम् द्वारोपांतेततःकृत्वासंयतःप्रविशेद्गृहम् प्रांजलि
श्चततःप्राहतान्विप्रान्सत्यवादिनः दातारोनोभिवर्द्धंतामन्नंचनइतीवहि एवमस्त्वितितेचकथयंतिसमाहिताः एतन्मंडल
देशेकार्यमितिहेमाद्रिः मनुः दातारोनोभिवर्द्धंतांवेदाःसंततिरेवच श्रद्धाचनोमाव्यगमद्बहुदेयंचनोस्त्विति बौधायनः
अन्नंचनोबहुभवेदतिथींश्चलभेमहि याचितारश्चनःसंतुमाचयाचिष्मकंचनेति अत्रदातारोनोभिवर्द्धंतामलभध्वम् याचि
द्वमित्यादयहनेपठित्वाविप्रैःप्रतिवचनंकार्यमितिसुदर्शनभाष्येस्वाडुपसदइतिअन्नंप्रकीर्यब्राह्मणाःसःपितरइतिमंत्रंद्व एम॰
येचपठंति शौनकः ब्राह्मणान्नथनियोतान्परीत्यत्रिःप्रदक्षिणम् सस्त्रीकःस्वजनैःसार्द्धंप्रणम्यद्विचितांजलिः कनिष्ठ २५५

प्रथमान्येष्वचरमाः स्युः प्रदक्षिणेन हेमाद्रौ बृहस्पतिः अघमेसफलं जन्म भवत्यादाग्रं बंधनात् अघमे वंशजाः सर्वे यान्ति वाप्यनुग्रहाद्दि
वम् पत्रशाकादिदानेन लोके शिता प्रयमीदृशाः तल्लेशज्ञात चिन्तातु विस्मृत्य पक्षे तु महर्थ प्रचेताः विसर्जेद्ब्राह्मणान् संयुक्तः सोमांते चा
प्यनुव्रजेत् अथ पिंडप्रतिपत्तिः हेमाद्रौ ब्रह्माण्डे पिंडमग्नौ सदा दद्याद्भोगार्थी प्रथमे नरः पत्न्यै प्रजार्थी दद्याद्वै मध्यमं मंत्रपूर्वकम्
उत्तमां गतिमन्विच्छन् गोषु नित्यं प्रयच्छति आज्ञां प्रजां यशः कीर्तिमप्सु पिंडं प्रवेशयेत् प्रार्थयन्दीर्घमायुष्यं वायसेभ्यः प्रयच्छ
ति आकाशं गमयेदप्सु स्थितो वा दक्षिणामुखः आश्वलायनः वीरं मे दत्त पितर इति मध्यमं पिंडं पत्नीं प्राशयेत् आधत्त पितरो गर्भं कु
मारं पुष्करस्रजम् यथायमरपा असदिति मंत्रांते आधत्तेत्यनेन द्वितीयेन प्राशनम् आपस्तंबस्तु दानमंत्रमाह अपां त्वौषधी
नां रसं प्राशयामि भूतकृतं गर्भं धत्स्वेति मध्यमं पत्न्यै प्रयच्छतीति प्राशनेपि यथेह पुरुषोऽसदिति तदीयः पाठः अन्ये मात
न्त्रच्छाखायां ज्ञेयः तत्रैव शारदः पत्नी वा मध्यमं पिंडमश्नीयाद्दर्भवान्विना कलिकायां छागलेयः प्राचीनावीतमामंत्र्य पत्नी पि
डं विभज्यते प्रतिपत्त्यस्य मंत्रस्य कर्तव्या वृत्तिरत्र तु माधवीये विष्णुधर्मे तीर्थश्राद्धे सदा पिंडान्क्षिपेत्तीर्थे समाहितः याज्ञवल्क्यः
पिंडांस्तु गोजविप्रेभ्यो दद्यादग्नौ जलेपि वा बृहस्पतिः अन्यदेशगता पत्नी रोगिणी गर्भिणी तथा तदा तज्जीर्णवृषभः छाग
वा भोक्तुमर्हति अथ पिंडोपघाते हेमाद्रौ प्रायश्चित्तकाण्डे देवलः श्वसृगालखरैः पिंडः स्पृष्टो भिन्नः प्रमादतः कर्तुरायुष्य
नाशः स्यान्मिनस्तन्नोपसर्पति जातूकर्ण्यः पूर्वमाक्रान्ते तद्दोषपरिहारार्थं प्राजापत्यं प्रकल्पयेत् पुनः स्नात्वा तदा कर्ता पिंडं कु
र्याद्यथाविधि काकस्पर्शे तु न दोषः पिंडोपघातं प्रक्रम्य धनस्य च विनाशः स्यात्काकस्पर्शादिके विनेति तत्रैव श्लोकगौतमो
क्तेः स्मृतिदर्पणे त्रिः मार्जारमूषकस्पर्शे पिंडे च विदलीकृते पुनः पिंडाः प्रदातव्यास्तेन पाकेन तत्क्षणात् बौधायनः श्व
चांडालादिभिः स्पृष्टः पिंडो यद्युपहन्यते प्राजापत्यं चरित्वाथ पुनः पिंडं समाचरेत् वोपदेवोप्येवमाह दिनांतरे तु प्राजापत्यमा
त्रम् शेषप्रतिपत्तिश्च न पिंडावृत्तामानाभावादिति मैथिलाः तन्न सपिंडीकरणादौ शेषनाशे संयोजनादिलोपापत्तेः नेनव
चनाद्गमनेश्वाज्ञाप्रितन्मात्र पिंडदानावृत्तिः अत एव न च नक्तं श्राद्धं कुर्वीतारब्धे चाभोजनसमापनादित्यापस्तंबसूत्रम्
रात्रौ भोजनमात्रं पूर्वेद्युः कार्यम् श्राद्धसमाप्तिस्तु परदिन एव समाप्तिपर्यंतं कर्तुरुपवासश्चेति हरदत्तेन व्याख्यानात् तस्मात्

ति॰ सिं॰ कांतरेणपिंडदानमात्रंकार्य्यम् अथसपिंडनिषिद्धकालः सचप्रायेणमहालयादिनिर्णयेपूर्वमुक्तः हेमाद्रौब्रह्मपराशरः युगादिषुमघायांचविषु
२४५ वत्ययनेतथा भरण्यांचकुर्वीतपिंडनिर्वपनंनहि स्मृतिरत्नावल्याम् पुत्रेजातेव्यतीपातेग्रहणेचेंदुसूर्ययोः श्राद्धंकुर्यात्प्रयत्नेन
पिंडनिर्वपणादृते तत्रैवकात्यायनः ऊर्द्ध्वंरनंतरंचैवयावन्मासःसमाप्यते तावत्पिंडान्नवदद्यात्कुर्यात्तिलतर्पणम् बौधायनः
संस्कारेषुतथान्येषुमासमासार्द्धमेवच तथा भानौभौमेत्रयोदश्यांनंदाभृगुमघासु पिंडदानंमृदास्नानंनकुर्यात्तिलतर्पणम् त्रि
स्थलीसेतौ कार्ष्णाजिनिः विवाहव्रतचूडासुवर्षमर्द्धंतदर्द्धकम् उत्तराद्धंप्रागवहृद्धिमात्रेतथान्यत्पिंडदानान्नरःक्रिया कृतागंगा
दिभिर्मुख्यमासमेकंतुकर्मिणाम् हेमाद्रौज्योतिःपराशरः विवाहविहितेमासांसस्यजेयुप्रदेशेवहि सपिंडाःपिंडनिर्वापमोजी
वंधेषडब्दहि तत्रैव महालयेगयाश्राद्धमातापित्रोःक्षयेहनि यस्यकस्यापिमर्त्यस्यसपिंडीकरणेतथा कृतोद्वाहोपिकुर्वी
तपिंडनिर्वपनंसदेति मातापित्रोरितिक्षयाहविशेषणेहविरूमयत्वंववदविवक्षितम् तेनभ्रातृपितृव्यादिवार्षिकेपिपिंड
दानंकार्य्यमितिकेचित् सपिंडीकरणंनवश्राद्धषोडशश्राद्धोपलक्षणार्थमितिनिर्णयामृतेउक्तम् क्षयाहविशेषःसंग्रहे माता
पित्रोराब्दिकेतुविवाहादिषुसर्वदा तिलैःपिंडाःप्रदातव्याश्चान्यश्राद्धविवर्जयेत् अत्रमूलंचिंत्यम् रामकौतुके नंदाश्चकामरव्या
रभ्रुव्रतिपितृकालभेगंडवेध्वतिपातेचपिंडास्त्याज्याःसुतैस्सुभिः विश्वरूपनिबंधे तिथिवारप्रयुक्तोयोदोषआवेसमुदाहृतः
सश्राद्धेतन्निमित्तेस्यान्नान्यश्राद्धेकदाचन अन्यत्तत्प्राक् उच्छिष्टोद्वासनमाहहेमाद्रौवशिष्ठः श्राद्धेनोद्वासनीयानिउच्छि
ष्टान्यादिनक्षयात् श्च्योततेवसुधाधारास्ताःपिबंत्यकृतोदकाः व्यासः उच्छिष्टंन्नप्रमृज्यात्तुयावन्नास्तमितोरविः रूदग
हांतरसत्वे एकगृहेतुमनुः उच्छेषणंतुतत्तिष्ठेद्यावद्विप्राविसर्जिताः ततोगृहवलिंकुर्यादितिधर्म्मोव्यवस्थितः वलिवैश्व
देवादिनित्यकर्मेतिमेधातिथिः ब्रह्मांडे भूम्यामप्यचात्तुपतनायश्राद्धोच्छिष्टंनदापयेत् तथाकामंदद्याच्चसर्वंतुप्रक्षिप्यायवसुतायच
भोक्तुरितिशेषः जातूकर्ण्यः द्विजभोक्तावशिष्टंतुशुचिभूमौनिखानयेत् अथवैश्वदेवादि अन्नमामकःश्लोकः श्राद्धेनग्नि राम॰
ककर्तृकेगिनकरणगत्यश्राज्जुहोतिवलीस्त्वंतेस्यादथवाभेवद्विकिरतःपश्चात्स्यात्कृपचे: श्राद्धांतेन्वथवामहालयविधावूर्ध्वं २४५
भुंजेःस्यात्क्षयेत्वंतेमासुचमध्यतःसुभविधावादौतथासाग्निके अस्यार्थः साग्नेःपच्चक्याकेनसर्वत्रादौवैश्वदेवः पश्चात्तेक

मेनिर्वर्त्य वैश्वदेवं च साग्निकः । पिंडयज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुधः । पित्रर्थे निर्वपेत्पाकं वैश्वदेवार्थमेव च वैश्वदेवं न पित्रर्थे
न दार्शं वैश्वदेविकमिति लौगाक्षिस्मृतेः । अत्र साग्निकश्चाहिताग्निरिति हेमाद्रिः । श्राद्धात्प्रागेव कुर्वीत वैश्वदेवं तु साग्निकः ।
एकादशाहिकं मुक्त्वा तत्र ह्यन्ते विधीयत इति हेमाद्रौ शालकायनोक्तेश्च तत्रैव परिशिष्टे संप्राप्ते पार्वणश्राद्धे एकोद्दिष्टे तथै
व च अग्रतो वैश्वदेवः स्यात्पश्चादेकादशेहनि स्मार्त्ताग्निमतां तद्गृहिणां नावाग्नौकरणान्तरं विकिरान्तरं वा होममात्रमेव
कृताकेन भर्तृजत्तादितु श्राद्धान्तएव अत्र मूलं हेमाद्रिचन्द्रिकादौ स्पष्टम् सर्वेषां श्राद्धं तेवा तत्पाकेन वैश्वदेवं नित्यश्राद्धा
दीनि तृतीयः श्राद्धं निर्वर्त्य विधिवद्वैश्वदेवादिकं ततः कुर्याद्भिक्षां ततो दद्याद्धन्तकारादिकं तथेति पैठीनसिस्मृतेः । तत
श्राद्धशेषात् श्राद्धाङ्गश्राद्धशेषेण वैश्वदेवं समाचरेदिति चतुर्विंशतिमताच्च एवं वैश्वदेवकालत्रयस्य शाखाभेदेन
खायनपरिशिष्टमुदाहृत्यैवं व्यवस्थोक्ता आदौ बह्वृचयेचान्ते दर्शमध्ये महालये एकोद्दिष्टे निवृत्ते तु वैश्वदेवो विधी
यते इति बह्वृचस्मृत्युक्तत्वात्सर्वेषां श्राद्धान्त एवेति मेधातिथिस्मृतिरत्नावल्यादयो बह्वृचः वोपदेवस्तु अग्नौकरणे विसर्जनान्ते
श्राद्धमुक्त्वा उच्छेषणं त्विति पूर्वोक्तमनुवाक्योदाहरणाद्बह्वृचानां श्राद्धान्त एव मध्यपक्षस्त्वन्यशाखापर इत्याह हेमा
द्रिस्तु बह्वृचान्यते एव वैश्वदेवमाह कातीयानां तु स्मार्त्तश्रौताग्निमतामादावेव नैव पाकेनेति कस्मिः अन्येषामन्ते तो
निरग्निकानां तु साग्नीनां सर्वत्रादौ वैश्वदेवः पंचयज्ञाश्च अन्ते चेति सुदर्शनभाष्य उक्तम् अस्य पक्षद्वयस्य पूर्ववद्व्यवस्था
हेमाद्रौ मार्कण्डेयः ततो नित्यक्रियां कुर्याद्भोजयेच्च ततो द्विजान् ततस्तदन्नं भुंजीत सह भृत्यादिभिर्नरः ततः श्राद्धश
षात् नित्यक्रियां नित्यश्राद्धम् तत्र पृथक्पाकेन नैत्यकमिति तेनैवोक्तेः पाकैक्ये विकल्पः अथ नित्यश्राद्धम् हेमाद्रौ व्या
सः एकमप्याशयेद्विप्रं षण्णामप्यन्वहं गृही अपीत्यनुकल्पः प्रचेताः नामंत्रणं न होमं च नाह्वानं न विसर्जनम् न
पिंडदानं विकिरं न दद्यादत्र दक्षिणाम् अत्र निर्दिष्टमपि भोजयित्वानु किंचिद्दत्वा विसर्जयेदिति तेनैवोक्तेर्दक्षिणावि

नि॰ सिं॰ कल्पः यत्तु नित्यश्राद्धं देवहीनं नियमादिविवर्जितम् दक्षिणारहितं चैव दातृभोक्तृव्रतोज्झितमिति काशीखण्डं तद्धि सामान्यपरमिति पृ
२४६ थ्वीचन्द्रः भविष्ये आवाहनस्वधाकारपिण्डाग्नौकरणादिकम् ब्रह्मचर्यादिनियमा विश्वेदेवास्तथैव हि दातृभोक्तृगणा नियमा
न च विद्यते एतद्दिनासंभवे रात्रावपि कार्यम् दिवोदितानि कर्माणि प्रमादादकृतानि वै यामिन्याः प्रहरं यावत्तावत्कर्माणि कारये
दिति वृद्धहारीतोक्तेः रात्रौ प्रहरपर्यन्तं दिवाकृत्यानि कारयेत् ब्रह्मयज्ञं च सौरं च वर्जयित्वा विशेषत इति पृथ्वीचन्द्रधृतसंग्रह
कोक्तेश्च न च राहुग्रिकादिकाद्यपि रात्रौ स्यादिति वाच्यम् दृष्टापत्तेः तथा च माधवेन प्रतिपत्करणे स्पष्टमुक्तम् अयं चाग्रे वक्ष्यामः
स्य दिनेऽकरणे लोप एव रात्रौ श्राद्धं न कुर्वीतेति निषेधादिति पृथ्वीचन्द्रः पात्राभावे कौर्मे उद्धृत्य वा यथाशक्ति किंचिदन्नं प्रक
ल्पयेत् तत्रातिपत्तिमाह विष्णुः भिक्षुकाभावेऽन्नगोग्रासोदद्यादग्नौ वा प्रक्षिपेदिति हेमाद्रौ नागरखण्डे नित्यश्राद्धं न कुर्वीत प्र
सङ्गाद्यत्र सिद्ध्यति श्राद्धान्तरे कृतेऽन्यत्र नित्यत्वात्तन्न हापयेत् षड्दैवतेऽप्यसमर्थः मात्स्ये ततस्तु वैश्वदेवान्ते सभृत्यसुतबान्धवः
भुञ्जीतातिथिसंयुक्तः सर्वपित्र्यनिषेवितम् सर्वपर्वनिषिद्धमांसमाषापूपीत्यर्थः एवं कूर्मैकादश्यादौ गृहिणोऽपि भोजनम
स्त्येवैधत्वेन निषेधाप्रवृत्तेः एवं ग्रहणावधेऽपि यच्चान्वाहिताग्नेरमावास्यामासव्रतयोर्दित्युक्तम् तद्वचनमेव श्रौतत्वेन तत्स्वबल
वत्त्वात् देवलः श्राद्धं कृत्वा तु यो मर्त्यो न भुङ्क्ते स कदाचन देवा हव्यं न गृह्णन्ति कव्यानि पितरस्तथा शिवरहस्ये एकादश्यादौ त्ववघ्राणमेव ता
तम् प्राक् यत्र तूपवासो नावश्यकस्तत्रैकभक्ते यथाचितं वा कार्यमिति हेमाद्रिः जातूकर्ण्यः अहन्येव तु भोक्तव्यं कृते श्राद्धे द्विजन्म
भिः अन्यथा ह्यासुरं श्राद्धं परपाके च सेविते श्राद्धशेषभोजनस्य क्वचिन्निषेधमाह हेमाद्रौ प्रायश्चित्तकाण्डे मार्कण्डेयः पित्रा
दीनामथान्येषां श्राद्धशेषान्नभोजनम् व्रतिनां विधवानां च यतीनां च विगर्हितम् अन्ये भिन्नगोत्राः व्रतिनो ब्रह्मचारिणः
श्राद्धावशिष्टभोक्तारस्ते वै निरयगामिनः सगोत्राणां सकुल्यानां ज्ञातीनां च न दोषकृत् इति तत्रैवोक्तेः तत्रैव जाबालिः
विप्रस्त्वन्यगृहे श्राद्धशिष्टान्नभोजनं चरेत् प्राजापत्याद्विशुद्धिः स्याज्ज्ञातिगोत्रे न दोषकृत् यतीनां वपनं लक्षं प्रणवजप रामः
श्चेति तत्रैवोक्तेरस्यापवादमाह स एव श्वशुरस्य गुरोर्वापि मातुलस्य महात्मनः ज्येष्ठभ्रातुश्च पुत्रस्य ब्रह्मनिष्ठस्य यो २४६

गिनः एतेषां श्राद्धं शिष्टान्नं भुक्त्वा दोषो न विद्यते इति केचित्प्रशंसन्ति मुनयस्तद सांप्रतम् विशेषांतरं तत्रैव ज्ञेयम् हेमाद्रौ
जाबालिः तांबूलं दन्तकाष्ठं च स्नेहस्नानमभोजनम् रत्यौषधपरान्नानि श्राद्धकर्त्ता विवर्जयेत् आचार्य्यः न शूद्रं भोजयेत्त
स्मिन्न देहयत्नेन तद्दिने श्राद्धशेषं न शूद्रेभ्यः प्रदद्याद् दखिलेष्वपि इति जगद्गुरुनारायणभट्टसूनुरामकृष्णभट्टानुजक
मलाकरभट्टकृतनिर्णयसिंधौ पार्वणश्राद्धम् अथानुकल्पः तत्र विप्रालाभे भोजयेदर्थवाप्यकं ब्राह्मणपंक्तिपावन
म् दैवे कृत्वा तु नैवेद्यं पश्चात्तस्य तु निर्वपेत् इति शंखोक्तेः एकोविप्रः एवमुक्तः विप्राभावे दर्भवटुः प्रागुक्तः निधाय वा दर्भवटु
मासनेषु समाहितः प्रैषानुप्रैषसंयुक्तं विधानं प्रतिपादयेदिति देवलोक्तेः अथ काम्यमश्राद्धम् आपद्यनग्नौ तीर्थे च प्रवा
से पुत्रजन्मनि आमश्राद्धं प्रकुर्वीत भार्यारजसि संक्रमे इति कात्यायनोक्तेः पृथ्वीचन्द्रोदये मदग्निः यावत्स्यान्नाग्नि
संयुक्त उत्सन्नाग्निरथापि वा आमश्राद्धं तथा कुर्याद्धस्तेनौकरणं भवेत् कौर्मे अनग्निरध्वनो वापि तथैव व्यसनान्वि
तः आमश्राद्धं द्विजः कुर्याद्वृषलस्तु सदैव हि आहिताग्नेः प्रवासस्थे तत्पत्नी गृहदार्शं आत्विजादिना कारयेत् अमावास्या
दिनियतं प्रोषिते धर्मचारिणि पत्न्या तु कारयेन्नित्यमन्येनाप्यृत्विगादिनेति लघुहारीतोक्तेः पृथ्वीचन्द्रोदये आदि
पदमाब्दिकादिसर्वपार्वणपरमिति हरलपाणिः सुमन्तुः पाकाभावेऽधिकारः स्याद्विप्रादीनां नराधिप अपत्नीनाम
हावाहो विदेशगमनादिभिः सदा चैव तु शूद्राणामामश्राद्धं विदुर्बुधाः प्रचेताः स्त्रीशूद्रः स्वपचश्चैव जातकर्मणि चा
प्यथ आमश्राद्धं सदा कुर्याद्विधिना पार्वणेन तु स्वयं पचतीति स्वपचः विष्णुः शनसो आत्मनोदशकालाभ्यां विप्लवे समु
पस्थिते आपद्यनग्नौ तीर्थे च प्रवासे पत्न्यसंभवे चंद्रसूर्यग्रहे चैव दद्यादामं विशेषतः न पक्वं भोजयेद्विद्वान्न चक्षुद्रापि
कदाचन भोजयन्नन्यथा यो वै स्यात्तच्च तस्य फलं लभेत् अत्र प्रवासतीर्थग्रहणदामं हेमश्राद्धमेव पाकश्राद्धं तु न भवत्येवे
ति हेमाद्रि रत्नावल्यादयः अपरार्कविज्ञानेश्वरादयस्तु पाकाभावे द्विजातीनामामश्राद्धं विधीयते इति सुमन्तूक्तेः साग्निक
निरग्निकेऽप्रवासादौ सर्वत्र पाकाभावे आमादिकार्य्यम् पाकसंभवे त्वन्नेनैव त्याज्यः अत एव पाकश्राद्धमुक्त्वा एतच्चानु

त्रि·सिं· पत्नीतोपि कुर्यात्सर्वेषु पर्वसु भार्याविरहितोप्येनमग्निवासस्यापि नित्यश्राद्धमिति मात्स्ये निरग्नेरपि पाकेनोक्तमिति शूलपाणि कल्पतरू स्व
२५७ तच्छन्दः श्राद्धमात्रपरत्वमस्य एकोद्दिष्टं तु कर्त्तव्यं पाकेनैव सदा स्वयमिति मनुहारीतोयमपि साग्नेर्गृहे कोद्दिष्टमप्यामेन शूद्र
स्य तु श्राद्धपिंडदानं घामेनेति हलायुधः उत्पन्नाग्नीनां त्वामश्राद्धमेव पूर्वमकृतजन्मदग्निवाक्यात् मरीचिः श्राद्धविघ्ने द्विजातीना
मामश्राद्धं प्रकीर्त्तितम् अमावास्यादिनियतमाससंवत्सरादृते स्मृतिदर्पणे मृताहं च सपिंडं च गयाश्राद्धं महालयम् आ
पन्नोपि न कुर्वीत श्राद्धमामेन कर्हिचित् हेमाद्रौ व्यासः आमं दद्यात्तु कौन्तेय दद्यादामं चतुर्गुणम् द्विगुणं त्रिगुणं वापि नत्वेक
गुणमर्पयेत् सिद्धान्नेन तु विधिर्यः स्यादामश्राद्धेप्यसौ विधिः आवाहनादि सर्वं स्यात्पिंडदानं च भारत दद्याद्यच्च द्विजाति
भ्यः शृतं वा यदि वामेव वा तेनाग्नौ करणं कुर्यात्पिंडांस्तेनैव निर्वपेत् पक्वान्नमाह स एव आमं दद्यात्तु कौन्तेय तद्दानं द्विगुणं चरेत्
त्रिगुणं चतुर्गुणं वापि नत्वेकगुणमर्पयेत् स्मृत्यर्थसारे समग्ममन्नम् बह्वृचमते आमश्राद्धं यदा कुर्याद्विधिज्ञः श्राद्धदः
सदा हस्तेग्नौकरणं कुर्याद्ब्राह्मणस्य विधानतः एतत्साग्निनिरग्नेः सदा तत्साम्यात् यत्तु आमेन पिंडं दद्याच्चेद् द्विजान्यक्केन भो
जयेत् पक्वेन कुरुते पिंडमामान्नयः प्रयच्छति तावुभौ मनुजश्रेष्ठौ नरकार्हौ न संशय इति तद्दर्शादिपरम् देशाचाराद्व्यवस्थ
तिमुक्तम् मरीचिः आवाहने स्वधाकारे मंत्रोऊह्या विसर्जने अन्यकर्माण्यनूह्याः स्युरामश्राद्धे विधिः स्मृतः आवाहने ह वि
ष्वन्नवदूह्यत्र स्वीकर्त्तवे ऽनूहः स्वधाकारे नमो वः पितर इष इत्यत्र इषपदस्थाने आमद्वयायेत्यूहः विसर्जने वाजे वाजे
वत ऋत्विजा इति स्थाने तर्पित तृप्यतेति वा ऊहः यद्यपि तस्माच्छ्राद्धे च नोहदिति ऋच्यूहो निषिद्धस्तथापि वचनाद्भवति तत्रिप्रश्नो वर्ग
हस्तत्वृजुब्रह्मन्नो यथासुखम् आमश्राद्धे भवेन्नैतदपोषणं तु च पंचमम् अथ चानुवादः खलु बाल्याच्छन्दादीनामिवार्थीभ
बाल्लापसिद्धेः धर्मप्रदीपे तु आमं चतुर्गुणं दद्याद्यवाद्विगुणं तथा हेमवाष्टगुणं तद्दाने हेमेप्यसौ विधिः आमहेमनि
यानि तेनादौ श्राद्धं तथैव च अतीपातादिके श्राद्धे नियमान्परिवर्जयेत् गृह्यकोक्तसमुच्चये पञ्चभिः प्रायशो नवा पिंडदा राम:
न प्रकुर्वीत आमहेमकृते सति आमश्राद्धे च पूर्वाह्णे च प्रेतश्राद्धे तथैव च विकिरं नैव कुर्वीत मुनिः कात्यायनोऽब्रवीत् आमश्रा २५७

दमनं गुच्छमग्नौकरणवर्जितम् तृप्तिप्रश्नविहीनं तु कर्त्तव्यं मानवैर्ध्रुवम् आवाहनमग्नौकरणं विकिरं पात्रपूरणम् तृप्ति
प्रश्नं न कुर्वीत आमे हेम्ने कदाचन इत्युक्तात् तच्च आवाहनमवेत्याद्यर्घ्यदानं तथैव चेति हेमाद्रौ भविष्यादिविरोधाच्चिंत्य
म् शाखांतरविषयं वास्तु विकिरेण्यामेनेति हेमाद्रिः शूद्रस्य तु तत्रैवोक्तम् अग्नौकरणमंत्रश्च नमस्कारो विधीयते अ
ग्नये कव्यवाहनाय नमः सोमाय पितृमते नम इत्ययं मंत्रः मात्स्ये मंत्रवर्ज्जो हि शूद्रस्य सर्वमेव विधीयते एवं शूद्रोपि सा
मान्यवृद्धिश्राद्धं च सर्वदा नमस्कारेण मंत्रेण कुर्यादामान्नवद्बुधः तच्च पूर्वाह्णे कार्यम् आमश्राद्धं तु पूर्वाह्णे एकोद्दिष्ट
च मध्यतः पार्वणं चापराह्णे तु प्रातर्वृद्धिनिमित्तकमिति हारीतोक्तेः एतद्द्विजविषयम् शूद्रकर्तृकं त्वपराह्ण एव मध्या
ह्नात्परतो यस्तु कुतुपः समुदाहृतः आमश्राद्धं तु तत्रैव पितॄणां दत्तमक्षयम् इति सुमन्तूक्तेरिति अपरार्के हेमाद्रौ चा
कम् तदभावे हेमश्राद्धमाह हेमाद्रौ मरीचिः आमान्नस्याप्यभावे तु श्राद्धं कुर्वीत बुद्धिमान् धान्याच्चतुर्गुणेनैव हिर
ण्येन सुरोचिषो धर्मः आमं तु द्विगुणं प्रोक्तं हेम तद्वच्चतुर्गुणम् स्मृत्यर्थसारे हिरण्यमष्टगुणं चतुर्गुणं समं वा
दद्यात् हेमाद्रौ भविष्ये अन्नाभावे द्विजाभावे प्रवासे पुत्रजन्मनि हेमश्राद्धं संग्रहे चैव तथा स्त्रीशूद्रयोरपि वृद्धशात
मते तुर्यपादवर्ज्जयित्वा क्षयेहनीति पाठः यस्य भार्या रजस्वलेति वा सपाठः पुत्रोत्पत्तौ तु हेमनियममाह संवर्त्तः
पुत्रजन्मनि कुर्वीत श्राद्धं हेम्नैव बुद्धिमान् न पक्वेन न चामेन कल्याणान्यभिकामयन् भविष्ये गृहपाकात्समुद्धृ
त्य सक्तुभिः पायसेन वा पिंडदानं प्रकुर्वीत हेमश्राद्धे कृते सति शूद्रस्तु गृहपाकेन तत्पिंडो निर्वपेत्तथा शाकमूल
फलैस्तस्य पायसं वा भवेत्स्मृतम् हेमश्राद्धे पिंडदानं नेति दिवोदासः स्मृत्यर्थसारे तु विकल्प उक्तः तदाशयेन वि
स्नः षड्विंशन्मते नामन्त्रणमग्नौकरणं विकिरान्नैव दीयते तृप्तिप्रश्नोपि नैवात्र कर्त्तव्यः केनचित्क्वचित् अत्र मरी
चिना आमाभावे हेमविधानेनस्यानापत्याधर्म्मप्राप्तेः पूर्ववन्मंत्रोहः पूर्वाह्णकालता च ज्ञेयेति दिक् पूर्वोक्तधर्म

नि॰सिं॰
२५८

प्रदीपोत्कोऽश्वव्यासः हिरण्यमामंश्राद्धीयं लब्ध्वं यत्स्वत्रियादितः यथोक्तं विनियोज्यं साद्भुञ्जीया श्राद्धलग्नात्स्वयम् विप्रालब्ध्वं भुञ्जीयात
सत्राद्दिलब्ध्वे तु यथोक्तं विनियोगः तेनापिश्राद्धवैश्वदेवादिनकार्य्यम् देवोद्देशेन त्यक्तस्यदेवतोनेरायत्सागयोगादिति देवयाज्ञिकः
शूद्रलब्धे तु केनानेनाद्धिशान्मते आमंशूद्रस्यपत्किंचिच्छ्राद्धिकं प्रतिगृह्यते तत्सर्वं भोजनायालं नित्यनैमित्तिकेन च इति श्रुतिः
त्वंगिराः शूद्रवेश्मनिविप्रेणक्षीरं वायदिवादधि निवृत्तेनेन भोक्तव्यं शूद्रान्नंतदपिस्मृतम् शूद्राद्दिगृहव्वन्नप्रविष्टंतु सदाशु
चि पराशरः तावद्भवतिशूद्रान्नंयावन्नस्पृशतिद्विजः द्विजातिकरसंस्पृष्टं सर्वंतन्नविधीयते विष्णुपुराणे संप्रोक्षयित्वागृह्णीयाच्छू
द्रान्नं गृहमागतम् अंगिराः पात्रान्तरगतं ग्राह्यं दुग्धं च गृहमागतम् सपिंडश्राद्धाशक्तावाह हेमाद्रौ संवर्त्तः समर्थस्यतु शक्तौ
कर्त्तुं नैवेह पार्वणम् अपि संकल्पविधिना काले तस्य विधीयते पात्रभोज्यस्यचान्नस्यत्यागः संकल्पउच्यते व्यासः सांकल्पंतु यदा
कुर्यान्न कुर्यात्पात्रपूरणम् नावाहनाग्नौकरणे पिण्डांश्चैव न दापयेत् पार्श्वमत्स्य समंत्रकावाहनस्य निषेधः तथातु भवति व
तिहेमाद्रिः स्मृत्यंतरे विकिरं तु न दातव्यमिति तत्तृतीयपादे पाठः स्मृत्यंतरे त्यजेदावाहनं चार्घ्यमग्नौकरणमेव च पिंडांश्च विकि
रांश्चैव श्राद्धे सांकल्पसंज्ञके हेमाद्रौ प्रचेतः शातातपस्तु पिंडनिर्वापरहितं यत्तु श्राद्धं विधीयते स्वधावाचनलोपोत्र विकिरस्तु न लुप्य
ते इत्याह पृथ्वीचन्द्रोदये वशिष्ठः आवाहनस्वधाशब्दपिंडाग्नौकरणं तथा विकिरं पिंडदानं च सांकल्पे षड् विवर्जयेत् विकिरविकल्पः
स्मृत्यंतरे अंगानि पितृयज्ञस्य यदा कर्तुं न शक्नुयात् स तदावाचयेद्विप्रान् संकल्पात्सिद्धिरस्त्विति छागलेयः पिंडयज्ञनिवृत्तेंतम
द्यादिभुक्ष्यंचन सांकल्पं तु न दाकार्य्यं नियमाद्ब्रह्मवादिभिः कार्ष्णाजिनिः मौञ्जीबंधाद्वत्सराद्वित्सरपाणिपीडनात् पिंडान्सपिंडानां
दद्युः अन्तःपिंडविनानं तु अस्यापवादः नपित्रोः सांवत्सरिकादौ पूर्वमुक्तः संस्कारेरपि सांकल्पमुक्तं षड्विंशन्मते अनग्निकोयदाविप्रश्च
त्सन्नाग्निरथैवच नेष्यादिषु सर्वासु संकल्पश्राद्धमाचरेत् अशक्तोतु पृथ्वीचंद्रोदये वृहन्नारदीये द्रव्याभावे द्विजाभावेप्यन्नमात्रं
तुपाचयेत् पैतृकेन तु सूक्तेन होमं कुर्याद्विचक्षणः देवलः पिंडमात्रं प्रदातव्यमभावे द्रव्यविप्रयोः श्राद्धीयाहनि संप्राप्ते भवेन्निरशनो एक॰ २५८
पिवा वृद्धवशिष्ठः किंचिद्दद्याद्दशक्तस्तु उदकुंभादिकं द्विजे तृणानि वा गवे दद्यात्पिंडान्वाप्यथ निर्वपेत् तिलदर्भैः पितॄन्वापि तर्पयेत्

स्नानपूर्वकम् हेमाद्रौ भविष्ये अग्निनावा दहेत्कक्षं श्राद्धकाले समागते तस्मिन्वोपवसेद्विजपेद्वा श्राद्धसंहिताम् । श्राद्धसंहितायामंत्र
श्राद्धकल्पः विष्णुवाराहपुराणयोः असमर्थोन्नदानस्य धान्यमामं स्वशक्तितः प्रदास्यति तिलान्वापि स्वल्पाल्पां वापि दक्षिणाम्
सर्वाभावे वनं गत्वा कक्षामूलप्रदर्शकः सूर्यादिलोकपालानामिदमुच्चैः पठिष्यति न मेस्ति वित्तं न धनं न चान्यच्छ्राद्धोपयोग्यं स्वपितॄ-
न्नतोस्मि तृप्यन्तु भक्त्या पितरो मयैतौ भुजौ कृतौ वर्त्मनि मारुतस्य इत्येतत्पितृभिर्गीतं भावाभावप्रयोजनम् यः करोति कृतं तेन श्राद्धं
भवति भारत । प्रभासखण्डे गत्वारण्यमनामानुष्यमूर्ध्वबाहुर्विरौत्यदः निरन्नो निर्धनो देवाः पितरो मां न रोचयाथ न मेस्ति वित्तं न ध-
नेन भार्या श्राद्धं कथं वः पितरः करोमि वनं प्रविश्य हनुमन्त्रयाच्य भुजौ कृतौ वर्त्मनि मारुतस्य श्राद्धं गामनेन ब्रुवता प्रदत्तं मया स्वधा पितृ-
देवताद्याः आरभ्याय चाक्षिप्य भुजौ ततो वै दिवा च रात्रिं समुपोष्य तिष्ठेत् भवन्त्येवं तेन कृतेन तेषां मुक्तो नमुक्तः पितृदेवतानाम् अथ ८५६
श्राद्धभोजने प्रायश्चित्तम् दर्शावटप्राणायामाः वृद्धोत्रयः संस्कारेषु नुजातकर्मादिचूडान्तेषु सान्तपनमाद्यचान्द्रं वा अन्यसंस्कारे-
षूपवासः सीमन्ते चान्द्रमिति विज्ञानेश्वरः आपदि नवश्राद्धे कादशाहेषु भोजने कार्यः द्वादशाहे ऊनमासे च पादोनः द्विमासे त्रिप-
क्षे ऊनषण्मासे वाब्दिके वा श्राद्धे कृच्छ्रः त्रिमासाद्याब्दिकान्तेषु सपिण्डने च पादकृच्छ्रः उपवासो वा गुरुद्रव्यार्थभोजने द्विगुणं जपशीलेन
द्विगुणं नापदि तु ऊनमासान्तेषु चान्द्रं कार्यं च द्विमासादौ पादोनम् त्रिमासादावर्धं कार्यः आब्दिके पादोनं कार्यः पुनराब्दिके एकाहः
क्षत्रियादिश्राद्धेषु द्वित्रिचतुर्गुणानि ज्ञेयानि चण्डालसर्पपश्वादिहतपतितक्लीबादिनवश्राद्धे चान्द्रम् आद्यमासिकान्ते चान्द्रं प-
राकश्च द्वादशाहादौ पराकः द्विमासादावतिकृच्छ्रः त्रिमासादौ कार्यः आब्दिके पादः अभ्यासे सर्वं द्विगुणम् आमहेम-
कल्पश्राद्धेषु तत्तद्दिनानि यतिब्रह्मचारी चोक्तप्रायश्चित्तं कृत्वा चीर्णोपवासान्प्राणायामानष्टौ नाशनं चाधिकं कृत्वा व्रतशेषं
समापयेत् अनापदि द्विगुणम् दर्शादौ दशगायत्रीमन्त्रितास्त्वपः पिबेत् षट्प्राणायामा वा संस्कारेषु चौले कृच्छ्रः सीमन्ते
चान्द्रम् अन्येषूपवास इति दिक् अत्र माधवमिताक्षरादौ क्वचिद्विरोधो विषयभेदात्परिहार्यः एकादशाहे चान्द्रं पुनः संस्का-
रश्चेति हेमाद्रिः यत्तु शातातपः पिबेदपो गायत्र्या श्राद्धभुग्द्विजः इति तदनुक्तप्रायश्चित्तश्राद्धपरमिति विज्ञानेश्वरः
अथ क्षयाहश्राद्धम् तत्स्वरूपमाह हेमाद्रौ व्यासः मासपक्षतिथिस्पृष्टे यो यस्मिन्म्रियतेहनि प्रत्यब्दं तु तथाभूतं क्षयाहं तस्य

नि॰ सिं॰ २४९ पारणे मरणे नृणां तिथिस्तात्कालिकी मता । अत्र चान्द्रमासं ज्ञेयम् आब्दिके पितृकार्ये च चान्द्रो मासः प्रशस्यते इति गार्ग्योक्तेः मलमासमृत
स्य तु सौरम् मलमासमृतानां तु सौरं मासं समाश्रयेदिति हेमाद्र्युक्तेः एतन्मृतिमासस्यैवाधिक्ये ज्ञेयम् ब्राह्मे प्रतिसंवत्सरं कार्यं
मातापित्रोर्मृतेऽहनि पितृव्यस्याप्यपुत्रस्य भ्रातुर्ज्येष्ठस्य चैव हि अपुत्रस्येति भ्रात्रादावप्यन्वयः ज्येष्ठस्येति कनिष्ठस्यानावश्यकत्वार्थम्
मदरत्ने भविष्ये सर्वेषामेव श्राद्धानां श्रेष्ठं सांवत्सरं मतम् तथा भोजको यस्तु वै श्राद्धं न करोति खगाधिप मातापितृभ्यां सततं
वर्षे वर्षे मृतेऽहनि स याति नरकं घोरं तामिस्रं नाम नामतः तच्च नानास्मृतिष्वेकोद्दिष्टं पार्वणं चोक्तम् आद्यमाह यमः सपिण्डी
करणादूर्ध्वं प्रतिसंवत्सरं सुतैः मातापित्रोः पृथक्कार्यमेकोद्दिष्टं मृतेऽहनि व्यासः एकोद्दिष्टं तु कर्तव्यं पित्रोश्चैव मृतेऽहनि एको
द्दिष्टं परित्यज्य पार्वणं कुरुते नरः अकृतं तद्विजानीयाद्भवेच्च पितृघातकः अन्यमाह शातातपः सपिण्डीकरणं कृत्वा कुर्यात्पार्व
णं तु यः सदा प्रतिसंवत्सरं श्राद्धं छागलेयादितो विधिः यः सपिण्डीकृतं प्रेतं पृथक्पिण्डे नियोजयेत् विधिघ्नस्तेन भवति पितृहा चो
पजायते औरसक्षेत्रजयोः पार्वणं दत्तकादीनामेकोद्दिष्टमित्येकः पक्षः साग्नेः पार्वणं निरग्नेरेकोद्दिष्टमित्यपरः तद्व्यवस्थामि
यो८ ताक्षरायां ज्ञेयम् कल्पतरुस्तु साग्निकौरसक्षेत्रजयोः पार्वणं निरग्निकयोस्त्वेकोद्दिष्टमित्याह अपरार्के त्वेवम् दत्तकादयो दशपु
त्रास्तु साग्नयो निरग्नयश्चैकोद्दिष्टमेव कुर्युः प्रत्यब्दं पार्वणेनैव विधिना क्षेत्रजौरसौ कुर्यातामितरे कुर्युरेकोद्दिष्टं सुता दशेति
जातूकर्ण्योक्तेः यदा तु दत्तकस्य पितादर्शमिहालयं वा स्यात्तत्र पार्वणैकोद्दिष्टयोर्विकल्पः वस्तुतस्तु सर्वेषां पार्वणैकोद्दिष्टयो
र्देशव्यवस्थितो विकल्पः स च देशाचाराद्व्यवस्थित इति सर्वनिबन्धसिद्धान्तः अत एव पृथ्वीचन्द्रोदये वृद्धपराशरः मातापित्रोः पृथक्का
र्यमेकोद्दिष्टं मृतेऽहनि सत्याह देशधर्मं समाश्रित्य वंशधर्मं तथापरे सूरयः श्राद्धमिच्छन्ति पार्वणं च मृताहनीति तच्च केवल
पितृमरणे न सपत्नीकानामिति हेमाद्रिः अत्र मातामहानां कार्याः कर्षूसमन्वितं मुक्त्वा तथाद्यं श्राद्धषोडशम् प्रत्याब्दिकं च शेषे
षु पिण्डाः स्युः षडिति स्थितिरिति कात्यायनोक्तेः कर्षूसमन्वितं सपिण्डनम् यैरेकोद्दिष्टं क्रियते तेषामपि क्वचित्पार्वणमेव अ राम॰ २४९
मावास्यां क्षयो यस्य प्रेतपक्षेऽथवा पुनः पार्वणं तस्य कर्तव्यं नैकोद्दिष्टं कदाचनेति शङ्खोक्तेः एवं संन्यासिनोऽपि एकोद्दिष्टं

यतेर्नास्ति त्रिदंडग्रहणादिह सपिंडीकरणाभावात्पार्वणं तस्य सर्वदेति प्रचेतसोक्तेः वायवीये संन्यासिनोप्याब्दिकादि पुत्रः कु
र्याद्यथाविधि महालये तु यच्छ्राद्धं द्वादश्यां पार्वणं हि तत् पृथ्वीचंद्रोदये वृद्धपराशरः संग्रामे संस्थितानां च प्रेतपक्षे शशिक्ष
ये तेषां पार्वणमेवोक्तं क्षयाहेपि च सत्तमैः चंद्रक्षयानाशक सम्यग्गवुयः प्रेतपक्षे मृतवान्सपिंडः सपिंडितानामपि वाब्दिका
नि भवंति तेषामिह पार्वणानि तथा भ्रातुर्ज्येष्ठस्य कुर्वीत ज्येष्ठो भ्राता तु तनुजस्य च देवहीनं तु तत्कुर्यादिति धर्मविदब्रवीत् देवही
नमेकोद्दिष्टम् ज्येष्ठो भ्राताऽनाघ्रगर्भजः तथा च तत्रैव शातातपः अनाघ्रगर्भज्येष्ठोपि भ्राता सद्भिर्निगद्यते अतस्तु सपिंडता
तस्य नैव पार्वणमाचरेत् आघ्रगर्भे तु पार्वणमेकोद्दिष्टं वेत्यर्थः मातुस्तु हेमाद्रौ कात्यायनः अपत्न्यकाय यथा कुर्यात्सुतः पि
त्रे सदा द्विजः तथैव मातुः कर्त्तव्यं पार्वणं वान्यदेव वा यत्तु तत्रैवोक्तम् सपिण्डीकरणादूर्ध्वं पित्रोरेव हि पार्वणम् पितृव्यभ्रातृ
मातृणामेकोद्दिष्टं सदैव त्विति तत्सपत्नमातृपरम् यत्तु वृद्धपराशरः अपुत्रस्य पितृव्यस्य तत्पुत्रो भ्रातृजो भवेत् स एव तु
स कुर्वीत पिंडदानादिकं क्रियाम् पार्वणं तेन कार्यं स्यात्पुत्रवद्भ्रातृजेन तु पितृस्थाने तु तं कृत्वा शेषं पूर्ववदुच्चरेदिति त
त्पितृवद्देशाचाराद्व्यवस्थितम् ज्ञेयमिति पृथ्वीचंद्रः श्राद्धदीपकलिकायाम् चतुर्विंशतिमते तु पितृव्यभ्रातृमातृणां
ज्येष्ठानां पार्वणं भवेत् एकोद्दिष्टं कनिष्ठानां दंपत्योः पार्वणं मिथः अपुत्रस्य पितृव्यस्य भ्रातुश्चैवाग्रजन्मनः मातामह
स्य तत्पत्न्याः श्राद्धं पार्वणवद्भवेदित्युक्तम् पत्न्याः कर्त्तृत्वेपि पार्वणमेव सर्वाभावे स्वयं पत्न्यः स्वभर्त्तृणाममंत्रकम् सपि
डीकरणं कुर्युस्ततः पार्वणमेव चेति लौगाक्षिस्मृतेः तत्र पत्न्या विकुर्वीत सापिंड्यपार्वणात् यथा तिसुमन्तुनोक्तेति निर्णयामृ
तउक्तम् अस्य त्वेतत्साग्निकैकोद्दिष्टप्रशंसार्थं न पार्वणनिषेधार्थं मितक्षरात्रिस्थलीसेतौ भट्टचरणाः स्वमते प्रशं
तित्रिभ्यः शेष्यनेन विरोधाच्च अथवाणां त्वाह हेमाद्रावापस्तंबः अपुत्रा ये मृताः केचित्स्त्रियो वा पुरुषाश्च ये तेषामपि च दयस्यादेको
द्दिष्टं न पार्वणम् मित्रबंधुसपिण्डेभ्यः स्त्रीकुमारीभ्य एव च दद्याद्देमासिकं श्राद्धं सांवत्सरमतोन्यथा पारिजाते त्वन्यथा पार्वणमित्यु
क्ता सर्वत्र पार्वणैकोद्दिष्टवाक्यानि तीर्थमहालयपरत्वेनेत्युक्तम् पृथ्वीचंद्रोदये गार्ग्यः मातुः सहोदरायाच पितुः सहभवाचया

ति॰ सिं॰
२५०

तयोश्चैनेवकुर्वीत पार्वणं पिंडत्वाद्दते प्रमीताः सपिंडीकरणादूर्ध्वमेकोद्दिष्टं विधीयते अपुत्राणां च सर्वेषामपत्नीनां तथैव च अपत्नी
नां ब्रह्मचार्यादीनाम् मार्कण्डेयपुराणे प्रतिसंवत्सरं कार्यमेकोद्दिष्टं नरैः स्त्रियाः प्रजाहनि यथान्यायं कारणायूढादिहोदितम्
न्कणाभितिदृष्टान्तात्कृताविप्रहतेपारवर्द्दादीनां सपिंडनाभावेपि सांवत्सरमेकोद्दिष्टं कार्यमेवेति शूलपाणिः अभिवद्दवाशि
ष्ठोः सपिंडीकरणादूर्ध्वं यत्रैकपार्वणमाहुः अत एव मनुः श्राद्धं तु यानानारी मोहात्पार्वणमाचरेत् न तेन तृप्यते भर्त्ता केत्वातु
नरकं व्रजेदिति वचनेन मत्स्यपाहिपाक्षियत्रप्रदीयते भ्रात्रे भगिन्यै पुत्राय स्वामिने मातुलाय च पितृव्यश्वशुरे श्राद्धमेकोद्दिष्टं
न पार्वणम् यत्तु ग्रंथान्तरे पि: पितृव्यभ्रातृमातॄणामपुत्राणां तथैव च मातामहस्यापुत्रस्य श्राद्धादि पितृवद्भवेदिति तद
वश्यकत्वार्थमितिहेमाद्रिः पुत्रत्वेन मातुः पितरमारभ्य त्रयो मातामहाः स्मृताः तेषां तु पितृवच्छ्राद्धं कुर्युर्दुहितृसूनवः इति
पुलस्त्योक्तेर्मातामहस्य पार्वणमेव तत्साहचर्यात्पितृव्यादीनया पितृव्यभ्रातृमातॄणामेकोद्दिष्टं च पार्वणमिति क्षयाहाप
क्रमेण पुलस्त्योक्तेस्त्वविकल्पः केचित्तु पत्नीवादिवाक्यानि व्युत्क्रमाच्च प्रमीतानां नैव कार्यासपिंडते त्यस्य पितृव्यादिपरत्वाद
कृत सपिंडनपितृव्यादिपरत्वान्याहुर्मातासपत्नमाता एकोद्दिष्टं तु कनिष्ठपरमिति पृथ्वीचंद्रोदयश्चैवम् विशेषस्त्वधि
कारिनिर्णये प्रागुक्तः केचित्पुत्रान्तराभावे पितामहवार्षिकमप्यावश्यकम् पुत्राभावे च तत्पुत्रपत्नी माता तथा पिता विनाभी
वेपि सपिंडीकरणः कुर्यात्तस्यौर्ध्वदेहिकमिति मार्कण्डेयपुराणादित्याहुः तत्र पौत्रेणैकादशाहादिकर्त्तव्यश्राद्धषोडशमि
तिकानीयविशेषोक्तेः अथ क्षयाहद्वैधे निर्णयः तत्रैकोद्दिष्टं मध्याह्ने कार्यम् मध्याह्नश्च पंचधा भक्ते दिने तृतीयभागम्
इति माधवः आमश्राद्धं तु पूर्वाह्ने एकोद्दिष्टं तु मध्यतः पार्वणं चापराह्णे तु प्रातर्वृद्धिनिमित्तकमिति हारीतोक्तेः प्रातः शब्द
स्साहचर्यात् तत्रापि कुतुपादिमुहूर्त्तद्वयं ज्ञेयम् आरभ्य कुतपे श्राद्धं कुर्यादारौहिणं बुधः विधिज्ञो विधिमास्थाय रौहिणं
तु न लंघयेदिति शिखाकगौतमोक्तेरेतत्परत्वात् रौहिणान्नवमो मुहूर्त्तः अन्यथा तूर्ध्वमुहूर्त्तानां कुतुपापन्नमुहूर्त्तं चतुष्ट राम:
यम् मुहूर्त्तपंचकं ह्येतत्स्वधाभवनमिष्यते इत्यादिविरोधात् दीपिकायामेकोद्दिष्टमुपक्रमेत कुतपे इति माधवीयेप्यासापि २५०

चैं २

कृतपञ्चयमैरेकोद्दिष्टमुपक्रमेत् आवर्त्तनसमीपेवातत्रैवनियतात्मवान् पूर्व्वोचंद्रोदयेप्येवंदिनद्वयेतद्व्याप्तावशेषसमव्याप्तौचपूर्व्वो
विषमव्याप्तावाधिक्येननिर्णयः अव्याप्तौपूर्व्वैव परविद्धायानिषेधात्सचवक्ष्यते अत्रमूलंकालमाधवीयेज्ञेयम् पार्व्वणंत्वप
राह्णेकार्य्यम् पूर्व्वोक्तवचनात् मध्याह्नव्यापिनीयास्यात्सैकोद्दिष्टेतिथिर्भवेत् अपराह्णव्यापिनीयापार्व्वणेसातिथिर्भवेत् इति
पूर्व्वोचंद्रोदये अहर्गतमोत्तो अपूर्वेद्युरेवपरेद्युरेववापराह्णव्याप्तासैवग्राह्या दिनद्वयेतद्व्याप्तौतदस्पर्शेवातः समव्याप्तौवाद
वैषम्येनव्याप्तौत्वधिकाग्राह्या अपराह्णव्यापिनीस्याद्आब्दिकस्ययदातिथिः महतीयत्नतद्विज्ञात्पृष्टेसतिमहर्षयस्तथामरीचि
स्मृतेः दर्शंचपूर्णमासंचपितुःसांवत्सरंदिनम् पूर्व्वविद्धमकुर्व्वाणोनरकंप्रतिपद्यते इत्यपरार्कनारदोक्तेः अहव्यापिनीच
त्स्यान्नतोहस्ययदातिथिः पूर्व्वविद्धाप्रकर्त्तव्यात्रिमुहूर्त्तायदाभवेदितिसुमन्तूक्तेः पूर्व्वस्यानिशिपोप्यिडानित्यागिरसमाषितमि
तिहेमाद्र्यपोहः तत्रैवव्यक्तमनुः नद्यहव्यापिनीचेत्स्यान्नतोहस्यचयातिथिः पूर्व्वविद्धैवकर्त्तव्यात्रिमुहूर्त्ताचयाभवेत् मदन
रत्नेप्येवम् यत्तुकार्ष्णाजिनिव्यासौ अस्तमयवेलायांकलामात्रायदातिथिः सेवप्रत्याब्दिकेज्ञेयानापराह्णव्यापिनीदिति
तत्त्रिमुहूर्त्तस्तुतिः पूर्व्वेद्युःसायंत्रिमुहूर्त्ताभावेतुपरत्र त्रिमुहूर्त्तानचेद्ग्राह्यापरैवकृतपेहिसेतिकालादर्शेगामिलोक्तेः का
लादर्शेपि प्रत्याब्दिकेप्येवमेवतिथिग्राह्यापराह्णिकी उभयत्रतथात्वेतुमहत्वेनविनिर्णयः अन्यत्रापि सायतन्यपर
त्रचेन्नतितिथिः सैवाब्दिकेमासिकेग्राह्यासाद्यपराह्णगायदितदायत्राधिकासामता तुल्याचेदुभयापराह्णसमयेष्व
वीनचेत्तुद्वयेपूर्व्वैवत्रिमुहूर्त्तगास्तसमयेनोचेत्परैवोचिता माधवपृथ्वीचन्द्रोतुदिनद्वयेपराह्णव्याप्तावशतःसमव्याप्तौ
चक्षयेपूर्व्वावृद्धौपरा एवंवेदप्यापरोपृज्यावित्युक्तेः अपराह्णद्वयव्यापिन्यतीतस्यचयातिथिः क्षयेपूर्व्वाचकर्त्तव्यावृद्धौ
कार्यातथोत्तरे तिव्यहत्नारदीयाच्चेत्याहतुः वृद्धिक्षयौचात्रपरतिथ्यनेनुग्राह्यतिथेः तस्याःक्षयेपराह्णद्वयव्याप्तेर
सम्भवात् तदाहमाधवेः नग्राह्यतिथिगौवृद्धिक्षयावूर्ध्वतिथेस्तियाविति यत्तुपृथ्वीचंद्रः पूर्व्वोक्तवचनेष्वयत्रसा
याह्नास्तसमययोगिनीतिथिरुक्ता तत्रापराह्णव्यापिनीज्ञेया सायाह्नस्त्रिमुहूर्त्तःस्यात्तत्रश्राद्धंनकारयेत् इतिमा

सत्त्वेपूर्व्वविद्धैवह्यन्यथात्वेपिसायदि त्रिमुहूर्त्तगतसायंपर्वकृतंगिरनिर्णयः १

त्मारोसायाङ्कनिषेधात् यच्चत्रिमुहूर्त्तादिग्रहणं तच्च आद्याहोपराङ्करूपत्रिमुहूर्त्तपरमित्याह तेहेमाद्रिमदनरत्नकालादर्शादिग्रन्थ
विरोधाच्चिन्त्यम् तस्मात्सर्वोक्तमेवसाधु यदापिपूर्वेद्युरादिनेसांवत्सरश्राद्धंनकृतम् तदारात्रावपिकार्य्यम् मन्नाहसमतिक्रमश्च
कालेष्वपिजायते इतिमरीचिनाम्नाहातिक्रमेदोषोक्तेः नचनक्तेश्राद्धंकुर्वीतारब्धेचाभोजनसमापनेमित्यापस्तंबेनगौणरा
कालतोक्तेरितिमाधवः अहरादिनेवार्षिकप्राप्तौतद्दिनेएवाम्लनामेनहेमाद्रावाकुर्यान्नोत्तरदिनेइत्युक्तेमासग्रहणनिर्णय
तच्चप्रथमाब्दिकंत्रयोदशेमलेमासेकार्य्यमन्यथान प्रत्यब्दं द्वादशेमासिकार्यापिंडक्रियासुतैः क्वचित्त्रयोदशेपिस्यादाद्यंमु
क्त्वातुवत्सरमितिलघुहारीतोक्तेः इदमन्याधिमासपरम् द्वादशेतीतेइत्यर्थः माधवीयेहेमाद्रौचैवंद्वितीयादिकंतुमुख्यमासएव
वन्नाधिकेनाप्युभयोः मलमासमृतानांतु यदासएवाधिकःस्यात्तदातत्रैवकार्य्यमन्यदामुख्येएवेतिप्राहुः दर्शेवार्षिकंचेत्तत्
पूर्ववार्षिकंकृत्वाततःपिंडपितृयज्ञोदर्शश्राद्धंचेतिनिर्णयदीपेक्रमउक्तः देवयाज्ञिकस्तुतस्मात्सारोपि दर्शेत्याहसंप्राप्तेक
थकुर्वीतयाज्ञिकाः आदौक्षयाहंनिर्वर्त्यपश्चाद्दर्शोविधीयते इतियुक्तंचैवम् तच्चनेमूलाभावात् दर्शपूर्णमासाभ्यामिष्ट्वासो
मेनयजेतेतिवत् पिण्डयज्ञेनतनःकुर्यात्ततोन्वाहार्यकंबुधः इतिदर्शश्राद्धपिंडपितृयज्ञानानतर्यात्तस्याब्दिकेप्यतिदेशात्प्राप्तावपि
पिप्रकृतेपूर्वत्वादेवमंतेस्यादितिन्यायेनपितृयज्ञानंतरंदर्शस्ततोवार्षिकश्राद्धमिति कालादर्शेपितिमितानियतिश्चान्ने
पूर्वानुष्ठानकारणमितिसर्वान्प्रत्येकरूप्याभावात्क्षयाहनिमित्तस्यानियतत्वम् देवयानीये[illegible]मासिकादिष्व
पिन्नैवम् प्रत्यब्दंयोयथाकुर्यात्तथाकुर्यात्सतान्यपीतिसर्वातिदेशात् मन्नाहच्यवनोत्सर्गउक्तोहेमाद्रौविष्णुधर्मे अयनद्वितये
चैवम्नाहवाधवस्यच उत्सृजेन्नीलवृषभंकौमुद्याःसमुपागमे कौमुदीकार्तिकी अथशुद्धिश्राद्धम् दिवोदासीये सापिंडीक
रणादूर्ध्वंयावदब्दत्रयंभवेत् तावदेवनभोक्तव्यंक्षयेहनिकदाचन वर्षान्तसपिंडनेप्येतत्तुल्यम् मन्नाहनितुसंप्राप्नेयाव
दब्दचतुष्टयम् वहिःश्राद्धमकुर्वीतनकुर्याच्छ्राद्धभोजनम् प्रथमेस्थीनिमज्जाचद्वितीयेमांसभक्षणम् तृतीयेरुधिरंप्रोक्तं एम:
श्राद्धंमुख्यचतुर्थकमितिश्राद्धकाशिकोक्तेः मुख्यंकिंचिदितिज्ञेयम् स्मृत्यन्तरे सप्तत्रिंशच्चयोमासानश्राद्धंभुंक्तेतमोहनः २५१

सपंक्तिदूषितः पापः प्रेताशौचभवेत्तु सः तत्र प्रथमे द्वे वर्षे तु सपिंडनपक्षे मृताहात्पूर्वेद्युः सपिंडनमब्दपूर्तिश्राद्धं च कृत्वा परेद्युर्वार्षिकं कु
र्यादिति स्मृत्यर्थसारे उक्तं हेमाद्रिस्तु मृताहे सपिंडीकरणेनैव वार्षिकसिद्धिः पूर्णे संवत्सरे पिंडः षोडशः परिकीर्तितः तेनैव च स
पिंडत्वं तेनैव वार्षिकमिष्यते इति वचनादित्याह इदमेव च युक्तम् अथ क्षयाहाज्ञाने मरीचिः श्राद्धविघ्ने समुत्पन्ने अविज्ञाते मृत
हनि एकादश्यां तु कर्तव्यं कृष्णपक्षे विशेषतः विशेषत इत्युक्तेः शुक्लैकादश्यामपि बृहस्पतिः न ज्ञायते मृताहश्चेत् प्रमीते प्रोषिते
सति मासश्चेत्तत्र विज्ञातस्तद्दर्शे स्यात्तथाब्दिकम् दिनमासौ न विज्ञातौ मरणस्य यदा पुनः प्रस्थानमासदिवसौ ग्राह्यौ पूर्वो
क्तया दिशा मदनरत्ने भविष्ये मृताहं यो न जानाति मासं वापि न तत्त्वतः तेन कार्यममावास्याश्राद्धं सांवत्सरं सदा दिनमेव
तु जानाति मासं नैव तु यो नरः मार्गशीर्षेऽथवा भाद्रे माघे वा तद्दिने भवेत् निर्णयामृते तु यदा मासो न विज्ञातो विज्ञातं तु दिनमेव तु
तदा चाषाढके मासि माघे वा तद्दिने भवेदिति बृहस्पतिस्मृते रषाढोप्युक्तः कालादर्शेऽपि मासाज्ञाने दिनज्ञाने कार्यमाषाढ
माघयोरित्युक्तम् हेमाद्रौ प्रभासखंडे मृताहं यो न जानाति मासं वापि कथंचन तेन कार्यममायां स्याच्छ्राद्धं माघेऽथ मार्गके
भविष्ये मृतवार्तां श्रुते यो वा यो वा पूर्वोक्तक्रमेण तु पूर्वोक्तेति प्रस्थानदिनाज्ञाने मासज्ञाने च तद्दर्शे मासाज्ञाने माघमार्गद
र्शे दिनज्ञाने च मार्गदाविति वत् श्रवणादिनेपि ज्ञेयामितवधीः श्रवणादिने मासाज्ञाने माघमार्गदर्शे कार्यम् पूर्वोक्तप्रभास
खंडात् अन्नात्र लोपइति शूलपाणयुक्तमहेयम् तिथितत्त्वेयमः गतस्य न भवेद्वार्ता यावद्द्वादशवार्षिकी प्रेतावधारणं तस्य
कर्तव्यं सुतबांधवैः यन्मासि यद्दहर्यातस्तन्मासि तद्दहः क्रिया दिनाज्ञाने कृष्णस्तस्य आषाढ्यां वाथवा कुहूः अथ श्राद्धविघ्ननि
र्णयः तत्र विप्रस्य निमंत्रणानंतरं सूतके मृतके वा शौचाभावः निमंत्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्मणि निमंत्रणाद्धि विप्रस्य स्वा
ध्यायाद्विरतस्य च देहे पितृषु तिष्ठत्सु नाशौचं विद्यते क्वचिदिति ब्राह्मोक्तेः कर्तुस्तु विष्णुराह व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने ज
पे आरब्धे सूतकं न स्यादनारब्धे तु सूतकम् श्राद्धप्रारंभस्तेनैवोक्तः प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः नांदीमुखं विवाह
दौ श्राद्धे पाकपरिक्रिया इति माधवीयब्राह्मेपि आद्यादौ पितृयज्ञे च कन्यादाने च नो भवेत् मिताक्षरायां स्मृत्यंतरे सद्यः शौचं प्रव

नि॰ सिं॰ २५२

त्य यत्रेसंभ्रमतसंभारेविवाहेश्राद्धकर्मणीति तिथितत्त्वादिगौडग्रंथास्तु निमंत्रणोत्तरंकर्तुर्भोक्तुश्चनाशौचम् निमंत्रणोत्तरंश्रा
द्धारंभः स्यादितिस्मृतिरितिविद्यमृतोः यत्तुश्राद्धपाकपरिक्रियेतिनदर्शश्राद्धविषयमित्याहुः दानंगृहेमरणादौब्राह्मणेउक्तेम
भोजनार्द्धंतुसंभुक्तेविप्रेहोतुर्विपद्यते. गृहेइतिशेषः यदाकश्चित्तदाच्छिष्टंशेषंत्यक्त्वासमाहिताः आचम्यपरकीयेनजलेनप्र
चयोद्विजाइति अस्यश्राद्धविषयत्वंहेमाद्रिणोक्तम् पृथ्वीचन्द्रोदयेप्येवम् ममतुप्रतिभाति इदंविवाहादिविषयम् ननुश्राद्ध
विषयत्वेस्यदाभावात् विवाहोत्सवयज्ञेष्वित्युपक्रमस्य भुंजानेषुतुविप्रेषुत्वंतरामृतसूतके अन्यगेहोदकाचांताः सर्वतेशुचयःस्मृ
ताइतिषड्विंशन्मतैकवाक्यत्वात् निमंत्रितेषुविप्रेषुप्रारब्धेश्राद्धकर्मणीतिपूर्वोक्तिविरोधाच्च श्राद्धेपियद्यपिविद्यमुनापाकोत्त
रमाशौचाभावउक्तस्तथापिकर्तुरेवसः भोक्तुस्तुदोषोस्त्येव अपिदातृगृहीत्रोश्चसूतकेमृतकेतथा अविज्ञातेनदोषःस्याच्छ्रा
द्धादिषुकथंचन विज्ञातेभोक्तुरेवस्यात्प्रायश्चित्तोदितंक्रमात् इतिब्राह्मोक्तेः आदिशब्देनाशौचमुच्यते तत्राहविष्णुः ब्राह्म
णादीनामाशौचेयः सकृदेवान्नमश्नातितस्यतावदाशौचंयावत्तेषामाशौचव्यपगमेप्रायश्चित्तंकुर्यादिति यत्रदेहेपित्र्येषु
त्विष्टस्तुनाशौचंविद्यतेक्वचिदितिब्राह्मेतत्पूर्वकालीनस्यनिषेधकं नतदुत्तरकालीनस्य शुद्धिदीपस्तु निमंत्रितेष्वित्यामश्राद्धप
रं भोजनार्द्धंत्वित्यादित्वन्नश्राद्धपरमित्याह प्रायश्चित्तंचाह मार्कण्डेयः भुक्त्वान्नंब्राह्मणाशौचेचरेत्सांतपनंद्विजः एतत्कामतः अभ्यासे
प्रवः ब्राह्मणस्यतथाभुक्त्वामासमेकंव्रतीभवेदिति अज्ञानानुष्ठायलेपः एकाहंचत्र्यहंपंचसप्तरात्रमभोजनम् ततःशुद्धिर्भवेद्वि
प्रः पंचगव्यंपिबन्नरइति वर्णक्रमेणोदकम् अभ्यासेनुद्देश्यपरमेसोपादिमिताक्षरामाधवीयादौज्ञेयम् मिताक्षरामाधवादौतुश्राद्ध
कर्तुर्भोक्तुश्चसर्वथादोषाभावउक्तः आशौचमध्येश्राद्धदिनप्राप्तावनुमाधवीयेकालादर्शेचश्वभ्यन्तराः देयंपितॄणांश्राद्धंतुआशौचा
ज्जायतेयदा आशौचेतुव्यतिक्रांतेतेभ्यःश्राद्धंप्रदीयते आद्यंविनामरणान्नातिथे प्रतिसंवत्सरश्राद्धमाशौचात्पातिनंचयत् मलमासेपि
तत्कार्यमितिभागुरिभाषितम् आशौचात्यदिनत्वेननिमित्तत्वादित्यर्थः एतन्मासिकाब्दिकपरंनैराशिकादौ अतएवसुदर्शनभाष्ये
ऽपरपक्षेपिमारणीतिनियमात्तस्मपक्षेश्राद्धलोपेप्रायश्चित्तमेव नतुगौणकालेकरणम् तत्रोपवासः वेदोदितानांनित्यानांकर्मणां राम: २५२

समतिक्रमे स्नातकव्रतलोपे च प्रायश्चित्तमभोजनमिति मन्त्रोक्तेरित्युक्तम् आशौचान्ते तु प्रायश्चित्तमपि न मुख्यकाले न्वधिकारा-
त् आशौचान्तेऽसंभवे तु व्यासः श्राद्धविघ्ने समुत्पन्ने अन्तरा मृतसूतके अमावास्यां प्रकुर्वीत शुद्धावेके मनीषिणः हेमाद्रौ षड्-
त्रिंशन्मतेपि मासिके चाब्दिके चैव संप्राप्ते मृतसूतके वदन्ति शुद्धौ तत्कार्यं दर्शे चापि विचक्षणाः गोभिलः देयं प्रत्याब्दिकं श्राद्धमन्तरा
मृतसूतके आशौचानन्तरं कुर्यात्तन्मासे तु क्षयेपि वा मरीचिः श्राद्धविघ्ने समुत्पन्ने प्यविज्ञाते मृतेहनि एकादश्यां तु कर्तव्यं कृष्णपक्षे
विशेषतः विशेषत इत्युक्तेः शुक्लायामप्याशौचान्तरविघ्ने एतदिति माधवः पृथ्वीचन्द्रो यत्तु अत्रिः तदहश्चेत्प्रदुष्येत केनचित्सूतका-
दिना सूतकानन्तरं कुर्यात्पुनस्तदहरेव चेति तत्पूर्वकालाभावे ज्ञेयम् एतदाब्दिकेतरश्राद्धपरम् यत्तु देवलः एकोद्दिष्टे तु संप्राप्ते य-
दि विघ्नः प्रजायते मासेन्यस्मिंस्तिथौ तस्मिन् श्राद्धं कुर्यात्प्रयत्नतः इति तदपि मासिकपरमिति मदनरत्ने हेमाद्रौ च व्याघ्यादो
विस्मरणे चैव ज्ञेयम् अथ भार्यारजोदर्शने तत्र दार्शिकमामेन कार्यम् श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्तितम् अमा-
वास्यादिनियतमाससंवत्सरादृते इति हेमाद्रौ हारीतोक्तेः व्याघ्रपादोपि अग्निवेदेशकालानां विघ्ने समुपस्थिते आमश्राद्धं
द्विजैः कार्यं शूद्रः कुर्यात्सदैव हि दीपिकापि दर्शे तु भार्यार्तवेप्यामश्राद्धविधिं प्रवासविधुराघाश्चाचरेयुर्द्विजाः वस्तुतस्तु पा-
काभावे द्विजातीनामामश्राद्धं विधीयते इति सुमन्तूक्तेः पाककर्त्रन्तरे सत्पन्ने नान्यथामेनेति युक्तम् मासिकानि सपिण्डानि
अमावास्यां तथाब्दिकम् अन्नेनैव तु कर्तव्यं यस्य भार्या रजस्वलेति कालिकायावचनाच्च कालादर्शे तु स्त्रिया रजोदर्शने दर्शश्राद्धं पंचमे-
ह्नीति पक्षान्तरमुक्तम् पारिजातेप्येवम् एवं युगादावपि आब्दिकं तु रजोदर्शनेपि तद्दिन एव कार्यम् पुष्पवत्स्वपि दारेषु विदेशस्थो-
प्यनग्निकः अन्नेनैवाब्दिकं कुर्याद्धेम्ना वामेन न क्वचिदिति माधवीये लौगाक्षिस्मृतेः मरीचिरपि अनग्निश्च प्रवासी च यस्य भा-
र्या रजस्वला आमश्राद्धं प्रकुर्वीत न तत्कुर्यान्मृतेहनि कार्ष्णाजिनिः आपन्नोप्याब्दिकं नैव कुर्यादामेन कुत्रचित् अन्नेन तदमा-
यां तु कुर्वीत हेम्ना वा हरिवासरे प्रयोगपारिजाते रजस्वलायां भार्यायां क्षयाहं यः परित्यजेत् स वै नरकमाप्नोति यावदाभूतसंप्लवम् दे-
वयाज्ञिकनिबन्धेपि भर्तुः श्राद्धं पंचमेह्नि कुर्याज्जाया रजस्वला पुत्रः पित्रोः प्रकुर्वीत मृताहनि शुचिर्यतः कालादर्शेपि रजस्वलां

नि॰ सिं॰ २५३

गतेनाग्निर्विदेशस्थोऽथवाह्निके दर्शादाविवनाम्नेनत्वन्नेनश्राद्धमाचरेत् अन्यत्रापि विदेशगोवाविगताग्निकोवारजस्वलायामपि
धर्मपत्न्यामे श्राद्धमत्राहविदधीतपाकेनामेनहेम्नानतुपचमेह्निएवंमासिकेपि यत्तुमरीचिः श्राद्धिकेसमनुप्राप्तेयस्यभार्यार
जस्वला पंचमेहनितच्छ्राद्धंनततुर्यान्नतेहनि माधवीयेश्राद्धेतदानकर्तव्यंकर्तव्यंपंचमेहनीत्युत्तरार्द्धं तदपुत्रस्यैवकर्तृकश्रा
द्धविषयम् अपुत्रानुयदाभार्यासंप्राप्तेभर्तुराह्निके रजस्वलाभवेत्तांतुकुर्यात्तत्पंचमेहनीतिश्लोकगोतमोक्तेः दैवेकर्मणिपि
त्र्येचपंचमेहनिशुध्यतीतिप्रभासखण्डाच्च नन्वशुचित्वादत्रपंचमेहन्यर्थाच्छ्राद्धंप्राप्तमितिवचनंव्यर्थम् मेवम् गर्भिणी
सूतिकादिश्चकुमारीवाथरोगिणी यदाशुद्धातदान्येनकारयेत्प्रयतास्वयमितिहेमाद्रौभविष्योक्तेः अनुपनीतः स्त्रीशूद्राश्च
श्राद्धमत्विज्ञाकारयेयुः स्वयंवामंत्रकंकुर्युरितिस्मृतिसाराच्चान्यद्वाराकारणनिवृत्त्यर्थत्वात्तस्य तद्गतादिणाश्राद्धोचानंतरश्रा
द्धकर्तव्यतावेदकवाक्यनैरर्थक्याच्च अतःपत्नीपंचमेहनीतियुक्तम् यत्तुसप्राहात्पितृदेवानांभवेद्योग्यापत्रीचनेशतिनद्धज्ञातिषु नि
पुरमितिहेमाद्रिमिन्ननिवसर्वनिबंधसिद्धातः हेमाद्रिस्तुश्राद्धदोह्नियासहैवाधिकारात्तस्यारजोदुष्टायातन्निवृत्तेरेकस्याधिष्ण
पचमेहनिकार्यम् प्रागुक्तमरीच्युक्तेः भार्यातरसत्वेतुपुष्पवत्स्वपीतिवचनात्तद्दिनेएवेत्याह दीपिकापि भार्यतौसतिपं
चमेवादिवसेस्याद्दार्षिकंमासिकंपक्षांतेर्वक्तुभार्यांकस्त्वधिकृतेपत्न्यंतरेतिष्ठति कुर्यात्तद्दिनेयंस्वमुख्यादिवसेइति तन्निवृत्तेः
सहाधिकारःसहत्वंश्रुत्यावाएकफलभाक्त्वेनवापाकफलभाक्त्वेनवापाककर्तृत्वेनवा नाद्यः तदभावात् पाणिग्रहणाद्धि
सहत्वंकर्मस्वितित्वेस्याग्निसाध्यकर्मविषयत्वात् श्राद्धिकस्यनिरग्नेरपिपाकेनैवोक्तेः स्मार्ताग्निसाध्यत्वानियमात् नोमध्य
स्थ्येतिवत्तुर्वाक्यवचनसत्वाच्च कथंचभार्यांतरसत्वेधिकारःज्येष्ठयानविनेतरेतिनियमात् नद्वितीयः अविभक्तभ्रातृश्च
कस्याशुचित्वेन्यस्यानधिकारापत्तेः नतृतीयः प्रवासनिर्दृष्टास्तिकारोणिराणापादिव्यप्यकरणापत्तेः आरभेतनवेः पात्रेरला
रंभेचबाधवेरितिदेवलोक्तानात्मनेपदात्वस्यबाधवानांचपाककर्तृत्वोक्त्यानिरोधाच्चयत्किंचिदेव यदपिस्त्राद्धीयाहनि
संप्राप्तेयस्यभार्यारजस्वला श्राद्धंतत्रनकर्तव्यंकर्तव्यंपंचमेहनीतिश्लोकगोतमपाठोन्यथादर्शितः माधवीयेचे

अथननत्वानिपापाचाशुसीताजनकनंदिनीतिपाद्मादिलिंगान्नाशस्त्यंभार्यापाकस्योच्यते नतत्कस्याप्यनिष्ठं तेनैनहृचनयुक्ताधभार्या

एमः २५३

तद्भ्रात्रपक्षांतरमुक्तं तेनापिनाभिप्रेतार्थसिद्धिः यस्यप्रेतस्येत्यर्थात् तेनात्र हेमाद्रिवत्समेतिवक्तुर्वक्तव्येपि नोच्यते अथान्वा
रोहणेनिर्णयः लौगाक्षिः मृताहनिसमासेनपिण्डनिर्वपणंपृथक् नचश्राद्धंचदंपत्योरन्वारोहणएवतु समासेनतंत्रेण
द्धिपितृकश्राद्धवद्द्वयोरेकःपिण्डोभिप्रेत्य पिण्डशब्दःश्राद्धपरः नवश्राद्धंपृथगितिहेमाद्रिपृथ्वीचंद्रौ अत्रमृताहनीत्युक्तत्वा
द्भिन्नेदिनेक्षयेवामृततिथ्येरेकत्वेकालैक्यकर्त्रैक्यंच एकचित्यधिरोहेतुतिथैक्येवजायते एकपाकेनपिण्डेक्येद्वयोर्गंक्षी
तनामनोः इतिस्मृत्यंतराच्च अत्यंषिपद्धतौमदृश्युदाहृतम् अन्वारोहतुनारीणांपत्युश्चैकोदकक्रिया पिण्डदानक्रिया
तद्वच्छ्राद्धंप्रत्याब्दिकंतथा नवश्राद्धानिसर्वाणिसपिण्डीकरणंपृथक् एकएवतुवोत्सर्गोगोरेकात्रदीयतेइति तिथिभे
देतुवार्षिकंपृथगेवतथावार्षिकेसमासविधानादन्यत्रसर्वत्रपृथक्त्वेप्राप्तेनवश्राद्धमेवपृथगितिपरिसंख्याधानात्रपृथगुक्तेरब्द
पिवार्षिकषोडशश्राद्धानीत्येसपिंडनान्तषष्ठ्यादिषुसमासएवेतिमदनपारिजाततिर्णयामृतादयः अतःसमासविधिबलाद्रुप
कृत्त्रस्यकर्तृत्वेसपत्नीमातुरन्वारोहणेतत्पुत्रस्यापितन्मासिकादिकसविभक्तःसापत्नपुत्रएवज्येष्ठःकुर्यान्नौरसः वक्ष्यमा
२९८ णपृथ्वीचंद्रादिमतेतुऔरसएवमातुःपृथक्कुर्यात् एववक्रीष्वपिमातृष्वज्ञेयम् त्रिस्थलीसेतौपितामहचरणोरप्येवमुक्त
म् यत्तुगार्ग्यः एकचित्यांसमारूढौदंपतीनिधनंगतौ पृथक्श्राद्धंतयोःकुर्यादोदनंचपृथक्पृथक् ओदनेनपिण्डः तन्नेन
श्राद्धविषयम् यत्तुभृगुः यासमारोहणंकुर्याद्भर्तुश्चित्यांपतिव्रता तांमृताहनिसंप्राप्तेपृथक्पिण्डेनियोजयेत् प्रत्यब्दंच
नवश्राद्धंयुगपत्तुसमापयेत् तच्चैवावार्षिकमेकोद्दिष्टमुक्तं तद्विषयम् प्रत्यब्दंमृताहनीत्यन्वयः नवश्राद्धंयुगपदितिद
र्शवर्गद्वयवदेकतंत्रेणपृथगित्यर्थमाहहेमाद्रिः एतन्नतिथिभेदविषयमितिपृथ्वीचंद्रनिर्णयामृतादयः देवयाज्ञिको
प्यवम् पराशरमाधवेत्तुगार्ग्यःभृग्वादिवचनानौलौगाक्षिवाक्येसमासेनपाकादितंत्रेणनदर्शवर्गद्वयवत्पृथक्श्राद्धंकुर्या
त् नवश्राद्धंचतथेत्याह पृथ्वीचंद्रचंद्रिकादयस्तुद्वयोरेकपिंडदानंलोगाक्षिवचनंचापद्विषयंपृथक्पिंडदानंतुमुख्यःकल्पः
तदाहवृद्धपराशरः आरूढायभर्तुश्चितिमंगनायाप्राप्नोतिमृत्युंखलुसत्त्वयुक्ता एकादशाहेतुतयोर्विधेयंश्राद्धंपृथक्त्वंग

नि॰ सिं॰ २५४

मपेक्ष्यसङ्गिः एकत्वमिच्छन्तिमृतिप्रहीनाएकादशाहादिषु मेन्तनार्य्यौः तेस्वर्गमार्गेविनिहत्यकुर्य्युः स्त्रीसत्त्वद्वानान्तरकाधिवा
सम् भर्त्रासहमृतायानुनाकलोकमभीप्सती सार्हेष्वाद्धेपृथकपिण्डान्नेकत्वेनुस्मृततयोः पृथगेवाह्निकंतेष्वश्राद्धमेकाद
शाहिकम् यानिश्राद्धानिसर्वाणितानुकानिपृथकपृथगिति विष्णुवादेपि मातुर्यादेकाष्टकामृताहपुमहालये श्राद्धकु
र्यात्पृथगेवं तत्रवानुगतावपि एकचित्यांसमारूढयम् तयोरेकवह्निभि पित्रोः पिण्डान्पृथक्दद्यात्पिण्डस्थापत्सुतन्तुतदूत्पत्तिस्य
तेरित्याकुः यत्तुषड्त्रिंशन्मते एकत्वसागतामर्त्तुः पिण्डेगोत्रेचसूतके नपृथक्पिण्डदानंतुतस्मात्पत्नीषुविद्यते इतितदर्शादि
परम् चंद्रप्रकाशेपि एकचित्यांसमारूढौदंपतीप्रमृतायदि पृथकश्राद्धंप्रकुर्वीतपत्युरेवक्षयेहनि मृतानामपिभृत्यानां
भार्यारणंपतिनासह तत्रैरणंश्रपरणंकृत्वाश्राद्धंस्वाभिक्षयेहनि पूर्वकस्यमृतस्यादौद्वितीयस्यततःपुनः तृतीयस्यततःकु
र्यात्सन्निपातेत्वयंक्रमःइतिसहगमनेसर्वत्रश्राद्धेयमेकपाकइत्याहमदनरत्नेप्रचेताः एकचित्यांसमारूढौम्रियेतेदंपतीयदि
तत्रैरणंश्रपरणंकुर्यात्पृथकपिण्डंसमापयेत् पृथ्वीचंद्रोदयेप्येवम् अत्रभर्तुरशौचमध्येयदिनेस्त्रीमरणेपतिमरणादिन
गरणनयाश्राशौचपिण्डदानेकादशाहादिकार्यंनात्रपक्षिणीवृद्धिः मृतंपतिमनुव्रज्यपत्नीचेद्दनलंगता नतत्रपक्षिणीकार्या
पेतृकादेवशुध्यति पुत्रोन्योवाग्निदस्तस्यास्तावदेवाशुचिस्तयोः नचश्राद्धंसपिण्डंचयुगपत्तुसमापयेत् इतिषडशीतिमता
तु यदानारीविप्रादग्निंप्रियस्यप्रियवाञ्छया तदाशौचविधानंव्यंभर्त्राशौचक्रमेणहि इतिलघुहारीतोक्तेश्चभर्त्राशौचोत्तर
मन्वारोहणेतुत्र्यहमाशौचम् ऋग्वेदवादात्साध्वीस्त्रीनभवेदात्मघातिनी त्र्यहाशौचेतुनिर्वृत्तेश्राद्धंप्राप्नोतिशाश्वतम्
को५ तिब्राह्मोक्तेरितिपृथ्वीचंद्रापरार्कौ एतदन्वारोहणएवनत्वेकचितौ ऋग्वेदवादइमानारीरविधवेत्यादि एतदसवर्णापरमि
त्यन्ये स्मार्तगोडास्तु देशान्तरमृतेपत्यौसाध्वीतत्पादुकाद्वयमित्युपक्रम्यब्राह्मे त्र्यहाशौचेतुनिर्वृत्तेरित्युक्तेर्भर्त्राशौचोत्तर
मन्वारोहणेत्र्यहमाशौचसहगमनेतुपूर्णंदशाहादि पिण्डास्तुदर्शापिसहवतयाज्ञनेकश्चलपाणिःशुद्धितत्त्वधृतव्यासः संस्थि
तंपतिमालिंग्यप्रविशेद्याहुताशनम् तस्याःपिण्डादिकंदेयंक्रमशःपितृपिण्डवत् अन्विनापिण्डदानंतुयदाभर्तुर्दिनेदिने रा॰म॰
तदर्थारोहिणीयस्मात्तस्मात्सानात्मघातिनीतिविरुद्धकेश्चतेनाशौचमिदंदशाहादि पृथक्चितौभर्त्राशौचमध्येतदूर्ध्वंवा २५४

शौचम् ऋग्वेदवादात्साध्वीस्त्रीनभवेदात्मघातिनी त्र्यहाशौचेतुनिर्वृत्तेश्राद्धंप्राप्नोतिशाश्वतमितिब्राह्मोक्तेरितिपृथ्वीचंद्रापरार्कौ
एतदन्वारोहणएवनत्वेकचितौ ऋग्वेदवादइमानारीरविधवेत्यादि एतदसवर्णापरमित्यन्ये स्मार्तगोडास्तु देशान्तरमृतेपत्यौसाध्वी

तस्याः श्राद्धं प्रदातव्यं पृथक् पत्युः क्षयेहनीति स्मृत्यन्तरात् अग्रतः पृष्ठतो वा पितृम्न्रियते यदि ८

सत्यां त्र्यहे एकादश पिंडाः अन्विताया प्रदातव्या दशपिंडास्त्र्यहे एव तु स्वामिवंशे चेव्यतीते नु तस्याः श्राद्धं प्रदीयते इति तत्रैव पैठी
नसिस्मृतेः भर्तृशौचोत्तरम् तौ तु चतुर्थेहनि श्राद्धं स्थलपाणिनात्विदमग्निपुराणीयवचनोक्तम् युद्धे तस्य सद्यःशौचे चत्वा
रोहणे त्रिरात्रम् एकचित्तौ तु संस्थिते पतिमित्यादि प्रागुक्तव्यासोक्तेः सद्यःशौचमित्याहुः अन्यस पिंडाशौचे च मध्ये चत्वारो
हणं त्वनाशौच्यमेव अचितायामगत्वात् अन्ये तु रजोवत्याः सूतिकायाश्च गमनं तिषेधादितराशौचस्यानिषेधमाहुः
तन्मूलवचनेन विना चिंत्यमेव स्मृत्यर्थसारे सहगमने सर्वत्र श्राद्धं पिंडादौ पाके च एककाले एककर्त्रैक्यं चेति या तु पतिमुद्दिश्य पान्यका
लन्यतिथावन्वारूढा तस्याः श्राद्धं तन्मृतपतिथौ कार्यं न भर्तृतिथौ पारणमरणेन्द्ररणतिथि स्मात्कालिकी स्मृते तिस्वाद
त्तिथिरेकैव जायते इत्यादिवचनाच्चेति मदनपारिजातपृथ्वीचन्द्रोदयः अन्ये तु तस्याः पतिमरणेन मृतप्रायत्वात् सहाग्र
तः पृष्ठतो वा तन्मृत्यां म्रियते यदि तस्याः श्राद्धं सुतैः कार्यं पत्युरेव क्षयेहनीति पुराणसमुच्चयाच्च भर्तृतिथावेवेत्याहुः
अत्र मूलं चिन्त्यम् अत्र विशेषो हेमाद्रौ स्मृत्यन्तरे मातामंगलसूत्रेण म्रियते यदि तद्दिने उद्दिश्य पवित्रपत्नीकां भोजयेच्च सुवा
सिनीम् अथ श्राद्धसंपाते निर्णयः तत्र पित्रोर्मृततिथ्यैकत्वे मरणक्रमेणादर्शवार्षिकयोरपि तत्क्रमेण श्राद्धं कुर्यात् यौवीपर्यात्ता
नेन तु पितृपूर्वं कुर्यादिति हेमाद्रिः माधवादयस्तु पित्रोः श्राद्धसमं प्राप्तं नवषष्ठिमिते पिता पितृपूर्वं सुतः कुर्यादन्यत्रासतियो
गत इति कार्ष्णाजिनिस्मृतेः सर्वत्र पितृपूर्वं भिन्नं प्रयोगमाहुः पार्वणैकोद्दिष्टयोः संपाते माधवीये जाबालिः यद्येक
भवेयातामेकोद्दिष्टं च पार्वणम् पार्वणं त्वभिनिर्वर्त्य एकोद्दिष्टं समाचरेत् गृहदाहादिना युगपन्मरणेनुमृतेषु एकका
ले गतानां बहूनां मघवाद्ययोः तंत्रेणापरणं कृत्वा कुर्याच्छ्राद्धं पृथक् पृथक् पूर्वकं स्यमृतस्यादौ द्वितीयस्य ततः पुनः
तृतीयस्य ततः कुर्यात् संनिपातेष्वयं क्रमः श्लोकसंग्रहः भवेद्यदि सपिंडानां युगपन्मरणं तदा संबंधासत्तिमालोच्य त
त्क्रमाच्छ्राद्धमाचरेत् गारुडे एकेनैव तु पाकेन श्राद्धानि कुरुते त्रयः विकिरं त्वेकतः कुर्यात् पिंडान् दद्यात् पृथक् पृथक्
अत्रानुगमने च दाहसपिंडदानादौ विशेषं वक्ष्यामः अत्रिः बहूनां मघवाद्याभ्यां श्राद्धं चेत्स्यात्समे हनि तंत्रेणाप

नि॰ सिं॰ यां कृत्वा श्राद्धं कुर्यात्पृथक्कालयक्कृदं च पृथक्पाके न भिन्नपाकाश्रोक्तो पृथक्पाकेन संबंधासत्त्वाच्छ्राद्धभेदस्तु मुख्यः पक्षः एकत्रैव
२५५ दिने श्राद्धद्वयं प्राप्तं यदा तदा चरेद्देवपूर्वं वर्षान्त्विति तु मीनुश्च तत्पुनः एकस्मिन्नेयः करोत्यह्नि द्वयोः श्राद्धं यदा द्विजः तदा पूर्वं समाप्तस्या
दौ कृत्वा स्नात्वा यथाविधि पश्चात्पश्चान्न तस्यैव पृथक्पाकेः समाचरेत् नैकस्मिन्दिवसे श्राद्धं द्वयोरेण कुत्रचिद्द्विजः एकः कुर्या
त्तथाप्राप्ते अन्योन्यायता समाचरेत् आनन्तर्यं विद्यमाने तेन तत्परेऽह्नि समाचरेत् अन्यथा श्राद्धहन्तास्याच्छ्राद्धप्राकरं द्रुम्मवेन कृत्या
श्वलायनोक्तेरिति पृथ्वीचन्द्रः कात्यायनः द्वव्कृतिनिमित्तानि जायेरन्नेकवासरे नैमित्तिकानि कार्याणि निमित्तान्यन्य
नुक्रमात् जाबालिः श्राद्धं कृत्वा तु तस्यैव पुनः श्राद्धं न तद्दिने नैमित्तिकं तु कर्तव्यं निमित्तानुक्रमद्वयम् कालादर्शे नित्यदार्शि
कयोश्चोदकुंभमासिकयोरपि दार्शिकस्य युगादेश्च दार्शिकालभ्ययोगयोः दार्शिकस्य च मन्वादेः संपाते श्राद्धकर्मणः प्र
संगादितरस्यापि सिद्धस्तत्र समाचरेत् अस्पदेवताभेदपक्षादमाहस एव नित्यस्य चोदकुंभस्य नित्यमासिकयोरपि दर्शस्य चो
दकुंभस्य दार्शमासिकयोरपि नित्यस्य चाब्दिकस्यापि दार्शिकाब्दिकयोरपि युगाद्याब्दिकयोश्चैवमन्वाद्याब्दिकयोस्तथा प्र
त्याब्दिकस्य चालभ्ययोगेषु विहितस्य च संपाते देवताभेदाच्छ्राद्धयुग्मं समाचरेत् निमित्तानिपतितश्चात्र पूर्वानुष्ठानकारणम्
पित्रोस्तु पितृपूर्वत्वं सर्वत्र श्राद्धकर्मणि माधवीये स्मृतिसंग्रहे काम्यतन्त्रेण नित्यस्य तन्त्रश्राद्धस्य सिद्ध्यति अथ श्राद्धाङ्गत
र्पणम् पारिजाते पृथ्वीचन्द्रोदये गर्गः पूर्वेति तिलोदकं दत्वा अमाश्राद्धं तु कारयेत् प्रत्यब्दे न भवेत्पूर्वं परेऽहनि तिलोदकम् पक्ष
श्राद्धहिरण्यपनं त्वनुव्रज्य तिलोदकम् न च नित्यतर्पणस्यैवायं परेऽह्न्युत्कर्षः ननु श्राद्धाङ्गतर्पणमस्तीति वाच्यम् येस्तु
र्पयति तान्विप्रः श्राद्धं कृत्वा परेऽहनि पितरस्तेन तृप्यन्ति न चेत्तुष्यन्ति वैनत्रणमिति गर्गेण फलनिदर्शनवादाभ्यामंगत्वोक्तेः
श्राद्धमकृत्वा वार्षिकं वृहन्नारदीये आब्दिकं प्रक्रम्य परेद्युः श्राद्धकृन्मर्त्यो यो न तर्पयते पितॄन् तस्य ते पितरः क्रुद्धाः शा
पं दत्वा व्रजन्ति हि पितृशब्दश्च श्राद्धद्वयवर्गपरः तेन तर्पणस्य पशुपुरोडाशयागवत्प्रस्तरप्रहरणवच्च देवतासंस्कार रामः
कता तेनाब्दिकदिने नित्यस्य पित्रादितर्पणं कार्यमेव श्राद्धाङ्गभूतस्यैव परेद्युरुक्तेः तदुक्तम् प्रत्याब्दाङ्गं तिलदपान्निषि २५५

ह्युपिपरेहनि वर्गैकस्यवचोयेषामन्येषांतुविवर्ज्जयेत् क्वचिद्विशेषमाह गर्गः कृष्णेभाद्रपदेमासिश्राद्धंप्रतिदिनंभवेत् पितॄणां
प्रत्यहंकार्य्यनिषिद्धाहेपितर्पणम् तर्पणंतिलतर्पणम् निषिद्धाहपीत्युक्तेः सकृन्महालयेएवःस्यादष्टकास्वेतएवहि अत्रस
प्तमीतिदृष्टाद्रशितास्फुटैवतत्रपवानजुहुयात् मंद्रप्रापणीयायामंद्रप्रातःसवनेइत्यादिवत् अस्यापवादोव्यहन्नारदीये
वृद्धिश्राद्धेसपिंडेचप्रेतश्राद्धेनुमासिके संवत्सरविमोकेचनकुर्यात्तिलतर्पणम् तदयमर्थः दर्शविप्रनिमंत्रणोत्तरंपाकारं
भोत्तरंवाश्राद्धप्रयोगस्यारब्धत्वात् ब्रह्मयज्ञोत्तरंनित्यतर्पणेनैवश्राद्धांगतर्पणस्यतंत्रेणप्रसंगेनवासिद्धिः ततःपूर्वमेव
देवोत्तरंवाब्रह्मयज्ञकरणेश्राद्धांगतर्पणं पृथक्कार्य्यंपित्र्यविधिकेतुनित्यतर्पणंतिलवर्ज्जंकार्य्यम् नैवश्राद्धदिनेकुर्यात्तिलैस्तुपि
तृतर्पणम् श्राद्धंकृत्वापराह्णेचतर्पणंतुतिलैःसहेतिवचनात् सप्तम्यांभानुवारेचमातापित्रोर्मृतेहनि तिलैर्यस्तर्पणंकुर्या
त्सभवेत्पितृघातकइतिस्मृतिरत्नावल्यामुक्तमन्तेतुक्तमत्र अत्रतिलतर्पणेतिलमात्रनिषेधः नतुतर्पणस्यतिलैरित्यस्यैव
यथाप्राप्तेः यत्तुकात्यायनीयमुपरागेपितुःश्राद्धेपातेऽमायांचसंक्रमे निषिद्धेपिहिसर्वत्रतिलैस्तर्पणमाचरेदिति तत्परेद्युःश्रा
द्धांगतर्पणविषयमितिकेचित् श्राद्धाशक्तस्यतत्स्थानापन्नतर्पणविषयमितियुक्तम् सकृन्महालयेपरेद्युस्तर्पणम्
अष्टकासुतुसप्तम्यष्टमीश्राद्धयोरंतेतद्देवतोद्वयस्य अन्वष्टक्येतुमातृवर्गस्यापि तीर्थश्राद्धेदर्शवत् माघावर्षादिव्वष्टका
वदतेअनेकश्राद्धसंपातेतुयदितत्प्रसंगसिद्धिस्तदानदीयमेवतर्पणम् तंत्रहेतुश्राद्धसमसंख्यत्वेश्राद्धावर्तनेवा विषमसं
ख्यायांवक्ष्यनुरोधइतितस्माद्दर्शश्राद्धांगंतर्पणंसिद्धं तद्विधिःसंग्रहे स्नात्वातीरसमागत्यउपविश्यकुशासने संतर्पयेत्पि
तॄन्सर्वान्तावत्तावद्वस्त्रंचधारयेत् तर्पणोत्तरंनित्यस्नानंकृत्वेत्यर्थः अपसव्यंततःकृत्वासव्यंजान्वाच्यभूतले नामगोत्रस्व
धाकारैर्द्वितीयांतेनतर्पयेत् अत्रवस्वादिरूपतोक्तास्मृत्यर्थसारे वसुरुद्रादितिसुतानश्राद्धार्थेतर्पयेत्पितॄन् तच्चवक्षु
चानांदक्षिणोतेनअनादेशेदक्षिणंप्रतीपादितिसूत्रात् अत्रप्रत्यंजलिमंत्रावृत्तिर्निर्वापवत्संध्याद्यपदानवच्छेदमभेदात्
अवघातवेदिप्रोक्षणादौतुद्रव्यैकत्वान्नमंत्रावृत्तिः केचित्तुपरिखारणमंत्रवत्क्रियमाणानुवादित्वेनकरणत्वाज्ञावासकृ

नि॰ सिं॰
२५६

रिक्तं त्वेवं तिलैः पिण्यनुसंग्रहनाम्नाप्यठंति पित्रोः क्षयाहे संप्राप्ते यः कुर्यात्तिलतर्प्पणम्‌ आसुरं तद्भवेच्छ्राद्धं तत्तोयं रुधिरं भवेत्‌ सर्वस
तर्प्पणं कुर्याद्ब्रह्मयज्ञपुरःसरम्‌ मृताहे नैव कर्त्तव्यं कृते चेन्निःफलं भवेत्‌ इति तत्स मूलत्वेस तिलविषयम्‌ अत्र पठंति कपिलः मन्वा
दिषु युगाद्यासु दर्शसंक्रमणेषु च पौर्णमास्यां व्यतीपाते दद्यात्पूर्वं तिलोदकम्‌ अर्द्धोदये गजच्छायेषष्ठीषु च महालये भरण्यां च
मघाश्राद्धे तद्दत्ते तर्प्पणं विदुः शौनकः मातापित्रोर्मृताहे तु परेहनि तिलोदकम्‌ कारुण्यश्राद्धविषयं सद्योदद्यात्तिलोदकम्‌
इत्यन्निर्मूलम्‌ अथ तिलतर्प्पणनिषेधः गार्ग्यः भानौ भौमे त्रयोदश्यां नंदासु च मघासु च पिंडदानं मृदास्नानं न कुर्यात्तिलतर्प्प
णम्‌ स्मृत्यर्थसारे विवाहव्रतचूडासु वर्षमर्द्धं तदर्द्धकम्‌ अर्द्धं तदेव कृष्णोसत्याच तन्मासिनेत्याकुर्त्तिलतर्प्पणम्‌ हेमाद्रौ मरी
चिः सप्तम्यां रविवारे च गृहे जन्मदिने तथा निशासंध्यासु पुत्रार्थी न कुर्यात्तिलतर्प्पणम्‌ यत्तुसंग्रहे नंदायां भार्गवदिने कृत्तिकासु
मघासु च भरण्यां भानुवारे च गजच्छायाह्वये तथा अयनद्वितये चैव मन्वादिषु युगादिषु पिंडदानं मृदास्नानं न कुर्यात्तिलत
र्प्पणम्‌ इति तच्चिंत्यम्‌ पानीयमप्यत्र तिलैर्विमिश्रं दद्यात्पितृभ्यः प्रयतो मनुष्यः इत्यादिविरोधात्‌ अत्रापवादः पृथ्वीच
न्द्रोदये तीर्थे तिथिविशेषे च गंगायां प्रेतपक्षके निषिद्धेपि दिने कुर्यात्तर्प्पणं तिलमिश्रितम्‌ स्मृत्यर्थसारेपि तिथितीर्थ
विशेषेषु कार्य्यं प्रेते च सर्वदेति गोभिलः तिलाभावे निषिद्धाहे सुवर्णरजतान्वितम्‌ निषिद्धेपि दिने [illegible]
[illegible] तदभावे निषिंचेत्तु दर्भम
न्त्रितम्‌ स्मृत्यर्थसारेपि तिथि [illegible]
त्रेण वा पुनः पतितस्य तिलोदकं वक्ष्यामः अथ वृद्धिश्राद्धम्‌ तन्निमित्तं पृथ्वीचंद्रोदये ब्राह्मे जन्मन्यथोपनयने विवाहे पुत्रकन्य
च पितॄन्नांदीमुखान्नाम तर्प्पयेद्विधिपूर्वकम्‌ वेदव्रतेषु चाधानयज्ञपुंसवनेषु च नवान्नभोजने स्नाने ऊढायाः प्रथमार्त्तवे
देवारामतडागादिप्रतिष्ठासूत्सवेषु च राजाभिषेके बालान्नभोजने वृद्धिसंज्ञिकान्‌ वनस्थाद्याश्रमं गच्छन्‌ पूर्वेद्युः स[illegible]
वा पितॄन्पूर्वोक्तविधिना तर्प्पयेत्कर्मसिद्धये आदिपदात्सन्यासः विष्णुपुराणे जातोद्वाहप्रतिष्ठासु मेखलाबंधमो
क्षयोः पुत्रजन्मवृषोत्सर्गे वृद्धिश्राद्धं समाचरेत्‌ तत्रैव नामकर्म्मणि बालानां चूडाकर्मादिके तथेत्युक्ते निष्क्रमान्न रामः
प्राशनेयाने श्राद्धमिति मैथिलाः तन्न पूर्वोक्तविरोधात्‌ नातिकृत्तिनिषेधात्‌ सुतोत्पत्तौ तथा श्राद्धमन्नप्राशनिके २५६

तथेति राजमार्त्तण्डात् यत्तु छन्दोगपरिशिष्टम् सूर्येन्दोः कर्म्मणि येच तयोः श्राद्धं न विद्यत इति तत्तेषामेवेति कल्पतरुः वस्तुच
कारिकायाम् स्यादाभ्युदयिकं श्राद्धं वृद्धिपूर्वेषु कर्म्मसु पुंसवनसीमन्तचौलोपनयनेष्विह विवाहे वाग्न्याधेयप्रभृति श्रौतक-
र्म्मसु इदं श्राद्धं प्रकुर्वीत द्विजो वृद्धिनिमित्तकम् अन्यैः षोडशसंस्कारश्रावण्यादिष्वपीष्यते वाप्याद्युद्यापनादौ तु कुर्युः पु-
त्रनिमित्तकम् बोपदेवकालादर्शे सीमन्तव्रतचौलान्नामकरणान्नप्राशनोपायनस्नानाध्यानविवाहजज्ञतनयोत्पत्तिप्र-
तिष्ठासु च पुंसूत्यावसथप्रवेशनसुताघास्यावलोकाश्रमस्वीकारक्षितिपाभिषेकदयितार्घ्यनौचनादिमुखम् यत्तु कामधे-
नौ जलाशयप्रतिष्ठायां वृषोत्सर्गादिकर्म्मसु वत्सराभ्यन्तरेपि पित्रोर्वृषस्योत्सर्गकर्मणि वृद्धिश्राद्धं न कुर्वीत तदन्यत्र समाच-
रेदिति तत्र जलाशये वृद्धिश्राद्धनिषेधो न तु कर्म्माङ्गत्वेनेति केचित् अन्ये तु स्मृतिर्मूलतामाहुः श्राद्धकौमुद्यां निर्णयामृते च मात्स्य-
अन्नप्राशने च सीमन्ते पुत्रोत्पत्तिनिमित्तके पुंसवने च निषेके च नववेश्मप्रवेशने देववृक्षजलादीनां प्रतिष्ठायां विशेषतः तीर्थ-
यात्रावृषोत्सर्गे वृद्धिश्राद्धं प्रकीर्त्तितम् इदं चावश्यकम् वृद्धौ न तर्पिता येवै पितरो गृहमेधिभिः तद्धीनमफलं ज्ञेयमासु-
रो विधिरेव सः इति शातातपोक्तेः अत्र श्राद्धत्रयं स एवाह मातृश्राद्धं तु पूर्वं स्यात् पितृणां तदनन्तरम् ततो मातामहानां च वृद्धौ
श्राद्धत्रयं स्मृतम् तत्कालमाह पृथ्वीचन्द्रोदये गार्ग्यः मातृश्राद्धं तु पूर्वेद्युः कर्म्माहनि तु पैतृकम् मातामहं चोत्तरेद्युर्वृद्धौ
श्राद्धत्रयं स्मृतम् अशक्तौ वृद्धशातातपः पूर्वाह्णे मातृकं श्राद्धं मध्याह्ने पैतृकं तथा ततो मातामहानां च वृद्धौ श्राद्धत्रयं
स्मृतम् अत्राप्यशक्तौ स एव पृथग्दिनेष्वशक्तश्चेदेकस्मिन्पूर्ववासरे श्राद्धत्रयं प्रकुर्वीत वैश्वदेवं तु तान्त्रिकमिति वृद्धमनु-
रपि अलाभे भिन्नकालानां नान्दीश्राद्धत्रयं बुधः पूर्वेद्युर्वै प्रकुर्वीत पूर्वाह्णे मातृपूर्वकम् अत्र महत्सु पूर्वेद्युस्तदहरल्पेष्विति
तिगृह्यपरिशिष्टात् व्यवस्था ज्ञेया तच्च प्रातरेव पार्वणं चापराह्णे तु प्रातर्वृद्धिनिमित्तकमिति शातातपोक्तेः अत्र
प्रातर्वृद्धिनिमित्तकमिति शातातपोक्तेः अत्र प्रातःशब्दः सार्द्धप्रहरपरः प्रहरोर्द्धं वृद्धिसंयुक्तः प्रातरित्यभिधीयत इ-
ति गार्ग्योक्तेरिति पृथ्वीचन्द्रः इदं च पुत्रजन्मातिरिक्तविषयम् तदाहात्रिः पूर्वाह्णे वै भवेद्वृद्धिर्विना जन्मनिमित्तकं-
म् पुत्रजन्मनि कुर्वीत श्राद्धं तात्कालिकं बुध इति एतदनियतनिमित्तपरम् नियतेषु निमित्तेषु प्रातर्वृद्धिनिमित्तकं

नि॰सिं॰ २५७

तेषामतिपतत्वेनतद्दानंतस्येमिष्यते इतिलौगाक्षिस्मृतेः आधानांगंनांदीश्राद्धंत्वपराह्णेएव आमश्राद्धंतुपूर्वाह्णेसिद्धान्नेनतुमध्य
तः पार्वणंचापराह्णेतुवृद्धिश्राद्धंतथाग्निकमितिनिर्णयामृतेगालवोक्तेः नांदीमुखाह्वयंप्रातरग्निकृत्वपराह्णकमितिविष्णूक्ते
श्च वृद्धेचमातृपितृमातामहादिक्रमेणनवदैवत्यंकार्यम् तत्रमातामहाःसपत्नीकाः वृद्धप्रमातामहाःसपत्नीकानामितिपृथ्वी
चंद्रोदयेगारुडेगद्यरूपेणपाठात् हेमाद्रौप्येवं नांदीमुखेसत्यवसूसंकीर्त्यौविश्वेदेवकेवृद्धपराशरः नांदीमुखेभ्योदेवेभ्यः
प्रदक्षिणंकुशासनम् पितृभ्यस्तन्मुखेभ्यश्चप्रदक्षिणमितिस्मृतिः यत्तुवृद्धवसिष्ठः नांदीमुखेविवाहेचप्रपितामहपूर्वक
म् नामसंकीर्तयेद्विद्वानन्यत्रपितृपूर्वकम् यच्चस्मृत्यर्थसारे वृद्धमुख्यास्तुपितरोवृद्धिश्राद्धेषुभुंजतेइति यच्चगारुडेमुख्ये
नप्रतिपादनेतच्छाखांतरविषयम् पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यः इतिबह्वृचपरिशिष्टेकात्यायनेनचानुलोम्याम्नाना
त् पृथ्वीचंद्रोदयेप्येवम् यत्तुकेचिद्वृद्धपदंपित्रादिषुप्रयुंजते तन्न अनस्मद्वृद्धशब्दानामरूपाणांमगोत्रिणाम् अनाम्ना
मतिलाघेश्चनांदीश्राद्धंतुसव्यवदितिपृथ्वीचंद्रोदयेसंग्रहोक्तेः नचनिषेधादेवविधिः कल्प्यतइतिवाच्यम् प्रोष्ठपदीश्राद्धेप्रपितामहा
त्परेषांवृद्धपित्रादीनांदेवतात्वान्नांदीश्राद्धेत्वसाम्येनेहापितत्प्राप्तौनिषेधात् गोत्रनामादिनिषेधस्तु शुभार्थीप्रथमातेनवृद्धौ
संकल्पमाचरेदित्युपक्रम्यानस्मद्वृद्धशब्दानामित्युक्तेः संकल्पश्राद्धपरः सगोत्रनिषेधस्तुयस्यांशाखायामभिविध्यइतितत्प
रः गोत्रनामभिरामंत्र्यपितृभ्योऽर्घ्यंप्रदापयेत् इतिछंदोगपरिशिष्टेतद्विधानात्तुप्राप्ते पितापितामहश्चैवतथैवप्रपितामहः
त्रयोह्यश्रुमुखाह्येतेपितरःपरिकीर्तिताः तेभ्यःपूर्वेतरायेचप्रजावंतःसुखेधिताः तेतुनांदीमुखानांदीसमृद्धिरितिकथ्यतेइति
यच्चमार्कंडेयपुराणे येस्युःपितामहादूर्ध्वंतेतुनांदीमुखाःस्मृताइतितज्जीवत्पित्रादित्रिककर्तृकवृद्धिश्राद्धविषयम् तेनतस्य
दमावश्यकम् यत्तुविष्णुः पितरिपितामहेप्रपितामहेचजीवतिनैवकुर्यादिति तद्दर्शादिविषयमितिकल्पतरुः मदनपारिजा
तेप्येवम् हेमाद्रिस्तु नांदीमुखानांश्राद्धंतुकन्याराशिगतेरवौ पौर्णमास्यांतुकर्तव्यंवराहवचनंयथेतिप्रोष्ठपदीश्राद्धंकृत्वा
तत्रैवपूर्वेद्युर्वादेवतात्वमित्याह अत्रसत्यवसूविश्वेदेवावित्युक्तंप्राक् यत्तुशातातपः मातृश्राद्धंतुयुग्मैःस्याद्दैवपाङ्मुखैः राम:
पश्यंतिति तद्भिन्नप्रयोगमातृश्राद्धपरम् यच्चमार्कंडेयपुराणे विश्वेदेवविहीनंतुकेचिदिच्छंतिमानवाइतितद्भिन्नप्रयोग २५७

मातृश्राद्धमिन्नश्राद्धद्वये दैवविकल्पार्थम् प्रयोगैकेयतु देवनियमस्मृतिहेमाद्रिः एतच्च मातृपूजापूर्वकं कार्य्यम् अकृत्वा मातृयागं तु
यः श्राद्धं परिवेषयेत् तस्य क्रोधसमाविष्टा हिंसामिच्छन्ति मातरः इति शौनकप्रोक्तेः कौर्मे पुष्पैर्धूपैः सनैवेद्यैर्गन्धाद्यैर्भूषणैरपि
पूजयित्वा मातृगणं कुर्याच्छ्राद्धत्रयं बुधः छन्दोगपरिशिष्टे कर्मादिषु तु सर्वेषु मातरः सगणाधिपाः पूजनीयाः प्रयत्नेन पूजि
ताः पूजयन्ति ताः प्रतिमासु च शुभ्रासु लिखित्वा वा पटादिषु अपि वाक्षतपुञ्जेषु नैवेद्यैश्च पृथग्विधैः कुड्यलग्नां वसोर्धारां सप्तधारां
घृतेन तु कारयेत् पञ्च धारां वा नातिनीचां न चोच्छ्रिताम् आयुष्याणि च शान्त्यर्थं जप्त्वा तत्र समाहितः षड्भ्यः पितृभ्यस्तदनु श्राद्ध
दानमुपक्रमेत् अत्र सर्वोच्छ्रितियहणात् ग्रहयज्ञेन हि कारेष्वपि नित्यश्राद्धम् नान्दीश्राद्धं पितृभ्यः श्राद्धं कर्म किंचित्समाचरेदिति
शातातपोक्तेश्च श्राद्धद्वयं च न तु सोऽग्नेरात्तच्छाखीयानां नियता अन्येषां त्वनियता वैकल्पिकी स्वगृह्योक्तेः मितसुक्तेः करणत्वभ्युदयः
यन्नाम्नात स्वशाखायामितसुक्तेः आयुष्याणि अनोभद्रा इत्यादीनि षड्भ्य इति मात्रादित्रिकोपलक्षणमिति पृथ्वीचन्द्रः छन्दो
गानां षड्दैवत्यमन्येषां नवदैवत्यमित्याश्वलायनः ममतु मतम् कोकिलमतानुसारिणां मातृमातामहप्रमातामहा इति मात्रास
हैव मातामहश्राद्धकरणान्न द्विषयमिदं षड्भ्य इति मातरस्तत्रैवोक्ता गौरीपद्मा शचीमेधा सावित्री विजयाजया देवसेना
स्वधास्वाहा मातरो लोकमातरः धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह गणेशेनाधिका ह्येता वृद्धौ पूज्याश्चतुर्दश मातरो लो
कमातर इति सर्वविशेषणम् यदा षोडशेति पाठस्तदा देवतानिरंचन्द्रिकायां चतुर्विंशतिमतेत्वन्या उक्ताः स्त्रियः पूज्याः पितुः प
त्निस्त्रो मातामहेन तथा इत्येता मातरः प्रोक्ताः पितुर्मातुः स्वसाष्टमी आसां जीवत्प्रत्यक्षपूजनं मृतानां त्वक्षतपुञ्जेष्विति हेमा
द्रिः ब्रह्माण्याद्यास्तथा सप्त दुर्गाक्षेत्रगणाधिपान् वृद्धावादौ पूजयित्वा तु पश्चान्नान्दीमुखान्पितॄन् मातृपूर्वान्पितॄन्पूज्य ततो
मातामहानपि मातामहीस्ततः केचिद्युग्मा भोज्या द्विजातय इति अत्र च षोडशदेवतस्य देशाचारतो व्यवस्था ब्रह्माण्याद्याः ब्रा
ह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा वाराही च तथेन्द्राणी चामुण्डाः सप्तमातरः इत्यपरार्क उक्ताः अत्र चौलादीनां योगपद्ये त
न्त्रेणाच्छन्दोगपरिशिष्टे गणेशः त्रियमाणानां मातृभ्यः पूजनं सकृत् सकृदेव भवेच्छ्राद्धमादौ न पृथगादिषु मातृभ्य इति
षष्ठ्यर्थे चतुर्थी गणेशः एकानेकपुत्राणां संस्कारेष्वेकदिने एकदेशकालकर्तृकेषु यादित्यर्थः तथा असकृद्यानि कर्माणि

तेनचतुर्दशत्वं ७

क्रियेरन्नकर्मकारिभिः प्रतिप्रयोगं नैव स्युर्मातरः सगणाधिपाः कर्माङ्गत्वापि कुत्र श्राद्धं कार्यं कुत्र नेत्युक्ते तत्रैव आधाने हो
मयोश्चैव वैश्वदेवे तथैव च बलिकर्मणि दर्शे च पूर्णमासे तथैव च नवयज्ञे च यज्ञज्ञा वदन्त्येवं मनीषिणः एकमेव भवेच्छ्राद्ध
मेतेषु न पृथक् पृथक् एषु प्रतियोगं नावर्तते किं त्वादौ एतद्भिन्ने सोमयागादौ तु प्रतियोगमावर्त्तत एव श्राद्धमित्यर्थः क्वचिद
दावपि निषेधमाह स एव नाष्टकासु भवेच्छ्राद्धं न श्राद्धे श्राद्धमिष्यते न सोष्यन्तीजातकर्मप्रोषितागतकर्मसु विवाहादिः कर्मगणो
य उक्तो गर्भाधानम् शुश्रूमोयस्य चान्ते विवाहादावेकमेवात्र कुर्याच्छ्राद्धं ना [illegible]
[illegible] दौ कर्मणः कर्मणः स्यात् सोष्यन्त्याश्चासन्नप्रसवायाः सोष्यन्तीमभ्युक्षेत्युक्तकर्मकात्यायनोक्तस्य श्राद्धस्य पाकप्राधान्या
त्तस्य च जातश्राद्धं न दद्यात् पक्वान्नेन बालरोगाद्यपीति निषेधान्न जातकर्मणि नान्दीश्राद्धम् आमान्नेन वा कार्यमित्यपरार्कः
गौडास्तु जातकर्मण्येव निषेधः पुत्रजन्मनिमित्तकं तु कार्यमेव जन्मन्यथोपनयनेऽप्युक्तः नैमित्तिकमथो वक्ष्ये श्राद्धमभ्यु
दयात्मकम् पुत्रजन्मनि जातकर्मसमन्तरे इति मार्कण्डेयपुराणाच्चेत्याहुः हारलतायां श्राद्धविवेके चैवम् एतेन जातकर्मणि
कालान्तरे श्राद्धनिषेधो न जन्मदिन इति वाचस्पतिमतमपास्तम् अत्र निषेककाल इति वचनाद्गर्भाधाने न निषेधः प्रोषितेति
प्रोष्यैत्य गृहानुपतिष्ठते पुत्रं दृष्ट्वा जपतीति विहितं कर्म विवाहादिर्गर्भाधानान्तो योगः गृहप्रवेशनीयहोमचतुर्थीकर्मादिः कर्मस
मूह उक्तः सूत्रकारेण तत्रापि प्रतिकर्म नेत्यर्थः अन्येपि हलाभियोगादयोऽपवादविषयास्तत्रैव ज्ञेया अप्रचारान्नोच्यन्ते अथा
धिकारिणः विष्णुपुराणे जातस्य जातकर्मादिक्रियाकाण्डमशेषतः पिता पुत्रस्य कुर्वीत श्राद्धं चाभ्युदयात्मकम् अत्र के
चित् जीवत्पितुः साग्नेरेव वृद्धिश्राद्धेऽधिकारः न तु निरग्नेः न जीवत्पितृकः कुर्याच्छ्राद्धमग्निमृते द्विजः येभ्य एव पिता दद्यात्तेभ्यः
कुर्वीत साग्निकः पितामहेभ्य एवमेव कुर्याज्जीवति साग्निकः साग्निकोपि न कुर्वीत जीवति प्रपितामहे इति चन्द्रिकायां स्मृतेरि
रित्याहुः प्रयोगपारिजातेप्यनाहिताग्निर्न कुर्यादिति तद्व्याख्यानम् तन्न अनग्निकोपि कुर्वीत जन्मादौ वृद्धिकर्मणि येभ्य ए
व पिता दद्यात्तानेवोद्दिश्यपन्येयेत् इति हारीतोक्तेः सोमंतत्वं तु वृद्धिश्राद्धभिन्नश्राद्धपरमित्युक्तं मदनरत्ने पिण्डपितृयज्ञपर

मितिपृथ्वीचंद्रः निर्णयामृते तु हारीतीये नष्टाग्निको नाहिताग्निरभिप्रेतः पूर्ववचने तु साग्निः श्रौताग्निः स्मार्ताग्निश्चोच्यते तेनोभ
याग्निहीनस्यैतेनुक्रमः तन्न पूर्वोक्तदिशा गतिसंभवेऽनग्निपदस्य स्मार्ताग्निपरत्वे मानाभावात् वक्ष्यमाणनित्यानित्य
संयोगविरोधात् पितरो जनकस्येज्यायावद्भूतसमाहितमनाहितम् समाहितव्रतः पश्चात्स्वान्यजेतपितामहानितिपृथ्वी
चंद्रोदये यमवचोविरोधाच्च अपरार्केपि समावर्तनब्रह्मचारी स्वयमेव नांदीश्राद्धं कुर्यादित्याह अतः पूर्वमेव साधु वोपदे
वाप्येवमाह यत्तु मतम् जीवत्पितुः पुत्रनामकर्मादौ न वृद्धिश्राद्धम् हारीतीये जन्मादौ इत्यादिशब्देन तत्प्राप्तावपि उद्वाहे पु
त्रजनने पित्र्येष्ट्यां सोमिके मखे तीर्थे ब्राह्मण आयाते षडेते जीवतः पितुरिति मैत्रपरिशिष्टे उद्वाह एव तस्योपसंहारात् ए
वमत्र सुतसंस्कारादिपदं तदप्युद्वाहादिपरमेवेति तन्न उद्वाहपदस्य स्वविवाहपरत्वस्यापि संभवात्तत्र विवाहपरत्वे मानाभावा
त् नामकर्मणि बालानां चूडाकर्मादिके तथेत्यादिभिर्नित्यश्राद्धस्य चौलाद्यंगत्वावगतौ नित्यसंयोगविरोधाच्च अतो जन्मा
स्विति सर्वसंस्कारसंग्रहः तथा कात्यायनः स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु पिंडानोद्वहनात्तेषां तस्याभावे तु तत्क्र
मात् सुतानां चौलादिसंस्कारेषु स्वपितृभ्यः पिंडांतश्राद्धम् पिंडदाः प्रहरेरन्नेषामिति दर्शनात् ओद्वहनाद्विवाहपर्यंतं दद्यात्
विवाहस्त्वप्रथमः नांदीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे बुधः अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नांदिकमिति स्मृतेः तस्य पितु
रभावे तत्क्रमात् असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैरिति यः कर्तृक्रमः तेन क्रमेण ज्येष्ठभ्रात्रादिर्दद्यादिति चं
द्रिकादयः हेमाद्रिस्तु तस्य पितुरभावे यः पितृव्यमातुलादिः संस्कुर्यात्स तत्क्रमात्संस्कार्यपितृक्रमाद्दद्यान्न तु स्वपितृभ्य
इति व्याचख्यौ समावर्तनस्यापि विवाहप्राचीनसुतसंस्कारत्वात्पितैव नांदीश्राद्धं कुर्यात् तदभावे ज्येष्ठभ्रात्रादिः तदभा
वे स्वयमेव कुर्यात् उपनयनेन कर्माधिकारस्य जातत्वात् एवमाद्यविवाहेपीति पृथ्वीचंद्रचंद्रिकादयः यदा तु पितरि सं
न्यस्ते प्रोषिते पतिते वा धर्मार्थं तत्पुत्रमन्यः संस्कुर्यात्तदा संस्कार्यपितुः पित्रादिभ्यो दद्यात् पितरो जनकस्येज्यायावद्भू
तमनाहितम् समाहितव्रतः पश्चात्स्वान्यजेत पितामहानिति पृथ्वीचंद्रोदये यमोक्तेः जीवत्पितृकस्याविशेषमाह का

नेभ्योदद्या १

नि॰ सिं॰ त्यायनः ऋ घोनी र्मच्च सम्म स्तेनाते च पतिते सति यम्पर्व पितादद्यात्स्वयंसुतः यत्तु वह्वृचपरिशिष्टे जीवत्पिताप्युत संस्का
२५९ रेमाणमातृमातामहयोः कुर्यात्तस्यां जीवत्यां मातामहस्यैवेति तच्छाखिनामेवेति दिक् स्मृतितत्त्वादि गौडग्रंथे पुत्री
वन्मातृकः पितामातामहयोः श्राद्धं दद्यात् जीवतमतिदद्याद्यप्रेतायान्नोदकोद्विजे इति कात्यायनोक्तेः जीवेत
स्मिन्सुताः कुर्युः पितामह्याः सह वैनु तस्याश्च वै तु जीवत्यां तस्याः श्वश्रुश्चेति निश्चयः इति हारीतोक्तेः श्वेस्युक्तम् तस्मिन्नृतिशि
दाक्षिण्यात्यास्तु पूर्वोक्तस्य सपिंडीकरणादि विषयत्वात् जीवेत्तु यदि वर्गाद्यस्तं वर्गं तु परित्यजेदिति वचनात् द्वौ स्य
वै ५ लोपयुक्त्याकुः यत्तु चंद्रिकायामुक्तं स्कंदेः निषेककाले सोमे च सीमंतोन्नयने तथा ज्ञेयं पुंसवने श्राद्धं कर्मांगं वृद्धिवच्च
तदिति तत्र गर्भाधानादौ कर्मांगं जातकर्मादावुक्तं तु वृद्धिश्राद्धं पृथगेव वृद्धिवदित्युक्तेः गौडनिबंधे मात्स्ये अन्न
प्राशेच सीमंते पुत्रोत्पत्तिनिमित्तके पुंसवेच निषेकेच नववेश्मप्रवेशने देववृक्षजलादीनां प्रतिष्ठायां तथैव च तीर्थ
यात्रावृषोत्सर्गे वृद्धिश्राद्धं प्रकीर्तितम् अत्र भूतनिमित्तानां वृद्धित्वभाविनिमित्तानामंगत्वं वृद्धिशब्दस्तु कर्मानिर्दे
शार्थ इति गौडाः अन्ये तु निषेकादौ कर्मांगवृद्धिश्राद्धयोः समुच्चयमाहुः नांदीश्राद्धे सजातामृभयानुगता अथ तिक
तैर्व्यता पृथ्वीचंद्रोदये वृद्धपराशरः मालत्याश्च तपत्रावामल्लिकाकुब्जयोरपि केतक्याः पाटलायावाद्या मालान
लोहिताः श्राद्धे मालानिषेधस्यायमपवादः तथा सुवेषभूषरौस्तत्रसालंकारैस्तथा नरैः कुंकुमाद्यनुलिप्तांगैर्भाव्यं
तु ब्राह्मणैः सह स्त्रियोपि स्युस्तथा भूतागीतनृत्यादि हर्षिताः हेमाद्रौ ब्रह्मपुराणे कुशस्थाने च दूर्वाः स्युर्मंगलस्याभिवृ
द्धये कुशाश्चापि वक्ष्यंते छंदोगपरिशिष्टे प्रातरामंत्रितान्विप्रान्युग्मानुभयतस्तथा उभयतः पित्र्ये दैवे च वैश्वदे
वो द्वौ विप्रौ पित्रादीनामेकैकस्य द्वौ द्वाविति विज्ञानेश्वरः त्रिके वा द्वावित्यष्टौ विप्राः अत्र विप्रालाभे स्त्रियोपि भोज्या इत्युक्त्या
हारीतोक्तं कृष्णवर्जितं शिष्टैः मातृश्राद्धे तु विप्राणामलाभे पूजयेदपि पतिपुत्रान्वितां भव्यां योषितोष्टौ कुलोद्भवाः मातृत्रि ए म॰
केचन सूत्रः मातामही त्रिके चेत्यष्टौ विद्वान् हेमाद्रिः अत्र पित्र्ये प्राङ्मुखा विप्राः पाद्ये पित्र्ये चतुरस्रं मंडलमिति जयंतः २५९

हेमाद्रौ ब्राह्मेपि विप्रांश्च दक्षिणावर्त्तं प्राङ्मुखानुपवेशयेत् छंदोगपरिशिष्टे गोत्रनामभिरामंत्र्य पितॄन् सोऽर्घ्यं प्रदापयेत् नात्रापस
व्यकरणं न पितृतीर्थमिष्यते ज्येष्ठोत्तरकरान् युग्मान् कराग्रपवित्रकान् कृत्वार्घ्यं संप्रदातव्यं नैकैकस्यापि दीयते पित्रा
दर्भौ द्वौ विप्रोनयोर्दक्षिणहस्तौ संयोज्य प्रथमोपवेशितेविप्रकरोपरि तत्रेण द्वयोरर्घ्यं दद्यादित्यर्थः वृद्धकारिकायां तु दत्वा
र्घ्यादिकं देयः स्यादर्घ्यदाने प्रतिच्छिन्नम् आवृत्तिरपि मंत्रस्य प्रतिब्राह्मणमिष्यते प्रतिच्छिन्नं पृथक् कुर्यान्निवीत्यर्घ्यानुमंत्रण
मित्युक्तम् मधुमध्विति यस्तत्र त्रिर्जपो हि नु मिच्छताम् गायत्र्यनन्तरं सोत्र मधुमंत्रविवर्जितः नचाश्नत्सु जपेदत्र कदाचि
कद त्पितृसूक्तम् तथा संपन्नमिति तृप्ताः स्थ प्रश्नस्थाने विधीयते सुसंपन्नमिति प्रोक्ते शेषमन्नं निवेदयेत् अक्षय्यादकद
ने च स्यादर्घ्यदानवदिष्यते षष्ठ्यैव नियतं कुर्यान्न चतुर्थ्या कदाचन चन्द्रोदयब्राह्मे पठेच्छकुनिसूक्तं तु स्वस्तिसूक्तं शुभं तथा
नान्दीमुखान्पितॄंश्चैव तथा सांजलिश्च समाह्वयेत् तथा शाल्यन्नं दधि मध्वक्तं बदराणि यवांस्तथा मिश्रीकृत्य तु चतुरः पिण्डा
विल्वई न्श्रीफलसन्निभान् दद्यान्नान्दीमुखेभ्यश्च पितृभ्यो विधिपूर्वकम् द्राक्षामलकमूलानि यवांश्चैव विनियोजयेत् नान्दीवद
क्षिणाग्रेषु दद्याद्विप्रेषु सर्वदा तन्त्रवचनं तु विंशतिमन्ते द्वौ द्वौ चाभ्युदये पिंडानेकैकस्मिन् विनिक्षिपेत् एकनाम्ना परं तु द्वौ दद्या
त्पिंडान्पृथक्पृथक् वशिष्ठः प्राङ्मुखो देवतीर्थेन प्राक्कूलेषु कुशेषु च दत्वा पिंडान्न कुर्वीत पिंडपात्रमुखम् नान्दीमुखे मयो ७
भ्यः पितृभ्यः स्वाहेति वा पिंडदानमंत्र इति वचनः अत्र पिंडाः कृताकृता इत्युक्तं तत्रैव भविष्ये पिंडनिर्वपणं कुर्यान्न वा
कुर्याद्विचक्षणः वृद्धिश्राद्धे महाबाहो कुलधर्मानवेक्ष्य तु छागलेयः अग्नौकरणमर्घ्यं चावाहनं चावनेजनम् पिंडश्रा
द्धं प्रकुर्वीत पिंडहीने निवर्त्तते तेनान्नभोजनस्यैव प्रधानत्वात् पाद्यादि विप्रस्यैव मंतव्यं दानस्यैव पार्वणस्य पुनरावृत्तिरिति शि
ष्टम् अत्र सांकल्पविशेषः प्रयोगपारिजाते सत्यः शुभार्थी प्रथमं तेन वृद्धौ संकल्पमाचरेत् न तेच्छाद्यदिवा कुर्या
न्महान्दोषोभिजायते नामगोत्रादिनिषेधोप्यत्रैव न तु सपिंडकश्राद्धे इति स्तवक अथ प्रयोगः नान्दीश्राद्धे देवक्षणः
क्रियतामिति द्वौ युग्मपन्निमंत्र्य तथेति विप्राभ्यां युगपदुक्ते प्राप्नुतां भवन्तौ प्राप्नवावेति वैश्वदेववत्पित्र्ये च द्विवचनम्

साहेति स्वाहार्घ्याद्यमित्युक्तानि विश्वे देवा इदं वो र्घ्यं नांदीमुखाः पितर इति यथालिंगमर्घ्यदानं गंधादिदानं हि द्विः प्रारंभे होमोऽन्यः कव्यवाहनाय ३

नि॰सिं॰ तेन विप्रहव्यत्रयो गं कुर्यात् आहिताग्नेस्तु हेमाद्रौ ब्राह्मे यो ग्नौ तु विद्यमाने पित्र्यं द्यात् पिंडान्निर्वपेत् पतंति पितरस्तस्य नरके

२६० स च पच्यते वह्वृचपरिशिष्टे छंदोगाः पवित्रे पवित्रे आशिषः च नांदीरिष्टान्नो देवीरित्यनुमंत्रिता सुयवान्नाव पतियवासि सोम

देवत्यो गोसवो देवैर्निर्मितः प्रत्नवद्भिः प्रत्तः पुष्ट्या नांदीमुखान् पितॄन् इमान् लोकान् प्रीणयाहि नः स्वाहा सोमाय पितृ

मते स्वाहेत्यतो देवा अवंतु न इत्यृग्गुह्यर्थे हरणापावमानी राजतीरे दीप्रतिरथं च श्रावयेन्मधुवाता ऋच स्थाने उपास्मै

गायतेति पंच मधुमतीः श्रावयेदक्षन्नमीमदंतेति च षष्ठीमुक्ता एष दो केक्रस्य द्वौ द्वौ पिंडौ दद्यादिति चंद्रिकायां

वह्वृचपरिशिष्टः तृप्तिप्रश्ने तु संपन्नं देवे रुचितमित्यपि दधिकर्कंधुमिश्रांश्च पिंडाः कार्याः यथाक्रमम् कात्यायनः स

मृणुवाजिनमिति विप्रांश्च विसर्जयेत् नांदीमुखाः पितरः प्रीयंतामित्यक्षय्यस्थाने स्वधां वाचयिष्ये इत्यस्य स्थाने नां

दीमुखान् पितॄन् वाचयिष्ये इति न स्वधां प्रयुंजीतेति अत्र साग्निरनग्निर्वा दर्शवद्वैश्वदेवं कुर्यात् आदौ वा हेमाद्रौ क्षयेचान्येम

ध्येश्राद्धे तु पार्वणे एकोद्दिष्टे निवर्तेत तु वैश्वदेवविधीयते इत्याहुः शाके शांखायनपरिशिष्टात् हेमाद्रौ तु गोभिलमत्वा

मनुज्ञाप्य वैश्वदेवक्रिया ततः श्राद्धांते श्राद्धशेषेण वैश्वदेवं समाचरेदिति च तुर्विशतिमतान्नांदीश्राद्धे वैश्व

देवं वाजिनः वह्वृचानामपि वृत्त्यालोचनात्तथैव पूर्वोक्तं तु येषां परिशिष्टं तद्विषयमन्यविषयं वाज्ञेयम् अत्र श्राद्ध

गतमुक्तं तेनैवोक्तं प्राक् इति श्रीजगद्गुरुनारायणभट्टात्मजरामकृष्णभट्टसूनुकमलाकरभट्टकृते निर्णयसिंधौ

वृद्धिश्राद्धम् अथ जीवत्पितृकश्राद्धम् तत्रानेके पक्षाः हेमाद्रौ जीवंतं पितरं भोजयित्वा परयोः श्राद्धं कुर्यादित्येकः

होमांतमेव कुर्यादित्यन्यः होमांतः पितृयज्ञः स्याज्जीवे पितरि जानतः पितरं भोजयित्वा पिंडौ निर्वपेदुभयोरिति

ज्ञानपार्श्वीतिः यदि जीवेत्पिता न दद्यादाहोमात्कृत्वा विरमेदित्यापस्तंबोक्तेः जीवतां पिंडानग्नौ हुत्वा परेभ्यो देयमि

त्यपरः जुहुयाज्जीवेभ्य इत्याश्वलायनोक्तेः जीवतामजीवतां च पिंडदानमितीतरः जीवतामजीवतां वा देयमेवेति हि राम॰

रण्यकेतुरिति निगमात् तस्माज्जीवत्पिता कुर्याद् द्वाभ्यामेव न संशय इति भविष्योक्तेः द्वाभ्यामेवेत्यन्यः एते पक्षाः कलौ नि २६०

२४

षिद्धाः प्रत्यक्षमर्चनं श्राद्धे निषिद्धं मनुरब्रवीत् पिंडनिर्वपनं चापि महापातकसंमितमिति पृथ्वीचंद्रोदये भविष्योक्तेः चंद्रिकाप्येवं
तस्मात्पितरि जीवति श्राद्धानारंभ एवेत्येकः पक्षः सपितुः पितृकृत्येषु अधिकारो न विद्यत इति कात्यायनोक्तेः जीवे पितरि वै
पुत्रः श्राद्धकालं विवर्जयेदिति हारीतोक्तेश्च पितुः पित्रादिभ्यो दद्यादिति मिक्ष्रातः ध्रियमाणे तु पितरि पूर्वेषामेव निर्वपेदिति
मनूक्तेः पितुः पितृभ्यो वा दद्यात्स पितेत्यपरा श्रुतिरिति कात्यायनोक्तेश्च अयं बहुसम्मतः पक्षः अन्त्ये शाखाभेदेन ज्ञेयाः
एवं जीवन्मातामहेनाप्यूहेन कार्यम् मातामहानामप्येवं श्राद्धं कुर्याद्विचक्षणः मंत्रोहेन यथान्यायं शेषाणां मंत्रवर्जितमि
ति विष्णूक्तेः एवं मात्रादिकस्यापि तथा मातामहादिके इति पृथ्वीचंद्रोदयेऽग्निपुराणाच्चापितरि जीवति तु स्वमातरि मृतायां
मपि पितुरेव मातृमातामह्योः कुर्यात् येभ्य एव पिता दद्यादिति वक्ष्यमाणवचनादिति पितामहचरणाः मदनरत्ने तु जी
वत्पिता स्वमातृमातामह्योर्दद्यादित्युक्तम् कालादर्शेप्येवम् मृते तु पितरि जीवन्मातृकः पितामह्यादिभ्यो वृद्धो दद्यादिति
स्मृतितत्त्वादिगौडग्रंथाः दाक्षिणात्यास्तु पितृवर्गं मातृवर्गं तथा मातामहस्य च जीवंस्तु यदि वर्गाद्यस्तं वर्गं तु परित्यजे
दिति वचनात्तद्वर्गत्याग एवेत्याहुः एवं पतितसंन्यस्तपितृकादेरपि ज्ञेयम् वृद्धे तीर्थे च संन्यस्ते ताते च पतिते सति
येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुत इति षट्त्रिंशन्मतात् संन्यस्ते जीवतीत्यर्थः मृते तु संन्यस्ते तदाद्यवदेयम् मृ
तेपि परेभ्य एवेति गौडाः कात्यायनोऽपि ब्राह्मणादिहते ताते पतिते संगवर्जिते व्युत्क्रमाच्च मृते देयं येभ्य एव ददात्यसौ अयं
च संन्यस्तपित्रादेरपि प्रेषान्तसर्वश्राद्धेऽधिकारः एतत्त्रिदंडिपरम् एकादशाहपार्वणवार्षिकाद्यपितुस्त्वेवाहन्येकादशे प्रा
प्तपार्वणं तु विधीयते इत्युक्त्वा त्रिदंडग्रहणादेव प्रेतत्वं नैव जायते इत्युशनसा विशेषोक्तेः ब्राह्मणादिहते इत्यादिति
यद्यपि त्रिदंडादिपरः अतः परमहंसानां वार्षिकादिकमपि न कार्यमिति शूलपाणिश्राद्धतत्त्वादयो गौडग्रंथाः यत्तु हेमा
द्रौ कौंडिन्यः दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षिकम् न जीवत्पितृकः कुर्यात्तिलैस्तर्पणमेव चेति तत्संन्यस्तपित्राद्य
तिरिक्तविषयम् मैत्रायणीयपरिशिष्टे उद्वाहे पुत्रजनने पित्र्येष्ट्यां सौमिके मखे तीर्थे ब्राह्मण आयाते षडेते जी

वतः पितुः तत्रैव महानदीषु सर्वासु तीर्थेषु च गयायां मृते जीवत्पितापि कुर्वीत श्राद्धं पार्वणं धर्मवित् गयायां मृते इति मातृव्यति
रिक्तविषयम् अन्वष्टक्यं गयायां प्राप्तौ सत्यां मृतेऽहनि मातुः श्राद्धं सुतः कुर्यात् पितर्यपि च जीवति इति तत्रैवोक्तेः गयाप्राप्तावसि
क्या गयाप्रसङ्गतो गत्वा मातुः श्राद्धं समाचरेदिति वचनात् तेन मृतमातृको गयायां नत्वन्वष्टक्यं मात्रे कुर्यात् तज्जीवने तु तीर्थश्राद्धमपि
नेति कालादर्शस्मृतिदर्पणादयः अन्ये तु गयोद्देशेन गत्वा श्राद्धमेतन्निषेधार्थः सामान्यतः प्राप्ततीर्थश्राद्धं भवत्येव गयायामित्या
हुः यदा तु प्रतिनिधित्वेन गयायां याति तदा यजमानस्य पितृपितामहप्रपितामहानामेव श्राद्धम् तत्र स्वमातुः पितृपत्नीत्वेनैकोद्दिष्टं
कृत्वा मातृत्वेन पुनः पार्वणं कुर्यादिति त्रिस्थलीसेतौ तच्च फल्गुविष्णुपदाक्षयवटेष्वेवेति केचित् आधानस्यैवेत्यन्ये मध्यमास्त
त्यपरे संकोचहेत्वभावात् तत्रत्यसर्वश्राद्धानि मातुः कार्याणीति युक्तं प्रतिभाति यत्तु मदनपारिजाते नजीवत्पितृकः कुर्याच्छ्राद्ध
मग्निमृते द्विजः येभ्य एव पिता दद्यात्तेभ्यः कुर्वीत साग्निकः इति सुमन्तूक्तेः साग्नेरेव जीवत्पितुः तीर्थश्राद्धमुक्तम् साग्नेरपि मंत्रा
यणीयपक्षे स्वीयस्यैव नान्येषाम् षष्ठे तु जीवतः पितुरिति तत्परिशिष्टे एवोक्तेरिति रत्नावलीदिवोदासीयाः तदयुक्तम् सोमतर्पणवापि
ण्डपितृयज्ञविषयम् सन्न्यस्तपित्राद्यतिरिक्तविषयं वेति पृथ्वीचन्द्रोदयोक्तेः वृद्धौ तीर्थे च न्यासे साधारण्येनास्यापि तथात्वाच्च
तथा निरग्नेः पितादौ श्राद्धमुक्तं प्रागेव पितामहजीवने पित्र्ययम् विशेषः पितृकृतजीवत्पितृकनिर्णये ज्ञेयः अथ पितामहे जी
वति मृते च पितरि यद्यपि पितामहो वा तत्र श्राद्धं भुञ्जीतेत्यब्रवीन्मनुरिति मनुना जीवतः पितामहस्य भोजनमुक्तं तथापि प्रत्यक्षा
र्चनस्य पूर्वं निषिद्धत्वात् पितामहं विहाय पितृप्रपितामहवृद्धप्रपितामहेभ्यो दद्यात् पिता यस्य तु वृत्तः स्याज्जीवेच्चापि पितामहः
पितुः स नाम संकीर्त्य कीर्तयेत्प्रपितामहमिति मनूक्तेः अयमेव सर्वसंमतः पक्षः यत्तु छन्दोगपरिशिष्टे पितामहे ध्रियमाणे
पितुः प्रेतस्य निर्वपेत् पितुस्तस्य च वृत्तस्य जीवेच्चेत्प्रपितामहः इति एकपुरुषं वा द्विपुरुषं वा पार्वणमाह तज्जीवत्पितृजन्यपर
म् वृद्धोक्तपूर्वोक्तमेव एवं पूर्वयोर्मृतयोः प्रपितामहे जीवति पितृमात्रे मृते तत्परयोर्जीवतो वृद्धप्रपितामहादिभ्यो ज्ञेयम् जीव
न्तमतिदद्याद्वा प्रेतायान्नोदके द्विजः पितुः पितृभ्यो वा दद्यात्स पितेत्यपरा श्रुतिः इति कात्यायनोक्तेश्च एतत्सर्वं मनसिकृत्या
हेमाद्रौ विष्णुः पितरि जीवति यः श्राद्धं कुर्याद्येषां पिता कुर्यात्तेषां कुर्यात् पितरि पितामहे च जीवति येषां पितामहः पितरि पि

५४

नामहे प्रपितामहे च जीवति नैव कुर्यात् यस्य पिता प्रेतः स्यात् स पित्रे पिंडं निधाय पितामहात्पराभ्यां द्वाभ्यां दद्यात् यस्य पिता पितामहश्च प्रेतौ
स्यातां स ताभ्यां पिंडौ दत्वा पितामहपितामहाय दद्यात् यस्य पितामहः प्रेतः स्यात् स तस्मै पिंडं निधाय प्रपितामहात्परं द्वाभ्यां दद्या
त् यस्य पिता प्रपितामहश्च प्रेतौ स्यातां स पित्रे पिंडं निधाय पितामहात्परं द्वाभ्यां दद्यान्मातामहानामप्येवं श्राद्धं कुर्याद्विचक्षणः
मंत्रोहेन यथान्यायं शेषाणां मंत्रवर्जितमिति मिति अत्र पितृवन्मातामहे जीवति नान्यित्रादिभ्यः यथा तत्र त्रिषु जीवत्सु नैव कु
र्यात् तथात्रापीत्यादि सर्वमतिदेश्य एवं मातृजीवने प्रीतिकल्पपारिकालादर्शौ तत्र येभ्य एव तु पादोयच्छब्दादेर्व्यक्तिविशेष
वाचित्वेन तदप्रसंगादितिदिक् उत्तरार्द्धं व्याख्यातं प्राक् यत्त्वत्र विज्ञानेश्वरेणक्तम् पित्रे पिंडं निधायेति पितुरेकोद्दिष्टविधि
नाश्राद्धं कृत्वा प्रपितामहादिभ्यः पार्वणं कुर्यात् तद्युक्तं मम तु सपिण्डीकरणाभावपक्षे सपिंडीकरणस्थानापन्नत्वे यमु
क्तं मातुः प्रमीतानां नैव कार्या सपिंडता इति वचनात् दर्शादौ तु पितुरेकोद्दिष्टमेव कार्यम् न जीवन्तमतिदद्यादिति स्मृतेः जीव
त्पितामहो यस्य पिता चांतरितो भवेत् पितुरेकस्य दातव्यमेवमाहुर्मनीषिणः इति यज्ञपार्श्वोक्तेः पितामहे जीवति वे पि
तर्य्येव समापयेदिति हारीतोक्तेश्च शिष्टास्तु युक्तं मातुः प्रमीतानां नैव कार्या सपिण्डता यदि माता यदि पितामही नैव वि
धिः स्मृत इति माधवीये स्कान्दोक्तेर्युक्तं मम तु सपिण्डीकरणाभावः पितृव्यादिविषय इत्याहुः एवमेवं विधिनिषेधरूपः पि७
त्रिषु जीवत्सु बिह्मुराह त्रिषु जीवत्सु नैव कुर्यादिति एतद्दर्शादिविषयम् नांदीश्राद्धं तु परेभ्यस्त्रिभ्यो भवेत्येवेति कल्पतरुः
पृथ्वीचंद्रोदयस्तु दद्यात्त्रिभ्यः परेभ्यस्तु जीवेच्चेत्त्रितयं यदीति मनूक्तेः सर्वत्र विकल्पः स च देशाचाराद्व्यवतिष्ठत इत्याहुः
सुदर्शनभाष्ये तु मासिश्राद्धं जीवत्पित्रादिना युक्तं मम तु पित्रादिना च कार्यमेवेत्युक्तम् मदनरत्ने तु अष्टकादिषु सं
क्रांतौ मन्वादिषु युगादिषु चंद्रसूर्यग्रहे पाते स्वेच्छया एतत्प्रयोगतः जीवत्पिता नैव कुर्याच्छ्राद्धं काम्यं तथाखिलम् अन्यवि
शेषाः श्रीपितृकृतजीवत्पितृकनिर्णये भट्टकृते त्रिस्थलीसेतौ चैते ज्ञेयाः इति भट्टकमलाकरकृते निर्णयसिंधौ जीवत्पित्रा
दिश्राद्धम् अथ विभक्तनिर्णयः पृथ्वीचंद्रोदये मरीचिः बहवः स्युर्यदा पुत्राः पितुरेकत्रवासिनः सर्वेषां तु मतं कृत्वा ज्ये

क्षेत्रैवतुयत्कृतम् द्रव्येणचाविभक्तेनसर्वैरेवकृतंभवेत् ज्येष्ठस्यकर्तृत्वेपिसर्वफलभागिनइत्यर्थः तेनयेब्रह्मचर्यादिनिय
मास्तकलिसंस्कारत्वात्सर्वैःकार्य्या एवंसंसृष्टिनामपितुल्यत्वात् मिताक्षरायांनारदः भ्रातृणामविभक्तानामेकोधर्मःप्र
वर्त्तते विभागेसतिधर्मोपिभवेत्तेषांपृथक्पृथक् व्रहस्पतिरपि एकपाकेनवसतांपितृदेवद्विजार्चनम् एकंभवेद्विभक्ता
नांतद्भवेद्वा गृहेगृहे अत्रयद्यप्यविशेषश्रवणं ब्रह्मयज्ञसंध्यादिष्वप्यभक्तानांपृथक्त्वनिषेधःप्राप्नोतितथापिसाध्यश्रु
द्रुवैश्वदेवादिष्वेवसः द्रव्यस्यानेकस्वामिकत्वेनैकस्यव्ययेऽनधिकारात् यानितु द्रव्यासाध्यानिमंत्रजपोपवाससंध्या
ब्रह्मयज्ञपारायणादीनिनित्यनैमित्तिकस्वामिकत्वेनैकस्यव्ययेऽनधिकारः द्रव्यव्ययाऽभावेऽनुमत्यनपेक्षणात्तद्द्रव्य
णावाविभक्तेनैव्यस्याविषयत्वात् पृथगप्येकपाकानांब्रह्मजज्ञोद्विजातिनाम् अग्निहोत्रंसुराचार्चासंध्यानित्यंभवेत्तथे
तिप्रयोगपारिजाते आश्वलायनस्मृतेश्च अग्निहोत्रशब्दोग्निसाध्यश्रौतस्मार्तनित्यकर्मपरः तेष्वप्यन्यानुमत्यैवाधिका
रेणन्यायसाम्यात् पितृश्राद्धादिषुतुल्यफलेषुनित्येष्वनुमतिंविनाप्येकस्याधिकारः एकोपिस्थावरेकुर्याद्दानाधमनवि
क्रयम् आपत्कालेकुटुंबार्थेधर्मार्थेचविशेषत इतिवचनात् धर्मार्थेव्ययकर्त्तव्येपितृश्राद्धावितिविज्ञानेश्वरः केचित्त्ववि
म० भक्तानामपिपृथक्पाकत्वेदेशांतरेचदर्शिकाब्दिकयोःपृथक्त्वमाहुः भ्रातृणामविभक्तानांपृथक्पाकोभवेद्यदि वै
श्वदेवादिकंश्राद्धंकुर्य्युस्तेवपृथक्पृथगितिहारीतोक्तेः अविभक्तेनपुत्रेणपितृमेधोमहेतेहनि देशांतरेपृथक्कार्यो
दर्शश्राद्धंतथैवचेतियमोक्तेश्चेति तन्नमूलंचिंत्यम् यदयमर्थः पंचमहायज्ञमध्येदेवभूतपितृमनुष्ययज्ञानन्यानुम
त्याज्येष्ठएवकुर्यात् होमाग्रदानरहितंनभोक्तव्यंकदाचन अविभक्तेषुसंसृष्टेष्वेकेनापिकृतंकृतमितिव्यासोक्तेश्च
यत्रतुज्येष्ठेनाकृतेवैश्वदेवन्नसिध्येत्तेनतूष्णीमग्नौकिंचित्क्षिप्त्वाभोक्तव्यम् यस्यत्वेषामग्नौतन्नसिध्येत्सनियुक्तम
ग्नौकृत्वाग्रंब्राह्मणायदत्वाभुंजीतेत्यविभक्ताधिकारेपृथ्वीचंद्रोदयेगोभिलोक्तेः आश्वलायनस्तुपाकपार्थक्येपृ रा॰म॰
थक्त्वंतदेकत्वेपृथक्त्वमाह वसतामेकपाकेनविभक्तानामपिप्रभुः एकस्तुचतुरोयज्ञान्कुर्याद्वाग्यतपूर्वकान् अवि २६२

तृ३

भक्ताविभक्तावापृथक्पाकाद्विजातयः कुर्युः पृथक् पृथक् यज्ञान्नभोजनान्प्राकृदितेदिनइति ब्रह्मयज्ञसंध्यास्नानतर्पणादिस्तु
कृतेतोः पृथगेव देवपूजानुक्तवचनद्वयादेकत्र पृथग्वा दर्शग्रहणश्राद्धादिर्विकस्यैव तीर्थश्राद्धं त्वपि युगपत्सर्वैर्भ्रातृभिर्विभक्तैः
तोश्राद्धावेकस्यैवाभेदेन श्राद्धाभिन्नम् गयाश्राद्धं त्वेवम् पृथक्त्वाबहवः पुत्राश्शीलवन्तो गुणान्विताः तेषां तु समवेतानां यद्येको
पि गयां व्रजेत् तारिताः स्मावयं तेन स याति परमां गतिमितिहेमाद्रौ कौर्मोक्तेः काम्यापदानहेमाद्रावन्यानुमत्यैवाधिकारः
द्रव्यासाध्यजपादौ तां विनापि इत्यपरार्के पैठीनसिः विभक्तैस्तु पृथक्कार्यं प्रतिसंवत्सरादिकम् एकेनैवाविभक्तेषु कृतं सर्वैः
स्तु तत्कृतम् सांवत्सरात्पूर्वाणि मासिकान्येकत्रैव तदाह लघुहारीतः सपिंडीकरणान्तानि यानि श्राद्धानि षोडश पृथङ्नैव
सुताः कुर्युः पृथग्द्रव्या अपि क्वचित् सपिंडनं मासिकोपलक्षणार्थम् अर्वाक्संवत्सराज्ज्येष्ठः श्राद्धं कुर्यात्समेत्य तु ऊर्ध्वं सपिं
डीकरणात्सर्वे कुर्युः पृथक् पृथगिति व्यासोक्तेः उशनाः नवश्राद्धं सपिंडत्वं श्राद्धान्यपि च षोडश एकेनैव तु कार्याणि स
विभक्तधनेष्वपि मघात्रयोदशीश्राद्धं त्वविभक्तानामपि पृथगिति उक्तं मूलाक् यत्तु वृद्धवाशिष्ठः मासिकं चवृषोत्सर्गं सपिंडी
त्र१७ करणं तथा ज्येष्ठेनैव तु कर्तव्यमाब्दिकं प्रथमं तथेति तन्निर्मूलम् बह्वृचपरिशिष्टेन नवश्राद्धं सहदयुः अथ तीर्थश्राद्धम् तत्राप
द्यपत्स्मृतिमहत्कृते त्रिस्थलीसेतुरेवजागर्ति तथापि किंचिदुच्यते तत्र यात्रायां सहाग्निर्वा सपत्नीको गच्छेत्तीर्थानि संयतः
प्रायश्चित्ती व्रजेत्तीर्थं पत्नीविरहितोपि वा जडोप्यनुधिकारीवा यस्त्वयमत्र साधकः इति कौर्मादिवचनात्साग्निः सपत्नीकस्यैवा
धिकारः भारते ब्राह्मणाः क्षत्रियो वैश्यः शूद्रो वा राजसत्तम न वियोनिं व्रजन्त्येते स्नातास्तीर्थे महात्मनः स्कंदे विधवाधर्मेषु
स्नानं दानं तीर्थयात्राविष्णोर्नामग्रहं मुहुः एतत्पुत्राद्यनुमत्यैव सधवायाः पत्या सहैवेति प्रागुक्तम् काशीखंडे मातुः पि
तुः क्षेत्रमनास्तथा स्थितेषु तनयस्तु कुर्यात्किल तु तीर्थयात्राम् तद्विधिः स्कांदे तीर्थे तीर्थयात्रां चिकीर्षुः प्राग्विधायोपोषणं गृहे ग
णेशं च पितॄंश्च विप्रान्साधूंश्च शक्त्या प्रपूज्य च कृतपारणको हृष्टो गच्छेन्नियमधृक्पुनः आगत्याभ्यर्चयेच्च पितॄंस्तथोक्त
फलभाग्भवेत् उपवासोप्रयागेनुरोधेन च कार्यम् प्रयागे तीर्थयात्रायां पितृमातृवियोगतः कचानां वपनं कुर्याद्व्यर्थेनैव क
चाभवेदिति विष्णूक्तेः प्रायश्चित्तार्थं यात्रायां गयायां चैतदिष्यते कैश्चित्तु हेमाद्रौ महाभारते केशश्मश्रुनखादीनां वपनं न च श

त्रि॰ सिं॰ २६२ सते अतो न कार्य्यं वपनं गयाश्राद्धार्थिना सदा येभारते स्मिन्मनिजकर्मतत्पराः संधार्य्य केशान्तिभक्तिभाविताः अराक्षयार्थं पितृती
र्थमागतास्तेषां मरणसंक्षयमेष्यतिध्रुवमिति निषेधाद्गयायात्रागवमनं न कार्य्यमित्याहुः वस्तुतस्तु गयाधिकरणकस्यैवाय
निषेधः ननु यात्रागतस्य श्राद्धार्थिनेत्युक्तेः विशालविरजगयामित्यनेनेकवाक्यत्वाच्च श्राद्धेनस्मवद्वादशदैवतवाद्वेतेन कार्य्यम
गच्छेद्द्विशांतरं यस्तु श्राद्धं कुर्यात्सपिपेति विष्णुपुराणात् यात्रांगवद्धिश्राद्धान्ते स्वश्राद्धंच पारणादिनएव उपोष्यरजनीमेकां श्राद्धं
श्राद्धं विधायच गणेशंब्राह्मणान्नत्वा भुक्त्वा प्रस्थितवान्सुधीरिति स्कांदलिंगात् गौडनिबंधे गौतमः तीर्थयात्रासमारंभे तीर्थे
स्वस्यागमेपिच वृद्धिश्राद्धं प्रकुर्वीत बहुसर्पिः समन्वितम् वृद्धिपदं तद्धर्मार्थं श्राद्धोत्तरं यात्रासंकल्प इति भट्टाः वाचवीय उ घनस्तु
गयागंतुं श्राद्धं कृत्वा विधानतः विधाय कार्प्पटीवेषं ग्राममेकं कृत्वा प्रदक्षिणाम् ततो ग्रामांतरं गत्वा श्राद्धशेषस्य भोजनम् कृतस्य भो
जनं तच्च क्रोशमध्ये श्राद्धोत्तरं क्रोशगमनं निषेधात् ततः प्रतिदिनं गच्छेत्प्रतिग्रहविवर्ज्जितः गयायामेवैतन्नान्यत्रेति केचित्
हेमाद्रिस्तु गयायां श्राद्धदिनएव प्रस्थानं तीर्थांतरश्राद्धोत्तरदिने इत्याह प्रभासखंडे यश्चात्मकारयच्छ्रुत्यातीर्थयात्रां नरेश्व
रः स्वकीयद्रव्ययानाभ्यां तस्य पुरांपचतुर्गुणम् यात्रामध्ये श्राशौचे रजस्विवा शुद्धिपर्यंतं स्थित्वा तदंते गच्छेत् मार्गेवेषमध्ये त्वदोषः
यात्रामध्ये तीर्थांतरप्राप्तो श्राद्धादिकार्य्यमेव वाणिज्याद्यर्थं गतेनतु मुंडनोपवासादिनकार्य्यमिति प्रयागसेतौ भट्टाः वस्तुतस्तु त
त्रापिमुंडनोपवासश्राद्धादिकार्य्यम् अर्धं तीर्थफलं तस्य यः प्रसंगेन गच्छतीति ब्राह्मोक्तेः स्कांदे ह्यभोजनंतर्तीर्थयात्रां हरेत्तीर्थ
फलस्यच वाणिज्यं त्रीस्तथाभागान्हंति सर्वं प्रतिग्रहः यानमर्द्धं चतुर्थांशं छत्रोपानहमेव च तेनुत्तरार्द्धे पाठांतरम् अत्रनदी
तुविशेषः मार्गेतरणनदीप्राप्तौ स्नानादिपरपारतः अर्वागेव सरस्वत्या एवमार्गगतो विधिः यत्तु पितृन्नतर्प्पयित्वातु नदीस्तर
तियोनरः तस्यास्तु यानकामास्ते भवंति भ्रष्टदुःखिता इति तत्सरस्वतीपरम् शंखः तीर्थं प्राप्यानुषंगेन स्नानं तीर्थे समाचरे
त् स्नानजंफलमाप्नोति तीर्थयात्राकृतं नतु सएव नस्त्ववैती मतिका मेदनवक्षिप्य तीर्थं प्राप्तौ तु प्रभासखंडे यानानि तु परि
त्यज्य भाजनं पादचरैर्नरैः लुंठित्वा लोठनीं तत्र कृत्वा कार्प्पटिकाकृतिम् कृत्वैतिद्वैनान्निगमसमयेऽकरणेइदम् प्रथमं चा राम:
लयेत्तीर्थं प्रणवेनजलं शुचि अवगाह्य ततः स्नायाद्यथावन्मंत्रयोगतः मंत्रश्च प्रभासखंडोक्तो ज्ञेयः सयथा ॐ नमो २६२

देवदेवाय शितिकण्ठाय दण्डिने रुद्राय चापहस्ताय चक्रिणे वेधसे नमः सरस्वती च सावित्री वेदमाता गरीयसी सन्निधात्री
भवत्त्वत्र तीर्थपापप्रणाशिनीति मन्त्रवत्स्नानं च वपनोत्तरं कार्यम् पूर्वं मावाहनतीर्थे मुण्डनं तदनन्तरम् ततः स्नानादि
कं कुर्यात्स्वाध्यायादि समाचरेत् त्रिमुहूर्ते: यत्तु गत्वा स्नानं प्रकुर्वीत वपनं तदनन्तरम् इति तन्मुख्यस्नानपरम् काशीख
ण्डे तीर्थोपवासः कर्तव्यः शिरसो मुण्डनं तथा उपवासस्तत्र नो नम यदङ्कितीर्थं प्राप्तः स्यात्तदङ्गं पूर्ववासरे उपवासः
प्रकर्तव्यः प्राप्तेह्नि श्राद्धदो भवेत् अत्र उपवासे ततः कुर्यात्क्षिप्तेऽह्नि निशि व्रतम् इति प्राप्ते दिने उपवासो नाविकल्पः मु
ण्डनेन तु स्कान्दे देवलो मुण्डनं चोपवासश्च सर्वतीर्थेष्वयं विधिः वर्जयित्वा कुरुक्षेत्रं विशालं विरजं गयाम् विरजलोरणरम
प्रसिद्धमहातीर्थपरः सर्वतीर्थशब्दः अत्र विशेषः स्कान्दपाठे ऊर्ध्वं मन्दाद्धि मासोनात्तु नस्तीर्थं व्रजेद्यदि मुण्डनं चोप
वासं च ततस्तायन्नैन कारयेत् तदा तद्वपनेऽप्यस्य प्रायश्चित्तं स्मृतं हि जातिवापार्थः प्रयागे प्रतियात्रं तु योजनत्रय इष्यते श्रो
वासेचैत तत्तायन्नैन कारयेत् वपनं कारयेत्सुधीः केशश्मश्रुलोमन
रं कृत्वा तु विधिवत्ततः स्नायात्सितासिते अपरार्के स्कान्दे उदङ्मुखः प्राङ्मुखो वा वापनं कारयेत्सुधीः केशश्मश्रुलोमन
खान्यनुदकस्याग्निवापयेत् इदं प्रयागे सधवानामपि सममलं भवति इति भट्टाः युक्तं तु सर्वान्केशान्समुद्धृत्य छेदयेदङ्गु
लद्वयम् एवमेव हि नारीणां शस्तं वपनक्रियेति तच्चाकृतचूडानां न कार्यमिति केचित् तच्च तन्नेमित्तिकत्वात् पितापि
मृतिवत्तु कार्यमेवेति तदपि प्रयागे नित्यं नान्यत्र तच्च यतिभिस्तीर्थे पि क्रियते तु सधिष्वेव कार्यं नान्यथा कक्षोपस्थशिखाव
जे स्तनु सधिषु वापयेदिति स्मृतेः इदं जीवत्पितृकेणापि तीर्थे कार्यं न च मुण्डनं सपिण्डदानं चेति दक्षवचनेन निषेधः
विना तीर्थं विना यज्ञं मातापित्रोर्मृतिं विना यो वापयति लोमानि स पुत्रः पितृघातकः इति स्मृत्यात्तत्र संकोचात् तदपि
प्रयागे प्रतियात्रमन्यतीर्थे आद्ययात्रायामेवेति शिष्टाः ततः स्नानम् पराशरतु मार्कण्डेयपुराणे मातरं पितरं जायाश्च
तरमुद्दिश्य यमुद्दिश्य निमज्जेत्तस्य मासलभेत सः पैठीनसिः प्रतिकृतिं कुशमयीं तीर्थवारिणि मज्जयेत् मज्जयेच्च यस्तु
दिश्य सोष्टभागं फलं लभेत् ततस्तर्पणं श्राद्धं पृथ्वीचन्द्रोदये ब्राह्मे देवीपुराणे काशीखण्डादिषु अकालेऽप्यथवा का
कृत्वा २

नि.सिं. ले तीर्थश्राद्धं च तर्पणम्। अविलंबेन कर्त्तव्यं नैव विघ्नं समाचरेत्। मात्स्ये पितॄणां चैव तर्प्पणमिति तुर्यपादः। तत्र दे-
२६४ वताः महालयनिर्णये प्रागुक्ताः। शंखदेवलौ। तीर्थद्रव्योपपत्तौ च न कालमवधारयेत्। पात्रे च ब्राह्मणं प्राप्य सद्यः श्रा-
द्धं समाचरेत्। हारीतः। दिवा वा यदि वा रात्रौ भुक्ते चोपोषितेऽपि वा। न कालनियमस्तत्र गंगां प्राप्य सरिद्वराम्। भारते। भुक्तो
वाप्यथवाऽभुक्तो रात्रौ वा यदि वा दिवा। सर्वकालेऽथवाऽकाले शुचिर्वाप्यथवाऽशुचिः। यदैव दृश्यते तत्र न दोषश्चित्रपथाप्रि-
या प्रमाणात्तु दृष्टं तत्स्यान्न कालस्तत्र कारणम्। आशौचेऽपि कार्यम्। विवाहदुर्गयज्ञेषु यात्रायां तीर्थकर्मणि। न तत्र
सूतकं तद्वत्कर्म यज्ञादि कारयेत्। इति पैठीनसिस्मृतेः। तदानीमकरणे त्वाशौचम्। तद्वत् कुर्यात्। प्रभासखण्डे। न वा-
रं न च नक्षत्रं न कालस्तत्र कारणम्। यदैव दृश्यते तीर्थं तदा पर्वसहस्रकम्। मलमासेऽपि कार्यम्। नित्यनैमित्तिके कु-
र्यात्प्रयतः सन्मलिम्लुचे। तीर्थश्राद्धं गजच्छायां प्रेतश्राद्धं तथैव च। इति बृहस्पतिस्मृतेः। एतच्चाशौचे कृतभोजनस्यापरात्रा-
वा स्नानश्राद्धादिकमाकस्मिकतीर्थप्राप्तावामहेमश्राद्धविषयं ग्रहणादिवत्। न तु बुद्धिपूर्वमाशौचादौ तीर्थप्राप्तिः
कार्या। मलमासे तु मासद्वये तीर्थश्राद्धं कार्यमिति चन्द्रिकायां देवीपुराणे। श्राद्धं च तत्र कर्त्तव्यमर्घ्यावाहनवर्जितम्।
हेमाद्रौ। अर्घ्यमावाहनं चैव द्विजांगुष्ठनिवेशनम्। तृप्तिप्रश्नं च विकिरं तीर्थश्राद्धे विवर्जयेत्। भविष्ये। आवाहनविसृष्टिश्च तेन
तेषां न विद्यते। आवाहनं न तीर्थे स्यान्नार्घ्यदानं तथा भवेत्। आहूताः पितरस्तीर्थे कृतार्थाः सन्ति वै यतः। अस्तोवरणाव-
नितिरत्नावल्याम्। अत्र षड्दैवते श्राद्धे पिमात्रादीनां पिंडमात्रं देयम्। हविःशेषं ततो मुष्टिमादायैकैकमाहतः। क्रमशः
पितृपत्नीनां पिंडनिर्वपनं चरेदिति तीर्थप्रक्रमे देवलोक्तेरिति पृथ्वीचन्द्रः। ततः सामान्यं पिंडं दद्यात्। ततः पिंडमुपा-
दाय हविषः संस्कृतस्य च ज्ञातिवर्गस्य सर्वस्य सामान्यं पिंडमुत्सृजेदिति तेनैवोक्तेः। पाद्मे। तीर्थश्राद्धमकुर्वीत पक्वान्ने-
न विशेषतः। आमान्नेन हिरण्येन कंदमूलफलैरपि। पिंडद्रव्याणि देवीपुराणे हेमाद्रौ ब्राह्मे च। सक्तुभिः पिंडदानं च रामः
संयावैः पायसेन वा। कर्त्तव्यमृषिभिः प्रोक्तं पिण्याकेन गुडेन वा। पिंडानां तीर्थे प्रक्षेप एव नान्या प्रतिपत्तिरिति सुकर्मसार २६४

एतच्च विधवायाः पुत्रया कार्य्यं न सपुत्रयेत्युक्तं प्राक् सपुत्रया न कर्त्तव्यं भर्त्तुः श्राद्धं कदाचनेति स्मृतेश्च अनुपनीतेना
पि कार्य्यम् एतच्चानुपनीतोपि कुर्यात्स्वेनुपर्वस्विति निषेधस्तीर्थश्राद्धमुपक्रम्योक्तः एतज्जीवत्पितृकेणापि कार्य्यमित्युक्तं
प्राक् यतिना तु न कार्य्यं न कुर्यात्स्वकं भिक्षुः श्राद्धपिंडोदक्रियाम् त्यक्तसन्न्यासयोगेन गृहधर्मादिकेष्वतम् गोत्रादिच
रणात्सर्वे पितृमातृकुलधनमिति स्मृतेः गयायां तु कवायवीये दंडं प्रदर्शयेद्भिक्षुर्गयां गत्वा न पिंडदः दंडं स्पृष्ट्वा वि
ष्णुपदे पितृभिः सह मुच्यते गयायां मुंडयेच्च कूपे यूपे वटे तथा दंडं प्रदर्शयेद्भिक्षुः पितृभिः सह मुच्यते कल्परत्ने प्रभा
सखण्डे तीर्थे चेत्स्नातुं गच्छति ब्राह्मणो वत्ति दुर्बलः दशांशमर्जितं दद्यादेवं कुर्वन्न हीयते इति विशेषान्तराणि भट्टकृ
तत्रिस्थलीसेतौ ज्ञेयानीति दिक् इति श्रीकमलाकरभट्टकृते निर्णयसिंधौ तीर्थश्राद्धविधिः अथाशौचम् नारायणा
त्मजश्रीमद्रामकृष्णसुसूनुना कमलाकरसंज्ञेनाशौचं निर्णीयतेऽधुना मरीचिः आचतुर्थाद्भवेत्स्रावः पातः पं
चमषष्ठयोः अत ऊर्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भवेत् स्रावे मातुस्त्रिरात्रं स्यात्सपिंडाशौचवर्जनम् पाते मातुर्यथा
मासं सपिंडानां दिनत्रयम् अत्र सर्वत्र मूले मिताक्षरायां ज्ञेयम् अत्र मासत्रये त्रिरात्रस्यानुवादः रजस्वलात्वेनैव त
त्सिद्धेः यत्पुनरेतेन चतुर्थे मासे त्रिरात्रं प्राप्नोति तथापि परमसाम्यं न स्याद्गर्भस्रावो भवेद्यदि तदा मासमसमैः स्ना
सादिवसैः शुद्धिरिष्यते इत्यादिपुराणात् रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुद्ध्यतीति मनूक्तेः गर्भस्रावे यथामासम
चिरे तूत्तमे त्र्यहमिति मरीच्युक्तेश्च तद्वदेव ज्ञेयम् आचरेत्रिमासमध्ये उत्तमे ब्राह्मणे अत्र सपिंडानां स्नानं सद्यः
शौचं सपिंडानां गर्भस्य पतने सतीति तत्रैवोक्तम् एतदा चतुर्मासात्पाते त्रिदिनं स्यात् ततः आकारणायाः मृदुरसम
वात्सद्यः पदं स्नानपरम् एवमग्रेपि गर्भस्रावे स्नानमात्रं पुरुषस्येति वशिष्ठोक्तेः पुरुषस्येत्युपलक्षणं वृद्धोक्ते
वचनात् आचतुर्थमासात्सपिंडानां न स्नानं किं तु पुंस एव पाते त्रिदिनं निर्गुणपरम् गुणवतस्तु अजातदंतेनतये
त्रिरात्रं गर्भच्युते तथा सपिंडानां तु सर्वेषामेकरात्रमशौचकमिति यमोक्तेः स्नानकाः इति मदनपारिजातः सप्तममा
सादिदशाहम् एतत्सर्ववर्णविषयम् तुल्यं वयसि सर्वेषामतिक्रांते तथैव चेति याज्ञोक्तेः पराशरः जातो विप्रो

नि·सिं·
२६५

दशाहेन द्वादशाहेन भूमिपः वैश्यः पंचदशाहेन शूद्रो मासेन शुध्यति संवर्त्तः ॥ जाते पुत्रे पितुः स्नानं सचैलं तु वि
धीयते माता शुध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः पुत्रपदात्कन्यायां पत्न्यां न पितुः स्नानमिति हारलतायां तन्न पुत्र
पदस्य पौत्रीमातामहस्तेनेति कन्यायामपि प्रयोगात् यच्च तत्रैवोक्तम् सूतके तु मुखं दृष्ट्वा जातस्य जनकस्ततः
कृत्वा सचैलं स्नानं तु शुद्धो भवति तत्क्षणात् इत्यादिपुराणान्मुखदर्शनोत्तरमेव पितुः स्नानमिति तन्न विदे
श मुखदर्शनाद्यसम्भवापत्तेः मुखदर्शनोत्तरं पुनः स्नानार्थमिदमिति स्मार्त्तगौडाः तन्न मूले केन ज्ञानमात्रपरत्वा
त् शूद्रे सर्ववर्णेषु समम् सूतिका सर्ववर्णेषु दशरात्रेण शुध्यति ऋतौ तु न पृथक्शौचं सर्ववर्णेष्वयं विधिरिति हारल
तायां प्रचेतसोक्तेः यत्तु ब्राह्मणी क्षत्रिया वैश्या प्रसूता दशभिर्दिनैः गतैः शूद्रा च संस्पृश्या त्रयोदशभिरेव चेति
प्रयोगपारिजाते पारस्करः द्विजातेः सूतिका या स्यात्सा दशाहेन शुध्यति त्रयोदशाह्नि संप्राप्ते शूद्रा शुध्यत्यसंशय
मिति तदस्पृश्यत्वपरम् अंगिराः सूतके सूतिकावर्जं संस्पर्शो न निषिध्यते संस्पर्शे सूतिकायास्तु स्नानमेव वि
धीयते नाशौचं सूतके पुंसः संसर्गं चेन्न गच्छति रजस्तत्राशुचि ज्ञेयं तच्च पुंसि न विद्यते संसर्गो मैथुनम् स्पर्श
सपत्ये मातुरेव सूतकं तास्पृश्यतश्चेति हारलतायां सुमन्तूक्तेरिति तन्न संस्पर्शे सूतिकायास्तु स्नानमेव विधीयते
सूतिस्नानमात्रोक्तेः सोमन्तवस्य स्नानपर्यन्तमस्पृश्यत्वमात्रबोधकत्वात् एवकारो बालस्पृश्यत्वार्थः माधवस्तु
पुत्रे सहस्रसपिंडोपि प्रकुर्याच्छुचिनाशनम् बाधकेषु अपरेवापि सदशाहेन शुध्यतीति बृहस्पतिस्मृतेः ग्राम्यनाग्न
त्रिस्पर्शसंसर्गमाह पराशरः यदि पत्न्यां प्रसूतायां द्विजः संपर्कमृच्छति सूतकं तु भवेत्तस्य यदि विप्रः षडंगवित् पि
तैव तस्य पत्न्या मातुः प्राक् स्नानादस्पृश्यत्वे सूतिकास्पर्शे तु यावदाशौचम् कन्याश्च मातरस्तत्र गृहे न प्रजंति चेदि
ति प्राचीनोक्तेरिति शुद्धितत्वादयः तन्न न हि गत्वा सूतिकां यदि तस्पृशेति
तदास्पृश्यापत्र अन्यथा नेति तत्स्वार्थः केचिन्नविकारमाह पैठीनसिः सूतिकां पुत्रवतीं विंशतिरात्रेण कर्माणि

राम:
२६५

रिक्तारवेस्मासेत स्त्रीजननीम् एतच्चसोमयागादिश्रौतभिन्नपरम् प्रज्ञातायाश्चदशरात्राद् ऊर्ध्वंस्नानादीनिकार्णीयस्त्वात् व्यासः
प्रथमेदिवसेषष्ठेदशमेचैवसर्वदा त्रिष्वेतेषुनकुर्वीतसूतकेपुत्रजन्मनि पुत्रशब्दोपत्यमात्रपरः ब्राह्मे देवाश्चपितरश्चैवपुत्रे
जातेद्विजन्मनाम् आयान्तितस्मात्तदहःपुण्यंषष्ठंचसर्वदा जननेविशेषःप्रागुक्तः अत्रप्रयोगपारिजातः उभसवेदशाहः..
स्त्र्यपत्येत्र्यहः पुंजन्मनिसपिण्डानांदशाहाच्छुद्धिरिष्यते त्र्यहादेकोदकानांचएकाहःसूतकेक्वचित् स्त्रीजन्मनिसपिण्डानां ५५
सोदकानांत्र्यहाच्छुचिः स्त्रीषुत्रिपुरुषंज्ञेयंसापिण्डत्वंद्विजोत्तमाः इत्यपिस्मृतेरित्याह मेधातिथिरपि अप्रत्तानांतुस्त्रीणां
त्रिपुरुषीविज्ञायतेइतिवासिष्ठमुक्त्वाऽऽशौचेऽप्येवंतद्विवाहेतुविधिदर्शितस्त्वेवमाह अन्येतुत्रिपुरुषसापिण्ड्यस्यकानीनकन्या
परत्वमाहुः अप्रत्तानांतथास्त्रीणांसापिण्ड्यंसप्तपौरुषम् प्रत्तानांभर्तृसापिण्ड्यंप्राहदेवःप्रजापतिरितिकौर्मविरोधाच्च अ
घमृताशौचम् हारीतः जातमृतेमृतेजातेवासपिण्डानांदशाहमिति दशाहमितिस्वाशौचपरम् जातमृतेनालच्छेदोर्ध्वम्
यावन्नच्छिद्यतेनालंतावन्नाप्नोतिसूतकम् छिन्नेनालेततःपश्चात्सूतकंतुविधीयतेइतिजैमिन्युक्तेः नाड्यांछिन्नायामा
शौचमितिहारीतोक्तेश्च एतन्मृताशौचपरमेव जननाशौचंतुनालच्छेदात्पूर्वमपिजननादेव मृतजातेनालच्छेदाभावा
न्न षष्ठीपूजाद्युत्कर्षापत्तेश्च तेननाडीछेदात्प्राङ्मातुःस्पर्शेपिनदोषइतिशुद्धितत्त्वोक्तिःपरास्ता नाभिच्छेदात्प्राङ्मृतोनुव
हन्मनुः जीवन्जातोयदिततोमृतःसूतकएवतु सूतकंसकलंमातुःपित्रादीनांत्रिरात्रकमिदंचमृताशौचमेवदशाहवाति
मितंस्नानमस्त्येव प्राङ्नामकरणात्सद्यःशौचमितिशङ्खोक्तेः अत्रकश्चिदाह नामकरणमाशौचान्तकालोपलक्षणं
आशौचव्यपगमेनामधेयमितिविष्णूक्तेः आशौचेचव्यतिक्रान्तेनामकर्मविधीयते इतिशङ्खोक्तेश्चनाम्नोनियतकाल
त्वात् तच्च नामधेयंदशम्यांतुद्वादश्यांवापिकारयेत् पुण्येतिथौमुहूर्तेचानक्षत्रेवागुणान्विते इतिमनूक्तेरनियतका
लत्वम् दशम्यामतीतायांविप्रः द्वादश्यामतीतायांक्षत्रियः वैश्यःषोडशेशूद्रः एकत्रिंशेइत्यपिज्ञेयम् पुण्येहन्यापि
नुकल्पः तेननाम्नःकालोपलक्षणम् एवंदत्तजननेपि दत्तजन्मसप्तमेमासेशुभतिथ्यादिनियतकालत्वात् चौलंतुन

नि·सिं·
२६६

कालोपलक्षणम् प्रथमेऽब्दे तृतीये वा कर्त्तव्यं श्रुतिचोदनादिति मनूक्तेः ततः संवत्सरे पूर्णे चूडाकर्म विधीयते द्वितीये वा तृ
तीये वा कर्त्तव्यं स्मृतिदर्शनादिति यमोक्तेश्च तस्यानियतकालत्वादिति तन्मन्दम् चोलवन्नामदन्तजननयोरपि स्वरूपेण नि
मित्तत्वोपपत्तेस्तद्विशिष्टकालानुवादे वाक्यभेदात् सप्तममासादर्वाक् दन्तजननेन तदभावप्रसंगाच्च यस्तूपनिबद्धृणीते नानि
र्णयं कुर्यात्स नूनं तच्छतायुः पुरुष इति श्रुतेरर्वाक् पितृमरणेन तदप्यकर्मापि त्यजेत ननु कालानुपलक्षणेनोमोत्त्वे तदभा
वे वा स्नानमात्राच्छुद्धिः स्यात् ततः किम् अस्तु अत एवोक्तं माद दन्तजन्मनः सद्य इति सा च विष्णुवचनाद्दाहाभावविषये नि
स्याम त्रिवर्षादावपि स्यादिति चेन्न दाहदन्तादिनिमित्तैर्विशेषाशौचैः पूर्वस्य बाधात् तदुक्तं पूर्वबाधेन नोत्पत्तिरुत्तरस्य हि
सिध्यतीति जननाद्दशरात्रे व्युष्टे शतरात्रे संवत्सरे चेति पशिष्ठे द्वादशमासे परे रात्र्यां मासे पूर्णे तथापरे अष्टादशेऽहनि ते
यावदत्यन्य मनीषिण इति भविष्यवचनात् कालानियमाच्च न च प्राथम्याद्दशरात्रे तीते इति मुख्यः कालः अन्यस्त्वनुक
ल्प इति वाच्यम् चौलेपि तथापत्तेः न च दन्तजननं कालानुपलक्षणं सदन्तजातमृतस्य दाहे काहप्रसंगः दशाहेन बाधात्
नामकरणोत्तरमेव दाहप्रवृत्तेः दशाहाभ्यन्तरे बाले प्रमीते तस्य बान्धवैः शावाशौचं न कर्त्तव्यं सूत्याशौचं विधीयते इति व
मनूक्तेश्च आशौचं दाहोपलक्षणम् सूतकवदिति पारस्करोक्तेः यत्तु विष्णुः अनिवृत्ते दशाहे तु पंचत्वं यदि गच्छति स
द्य एव विशुद्धिः स्यान्न प्रेतं नोदकक्रियेति तदपि प्रेताशौचनिषेधार्थं न तु सद्यस्त्वपरम् वाक्यभेदात् किंच नामकरणात्प्रा
क् मृतस्य स्नानम् तदुत्तरं त्वेकाहादि नामकालेत्वेकादशाहं मृतस्य न किमपि स्यात् अथ शंखवचनेऽल्पलोपे पंचमी तदा
प्रागिति नोपपद्यते नाम्नि वापि कृते सतीति मन्वादिविरोधात् कृतनाम्न इति माधवमिताक्षरादिविरोधाच्च न कालोपल
क्षणं क्वापीति दिक् नामान्तरं दन्तोत्पत्तेः प्राग्दाहः स्यात् अदन्तजाततनये शिशौ गर्भच्युते तथा सपिण्डानां तु सर्वेषामहोरा
त्रमशौचकमिति यमोक्तेः दाहाभावे तु स्नानमात्रं अदन्तजाते प्रेते सद्य एव न स्याग्निसंस्कार इति विष्णुना दाहाभावे तदु
क्तेः आदन्तजन्मनः सद्य इति याज्ञवल्कीयाच्च दाहविकल्पश्चाह लौगाक्षिः तूष्णीमेवोदकं कुर्यात्तूष्णीं संस्कारमेव च सर्वे

एम·
२६६

वाकृतचूडानामन्यत्रापीत्येयाद्वयम् अन्यत्राकृतचूडे अत्र चूडाकरणं तृतीयवर्षरूपकालोपलक्षणार्थमिति मेधातिथिः
दन्तजो मनुरपि नात्रिवर्षस्य कर्त्तव्या बान्धवैरुदकक्रिया जातदन्तस्य वा कुर्युर्नाम्नि वापि कृते सतीति उदकदानोपलक्षणं
दन्तोद्गत्यनन्तरं प्राक् त्रिवर्षात्तान्मृते अहः दन्तजाते प्यकृतचूडे त्वहोरात्रेण शुद्धिरिति विष्णूक्तेः त्रिवर्षोर्ध्वं कृतचूडे ऽकृतचू
डे वा प्रागुपनयनात्त्र्यहः यद्यप्यकृतचूडो वै जातदन्तस्तु संस्थितः तथापि दाहयित्वैनमाशौचं त्र्यहमाचरेदित्यङ्गिरसोक्तेः
अत्र जातदन्तत्वमुद्देश्यविशेषणत्वादविवक्षितं दाहयित्वेत्यप्यनुवादो भयविधौ वाक्यभेदात् त्रिवर्षात्प्राक् चूडाभावेऽग्निदा
नेत्र्यहस्तदभावे विहृमेकाहः इति माधवः प्रथमवर्षादौ कृतचूडस्य सद्यस्त्र्यहः निर्वृत्तचूडकानां तु त्रिरात्राच्छुद्धिरिष्यत इ
ति मनूक्तेः एतत्सर्वं प्रागुक्तसपिण्डानाम् मातापित्रोस्तु दशाहोर्ध्वं मृते सर्वत्र त्रिरात्रम् बालानामजातदन्तानां त्रिरात्रेण
शुद्धिरिति कश्यपोक्तेः वैजिकादभिसम्बन्धादनुरुन्ध्यादघं त्र्यहमिति मनूक्तेश्च शुद्धितत्वादयो गौडास्तु अजातदन्तमरणे
पित्रोरेकाहमिष्यते दन्तजाते त्रिरात्रं स्यादाचूडात्तु निर्गुणाविति कौर्मोक्तात्पक्षपञ्चशूद्रपरम् अनूढानां तु कन्यानां त
था वै शूद्रजन्मनामिति व्याहानुवृत्तो शङ्खोक्तेः त्रिरात्रं तु भवेच्छूद्रे षण्मासे पितृश्चौचम् तद्वदिति मत्स्यसूक्ताच्च दन्तजाते तु शू
द्रे पञ्चाहः यथाहाङ्गिराः शूद्रे त्रिवर्षान्न्यूने तु मृते शुद्धिस्तु पञ्चभिः अत ऊर्ध्वं मृते शूद्रे द्वादशाहो विधीयते षड्वर्षात्म
तीतोयः शूद्रः संम्रियते यदि मासिकं तु भवेच्छौचमित्याङ्गिरसभाषितमिति यत्त्वनूढभार्यः शूद्रस्त्विति शङ्खोक्तेः
मासाच्छौचम् तत्सगुणशूद्रपरम् निर्गुणोत्वनूढभार्यः शूद्रे त्रिवर्षोर्ध्वं द्वादशाहः षड्वर्षोर्ध्वं मासः षड्वर्षात्प्रागपि
कृतोद्वाहे मासइत्याह एतत्तुल्यवचसि सर्वेषामेतद्विरोधात् षड्विभागानान्नादन्त्यमिति विज्ञानेश्वरादयः दाक्षि
णात्यानां तथैव अन्यदेशे प्रागुक्तमिति गौडाः एवं कन्यास्वपि नास्वप्यजातदन्तासु पित्रोरेकरात्रमिति माधवः यत्तु
विज्ञानेश्वरेणोक्तम् प्रथमवर्षादौ कृतचूडस्य सद्यस्त्र्यहः निवृत्तचूडकानां तु त्रिरात्राच्छुद्धिरिष्यत इति मनूक्तेः ए
तत्सर्वं प्रागुक्तसपिण्डानाम् मातापित्रोस्तु दशाहोर्ध्वं त्रिरात्रम् बालानामजातदन्तानां त्रिरात्रेण शुद्धिरिति कश्यपोक्तेः

गर्भस्थे प्रेते मातुर्दशाहं जाते उभयोः कृते नाम्नि सोदराणां चेति येऽप्याहुः तेऽस्य यत्तु विज्ञानेश्वरेणोक्तं सोदराणां च पित्रो
र्दशाहमस्पृश्यत्वमिति तन्नेदानीं प्रचरति अत एवास्य स्मृत्यर्थसारे तन्नादृतं कन्यासु चौलात्प्राक्मृतौ स्नानम् अचूडायां
तु कन्यायां सद्यःशौचं विधीयते इत्यापस्तम्बोक्तेः इदं त्रिपुरुषमध्ये अप्रत्तानां तु स्त्रीणां त्रिपुरुषी विज्ञायते इति वशिष्ठोक्तेः
ऊर्ध्वं वाग्दानोत्तरमिति गौडाः अप्रत्तानां तु स्त्रीणां सापिण्ड्यं साप्तपौरुषमिति वचनात् चौलोत्तरं वाग्दानात्पूर्वं तास्वेका
हः अविशेषेण वर्णानामेवाऽसंस्कारकर्मणः त्रिरात्रात्तु भवेच्छुद्धिः कन्यास्वह्नो विधीयते इत्यङ्गिरसा त्रिरात्रवि
धये होमविधानात् अतः शूद्रस्योपनयनस्थानीयविवाहात्पूर्वं त्रिरात्रं विवाहात्कर्षं तु षोडशवर्षमध्येऽपि त्रिरात्रमेव तत्
परार्कोदयः शूद्रे निर्गुणे अब्दोर्ध्वं पंचाहः षडब्दोर्ध्वं विवाहाभावे द्वादशाह इति गौडाः सगुणानां तु षोडशवर्षोर्ध्वं तु
विवाहाभावेऽपि पूर्णाशौचं वक्ष्यते तदुत्तरं प्राग्विवाहान्नैकुलेऽपि न कुले च सप्तपुरुषावधि त्रिरात्रम् अवाग्गिरपूर्वे
त्ता तु यानेव प्रतिपादिता असंस्कृता तु सा ज्ञेया त्रिरात्रमुभयोः स्मृतमिति मरीच्युक्तेः रत्नाकरे मुद्रिततत्वे च प्रोक्तं:
पितृवेश्मनि या नारी रजःप्राप्यसंस्कृता तस्यां मृतायां नाशौचं कदाचिदपि शाम्यति यावज्जीवमाशौचमिति वा
चस्पतिमिश्राः अथानुपनीते किंचिदुच्यते नाम्नः पूर्वं खननमेव तदूर्ध्वं वर्षत्रयात्पूर्वं चौलाभावे उदकदानवि
कल्पः नात्रिवर्षस्य कर्त्तव्या बान्धवैरुदकक्रिया जातदन्तस्य वा कुर्युर्नाम्नि वापि कृते सतीति मनूक्तेः उदकक्रिया
साहचर्याद्दाहोपलक्षणम् खनने तु नान्यदौर्ध्वदेहिकम् ऊनद्विवर्षं निखनेन्न कुर्यादुदकं ततः इति याज्ञवल्क्योक्तेः
उदकमन्यकर्मपरमित्यपरार्कः यमः ऊनद्विवार्षिकं प्रेतं घृताक्तं निखनेद्भुवि यमगाथां गायमानो यमसूक्तमनुस्म
रन् माधवीये ब्राह्मेऽपि स्त्रीणां तु पतितो गर्भः सद्योजातो मृतोऽथवा अजातदन्तो मासैर्वा मृतः षड्भिर्गतैर्बहिः वस्त्रा
द्यैर्भूषितं कृत्वा निक्षिपेत्तं तु काष्ठवत् खनित्वा शनकैर्भूमौ सद्यःशौचं विधीयते अलंकरणमपि वक्ष्यन्ति कृतचूड राम:
स्य तु त्रिवर्षात्प्रागूर्ध्वं वाग्न्युदकदानं नियमितम् यत्तु वशिष्ठः ऊनद्विवर्षे प्रेते गर्भपतने वा सपिण्डानां त्रिरात्रमि २६७

तितस्त्रयमाब्दचूडापरम् वर्षत्रयादूर्ध्वमकृतचूडस्यापिनियतम् वर्षत्रयोर्ध्वमुपनयनात्सर्वंचतूष्णीमप्युदकदानम् तूष्णीमेवोद
कंकुर्यात्तूष्णींसंस्कारमेवचेतिपूर्वोक्तलौगाक्षिस्मृतेः पिंडदानमपिकार्यम् असंस्कृतानामभूमौपिंडन्दद्यात्संस्कृतानांकुशेष्विति प्र
चेतसोक्तेः उदकदानंसपिंडैःकृतचूडस्येतिगोतमोक्तेः उदकग्रहणमौर्ध्वदैहिकपरमितिहरदत्तः द्वादशाब्दात्सराद्वर्वाक्योग
उमरणेसति सपिंडीकरणंनस्यादेकोद्दिष्टानिकारयेदितिहरदत्तदेवलोक्तेश्च मरीचिरपि प्रेतपिंडंबहिर्दद्याद्दर्भमंत्रविव
र्जितमिति एतदनुपनीतेपरमितिविज्ञानेश्वरः अत्रचूडैवपूर्वावधिः पूर्ववाक्येतुतद्ग्रहणात् उदकग्रहणस्योपलक्षणत्वा
द्दाहःपूर्वावधिरितिकेचित् द्वादशाब्दात्सरादित्यनुपनीतद्विजानुष्ठश्रद्धविषयम् महाशौचेपिंडदान[illegible]माहपारस्करः
प्रथमेदिवसेदेयास्त्रयःपिंडाःसमाहितैः द्वितीयेचतुरोदद्यादस्थिसंचयनंतथा त्रींस्तुदद्यात्तृतीयेह्निवस्त्रादिक्षालयेत्ततइ
ति अत्रदेवयाज्ञिकनिबंधेविशेषः शिशुरादंतजननाद्बालःस्याद्यावदाशिखम् कथ्यतेसर्वशास्त्रेषुकुमारोमौंजिबंधनात्
आपंचवर्षात्कौमारंपौगंडोनवहायनः तथा गर्भेनष्टेक्रियानास्तिदुग्धंदेयंशिशौमृते पुरंचपायसंक्षीरंदद्याद्बालविप
त्तितः एकादशद्वादशाहंवृषोत्सर्गविधिंविना तथा यत्रप्रमीयतेबालस्तत्रप्रायःप्रदीयते किंचित्समानवयसांसंतृप्त्या
न्नयथाविधि भक्ष्यभोज्यंचदातव्यंयथाचसुखभक्षिका तद्वस्त्राणिप्रदेयानिसोपानत्कानितत्समे कुमाराणांचबालानां
भोजनंवस्त्रवेष्टनम् यच्चोपजीवनेबालस्तत्तद्विप्रायदीयते तथा भूमिनिक्षेपणंबालेआवर्षद्वयमाशिशोः ततःपरं
खनगंधैःस्पृष्टदेहदाहोयथाविधि अचूडेप्यूर्ध्वंखननंनिखनस्यर्थमावर्षद्वयमिति प्रागपिकृतचूडस्यतन्निखनस्यर्थमाशिशोर्म
ति तथा चूडाकर्मणिसयातेविपत्तिस्तुयदाभवेत् स्नतकातेप्रकर्त्तव्यंवृषस्योत्सर्जनंतदा तत्रदाहःप्रकर्त्तव्यउदकंतत्र
निश्चितम् श्राद्धानिषोडशापिस्युःसपिंडीकरणंविना इदं पंचवर्षोत्तरं जन्मतःपंचवर्षाणिभुंक्तेदत्तमसंस्कृतम् पं
चवर्षाधिकेबालेविपत्तिर्यदिजायते वृषोत्सर्गादिककर्मकर्त्तव्यमुदकंततः अहन्यहनिसंप्राप्तेकुर्याच्छ्राद्धानिषोड
श अनुदर्भैस्तिलैःशुक्लैःप्राचीनावीतिनातथेति तत्रैवोक्तेः वार्षिकादितुनभवत्येव सपिंडनाभावपितृत्वायोगात्
दिवोदासीये अव्रतेनिधनप्राप्तेविप्रादेश्शूद्रजातिवत् क्रियाःसर्वाःसमुद्दिष्टाःसपिंडीकरणंविना उदकंपिंडदानंच

नि॰सिं॰ २६८

कृतचूडे विधीयते इति स्त्रीणां तु दाहात्राकृतदकपिंडदानविकल्पः स्त्रीणां चैके प्रत्तानामिति गोतमोक्तेः स्त्रीशूद्राश्च सधर्माण
इति वचनाच्छूद्रस्यैवम् एतद्वयानि मिताक्षराशौचं सर्ववर्णसमम् तुल्यवयसि सर्वेषामतिक्रान्ते तथैव चेति व्याघ्रपादोक्तेः
यानि तु निवृत्ते चूडके विप्रे त्रिरात्राच्छुद्धिरिष्यते निर्वृत्ते क्षत्रिये षड्भिर्वैश्ये तु नवभिस्त्र्यहैः शूद्रे त्रिवर्षे न्यूने तु मृते शु
द्धिस्तु पंचभिः अत ऊर्ध्वं मृते शूद्रे द्वादशाहो विधीयते षड्वर्षान्तमतीते तु शूद्रे मासमशौचकमित्यांगिरसादीनि ता
नि शिष्टविगानान्नादृतव्यानीति विज्ञानेश्वरमदनपारिजातादयः तेनैतद्दशाच्छूद्राणां व्यवस्था प्रागुक्ता हेयैव
तुल्यवयसि सर्वेषामिति दाक्षिणात्यपरम् अन्यदेशे कौर्मोक्ता व्यवस्थेति शुद्धितत्त्वे अथ जातस्याशौचम् तच्च द्विजपुं
सामुपनयनोर्ध्वप्रकीर्तिते त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परम् क्षत्रस्य द्वादशाहानि विशः पंचदशैव तु त्रिंशद्दि
नानि शूद्रस्य तदर्धं न्यायवर्तिन इति याज्ञवल्क्योक्तेः यत्तु स एव त्रिरात्रं दशरात्रं वा शावमाशौचमिष्यते इत्याह तत्र
दशाहे त्रिरात्रमस्पृश्यत्वम् एकादिनोत्पन्नाशौचद्वये दशाहमस्पृश्यत्वम् मरणं यदि तुल्यं स्यान्मरणेन कथं चेन
अस्पृश्यत्वं भवेत्कोऽत्र सर्वमेवं सबाधकमित्यंगिरसोक्तेः दशाहाशौचपरत्वे दशरात्रमतः परमित्यन्येन पौनरुक्त्याप
त्तेरिति शुद्धिविवेकः यस्तु पुत्राणां वेदानध्याप्य वृत्तिं विदधाति तन्मोहाश्वलायनः द्वादशरात्रं महागुरुषु दानाध्य
यने वर्जयेन्निति शुद्धितत्त्वे तु त्रयः पुरुषस्यातिगुरवो भवन्ति माता पिता चाचार्यश्चेति विष्णूक्तेः पित्रादयो महागुरवः
भर्त्रादिप्युक्तोऽशून्मायणेन पतिर्बन्धुर्गतिर्भर्त्ता दैवतं गुरुरेव च शातातपः पतिरेको गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः
एकपदमृतानां पितृमातृनिषेधार्थम् सोदकानां त्रिरात्रम् आहान्दूदकदायिन इति मनूक्तेः अग्निपुराणे सपिंड
तातु पुरुषे सप्तमे विनिवर्तते समानोदकभावस्तु निवर्तेत चतुर्दशे जन्मनाम्नः स्मृतेरेके तत्परं गोत्रमुच्यते बृहस्प
तिः दशाहेन सपिंडास्तु शुध्यंति प्रेतसूतके त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यंति गोत्रजाः स्त्रीशूद्रयोस्तु विवाहोर्ध्वं जा
त्याशौचम् वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृत इति मनूक्तेः दत्तानां भर्तुरेव हि स्वजातस्तु के मशौचस्यान्यतके
जातके तथेति माधवीये ब्राह्मोक्तेः शूद्रस्य विवाहाभावेऽपि षोडशवर्षोर्ध्वं मासः अनूढभार्यः शूद्रस्तु षोडशाद्वत्सरा

रामः
२६८

त्परम् मत्तं समधिगच्छेच्चेन्मासात्तस्यापि बांधवाः शुद्धिं समधिगच्छन्तीति नात्र कार्य्यविचार इति अपरार्के शंखोक्तेः
त्रिरात्रियामुक्तमदनपारिजातादावन्यत्रोक्तम् हारीतः आ मौञ्जीबन्धनाद्विप्रः क्षत्रियश्च धनुर्ग्रहात् आप्रतोदग्रहाद्वैश्यः
शूद्रो वस्त्रद्वयग्रहात् धनुः प्रतोदं वल्कमेकं द्वौ दशौ वस्त्रद्वयमिति मेधातिथिस्तु त्रिरात्रमात्रमादेशादित्यत्र व्रतकालोप
लक्षणार्थं सत्रकालः स्वस्वीयः सर्वेषां चाष्टमवर्षरूपः तेन चतुर्णामपि वर्णानामुपनयनाभावेष्टमादूर्ध्वं पूर्णे
मेवाशौचम् तत्रापि प्रागष्टमाच्छिशवः प्रोक्ताः इति स्मृत्यन्तरादूर्ध्वं सम्पूर्णमर्वाक् त्रिरात्रम् ये त्वाषाढशाङ्गदेवहालकृत्या
कृत्स्ने बामष्टमादूर्ध्वं शूद्रमास एव ऊर्ध्वमष्टभ्यो वर्षेभ्यः शुद्धिः शूद्रस्य मासिकीति वचनादित्याह हारलता शुद्धितत्त्वादि
गौडग्रंथेष्वप्येवम् अनुपनीतो विप्रस्तु म्रियते यत्र तत्र स्यादाशौचं त्र्यहमेव हि द्विजन्मनामयं कालस्त्रयाणामनुप
डाविकक्रत्यादिपुराणोक्तो रूपनयनकालोपलक्षणं षडब्दपदमासत्रयाधिकपरम् गर्भाष्टमेऽष्टमे वाब्दे इत्युक्तेः यत्तु जा
बालिः व्रतचूडाद्विजानां च प्रतीतिशुध्यथाक्रमम् दशाहस्त्र्यहमेकाहः शुध्यन्त्यपि हि निर्गुणाः इति द्विजादत्ताः शूद्रप्रतीत्युक्तेः
पचाद्योपनीतेपरमिति तत्पदेनन्याद्रियन्ते वृद्धाः यानि तु पराशरः एकाहाद्ब्राह्मणः शुध्येद्योऽग्निवेदसमन्वितः त्र्यहात्केव
लवेदस्तु द्विहीनो दशभिर्दिनैः केवलवेदः केवलश्रोताग्नेरप्युपलक्षणम् अयं संकोचो होमाध्यापनपर एव न तु संध्याप
वित्तिहारलतायाम् अङ्गिराः सर्वेषामेव वर्णानां सूतके मृतके तथा दशाहाच्छुद्धिरेतेषामिति शातातपोऽब्रवीत् देवलः
आमुच्चे दशरात्रं तु सर्वेषामपरे विदुः निधने प्रसवे चैव पश्चात्तः कर्मणः क्षयम् अन्येनोत्कृष्टस्यकर्महानौ पीडावतो वि
प्रपाऽरच्चर्यापरम्भूदृदशरात्रमिति हारलतायाम् दक्षः सद्यः शौचं तथैकाहस्त्र्यहश्चतुरहस्तथा षड्दशद्वादशाहश्च पक्षो
मासस्तथैव च मरणान्तं तथा चान्यद्दशपक्षास्तु सूतके सद्यःशौचादिषडहान्ताः मिताक्षरायां स्मृत्यन्तरे चतुर्थे दशरात्रं स्या
त्वरिनशाः पुंसि पञ्चमे षष्ठे चतुरहाच्छुद्धिः सप्तमे त्वहरेव तु इत्यादीनि तान्यापदनापद्रूपकरणबाहुल्याभिदर्शनाचारभेदा
दानेयानि अत्र मरणान्तं जननादिनिमित्ताद्भिन्नशिष्टविगानान्नान्नादर्त्तव्यापिनीति विज्ञानेश्वरः अस्नात्वाचाप्यजु

नि॰ सिं॰ त्वाचअदत्त्वाहमंसत्तथाद्विजः एवंविधस्यविप्रस्यसर्वदासूतकंभवेदितिदक्षोक्तया अन्यपूर्वायस्यगेहेभार्यास्यात्तस्यनित्यशः
२६९ आशौचंसर्वकार्येषुदेहेभवतिसर्वदेतिब्राह्मादिवचनेभ्यश्चैवस्थैत्यपरार्कमदनपारिजातादयः माधवस्तु वृत्तस्वाध्यायसा
पेक्षमसच्चसंकोचनंतदपीतिकलिवर्ज्येष्वुक्तेः दशाहएवविप्रस्यसपिंडमरणेसति कल्पांतरागिकुर्वाणः कलौभवतिकि
ल्विषीतिहारीतोक्तेश्चसूतकाशौचपक्षाः युगांतरविषमाः मरणांतादिपक्षास्तुनिंदार्थवादोन्यथानामधारकविप्रस्तुद
शाहंसूतकीभवेदितिविरोधःस्यादित्याह यत्तुदेवलः दशाहादित्रिभागेनकृतेसंचयनेक्रमात् अंगस्पर्शनमिच्छ
तिवर्णानांतत्त्वदर्शिनइतिपूर्णाशौचेस्पृश्यतामाह यच्चानुपनीतानतिक्रांताशौचेत्रिरात्रादौतेनैवोक्तम् स्वाशौच
कालाद्विज्ञेयंस्पर्शनंतुत्रिभागतइति तदपियुगांतरेषु अस्थिसंचयनादूर्ध्वमंगस्पर्शनमेवचेतिमाधवीयकलौ
तन्निषेधात् यत्तुहारलतायाम् चतुर्थेहनिकर्तव्यःसंस्पर्शोब्राह्मणस्यचितिप्रचेतसोक्तेस्त्र्यहेकाहाशौचेपिचतुर्था
हएवांगस्पर्शइति तन्नदेवलादिवसेनास्यदशाहगोचरत्वात् येतुवर्णसंकरजातमूर्धावसिक्ताद्यास्तेषामाशौच
विशेषःकलौनोपयुक्तइतिनोच्यते प्रतिलोमजानांनाशौचंमलापकर्षणार्थंतुस्नानमात्रमितिविज्ञानेश्वरःमा
धवस्तुशौचाशौचेप्रकुर्वीरन्शूद्रवद्वर्णसंकराइतिब्राह्मोक्तेः शूद्रवदाह हारलतापीत्येवम् दत्तक्रीतकृत्रिमादिपुत्रे
ष्वहीनवर्णगासुस्त्रीषुचसपिंडत्वेपिप्रसवेमरणेचपूर्वापरपित्रोर्भर्त्रोश्चत्रिरात्रमेवनदशाहादि अनौरसेषुपुत्रे
षुजातेषुचमृतेषुच परपूर्वासुभार्यासुप्रसूतासुमृतासुचेतित्रिरात्रानुवृत्तौविष्णूक्तेः सपिंडानांत्वेकाहः परपूर्वासु
भार्यासुपुत्रेषुकृतकेषुच भर्तृपित्रोस्त्रिरात्रंस्यादेकाहस्तुसपिंडतइतिमाधवीयहारीतोक्तेः सूतकेचैवमृतकेत्रिरा
त्रंपरपूर्वयोः एकाहस्तुसपिंडानांत्रिरात्रंयत्रवैपितुरितिमरीच्युक्तेश्च शंखः अनौरसेषुपुत्रेषुभार्यास्वन्यगतासु राम॰
च परपूर्वासुचस्त्रीषुत्रिरात्राच्छुद्धिरिष्यते परपत्नीस्वयंसंगृहीतापरपूर्वाहृदसवर्णासु हीनवर्णासुतुशंखलिखि २६९
तौ परपूर्वासुभार्यासुपुत्रेषुकृतकेषुच नानध्यायोभवेत्तस्यनाशौचंनोदकक्रिया ब्राह्मेपि आशौचंतुत्रिरात्रंस्यात्

समवर्णेषु निर्दिष्टम् यत्तु षडशीतावन्यपूर्वा विरूढासु त्रिदिनाच्छुद्धिरिष्यते नास्ववानन्यपूर्वासु पंचाहोभिर्विशुध्यती
ति तत्र पंचाहमूलं चिन्त्यम् यत्तु याज्ञवल्क्यः अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च इत्येकाहमाह तत्सन्निधौ ज्ञेयमय
द्धपितुरेकाहस्तद्दासपिंडानां स्नानम् अन्याश्रितेषु दारेषु परपत्नीसुतेषु च गोत्रिणः स्नानशुद्धाः स्युस्त्रिरात्रेणैव तत
पितेति प्रजापत्युक्तेः पितेति वा कुरूपलक्षणम् तथोपक्रमात् यत्तु दत्तकपालकप्रतियोगिकपुत्रत्वात् पूर्वपितुर्नत्रिरात्रम
पूर्वसंबंधनिवृत्तेस्तु न दशाहादीति कश्चित् तन्न जनकेपि बैजिकादभिसंबंधादनुरुध्यादध्यादृक्ष्यहमितिवा चनिकाशौचस्याति
वार्यत्वात् पितृमरणेपि दत्तकादीनां त्रिरात्रम् शुद्धितत्वे ब्राह्मे दत्तकश्चस्वयंदत्तः कृत्रिमः क्रीत एव च उपक्रम्य सूतके मृतके
चैव त्र्यहाशौचस्य भागिनः इत्युक्तेः दत्तकस्य तु पुत्रपौत्राणां तु जननेन मरणे वा सपिंडानामेकाहः बीजितन्स्त्रिर्तिगोतमे सप्त
पुरुषसापिंडोक्तेः सपिंडानां चैकाहस्योक्तत्वात् सपिंडे तु पुत्रीकृत दशाह एव तत्राकांक्षाभावात् पूर्वापरभर्तृत्पन्नयोः पुत्र
योस्त्र्यह माधवीये मरीचिः मातुरेकयाद्विपितृकौ भ्रातरावन्यगोत्रजौ एकाहस्सूतके तत्र त्रिरात्रं मृतके तयोरिति दिकु उ
कन्यानां तु विदेशस्थाह संस्कृतासु स्त्रीषु नाशौचं पितृपक्षे तत्प्रसवमरणे चेत्पितृगृहे स्यातां तदैकरात्रं त्रिरात्रं चेति प्रसवे एक
रात्रं मरणे त्रिरात्रमिति विज्ञानेश्वरापरार्कौ माधवस्तु प्रसवे पित्रि रात्रं पित्रोः एकरात्रं भ्रात्रादिबंधुवर्गस्य दत्तानारीपि
तुर्गेहे सूयेताथ म्रियेत वा तद्बंधुवर्गस्त्वेकेन शुचिस्तज्जनकस्त्रिभिरिति ब्राह्मोक्तेरित्याह यत्तु कश्चिदाह पक्षपदेन भ्रातरौ
गृह्येते वा कयान्तरेण भगिनीमृतौ त्रिरात्रोक्तेरिति तच्चिन्त्यम् तदभावादेतद्विरोधाच्च भ्रातुः प्रसवे एकाहः मृतौ त्रिरात्रमि
ति केचित् युक्तान्तु पक्षिणी भ्रातृभिन्नानामेकाहः वर्गोक्तेः इतरेषां यथा विधीति वक्ष्यमाणवचनाच्च यत्तु प्रधानेगृहे
मृतौ पित्रोः पूर्णम् भ्रातुस्त्र्यहमिति कश्चित्तन्निर्मूलत्वान्नाशौचं पितृपक्षे कृत्येतद्विरोधाच्च भ्रातः दत्तानारीपितुर्गेहे प्रधाने
सूयते यदा म्रियते वा तदा तस्याः पिता शुध्येत्त्रिभिर्दिनैरिति कल्पतरौ शुद्धितत्वे च पतिगृहे प्रसवे तु पित्रादीनामाशौचं च
नास्ति मृतौ पित्रोस्त्रिरात्रमस्त्येव प्रत्ताप्रत्तासु योषित्सु संस्कृतासंस्कृतासु च मातापित्रोस्त्रिरात्रं स्यादितरेषां यथा।

त्रि·सिं· विधि अजातदंतासु पित्रोरेकरात्रमिति माधवीये शंखकाश्यपौ जिनिस्मृते: वैजिकादभिसंबंधादिनुरोद्ध्य स्मृत्यर्थसारे प्येवम
२७० माधवस्तु दृदंत्रिरात्रं जातदंतापरम् दंतोत्पत्ते: प्रागेकरात्रम् पित्रो: सद्यस्त्वशौचकन्यायां प्रोढायां वासराच्छुद्धि: प्रदत्तायांत्रिरा
त्रएण दत्तायां पक्षिणीमवेदितिपुलस्त्यात्केरन्यत्र कन्यामृतौ पित्रो: पक्षिणीत्याह षडशीतावपि पितृगेहे दत्तान्यत्र यदि पुत्री
प्रमीयते पक्षिणी तत्र पित्रो: स्यान्नान्यबामितिनिश्चयमृति ग्रामांतरे द्वयमिति स्मृत्यर्थसारे भ्रातुस्तुपक्षिणी स्वशुरयाभ
गिन्यां च मातुलान्यां च मातुले पित्रो: स्वसरि तद्वच्च पक्षिणीं क्षपयेन्निशामिति वृद्धबृहस्पतिस्मृते: शुद्धितत्वेकौर्मे आदंता
त्सोदरे सद्यश्चाचूडादेकरात्रकम् आप्रदानात्त्रिरात्रं स्याद्दशरात्रमत: परम् पित्रोर्मृतौ स्त्रीणां त्रिरात्रम् पित्रोरुपरमे स्त्रीणां
मृतानामनुकथं भवेत् त्रिरात्रेणैव शुद्धि: स्यादित्याह भगवान्यम इति माधवीये वृद्धमनूक्ते: दृदंदत्तासु तत: ऊर्ध्वे तु पक्षिणीमत्र
तु भगिनीगृहे तस्यां वा तद्गृहे मृतौ त्रिरात्रमन्यत्र तु पक्षिणीति षडशीतावुक्तम् भ्रातरोपि परस्परं मृतौ भ्रातृभगिन्यो: पक्षि
णीं भवेत् मातुलाशौचवत्तु त्र्या: पितृव्याशौचमिष्यते इति शिष्टास्त्वस्य निर्मूलत्वात्स्नानमात्रमाहु: त्रिंशत्श्लोक्याम
प्रेतेष्वाचार्य्यमातामहदुहितृसुतश्रोत्रियर्त्विक्स्वयाज्यस्वस्रीयपुत्रिरात्रमत्रिदिवसमशुद्धि: सोदकस्तु भयत्र पक्षिणी
शौचमत्त्विग्दुहितृसुतसहाध्यायि बंधुत्रयांतेवासिश्वश्रूसुमित्रश्वशुरभगिनिका भागिनेयप्रयाणे मातामह्या च पि
त्रो: स्वसरि च विरतौ मातुले मातुलान्यामाचार्यो सज्ज्यातिरेवेत्स्वविषयनृपतौ ग्राममनाथे चनक्षे शिष्योपाध्यायबन्धुत्रय
गुरुतनयाचार्य्यभार्यासगोत्रानूचानश्रोत्रियेषु स्वगृहपरमृतौ मातुले चैकरात्रम् रात्रिं सब्रह्मचारिण्यथ तु कथमपि
स्वल्पसंबंधयुक्ते स्नानं वासो युतं स्यादिदमपि सकलं सर्ववर्णेषु तुल्यमिति अत्र मूलं मिताक्षरादौ स्पष्टम् दौहित्रभागि
नेययोरुपनीतयोस्त्रिरात्रम् अनुपनीतयो: पक्षिणी संस्थिते पक्षिणी रात्रिं दौहित्रे भगिनीसुते संस्कृते तु त्रिरात्रं स्या
दिति धर्मोद्यमवस्थितदृ वृद्धमनूक्ते: संस्कृते दौहित्रे तन्न दाहे त्रिरात्रं नान्यथेति गौडा: तन्न विशेषवचनाभावान्मातुलादौ स राम:
निधिविदेशाभ्यां पक्षिण्येकाहयोर्व्यवस्था मनु: त्रिरात्रमाह माशौचमाचार्य्ये संस्थिते सति तस्य पुत्रे च पत्न्यां च दिवारा २७०

त्रमितिस्थितिः श्रोत्रिये स्वगृहे त्रिरात्रम् श्रोत्रिये तूपसंपन्ने त्रिरात्रमशुचिर्भवेदिति स्मृतेरिति माधवः एकग्रामीणे त्वेकाहः
ऋत्विजवत्कल्प्यकालश्रौतस्मार्तयाज्ञनपरे त्रिरात्रैकरात्रे ज्ञेये यद्यपि कर्म कुर्वन् एष वाचकः शब्दो भवतीति शवरश्चार्थ्यः कर्म
मध्ये आर्त्विज्यमुत्क्रमम् तथापि कर्मण्यपाशौचं तिथा यथा तदुत्तरमेवैतज्ज्ञेयम् गौडास्तु समानोदकानां त्र्यहो गोत्रजानामहः स्मृत
म् मातृबंधौ गुरौ मित्रे मंडलाधिपतौ तथेति जाबालोक्तेर्मातृबंधुष्वेकाहमाहुः शिष्ये स्वोपनीते त्र्यहः शिष्य सतीर्थ्ये सब्रह्म
चारिण्युक्तमेरणे त्रिरात्रमहोरात्रमेकाहमिति माधवीये बोधायनोक्तेः अन्यत्र तु मनुः मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बां
धवेषु चेति बंधुत्रयाम् आत्मपितृष्वसृमातुलपुत्राः पितुः पितृष्वसृमातुलपुत्राः मातुः पितृष्वसृमातृष्वसृमातुलपु
त्राश्चेति विज्ञानेश्वरः अत्र पक्षिणी पितृष्वस्रादिकन्यानामनूढानां त्वेकाहः तद्बंधुवर्गस्त्वेकेनेति पूर्वोक्तवाक्यात् यत्तु षडशी
त्याम् एवं पित्रोर्भगिन्यौ ये च पितामहयोस्तथा ये मातामहयोश्चैव भगिन्यौ तत्प्रजाश्च याः मातुलाः स्वस्य पित्रोश्च पत्न्यश्चै
षां प्रजाश्च याः मातरश्चेति सर्वेषु पक्षिणी स्वगृहे त्र्यहम् एवं श्वशुरयोर्मातृदौहित्रविपदि स्मृतम् यच्च यमः जामातरि मृ
ते शुद्धिस्त्रिरात्रेणोभयोः स्मृता पक्षिणी शालकानां स्यादिति शातातपोऽब्रवीत् तन्निर्मूलत्वान्निर्णामक्षुरादिविरोधाच्चोपे
क्ष्यम् मदनपारिजातविह्मुः अत्र सपिंडे स्ववेश्मनि मृते एकरात्रम् अत्र हरदत्तोक्तः शावे चेत्यापस्तंबसूत्रे तः शावे ग्रामे धनुः
शतादर्वागन्नमभोज्यं दीपमुदकं चोपनिधाय तु भुंजीत यदि समानं वेश्मनि गृहमेवं सूतिकायामित्याह प्रधानगृहमे
वोक्तु गृहे यस्य मृतः कश्चिदसपिंडः कथंचन तस्याप्यशौचं विज्ञेयं त्रिरात्रं त्रिरात्रं नात्र संशयः इत्यांगिरसोक्तमिति
माधवः एतेन त्रिरात्रमसपिंडेषु स्वगृहे संस्थितेष्वशुचेत्ति कौर्मं व्याख्यातम् शुद्धितत्त्वे बृहन्मनुः श्वश्रूद्यपतिताश्चान्या
मृताश्चेन्निजमंदिरे शौचं तत्र प्रवक्ष्यामि मनुना भाषितं यथा दशरात्राच्छुनि मृते मासाच्छूद्रे भवेच्छुचिः द्वाभ्यां तु पति
ते गेहमंत्ये मासचतुष्टयात् अत्यंतं वर्जयेद्गेहमित्येवं मनुरब्रवीत् अंत्याम्लेच्छाः अत्यन्तः श्वपाके इति वाचस्पतिः यमः द्वि
जस्य मरणे वेश्मा विशुद्ध्यति दिनत्रयात् संवर्त्तः गृहशुद्धिं प्रवक्ष्यामि अंतःस्थशवदूषिते प्रोत्सृज्य मृन्मयं भांडं सिद्धमन्नं

अन्यत्र तु। पित्रोः स्वसरि तद्वत्पक्षिणीं क्षपयेन्निशामिति वृद्धमनूक्तम्। तत्स्वगृहमृतौ ज्ञेयम्। श्वशुरयोरन्यत्र मृतावपि सन्निधौ त्रिरात्रम्
असन्निधौ पक्षिणी। देशान्तरे एकरात्रम्। वक्ष्यमाणविष्णूक्तेरिति माधवगौडादयः ४

नि॰सिं॰ २७१ त्येव च गोमयेनोपलिप्याथ छागेन घ्रापयेद्बुधः। ब्राह्मणैर्मन्त्रपूतैश्च हिरण्यकुशवारिभिः। सर्वमभ्युक्षयेद्वेश्म ततः शुध्यत्य
सशयम् इति वृहद्विष्णुः। ग्राममध्यगतो यावच्छवस्तिष्ठति कस्यचित्। ग्रामस्य तावदाशौचं निर्गते शुचितामियात्। गृहे पश्वादौ स्व
तेष्वेवम्। यत्तु माधवीये प्रचेतसा मातृष्वस्रादिषु त्रिरात्रमुक्तम् मातृष्वसामातुलयोः श्वश्रूश्वशुरयोर्गुरोः मृते चर्त्विजि याज्ञे
च त्रिरात्रेण विशुध्यतीति गुरुराचार्यः केचित्तु लागतः अन्यत्र गृहमृतौ ज्ञेयम् श्वशुरयोरन्यत्र मृतावपि सन्निधौ त्रिरा
त्रमसन्निधौ पक्षिणी देशान्तरे एकरात्रम् वक्ष्यमाणविष्णूक्तेरिति माधवगौडादयः अन्यत्र तु पित्रोः स्वसरि तद्वत्पक्षिणीं
क्षपयेन्निशामिति वृद्धमनूक्तम् तत्स्वगृहमृत्यादिवाचनीयम् अन्यत्र तु यावत् यत्तु वृद्धमनुः भगि
न्यां संस्कृतायां तु भ्रातर्यपि च संस्कृते मित्रे जामातरि प्रेते दौहित्रे भगिनीसुते शालके तत्सुते चैव सद्यः स्नानेन शुध्यती
ति तत्स्नातृदौहित्रादौ देशान्तरे शालकसुतजामात्रोः स्वदेशे ज्ञेयम् शालके तु स्वदेशेप्येकाहः आचार्यपत्नीपुत्रोपाध्याय
मातुलश्वशुरश्वश्रूश्वशुर्य्यसहाध्यायिशिष्येष्वेकरात्रमिति माधवीये विष्णूक्तेः हरदत्तीये दशश्लोक्यामप्येवम् श्व
शुर्य्यः शालकः देशान्तरे स्नानम् श्वशुरयोर्देशान्तरे एकाहः जाबालः एकोदकानां च त्र्यहो गोत्रजानामहः स्मृतम् सर्व
त्र मूल्याभावे क्रियाकर्तुर्दशाहः गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरन् प्रेताहारैः समं तत्र दशरात्रेण शुध्यती
ति मनूक्तेः शिष्य इत्युपलक्षणम् निरन्वये सपिण्डे तु मृते सति दयान्वितः तदशौचं पुरश्चीर्त्वा कुर्यात्तु पितृवत्क्रिया मि
ति माधवीये ब्राह्मोक्तेः दिवोदासीये सगोत्रो वासगोत्रो वा योऽग्निं दद्यात्सखे नरः सोपि कुर्यान्नवश्राद्धं शुध्येच्च दशमेह
नि यत्रैकविषये पक्षिण्येकाहादिपक्षद्वयमुक्तं तत्र सन्निधिविदेशमरणादिकृतो व्यवस्था त्रिंशच्छ्लोक्याम् वानप्रस्थ
यतौ चापुरमति कुलजे षंडके चाप्लवः स्याद्दाशौचं भिक्षौ विप्रगुरुप्रेमनवति तु दिनं युद्धविद्धे च सद्यः अत्र मूले तमाकरे स्पष्टम्
युद्धमूर्ध्वमृतस्य स्नानम् उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च सद्यः संतिष्ठते यज्ञस्तथाशौचमिति स्थितिरिति मनूक्तेः राम॰ २७१
यज्ञेनात्मकर्मसर्वं तद्देवेन्यर्थः यत्तु भारते राजधर्मेषु आशौच्याहिस्मृतः शूरः स्वर्गलोके महीयते नचान्नमुदकं तस्येन

स्नानंनाप्यशौचकमितिश्राद्धादिनिषेधःसपुत्राद्यभावपरः अतएवतत्रकरणादीनांश्राद्धमुक्तम् अन्येतुदशपिंडनिषेधमाहुरितिवत् यत्तुपराशरः आहवेपिहतानांचएकरात्रमशौचकमितितत्तुयुद्धक्षतेनकालांतरमृतेज्ञेयम् असद्योस्नानमितिमाधवः
भुङ्क्तेतत्वेऽग्निपुराणेदंष्ट्रिभिःशृंगिभिर्वापिहतानांम्लेच्छतस्करैः येषामप्यहतायातिराजन्स्वर्गेनसंशयः सर्वेषामेववर्णानां
क्षत्रियस्यविशेषतः यत्तुबृहस्पतिः डिंवाहवविद्युतांचराज्ञागोविप्रपालने सद्यःशौचम् तस्याद्युक्त्याहवान्येमनोषिणः तच्च
स्त्रविनापराङ्मुखहतेचत्रिरात्रम् राज्ञावध्येहतेसद्यःशौचमन्यत्रत्रिरात्रम् तदेवव्याघ्रक्षतेनम्रियतेयस्तुतस्याशौचमेवं
द्विधा आसन्नाद्यात्त्रिरात्रंस्याद्दशरात्रमतःपरम् शस्त्राघातेत्र्यहादूर्ध्वंयदिकश्चित्प्रमीयते आशौचप्राकृततत्रसर्ववर्णेषु
त्यशः शस्त्राघातस्यतंविना शवस्पर्शेतुहारीतः शवस्पृशोग्राममनुप्रविश्यउदकंप्रक्षिप्यदर्शनादाप्रातोदिवस्य यत्तुमनुः
अक्ताचैकेनरात्र्याचत्रिरात्रैरेवचत्रिभिः शवस्पृशोविशुध्यंतित्र्यहात्तूदकदायिनः सपिंडात्म्यावेत्र्यहोरात्रमुक्तम् त्रिभिस्त्रि
रात्रैरितिनवरात्रमेवंदशरात्रमित्यर्थः तत्तदन्नाशनेतद्गृहवासेवापदिचज्ञेयम् अंगिराः आशौचयस्यससर्गोदापतेद्गृ
हमेधिनः क्रियास्तस्यनलुप्यंतेगृह्याणांचननद्भवेत् अथनिर्हारेचशौचम् सवर्णनिर्हारेतदन्नाशनेतद्गृहवासेचदशाहः
तदन्नानश्ननेतद्गृहवासेत्र्यहः गृहावासेनभक्षणेचैकाहः स्मृतिगृहेण्निर्हारदाहेचतज्जात्याशौचम् यदिनिर्हरतिप्रेतं
प्रलोभाक्रांतमानसः दशाहेनद्विजःशुध्येद्द्वादशाहेनभूमिपः मासार्द्धेनतुवैश्यस्तुशूद्रोमासेनशुध्यतीतिकामिके द्विजा
नीयनिर्हारेतुशवजातीयमाशौचम् अत्रस्मृतिगृहेद्विगुणम् अवरश्चेद्वरवर्णमवरोवाप्यवरम् कान्तिसृजुयः अर्थपंको
यदिवहिन्यादिदोषेण सांपरायेसतेनमपातिस्यूप्रवृत्तचारेणनकुर्वंतिशवेनिपर्यंकम् अनेनकाचाचाररामेसवर्णेचअविशयम
हीनेचत्रिभिः कचिद्विहितिपरेमासवर्णानाहीनेनतुद्विगुणमन्नेगुणमचातुर्गुण्याघृतम् अथरोदनेसमोत्तमवर्णयोः
सचयनात्पूर्वेसचेलस्नानमूर्ध्वमाचमनंहीनवर्णानांतुसंचयात्प्राक्सचेलमूर्ध्वस्नानमात्रंविप्रस्यक्षत्रवैश्यविषयेतुप्रा
क् अस्थिसंचयनेविप्रोरोतिचक्षत्रवैश्ययोः तदास्नानःसचेलस्तुद्वितीयेहनिशुध्यति इतेनतुसंचयेविप्रःस्नानेनैव

फे २

नि॰सिं॰
२७२

शुचिर्भवेत् क्षत्रस्यैवं वैश्यस्यैवं शूद्रस्तु संचयात् स्नात्वा कृचित्रस्त्रिरात्रम् क्षत्रो वैश्यस्त्रोर्द्धरात्रम् ऊर्ध्वं तु द्विजानामेकाहः शूद्रस्य शुद्धे
स्पृष्ट्वा विना संचयात् स्नात्वैकाहः ऊर्ध्वं संचयनात् निमाधवीये ज्ञेयम् भक्षितास्थिपास्यरन्तु अस्थिसंचयनादूर्ध्वं स्नात्वा सचेलं द्वि
जानयः विप्रे वैश्ये शुद्धितिर्वाससा सायाह्वे तेन च सजाते द्विवसेन तत्र शूद्रे क्षत्रियवैश्ययोरित्युक्तम् सपिण्डानां तदेन निर्हीय स
प्त वदेषा स्पृशन्तु प्राक् विज्ञानेश्वरस्तु सूतस्य बाधवैः सार्द्धं कृत्वानुपरि देवतम् वर्ज्यं येनादहस्य ददान श्राद्धादिकर्मचेतिपार
स्करे भोजे सर्वत्रैवमाह अथाशौच्यन्नमक्षरेणविष्णुः श्राद्धस्य सनामाशौचेयः स कृदेवान्नमस्नातितस्य यदि व
हेच्छ्रवंतदाशौचं दृष्टार्थे द्विगुणमवेदितिव्याघ्रोक्तेः कौमसमतादितिगौडः दाहेप्येवम् यत्तु प्राह्ले यो सवर्णं तु मूल्येन नीत्वा
चैव दहेन्नरः आशौचं तु भवेत्तस्य प्रेतजातिसमं न्वपोत तदापदि ज्ञेयम् सोदकं निर्हरेन्तु दशाहम् इति माधवः अलंकरणानु
सारवः कृच्छ्रपादो सपिण्डस्य प्रेतालंकरणे कृते अज्ञानादुपवासः स्यादशक्तौ स्नानमिष्यते धर्मार्थमनाथसवर्णनिर्हरणे
क्रियाकरणे च द्विजस्यानन्तयज्ञफलं स्नानप्राणायामाग्निस्पर्शश्चेति माधवीयेऽग्निदेष्येवम् प्रेतसंस्पर्शी संस्कारैर्ब्रा
ह्मणो नैव दुष्यति वोढा चैवाग्निदाता च सद्यः स्नात्वा विशुध्यतीति अपरार्के वृद्धपराशरोक्तेः स्नेहादौ तु त्रिरात्रम्
असंबन्धिद्विजान्वहित्वा दहित्वा च सद्यः शौचं संबन्धे त्रिरात्रमिति पैठीनसिस्मृतेः गौतममिताक्षरयोर्वा रात्रिः सूत
कादि द्विगुणं शावं शावाद् द्विगुणमानेवम् आर्त्ते वा द्विगुणा सूतिस्ततोपि शवदाहकः अत्र पूर्वयोगान्तरनिवृत्तिरित्य
र्थः विष्णुः मृतं द्विजं न शूद्रेण हारयेन्न शूद्रं द्विजेन देवलः ब्रह्मचारी न कुर्वीत शवदाहादिकाः क्रियाम् यदि कुर्याच्चरेत्कृ
च्छ्रं पुनः संस्कारमेव च याज्ञवल्क्यः आचार्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्रती अनुगमने तु सपिण्डे तु न दोषः विहितं हि
सपिण्डानां प्रेतनिर्हरणादिकम् न तेषां करोति यः कश्चित्तस्याधिकं न विद्यते इति देवलोक्तेः दोषः स्यात्त्व सपिण्डस्य
तत्रानाथक्रियां विनेति हारीतोक्तेश्च समोत्कृष्टवर्णानु माधवीये स एव अनुगम्य शवं बुध्या स्नात्वा स्पृष्ट्वा घृतं
ताशनम् सर्पिः प्राश्य पुनः स्नात्वा प्राणायामैर्विशुध्यति हीनवर्णं तु विप्रस्य क्षत्रियेऽहः वैश्ये पक्षिणी

राम:
२७२

ब्रती ४

चत्रिभिः कृच्छ्रैर्व्यपोहति। परेषां सवर्णानाम्। हीनेषु तु द्विगुणं पञ्चगुणं चातुर्गुण्यपाद्यूह्यम्॥ अथ रोदने समोत्तमवर्णयोः संचयनात्पूर्वं सचैलस्नानमूर्ध्वमाचमनं
नं हीनवर्णेषु तु संचयात्प्राक् सचैलमूर्ध्वं स्नानमात्रं विप्रस्य क्षत्रवैश्यविषये तु प्राप्ते॥ अस्थिसंचयने विप्रो रोदिति चेत् क्षत्रवैश्ययोः। तदा स्नानः सचैलस्तु द्वितीयेऽह्नि
निशुध्यति। कृते तु संचये विप्रः स्नानेनैव शुचिर्भवेत्। क्षत्रवैश्ययोरेवम्। शूद्रे तु संचयात्प्राग्विप्रस्य त्रिरात्रम्। क्षत्रवैश्ययोर्द्विरात्रम्। ऊर्ध्वं तु द्विजानामेकाहः॥

शूद्रस्य शूद्रस्य वै
विना संचयात्पूर्व
मेकाहः। ऊर्ध्वं स
द्यः। इति माध
वीये ज्ञेयम्। शुद्धि
तत्त्वे पारस्करस्तु।
अस्थिसंचयना
दूर्ध्वमासंयावच्छु
जातयः। दिवसेन
च शुध्यंति वाससां
क्षालनेन च। सजा
तेर्दिवसेनैव त्र्यह
क्षत्रियवैश्ययोः
[illegible]म्। सपिंडा
नां रोदने निहिरा
दावदोष इत्युक्तं

शूद्रे त्रिरात्रम् क्षत्रियस्य वैश्ये षडहः शूद्रे पक्षिणी वैश्यस्य शूद्रे द्व्यहः इति विज्ञानेश्वरः माधवस्तु विप्रस्य वैश्ये षडहः क्षत्रस्य शूद्रेऽप्येवम् अ
न्यत्प्राग्वत् स्नानाग्निस्पर्शाभ्यां तत्प्राशनेनाति सर्वत्रेत्याह हीनवर्णस्य दाहादेरौर्ध्वदेहिककरणे तु प्राप्ते प्राप्ल रोणे हीनवर्णस्य तु कुर्यादौ
र्ध्वदेहिकम् कामाल्लोभाद्यथामोहात्कृत्वा तत्तु अनितावृजेत् मनुः ब्राह्मणो नायाजो [illegible] मभिवार
महिना तावदाशौचं यावत्तेषामशौचमुपगमे प्रायश्चित्तमिति अज्ञानविषयः अत एव शंखः भुक्त्वान्नं सूतके मृतके पिबा अप्सा
शौचं भवेत्तावद्यावदन्नं व्रजत्यधः प्रायश्चित्तं तु मत्या विप्रस्य वर्णक्रमेणैकाहत्र्यहपंचाहसप्ताहोपवासा दशविंशतिः
षष्टिः शतं च प्राणायामाः पंचगव्याशनं च अभ्यासे द्विगुणम् आपदि तु प्राणायामशतपंचशतमष्टसहस्रगायत्रीजपश्च
मत्या यदि तु सवर्णाशौचे त्रिरह्नमघमर्षणम् गायत्र्यष्टसहस्रं च क्षत्रियाशौचे उपवासस्तद्वत् वैश्याशौचे त्रिरात्रोपवासश्च
शूद्राशौचे कृच्छ्रः क्षत्रवैश्ययोः पंचशतमष्टशतं गायत्रीजप उत्तमेषु शूद्रस्य सर्वत्र स्नानम् अत्यानापदि विप्रस्य वर्णेषु सा
तपनकृच्छ्रमहासांतपनचांद्रायणानि अभ्यासे तु मासिकद्वैमासिकत्रैमासिकषाण्मासिकानीत्यादि माधवीयादौ ज्ञेयम्
अथ दासस्य स्वदास्युत्पन्नस्य स्वसपिंडमृतौ स्नानमात्रेण स्वामिकार्यस्पृश्यत्वम् भक्तदासस्य त्र्यहोर्ध्वम् सद्यः स्पृश्य
गर्भदासो भक्तदासस्त्र्यहाच्छुचिरिति स्मृत्यंतरोक्तेः मूल्यकर्मकरः शूद्रदासीदासस्तथैव च स्नानशरीरसंस्कारगृहक
र्मस्वपदुष्टा विनाकृतिशातातपोक्तेश्च एतच्चान्यस्य ध्वंतकार्यमात्रे अन्यत्र मासमाशौचमस्त्येव एवं दास्यामपि सूतिका
यास्तस्याश्च स्पृश्यत्वमपि मासमात्रं दासीतस्य सर्वो वैधस्य वर्णस्य याभवेत् तद्वर्णस्य भवेच्छौचं दास्या मासस्तु सूतक
मित्यंगिरसोक्तेः बहुशीतानपि स्वामिशौचेन दासाद्याः स्वस्वामासानुक्रमेषु योग्याः स्युर्मासतो दासी सूतौ चेत्स्पृश्यतामि
यात् एतद्दासादीनां स्वसपिंडमरणादौ स्वाम्याशौचसमसंख्यादिनोर्ध्वं सत्यपि मासाद्याशौचे स्वामिकार्ये स्पृश्यतेति हि
रदत्तः दासांतेवासिभृतकाः शिष्याश्चैकत्रवासिनः स्वामितुल्येन शौचेन शुध्यंति मृतसूतके इति बृहस्पतिस्मृतेः
दासश्चात्र गृहजातस्तथा क्रीतो लब्धो दायादुपागतः अन्नाकालभृतस्तद्वदाहितः स्वामिना च यः मोक्षितो महतश्च

प्राक्। विज्ञानेश्वरस्तु। मृते सबांधवैः सार्धं कृत्वा तु परिदेवनम्। वर्जयेत्तदहोरात्रं दानश्राद्धादिकर्म चेति पारस्करोक्तेः। सर्वत्रैकरात्रमाह

७

नि॰ सिं॰ २७३

र्णाच्च युद्धप्राप्तः पणेजितः तवाहमित्युपगतः प्रव्राज्यावसितः कृतः भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः विक्रेता चात्म
नः शास्त्रे दासाः पंचदश स्मृता इति नारदोक्तेषु गर्भभक्तदासो विज्ञेयः वडवादासी तयाहृतः तामुद्वाह्य दासो जात
इत्यर्थः अनेनास्यपितुर्नैवोक्तेः स्वशिल्पमिच्छन्नाहर्तुं बांधवानामनुज्ञया आचार्यस्य वसेदंते कृत्वा कालं सुनि
श्चितम् आचार्यः शिक्षयेदेनं स्वगृहे दत्तभोजनमिति शिष्यस्तत्तुल्या विद्यार्थी दासादेः स्वामितत्सपिंडमरणे तु वि
कल्पः पत्नीनां दासानामानुलोम्येन स्वामितुल्यमाशौचं मृते स्वामिन्यात्मीयमिति प्रतिलोमदासानामाशौचं
भवेत् वर्णानामानुलोम्येन दास्येन प्रतिलोमतः स्मृतिर्याज्ञवल्क्योक्तेः अथ रात्रौ जनने मरणे च रात्रिं त्रिभागं कृ
त्वाद्यभागद्वये चेत्पूर्वं दिनमन्यथोत्तरमिति मिताक्षरायाम् यत्तु प्रागर्द्धरात्रात्प्राग्वा सूर्योदयात्पूर्वं दिनमित्युक्तं
तत्र देशाचारतो व्यवस्था सर्वथाशौचमहिताग्नेर्दाहं तद्भिन्नस्य मरणमारभ्य ज्ञेयम् अनग्निमत उत्क्रांतेरशौचा
द्धि द्विजातिषु दाहादग्निमतो विद्याद्विदेशस्थे मृते सतीति पैठीनसिस्मृतेः साग्निरनाहिताग्निः आहिताग्निश्चेत्प्रवस
न्म्रियते पुनः संस्कारं कृत्वा शववदाशौचमिति वाशिष्ठविशेषोक्तेः दाहादेवानुकर्तव्यं यस्य वैतानिको विधिरिति ब्राह्म
त्वे यत्तु पत्नीस्वामिनारमांडारेण चोक्तम् आहिताग्नेरपि मरणाद्येव दशरात्रं त्र्यहं शावमाशौचमिति मरणनि
मित्तत्वात्तस्य यत्तु दाहादेव तस्याशौचमुक्तम् तत्संस्कारनिमित्ताशौचं पृथगेव तेन गृह्याग्नेः संस्कारांगं त्रिरात्रमशौ
ताग्नेस्तु दशरात्रम् मरणनिमित्तमुभयोर्दशाहम् दाहात्प्रागपीति तद्वचनविरोधात्पूर्वस्यैवोत्कर्षान्मूलकल्पनाला
घवाच्चित्यम् अथातिक्रांताशौचम् तत्राशौचमध्ये जननादौ जाते तच्छेषेण शुद्धिः विगतं तु विदेशस्थं शृणुयाद्यो
ह्यनिर्दशम् यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेदिति मनूक्तेः अत्र केचिदत्युत्क्रांतातिरिक्तविषयम् तथात्वा
शौचमध्ये श्रवणे पितृदाद्येव दशाहादि पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः श्रुत्वा तद्दिनमारभ्य दशाहं सू राम॰ २७३
तकी भवेदित्यस्य सर्वापवादत्वादित्याहुः तन्न ज्ञातमरणस्य निमित्तत्वात् अनग्निमत उत्क्रांतेरित्यादिविरोधाच्च

स्मृत्यर्थसारेपि जनने मरणे वा प्रथमदिनादूर्ध्वं ज्ञाते पुत्रादीनां शेषेणैव शुद्धिरिति षडशीतावपरार्के चैवं दशाहादूर्ध्वं ज्ञाते तु वृ
द्धवशिष्ठः मासत्रये त्रिरात्रं स्यात्षण्मासे पक्षिणी तथा अहस्तु नवमादर्वागूर्ध्वं स्नानेन शुध्यति जनने त्वतिक्रान्ताशौचे ता
स्यैव नाशुद्धिः प्रसवाशौचे व्यतीते तु दिनेष्वपीति देवलोक्तेः पितुः स्नानं तत्रापि भवत्येव निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य
जन्म च सवासा जलमाप्लुत्य शुद्धो भवति मानव इति मनूक्तेः तच्चातिक्रान्ताशौचं दशाहादिजात्याशौचविषयं न त्वनुपनी
तादिनिमित्तत्रिरात्रादौ उपनीते तु विषमं तस्मिन्नवाति कालजमिति व्याघ्रोक्तेः निर्दशं ज्ञातिमरणं अतिक्रान्ते दशाहे
त्विति मनूक्तेश्च माधवीये देवलस्तु आत्रिपक्षात्त्रिरात्रं स्यात्षण्मासात्पक्षिणी ततः परमेकाहमावर्षादूर्ध्वं स्नातो वि
शुध्यतीत्याह तत्रापदनापद्विषयत्वेन व्यवस्था इदं चैकदेशे देशान्तरे तु स्नानमात्रम् देशान्तरमृतं श्रुत्वा क्लीबे वैखान
सयतौ मृते स्नानेन शुध्यन्ति गर्भस्रावे च गोत्रिण इति पराशरोक्तेरिति विज्ञानेश्वरः स्नानं वत्सरान्ते अर्वाक् त्रिपक्षात्त्रि
निशं षण्मासाच्च दिवानिशम् अहः संवत्सरादर्वाग् देशान्तरमृतेष्वपीति विष्णूक्तेरिति माधवः इदं सपिण्डानां देशान्तरे
स्नानमोदकानामिति युक्तम् तल्लक्षणं त्वाह बृहस्पतिः महानद्यन्तरं यत्र गिरिर्वा व्यवधायकः वाचो यत्र विभिद्यन्ते त
द्देशान्तरमुच्यते देशान्तरं वदन्त्येके षष्टियोजनमायतम् चत्वारिंशद्वदन्त्यन्ये त्रिंशदन्ये तथैव चेति एतत्सर्वं मातापितृभि
न्नविषयम् तयोस्तु पैठीनसिः पितरौ चेदिति पूर्ववाक्यात्सदा पूर्णं दशाहादि स्मृत्यर्थसारेपि मातापितृमरणे दूरदे
शेपि संवत्सरोर्ध्वमपि पुत्रो दशाहादिकं पूर्णमाशौचं कुर्यात् स्त्रीपुंसयोः परस्परं सपत्नीषु चैवमिति शुद्धितत्वादयो
गौडास्तु ऊर्ध्वं संवत्सराद्याद्बन्धुश्चेत्कश्चयते मतः भवेदेकाहमेवात्र तच्च संन्यासिनां न त्विति देवलोक्तेः पित्रोरब्दम
ध्ये त्रिरात्रमूर्ध्वमेकाहः बन्धुर्माता पिता भर्ता च पूर्वोक्तदशाहस्तु कलिङ्गादिदेशपरत्वात् नैवं बन्धुपदस्यापि पुत्रादिप
रत्वमानाभावादुपेक्ष्याः सपत्नमातुस्तु दक्षः पितृपत्न्यामपेतायां मातृवर्जं द्विजोत्तमः संवत्सरे व्यतीते तु त्रिरात्रम
शुचिर्भवेत् हीनवर्णमातृषु सपत्नीषु चैवमिति स्मृत्यर्थसारे केचित्तु पितुः पत्न्यां प्रमीतायामौरसेतरतनयेन यतिद्रा

नि॰सिं॰ न्तोक्तेऽपरस्येपीति माधवः षडशीत्यामप्येवमेतत्सर्वं वर्णेषु तुल्यं तुल्यं वयसि सर्वेषामतिक्रान्ते तथैव चेति व्याघ्रोक्तेः अथा
२७४ शौचसंपात उच्यते तत्र शावे शावं सूतके सूतकं शावे सूतकं सूतके शावं वा तत्राप्युत्तरकालतः पूर्वेण समं न्यून
मधिकं चेति चतुर्धा भेदः यदैकदिने समं न्यूनमधिकं वाशौचद्वयं तत्र तन्त्रेणान्यसिद्धिः द्वयोरेककालत्वात् यदा तु द्वि
तीयादिदिने पूर्वसजातीयं शावे जननं वा समकालं न्यूनकालं वा परं स्यात्तदा षट्सु पक्षेषु पूर्वशेषेण शुद्धिः अन्तरा
जन्ममरणे शेषाहोभिर्विशुध्यतीति याज्ञवल्क्योक्तेः अन्तरा ज्ञाते इत्यर्थः ज्ञातस्यैव जननादेर्निमित्तत्वात् पूर्वाशौ
चोत्तरं तन्मध्योत्पन्ने ज्ञाते तूत्तरमेव कार्यम् शुद्धितत्त्वेप्युक्तम् पूर्वाशौचातरुत्पन्ने समाने लघु वा निमित्ते तत्काला
दुपरिष्टात्तस्याशौचे हेतुरेव अज्ञाते तु न अविज्ञाते न दोषः स्यात् श्राद्धादिषु कथंचनेत्यस्याशौचे सांकर्यपि प्रसक्तेः
तेनाज्ञातादशौचात् सर्गादौ कृते पश्चात्तज्ज्ञानेपि नावृत्तिरिति माधवीये यमोपि जनने जननं चेत्स्यान्मरणे मरणं त
था पूर्वशेषेण शुद्धिः स्यादुत्तराशौचवर्जनम् अत्र केचिद् दशाहे स्यातां चेत्पुनर्मरणजन्मनी तावत्स्यादशु
चिर्विप्रो यावत्तत्स्यादनिर्दशम् इति मनुपराशरोक्तेः दशाहग्रहणात् पूर्वाशौचस्य पूर्वशेषेण शुद्धिः त्र्यहाद्यल्पाशौच
संपाते तूत्तरेणैव शुद्धिरित्याहुः हरदत्तोप्येवमाह गौडास्त्वप्येवम् तन्न याज्ञवल्क्यादिवचोने दशाहस्य तुल्यका
लाशौचोपलक्षणत्वात् समानाशौचसंपाते प्रथमेन समापयेत् असमानं द्वितीयेन धर्मराजवचो यथा इति माधवी
ये शंखोक्तेः अपरार्के मिताक्षरादिविरोधाच्च यदा तु सूतके शावं समं न्यूनमधिकं वा तदा न पूर्वशेषेणाच्छुद्धिः तदाह
गौतमः सूतके मृतकं चेत्स्यान्मृतके त्वथ सूतकम् तत्राधिकृत्य मृतकं शौचं कुर्यान्न सूतकम् षड्त्रिंशन्मते शावा
शौचे समुत्पन्ने सूतकं तु यदा भवेत् शावेन शुध्यते सूतिर्न सूतिः शावशोधिनी चतुर्विंशतिमतेपि मृतेन शुध्यते रामः
जातं न मृतं जातकेन तु अतो यदा दशाहजननमध्ये तदन्ते वा त्र्यहादिशावं तदा पूर्वेण शुद्धावपि तन्निमित्तमस्पृश्य २७४

त्वं भवत्येव मरणोत्पत्तियोगे तु गरीयो मरणं भवेदिति कौर्मोक्तं गौतमव्याख्यायां चात्रिरपि सूतकाद्द्विगुणं शावं शावाद्द्विगुणमा
र्तवम् आर्तवाद्द्विगुणा सूतिः ततोपि शववदाहकः अत्र पूर्वपूर्वेणानोत्तरोत्तरनिवृत्तिरेकस्यैकत्वाधिक्यादित्यर्थः मदनरत्नेऽपि
स्वभावेव द्विसूतिस्तु न्यूनं शावविशोधितेति रात्रिशेषादौ वाह्नि त्रिदिने रागानुकेः सूतके वक्तृत्वं च न स्वभावेन अत एव तत्र न्यूनशा
वस्यापि न पूर्वेणाशुद्धिरिति वचनस्वभावेनस्तनम आत्रेपि नागन्तुकस्याहोभिराशौचमपनुद्यते न च पातनिमित्तेन शावस्यापनु
स्वशोधनमिति एवं न पक्षाः यदा तु महागुर्वाशौचमध्ये सजातीयं वा विजातीयं वा दीर्घकालमुत्तरं तदाप्युत्तरपूरणकार्य्यं
न पूर्वेणाशुद्धिः स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि न पूर्वेण विशुद्धिः स्यात्स्वकालेनैव शुध्यतीत्युशनसोक्तेः तेन त्र्य
हादिशौचमध्ये दशाहादिसूतकेपि न पूर्वेणाशुद्धिरित्यपरार्के: शावनिमित्तमस्य एकत्वं च भवत्येव शुद्धिविवेके तु शावेन शु
ध्यते सूतिरिति प्रागुक्ते तत्राप्युत्तराशौचानिवृत्तिरुक्ता तन्न उत्तरस्याकालाधिक्येन बलवत्त्वात् माधवीयेपि आद्य
वृद्धिमदाशौचं पश्चिमेन समाप्यते यथा त्रिरात्रप्रक्रान्ते दशाहः प्रविशेद्यदि आशौचं पुनरागच्छेत् तत्समाप्य विशुध्यतीति
हारीतोपि गुरुणा लघु शुध्यन्तु लघुना नैव गुर्विति गुरुत्वलघुत्वे च कालकृते एव पूर्वानुरोधादतं च हरदत्तेन स्पष्टमुक्तम् मु
मिताक्षरायामपि यत्तु अब्दानां योगपद्ये तु ज्ञेया शुद्धिर्गरीयसा मरणोत्पत्तियोगे तु गरीयो मरणं भवेदिति हारीतकौर्मो
दि तत्रास्य एकत्वाभिप्रायं शावस्य गुरुत्वं च ज्ञेयम् क्वचिदल्पकाल्पेनापि दीर्घकालाशौचनिवृत्तिमाह देवलः परतः प
रतो शुद्धिरवृद्धौ विधीयते स्याच्चेत्पंचतमादह्नः पूर्वेणैवात्र शुध्यते अस्यार्थः आद्यवृद्धौ दीर्घाशौचे परतोऽशुद्धिः
परमाशौच यदि पूर्वाशौचमुत्तरस्य पंचमदिनात्परतोऽनुवर्त्तते तदा पूर्वेणैव शुद्धिः पूर्वस्यात्तराशौचाद्व्यधिककालव्यापि
त्वपूर्वशेषाच्छुद्धिरित्यर्थः यथा षष्ठमासगर्भपातनिमित्तषडहाशौचत्वमध्ये दशाहपाते पूर्वेणोत्तरनिवृत्तिर्यथा वात्र्य
हमध्ये स्त्रावपातनिमित्ते चतुरहः पञ्चाहयोरिति कश्चित् तन्न दशाहावधिपूर्वशेषशुद्ध्यावेदवाक्यविरोधात् षष्ठाष्टादि
दिने पुष्पेणाशौचमन्त्यरात्रोत्तु द्व्यहत्र्यहःऽप्यनौचित्याच्च अस्मद्गुरवस्तु पंचतमादह्नः आरततो न्यूनम् त्र्यहादि चेत्स्यात्तत्रास्मिन्

विषये पूर्वेणैवशुद्धिः शिष्यते दशाहादिरात्रिशेषे अहादिपाते अहाद्यल्पाशौचानां परस्परं रात्रिशेषसंपाते च न महादिवृ
द्धिरित्यर्थमाहुः केचित्तु पूर्वशेषेणाशुद्धेरपवादमाह गौतमः रात्रिशेषे सति द्वाभ्यां प्रभाते तिसृभिरिति प्रभाते त्वयामे
रात्रिशेषे महाच्छुद्धियामशेषे शुचिस्त्र्यहादिति शातातपोक्तेः इदं दशवाने सूतके पाते सजातीये तुल्यम् अत्र केचित्
रात्रिशब्दोऽहोरात्रपरः अहःशेषे द्वाभ्यां प्रभाते तिसृभिरिति शङ्खलिखितोक्तेः अथ यदि दशरात्राः सन्निपातेयु
राद्यादशरात्रमाशौचमानवमाद्दिवसादत ऊर्ध्वं द्विरात्रेणाव्युष्टायां त्रिरात्रेणेति बौधायनोक्तेः पुनःपाते दशा
हान्माकं पूर्वेण सह गच्छति दशमेऽह्नि पतेत्तु यस्याहर्द्वयात्स विशुध्यति प्रभाते तु त्रिरात्रेण दशरात्रेष्वयं विधिरिति
देवलोक्तेश्च नवमे दशमे वा प्राक्तदाचापात्यान्त्यदिनपरं तेन क्षत्रियादावपि तथेत्याहुः माधवीयेप्येवम् अन्ये त्वाहुः
अन्तर्दशाहे स्यातां चेत्पुनर्मरणजन्मनी तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशमिति मनुपराशरोक्तेर्दशम
दिनेनोत्तरस्याशुद्धेरुक्तत्वाद्विरोधः स्पष्ट एव विरोधे चैषमेवं किं च न मनुरवदत्तद्वेषजम् कलौ पाराशरस्मृतिरित्य
स्य न पूर्ववचसा बाधः अत एव वाचस्पतिना तेषामनाकरत्वमुक्तम् साकरत्वे पि जातिमात्रविप्रादिविषयम्
दशान्तरविषयं युगान्तरविषयं वास्तु तेन गौतमीये रात्रिशब्दो नाहोरात्रपरः रात्रिमात्रावशिष्टे इति मिताक्षरो
क्तेश्च न कुक्कविकृत्तेरिवान्यथा व्याख्यायुक्ता माधवस्तु अनिर्गते दशाहमिति पूर्ववचस्त्वन्यथा विरोधादुपेक्ष्यमिति अ
न्ये तु चरणास्तु बौधायनीये आनवमाद्दिवसादिति द्वितीयाशौचस्य नवमदिनप्रथमस्य दशमे वाहः महा
दिवृद्धेः पूर्वशेषापवादत्वात्तस्य च न्यायतो द्वितीयदिनादेव प्रवृत्तेः अत ऊर्ध्वमिति दशमरात्रिपरम् शङ्खलिखि
तोक्तौ देवलोक्तौ चाहादिशेषदशमेऽह्नि चातीतरात्रोपते दित्यर्थः दशम्यां पिता नामकुर्यादितिवत् तेनेन मन्वाद्यवि
रोधो नापि मिताक्षराद्येरित्याहुः अपरार्के निर्णयामृते प्येवम् यत्तु तत्रैव ब्राह्मे आद्यं भागद्वयं यावत्सूतकस्य तु रामः
सूतके द्वितीयपाते तेन्चाद्यात्सूतकाच्छुद्धिरिष्यते अत ऊर्ध्वं द्वितीयात्तु सूतकान्ताच्छुचिः स्मृतेः एवमेवाविचार्यस्मा २०५

मृतकांतरे मृतकस्यांतरे यत्र सूतकं प्रतिपद्यते सूतकस्यांतरे चाथ मृतकं यत्र विद्यते मृतकांते भवेत्तत्र शुद्धिर्विप्रेण शु
सर्वशः स्मृति अस्यार्थस्तत्रैवोक्तः पूर्वाशौचचरमाहोरात्रस्य दिनरूपश्चाद्यभागद्वये न्याशौचपाते पूर्वेण शुद्धिः भा
गद्वयोर्ध्वरात्रौ सूतकांतरे द्वितीयात् पूर्वभिन्नात् सूतकांता द्यहादिरूपाच्छुद्धिरिति अपरार्के त्वाशौचकालं त्रेधा विभ
ज्यान्तिमगुणविषयत्वेन दर्शुक्तम् अस्य निर्मूलत्वोक्तिरज्ञोक्तिरेव अतः पूर्वाशौचान्त्यरात्रावन्याशौचे द्वेहोरात्रे द्वयमधि
कम् रात्रेर्यामे तु दिनत्रयमिति भट्टाचरणोपदिष्टः पन्थाः एतत्सपूर्णाशौचसंपाते एवं रात्रिशेषे त्रिरात्रादिसं
पाते तु पूर्वशेषेणैव शुद्धिः द्विरात्रादिवृद्धेः पूर्ववाक्ये दशाहविषयत्वादपवादाभावे शेषशुद्धेरेव सामान्यतः प्रवृत्ते
रिति षडशीतौ तु दशाहान्ते स्वहपाते पि द्वित्रिदिनवृद्धिरुक्ता रात्रिशेषे यदाशौचं पूर्वानधिकमापतेत् ऊर्ध्वं दिनद्वयं
पूर्वाद्याम शेषे दिनत्रयमिति अनधिकं समं न्यूनं वा तन्तु च्छेनिर्मूलत्वाद तपक्षिण्यादिपाते पि द्विरात्रादिवृद्ध्यापा
ते च पूर्वाशौचान्तवर्द्धितद्वित्रिदिनमध्ये धिकाशौचान्तपाते तु वर्द्धितस्याल्पत्वाद धिकेनैव शुद्धिः द्विरात्रादिवृद्धेः
न च वर्द्धितस्य पूर्वशेषत्वं शक्यं न्नीयम् रात्रिशेषे पूर्वशेषशुद्ध्यपवादे नैमित्तिकावृत्तिन्यायाज्जीवनात् अपवादे
भावे उत्सर्गस्य प्राप्तेः अपवादान्तरमाह शंखः मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता पितुः शेषेण शुद्धिः
स्यान्मातुः कुर्यात्तु पक्षिणीम् पादत्रयं स्पष्टम् चतुर्थस्य त्वयमर्थः पित्राशौचमध्ये मातृमृतौ पित्राशौचान्ते मा
तुः पक्षिणीमधिकां कुर्यादिति अत्र सुधाविस्तुके रामहादेः पितुराशौचाभावान्मातृमरणे न पक्षिणी किन्तु पूर्ण
मेवाशौचम् द्वयं च पक्षिणीत्वतीयादिदिनपरा न्नाद्यदिनद्वये प्रतिनिमित्तनैमित्तिकावृत्तिरिति न्यायापवाद
पूर्वशेषापवादत्वादिति पितृचरणाः सपिंडाद्यशौचे न मातापित्रोराशौचापगमा नास्त्येव एवं भर्तुरपि द्वयं च
पक्षिणी दशमदिनात्पूर्वं मातृमरणे ज्ञेया दशम्यां रात्रौ तत्र भाते वा मातृमरणे त्र्यहं त्र्यहं समुच्चितापक्षिणी

नि॰ सिं॰ तत्त संख्यांतरोपजननापत्याम्महादिश्रुतिबाधापत्तेः अत एवैकादेयावकदेया इत्यादौ श्रुतिसंख्याबाधापत्तेः समु
२७६ च्चयो निरस्तो द्वादशगुरुरित्यल्लघोरनर्गतेः गुरुणालघुशुद्धौदितुलेस्य मातुरन्वारोहणेतु न पक्षिणी यदा नारी वि
शेदग्निं प्रियस्याप्रियवाञ्छया तदाशौचं विधातव्यं भर्त्तुश्शौचं च कर्मणा हि इति पृथ्वीचंद्रोदये लघुहारीतोक्तेः तत्रैव ब
ह्वृचपरिशिष्टेपि मृतं पतिमनुव्रज्य पत्नी चेदनलं गता न तत्र पक्षिणी कार्य्या पौतृकादेव शुद्ध्यति पुत्रो स्याचाग्निद
स्तस्यास्तावदेवाशुचित्वयोः न वश्राद्धं च पिंडं च युगपत्तु समापयेत् गृहीताशौचानां पुत्राणां पितुः संस्कारे मातु
सपिंडस्य वा मरणे नान्यनिर्णयः अतिक्रांतकालाद्विद्यमाननिमित्तस्य बलवत्त्वात् द्वादशवर्षोत्तरसंस्कारे शौ
चे प्रत्यक्षमरणप्येवम् यत्तु अपरार्के ब्राह्मे ऋग्वेदवादात्साध्वी स्त्री न भवेदात्मघातिनी त्र्यहाशौचे तु निर्वृत्ते
श्राद्धं प्राप्नोति शाश्वतमिति तन्नुर्न्नशौचान्तेर मन्वारोहणे त्रिरात्राशौचमिति पृथ्वीचंद्रः ब्राह्मणादेः क्षत्रिया
ने घनुगमने त्र्याशौचमित्यपरार्केः शुद्धितत्त्वादयो गौडग्रंथास्तु भर्त्रशौचान्तरमन्वारोहणे त्रिरात्रम् सहगमने
तु संपूर्णम् युद्धहतस्य सद्यः शौचे न्वारोहणे ब्राह्मणोक्ते त्रिरात्रं वा भर्त्तुरपि त्र्यहेण पिंडदानमेकचित्तौ तु सद्यः
शौचमित्याहुः अन्यत्त्वागुक्तम् पूर्वशेषेणाशुद्धेरपवादांतरमुक्तम् षडशीत्याम् पूर्वाशौचेन याशुद्धिः सूत
केमृतके च सा सूतिकामपि दहित्वा प्रेतस्य च विसृतानपि निर्णयामृतेसग्रहेपि पूर्वविशुद्धिरदिता सूतिकाम
ग्निदं वित्ता पूर्वमूल्येन दाहकरणे मातुलादिसबंधेदाहकरणे त्रिरात्रमेव तत्र पूर्वपाक् वृत्तिः सूतकादिषु गुणा शु
वंशवाद्धिगुणमार्त्तवम् आर्त्तवाद्विगुणासूतिस्ततोपि शववाहकः तथाशौचसंपाते पितृमृत्यवजननेनिमित्त
कार्यप्रतिबंधः आशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत् कर्त्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुध्यतीति प्रजा राम:
पतिस्मृतेः आशौचे द्विविधेपीत्यर्थः शातातपः अंतर्दशाहे जननात्पश्चात्स्यान्मरणं यदि प्रेतमुद्दिश्य कर्त्त २७६

मात्र

सपिण्डदानं यथाविधि प्रारब्धे प्रेतपिण्डे तु मध्ये चेज्जननं भवेत् तथैवाशौचे पिण्डांस्तु शेषान्दद्याद्यथाविधि मातुः
पक्षिण्यां मध्ये पितुरेकादशाहं च कुर्यात् आद्यश्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनीति स्मृतेः केचित्तु क्षत्रियादि
परम् विप्रादेस्त्वशौचान्तरे एकादशाहश्राद्धं नेत्याहुः अतएव विज्ञानेश्वरेण दशममपिण्डमुत्सृज्य रात्रिशेषे शुचि
र्भवेत् इति शुचित्वं महैकोद्दिष्टं गोविप्रनिमन्त्रणपरमिति वदता तत्र शुद्धरेणैव दर्शितम् एवं च वृषोत्सर्गे शय्यादा
नमपि दैवज्ञात्विकेन तत्वाशौचान्तरेऽपि भवत्येवेत्युक्तम् अथाशौचापवादः स पञ्चधा कर्तृतः कर्मतः द्रव्यतः म
न्त्रदोषतः विधानाच्च आद्यो ब्रह्मचारियत्यादिषु नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणाम् नाशौचं कीर्ति
तं सद्भिः पतिते च तथा मृते इति कौर्मोक्तेः तुर्यपादे शवेवापि तथैव वेति देवलपाठः आशौचमन्त्यकर्मापि ल ...
णाम् ब्रह्मचारी न कुर्वीत शववाहादिकाः क्रियाः यदि कुर्याच्चरेत् कृच्छ्रं पुनः संस्कारमेव चेति देवलोक्तेः एतन्मात्रा
द्यतिरिक्तविषयम् आचार्यस्वमुपाध्यायमातरं पितरं गुरुम् निर्हृत्य तु व्रती प्रेतान्न व्रतेन वियुज्यते इति मनूक्तेः
निर्हरणमन्त्यकर्मपरम् एवं मातामहस्य यथा व्रतस्थोऽपि सुतः पितुः कुर्यात् क्रियां तथा मातामहस्यापि दौहि
त्रः कर्तुमर्हतीति भविष्योक्तेः मातापित्रोरुपाध्यायाचार्ययोरौर्ध्वदैहिकम् कुर्वन्मातामहस्यापि व्रती न भ्र
श्यते व्रतादिति कालादर्शाच्च तत्राप्यन्त्यकर्मनिमित्तमस्पृश्यत्वं दशाहमस्त्येव सगोत्रो वा सगोत्रो वा योऽग्निं दद्या
त्स एव नरः सोऽपि कुर्यान्नवश्राद्धमुद्युक्तस्तु दशमेऽहनीति दिवोदासोक्तवचनात् अतएव ब्रह्मचारिणः शवकर्मणि
रणाव्रतान्निवृत्तिरन्यत्र मातापित्रोर्गुरोश्चेति गौतमीये व्रतनिवृत्तेरेवपर्युदासान्नाशौचं तस्य संध्यादिकर्मलो

नि॰ सिं॰ २७७

यस्तु नास्ति तत्पुत्रेत्सूतके कर्म्मब्रह्मचारिस्वकं किंचिदिति छंदोगपरिशिष्टात् पित्रोर्गुरोर्विपत्तौतुब्रह्मचार्यप्रिय:
सुत: सव्रतस्थोपिकुर्वीत अग्निपिंडोदकक्रियाम् तेनाशौचेनकर्त्तव्यसंध्याचैवनलुप्यते अग्निकार्य्यनकर्त्तव्य
सायंप्रातश्चनित्यशइति चंद्रिकायांसंवर्त्तोक्तेश्च अत्रकर्मानधिकाररूपशौचनिषेधएव अपरार्कमाधवादय
स्तुएकाहमाशौचमाहु: आचार्य्यंचाप्युपाध्यायंगुरुंवापितरंचैववा मातरंवास्वयंदग्ध्वाव्रतस्थस्तत्रभोजनम्
कृत्वापततिनोतस्मात्प्रेतान्नंतत्रभक्षयेत् अन्यत्रभोजनंकुर्यान्नचतै: सहसंवसेत् एकाहमशुचिर्भूत्वाद्विती
येहनिशुध्यतीतिब्राह्मोक्ते: तदन्नभोजनेतुप्रायश्चित्तंपुनरुपनयनमाशौचंवा दिवोदासादयस्तुब्राह्मोक्ते: प्र
थमेह्निसंध्यादिलोप: ब्रह्मचारीयदाकुर्य्यात्पिंडनिर्वपणंपितु: तावत्कालमशौचंस्यात्पुन: स्नात्वाविशुध्यती
तिप्रजापतिवचनात् द्वितीयाहादौपिंडदानकालएवास्पृश्यत्वमात्रंनान्यदित्याहु: दशाहमस्पृश्यत्वेपिकर्मांगित्वा
नविधानार्थमेतदितियुक्तम् अन्यकर्मीकरणेतुब्रह्मचारिण: पित्रादिमरणेप्याशौचाभावएव सोपिब्रह्मच
र्यकालएव समावर्त्तनोत्तरंतुपूर्वमृतानांमहाशौचंभवत्येव आदिष्टिनोदकंकुर्यादाव्रतस्यसमापनात् समा
प्तेतूदकंदत्वात्रिरात्रमशुचिर्भवेदितिमनूक्ते: तत्रापिविकल्प: पितर्य्यपिमृतेनैवांदोषोभवतिकर्हिचित्. आ
शौचेकर्मणोतेस्यात् अहंवाब्रह्मचारिणमितिछंदोगपरिशिष्टात् तथाकृतजीवच्छ्राद्धेनकिमप्याशौचंन
कार्य्यमितिहेमाद्रि: शुद्धितत्त्वेकौर्मे सद्य:शौचंसमाख्यातंदुर्भिक्षेवाप्युपद्रवे डिंबाहवहतानांचविद्युतापा
र्थिवैर्द्विजै: उपसर्गमृतेचैवसद्य:शौचंविधीयते इतिपराशरोक्ते: उपसर्गोत्पातमरकाइतिशूलपाणिपुनरु राम:
द्रमदृहादय: याज्ञवल्क्योपि आपद्यपिचकष्टायांसद्य:शौचंविधीयते इतिमरणसमयेपिनाशौचम् तथाचशुद्धि २७७

रत्नाकरे दक्षः स्वस्थकाले त्विदं सर्वं सूतकं परिकीर्त्तितम् आपद्गतस्य सर्वस्य सूतकेपि न सूतकम् अतः सति वैराग्ये सं-
न्यासोप्यातुरस्य भवतीति केचित् अपरार्कमते त्रिंशच्छ्लोक्याम् तत्तत्कार्येषु सत्रिव्रतिनृपवदीक्षितार्त्विकस्वदेशाभ्यं-
शापत्स्वप्यनेकश्रुतिपठनभिषक्कारुशिल्प्यातुराणां संप्रारब्धेषु दानोपनयनजननश्राद्धयुद्धप्रतिष्ठाचूडातीर्थार्थयात्रा-
जपपरिणययज्ञोत्सवेष्वन्तदर्थं नाशौचमिति शेषः सत्री अन्नसत्त्ववान् मुख्यसत्रस्य दीक्षितपदात्सिद्धः व्रती अन-
न्तव्रतादिनियमवान् न व्रतिना व्रते इति विष्णूक्तेः प्रचेताः कारवः शिल्पिनो वैद्या दासीदासास्तथैव च राजानो राजभृ-
त्याश्च सद्यः शौचाः प्रकीर्त्तिताः कारवः सूपकाराद्याः शिल्पिनश्चैलनिर्णेजकाद्याः आतुरस्य व्याधितग्रहार्थं दाना-
दौ तुलादानादेः प्रारंभो नान्दीश्राद्धसंकल्पो वा यजनं तडागोत्सर्गकोटिहोमादि लघुः व्रतजन्मविवाहेषु श्राद्धे होमा-
र्चने जपे आरब्धे सूतकं न स्यादनारब्धे तु सूतकम् प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः नान्दीश्राद्धं विवाहादौ
श्राद्धे पाकपरिक्रियेति पाकस्य परिसमाप्तौ क्रिया पाकप्रोक्षणमिति शुद्धिप्रदीपः तन्मदनतीर्थेति आशौचे ह्याकस्मि-
क तीर्थप्राप्तौ विवाहदुर्गोत्सवेषु यात्रायां तीर्थकर्माणि न तत्र सूतकं तद्वत्कर्म यज्ञादिकारयेदिति पठित्वा स्मृतेः
अत्र विशेषः प्रागुक्तः जपः पुरश्चरणादिः स्तोत्रपाठश्चाविच्छेदेन संकल्पितः हरिवंशश्रवणादिश्च अत एवाह्निकब्राह्म-
गृहीतनियमस्यापि न स्यादन्यस्य कस्यचिदिति एवं देवपूजादि मदनपारिजातेप्येवमपि शिवविष्ण्वर्चने दीक्षायस्य चाग्नि-
परिग्रहः श्रौतकर्माणि कुर्वीत स्नातः शुद्धिमवाप्नुयात् गौडशुद्धितत्त्वे मन्त्रमुक्तावल्याम् जपादेवार्चनेविधिः कार्या
दीक्षान्वितैर्नरैः नास्ति पापं यतस्तेषां सूतकं वा यतात्मनाम् रत्नावलभट्टीये नारदः अथ सूतकिनः पूजां वक्ष्याम्याग-
मचोदिताम् स्नात्वा नित्यं च निर्वर्त्य मानसक्रियया तु वै बाह्यपूजां क्रमेणैव ध्यानयोगेन पूजयेत् यदि कामी न चे-
त्कामी नित्यमेवं सदाचरेत् यत्तु नृसिंहकल्पे सदा मन्त्रजपं मुक्त्वा यदि स्यादशुचिर्नरः मनसा विहितस्तत्र स्मरेन्मन्त्र-

नि॰ सिं॰
२७८

नतु स्वरेत् तन्मूत्रादिशौचपरम् रामार्चनचंद्रिकायाम् अशुचिर्वाशुचिर्वापि गच्छंस्तिष्ठन्स्वपन्नपि मंत्रैकस्मरणो वि
द्वान्मनसैव सदाभ्यसेत् कालनियमाभावेऽपि हृदयमेव उत्सवोरथयात्रादिः एतेन शौचम् अथ चाशौचाभावो नन्वग्नि
तित्वे श्रौतौ चेन्नैयः अत्र मूलमाकरस्यैव अत्र दीक्षितस्यावभृथात्पूर्वमेवाशौचाभावः तदादित्वाशौचमस्त्येव
प्रागवभृथात्करोति स्नातायामवभृथ इति पत्न्याः रजोसि विशेषोक्तेः उभयत्राशुचित्वस्य तुल्यत्वात् तेनवैतानोपा
सनाः कार्या इति वैतानत्वेप्यवभृथादिनमेवत्येव अतएवोक्तं माधवीये प्राक् तद्गृहीतदीक्षस्य त्राविपस्य महा
मखे स्नानत्वावभृथं यावत्तावत्तस्य न सूतकमिति वैतानोपासनाः कार्या इत्यनेनैव सिद्धम् ऋत्विजां दीक्षितानां चे
ति पुनर्दीक्षितग्रहणा यजमाने स्वयकर्तृत्वार्थं स्नानप्राप्त्यर्थं वेति विज्ञानेश्वरः वस्तुतस्तु दीक्षणीयासंस्कृतस्य
प्रागवभृथात्कर्मप्राप्त्यर्थं दीक्षितग्रहणम् तथा च छन्दोगपरिशिष्टे न दीक्षिणपाः परं यज्ञे न कृच्छ्रादितपश्चरन्नि
ति ग्राह्यितत्वेप्येवम् ऋत्विजां च मधुपर्कोत्तरमाशौचाभावः गृहीतमधुपर्कस्य यजमानाय ऋत्विजः पश्चादाशौ
चपाते न भवेदिति निश्चय इति ब्राह्मोत् अतएव रामाडारः चतुर्णां वरणपक्षेन्येषामाशौचेन्य आगमयितव्याः इत्या
ह एवं स्मार्तेपि तुलाकोटिहोमादौ मधुपर्के सति दोषाभावो ज्ञेयः यत्तु प्रारंभो वरणं यज्ञे इति तत्रापि मधुपर्कोत्तरे
यम् तेनाधानेष्टिपशुबंधादौ तदभावेन्य भवंतीति सिद्धम् अपवादांतरमाह याज्ञवल्क्यः वैतानोपासनाः कार्याः
क्रियाश्च श्रुतिचोदनात् तत्रत्यागमात्रे स्नानोत्तरं स्वयंकर्तृत्वम् श्रोतेक मिलितत्कालस्नानैः शुद्धिमवाप्नुयादिति स्मृते
त्यागमात्रे रिक्तोन्तु श्रौते स्मार्ते वान्यस्यैव कर्तृत्वम् सूतके मृतके चैव न च प्रकोप्यः श्राद्धभोजने प्रवासादिनिमित्तेषु हावये
न्न तु हापयेत् इति विष्णुस्मृतेः नित्यानि निवर्त्तेरन् वैतानवर्जं शालाग्नौ चैकेन्यपरतानि कुर्युरिति पैठीनसिस्मृते
श्चेति विज्ञानेश्वरः एकग्रहणं द्वजार्थं तेन स्मार्ते कार्यमेवेति हारलतायाम् दीक्षितात्यास्तु विकल्पमाहुः

रा॰ म॰
२७८

अपरार्कादिनिबंधास्तु श्रौतं सर्वं स्वयं कर्त्तव्यम् स्मार्त्तं तु त्यागातिरिक्तेऽन्यस्यैव कर्त्तृत्वं त्यागमात्रे तु स्वस्य कर्म वैतानिकं कार्यं
स्नातोपस्पर्शनात्स्वयमिति हारीतोक्तेः दर्शं च पूर्णमासं च कर्म वैतानिकं च यत् सूतकेपि त्यजेन्मोहात्प्रायश्चित्ती यते हि
जश्रुति मरीच्युक्तेः जन्महान्योर्वितानस्य कर्मत्यागो न विद्यते इति हारीतोक्तेः शालाग्नौ केवलो होमः कार्य एवान्यगो
त्रजैरिति जाबालोक्तेश्चेत्याहुः आशौचेप्येवम् याज्ञिकास्त्वेवम् सूतके तु समुत्पन्ने स्मार्त्ते कर्म कथं भवेत् पिंडजं
चरुं होमं असगोत्रेण कारयेदिति जातूकर्ण्योक्तेश्च चरुः स्मार्त्तस्थालीपाकः अव्ययाकर्मादिश्चेति विज्ञानेश्वरः प्रार
ब्धं तु सपिंडेनापि कार्यम् न चेत्तत्कर्मके विरागः सनाभ्योप्यशुचिर्भवेदिति मनूक्तेः छंदोगपरिशिष्टेपि होमः श्रौते तु क
र्त्तव्यः शुष्कान्नेन फलेन वा अकृतं हावयेत्स्मार्त्ते तदभावे कृताकृतम् अकृतं व्रीह्यादि कृताकृतं तंडुलादि स्मार्त्ते होमा
दौ विकल्पः शालाग्नौ चैके इति प्राच्योक्तेः यदाकरणं तदान्यद्वारा अत्रेदं तत्त्वम् येषां बह्वृचादीनां द्वादशरात्रमहोमेपि
नाग्निविच्छेदस्तैर्न कार्यम् तैत्तिरीयाद्यैः कार्यम् त्रिरात्रमक्रियमाणेऽग्निर्लौकिकः संपद्यते इति सुदर्शनभाष्यवचना
त् समारूढे त्वशौचेनापि न कार्यम् किंतु पुनराधानमेव समारोपप्रत्यवरोहयोरशौचे चापवादाभावादन्यकर्तृकत्वा
च्च अन्यथा पुनराधानमपि स्यात् यत्त्वाश्वलायनः नो चापि सूतके शावे पर्वणि रोगिणि महापदि प्रोष्यवासे च भार्यायामनकु
र्यात्ताः कदाचन स्मार्त्ताग्निः सूतके शावे स्वयं न जुहुयाद्द्विजः श्रौताग्निस्तु सकृद्धुत्वा समाप्नोत्यस्वयं कुर्यादिति तदपि स
मारूढपरं तदाहस एव स्मार्त्ताग्निरारम्भेनान्येषामभावे सूतकादिषु समारोप्य तदन्ते तु विहृत्य जुहुयात्स्वयमिति न
याह मनुः प्रत्यूहेनाग्निषु क्रियेति वैश्वदेवस्य त्वग्निसाध्यत्वेपि निवृत्तिः विप्रो दशाहमासीत वैश्वदेवविवर्जित इ
ति संवर्तोक्तेः यद्यपि पंचयज्ञविधानं तु न कुर्यान्मृत्युजन्मनोरिति तेनैवोक्तेः एवं निषेधो व्यर्थः स्यात्तथाप्यापस्तंबादी
नां वैश्वदेवस्य पंचयज्ञभिन्नत्वात्पृथङ्निषेधः हरदत्तेन्यस्याशौचेपि वह्नेश्च वैश्वदेवः कार्यः तस्य ह्यनध्यायो यदा

नि॰ सिं॰ २७९ त्वाशुचिर्ष्पिदेशकृ इति ब्रह्मजज्ञस्यैवाशौचे विशिष्य निषेधात् संध्यादीनामप्यपवादमाहापरार्के पुलस्त्यः संध्यामिष्टिं चरुं
होमं यावज्जीवं समाचरेत् न त्यजेत्सूतके चापि त्यजन्गच्छेदधो द्विजः सूतके मृतके चैव संध्याकर्म समाचरेत् मानसं
सोच्चारयेन्मंत्रान्प्राणायाममृते द्विजः यत्तु चंद्रिकायां जाबालः संध्यां पंचमहायज्ञान्नैत्तिकं स्मृतिकर्म च तन्मध्ये
हापयेत्तेषां दशाहांते पुनः क्रियेति यच्च संवर्त्तः सूतके कर्मणां त्यागः संध्यादीनां विधीयते यच्च विष्णुपुराणे सर्व
कालमुपासीत संध्ययोः पार्थिवेष्यते अन्यत्र सूतकाशौचविभ्रमातुरभीतित इति तन्मूर्णसंध्यापरम् अर्घ्यांतामानं
सी संध्या कुशवारिविवर्जितेति शुद्धिदीपे च्यवनोक्तेः पैठीनसिस्त्वर्घ्यमंत्रोच्चारणमाह सूतके सावित्र्यांजलिं प्रक्षिप्य
सूर्यं ध्यायन्नमस्कुर्यात् भारद्वाजोपि सूतके मृतके कुर्यात्प्राणायाममंत्रकम् तथा मार्जनमंत्रांस्तु मनसोच्चार्य्य
मार्जयेत् गायत्रीं सम्यगुच्चार्य सूर्यायार्घ्यं निवेदयेत् मार्जनं तु न वा कार्य्यमुपस्थानं न चैव हि ग्रहणश्राद्धादावप्याशौ
चापवादमाह व्याघ्रः स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके इति लौगोपि सूतके मृतके चैव न दोषो राहुदर्शने ता
वदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते प्रयोगपारिजाते बृहस्पतिः कन्याविवाहे संक्रांतौ सूतकेन कदाचन बृहच्छा
तातपः यदा भोजनकाले तु अशुचिर्भवति द्विजः भूमौ निक्षिप्य तं ग्रासं स्नात्वा विप्रो विशुध्यति भक्षयित्वा तु तं ग्रा
समहोरात्रेण शुध्यति अशित्वा सर्वमेवान्नं त्रिरात्रेण विशुध्यति इदमविप्रोषात्सूतकादिपरमिति शुद्धितत्त्वे स्मृ
लूपारणे च अथ द्रव्यतः मरीचिः लवणे मधुमांसे च पुष्पमूलफलेषु च शाककाष्ठतृणेष्वप्सु दधिसर्पिःपयः
सु च तिलौषधाजिने चैव पक्वापक्वे स्वयंग्रहः पण्येषु चैव सर्वेषु नाशौचं मृतसूतके स्वयमेव ग्रहात्स्वाम्यनुज्ञया याग्र
हन्नं तद्धस्तादित्यर्थः अयं तु तद्धस्तादपि न दोषः पक्वतैलादि एतदन्नसत्रपरम् अन्नसत्रप्रवृत्तानामाममन्न राम:
मगर्हितम् भुक्त्वा पक्वान्नमेतेषां त्रिरात्रं तु व्रती भवेदित्यंगिरसोक्तेः पक्वान्नं मोदकादि न तु भक्ष्यमद्विशान्मते उ २७९

पक्वं लड्डुकादि

भाभ्यामपरिज्ञाते सूतकं नैव दोषकृत् एकेनापि परिज्ञाते भोक्तुर्दोषमुपावहेत् विवाहोत्सवयज्ञेषु त्वंतरा मृतसूतके परिर
न्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैः भुंजानेषु तु विप्रेषु त्वंतरा मृतसूतके अन्यगेहोदकाचांताः सर्वे ते शुचयः स्मृताः बृहस्प
तिः विवाहोत्सवेत्याद्युक्ता पूर्वसंकल्पितान्नेषु न दोषः परिकीर्तितः षडशीतौ संसर्गाघस्य चाशौचं यस्यातिक्रांतकालता
तदीयस्य पदार्थस्य नाशौचं विद्यते क्वचित् शुद्धितत्त्वे शुद्ध्येदित्यनुवृत्तौ विष्णुः प्रोक्षणेन पुस्तकमिति अथ मृतदोषे हेमा
द्रौ षडशीत्यां तैः कौर्मे च व्यापादयेद्यस्त्वात्मानं स्वयमग्न्युदकादिभिः विहितं तस्य नाशौचं नापि कार्योदकक्रिया शवदर्शन
यावदशौचमस्यैव हतानां नृपगोविप्रैरन्वक्षं चात्मघातिनामिति याज्ञवल्क्योक्तेः शुद्धितत्त्वे कौर्मे सद्यः शौचं समाख्या
तं शापादिमरणे तथा आदिपदादभिचारहतेऽभाविष्ये स्वेच्छया मरणं विप्राः शृंगिदंष्ट्रिसरीसृपैः अत्यंतपज्जविषा
द्बधैरात्मना चैव ताडनैः पाखंडमाश्रिताश्चैव महापातकिनस्तथा स्त्रियश्च व्यभिचारिण्यः आरूढपतितास्तथा नैतेषां
स्नानसंस्कारो न श्राद्धं न सपिंडनम् गौतमः प्रायोनाशकशस्त्राग्निविषोदकोद्बन्धनप्रपतनैश्चेच्छतामिति नाशौचं
मिति शेषः अंगिराः चंडालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मणाम् उदकं पिंडदा
नं च प्रेतेभ्यो यत्प्रदीयते नोपतिष्ठति तत्सर्वमंतरिक्षे विनश्यति षट्त्रिंशन्मतेऽप्येवम् ब्राह्मेऽपि शृंगिदंष्ट्रिनखिव्याल
विषवह्निक्रियाजलैः व्यालोगजः सुदूरात्परिहर्तव्यः कुर्वन् क्रीडां मृतस्तु यः नागानां विप्रियं कुर्वन् हतश्चाप्यथ विद्यु
ता निगृहीतः स्वयं राज्ञा चौर्यदोषेण कुत्रचित् परदारान् हरंतश्च द्वेषात्तत्पतिभिर्हताः असमानैश्च संकीर्णैश्चंडाला
द्यैश्च विग्रहम् कृत्वा तैर्निहतास्तद्वच्चंडालादीन् समाश्रिताः शस्त्राग्निगरदाश्चैव पाखंडाः क्रूरबुद्धयः क्रोधात्प्रायं वि
षं वह्निं शस्त्रमुद्बन्धनं जलम् गिरिवृक्षप्रपातं च ये कुर्वंति नराधमाः कुशिल्पजीविनो ये च सूनोल्लंकारधारिणः
मुखेभगास्तु ये केचित् क्लीबप्राया नपुंसकाः ब्रह्मदंडहता ये च ये चापि ब्राह्मणैर्हताः महापातकिनो ये च पतितास्ते

प्रकीर्त्तिताः पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसंचयः न चाश्रुपातः पिंडो वा कार्य्यं श्राद्धादिकं क्वचित् एतानि पति
तानां तु यः करोति विमोहितः तप्तकृच्छ्रद्वयेनैव तस्य शुद्धिर्न चान्यथा एतद्बुद्धिपूर्वं सर्वं वाकरणं तु माधवीये वशिष्ठः
य आत्मत्यागिनां कुर्यात्स्नेहात्प्रेतक्रियां द्विजः स तप्तकृच्छ्रसहितं चरेच्चान्द्रायणव्रतम् अज्ञानेन तु कृत्वाग्निमुदकं
स्नानं स्पर्शनं वहनं कथम् रज्जुच्छेदाश्रुपातं च तप्तकृच्छ्रेण शुध्यतीति त्रयम् प्रत्येकं बुद्धिपूर्वं एतदिति मदनपारिजा
तः प्रत्येकं तु स्पर्शमात्रेण मिताक्षरायाम् तत्क्षयके वलं स्पृष्ट्वा मश्रु चापतितं यदि पूर्वोक्तानामेककारी चेदेकरात्रमभो
जनम् एकरात्रं तु नाश्नीयाद्रिरात्रं बुद्धिपूर्वकमिति माधवीये उत्तरार्द्धम् अन्येषु तु सवर्णैः एषामन्यतमं प्रेतं यो व
हेत दहेत वा कटोदकक्रियां कृत्वा कृच्छ्रं सान्तपनं चरेत् अज्ञानेनेदं मेतदनाहिताग्नेः आहिताग्नेः कृच्छ्रएवेति मा
धवमिताक्षरायाम् आत्मनस्त्यागिनां नास्ति पतितानां तथा क्रिया तेषामपि तथा गंगातोये संस्थापनं हितम्
आहिताग्नेस्तु विशेषो हेमाद्रौ भविष्ये वेतानं प्रक्षिपेदप्सु आवसथ्यं चतुष्पथे पात्राणि तु दहेदग्नौ साग्निके
पापकर्मणि छंदोगपरिशिष्टेपि महापातकसंयुक्तो दैवात्स्यादग्निमान्यदि पुत्रादिः पालयेदग्नीन्युक्तश्चा
दोषसंक्षयात् प्रायश्चित्तं न कुर्याच्चेत्कुर्वन्वा म्रियते यदि गृह्यं निर्वापयेच्छ्रौतमप्स्वस्येत्तत्परिच्छदम् पात्राणि द
हेद्वा प्रायदहेदप्स्वेव वा क्षिपेत् माधवीये पराशरः आहिताग्निर्मृतो विप्रश्चंडालेनात्मघातकैः दहनं ब्राह्म
णं विप्रो लौकाग्नौ मंत्रवर्जितम् प्राजापत्यं चरेत्पश्चाद्विप्राणामनुशासनात् दग्ध्वास्थीनि पुनर्गृह्य क्षीरेण
क्षालयेत्ततः स्वेनाग्निना स्वमंत्रेण पृथगेनं पुनर्दहेत् हेमाद्रौ तु दाहयित्वा शवं तेषां शरद्दूरं विधिपूर्वकमित्यु
क्तः एतदघादिनामकरणं ज्ञेयम् प्रमादमरणे त्वाशौचादिकं भवत्येव तदाहांगिरसः अथ कश्चित्प्रमादेन म्रि
यतेग्न्युदकादिभिः तस्याशौचं विधातव्यं कर्त्तव्या चोदकक्रिया ब्राह्मणोपि प्रमादादपि नः शाकस्त्वकस्माद्विधि

वोदितः शृंगिदंष्ट्रिनखिव्यालविषविद्युज्जलादिभिः चंडालैरथवा चौरैर्निहतो वापि कुत्रचित् तस्य दाहादिकं कार्यं यस्मा
त्पतितस्तु सहुति प्रमादमरणे त्रिरात्रमाशौचमिति गौडाः अज्ञितत्वादयः दशाहादीति दाक्षिणात्याः अस्यापवा
दो हेमाद्रौ भविष्ये प्रमादादिच्छया चापि न कुर्यात्स्पर्शनं मृतम् नागपूजां विना न कुर्यादित्यर्थः बौधायनोपि बुद्धिपू
र्वं निहत्य रणं क्रियालोपो विधीयते क्रियान्त्यकर्म तत्र दुर्मरणनिमित्तं दानादि कार्यम् तच्च विश्वप्रकाशगदाधरा
नात्पर्ये च व्याघ्रेण निहते विप्रे विप्रकन्यां विवाहयेत् सर्पदष्टे नागबलिर्ज्ञेयः सर्पश्च कांचनः चतुर्निष्कमितो हैम
गजं दद्याद्गजेहते शृङ्गाविनिहते दद्यात्पुरुषं तु हिरण्मयम् चौरेण निहते धेनुं वैरिणा निहते वृषम् वृकेण निह
ते दद्याद्यथाशक्त्या च काञ्चनम् शय्यामृते प्रदातव्या शय्यातूलीसमन्विता निष्कमात्रसुवर्णस्य विष्णुना समधिष्ठि
ता शौचहीने मृते चैव द्विनिष्कं स्वर्णजं हरिम् संस्कारहीने च मृते कुमारमुपनाययेत् निष्कत्रयस्वर्णमिदं दद्यात्स्वे
च्छयाहते भूतानाहते क्षेत्रपालस्य प्रतिमां निजशक्तितः शूकरेण हते दद्यान्महिषं दक्षिणान्वितम् कृमिभिश्च मृते दद्या
द्गोधूमांश्च खारिकाः वृक्षे वृक्षहते दद्यात्सौवर्णं वस्त्रसंयुतम् शृंगिणा निहते दद्याद्वृषभं वस्त्रसंयुतम् शक
टेन हते दद्याद्व्यसोपस्करान्वितम् भृगुपाते मृते चैव प्रदद्याद्धान्यपर्वतम् अग्निना निहते कार्यमुदपानं स्वशक्ति
तः दारुणा निहते चैव कर्तव्या सदने सभा शस्त्रेण निहते दद्यान्महिषीं दक्षिणान्विताम् अश्मना निहते दद्यात्स
वत्सां गां पयस्विनीम् विषेण च मृते दद्यान्मेदिनीं हेमनिर्मिताम् उद्बन्धनेन च मृते कपिकं कनकनिर्मितम् मृते
जलेन वरुणं हैमं दद्याद्धि निषक्रजम् विषूचिकामृते स्वादु भोजयेच्च शतं द्विजान् घृतधेनुः प्रदातव्या कण्ठान्नक
वलेमृते कासरोगेण च मृते अष्टकृच्छ्रव्रतं चरेत् अतिसारमृते लक्षं गायत्र्याः प्रयतो जपेत् शाकिन्यादिग्रहग्र
स्ते जपेद्रुद्रं यथोदितम् विद्युत्पातेन निहते विद्यादानं समाचरेत् अन्तरिक्षमृते कार्यं वेदपारायणं तथा सच्छ

स्वपुस्तकं दद्यादस्पृश्यस्पर्शनोऽस्मृते पतिते च मृते कुर्यात्प्राजापत्यांस्तु षोडश मृते चापत्यरहिते कृच्छ्राणां नवतिं
चरेत् एवं कृते विधानेन तु विदध्यादौर्ध्वदेहिकम् तथा वैधमरणेऽपि न दोषः तदाहतुर्मनुवृद्धगार्ग्यौ वृद्धः शौचस्मृ
तेर्लुप्तः प्रत्याख्यातभिषक्क्रियः आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसंच
यः तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमाचरेदिति हेमाद्रौ विष्णुधर्मेऽपि नरस्तु व्याधिरहितो न त्यजेदात्मनस्तनुम् असू
र्या नाम ये लोका अन्धेन तमसावृताः तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः अरिष्टैरात्मनो ज्ञात्वा मृत्युकाल
मुपस्थितम् व्याधितोऽभिभवजात्यक्तः शरीरं वायुभिश्चात्मनः यथायुगानुसारेण सन्त्यजेदात्मनस्तनुम् तस्मिन्काले
तनुत्यागाद्धर्मेष्टफलमाप्नुयात् आयुषस्तु परार्द्धे मरणं ब्राह्मणस्य च नैतिरगोऽनामपपाठः उत्तरार्द्धे संगतः
क्षत्रियस्य तु संग्रामे मृते भर्तृनियोजितः अपरार्के ब्रह्मगर्भः योजीवितुमशक्नोति महाव्याध्युपपीडितः सोऽग्न्युदके
महायात्रां कुर्वन्नात्र प्रदुष्यति अत्रोक्तवक्ष्यमाणवचनानि चयात्प्रयागातिरिक्तेऽचिकित्स्यरोगाद्युपहतानामधिका
रः सोऽपि जीर्णवान्प्रस्थस्यैवेति विज्ञानेश्वरदेवयाज्ञिकादयः अत एव मिताक्षरादौ भृग्वपातानशनादिकं ब्राह्म
णप्रस्थस्यैवोक्तम् मनुरपि आसां महर्षिचर्याणां त्यक्त्वान्यतमया तनुम् वीतशोकभयो विप्रो ब्रह्मभूयाय कल्प
त इति तेनान्यत्रापि तद्विषये वा मूल्यैकोनात् तेन यतेर्नाधिकारः काम्यनाधिकाराच्च नैमित्तिकत्वे त्वकरणे दोषो
नित्यता च स्यात् प्रयागे च रोगिणां च यत्तु शूद्राश्च क्षत्रिया वैश्याश्चान्त्यजाश्च तथाधमाः एते त्यजेयुः प्राणांश्चैव
जयित्वा द्विजं नृप पतित्वा ब्राह्मणस्तत्र ब्रह्महा चात्महा भवेदिति तन्निर्मूलम् त्वचिंत्यमेव प्रक्रमानुपपत्तेश्चेति मद
गुपानमात्रपरमुक्तं ब्राह्मणस्याप्यनुज्ञानमिति वक्ष्यमाणविरोधाच्च यत्त्वादित्यपुराणे अब्राह्मणो वा स्वर्गादि रामः
महाफलजिगीषया प्रविशेज्ज्वलनं तोयं कुर्यादनशनं तथेति तत्प्रयागातिरिक्तपरमिति केचित् हेमाद्रौ त्वेतदग्रे २०१

नरणमथनारीणांसर्ववर्णेषुसर्वदा । ईदृशंमरणंयेषांजीवानांकुत्रचिद्भवेत् । एतेषामधिकारस्तुसर्वेषांसर्वजंतुषु ४

प्रयागवटशाखायाम्आदित्युक्तेब्राह्मणस्यप्रयागेपिनेतिप्रतीयतेमाधवीयेपराशरेचादित्यपुराणे दुश्चिकित्स्यैर्महारोगैःपीडितस्तु
पुमानपि प्रविशेज्ज्वलनंदीप्तंकरोत्यनशनंतथा अगाधतोयराशिंवंभृगोःपतनमेवच गच्छेन्महापथंचापितुषाराद्रिमाद
मादरात् प्रयागवटशाखाग्रादेहत्यागंकरोतिच स्वयंदेहविनाशस्यकालेप्राप्तेमहामतिः उत्तमान्प्राप्नुयाल्लोकान्नात्मघा
तीभवेत्क्वचित् एतेषामधिकारस्तुसर्वेषांसर्वजंतुषु आग्नेयेचस्याच्यहतेषांवज्रानलहतेतथा वाराणस्यांम्रियेघस्तु
प्रत्याख्यातभिषक्क्रियः काष्ठपाषाणमध्यस्थोजाह्नवीजलमध्यगः अविमुक्तोन्मुखस्तस्यकर्णेमूलगतोहरः प्रण
वंतारकंब्रूतेनान्यथाकुत्रचित्क्वचित् हेमाद्रौचैवम् अत्रप्राप्तकालेकृत्स्नोरप्राप्नमरणकालायाश्चियाश्चन्वारोहणेसंघ
र्णमेवाशौचम् पृथ्वीचन्द्रस्त्वत्रापिस्मृहमाह ग्राहितत्वादिगौडग्रंथेष्वप्येवम् एतच्चवृद्धादिमरणम् कलौनिषिद्धम्
भृग्वग्निपतनैश्चैववृद्धादिमरणंतथेतिमाधवेनपृथ्वीचन्द्रेणचकलिवर्ज्येषूक्तेः नचत्रयावदुक्तोनिषेधः विशिष्टा
दृष्टोवाक्यभेदात् नचकलौवानप्रस्थाश्रमनिषेधादेवसिद्धेमरणनिषेधोव्यर्थइतिवाच्यम् सर्ववर्णेष्वित्यादिभिस्त
द्भिन्नस्यापिप्राप्तेः काम्यमभवत्येव येवेतच्चाविसृजतीतिस्मृतेनचैयस्वाभाविकंमृत्युपराधीनपरान्तेः मात्स्यभारता
दिषु नलोकवचनात्तातनवेदवचनादपि मतिरुत्क्रमणीयातेप्रयागमरणंप्रतीत्युक्तेः अतएवविद्वत्सुधर्मेरोग्या
दिमरणमुक्तोक्तम् यथायुगानुसारेणसंत्यजेदात्मनस्तनुमिति काश्यामप्युक्तंमात्स्ये अग्निप्रवेशंयेकुर्युरवि
मुक्तेविधानतः प्रविशंतिमुखंतेमेनिःसंदग्धंवदनेनेति हेमाद्रौविवस्वान् सर्वेन्द्रियवियुक्तस्यस्वव्यापाराक्षमस्यच
प्रायश्चित्तमनुज्ञातमग्निपातोमहापथः धर्माज्ञेनासमर्थस्यकर्तुःपापांकितस्यच ब्राह्मणस्यापिनुज्ञातंतीर्थेप्राणा
विमोक्षणम् अपरार्केचैवम् सहगमनंकलौभवत्येव कलौनान्यागतिःस्त्रीणांसहानुगमनाहते इतिब्रह्मवैवर्ता
त् एतेनमरणांतिकप्रायश्चित्तंकोशीखण्डादौचानुवर्णपस्यतत्तत्त्यागविधयश्चव्याख्याताःपराश्वप्रयागेपित्रिस्थलीं

नि॰सिं॰ २८२ सेतोस्कंदे यथाकथंचित्तीर्थेस्मिन्प्राणत्यागं करोति यः। तस्यात्मघातदोषो न प्राप्नुयादीप्सितान्यपि पाद्मे विष्णुः देहत्या
गं तथा वीराः कुर्वन्ति मम सन्निधौ मत्तनुं प्रविशन्त्येव न पुनर्जन्मनो नराः कौर्मे व्याधितो यदि वा दीनः क्रुद्धो वापि भवे
न्नरः गंगायमुनमासाद्य यस्तु प्राणान्परित्यजेत् ईप्सितांल्लभते कामान्वदंति मुनिपुंगवाः तथा या गतिर्योगयुक्त
स्य सत्वस्थस्य मनीषिणः सा गतिस्त्यजतः प्राणान् गंगायमुनसंगमे वाराहे तत्र यो मुंचति प्राणान्वटमूले तु सु
दरि सर्वलोकानतिक्रम्य मम लोकं प्रपद्यते तथा अकामो वा सकामो वा वटमूले तु सुंदरि शीघ्रं प्राणान्प्रमुंचेत य
दीच्छेत्परमां गतिम् तथा पंचयोजनविस्तीर्णे प्रयागस्य तु मंडले. मृतानां तु पुरुषान्सप्त भविष्यांश्च चतुर्दश नरस्ता
रयेत्ते सर्वान्यस्तु प्राणान्परित्यजेत् ब्राह्मे ध्यात्वा विष्णुपदांभोजं प्रयागे विष्णुतत्परः तनुं त्यजति वै मानवस्तस्य मुक्ति
र्न संशयः दुष्कृतोपि दुराचारो ब्रह्महत्यादिपातकी हरिं ध्यात्वा त्यजेद्देहं प्रायश्चो मुक्तिमाप्नुयात् भविष्योत्तरे समाः स
हस्राणि तु सप्त वै जलदर्शके मग्नो पतनेन च षोडश महाहवे षष्ठिरशीतिर्गोगृहे अनाशके भारत चाक्षया गतिरिति
सामान्यतोपि फलम् एवमन्यो विधयो ज्ञेयाः यत्तु गौडाः प्रयागादिमरणं ब्राह्मणभिन्नविषयमित्याहुस्तद्दूषणम्
पितामहचरणैः प्रयागविधौ कृतमिति नात्रोच्यते अत्र दशाहमाशौचम् त्रिरात्रस्य प्राप्तकालगोचरत्वादिति म
नुः युक्तं तु त्रिरात्रम् दिवोदासीयेप्येवम् शुद्धितत्त्वेपि काश्यपः अनशनमृतानामग्निहतानामग्निजलप्रविष्टानां भृ
गुसंग्रामदेशांतरमृतानां जातदंतानां च त्रिरात्रमिति एवं मरणान्ते प्रायश्चित्ते पूर्वोक्तस्वात्महादेहदाहशौचादिति
बध्यस्तदानीमेव वत्सरान्ते तु सर्वमौर्ध्वदेहिकं कुर्यात् गोब्राह्मणहतानां च पतितानां तथैव च ऊर्ध्वं संवत्सरात्कुर्या
त्सर्वमेवौर्ध्वदेहिकमिति हेमाद्रौ षट्त्रिंशन्मतात् एवं म्लेच्छीकृतानामपि गयाश्राद्धमपि कार्यम् ब्रह्महा च कृतघ्नश्च गो राम: २८२
घाती पंचपातकः सर्वे ते निष्कृतिं यांति गयायां पिंडपातनात् इत्यग्निपुराणात् ब्राह्मे पित्रियते पतितानां तु गते संवत्स
रे क्वचित् देशधर्मप्रमाणत्वादत्या कूपेष्वथ बंधुभिः मार्कंडपादमूले वा आश्रो हरिहरौ स्मरन् स्वयं पदत्तपणः तत्र वर्षी

मप्येकृत्यमुक्तमपरार्के वायुपुराणे शुक्लपक्षे तु द्वादश्यां कुर्याच्छ्राद्धं तु वत्सरम् द्वादशाहानि वा कुर्यात्स्नुस्ने च प्रथमेऽहनि छा
गलेयः नारायणबलिः कार्यो लोकगर्हाभयान्नरैः तथा तेषां भवेच्छौचं नान्यथेत्यब्रवीद्यमः व्यासः नारायणं समु
द्दिश्य शिवं वा यत्प्रदीयते तस्य शुद्धिकरं कर्म तद्भवेन्न तदन्यथेति स चात्मघातादिप्रायश्चित्तं कृत्वा कार्यः तदुक्तं हेमाद्रौ
षड्विंशन्मते कृत्वा चान्द्रायणं पूर्वं क्रियाः कार्या यथाविधि नारायणबलिः कार्यो लोकगर्हाभयान्नरैः पिण्डोदकक्रियाः
पश्चाद्वृषोत्सर्गादिकं च यत् एकोद्दिष्टानि कुर्वीत सपिण्डीकरणं तथा दिवोदासीये कूष्माण्डपस्तु पतिते च मृते तस्य प
जापत्या सुषोडश मृते चापत्यरहिते कृच्छ्रं शान्तवतिं चरेदित्याह इदं प्रायश्चित्तं हि पित्रादिविषयम् इन्द्रियैः परित्यक्ता
यच मृतानि वादिनः वा तयन्ति स्वमात्मानं चण्डालादिहताश्च ये तेषां पुत्राश्च पौत्राश्च दयया समभिप्लुताः यथा श्राद्धं प्रतन्व
न्ति विष्णुना मप्रतिष्ठितम् तथा तेषं प्रवक्ष्यामि नमस्कृत्य स्वयंभुवे इति हेमाद्रौ तेनैवोक्तेः तत्रैव बौधायनेनापि नारायण
बलिर्व्याख्यास्यामो भिक्षुस्तपतितपुराणमात्मत्यागिनां ब्राह्मणहतानां च द्वादशवर्षाणि रात्रौ शिवा कुर्वीतेति गृह्यपरिशि
ष्टेतु चण्डालादिना युक्तो दग्धा शरीरं प्रेतस्य संस्थाप्यास्थीनि यत्नतः प्रायश्चित्तं तु कर्तव्यं पुत्रैश्चान्द्रायणत्रयमित्यु त ६
क्तौ मे स्मृतिरत्नावल्यां तु द्विगुणं प्रायश्चित्तं कृत्वा वा गयप्यद्वात्सर्वं कार्यमित्युक्तम् आत्मनोवाभ्युदर्थं च रेच्चान्द्रायण
द्वयम् तप्तकृच्छ्रं चतुष्कं च त्रिरात्रं कृच्छ्रमेव वा पुनः अर्वाक्संवत्सरात्कुर्याद्दहनादि यथोदितम् कृत्वा नारायणबलिं
मनित्यत्वात्तदायुषद्वृति इदं चात्मवधनिमित्तं तज्जातिवधप्रायश्चित्तेन समुचितं कार्यम् अतएव बौधायनेनोक्तम्
द्वादशवर्षाणि रात्रौ वेति मदनपारिजाते स्मृत्यर्थसारे ब्रह्महादीनां तद्योग्यप्रायश्चित्तं कृत्वा नारायणबलिः कार्य इ
ता ३ त्युक्तम् एवं म्लेच्छीकृतानामपि यत्तु कश्चिदाह पुत्रकृतेन प्रायश्चित्तेन पितुः पापनाशो मानाभावः आत्मघाते तु
वचनादस्तु महापातके तु कथं स्यादिति स स्वयमेवात्मवधप्रायश्चित्तस्य जातिवधनिमित्तेन समुच्चयं वदन्हृदय
मदनरत्नेऽत्राह्लोऽप्रमादादपि निःशंकः स्वकस्माद्विधिचोदितः चंडालैर्भूमिपालैश्चौरैर्निहतोऽथ कश्चित् तस्य दाहादिकं कार्यं यस्मान्न पतितस्तु सः चान्द्रायणं तप्तकृच्छ्रं द्वयं तस्य वि
शुद्धये यतःकृच्छ्रत्रयं च दशाक्रूत्वा तु विधिना दहेत बुद्धिपूर्वं मृतानां तु त्रिरात्रं कृच्छ्रसमाचरेदित्युक्तम् ६

ही२ रु१

ति॰सिं॰ इत्यपव नहिज्ञातिव [illegible]
२८३ घनिमित्तं पुत्रैः कार्य्यमितिवचनमस्ति पुत्रकर्त्तृकसर्वप्रायश्चित्तादिविप्लवापत्तेः प्रागुक्तबौधायनवचनाच्चेति दि
क इदंप्रायश्चित्तार्हाणामेव प्रायश्चित्तानर्हाणां तु पतितोदकमात्रंकार्य्यमितिकेचित् मदनपारिजातादिस्वरसोप्ये
वम् वस्तुतस्तु तदर्हानर्हयोर्वचनेनैवोपादानादविशेषात्तेननारायणवलिर्गयाश्राद्धंचेतियुक्तम् पतितोदकविधिस्तु
पित्रोर्घातिरिक्तविषयइत्यपरे सर्वथा हेमाद्रौव्राह्मे पतितस्यतुकारुण्यात्प्राघस्त्वभिकर्त्तुमिच्छति सहिदासींसमाहू
यसर्वगोत्रदत्तचेतनाम् अशुद्धघटहस्तांतुयथावज्जब्रवीत्यपि याहेदासिगच्छमूल्येनतिलानानयसत्वरम् तोयं
पूर्णंघटंचेमंसतिलंदक्षिणामुखी उपविश्यतुवामेनचरणेनततःक्षिप "कीर्त्तयेत्स्नातकिन्संज्ञात्वपिवेतिमुहुर्मु
हुःनिशम्यतस्यवाक्यंसोलब्धमूल्याकरोतितत् एवंकृतेभवेत्तृप्तिःपतितानांनचान्यथेति इदंचमृताहेकार्य्यम्
पतितस्यदासीमृताह्नियदाघटमपवर्जयेदेतावतायमुच्यरितोभवतीतिमदनरत्नेविष्णूक्तेः इदंचात्मत्यागिविषय
म् आत्मत्यागिनःपतितास्तेनाशौचोदकभाजः स्युरित्युपक्रम्यविष्णुनाएतस्याभिधानादितिगौडाः यत्तुकश्चिदा
ह यःपतितोघटस्फोटेनवांधवैर्वहिःकृतस्तद्विषयाणिक्रियानिषेधवाक्यानि जीवत्येवतस्मिन्तत्यकर्मणःकृत
त्वात्पुनःकारणाभावादितिसंबंधत्यागेनजातवैराग्यस्यकृतप्रायश्चित्तस्याप्यकरणापत्तेर्मिताक्षरादिविरोध
मपश्यन्मूर्खैरिदमुपेक्षणीयः नचकृतघटस्फोटस्यसंग्रहविधिर्नेतिवाच्यम् मनुनाकृतघटस्फोटस्यत्यागमुक्त्वा
प्रायश्चित्तेतुचरितेपूर्णंकुंभमपानवम् तेनैवसार्द्धंप्रास्येयुःस्नात्वापुण्येजलाशयेइत्युक्तेः अन्यथाप्रायश्चित्त
मात्रेएतत्प्रसंगात्पतितोघटस्फोटेनवहिःकृतस्यापिपित्रादेरव्दांतेनारायणवलिः निषेधास्तुपितृव्यादिपराइति राम:
तत्त्वम् केचित्तुनारायणवलौकृतेप्यवसकमिसपिंडनवर्जंकार्यं गोब्राह्मणहतानांचपतितानांतथैवच मुक्त्वा २८३

माञ्चप्रमीतानां नैव कार्या सपिंडनेति वचनात् ब्राह्मणादिहते तातेपतिते संगवर्जिते इति श्राद्धप्रकाशो केचन्नपाकुः ते हेम
द्रिस्यपूर्वोक्तपद्धतिरन्यतविरोधान्निर्मूलत्वाच्छ्राद्धप्रकारस्यच वद्धि श्राद्धविषयत्वाच्चोपेक्ष्याः नारायणबलिस्तु हेमाद्र्या
द्यनुसारेण च्युते तत्रादौ क्रियानिबंधे गारुडतर्प्पणमुक्तम् कार्य्यपुरुषसूक्तेन मन्त्रैर्वा वैष्णवैरपि दक्षिणाभिमुखो
भूत्वा प्रेतं विष्णुमिति स्मरन् अनादिनिधनो देवः शंखचक्रगदाधरः अव्ययः पुण्डरीकाक्ष प्रेतमोक्षप्रदो भवेति मुक्त्वा
यां कृष्णायां एकादश्यां विष्णुं यमं शिवं ब्राह्मणं प्रेतं पंचकुंभेषु विष्णुः स्वर्णमयः कार्य्यो रुद्रस्ताम्रमयस्तथा ब्रह्मा रूप्यम
यस्तत्र यमो लोहमयो भवेत् प्रेतो दर्भमयः कार्य्य इति गारुडोक्तासु प्रतिमासु षोडशोपचारैः पुरुषसूक्तेनाभ्यर्च्याग्रे दक्षि
णाग्रदर्भेषु विष्णुरूपप्रेतं स्मरन् नामगोत्राभ्यां मधुघृतप्लुतान् दश पिंडान् यज्ञोपवीत्येव दत्वाभ्यर्च्य नद्यां क्षिप्त्वा पुन
र्विष्णुपरमेपूज्य रात्रौ नववस्त्रप्रपंचवाविप्रान्निमंत्र्यापापावितः स्वोभूते पुनर्विष्णुयमसंपूज्यैकोद्दिष्टविधिना विष्णुयमप्रे
तान्स्मरन्नविप्रानुपवेश्य प्रेतस्थाने चैकं विष्णुं स्मरन्पाद्यावाहनार्घ्ययुतेन त्रिप्रश्नांतं कृत्वोल्लेखनादि कृत्वान्नशेषेण
विष्णवे ब्रह्मणे शिवाय यमाय सपरिवाराय चतुरः पिंडान्दत्वा प्रेतनामगोत्रं स्मृत्वा विष्णुनाम्ना पंचमं दत्वाभ्यर्च्याचांते
ष्वोदक्षिणां दत्वैकं प्रेतं स्मृत्वा विशेषः संतोष्य विप्रैः प्रेताय सतिलमुदकं दापयित्वा भुंजीतेति अत्र विशेषांतरं मदू
नांत्येष्टिपद्धतौ ज्ञेयम् सर्प्पहते तु वर्षपर्य्यंतं पूर्वाह्णे कभक्तं पर्व भुक्तं पंचम्यामुपवासेन नक्तं वा कृत्वा पिष्टमयं नागं मन
न्तवासुकिशंखपद्मकंबलकर्कोटकाश्वतरधृतराष्ट्रशंखपालकालियतक्षकपिंगलेति नामभिः प्रतिमासं पूजयन् पायसेन वि
प्रान्संभोज्य वत्सरांते हेमं नागं गां च दत्वा नारायणबलिं कुर्यात् मूलं तु हेमाद्रौ ज्ञेयं बोधायनः सर्प्पहतानां नमोस्तु
सर्प्पेभ्य इति तिस्रश्चाहुतीर्जुहुचोदकं मृतानां समुद्रायवपनायेतिकृत्वेति क्रियां कुर्यादिति शेषः व्यासः मारब्धैन्नना
गकुलं यथेव गम्यम् आसाद्य दत्वा विधिवत्पितृणां रागमाप्नवान् हेमाद्रौ भविष्ये पंचम्यां पन्नगं हेमंस्वर्णं नैकेन कारयेत्
श्रीराज्यपाप्यस्य प्रपूज्य विप्राय दापयेत् प्रायश्चित्तमिदं प्रोक्तं नागदष्टस्य शंभुनेति अपरार्के स्मृत्यंतरे नदेवमुद्धृति

स्प १

नि॰सिं॰
२८४

प्रेतोनारायणबलौकृते योददातिक्रियापिंडंतस्मैप्रेतायवैसुतः तस्यैवाशौचमुद्दिष्टंत्र्यहमेवनसंशयः विष्णुरप्याहुस
मात्रात्तुत्र्यादशाहादिनत्र्यहम् आशौचंचपिंडदःकुर्यान्नतुतत्सगोत्रजाः यस्त्वेवमनुकालेनबुद्धिच्छिन्नासंततिर्भवेत्
सवसेन्तरकेन्नित्यपकसग्रहःकरीयथेत्युपक्रम्य वलिनारायणंकुर्यात्तस्योद्देशेनभक्तिमान् इतिगारुडोक्तेरश्वत्रस्या
पिपत्स्याप्येःकार्य्यमित्युक्तदेवजातिकेन अत्रविधानादाशौचाभावः यथायतिषुहंसादिषु त्र्याणामाश्रमाणा
चकुर्याद्दाहादिकाःक्रियाः यतेःकिंचिन्नकर्त्तव्यंनचान्योवाकरोतिसः इतिप्राग्लात् उशना एकोद्दिष्टंनकुर्वीतयती
नांचैवसर्वदा अहन्येकादशेप्राप्तेपार्वणंतुविधीयते सपिण्डीकरणंतेषांनकर्त्तव्यंसुतादिभिः त्रिदंडग्रहणादे
वप्रेतत्वंनैवजायते तत्प्रकारंवक्ष्यामः दत्तात्रेयः एकोद्दिष्टंजलंपिंडमाशौचंप्रेतसत्क्रियाम् नकुर्याद्वार्षिकादन्य
द्ब्रह्मीभूतायभिक्षवे वार्षिकादितिपूर्वभाविमासिकादिनिषेधोनतुदर्शादेः सन्यासिनाप्याब्दिकादिपुत्रैःकुर्याद्यथा
विधीतिवायवीयोक्तेः पृथ्वीचंद्रोदयेप्रजापतिः अहन्येकादशेप्राप्तेपार्वणंतुविधीयते सपिंडीकरणंतस्यनकर्त्तव्यं
सुतादिभिः एकुसपिंडनादिनिषेधानुवादेनपार्वणोक्तेः तस्यानापन्नत्वंचपार्वणस्यगम्यते नगिरोगिरेतिब्रूयाद
रेकृत्वौज्यमितिवत् इदंवार्षिकादिविधानंत्रिदंडिनामेवएकदंडिपरमहंसादीनांतुनकिमपिकार्य्यम् पूर्वोक्तो
ज्ञानोवाक्येत्रिदंडिग्रहणादितिशूलपाणपादयोगौडाः त्रिदंडिशब्देनमनोदंडादिदंडत्रयोक्तेः यस्यैतेनियताद
डःसत्रिदंडीतिचोच्यते इतिस्मृतेर्बौधायनः नारायणबलिश्चास्यकर्त्तव्याद्वादशेहनि अस्यपार्वणेनसमुच्चयो
त्रयः तेचसएवाह कृत्वाविष्णोर्महापूजांपायसंविनिवेदयेत् अग्नौहुत्वातुतच्छेषंव्याहृतीभिःसमाहितः यती
नरण्हस्यान्साधयित्वानिमंत्र्यद्वादशावरान् अभ्यर्च्यगंधपुष्पाद्यैर्मन्त्रैर्द्वादशनामभिः संभोज्यहव्येनान्नेनद
क्षिणांचनिवेदयेत् त्रयोदशाह्निजम्रेष्ठमात्मसंत्यजतेंद्रियम् विष्णुर्यथातथाभ्यर्च्यपाद्याद्यैश्चविधानतः दं

रामः
२८४

घात्पुरुषसूक्तेन गंधपुष्पादिकं क्रमात् वस्त्रालंकरणादीनां यथाशक्ति प्रदापयेत् उच्छिष्टसन्निधौ तस्य दर्भानास्तीर्य भू
तले भूर्भुवःस्वः स्वधा प्रोक्तेन स्नेद घाद्यलित्रयम् अश्वमेधसहस्रस्य वाजपेयशतस्य च यत्फलं तल्लभेदेवं यः करोति य
तिक्रियाम् शौनकस्तु शौनकोऽहं प्रवक्ष्यामि नारायणवलिं परम् चंडालादुदकात्सर्पाद्ब्राह्मणाद्दैवतादपि दंष्ट्रिभ्यश्च पशु
भ्यश्च रज्जुशस्त्रविषाग्निभिः देशान्तरमृतानां च मृतानां वात्यसाधने: जीवच्छ्राद्धमृतानां च कनिष्ठानां तथैव च जतीनां या
गिनां पुंसामन्येषां मोक्षकांक्षिणाम् पुराणापायाघक्षरणीयद्वादशेऽह्नि कारयेत् द्वादश्यां श्रवणे ऋक्षे पंचम्यां पूर्वरणेस्तु
वति उल्काप्रवीक्तेः सर्वं विधिमुक्त्वाऽतो देवेति वह्निः पुरुषसूक्तेन च प्रत्यर्चं पायसं हुत्वा केशवादिद्वादशनामभिस्तद्वपि
णपित्रे द्वादश विप्रान्सम्भोज्य तैरेव द्वादश पिण्डान्दद्यादित्यधिकमाह पुरुषसूक्तेनेति प्रायुक्तम् कृतजीवच्छ्राद्धमृते सपिंडेऽ
शौचादिकार्यम् नवाक्तं हेमाद्रौ लैंगे मृते कुर्यान्न कुर्याद्वा जीवन्मुक्तो यतः स्वयम् कालं गते द्विजे भूमौ खनेद्वापि द
हेद्वा पुत्रकृत्यमशेषं च कृत्वा दोषो न विद्यते जीवत्पापविशेषस्तत्रैवोक्तः नित्यनैमित्तिकं यत्तु कुर्याद्वा संत्यजेत वा
बांधवोऽपि मृते तस्य नैवाशौचं विधीयते सूतकं च न संदेहः स्नानमात्रेण शुद्ध्यति एतद्योगिविषयमयोगमार्गरतोपि
वति तस्याप्युक्तेः तथाहिताग्नेः प्रोषिते मृते तदस्थिदाहात्पूर्वं पुत्रादीनामाशौचं संध्यादिकर्मलोपश्च नास्ति अनग्निमत
उत्क्रान्ते राशौचादि द्विजातिषु दाहादग्निमतो विद्याद्विदेशस्थे मृते सतीति स्मृतेः आहिताग्नेर्दाहादपि दशाहः संस्कार
गं दशाह इति धूर्तस्वामीरामाण्डारश्चनाहितम् मूलैक्याद्वचोविरोधाच्च एतत्प्रायुक्तम् अत्र देहस्यैव सम्भवे दाहः आहि
ताग्नेर्विदेशस्थे मृते सति कलेवरम् निधेयं नाग्निभिर्यावत्तदीयैरपि दह्यते इति ब्राह्मोक्तेः तदभावे छन्दोगपरिशिष्टे
विदेशमरणेऽस्थीनि आहृत्याभ्यज्य सर्पिषा दाहयेद्वर्हिषाच्छाद्य पात्रन्यासादिपूर्ववत् अस्थ्नामलाभे पर्णानि शु
क्लान्युक्तेयावता दाहयेदस्थिसंख्यानि ततः प्रभृति सूतकम् हेमाद्रौ षड्त्रिंशन्मते कुर्याद्दर्भमयं प्रेतं दर्भैस्त्रिशत
षष्ठिभिः पालाशीभिः समिद्भिर्वा संख्या चैवं प्रकीर्तिता भविष्ये चत्वारिंशच्छिरःस्थाने ग्रीवायां च दशैव तु बाहौ

नि॰ सिं॰ २८५ ग्रीवायां दद्यात् विंशतिं च तथोरसि उदरे विंशतिं दद्यात् त्रिंशतं कटिदेशयोः ऊर्वोश्चैव शतं दद्यात् त्रिंशतं जानुजंघयोः
पादांगुलीषु दश वै एषा च प्रेतकल्पना मदनरत्ने जैत्रपार्श्वः शिरस्यशीत्यर्द्धं दद्यात् ग्रीवायां तु दशैव तु बाह्वोश्चैकश
तं दद्याद्दश चैवांगुलीषु च उरसि त्रिंशतं दद्यात् विंशतिं जठरोदरे द्वादशार्द्धं वृषणयोरष्टार्द्धं शिश्न एव तु ऊर्वोश्चैक
शतं दद्यात् त्रिंशतं जंघयोर्द्वयोः पादांगुलीषु षड् दद्यादेतत्प्रेतस्य कल्पनम् मस्तके नारिकेरं तु अलाबुं तालुके पंचर
त्नं मुखे न्यस्य जिह्वायां कदलीफलम् चक्षुषोस्तु कपर्दौ द्वौ नासिकायां तु कोलकम् कर्णयोर्ब्रह्मपत्राणि केशे वटप्र
रोहकाः नालकं कमलानां तु न्यस्त्वा स्थाने विनिक्षिपेत् मृत्तिकां तु वसाधातौ हरितालकं गंधके शुक्रे तु पारदं दद्यात्
पुरीषे पित्तलं तथा संधीषु तिलपिष्टं तु मांसस्याष्टयवपिष्टकम् मधु स्याल्लोहिते तस्याने(?)त्वचः स्थाने मृगत्वचा
स्तनयोर्जिजीके(?) दद्येन्नासायां शतपत्रकम् कमलं नाभिदेशे स्याद्वृन्ताके वृषणाश्रिते लिंगे चरक(?)मूलं तु परिधानं द्
कूलकम् गोमूत्रं गोमयं गंधं सर्वौषध्यादि सर्वतः इति इदानीं रुद्रधरोऽपि तत्रैव वृद्धमनुः प्रोषितस्य तथा कालो गतश्चे
द्द्वादशाब्दिकः प्राप्ते त्रयोदशे वर्षे प्रेतकार्याणि कारयेत् वृत्ते त्रयोदशे वर्षे प्रेतकार्याणि कारयेत् बृहस्पतिः य
स्य न श्रूयते वार्त्ता यावद्द्वादशवत्सरात् कुशपुत्रकदाहेन तस्य स्यादवधारणा भविष्ये पितरि प्रोषिते यस्य न वा
र्त्ता नैव चागमः ऊर्ध्वं पंचदशाद्वर्षात् कृत्वा तत्प्रतिरूपकम् कुर्यात्तस्य तु संस्कारं यथोक्तविधिना ततः तदादीन्येव सर्वा
णि प्रेतकर्माणि कारयेत् द्वादशाब्दप्रतीक्षापितृभिन्नविषयेति मदनरत्ने उक्तम् गयकारिकायां तु तस्य पूर्ववं
यस्कस्य विंशत्यब्दोर्ध्वं ततः क्रिया ऊर्ध्वं पंचदशाब्दात्तु मध्यमे वयसि स्मृता द्वादशाद्वत्सरादूर्ध्वमुत्तरे वयसि स्मृता
चांद्रायणत्रयं कृत्वा त्रिंशत्कृच्छ्राणि वा सुतैः कुशैः प्रतिकृतिं दग्ध्वा कार्याः शौचादिकाः क्रियाः इत्युक्तम् पुराणश्रवणः
रः देशांतरगतो नष्टस्तिथिर्न ज्ञायते यदि कृष्णाष्टमी ह्यमावास्या कृष्णा वैकादशी च या उदकं पिण्डदानं च तत्र

तथा ४

रामः २८५

आद्धं च कारयेत् तत्राहिताग्नेः मरणे शौचं मनाहिताग्नेस्तु त्रिरात्रम् अनाहिताग्नेर्देहस्तु दाह्यो गृह्याग्निना स्वयम् तद्दला
भे पलाशानां वृन्तैः कार्यः पुमानपि वेष्टितव्यस्तथा यत्नात् कृष्णसारस्य चर्मणा ऊर्णासूत्रेण संबध्वा तु प्रलेप्तव्यो यवैस्त
था सुपिष्टैर्जलसंमिश्रैर्दग्धव्यश्च तथाग्निना असौ स्वर्गाय लोकाय स्वाहेत्युक्त्वा सबान्धवैः एवं पर्णशरं दग्ध्वा त्रिरात्रम
शुचिर्भवेदिति ब्राह्मोक्तेः इदं त्रिरात्रं न दशाहमध्ये दाहे तत्र प्रोषितकालशेषः स्यादित्युक्तेः किन्तु तदूर्ध्वम् तत्र पत्नीपुत्र
योः पूर्वमगृहीताशौचयोर्दशाहाद्येव गृहीताशौचयोस्तु त्रिरात्रम् पत्नी भर्तेन गुर्वेवम् सपत्नोऽप्येवमिति स्मृत्यर्थसारे
अन्यसपिण्डानां तु सर्वत्र पर्णशरदाहे त्रिरात्रम् तदाहाङ्गिराः देशान्तरमृतं श्रुत्वा नाशौचं चेत्कथंचन कालात्ययेऽपि कुर्वीत
दाहकालादिनत्रयमिति स्मृत्यर्थसारे तु गृहीताशौचानां स्नानमात्रमुक्तम् बहुचपरिशिष्टेऽपि अथातीतसंस्कारः
स चेदन्तर्दशाहं स्यात्तत्रैवं सर्वं समापयेदूर्ध्वमाहिताग्नेर्दाहात्सर्वमाशौचं कुर्यादन्येषु पत्नीपुत्रयोः पूर्वमगृहीताशौच
योः सर्वमाशौचं गृहीताशौचयोः कर्माङ्गं त्रिरात्रमिति षडशीतावप्येवम् विश्वादर्शे तु प्रतिकृतिं दहनेत्वग्निदेश्यात्रि
रात्रमित्युक्तम् द्वादशवर्षादिप्रतीक्षोत्तरं दाहे तु पुत्रादीनां सर्वेषां त्रिरात्रमिति कल्पतरुदिवोदासादयः अथ प्रेतसं
स्कारकालः हेमाद्रौ गार्ग्यः प्रत्यक्षशवसंस्कारे दिनं नैव विशोधयेत् आशौचमध्ये संस्कारे दिनशोध्यं तु संभवे आशौ
चविनिवृत्ते चेत्पुनः संस्क्रियते मृतः सशोध्यैव दिनं ग्राह्यमूर्ध्वं संवत्सराद्यदि प्रेतकार्याणि कुर्वीत श्रेष्ठं तत्रोत्तरायणम्
म् कृष्णपक्षस्तत्रापि वर्जयेत्तु दिनत्रयम् वाराहे चतुर्थीमष्टमीं चैव द्वादशीं च विवर्जयेत् प्रेतकृत्यं व्यतीपाते वैधृ
तौ परिघे तथा करणे विष्टिसंज्ञे च शनैश्चरदिने तथा त्रयोदश्यां विशेषेण जन्मताराद्वये तथा जन्मदशमैकोन
विंशतिजन्मताराः भारते नक्षत्रे तु न कुर्वीत यस्मिन् जातो भवेन्नरः न प्रोष्ठपदयोः कार्यं तथाग्नेये च भारत दा
रुणेषु च सर्वेषु प्रत्यरे च विवर्जयेत् काश्यपः भरण्यार्द्रा मघाश्लेषा मूलं द्विचरणानि च प्रेतकृत्येति दुष्टानि त्रिध

नि॰सिं॰
२८६

निष्ठाघपंचकम् फाल्गुनीद्वितयंरोहिरण्यनुराधापुनर्वसु आषाढेद्वेविशाखेच भरणीद्वितयरस्गतिश्च ज्योतिर्निरिदः चतुर्द
शीतिथिंनंदाभद्रांशुक्रारवासरौ सितेज्ययोरस्तमयं संध्येभविषमान्विमम् शुक्लपक्षंचसंत्यज्यदग्धंहनमुत्तमम् नक्षत्र
राद्दुतःपंचनक्षत्रशुद्धिर्जन्मसु पोषमब्रह्मलक्ष्ययोश्चैवदहनोत्कुलनाशनम् अस्यापवादमाह तत्रैववैजवापः प्रेतस्यस
माद्दग्धस्यप्राप्तेचैकादशेहनि नक्षत्रतिथिवारादिशोधनीयंनकिंचन युगमन्वादिसंक्रांतिदर्शेप्रेतक्रियायदि दैव
दापातेनातत्रनक्षत्रादिनशोधयेत् विश्वप्रकाशेपि गुरुभार्गवयोर्मौढ्ये पौषमासेमलिम्लुचे नातीतःपितृमेधःस्या
त्कृत्यागोदावरींविना दानमपितन्नैवोत्क्रमम् भद्रायांभूमिदानंस्यात्त्रिपादर्क्षेहिरण्यदः वारेषुतत्र दुर्गेतुवासोदानंवि
धीयते धनिष्ठापंचकेमृतेपंचरत्नानिदापयेत् एकाशीतिपलंकांस्यंतदर्धंवातदर्धकम् नवषष्टिपलंचापिदद्याद्विप्रा
यशक्तितः इत्यलंप्रसंगेन हेमाद्रौवृद्धमनुः अस्नातमृतमाकर्णपूर्वकृतेस्याध्वैदेहिकम् प्रायश्चित्तमसौस्मातो
कृत्वाग्नौनादधीतच जीवन्यदिसमागच्छेद्घृतकुंभेनिमज्यतम् उद्धृत्यस्नापयित्वास्यजातकर्मादिकारयेत् द्वाद
शाहंव्रतचर्यांत्रिरात्रमथवास्यतु स्नात्वोद्वहेत्तांभार्यामन्यांवातदभावतः अग्नीनाधायविधिवद्व्रात्यस्तोमेनवा
यजेत् अथैंद्राग्नेनपशुनागिरिकुंचाचतत्रतु इष्टिमायुष्मतींकुर्यादीप्सितांश्चक्रतूंस्ततः अनाहिताग्नेस्तुचरुः
स्ततवार्त्तामात्रश्रवणेत्वाश्वलायनः सुरभयस्त्वयस्मिन्जीवेमृतशब्दइति यस्यतुजीवतएवमृतिवार्त्तांश्रुत्वास्त्रि
यासहगमनंकृतंतदातद्दुष्टमेव भर्तृमरणज्ञानस्यैवनिमित्तत्वात् प्रमादत्वस्यगौरवेणायुक्तत्वाच्चेतिकेचित्
तन्नमरणज्ञानस्यनिमित्तत्वेऽतीतानागतयोरपितत्वापत्तेः भर्तुर्देहदाहाभावेनतस्याःसहगमनाभावाच्च तस्मा
दाशौचवज्ज्ञातमरणस्यैवनिमित्तत्वम् नचात्रतदस्ति परंकाम्यमरणमस्तु अतःआत्महननदोषोस्तीति तातपादाः
तथासर्पसंस्कारकृतेत्रिरात्रमाशौचम् तद्विधिंचाहशौनकः अथवक्ष्यामिसर्पस्यसंस्कारविधिमुत्तमम् सिनी राम॰
२८६

सा२

वाल्यांपौर्णमास्यांपंचम्यांवापिकारयेत् कृतसर्पवधोविप्रः पूर्वजन्मनिवायदि वधंप्रख्यापयेत्पापीचरेत्कृच्छ्रांश्चतुर्द
श विप्रायलोहदंडंचतन्मूल्यंवापिदापयेत् मूल्यमाह निष्कत्रयंहिनिहमसानिष्कमेककनीयसम् अनुमत्यादिका
र्नंग्णानिष्कमर्द्धंतदर्द्धकम् कृदत्वर्णरूप्ययोःशक्त्याज्ञेयम् संस्कारमाह प्रियंगुव्रीहिगोधूमतिलपिष्टेनवापुनः
कृत्वासर्पाकृतिंसर्पंनिधायप्रार्थयेद्दिहिम् एहिपूर्वंमृतसर्पत्वमस्मिन्पिष्टेसमाविश संस्कारार्थमहंभक्त्याप्रार्थ
यामिसमाश्रतः वस्त्रोपवीतगंधाद्यैःसंपूज्यचहरन्द्विहिः कुर्यात्संस्कारसंकल्पप्राणायामपुरःसरम् यज्ञोपवी
तिनाकार्यंसर्पसंस्कारकर्मतु लौकिकाग्निंप्रतिष्ठाप्यसमिदाधानमाचरेत् ततोग्नेरग्निदिग्भागेभूमिसंप्रोक्ष्यवा
रिभिः चितिंकृत्वाथसंस्तीर्य्यकुशैरग्नेयकाग्रकैः पर्युक्ष्याग्निंपरिस्तीर्य्यपरिषिच्यसमर्चयेत् कृत्वेध्मानमाधार
चक्षुषीचयथाविधि सर्पंगृहीत्वायत्नेनचितिमारोपयेत्सुधीः स्रुवेणजुहुयादाज्यमग्नौव्याहृतिभिस्त्रिभिः सर्पा
स्येजुहुयादाज्यंव्याहृत्याचसमग्रया आज्यशेषंस्रुवेणैवसर्पदेहेनिषेचयेत् चमसस्थैर्जलैःसर्पंस्नापयित्वाभ्युक्ष्य
पाणिना अग्नेरक्षणेनृत्यनयासर्प्यायाग्निंप्रदापयेत् उपतिष्ठेद्दह्यमानंनमोस्तुसर्पमंत्रतः ज्ञानतोऽज्ञानतोवापि
कृतःसर्पवधोमया पूर्वजन्मनिवासर्पतत्सर्वंक्षंतुमर्हसि क्षीराज्येनततश्चाग्निंप्रोक्ष्यव्याहृतिभिर्जलैः नास्थि
संचयनंकुर्यात्स्नात्वाचम्यगृहंव्रजेत् ब्रह्मचर्यादिकंकार्यंत्रिरात्रंशौचमिष्यते सचेलंतुचतुर्थेह्नि स्नात्वाविप्रान्स
मर्चयेत् सर्पानंतस्तथाशेषःकपिलोनागएवच कालिकःशंखपालश्चभूधरश्चेतिनामभिः गंधपुष्पाक्षतैर्धूप
दीपाद्यैरर्चयेद्द्विजान् घृतपायसमभक्ष्यैश्चद्विजानष्टौतुभोजयेत् एवंकृतविधानेनसर्पसंस्कारकर्मणि सर्पहिं
साकृतात्पापान्मुच्यतेनात्रसंशय इति इतिसर्पसंस्कारः कथितुजीवतोप्यत्यकर्माशौचंकार्यम् यथाप्रायश्चित्ता
निष्ठोःपतितस्यघटस्फोटे पतितस्योदकंकार्यंसपिंडैर्बांधवैःसह निंदितेहनिसायाह्नेज्ञात्यृत्विग्गुरुसन्निधौ

नि.सिं. दासीघटमपां पूरयित्वा पर्यस्येत्प्रेतवदुपदा अहोरात्रमुपासीरन् ज्ञातयो बान्धवैः सहेति मनूक्तेः निन्दिते रिक्तादौ अपपात्रे वृषि
२८७ प्लायि वेदविप्लावकः शूद्रयाजकोऽनुत्तमवर्णविशेषपतितास्तेषां पात्रनिनयनमपपात्रसंस्कारादकं तत्पात्रमादाय दासीम
वर्णपुत्रो वा बन्धुरसहृष्टो वा गुणहीनः सव्येन पादेन प्रवृत्तान्दर्भान् लोहितान्वोपस्तीर्याय: पूर्णपात्रमस्मै निन
येन्निनेतारं चास्य प्रकीर्णकेशा ज्ञातयो वाससैनं लभेरन्नपसव्यं कृत्वा गृहेभ्यस्चरमापद्येरन् तत ऊर्ध्वं ते तेन धर्मियुस
द्धर्माणस्तद्धर्मयंतश्रुति उत्तमवर्णी ब्राह्मणादयस्तेषां वर्गः समूहस्तस्मात्पतिता ब्रह्महादयः अपात्रसंकरः कुत्सितं
पात्रसमूहः प्रवृत्ता अशिष्टन्यायाः स्वैरं यथेच्छं धर्मादिकार्यं कुर्युः अस्माद्वचनसामर्थ्यात्पात्रनिनयनात्प्राक् पति
तज्ञातीनां धर्मकार्येष्वधिकारो नास्तीत्यपरार्कः तस्य विद्यागुरुयोनिसंबन्धाश्च सन्निपात्य सर्वाण्युदकादिप्रेतकार्या
णि कुर्युः पात्रं चास्य विपर्यस्येयुः दासः कर्मकरो वाऽवकरादमेध्यपात्रमानीय दासीघटात्पूरयित्वा दक्षिणामुखः प
दा विपर्यस्येदमुमनुदकं करोमीति नाम गृहीत्वा सर्वेऽन्वालभेरन् प्राचीनावीतिनो मुक्तशिखास्तस्य उपस्पृश्य ग्राममविशेयुरिति
ज्ञातमोक्ष्य उदकादीत्युक्तेर्दाहनिवृत्तिः प्रेतकार्याण्युदकादि ग्राह्याणि तानि दास्याहतो बुद्धे दासीघटः तेनोद
केनामेध्यपात्रं पूरयित्वा दासादीन् प्रत्यञ्जं वामपादेन कुर्यादिति हरदत्तः अत्र नामग्राहवचनमुदकादिप्रेतकार्यवित
गं५ दुर्जन्त्वार्थं नतेऽदृष्टार्थं भवति एतच्च प्रायश्चित्तानिच्छोः तस्य गुरोर्बान्धवानां राज्ञश्च समक्षं दोषानभिख्याप्य तमनु
भाष्य पुनः पुनराचारं लभस्वेति स यद्येवमप्यनवास्थितमतिः स्यात्ततोऽस्य पात्रं विपर्यस्येदिति प्रारब्धोक्तेः जीवन्त
मेवोद्दिश्य पिण्डोदकश्राद्धानि नाम्ना दद्यादित्यपरार्कः कृतप्रायश्चित्तस्य घटस्फोटे कृतेऽपि संग्रहविधिमाह गौत
मः यस्तु प्रायश्चित्तेन शुध्येत्तस्मिन् शुद्धे शातकुम्भमयं पात्रं पुण्यतमाद्ध्रदात्पूरयित्वा स्रवन्तीभ्यो वा तत एनमुपस्पर्श रामः
येयुरथास्मै तत्पात्रं दद्युस्तत्प्रतिगृह्य जपेच्छान्ता द्यौः शान्ता पृथिवी शान्तं विश्वमन्तरिक्षं यो रोचनस्तमिह गृह्णा २८७

मोत्यतैर्यजुर्भिः पावमानीभिस्तरत्समंदीभिः कूष्माण्डैश्चाज्यं जुहुयाद्धिरण्यं दद्याद्गां चाचार्यायेत्यस्य नु प्रारणांतिकं
प्रायश्चित्तसमं ततः शुध्येत्सर्वोपवतस्मिन्नुदकादीनि प्रेतकर्माणि कुर्युरेतदेव शूलपाणिनुदकं सर्वेषूपपातकेष्विति घ
टस्फोटोत्तरप्राणांतिकप्रायश्चित्तेनु कृतेम्रतएवमुद्धृन्नतत्रसंग्रहविधिः अतस्तेन विनापि प्रेतकर्म कुर्यादित्य
र्थः उपपातकेष्वपि घटस्फोटे कृते एवं कार्य्यमित्यर्थः याज्ञवल्क्यः चरितव्रत आयाते निनयेरन्नवं घटम् जुगु
प्सेरन्न चाप्येनं संवसेयुश्च सर्वशः कृतघटस्फोटस्यैवायं परिग्रहविधिरिति मिताक्षरायामपरार्के च अन्यथा प्रा
यश्चित्तमात्रेण तत्संसर्गात् मनुरपि घटस्फोटमुक्त्वा निवर्त्तेरंस्तु तस्मात्तत्संभाषणसहासने इत्युक्त्वा प्रायश्चि
त्तेतु चरितव्रते पूर्णकुम्भमपां नवम् तेनैव सार्द्धं प्रास्येयुः स्नात्वा पुण्ये जलाशये इति तच्छब्दप्रायुक्तम् अपरा
र्के वसिष्ठोपि पतितानां चरितव्रतानां प्रत्युद्धारं प्युदाहरति अग्रेभ्युद्धरतां गच्छेत्क्रीडन्निव हसन्निव पश्चा
त्पातयतां गच्छेच्छोचन्निव रुदन्निव इत्याचार्य्यमातृपितृहंतारस्तत्प्रसादादपगतयान्याएषां तेषां प्रत्यापत्तिः
पूर्णहृदात्सवर्त्ताद्वा कांचनपात्रमाहेयमृत्वाद्भिः परिपूर्य त्वापोहिष्ठीयाभिरेनमद्भिरभिषिंचेयुः सर्वएवाभिषिंचेयुः
सर्वएवाभिषिक्तस्य प्रत्युद्धारः पुत्रजन्मना व्याख्यात इति प्रत्युद्धारः परिग्रह तत्रोद्धरतां सन्निवास्तसरः स्यात्
पातयतां घटस्फोटं कुर्वतां शोचन्निव पश्चाद्गच्छेत् मात्रादिहंतॄणां परिग्रहो न कार्य्यः तत्प्रसादे सति चीर्णव्रतान्तं
कार्य्यः प्रचेतानिर्मरः पुत्रजन्मनेत्यभिषेकोत्तरम् जातकर्मादयः संस्काराः पुत्रजन्मवत्कार्य्या इत्यपरार्के व्याख
ख्या अत एव विज्ञानेश्वरो घटेऽपवर्जिते ज्ञातिमध्यस्थापवसं गवाम् प्रदद्यात्प्रथमं गोभिः सत्कृतस्य हि सत्क्रिय
त्पत्र गवां भक्षणाभावे पुनर्व्रतं चरेदित्येतत्प्रकृते एव चरितव्रतविधौ विशेषोयमिति वदन् घटस्फोटोत्तरपरिग्र
ह एवैतन्नत्सर्वत्रेत्याह तस्मात्कृतेपि घटस्फोटे प्रायश्चित्ते परिग्रहविधिः पुनः संस्कारा भवतीति सिद्धम् तथाजी

नि॰सिं॰ २८८ वृद्धाः उक्तं हेमाद्रौ बौधायनः तत्राशौचं दशाहं स्यादित्यलं प्रसंगेन एवं सापवादे आशौचे उक्ते प्रतिप्रसवं भिन्नेष्वपि
त्यकर्मणि साधारणं किंचिदुच्यते तत्राधिकारिणः प्रागुक्ताः सर्वाभावे धर्मपत्नी वा कार्या अपुत्रेण सुतः कार्यो
दकं तादृक् प्रयत्नतः पिंडोदकक्रियाहेतोर्नामसंकीर्त्तनाय चेति व्यासवचनात् गृह्यपरिशिष्टे असगोत्रः सगोत्रो
वा यदि स्त्री यदि वा पुमान् प्रथमेऽहनि यो दद्यात्स दशाहं समापयेत् दद्यात्पिंडमिति शेषः भविष्ये यत्राघे दीयते पिंड
स्तत्र सर्वं समापयेत् शातातपोपि प्रथमेऽहनि यो दद्यात्प्रेतायान्नं समाहितः अन्नं नवसु वान्येषु स एव प्रदद्यात्पि कोऽपि
त्वग्निं दद्यादिति व्याचक्षते सगोत्रो वाऽसगोत्रो वा योऽग्निं दद्यात्सखे नरः सोपि कुर्यान्नवश्राद्धं कृच्छ्रे तु दशमेऽहनीति दिवोदा
सीये वचनाच्च तत्रैव दृष्ट्वाऽऽसन्नं स्थमासन्नमर्द्धनिमीलितलोचनम् भूमिष्ठं पितरं पुत्रो यदि दानं प्रदापयेत् तद्विशिष्टं
गयाश्राद्धादश्वमेधशतादपि तानि यथा मोक्षदं हि हृषीकेशं मोक्षं देहि जनार्दन मोक्षधेनुप्रदानेन मुकुंदः प्रीयतां
ममेति मोक्षधेनुमंत्रः इहिकामुष्मिकं यच्च सप्तजन्मार्जितं त्वघम् तत्सर्वं नाशमायातु गोप्रदानेन केशव इति पापधेनोः आजन्म
चैव संकल्पविस्मृतं भवता मया तस्य संशोधनार्थाय कालधेनुं ददाम्यहम् इति कालधेनोः भारते मुक्तपक्षे दिवा
भूमौ गंगायां चोत्तरायणे धन्यास्तात मरिष्यन्ति हृदयस्थे जनार्दने हेमाद्रौ वाराहे व्यतीपातोऽथ संक्रांतिस्तथैव च
ग्रहणं रवेः पुण्यकालास्तदा सर्वे यदा मृत्युरुपस्थितः व्यासः आसन्नमृत्युना देया गौः सवत्सा तु पूर्ववत् तदभावे तु
गौरेव नरकोत्तारणाय वै तदा यदि न शक्नोति दातुं वैतरणीं तु गाम् शक्तोन्योपि तदा दत्वा दद्याच्छ्रेयो मृतस्य तु मद
नरत्ने जातूकर्ण्यः उत्क्रांतौ यानि दानानि दिशेद्दद्यान्मृतस्य तु गोभूतिलहिरण्याज्यवासोधान्यगुडानि रूप्यं लवणम्
मित्याह दशदानान्यनुक्रमात् एतानि दश दानानि नराणामंत्यजन्मनोः कुर्यादभ्युदयार्थं तु प्रेतस्यापि हि स्वत्वे वा...

तेषां परिमाणं हेमाद्रौ। निवर्त्तनमिता भूमिर्द्रोणत्रयमिता स्तिलाः। कर्षमात्रं सुवर्णं स्यादाज्यं सप्रस्थमाढकम्। वासः सांत्रिनं४ पृ १
यं दद्यात्कुडवपलषष्ठिकम्। निष्कत्रयमितं रूप्यं लवणं सार्द्धखारिका। सार्द्धखारीमितं धान्यं परिमाणं प्रकीर्त्तितम्। दशहस्तेन दंडेन हस्तेन त्रिंशद्दंडानिवर्त्तनम्।

रामः २८८

चर

ताम्रपात्रं तिलैः पूर्णं प्रस्थमात्रं द्विजाय तु सहिरण्यं च यो दद्यात्क्षुद्रादिनानुसारतः सर्वपापविशुद्धात्मा लभते गतिमुत्तमा
म् उत्क्रान्तिवैतरिण्याख्यदशदानानि चैव हि प्रतिपिद्धत्वात्प्रेतशवधर्मेण दाहयेत् तत्रैव परिशिष्टे म्रियमाणस्यक
र्तेतु पुरुषमन्त्रान्जपेत्ततः क्रियानिबन्धे गारुडे त्वष्टौदानान्युक्तानि तुलसीसन्निधौ कृत्वा शालग्रामशिलां तथा ति
लं लोहं हिरण्यं च कार्पासं लवणं तथा सप्तधान्यं क्षितिर्गावः एकैकं पावनं स्मृतमिति दशनैवेतरणी धेनूत्क्रान्ति धेनुद
नादि मदुक्तमेतत्पद्धतौ ज्ञेयम् कर्तान्यकर्माधिकारार्थं त्रीन्कृच्छ्रान्कुर्यादिति तत्रैवोक्तम् अत्र देवजानीकेन मुमूर्षो
र्मधुपर्कदानमुक्तम् तदुक्तं वाराहे इष्टापूर्तविकलघ्नं यममार्गानुसारिणाम् प्रयाणकाले तु नरो मन्त्रेण विधिपूर्व
कम् मधुपर्कं त्वरन्गृह्य इमं मन्त्रमुदाहरेत् ॐ गृह्णाम्येवममधुपर्कमाद्यसंस्कारनाशनं कर त्वमस्तेन तुल्यम् नाराय
णेन रचितं भगवत्प्रियाणां दाहे च शान्तिकरणं सुरलोकपूज्यम् अनेनैव तु मन्त्रेण दद्याच्च मधुपर्ककम् नरस्य मृत्युका
ले तु परलोकसुखावहम् अथ दुर्मरणादि दिवोदासीये चण्डालादिमृतो विप्रस्त्वन्तरिक्षमृतोऽपि वा कृच्छ्रातिकृच्छ्रचान्द्रैस्तु शुद्धि
स्तत्र प्रकीर्तितम् देवजानीये जाबालिः मृद्गणदग्धो यो विप्रो न लभेच्छाश्वतीं गतिम् प्रायश्चित्तं प्रकुर्वन्ति ब्राह्मणाः
पापमुक्तये चान्द्रायणं पराकं च प्राजापत्यं विशोधनम् गृह्यकारिकायाम् उदक्यासूतिकायापि यदि प्रेतं स्पृशन्ति हि न
स्य बलिविधिर्णादिष्टो वात्स्येनैव महात्मना एष स्मृतिकोक्तः मदनरत्ने स्मृत्यन्तरे उर्ध्वोच्छिष्टाधरोच्छिष्टोभयोच्छिष्टे ते
यव च अस्पृश्यस्पर्शने चैव खट्वादिमरणेऽपि च श्वानक्रव्यादसंस्पर्शे कृमिकीटाभवेऽपि च एतद्दोषानुसारेण प्रा
यश्चित्तं समाचरेत् कृच्छ्रांस्त्रिषट्पञ्चदशपादान्त्रयमथापि वा शुद्धेन तदानीं सपादशवधर्मेण दाहयेत् गृह्यकारिका
खट्वायां मरणे चैव त्रीन्कृच्छ्रान्कल्पयेत् सप्तान्त्यजैस्तु संस्पृष्टो मृतो देवात्कथं चन एकत्रिंशता कृच्छ्रैस्तु शु
द्धिरुक्ता मनीषिभिः करणपात्वद्दग्धे तु चितास्पृष्टान्त्यजादिभिः तत्स्पर्शने द्रवणं तु त्रिभिः कृच्छ्रैर्विशुध्यति धर्म

नि॰ सिं॰ २९९ प्रक्षेपेत्तु चंडालसूतिकोदक्यास्पृष्टे प्रेते तथैव च तस्य पापस्य शुद्ध्यर्थं कृच्छ्रान्तं च दशाचरेदित्युक्तम् मनुः अस्पृश्यापि प्राकृ-
तिः सा स्याच्छूद्रसंपर्कदूषिता अत्रापि कृच्छ्रत्रयम् अस्पृश्यस्पर्शने चैवमेतदुक्तं तत्रैव रात्रौ वा रात्रिशेषे वाग्निय
ते चेद्द्विजातयः दाहं कृत्वा यथान्यायं द्वौ पिंडौ निर्वपेत्सुतः रजस्वलागर्भिण्यादिमृतौ तु वक्ष्यामः निर्णयामृते मद
नपारिजाते यमः संध्यायां च तथा रात्रौ दाहः पाथेयकर्म च नवश्राद्धं च नो कुर्यात्कृतं निष्फलतां व्रजेत् एतद्दिनमृतस्य
रात्रिनिषेधार्थम् यत्तु स्कांदे यदि रात्रौ दहेत्तस्य समाप्तिर्द्दहनस्य तु परेहन्युदिते सूर्ये कार्यं तस्योदकक्रिया दग्धस्य
तु नवैकार्या रात्रौ जातूदकक्रियेति तन्निर्मूलम् रात्रिमृतस्य तु तत्रैव समयः रात्रौ दग्ध्वा तु पिंडान्तं कृत्वा वपनवर्जितम्
वपनं नेष्यते रात्रौ श्वस्तनी वपनक्रियेति वपनं तु प्रातस्त्यं सर्वैः पुत्रैः कार्यम् गंगायां भास्करक्षेत्रे मातापित्रोर्गुरोर्मृ
तौ आधाने सोमयागे च वपनं सप्तसु स्मृतमिति मिताक्षरायां स्मृतेः मरणस्थानं गत्वान्त्येष्टिकमिदं तद्देवसंग्र
हवचनेन पुरः गुरुं कुर्वते तीर्थवत् तेन कस्यचिद्दाहागत्वोक्तिश्चिंत्या मदनरत्ने गालवः प्रथमेह्नि कर्त्तव्यं वपनं वानुभा
विनाम् प्रेतस्यैकेशश्मश्र्वादि वापयित्वा यद्दाहयेत् आशौचांते तु पुनः कार्यं विधिबलात् मदनपारिजातेप्येवम् तन
सर्वस्यास्य निर्मूलत्वोक्तिरज्ञोक्तिरेव स्मृतिरत्नावल्याम् शवं रात्र्युषितं च त्रीन्कृच्छ्रान्कृत्वा दहेत्सुतः मदनरत्नेंगि
राः ऊर्ध्वोच्छिष्टाधरोच्छिष्टेष्वंतरिक्षमृतेपि च कृच्छ्रत्रयं प्रकुर्वीत आशौचं मरणेपि च अथ साग्नेर्विशेषः कारिका
याम् कृष्णपक्षे प्रमीयेत यद्याहिताग्निरातुरः शेषं तु जुहुयाद्दर्शपर्यंतात्पक्षहोमवत् प्रतिपत्प्रातर्होमांतामित्यर्थः
यद्याहिताग्निरपरपक्षे म्रियेत आहुतिभिरनं पूर्वपक्षं हरयुरित्याश्वलायनोक्तेः तदानीमेव जुहुयात्सायंकालाहुतीर
पि सायं म्रियेत चेत्सायमाहुतिं जुहुयादथ तदानीमेव जुहुयात्प्रातःकालाहुतीरपि सकृज्जुहोति मंत्रेण भिन्नतंत्रे राम: २९९
च होमयोः दर्शं चापि प्रकुर्वीत स्थालीपाकं तदैव तु छंदोगपरिशिष्टे हुतायां सायमाहुत्यां दुर्बलश्चेद्गृही भवेत् प्रा

प्रातर्होमस्तदैवास्याज्जीवेच्चेत्स पुनर्नवा इत्यल्लोममूर्ध्नः त्रिकांडमंडनः दर्शेष्टिं च तदा कुर्याद्दिष्ट्या यदि न संभवेत् देवतानां
प्रधाना नामेकैकस्य कृतेन्यथा क्रमात् पुरोनुवाक्यायाज्याभ्यां चतुरन्नेन च ताहुती: तथा अस्याचरणेपारं रूढ प्रमीयेत पतिर्य
दि प्रेतस्य कामथित्वाग्निं जुह्वाचोपावरोहणम् कृतं च हृद् दशोपात्तं तूष्णीं कृत्वाशवक्रियाम् विच्छिन्नश्रोताग्नेमतो नु
प्रेताधानं तत्रैवोक्तम् प्रेतस्यास्याल येक्षिप्यामथित्वाग्नात लेरणि सनिधाप्यारण्यां मथ्येच्चस्येतियजुषा ततः यस्माग्न
या जुहुत्नो मांसकामसंकल्पयतेयजमानमासम् जायतु तेह विवस्वादितायस्वर्गलोकमिमं प्रेतनयत्वितिमंत्रः प्रणीय
पावकं तूष्णीं द्वादशोपात्तं सखिवा तूष्णीं कृत्वा ततः कुर्यात्प्रेतमाल्याहुतिक्रियाम् नष्टे च्चाग्नि च यथारण्योनीत्य स्वामीनिस्य
तेचेत् आहरेदरणि च हुमतोज्यातिर्म चाततः यज्ञपात्रं वः यजमानचितारूढं पात्रन्यासं कृतेसति वर्णोच्यमिह तेवन्हो
कथं कुर्वन्तियाज्ञिकाः तदर्थं दग्धकाष्ठ मथनं तत्र कारयेत् तच्छेषालाततान्येन दग्धश्शेषण्वापुनः कृत्वाज्यं लौ
कि के वन्हौ दग्ध शेषं दहेत्नुवा अत्राग्निपुसत्तुपरीक्षारेः शरीरोत्पत्तिः शरीरे वासति प्रेताधानेनाग्न्युत्पत्तिः उभया
भावे तु प्रेताधानेनधिकाराद्दाहादिसंस्कारलोपः उदकदानाद्यप्येवं कार्यमिति केशवीकारशांत ष्णीप्रमुखाः पत्न्या
भावे तु प्रेताधानेनधिकाराद्दाहादि संस्कारलोपः
त्यैवम् दाहयित्वाग्निहोत्रेण स्त्रियं वृत्तवतीं पतिरितियाज्ञवल्क्योक्तेः यत्तु द्वितीयां चैव यो भार्यां दहे द्वैतानि काग्निभिः
जीवंत्यां प्रथमायां तु सुरापानसमं स्मृतमिति तदाधाने सहानधिकृता विषयमिति विज्ञानेश्वरः मदनरत्ने त्वाहिताग्नि
स्त्रियं दहेत् पत्न्यां पूर्वस्यां मृतायां त्रियते भुवि तस्य देहः सपिंडैश्च दग्धव्यस्त्रिभिरग्निभिः पश्चान्मृतस्य देहस्तु दग्धव्यो
लौकिकाग्निना अनाहिताग्नि देहस्तु दग्धव्यो गृह्याग्निना द्विजैः त्रिकांडमंडनस्तु विकल्पमाह ज्येष्ठायां विद्यमानायां
द्वितीयायै स्वयोषिते कामं नित्याग्निहोत्रं वा न कथंचित्प्रयच्छति स्त्रीमात्रमविशेषेण यादृग्ध्वान्यै वैदिकादिभिः विवाहा
दधतेयदाधानमेवास्ति चेद्धरिति अत्रेदं तत्त्वं साग्नेः पत्नीमृतौ दोषः पुनर्विवाहेच्छायां पूर्वाग्निभिर्दहेदित्येकः

नि॰ सिं॰ २९० पूर्वः भार्यायै पूर्वं मारिरणे दत्वाग्नीनंत्यकर्मणि पुनर्दारक्रियां कुर्यात्पुनराधानमेव चेति मनूक्तेः दाहयित्वाग्निहोत्रेण ।
स्त्रियं वृत्तवतीं पतिरिति याज्ञवल्क्योक्तेश्च पुनर्विवाहशक्तो निर्मथ्येन नोदघात्पूर्वाग्निर्ज्येष्ठवाग्निहोत्रेष्ट्यादीकार्य्यमिमन्य
न्वयः आहार्य्यगणाहिताग्निपत्नीचेत्याश्वलायनोक्तेः भरद्वाजोपि निर्मथ्येन पत्नीमिति पूर्वाग्न्येकदेशेन दहेदिति
जन्तपार्श्वदेवजाज्ञिकादयः यानि च तस्मादपत्नीकोप्यग्निहोत्रमाहरेदिति श्रुतिः विद्वन्मुः छन्दोगपरिशिष्टे च म
तायामपि भार्यायां वैदिकाग्निं हनित्यजेत् उपाधिनापि तत्कर्म यावज्जीवं समाचरेत् उपाधिरिह कुशपत्न्यादिः
अन्यं कुशमयीं पत्नीं कृत्वानुगृहमेधिनः अग्निहोत्रमुपासंतयावज्जीवमनुव्रता इत्यपरार्के स्मृत्यंतरात् कात्यायनोपि
रामोपि कृत्वा सौवर्णीं सीतां पत्नीं यशस्विनीम् ईजे वक्त्रविधैर्यज्ञैः सह भ्रातृभिरच्युत इत्यादीनि तानि पूर्वाग्निर्ज्येष्ठवा
ग्निहोत्रादिपराणि नन्वपत्नीकस्याधानार्थानि मृतुविधीनामाधाना प्रयोजकत्वात् अपत्नीकस्याधानाप्रव
त्तिरिति मानवपरिशिष्टाच्च सामानभवत्येव अपत्नीकोप्यसोमेय इति श्रुतेः यत्तु भरद्वाजापस्तंबसूत्रे दारकर्मणि
य घशक्ते आत्मार्थमग्न्याधेयमिति अस्यार्थः पुनर्विवाहशक्तोयघग्न्याधेयपूर्वकृतमस्ति तदात्मार्थमेव नप
त्न्योदघादिति ब्राह्मणभाष्यापरार्कोशाकेरमाडारादितत्वमप्येवम् त्रिकाण्डमण्डनस्तु पक्षद्वयमाह अन्येप्यप
त्नीकस्याधानमाकुस्तदाश्वलायनविघ्नः कद्रुयाज्ञवल्क्यः आहिताग्निर्यथान्यायं दग्धव्यस्त्रिभिरग्निभिः अना
हिताग्निरेकेन लौकिकेनापरोजनः एवं वृत्तां सवर्णां स्त्रीं द्विजातिः पूर्वमारिणीम् दाहयेदग्निहोत्रेण यज्ञपात्रै
श्च धर्मवित् कारिकायाम् पत्नीमपि दहेदेवं भर्तुः पूर्वमृतायदि अनग्निकां दहेदेवं कापालेन हविर्भुजा आश्र
चप्रकाशिकेतुः विधुरं विधवां श्चैव कपालस्याग्निना दहेत् ब्रह्मचारिणं पतिं चैव दहेद्वृत्तपनाग्निना तुषाग्निना राम: २९०
च दग्धव्यः कन्यका बाल एव च अग्निपर्णकिपालं तु कृत्वा तत्र विनिक्षिपेत् करिषादि ततो वह्निर्ज्ञानीयः सकपालकः

अनुपनीतेयद्यपिज्ञानाररणपग्निकैश्चिदुक्तस्तथापितत्सकलेनानिषिद्धत्वोक्तेरयमेवज्ञेयः स्मृत्यंतरे गृहस्थोब्रह्मचारीचवि
धुरोविधवास्त्रियः औपासनश्चोन्नयनस्तुवाग्निरक्षकपालनः उत्पन्नस्तु दर्भाग्रे ग्नितुप्रज्वाल्यपुनर्दर्भैस्तुसंयुतः
पुनर्दर्भैर्नीतोयोग्निरेवउन्नयनः स्मृतः यमः यस्यानयतिशूद्रोऽग्निंतृणकाष्ठहवींषिच प्रेतत्वंचसदातस्यसचैवधर्मेण
लिप्यते देवलः चंडालाग्निरमेध्याग्निःसूतिकाग्निश्चकर्हिचित् पतिताग्निश्चिताग्निश्चनशिष्टग्रहणोचिताः मनुः
दक्षिणेनमृतंशूद्रं पुरद्वारेणनिर्हरेत् पश्चिमोत्तरपूर्वैस्तुयथासंख्यंद्विजातयः अत्रप्रातिलोम्येनक्रमः पूर्वामुखस्तुते
नव्योब्राह्मणैर्बांधवैर्गृहात् उत्तराभिमुखोराजावैश्यःपश्चान्मुखस्तथा दक्षिणाभिमुखःशूद्रोनिर्हर्तव्यःस्वबांधवैरि
त्यादिपुराणादित्यपरार्कः तेनत्रिंशच्छ्लोक्युक्तोनुलोमक्रमोहेयः आश्वलायनः ज्येष्ठप्रथमाःकनिष्ठजघन्यागच्छेयुः
आहिताग्नौविदेशमृतेपार्थिवक्रतौष्टिमेताग्निहोत्रंनदाहः पात्रयोजनंचकल्पसूत्रादिभ्योऽस्माभिस्तामहक्रतपद्धतेश्चज्ञेयमि
ति वक्तव्येष्वुपरम्यते स्मार्ताग्निसत्केमदनरत्नेछंदोगपरिशिष्टेच दुर्बलंस्नापयित्वातुशुद्धचैलाभिसंवृतम् दक्षिणा
शिरसंभूमौबर्हिष्मत्यांनिवेशयेत् छन्नेनाभ्यक्तमाप्लाव्यसुस्रग्वस्त्रोपवीतिनाम् चंदनोक्षितसर्वांगंसुमनोभिर्विभूषयेत्
हिरण्यसकलान्यस्याक्षिप्त्वाछिद्रेषुसप्तसु मुखेऽपिधापिधायेननिर्हरेयुःसुतादयः आमपात्रेऽन्नमादायप्रेतमग्निपु
रःसरम् एकोनुगच्छेत्तस्यार्द्धमर्द्धपथ्युत्सृजेद्भुवि ऊर्ध्वमादाहनंकार्यमासीनोदक्षिणामुखः सव्यंजान्वाच्यशनकैःसति
लपिंडदानवत् अत्रपुत्रादिराप्लुत्यकुर्याद्दारुच्चयंमहत् ततोन्नानंतिपात्येनदक्षिणाशिरसंमुखे आज्यपूर्णांस्रुचंदद्याद्द
क्षिणाग्रांनासिकेस्रुवम् पादयोरधरांप्राचीमरणीमुरसीतराम् पार्श्वयोःस्फ्यंचमसौसव्यदक्षिणयोःक्रमात् सुतस्तुतं
सेन्मुशलंमतरूर्वोरुलूखलम् चात्रावीलीकमत्रैवअननयोविधिः अपसव्येनकृत्वेतद्वाग्यतःपितृदिङ्मुखः अथाग्निं
सव्यमाकृत्योदद्याद्दक्षिणतःशनैः अस्मात्त्वमधिजातोसित्वदयंजायतांपुनः असौस्वर्गायलोकायस्वाहेतिपरिकीर्तयेत्

नि॰ सिं॰ २९१ तया एवमेवाहिताग्नेश्च मात्रन्यासादिकं भवेत् कृष्णाजिनादिकं चात्र विशेषो ध्वर्युचोदितः तत्रैव अनयैवावृता नारीद
ग्ध्व्यायाध्व वस्थिता अग्निप्रदानमंत्रोस्या न प्रयोज्य इति स्थितिः इदं छन्दोगानामेव पात्रन्यासो करुतानदेहन्वसा
ग्निपरम् निरग्निस्तु पुमानधोमुखः स्त्री तूत्तानादाह्या सगोत्रजग्रहीत्वानुचितमारोप्यते शवः अधोमुखं दक्षिणा
दिक्चरणस्तु पुमानिति उत्तानदेहनारी तु सपिण्डैरपि बन्धुभिरित्यादिपुराणादिति ग्रहितं चाहारलतादयः उत्तर
२ शिरस्त्वसामगेन परम् वाराहत्वग्निदानेत्वो मन्त्रः कृत्वा तु दुःकृतं कर्म जानता वाप्यजानता मृत्युकालवशं प्राप्य न
रं पंचत्वमागतम् धर्माधर्मसमायुक्तं लोभमोहसमावृतम् दहेयं सर्वगात्राणि दिव्यान्लोकान्स गच्छतु ज्वल
मानं महावक्त्रः स्थाने प्रदापयेत् चतुर्वर्णेषु संस्थानमेवं भवति पुत्रिके आहिताग्नोपराशरः शम्याशिश्ने विनि
क्षिपेत् अरणीपृष्ठयोरपि जुहूं च दक्षिणे हस्ते वामे तूपभृतं न्यसेत् पृष्ठे तू खलं दद्यात् पृष्ठे च मुशलं न्यसेत् उरसि क्षि
प्य दृषदं तण्डुलाज्यतिलान्मुखे श्रोत्रे च प्रोक्षणीं दद्यादाज्यस्थालीं च चक्षुषोः कर्णनेत्रमुखघ्राणे हिरण्यशक
लं न्यसेत् अग्निहोत्रोपकरणमशेषं तत्र निक्षिपेत् प्रचेताः स्नानं प्रेतस्य पुत्राद्यैर्विप्राद्यैः पूजनं ततः नग्नदेहं दहेन्नै
वा किंचिद्देयं परित्यजेत् यमः प्रेतदेहं शुभैर्गन्धैः स्नापितं स्रग्विभूषितम् आश्वलायनसूत्रे संस्थिते प्रेतालङ्कारान्
कुर्वन्ति केशश्मश्रुलोमनखानि वापयन्ती नलदेनानुलिपन्ति नलदमालां प्रतिमुंचन्तीति माधवीयग्राह्ये दरिद्रोपि न
दग्धव्यो नग्नः कस्यांचिदापदि तथात्रिः शेषमस्तु न दग्धव्यः शेषं किंचित्त्यजेन्नरः दाहकालेग्निनाशे तु मदनरत्ने
यज्ञपार्श्वः यजमाने मृते क्वापि चितादेवाप्रवासिते वर्षा घ्नन्ति हते त्यागो नुकथं प्रेतविकल्पना शवं दग्ध्वा प्रदग्धेषु
निर्मथ्यैव तु कारयेत् अथ पर्णशरादिदाहे नाग्निनाशे अथवा न देहलाभे मदनरत्ने ग्राह्ये अथ पर्णशरे दग्धे पात्र राम:
न्यासे कृते सति गतेष्वग्निषु तद्देहो यदि पूर्वं लभ्यते क्वचित् तदा दग्ध्वा काष्ठानि तानि निर्मथ्य तं दहेत् यद्यदग्ध २९१

काष्ठं तु तदीयं वै न लभ्यते तदा तदस्थि खराऽनुनिक्षेप्तव्यं महाजले इति दंपत्योरेककालमृतौ विशेषमाहापस्तंबः तथैव प्रेते सहैव पितृमेधा
द्विवचनलिंगान्मन्त्रान्संधारयंति पितृमेधो दाहांतकर्मा दाहांतमेकतंत्रत्वमिति बौधायनोक्तेः अस्थिसंचयनमप्येकमुद
कोपिंडदानादि पृथगेव सहगमनेप्येवम् तदाह मदनरत्ने माध्यायसंग्रहकारः एककालमृतौ भार्याभर्तारौ च यदि चेद्द्वयोः
तंत्रेण दहनं कुर्यात्पिंडश्राद्धं पृथक्पृथक् एककालमृतौ जायापती यदि तदापि तु विभज्याग्निं क्रियां कुर्यादिति यत्तु तद
सांप्रतम् दाहांतमेकतंत्रत्वमिति याज्ञिकसम्मतम् मृतं पतिमनुव्रज्य या नारी ज्वलनं गता अस्थिसंचयनान्तोऽस्याभ
र्तुः संस्कार एव हि कीकसानां तु संस्कारो न्यायसिद्धोऽपि नो मतः एककालमृतेऽप्येवं कीकसानां विधिः स्मृतः नवश्राद्धस
पिंडांतं भिन्नकालमृतौ यथा कर्पर्दिकारिकापि मृते भर्तरि यद्दाहात्प्राक् पत्नी म्रियते यदि पत्न्यां वा प्राक् प्रमीतायां दा
हादर्वाक् पतिमृते तंत्रतंत्रेण दाहः स्यात्तत्रैव शुद्धिरिष्यते कीकसानां तु संस्कारः पृथगेव तयोर्भवेत् एकाहमृतयोर्यु
गे पत्न्यश्च श्राद्धादिकं तयोः मृतं पतिमनुव्रज्य पत्नी चेदनलं गता तत्रापि दाहस्तंत्रेण पृथगस्थिक्रिया भवेत् अस्थि
संचयनं पृथक् विकल्पः सहगमने सर्वत्र पाके क्रमाह प्रचेताः एकचितां समारूढौ म्रियेते दंपती यदि तंत्रेण श्रपणं
कुर्यात्पृथक् पिंडं समापयेत् अथोदकदानम् वसिष्ठः शरीरमग्नौ संयोज्यानवेक्षमाणा अपोऽभ्यवयंति सव्यान्तराभ्यां
पाणिभ्यामुदकक्रियां कुर्वंत्ययुग्मम् आपस्तंबः मातुश्च योनिसंबंधेभ्यः पितुश्चासप्तमात्पुरुषाद्यावतां वा संबंधो ज्ञा
यते तेषां प्रेतेषूदकक्रियेति याज्ञवल्क्यः सप्तमाद्दशमाद्वापि ज्ञातयोऽभ्युपयंत्यपः अप नः शोशुचदघमनेन पितृदि
ङ्मुखाः सकृत्प्रसिंचत्युदकं नामगोत्रेण वाग्यताः सप्तमाद्दशमाद्वा दिवसादानदनमिति विज्ञानेश्वरः कातीयास्तु
सप्तमाद्दशमाद्वा पुरुषादित्याहुः सप्तमात्पुरुषाद्दशमाद्वा समानग्रामवासे यावत्संबंधमनुस्मरेयुरिति पारस्करो

केः मंत्रः स्नानांगमेवेतिहेमाद्रिः प्रचेताः प्रेतस्पर्शाधवाय याहृत्सुहृत्कमवर्णीण्येनोद्भवेयपुरुहत्कांतेप्रसिंचेपुरपसव्यजन्नोप
वीतवाससो दक्षिणामुखाव्राह्मणस्यादङ्मुखाप्राङ्मुखाश्चराजन्यवैश्ययोः सएव नदीकूलंततो गत्वे सुष्मा सेवलस्नुत
नः स्नात्वाशुचिः प्रयतमानसः प्राचारणा तेन आदाय विप्रे दद्यात् दशजलीन् द्वादश क्षत्रिये दद्यात् वैश्ये पंचदश स्मृताः त्रिंश
च्छूद्राय दातव्यास्ततः संप्रविशेद्गृहम् ततः स्नानं पुनः कार्य्यं गृहशौचं च कारयेत् ॐ प्रेतस्नानविधौ च शुद्धितत्वे त्रा
स्न हिकेतरो आदौ वस्त्रं च प्रक्षाल्य तेनैवाच्छादितैस्ततः कर्तव्यं तैः सचैलंतु स्नानं सर्वमलापहम् पूर्वपरिहितं वस्त्रं च प्रक्षा
ल्य तैः परिधाय स्नायादित्यर्थः अपनः शोशुचदघमिति वा महस्नानाभिक्रयाजडलोडनम् अवतरणे च पुरःसरत्वोक्तेर्यथावा
सपुरस्कृत्येति बौधायनीयजलोत्थानपरमितिहारलतोदयः आश्वलायनः समावृत्तोप्रजोतनीक्षमारण्यो यत्रोदकं
प्रवहद्भवति तत्राप्य सकृदुन्मज्ज्यैकांजलिमुत्सृज्य तस्य गोत्रं नाम गृहीत्वेति प्रचेतसात्वहमंजलित्रयमप्युक्तं त्रिः प्रसेकं
कुर्युः प्रेतास्तृप्यत्विति तथा दिने दिने जलीन्पूरणान्प्रदद्यात् प्रेतकारणात् तावद्वृद्धिश्च कर्तव्या यावत्पिंडः समाप्य
वृद्धिस्त्रिक ६ ते एकवृद्धिरित्यर्थः मदनरत्ने भरद्वाजगृह्ये तु हिरण्यकेशी आशौचांत्यं प्रदद्यात्तु प्रेतपुत्रस्तिलांजलीन् प्रथमेह्नि स
कृद्दद्यात्पिंडजलं तावत्तावद्दिवा त्रीश्च दद्याद्द्वितीयेह्नि तृतीये पंच एव च चतुर्थे सप्त संख्यास्तु पंचमे नव चोत्सृजेत् षष्ठे
ह्नि चैकादश स्युः सप्तमे तु त्रयोदश अष्टमे पंचदश का नवमे दश सप्त च एकोनविंशति चाग्रे शतांजलिमतं स्मृतम्
केचिद्दशांजलीनप्राहुः केचिदाहुः शतांजलीन् पंचपंचाशतं चान्ये स्वशाखोक्तव्यवस्थया छंदोगपरिशिष्टे अयो
नवहमेत्यापः सर्वं चैव यशा वस्पृशः गोत्रनामपदांते तु तर्पयामीत्यनंतरम् दक्षिणाग्रान्कुशान्कृत्वा सतिल एमः
तुपव्यकृत्यक विष्णुपुराणे सपिंडीकरणं यावदृजुदर्भैः पितृक्रिया सपिंडीकरणादूर्ध्वं द्विगुणैर्विधिवद्भवेत् २९२

रामायणे । हृदं पुरस्य शार्दूलविमलं दिव्यमक्षयं पितृलोके सुपानीयं महत्तमुपतिष्ठताम् दानवाक्ये विकल्पः याज्ञवल्क्यः
कामोदकं सखिप्रत्तास्वस्रीयश्वशुरर्त्विजाम् कामं इच्छा प्रेतेन दीक्षायां देयमन्यथा नेत्यर्थः शंखपारस्करौ आचार्य
चैवमातामहयोश्च स्त्रीणां वा प्रत्तानां वा कुर्वीरंस्तांश्च ते चामिति द्विवचनान्मातामह्या अपि शंखलिखितौ उदकक्रिया काम
न् श्वशुरमातुलयोः शिष्यसहाध्यायिनिरञ्जनि वेति मनुः क्लीबाद्या नोदकं कुर्युः स्तेना व्रात्या विधर्मिणः ग
८५ र्भभर्तृद्रुहश्चैव सुराप्यश्चैव योषितः याज्ञवल्क्यः न ब्रह्मचारिणः कुर्युरुदकं पतितास्तथा मध्यमेन स्त्रीयास्वारणदीपम
घ्नाः पतितायेच दूषिताः न कुर्युरुदकं नैव तेभ्योप्यन्नेन चैव हि मदनरत्ने हारीतः पततामपविद्धानां चरतीनां च का
मतः प्रत्तानां चैव कन्यानां निवर्त्या सतिलक्रिया अपरार्के शंखलिखितौ अपपात्रितस्य क्रियापिंडोदकानि व्याव
र्तते अपपात्रितः कृतवृद्धस्फोटः तस्यापि संग्रहविधौ कृते आशौचोदकादि कुर्यादित्याशौचप्रकाशः अथाशौ
चनियमाः याज्ञवल्क्यः इति संश्रुत्य गच्छेयुर्गृहं बालपुरःसराः विदश्य निंबपत्राणि नियता द्वारि वेश्मनः
आचम्याग्न्यादि सलिलं गोमयं गौरसर्षपान् प्रविशेयुः समालभ्य कृत्वाश्मनि पदं शनैः प्रवेशनादिकं कर्म प्रे
तसंस्पर्शिनामपि क्रीतलब्धाशना भूमौ स्वपेयुस्ते पृथक्क्षितौ इदंवाचेक्ति वशिष्ठः अथ प्रस्तरे त्र्यहमनश्नन्
त आसीरन् क्रीतोत्पन्नेन वा वर्त्तेरन् मुद्गितं च वैजवापः शमीमालभन्ते शमी पापं शमयत्विति अश्मानमश्मेव
स्थिरो भूत्वा शमीत्यग्निमग्निर्नः शमयच्छत्विति ज्योगित्यंतराणाममुपस्पृशन्तु क्रीत्वा लब्ध्वा चान्यगेहादेकान्न
मलवणमेकं शमीमालभन्ते शमी पापं शमयत्विति अश्मानमश्मेव स्थिरो भूयासमिति अग्निमग्निर्नः शमयच्छ
त्विति ज्योगित्यंतरागामजमुपस्पृशतः रात्रिभुजो हि रात्रं च कर्मापरमरणम् क्रीतायशनमुपवासो वाशक्तस्य
आश्वलायनसूत्रे तस्यां रात्र्यामन्नपरिचरं त्रिरात्रमक्षारलवणाशिनः स्युर्द्वादशरात्रं वेत्याह अशक्तौ र

नि॰सिं॰ त्नाकरे आपस्तंबः भार्यापरमगुरुसंस्थायां चाकालमभोजनानि कुर्वीरन्नयदाम्रुतिः परदिने तावत्कालमित्यर्थः बृ
२९३ हस्पतिः अधःशय्याशनादीना मलिना भोगवर्जिताः अक्षारलवणाः स्युस्ते मृते ताश्रानास्तथा भोगोप्यगतो
तूलादिः छायापरिभाषायामुक्ताः ब्रह्ममार्कण्डेयपुराणे तैलाभ्यंगो बांधवानामंगसंवाहनं च यत् तेन चाप्या
यते जंतुर्यं स्याश्नंति स्वबांधवाः प्रथमेह्नि तृतीये च सप्तमे नवमे तथा वस्त्रत्यागं बहिः स्नानं कृत्वा दद्यात्तिलोद
कमिति नद्यन्यदिनपरम् आशौचांते तिलकल्कैः स्नाता गृहं च विशेयुरिति विज्ञमृक्तेः विष्णुपुराणे च अस्थिसंचयादूर्ध्व
मंगास्पृक्तः शय्यासनोपभोगस्तु सपिंडानामपीष्यते अस्थिसंचयनादूर्ध्वं संयोगस्तु न योषिताम् भारते तिला
न्दत्त्वा पानीयं दीपं दद्यात् जाग्रतः ज्ञातिभिः सह भोक्तव्यमेतत्प्रेतेषु दुर्लभम् मनुः मांसाशनं च नाश्नीयुः शयीरंश्च पृ
थक् क्षितौ देवजानीयकारिकायाम् लवणक्षीरमाषान्नाद्युपमांसानि पायसम् वर्जयेदाहृतान्नेषु बालवृद्धातुरा
न्विना उपवासो गुणे प्रेते पत्न्याः पुत्रस्य वा भवेत् मरीचिः प्रथमेह्नि तृतीये च सप्तमे दशमे तथा ज्ञातिभिः सह भोक्त
व्यमेतत्प्रेतेषु दुर्लभम् भोजनं च दिवैव दिवा चैव तु भोक्तव्यममांसं मनुजर्षभ इति विष्णुपुराणात् क्रीत्वा लब्धा
वादितान्नमश्नीयुरिति पारस्करोक्तेश्च मदनरत्ने हारीतः पाणिषु मन्नमयपुटकेषु वाश्नीरन् देवजानीये
शुद्धितत्त्वे आदिपुराणे ब्राह्मे आशौचमध्ये यत्नेन भोजयेच्च स्वगोत्रजान् अन्यदिने तु मदनरत्ने ब्राह्मे यस्य य
स्य तु वर्णस्य यद्यत्स्यात्पश्चिमं त्वहः स तत्र गृहशुद्धिं च वस्त्रशुद्धिं करोति च अन्त्यकर्मकालीनवस्त्रयोस्तु तत्रैवो
क्तम् ग्रामाद्बहिस्ततो गत्वा प्रेतस्पृष्टे तु वाससी अन्त्यानामाश्रितानां च त्यक्त्वा स्नानं करोति चेति शंखः दानप्र राम:
तिग्रहो होमः स्वाध्यायः पितृकर्म च प्रेतपिंडक्रिया वर्ज्यमाशौचे विनिवर्तते काठकगृह्ये यत्र प्राणोत्क्रमस्त २९३

त्रान्वहं महाबलिं कुर्यादिति पारस्करः तदानीं तेव वस्त्रं तंडुलं दीपं कांस्यभाजनम् प्रेताय दद्यात् आशौचप्रकाशे भारद्वा
जवासोन्नं च जलं कुंभ प्रदीपं कांस्यभाजनम् नग्नप्रच्छादने श्राद्धे ब्राह्मणाय निवेदयेत् भृगुः तिलोदकं तथा पिण्डा
न्नग्नप्रच्छादनादिकम् रात्रौ न कुर्यात् स्वाध्यायादि कुर्यान्निरर्थकम् अथ प्रेतपिंडाः यद्यपि हेमाद्रौ पारस्करेणाब्रा
ह्मणे दशपिंडास्तु क्षत्रिये द्वादश स्मृताः वैश्ये पंचदश प्रोक्ताः शूद्रे त्रिंशत्प्रकीर्त्तिताः इत्युक्तम् तथापि प्रेतेभ्यः सर्ववं
र्णेभ्यः पिंडान् दद्याद् दशैव त्विति तत्रैवोक्तेः सर्वे दशैव ज्ञेयाः मदनरत्नेप्येवम् तथा च हेमाद्रौ ब्राह्मपद्मयोः जातु
न्याशौचं तुल्यास्तु वर्णानां क्वचिदेव हि देश धर्मानुरक्ष्यात्प्रेतपिंडान्वयात्यपि इत्युक्त्वा विप्रान्यथ दश मा पिंडोक्क
श्चैउक्तः देयस्तु दशमः पिंडो राजा वै द्वादशेहनि वैश्यानां वै पंचदशे देयस्तु दशमस्तथा शूद्रस्य दशमः पिंडो मासेपू
र्णे ह्रि दीयते इति युग्ममतादेः सद्यः शौचे त्र्यहाशौचे तत्रैवोक्तम् सद्यः शौचे प्रदातव्याः सर्वेपि युगपत्तथा त्र्यहाशौ
चे प्रदातव्याः प्रथमे ह्येक एव हि द्वितीये हनि चत्वारस्तृतीये पंच चैव हि अथ प्रकारांतरं श्राद्धक्रमम् शातातपः आशौ
चस्य ह्रासे पिंडान्दद्याद्दशैव तु तत्रैकपात्रे संकल्प्य दश पिंडान्दद्यात् उत्तरीयशिलापात्रकर्त्तृद्रव्यविपर्यये
पूर्वदत्तां जलांजलिं दद्यात्पूर्व पिंडांस्तथैव च इति गृह्यकारिकायां पात्रविपर्यये दोषोक्तेः शिलाविपर्यये तु स्फोटादेना
कृत्तिः अक्षाभ्यंजनादिपदक्रमेणाः एकहायनीनयनवद्वप्रयोजकत्वात् तद्वाच्यलौकिकग्रहणम् केचित्तु नवा
न्यादाय भाण्डान्याहुः क्रचरुकं तथेति प्रचेतसोक्तेः पात्रानेकत्वमाहुः क्रियाकर्त्तुर्निरोधे न्येन शेषः समापनीयः
एवं क्रियाप्रवृत्तानां यदि कश्चिद्विपद्यते तद्बन्धुनाः क्रिया कार्या सर्वैर्वा सहकारिभिरिति भक्तित्वे वृहस्पति स्मृतेः
वाराहे स्थंडिले प्रेतभागं तु दद्यात्पूर्वाह्ण एव तु कृत्वा तु पिंडसंकल्पं नाम गोत्रे समुदीर्य मरीचिः प्रेतपिंडं वहिर्दद्या

नि॰ सिं॰ २९४

दर्भमंत्रविवर्जितम् प्रागुदीच्यां चरुं कृत्वा स्नातः प्रयतमानसः दर्भवर्जेन मनुपनीतपरम् असंस्कृतानां भूमौ पिंडं दद्या
त्संस्कृतानां कुशेष्विति प्रचेतसोक्तेः मिताक्षरायामप्यनंतरे भूमौ माल्यं पिंड पानीयमुपलेपयाद धुः श्रुतेः पुच्छः फ
लमूले स्ववयसा शाकेन च गुडेन वा तिलमिश्रं तु दर्भेषु पिंडं दक्षिणतो हरेत् तद्भूमौ प्रसेकं पुष्पं च धूपदीपं तथैव च
शालितां ग्राकुंभिर्वा पिशाकैर्वाप्यथ निर्वपेत् प्रथमेहनि यद्द्रव्यं तदेव स्याद्दशाहिकम् मदनरत्ने माधवीये तैजसे
मृन्मये वाप्यपात्रे सशेष्यं यत्नतः लौकिकाग्नावधिः श्रित्य पचेदन्नं च तन्द्रुतम् स्नात्वा यातिलसंमिश्रं प्रपद्या
दर्भसंस्तरे शुद्धितत्त्वे देवजातीये च ब्राह्मे प्रथमेहनि यो दद्यात्प्रेतायान्नं समाहितः अन्नं नवसु चान्येषु स एव
प्रदद्यात्वपि मृन्मयं भांडमादाय नव स्नातः सुसंयतः तंडुलप्रसृतिं तत्र त्रिः प्रक्षाल्य पचेत्स्वयम् सपवित्रे
स्तिलैर्मिश्रं कृमिकेशविवर्जितम् दूरोपातितः क्षिप्त्वा [illegible] गोरमृत्तिकाम् तत्पृष्ठे संस्तरे दर्भान् धाम्यायायान्
दशास्समवान् ततोवनेजनं दद्यात्संस्मरन्गोत्रनामनी तिलसर्पिर्मधुक्षीरैः ससिक्तं तत्प्रमेव हि दद्यात्प्रेता
य पिंडं तु दक्षिणाभिमुखः स्थितः अर्घैः पुष्पैस्तथा धूपदीपैस्तोयैश्च शीतलैः ऊर्णातंतुमयैः शुद्धैर्वासोभिः
पिंडमर्चयेत् दिवसाद्दिवसे देयः पिंड एवं क्रमेण तु सद्यः शौचे प्रदातव्याः प्रथमेत्वेक एव हि एकस्तोयांजलिस्त्वेव
पात्रमेकं च दीयते द्वितीये द्वौ तृतीये त्रीनित्याधुक्ताः एवं स्युः पंचपंचाशत्तोयस्यांजलयः क्रमात् तोयपात्रा
णि तावंति संयुक्तानि तिलादिभिरिति पात्रकल्पः अत्राहःपदमहोरात्रपरम् तेन रात्रावपि दद्यदिति गौडाः
दिवसपदाद्रात्रौ नेति मैथिलाः सद्यः शौचे सपिंडेन दशपिंडप्रकांते पत्रागमेपि समनदद्यात् असगोत्रः सगो
त्रो वेति प्रायुक्तेः दाहकश्चैव दशाहं कुर्यादिति मिताक्षरायाम् शुद्धितत्त्वे वायवीयेपि असगोत्रः सगोत्रो वा

राम: २९४

सर्वपियुगपत्तथा। त्र्यहाशौचे प्रदातव्यास्त्रयः पिंडाः समाहितैः। द्वितीये चतुरो दद्यादस्थिसंचयनं तथा। त्रींस्तु दद्यात्तृतीये किं वक्ष्ये क्षालयेत्ततः दशाहे पिंडदातव्याः ५

यदिस्त्रीयदिवापुमान् यस्याग्निदानात्प्रेतस्यपिंडंदद्यात्सएवहीति तत्रैव पूरकेणतुपिंडेनदेहोनिष्पद्यतेयतः कृतस्यकरणा
योगात्पुनर्नावर्त्ततेक्रिया शुद्धिप्रकाशनायवीयापि निवर्त्तयतियोमोहात्क्रियामन्यानिवर्त्तिनाम् निर्विघ्नस्तेनभवति
पितृदाहोपजायते तस्मात्प्रेतक्रियायेनकेनापिचक्रियायदि नतान्निवर्त्तयत्प्राज्ञःसताधर्म्ममनुस्मरन्नेति आदित्य
पुराणे पितृशब्दस्वधाचैवनप्रयुञ्जीतकर्हिचित् अनुशब्दंतथाचाहप्रयत्नेनविवर्ज्जयेत् उपतिष्ठतमर्यपिंडः प्रेता
येतिसमुच्चरेत् क्रियानिबन्धेव्यासः प्रेतायपिंडंदत्वातुतन्नाम्नीयादिनाशये भविष्ये औदनाभिप्रशक्तूनाशाकमू
लफलादिषु प्रथमेहनियद्दद्यात्तद्दद्यादुत्तरेहनि गृहद्वारेश्मशानेवातीर्थेदेवगृहेपिवा यत्राद्येदीयतेपिंडस्तत्रसर्वंस
मापयेत् ब्राह्मे शिरस्त्वाद्येनपिंडेनप्रेतस्यक्रियतेसदा द्वितीयेनतुकर्णाक्षिनासिकाश्चसमासतः गलांसभुजव
क्षांसितृतीयेनयथाक्रमम् चतुर्थेनतुपिंडेननाभिलिंगगुदानिच जानूजंघेतथापादौपंचमेनतुसर्वदा षष्ठेनमर्मा
णिसप्तमेनतुनाडयः दंतलोमान्यष्टमेनवीर्यंतुनवमेनच दशमेनतुपूर्णत्वंतृप्तताक्षुद्विपर्ययइति
याज्ञवल्क्येनतुपिंडजेज्ञाक्षताद्यंप्रेतायाल्लिदिनत्रयमित्युक्तम् अत्रफलतारतम्यज्ञेयमितिविज्ञानेश्वरः तेन
स्वाहाशौचपरत्वंदेवयातिकौक्तंचितम् आशौचस्यान्तासेपिपिंडान्दद्यादृशैवत्विति वचनाच्चदिनत्रयावश्यकत्वा
दिमितिहारलतादयः शातातपः जलमेकाहमाकाशेस्थाप्यक्षीरंचमृन्मये पारस्करः मृन्मयेतारात्रिंक्षीरोदके
विहायसिनदध्युः प्रेतात्रस्नाहीत्युदकंपिबचेदमितिक्षीरमिदमत्रावतिगौडाः गारुडेतु अपक्वमृन्मयेपात्रं
दुग्धंदद्याद्दिनत्रयमित्युक्तम् हेमाद्रौप्राप्तेतुदशाहमुक्तम् तस्मात्त्रिधेयमाकाशेदशरात्रंपयोजलम् सर्वता
पापशान्त्यर्थंमध्वश्रमविनाशनम् देवजातीयेकारिकायाम् तत्रप्रेतोपकृतयेदशरात्रमखण्डितम् कुर्यात्प्र
दीपतैलेनवारिपात्रंचमार्त्तिकम् भोज्याद्भोजनकालेतुभक्तमुष्टिंचनिर्वपेत् नामगोत्रेणसंबुध्याधरित्र्यां

नि॰सिं॰ २९५ पितृजज्ञवत् प्रजानाथः भूलोकात्प्रेतलोके तु यं तु श्राद्धं समाचरेत् तत्पाथेयं हि भवति मृतस्य मनुजस्य तु अथ दशाहमध्ये
दर्शपाते निर्णयः भविष्ये प्रवृत्ताशौचे तत्र तु यदि दर्शः प्रपद्यते समाप्य चोदकं पिण्डान् स्नानमात्रं समाचरेत् ओष्ठमृ
गः आशौचमन्तरा दर्शो यदि स्यात्सर्ववर्णिनाम् समाप्तिः प्रेततन्त्रस्य कर्या दिव्याहशातमः अन्तर्दशाहे दर्शश्चेत्तन्त्रस
र्वं समापयेत् पित्रोस्तु यावदाशौचं दद्यात्पिण्डाक्षताञ्जलीन् इदमपि त्र्यहमध्ये दर्शपातेन तूर्ध्वं दर्शे तु पित्रोरपि तन्त्रसमाप्य
मेव। पित्रोराशौचमध्ये तु यदि दर्शः समापयेत् तावदेवोत्तरं तन्त्रं पर्यवस्येत् अहात्परमिति शालवाकेः अन्येषां तु त्र्यहम
ध्येऽपि समाप्तिरिति पराशरमाधवीये निर्णयामृते चोक्तम् कालादर्शेऽपि दर्शो दशाहमध्ये स्यादूर्ध्वं तन्त्रं समापयेत् त्रि
रात्रादुत्तरं पित्रोर्मृतावपि तु विनिश्चयः मदनपारिजाते तु गालवीयमापदन्नौरसपुत्रादिविषयम् अहोर्ध्वमपि पित्रो
र्न तन्त्रसमाप्तिरित्युक्तम् मदनरत्नेऽप्येवम् मम तु देशाचारतो व्यवस्थेति प्रतिभाति अथास्थिसंचयः तत्राश्वलायने
चकृष्णपक्षे एकादशी त्रयोदशी दर्शे आषाढ फाल्गुनी प्रोष्ठपदाभिन्नर्क्षे उक्तम् तदाशौचमध्ये संभवेत् ऊर्ध्वं चम्रा
गद्यात्करणं ज्ञेयम् आशौचमध्ये तु मदनरत्ने संवर्तः प्रथमेऽह्नि तृतीये वा सप्तमे नवमे तथा अस्थिसंचयनं कार्यं
दिने तद्गोत्रजैः सह ब्रह्मपरिशिष्टे तु अपरे युस्तृतीये वा अस्थिसंचयनं भवेदिति द्वितीयप्युक्तो विष्णुकात्याय
तो संचयनं चतुर्थ्यामिति माधवीये यमः भौमार्कमन्दवारेषु तिथियुग्मे विवर्जयेत् वर्जयेदेकपादर्क्षे अस्थिसंचय
प्रदानं जन्मनक्षत्रे त्रिपादर्क्षे विशेषतः ब्राह्मे चतुर्थे ब्राह्मणानां तु पंचमेऽहनि भूभृताम् नवमे वैश्यजातीनां शूद्राणां
दशमात्परम् दशमेऽहनीति पाठः शौनकः पालाशे त्वस्थिदाहे च सद्यः संचयनं भवेत् काम्यमरणे तु तस्य त्रिरात्रमा
शौचं द्वितीये त्वस्थिसंचयमित्युक्तम् अङ्गिराः प्रेतीभूतं तनयो द्विजस्य यः सुचिरं करोति चेत् देवतानां तु यजनं तेषां प्रत रामः
यदेवताः तद्विधिः स्वस्वसूत्रेऽभिदृष्टेनोच्चरेयः हेमाद्रौ नागरखण्डे श्रौतं संचयनस्यार्थे तानि वक्ष्ये च साम्प्रतम् २९५

यत्रस्थाने भवेन्मृत्युस्तत्र श्राद्धं प्रकल्पयेत् एकोद्दिष्टं ततो मार्गे विश्रामो यत्र कारितः ततः संचयनस्यार्थे तृतीये श्राद्
मिष्यते अपरार्के मदनरत्ने च ब्राह्मे सद्यः शौचे तथैकाह सद्यः संचयनं भवेत् त्र्यहाशौचे द्वितीयेह्नि कर्तव्यस्त्वस्थिसं
चयः तत्रैव श्मशाने देवतायागं चतुर्थदिवसे चरेत् मृन्मयेषु च भाण्डेषु पक्वं भेषु रुचकेषु वा सुपक्वं भक्ष्यभोज्यं स्वपा
यसैः पूनकैस्तथा फलैर्मूलैर्वनोत्थैश्च पूज्याः क्रव्याददेवताः धूपादीपैस्तथा माल्यमर्घ्यं दद्यात्त्वरान्वितैः तत्र पाणि
पूरणानि श्मशानान्तेः समेततः दिने दद्याद्धविं क्रव्यातेः सर्वैरनहंकृतैः नमः क्रव्यादमुख्येभ्यो देवेभ्य इति सर्वदा यत्र
श्मशाने देवास्तु भगवन्तः सनातनाः तेस्मत्सकाशाद्गृह्णन्तु बलिमष्टांगमक्षयम् प्रेतस्यास्य शुभान्प्रयच्छन्तु शा लोकान् ६
श्वतान् अस्माकमायुरारोग्यं सुखं च ददताचिरम् एवं कृत्वा बलिं सर्वान् क्षीरेणाभ्युक्ष्य वारयेत् प्रेतस्यास्थीनि गृ
ह्णाति प्रधाना गोत्रजाः शिव पंचगव्येन संस्नाप्य क्षौमवस्त्रेण वेष्ट्य च प्रक्षिप्य मृन्मये भाण्डे नवे साक्षाद्दते शुभे अ
रण्ये वृक्षमूले वा गुह्यं संस्थापयत्यपि गृहीत्वास्थीनि तद्भस्म नीत्वा तोये विनिक्षिपेत् ततः संमार्जनं भूमेः कर्तव्यं
गोमयांबुभिः पूजा च पुष्पधूपाद्यैर्बलिभिः पूर्ववत्क्रमादिति तत्रैव तत्स्थानाच्छनकैर्नीत्वा कदाचिज्जाह्नवीजले
कश्चिन्निक्षिपति सत्पुत्रो दौहित्रो वा सहोदरः मातुः कुलं पितृकुलं वर्जयित्वा नराधमाः अस्थीन्यन्यकुलस्थस्य नी
त्वा चान्द्रायणं चरेत् तत्रैव ब्रह्माण्डपुराणे अस्थीनि मातापित्रोः पूर्वजानां नयति गंगामपि यः कदाचित् सद्बांधवस्या
पि दयाभिभूतास्तस्यानुतीर्थानि फलप्रदानि स्नात्वा ततः पंचगव्येन सिक्त्वा हिरण्यमध्वाज्यतिलैश्च योज्या ततस्तु
मृत्पिण्डपुटे निधाय पश्यन्दिशं प्रेतगणोपगूढम् नमोस्तु धर्माय वदेत्प्रविश्य गंगाम्भसि प्रीत इति क्षिपेच्च उत्थाय भा
स्वन्तमवेक्ष्य सूर्यं सदक्षिणां विप्रमुखाय दद्यात् एवं कृते प्रेतपुरस्थितस्य स्वर्गे गतिः स्यात्तु महेन्द्रतुल्या यमः गंगा
तोयेषु यस्यास्थि निक्षिप्यते शुभकर्मणः न तस्य पुनरावृत्तिर्ब्रह्मलोकात्सनातनात् तथा अस्तंगते गुरौ शुक्रे न

नि॰ सिं॰
२९६

यामासे मलिम्लुचे गंगायामस्थिनिक्षेपं न कुर्यादिति गोतमः दशाहान्तर्नै दोषः दशाहाभ्यन्तरे यस्य गंगातोयेऽस्थिमज्जति गंगायां मरणाद्यत्फलं तद्‌धिकफलमवाप्नुयादिति मदनरत्नेऽभ्युक्तेः शौनकः हेमश्राद्धं ततः कुर्यात्पितृतुष्टिप्रयत्नतः पिंडदानं प्रकुर्वीत तेन श्वेतिलतर्पणम् अस्थिक्षेपांगवेदम् अजिनं कंबलाद भोगो केशाः शणमेव च मृत्तपत्रसप्तधा वेष्टनं स्मृतम् हेमं च मौक्तिकं रूप्यप्रवालनीलकं तथा निक्षिपेदस्थिमध्ये तु शुद्धिर्भवति नान्यथा ततो होमं प्रकुर्वीत तिलाज्येन विचक्षणः उद्धरेत्ततस्तेन हुतं दद्यात्तरशातम् ततो गत्वा क्षिपेत्तीर्थे स्पर्शे दोषो न विद्यते मूत्रपुरीषाचमनं कुर्वन्नास्थीनि धारयेत् अन्यश्चात्र विशेषोऽस्थिस्थलीसेतो दिवोदासीये च ज्ञेयः संचयनोत्तरश्राद्धमाहाश्वलायनः श्राद्धमस्मै दद्युरिति स्मृत्यर्थसारे संचयने कृते मनुष्यलोकं गच्छतः पाथेयश्राद्धमामेन कार्यमिति अनुपनीतस्य न संचयनम् अथ नवश्राद्धम् पृथ्वीचंद्रोदये आंगिरसः प्रथमेऽह्नि तृतीये च पंचमे सप्तमे तथा नवमैकादशे चैव तन्नवश्राद्धमुच्यते शिवस्वामी नवश्राद्धानि पंचाहुराश्वलायनशाखिनः आपस्तंबाः षडित्याहुर्विभाषा चितरेषु हि पंचैकादश्याहिकं विना मरणाद्विषमे षु दिनेष्वेकैकं नवश्राद्धं कुर्यादिन माद्यदिनवमं विच्छिद्य पैतैकादशेन तु कुर्यादिति मदनरत्ने बोधायनोक्तेः भविष्ये नवसप्तविप्राणां राज्ञां नवश्राद्धान्यनुक्रमात् आद्यंतयोर्वैश्ययोस्तु षडित्याहुर्महर्षयः हेमाद्रौ कद्रुवसिष्ठः अलब्धा तु नवश्राद्धं प्रेतत्वान्नैव मुच्यते अर्वाक्कृतु द्वादशाहस्यालब्धा तरति दुःकृतम् अतः षडेव एतान्येव विषमश्राद्धानीत्युच्यते नागरखंडे तु पंचमे सप्तमे नवमे दशमे सप्तमे तथा दशमेकादशे चैव नवश्राद्धानि वैत्युक्तम् कात्यायनस्तु चतुर्थे पंचमे चैव नवमैकादशे तथा यदत्र दीयते जंतोस्तन्नवश्राद्धमुच्यते प्रथमे सप्तमे चैव त्वाद्य पादे व्यासपाठः बह्वृचानां तु नवश्राद्धं दशाहानि न वमिश्रे तु षड्‌हनि त्युक्तम् नारायणवृत्तौ दीपिकायाम् अथ तनुयादाद्य चतुर्थे दिने श्राद्धं पंचमसप्तमाष्टनवदि राम॰
२९६

नाम्नोकरणमंत्रश्चएकंनाथ्यतिलोदकम् अनपत्येषुसर्वेषु सर्वेषुनस्वाधानाभिरम्यताम् ७

युक्तेषुयुग्माद्विजैः प्रथमेह्नितृतीयेह्निपंचसप्तनवस्वपि द्वौद्वौपिंडौप्रदातव्यौशेषेष्वेकंतुविन्यसेत् एकोविषमश्राद्धेवयवु
पिंडश्चैवकइतिवाविन्यर्थः अत्रपूर्णस्वामेदात्अवस्था अपरार्के भविष्ये नवश्राद्धंत्रिपक्षंचषण्मासेमासिकानिच नक
रोतिसुतोयस्तुतस्याधःपितरोगताः वाराह गतासिदिव्यलोकत्वंकृतान्तविहितात्पथः मनसावायुभूतेनविप्रेत्वा
हंनियोजयेत् पूजयिष्यामिभोगैस्त्वामेवंविप्रेनिमंत्रयेत् आवाहनंपितृत्वेव इहलोकंपरित्यज्यगतोसिपरमांगति
मू मनसावायुभूतेनविप्रेत्वाहंनियोजयेइति तत्रैवपरिशिष्टे अनूदकमधूपंचगंधमाल्यविवर्जितम् नवश्राद्धम
मंत्रंचपिंडोदकविवर्जितम् उदकमर्घ्यःपिंडादकंश्रूवनापितरइत्येवनयनादि एकोद्दिष्टेषुसर्वेषुनस्वधानाभिरम्य
ताम् स्वस्त्यस्तुविसर्जदेवसंकल्पस्थापनंवर्जितम् एकोद्दिष्टस्यापिंडेतुअनुशब्दोनविद्यते पितृशब्दंनकुर्वीतपितृहा
वोपजायते सपिंडनात्प्रागितिहेमाद्रिः तेननस्वधाचप्रयुंजीतप्रेतश्राद्धेदशाहिके इतिकृष्णभट्टीयेगर्भकोदशाहिकात्ते
एकादशाहस्वधाप्रयोगएवेतिहारलतापरास्तारत्नावल्याम् आशिषोद्विगुणादर्भाजपयाशीःस्वस्तिवाचनेपितृश
ब्दःस्वसंबंधःशर्मशब्दस्तथैवच पात्रालंभोवगाहश्च उल्मुकोल्लेखनादिकम् तृप्तिप्रश्नश्चविकिरःशेषप्रश्नस्तथै
वच प्रदक्षिणाविसर्गश्चसीमांतगमनंतथा अष्टादशपदार्थाश्चप्रेतश्राद्धेविवर्जयेत् अत्रस्वधापितृनमःशब्दा
तिलोसीतिमंत्रेप्रेतशब्दोहेनतूष्णींवातिलाचमनम् तूष्णींवातिलाचमनम् तूष्णीमर्घ्यदानम् अमुष्मैस्वाहेतिप्र
तनाम्नापाणिहोमः नाम्नोएकःपिंडःतिनयनमंत्रेऊहः अनुमंत्रणादित्यमंत्रकः अभिरम्यतामितिविसर्जन
मू एवंनवश्राद्धवर्जैकोद्दिष्टेषु नवश्राद्धेतुमंत्रकंसर्वमितिनारायणवृत्तिः क्रियानिबंधे उत्तानस्थापयेत्पात्र
मेकोद्दिष्टेसदाबुधः न्युब्जंतुपार्वणेकुर्यात्तस्योपरिकुशान्न्यसेत् नवश्राद्धंगृहेकार्यंभार्यापुत्रादयोपिवा सपिंडी
करणंतानिप्रेतश्राद्धानितानिवैतानिस्युर्लौकिकेवह्नावित्याहचाश्वलायनः इदसंभवेत्तेनकार्यनवश्राद्धेषु

नि॰सिं॰ यच्छिष्टं पर्य्युषितं चयत् दंपत्योर्भुक्तशेषं तु न तद्भुंजीत कर्हिचित् इत्यंगिरोवचनलिंगात्. दाम्यां तदतु कृच्छ्राभ्यां शुद्धिः
२९७ स्यात्तु विवेकिनामिति श्राद्धोद्योतः विप्रैस्तु निर्णयामृते कल्पवः नवश्राद्धं मासिकं च यद्गृहे तेन तु भवेत् तदुत्तरे सात रा॰२
श्राद्धं तु षष्ठं प्रचक्षते हेमाद्रौ गालवः शावेतु सूतकं चेत्स्यात्तच्छ्राद्धं चमतोन तथा नवश्राद्धानि दद्यान्नियथाकालमा
धात्क्रमम् श्राद्धारोहशौतु नवश्राद्धानि सर्वाणीत सपिंडीकरणं पृथक् एकस्त्वं वोत्सर्गो गौरकात्तत्र तिष्ठेत्त श्राशौचा
त्यदिने कार्यं मुक्ते श्राद्धे यस्य यस्य तु वर्णस्य यद्धत्स्यात्स्वि भत्वेहः सूतत्र व स्त्रशुद्धिं च गृहशुद्धिं करोत्यपि समा
प्यदशमे पिंडं भृतस्य वस्त्रे तु वाससी. अंत्यानामाश्रितानां च स्नानं करोति च श्मश्रुलोमनखानां च यत्याज्य
तत्तोहात्यपि गौरसर्षपकल्केन स्युत शिरः स्नानं ततः कृत्वा तोयेनाचम्य वाग्यतः ख म भंगासुवर्णं च स्पृष्ट्वा शु
द्धो भवेन्नरः क्रियानिबंधे गरुडत्पारिकायाम् अत्रापि ऊर्ध्वं युतत्स्वसि बिम्प स्तथा दिनम् प्रेतायमधममंत द्वहेती
येचयमायवै तथा कृतीत्र प्राप्तिताः सतोज्ञाति संबंधिबांधवाः ६पुरभ्यगतः पूर्व त्रीं स्त्रीं धर्मोदकांजलीन् पूर्ववन्ना
मगोत्राभ्यानियमोनेह कश्चन मस्तरतोवि पुहारीतो श्राशौचांते कृतश्मश्रुकर्मा एणस्तिलकल्कः सर्षपकल्के क॰६
वीस्नाताः मूलवाससा गृहं प्रविश्य स्तत्र शांतिकं कृत्वा ब्राह्मणपूजनं कुर्यादिति देवलः दशमेहनि संप्राप्ते स्ना
नग्रामाद्बहिर्भवेत् तत्र त्याज्यानि वासांसि केशश्मश्रुनखानि च अपरार्के वृहस्पतिः नवमे वाससां त्यागो
नखरोम्णां तथांतिमे तत्र व्यासः श्राशौचांत्यदिने क्षौरं जनन्या च गुरौ मृते एतत्प्रेताल्पवयसामित्याहापि
स्तंबः अनुभाविनां च परिवपनमिति अनुभाविनः कनिष्ठाः इति विज्ञानेश्वर रत्नाकरादयः श्राशौचे च मनुः राम॰
भवतां पुंसां सर्वशौचे च मुंडनम् आज्ञयानरपतेर्द्विजन्मनां दारकर्मणि मृते न सूतके षुच बंधमोक्षमखदीक्षा २९७

केशश्मश्रुलोमनखानिवापयीतशिखांवर्जं १

ष्वपि होरमिळ्मखिलेष्वुचो ऽप्युइतिरत्नमालोक्तेर्जननाशौचेपीतिमुक्तित्वाद्यः अत्र देशाचारतो व्यवस्थापरिशिखावर्जं
मितिगोभिलोक्तेः यत्त्वापस्तंबः नसमावृत्ताव्यपेयुरन्यत्रविहाराद्दीक्षके विहारोदर्शादियागः तेनविनासमावृत्ता
गृहस्थानवपेयुरित्यर्थः यच्च कथाछिन्नत्तियः केशानंतमहद्ब्रह्मघातिनमिति तत्केशश्मश्रुधारयावास्मीभवतिस
न्ततिरितितदानधर्मोक्तेःकाम्यपरम् अनुभाविनः पुत्रादयएवेत्येके पुत्रःपत्नीचवपनंकुर्यादत्तेयथाविधि पिंडदा
नोचितान्योपिकुर्याद्विकृच्छ्रसमाहितःइति अपरार्केव्यासोक्तेः यत्तुमिताक्षरायाम् द्वितीयेहनिकर्तव्यंक्षुरकर्मप्रयत्नतः
तृतीयेपंचमेवापिदशमेवाप्रदानतःइति आप्रदानतइतिचतुर्थ्यादीनि तत्प्रथमदिनेसंभवेज्ञेयम् अलुप्तकेशोयःपूर्वं
सोत्रकेशान्प्रवापयेत् द्वितीयेऽह्नितृतीयेऽह्निपंचमेसप्तमेपिवा यावच्छ्राद्धंप्रदीयेततावदित्यपरस्मृतौमितिमाधवीये
मदनरत्नेचबोधायनोक्तेः मदनपारिजातेतुदशमेप्रथमेचसमुच्चयउक्तः यत्तुदशमंपिंडमुत्सृज्यरात्रिशेषेशुचि
र्भवेदितितदेकादशाहश्राद्धांगविप्रनिमंत्रणार्थंज्ञेयम् अथैकादशाहः मनुः विप्रःशुध्यत्यपःस्पृष्ट्वाक्षत्रियोवाहना त८
युधे वैश्यःप्रतोदंरश्मीन्वायष्टिंशूद्रःकृतक्रियः शुचितिचेदेवलः अब्राहःसुनिवृत्तेषुसुस्नाताःकृतमंगलाः आशु
श्राद्धमशुद्धोपिकुर्यादेकादशेहनि कर्तुस्तात्कालिकीशुद्धिरशुद्धःपुनरेवसःइतिहेमाद्रौशंखोक्तेः पैठीनसिः एकादशे
क्रियच्छ्राद्धंतत्सामान्यमुदाहृतम् चतुर्णामपिवर्णानांसूतकंतुपृथक्पृथक् यत्तुमरीचिः आशौचांतेततःसम
क्पिंडदानंसमाप्यते ततःश्राद्धप्रदानंस्यात्सर्ववर्णेष्वयंविधिरितितत्सर्ववर्णानांदशाहाशौचपरम् यत्तुविष्णुः
अशौचापगमइतियत्तुगौडः अथहारीतः श्वोभूतेएकोद्दिष्टंकुर्यात् यच्चवैजवापः ऊर्ध्वंदशम्याअपरेद्युरिति तद्विप्र
विषयम् एतेनदशमपिंडान्तकंपक्षेऽवयवपिंडासमाप्तौ कथमेकादशाहेश्राद्धमितिसर्वोक्तिःपरास्ताः वचनादाशौ
चमध्येइवंतत्राप्यविरोधात् भविष्ये एकादशम्यो[illegible]दद्यादेकोद्दिष्टंहनि भोजनंतत्रवैकस्यब्राह्मणायमहात्

न यत्तु मात्स्ये एकादशेऽहनि यथाविधानेकादशे वतु सूत्रादिः सूतकांतेनु भोजयेदयुजो द्विजानिति तद्ग्रहणश्राद्धपर
मितिमदनपारिजातः गौडास्त्वमस्माद्वचनात्क्षत्रियादीनामाशौचांते एकादशाहः यत्तु रामायणे समतीते दशाहे तु कृत
शौचो यथाविधि चक्रे द्वादशिकं श्राद्धं त्रयोदशिकमेव च द्वादशिकं द्वादशाहेनेति वृत्त्यंत्रयोदशाहश्राद्धम् त्रयोदशे शूद्रको
चतुर्दशाहे विधेयम् सपिंडनपाथेयादिविधिवाक्यादेकादशाहाशौचांतयोर्विकल्प इत्येके सद्यःशौचादौ युद्धहता
देरेकादशाहः अन्येषामाशौचांत इति वयं कौर्मे एकादशेऽह्नि कुर्वीत प्रेतमुद्दिश्य भावतः द्वादशे वाह्नि कर्तव्यमनिध
व्यथवाहनि बृहस्पतिः वस्त्रालंकारशय्यादि पितुर्यद्वाहनादिकम् गंधमाल्यैः समभ्यर्च्य श्राद्धभोक्त्रे तदर्पयेत् श्रो
त्रियाभोजनीयास्तु नवसप्तत्रयोदश ज्ञातयो वांधवा निःस्वास्तथा चातिपयापर दैवयाज्ञिकनिबंधे एकादशसु विप्रेषु
प्रेतमाद्यद्यभोजयेत् तत्राद्यायचशय्यादि दद्यादाद्यमिति स्मृतम् एकवन्मंत्रानूहनेकोद्दिष्टेवकुर्वचनानानेकवचनां
तान्वदेदित्यर्थः एतदप्यार्थत्वात् अस्य विधेः गौणकालमाह हेमाद्रौ बौधायनः एकोद्दिष्टं त्वेवस्याद्द्वादशेऽहनि वा पुनः
अतऊर्ध्वमयुग्मेषु कुर्वीताहस्सु शक्तितः अर्धमासेऽथ च मास्यतः संवत्सरेऽपि वेति तत्र वल्लभः हारीतः एकोद्दिष्टं
तु कुर्वीत पाकेनैव सदा स्वयम् अभावे पाकपात्राणां तदहः समुपोषणम् गोभिलः ब्राह्मणं भोजयेदाद्ये होतव्यम
नलेतथा पुनश्च भोजयेदन्यं द्विरावृत्तिर्भवेदिति एतदाद्यमासिकाभ्याब्दिकयोः सिद्धमिति भट्टाः युद्धहतादेस्तु स
त्यव्रतः सद्यःशौचेपि दातव्यं प्रेतस्यैकादशेऽहनि सएव दिवसस्तस्य श्राद्धशय्यासनादिषु एवमेकादशाहो ऽतो
द्वितीये ह्न्येकादशाहं वदन् गौडः स्मार्तगौडश्चपरास्तः एतेनाद्यमेकादशेऽहन्याशौचानंतरदिने परम् विज्ञान
केः प्रागुक्तैः शंखादिवचनानां वामाकरत्वादिति वदन्तः कल्पतरुवाचस्पतिप्रमुखाः सर्वमहानिबंधविरोधादुपे
क्ष्याः अहाशौचेपि कर्तव्यमाद्यमेकादशेऽहनि अतीतविषये रुघस्त्रेहोर्ध्ववातदिष्यते जाज्ञवल्क्यः एकोद्दिष्टं दै

पे ३

वहीनमेवकार्य्यैकपवित्रकम् आवाहनाग्नौकरणरहितंत्वपसव्यवत् उपतिष्ठतामित्यक्षय्यस्थाने विप्रविसर्जनेऽभिरम्यता
मितिवदेयुस्तेभिरताःस्मह स्वदितमितितत्त्रिप्रश्नइतिकात्यायनः प्रथमेपात्रेसंस्रवानित्यस्यतृतीयेसपिधानस्यचवाध
न्नमात्रस्नुवृतेतिशूलपाणिः प्रेताः नात्रपात्रालंभोनाशिषःप्रार्थयेत् अत्रविशेषोहेमाद्रौवाराहे श्मश्रुकर्मतुकर्त्तव्यं न
खच्छेदस्तथैवच स्नपनाभ्यंजनंदद्यात्प्रायविधिपूर्वकम् तथाउपवेश्यासनेभद्रछत्रंतत्रकल्पयेत् पश्चादुपानहौदद्या
त्सर्वीरणाभरणानिच विष्णुः दक्षिणंतत्राद्भुमुक्त्वा दत्ताक्षय्योदके प्रचतुरंगुलपृथ्वीस्तिस्त्रः कर्षूः कुर्यात्कर्षूणांसमीपेऽग्नि
माधायपरिस्तीर्य्यैकैकस्मिन्नाहुतित्रयंजुहुयात्सोमायपितृमतेस्वधानमोऽग्नयेकव्यवाहनायस्वधानमोयमायांगिरस्वतेइतिस्थान
त्रयेप्राक्पिंडनिर्वपनंदधिघृतमधुमांसैः कर्षूत्रयंपूरयित्वेतन्नइतिजपेत् शेषंनवश्राद्धवत् अत्रसाग्नेरप्यनेवैश्वदेव
मनुक्तेप्राक् हृदं दशाहकर्त्तापुत्रेणवाकार्यमित्यपरार्कम् क्रियानिबंधेगृह्यकारिकायाम् तिलोसिप्रेतदेवत्यःप्रेतःलोका
न्प्रीणेतेनकाममंत्रमुक्त्वातिलानेवप्रक्षिपेदर्घपात्रेततः दक्षिणामुदकुंभंचसान्नंदत्वातथैवगाम् तस्मैदद्यात्कर्णवेतज्ञा
नान्यपिभाजनम् विप्राभावेत्वावेकोद्दिष्टत्वाग्नौपायसंस्रपयित्वाज्यभागांतेस्रपयित्वाज्यभागांतेनदद्येश्राद्धप्रयोगंकृत्वा
न्नोप्रेतमावाघगन्धाद्यैः संपूज्यपृथिवीतेपात्रमित्यादिनान्नसंकल्पादीरतामवरइत्यष्टाभिश्चतुरष्टत्राभिर्द्वात्रिंशदाकु
ताकृत्वापिंडदानादिश्राद्धंसमापयेदितियाज्ञवल्क्यः एतत्सपिंडीकरणमेकोद्दिष्टंस्त्रियाश्चापि अथवृषोत्सर्गः सचनि
त्यकाम्यः नकरोतिवृषोत्सर्गःसुतीर्थेवाजलांजलिम् नददातिसुतोयस्तुपितुरुच्चारएवसः उच्चारःपुरीषम् एष्टव्याव
हवःपुत्रायद्येकोपिगयांव्रजेत् यजेतावाश्वमेधेननीलंवावृषमुत्सृजेदितिमात्स्यकौर्म्मौ एकादशाहेप्रेतस्ययस्यनो
त्सृज्यतेवृषः प्रेतत्वंसुस्थिरंतस्यदत्तैःश्राद्धशतैरपीतिवाडशन्मतेनिंदाश्रुतेः एवंकृत्वाघवाप्नोतिफलंवाजिमखोदितम्
यमुद्दिश्योत्सृजेन्नीलंकामयन्सुफलंफलमितिकालिकापुराणात् कामधेनौ वत्सराभ्यंतरेपित्रोर्वृषस्योत्सर्गकर्मणि

त्रीलंसमलभेतपरांगतिम् । वृषोत्सृष्टःपुनात्येवदशातीतान्दशा [illegible] तेह अयंद्वादशाहेतोभविष्य। चैत्र्यांवापितृतीयायांवैशाख्यांद्वादश्यां
ञिचेति।विष्णुधर्मेमत्ताहेषुक्तः।।विषुवद्वितयेचैवमत्ताहेवाधव

नि॰ सिं॰ वृद्धिश्राद्धं न कुर्वीत तदन्यत्र समारभेत् तल्लक्षणं तु ब्राह्मे। लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः। श्वेतः खुरविषाणाभ्यां स नीलो वृष उ-
२९९ च्यते। श्वेतवर्णस्य मुखादीनि श्यामानि श्यामस्य वा श्वेतानि यस्य सोपि नीलस्तु कोमालस्याद्देवीपुराणे च चतस्रो वत्सिका भद्रा द्वे वा
सप्तमे वापि वा यत्तु पठंति वृषोत्सर्जनवेलायां वृषभावः कथंचन मृद्भिः पिष्टैश्च दर्भैर्वा विरचय्य कृत्वा विमोचयेत् न शक्यते वृषोत्सर्गो
हाम वा तत्र कारयेत् इति तन्निर्मूलम् नह्यधिहेमाद्रौ मदनरत्ने चैवेयः अथ देवजाज्ञिकेन वृषोत्सर्गो न पूर्वं पुरुषसूक्तेन विष्णुरूपि
प्रेतोद्देशेन विष्णुतर्पणमुक्तम् तत्र मूलं चिंत्यम् पारस्करः सव्येन पाणिना पुच्छं समालभ्य वृषस्य तु दक्षिणेन पात्रमादाय
सतिलोदकं सकुशं ततः प्रेतगोत्रं समुच्चार्य अमुकस्येति ब्रुवन् वृष एष मया दत्तस्तं तारयतु सर्वदा सहेमसतिलं भूमावित्युच्चा-
र्य विनिक्षिपेत् तथा विधारयेन्न तं कश्चिन्न च वाहयेत् न दोहयेच्च तां धेनूं न च कश्चन वंधयेत् स्त्रीणां विशेषः संग्रहे पतिपुत्र-
वती नारी भर्तुरग्रे मृता यदि वृषोत्सर्गं न कुर्वीत गां तु दद्यात्पयस्विनीम् पतिपुत्रयोः साहित्यं विवक्षितम् अन्वारोहणेपि गो-
दानमेवेत्युक्तं प्राक् शौचांतरेपि वृषोत्सर्गाद्यं मासिकशय्यादि दद्यादेवेत्युक्तम् नियानिबंधे स्मृत्यंतरे सूतके चैव विहितं यस्मा-
सूतकं ७ तकं यदि पिंडदानं प्रकुर्वीत वृषोत्सर्गं तथैव च न हन्यात्संज्ञकं कर्म द्वादशैकादशाहिकम् शुद्धो वा यदि वाऽशुद्धः कुर्यादेवावि-
चारयन्निति अत्र पददानमुक्तं देवजानीये गारुडे एकादशाहं प्रक्रम्य तद्दिने दीयते सर्वं द्वादशाहे विशेषतः पदानि सर्ववस्तू-
नि विशिष्टानि त्रयोदश यो ददाति मृतस्येह जीवनो ध्यात्महेतवे सुखी भूत्वा महामार्गे विनेत्येय स गच्छति तथा आसनोपान-
हो छत्रं मुद्रिका च कमंडलुः भाजनं भाजनाधारो वस्त्राण्यष्टविधं पदम् तथा भाजनाशनदानेन मुद्रिकाभोजनेन च आ-
सनत्तोपवीतेन पदं संपूर्णतां व्रजेत् महिषी रथ गोदानात्सुखी भवति निश्चितम् सर्वोपस्करयुक्तानि पदान्यत्र त्रयोद-
श यो ददाति मृतस्येह जीवन्नप्यात्महेतवे स गच्छति परं स्थानं महाकष्टविवर्जितम् त्रयोदशपदानीत्थं प्रेतायैकादशे- रामः
हनि दातव्यानि यथाशक्ति तेनासौ प्रीणितो भवेत् अन्नं चैवोदकं चैवोपानहौ च कमंडलुः छत्रं वस्त्रं तथा यष्टिर्लोहदंड- २९९

तयाब्धमम् अग्निष्टिकांचदीपंचतिलान्तांबूलमेवच चंदनंपुष्पदानंचोपदानानिचतुर्दश योऽश्वंगजंरथंवापिब्राह्मणेप्रतिपा
दयेत् स्वमहिम्नानुसारेण तत्सुखमवाप्नुयादिति अत्रमूलंचिंत्यम् अथशय्यादानम् हेमाद्रौभविष्ये तस्माच्छय्यांसमा
साद्यसारदारुमयींदृढाम् दंतपत्रचितांरम्यांहेमपट्टैरलंकृताम् हंसतूलीप्रतिच्छन्नांशुभगंडोपधानिकाम् प्रच्छादनप
टीयुक्तांगंधधूपादिवासिताम् तस्यांसंस्थापयेद्धैमं हरिंलक्ष्मीसमन्वितम् अत्रहरिस्थानेप्रेतम् उच्छीर्षकेघृतभृतंक
लशंपरिकल्पयेत् तांबूलकुंकुमच्छादकर्पूरागुरुचंदनम् दीपिकोपानहच्छत्रचामरासनभाजनम् पार्श्वेषुस्थापयेद्भ
क्त्यासप्तधान्यानिचैवहि शयनस्यस्यभवतियदन्यदुपकारकम् भृंगारकरकाद्यंतुपंचवर्णवितानकम् मंत्रस्तु य
थानकृष्णशयनंशून्यंसागरजातया शय्याममाप्यशून्यास्तुतथाजन्मनिजन्मनि यस्मादशून्यंशयनंकेशवस्यशिव
स्यच अर्दतिदेवदत्त्वैवंतस्यसकलप्रत्याविसर्जयेत् एकादशाहेपितथाविधिरेषप्रकीर्तितः विशेषवात्रराजेंद्रकथ्यमा
नंनिशामय तेनोपभुक्तंयत्किंचिद्वस्त्रवाहनभाजनम् यद्यदिष्टंचतस्यासीत्तत्सर्वंपरिकल्पयेत् तमेवपुरुषंहैमंत
स्यांसंस्थापयेत्तथा पूजयित्वाप्रदातव्यामृतशय्यायथोदिता पाद्मे मृतकांतेद्वितीयेह्नि शय्यादद्यात्सुलक्षणाम्
कांचनंपुरुषंतद्वत्फलवस्त्रसमन्वितम् संपूज्यद्विजदांपत्यंनानाभरणभूषितम् उपवेश्यतुशय्यायांमधुपर्कंत
तोवदेत् रजतस्यतुपात्रेणदधिदुग्धसमन्वितम् अस्थिललाटिकंगृह्यसूक्ष्मंकृत्वासपायसम् भोजयेद्द्विजदां
पत्यंविधिरेषसनातनः एवमेवविधिर्दृष्टः पार्वणेयोद्विजोत्तमैः एतत्प्रतिग्रहेतत्रैवोक्तम् गृहीतायांतुतस्यांवैपुनःसं
स्कारमर्हति शय्यादानफलंभविष्ये स्वर्गेपुरंदरपुरेसूर्यपुत्रालयेतथा सुखंवसत्यसौजंतुःशय्यादानप्रभावतः आ
भूतसंप्लवंयावत्तिष्ठत्यातंकवर्जितइति अथोदकुंभः हेमाद्रौस्मृतिसमुच्चये एकादशाहात्प्रभृतिघटस्तोयान्नसंयु
तः दिनेदिनेप्रदातव्योयावत्संवत्सरंसुतैः लौगाक्षिः यस्यसंवत्सरादर्वाक्सपिंडीकरणंभवेत् मासिकंचोदकुंभं

नि॰ सिं॰ २०० चेदेयं तस्यापि वत्सरम्। उत्तरार्द्धे॥ तस्याप्यन्नं सोदकुंभं दद्यात्संवत्सरं द्विजः इति जाज्ञवल्क्यपाठः सपिंडनापकर्षेप्यापकर्षे प्राप्ते
वीधकमिति शूलपाणिः तन्न प्रकृतिविकारभावेन तदतेनान्यथाविषयत्वात् मात्स्ये यावदब्दं चैयाद्दद्यादुदकुंभं विमत्स
रः प्रेतायान्नसमायुक्तं सोऽश्वमेधफलं लभेत् क्वचित् त्रयोदशाहमारभ्याकुसत्तन्निर्मूलम् देवजानिकः सपिंडनापक
र्षे सांवत्सरं यावदुदकुंभमर्वागेव दद्यान्नोर्ध्वं प्रेतलोकगतस्यान्नं सोदकुंभं प्रयच्छतीति गोविंदराजधृतविष्णूक्तेः अन्नं
चैवं स्वशक्त्यानुसंख्याकृत्वाब्दिकावधि दातव्यं ब्राह्मणे स्कंदहृष्टादौ निक्षिप्य तु वा अपि श्राद्धशतैर्दत्तैरुदकुंभं विना नराः
दारिद्र्यदुःखिनस्तात भ्रमंति च भवार्णवे तेनापकृष्य दातव्यं प्रेतस्याप्युदकुंभकमिति गोभिलभाष्यस्कांदाच्च सपिंडनात्प्रा
गेव तस्यापि धान्नादूर्ध्वं निषेधादित्याह तन्न उदकुंभे पार्वणविधानानुपपत्तेरेवं व्याख्यायां मानाभावान्मिताक्षरादिवि
रोधाच्च वचनं तु यदि समूलं तदा व अपकर्षविधत्ते प्रेतश्राद्धानि सर्वाणि सपिंडीकरणं तथेति हेमाद्रिणा व्याख्यानोक्तेः
तस्याप्यन्नं सोदकुंभमिति याज्ञवल्क्यविरोधाच्च मदनरत्ने गौतमः एवं पार्वणं श्राद्धं सोदकुंभमधर्मकम् कुर्यात्प्र
त्याब्दिकाच्छ्राद्धात्संकल्पविधिनान्वहम् अधर्मकं ब्रह्मचर्यादिनियमहीनमेतन्मासिकपदे कोद्दिष्टं पार्वणं वा कार्यम्
अपरार्के तु सपिंडीकरणोक्तेः एवं चोपपद्यते एतच्चानुकृते पश्चात्पुनः कार्या अत्रापिंडदानं कृतम् अहरहरन्नमस्मै
ब्राह्मणायोदकुंभं च दद्यात्पिंडमप्येके निपृणंतीति हेमाद्रौ पारस्करोक्तेः आद्याशौचे पिंडमात्रमिति तत्त्वगौडाः तन्न अ
पिंडश्राद्धबाधापत्तेः हारीतः मृते पितरि वै पुत्रः पिंडमब्दं समाचरेत् अन्नकुंभं च विप्राय प्रेतनिर्दिश्य धर्मतः प्रेतश्राद्धा
चारणे नेति हलायुधः यद्वा प्रेतस्य निर्दिश्याय तत्तदेकोद्दिष्टम् तदुक्तमित्यर्थः अत्र शौचवदिनाद्यब्दान्तं यावद्धस्त
राद्भूत्तेः शौचेनाधिकारिविशेषणम् तेन मृतिदिनमारभ्यैतत्कार्यमिति केचित् तन्न हेमाद्रिधृतवचोविरोधात् रामः
मध्ये आशौचादिना बाधे तु लोप एव दर्शवत् तथा प्रथमाब्दे दीपदानमुक्तं देवजानीये गारुडे प्रत्यहं दीपको देयो २००

मार्गेतु विषमे नरैः यावत्संवत्सरं वापि प्रेतस्य सुखलिप्सया प्राङ्मुखोदङ्मुखं दीपं देवागारद्विजालये कुर्याद्धास्य मुखं पि
त्र्यश्रद्धिः संकल्प्य सुस्थितम् अथ मासिकानि तानि च कृत्वैव सपिंडनं कार्यम् तथा च गोभिलो गार्ग्यः श्राद्धानि षोडशा
कृत्वा नैव कुर्यात्सपिण्डनम् श्राद्धानि षोडशापाद्य विदधीत सपिण्डनम् तानि त्वाह जातूकर्णः द्वादश प्रतिमास्यानि आ
द्यषाण्मासिके तथा त्रैपक्षिकाब्दिके चेति श्राद्धान्येतानि षोडश आद्यषाण्मासिकाब्दिकशब्दाः ऊनमासिकोनषष्ठा
नाब्दिकपराः हेमाद्रौ सपिंडीकरणं चैवमित्येतच्छ्राद्धषोडशमित्युत्तरार्द्धपाठः तदा आद्यमूलमासिके द्वादशाहे षाण्मा
सिके ऊनषष्ठानाब्दिके इत्यर्थः कात्यायनस्त्वन्याह द्वादश प्रतिमास्यानि आद्यषाण्मासिके तथा सपिंडीकरणं चैव
इत्येतच्छ्राद्धषोडशम् एकाहेन तु षण्मासा यदा स्युरपि वा त्रिभिः न्यूनाः संवत्सरश्चैव स्यातां षाण्मासिके तदा द्विवचना
दूनषष्ठोनाब्दिके इत्यर्थमाह पृथ्वीचन्द्रः व्यासस्त्वन्यथाह द्वादशाहे त्रिपक्षे च षण्मासे मासिकाब्दिके श्राद्धानि षोडशैता
नि संस्मृतानि मनीषिभिः द्वादशाहपदमूनमासिकपरम् तस्य द्वादशाहेप्युक्तेरिति कालादर्शः मदनरत्ने ब्राह्मे त्व
न्यथोक्तम् नराणां तु त्यक्तदेहानां श्राद्धाः षोडश सर्वदा चतुर्थे पंचमे चैव नवमैकादशे तथा ततो द्वादशभिर्मासैः श्रा
द्धा द्वादश संख्यया इति चतुर्थ्यादिदिनानि भविष्ये त्वन्यथोक्तम् अस्थिसंचयनश्राद्धं त्रिपक्षे मासिकानि तु रिक्तयोश्च
तथा तिथ्योः प्रेतश्राद्धानि षोडशेति रिक्तयोस्तिथ्योरिति न्यूनषष्ठोनाब्दिकपरमिति हेमाद्रिः अत्र देशकुलशाखाभे
दाद्व्यवस्थेति सर्वनिबंधाः गालवः ऊनषाण्मासिकं षष्ठे मासे वाप्यूनमासिकम् त्रैपक्षिकं त्रिपक्षे स्यादूनाब्दं द्वाद
शे तथा ऊनमासिके तु गोभिलः मरणाद्द्वादशाहे स्यान्मासे त्वेवोनमासिकम् मदनरत्ने कालादर्शे च श्लोकगौत
मः एकद्वित्रिदिनैर्न्यूने त्रिभागेनोन एव वा श्राद्धान्यूनाब्दिकादीनि कुर्यादित्याह गौतमः क्रियानिबंधकृत्तु सार्द्धए
कादशे मासे सार्द्धे वै पंचमे तथा ऊनाब्दमूनषाण्मासं भवेत्तां श्राद्धकर्मणीत्युक्तम् तत्र मूलं चिन्त्यम् ऊनेषु वर्ज्य

नि॰सिं॰
२०१

त्याह मरीचिः त्रिपुष्करे च नंदायां सिनीवाल्यां भृगोर्दिने चतुर्दश्यां च नो नानि निकाम्निकामुत्रिपुष्करे ज्योतिषे त्रिपादर्क्षे तिथिर्भद्रा
भौमेज्यरविभिः सह तदा त्रिपुष्करो योगो द्वयोर्योगो द्विपुष्करः गालवः त्रिभिर्वा दिवसैर्न्यूने त्वेकेन द्वितयेन वा आद्यादिषु च
मासेषु कुर्यान्न्यूनाब्दिकादिकम् एकन्यूनपक्षे पंचम्याम् तस्य तृतीयायां त्रिभिर्न्यूने प्रतिपदि न्यूने द्वितीयायामिति केचित्तु माघ
मृतस्तु वा राममासिकाब्दिके श्राद्धं स्यात्तत्पूर्वं घुरवेते मासिकानि स्वकीये तु दिवसे द्वादशेऽपि वेति पठीनसिवाक्यं उक्तं वा रामा
सिकं सप्तमासगतम् तावन्न्यूनाहात्पूर्वं घुः कार्यम् आह मज्यहादिष्टवर्षे घुमासिकानि स्वकीये तु दिवसे इत्युक्तेः इदमेवायुक्तमि
न्यूधः मदनरत्नेप्येवम् याज्ञवल्क्यः मृतेहनि तु कर्तव्यं प्रतिमासं तु वत्सरम् प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि आ
न्ताद्यं मासिकमाब्दिकं चैकादशेऽहनीति निर्णयामृतादयः श्राद्धं भोजयेदाद्ये होतव्यमनलेऽथवा पुनश्च भोजयेद्विप्रं द्वि
एकत्रिभिर्वादिति गोभिलीयं च तद्विषयमाह अन्ये तु मासपक्षतिथिस्पृष्ट्यादिविरोधादाब्दिकं वर्धत एव मासिकं तु
मासाद्ये द्विरेकत्रिस्तु एकादशाहिकाद्यमासिकपरा देवजानिकोप्येवमाह लौगाक्षिरपि मासाद्ये मासिकं कार्यमा
ब्दिकं वत्सरे गते आद्यमेकादशे कार्य्यमाधिके त्वधिकं भवेत् दीपिकायां तु आद्यं रुद्रमितेऽर्कसंमितदिने वा स्यादित्यु
क्तेनु गौडास्तु मृततिथ्यधिके एकदिनाधिके मास संवत्सरपदयोराम् हर्षोर्ध्वे इति हर्षदसमाप्तपरत्वमिति शूलपाणिः
तेन द्वितीयमासाद्यादावाद्यमासिकादीति तन्मोरख्ये कृतमस्मतौ तु हारीतः मुख्यमाद्यं मासि अपर्याप्तं कृतं तु प्रति द्वाद
शाहेन वा भोज्या एकाहे द्वादशापि वा अत्र तु प्रतिहेद्वे इत्यर्थः यदापि तु मैरयाणां त्रैयाविंशतिमे दिने दर्शो वृद्धिर्वा स्यात्तद
द्वादशादिने पुढ्वादश मासिकानि कार्याणीत्यर्थः त्रैपक्षिकं तु त्रिपक्षे नीतीमृताहकार्यम् त्रैपाक्षिकं भवेद्वृत्ते त्रिप ६८
हे तदनंतरमिति भविष्यत्के रितिमदनरत्ने उक्तम् पष्ठी चंद्रकालादर्शे निर्णयामृतादयस्तु उनान्यूनेषु मासे
पुविषमाहे समेपि वा त्रैपाक्षिकं त्रिपक्षे स्यान्न्यूनाहे त्विनराशि त्वितिकाहमोजिनिस्मृतेः पूर्वत्र कृते प्रकृते इत्यर्थमाह

रामः
२०१

तेनतदनंतरशब्दविरोधात्त्रैपक्षिकाद्वितीयमासिकयोः संस्कारापत्तेरेवंव्याख्यायांमानाभावाच्चोपेक्ष्या एवंत्रिपक्षसपिंडनेशब्दा
भावादधिकारणात्त्वमवज्ञेयम् यत्तुक्रियानिबंधेगारुडे त्रैपक्षिकत्रिपक्षेतुप्रकृतेविषमेदिने मासिकान्यपिचान्नानित्र्यब्दा
विंशतिमेदिनेइति तन्निर्मूलम् स्मृतिरत्नावल्याम् द्वादशाहेयदाकुर्यात्पितुःपुत्रःसपिंडनम् एकादशेह्निकुर्वीतप्रेतश्रा
द्धानिषोडश पैठीनसिः सपिंडीकरणादर्वाक्कुर्वन्श्राद्धानिषोडश एकोद्दिष्टविधानेनकुर्यात्सर्वाणितानितु सपिंडी
करणादूर्ध्वंयदाकुर्यात्तदापुनः प्रत्यब्दंयोयथाकुर्यात्तथाकुर्यात्सतान्यपि कात्यायनः श्राद्धमग्निमतःकार्यंदाहादेका
दशेहनि ध्रुवाणितुप्रकुर्वीतप्रमीताहनिसर्वदा ध्रुवाणि त्रैपक्षिकादूर्ध्वानि क्रियानिबन्धेगारुडे त्रिपक्षात्पूर्वतः
साग्नेर्भवेत्संस्कारवासरे ऊर्ध्वंमृतदिनेऽनग्नेःसर्वाण्येवंमृताहतः एतानिचयदासपिंडनात्पूर्वंयुगपत्कुर्यात्तदाका
लकर्तव्यतैक्यात्तन्त्रत्वादेकः पाकइतिकेचित्पाकभेदइतिभट्टचरणाः अत्रकेचिदाहुः देशकालदैवतैक्यात्तन्त्रत्वाच्छ्राद्धका
लातिक्रमापत्तेद्वादशाहेयसर्वाणिसंक्षेपेणसमापयेत् नान्यथातुपुनःकुर्यात्प्रेतशब्दंनकारयेदिति कात्यायनो
क्तेनैकःश्राद्धद्वयंकुर्यात्समाप्तेहनिकुत्रचिदित्यस्यदैवतैक्यपरत्वेप्यत्रतत्सत्वाच्छ्राद्धंकृत्वानुतस्यैवपुनःश्राद्धंनका
रयेदितिजाबालोक्तेः षोडशसंख्यायाश्चवाजपेयेप्राजापत्ययागसप्तदशत्ववत्साप्ययागद्वित्ववत्स्वयुगपदनुष्ठाने
प्युपपन्नेयद्यपिमासिकाद्यूनाब्दिकांतेषुषोडशश्राद्धेषुस्मरणाःक्रियतामित्येवंप्रयोगेएकोविप्रःपिंडश्चैकइति विरु
द्धविधिविध्वंसएवम् तन्मंदद्वादशाहेनवाभोज्याएवाहद्वादशापिवेतिहेमाद्रौहारीतवचोविरोधात् तेनविप्रभेदात्पिंडा
र्थोपिभिन्नमितिसिद्धम् एतानिद्वादशाहादौसपिंडनात्पूर्वंकृतानान्यपिविधिसिद्धविनापकर्षेपुनःस्वकालेकार्याणियस्यसं
वत्सरादर्वाक्सपिंडीकरणंकृतम् मासिकंचोदकुंभंचदेयंतस्यापिवत्सरमितिमदनरत्नेंगिरसोक्तेः नचेदंमासिकानांना
पकर्षविधानेकिंतुसपिंडनोर्ध्वंस्वकालेनुष्ठानमेवेतिवाच्यम् श्राद्धानिषोडशादत्वाननुकुर्यात्सपिंडतां विधिवत्तानिकुर्वी
मितिविरोधात् । यस्यसंवत्सरादर्वाक्विहितंतुसपिंडनं

नि॰ सिं॰ ३०२ न पुनः श्राद्धानि षोडश॥ इति माधवीये गोभिलोक्तेश्च अर्वाक्संवत्सराद्यस्य सपिंडीकरणं कृतम् षोडशानां द्विरावृत्तिं कुर्या
दित्याह गौतमः इति तत्रैव गालवोक्तेः षोडशत्वं चैकादशाहसपिंडनपक्षे तत्राद्यमासिकस्य कालसत्त्वात् अन्यपक्षे तु यथा
संभवं ज्ञेयं यत्तु दीपिकायाम् अनुमासिकानि तु चरेत्तान्येव सापिंड्यतः पश्चाद्द्वादशोक्तरूनानां न पुनः कृतिरित्युक्तं तदेत
द्विरोधाच्चिंत्यं यत्तु गौडाः सपिंडीकरणानंतरं ज्ञेया प्रेतक्रिया बुधैरिति शातातपोक्तेर्मासिकानां प्रेतत्वविमोक्षार्थत्वात्सपिंडना
पकर्षे तदंतन्यायेन तेषामप्यपकर्षान्मासिकानां न पुनः कृतिः यत्तु मासिकं चोदकुंभं चेति लौगाक्ष्यादिवचनं तन्निर्मूलं
समूलत्वेपि दाशपरं चेत्याहुः तदुक्तवक्ष्यमाणवचोनिबंधविरोधान्मूर्खा इत्युपेक्ष्याः यत्तु मिताक्षरायाम् सपिंडनोर्ध्वं
स्वकाल एव कार्याणि अपकर्षस्त्वनुकल्पः इत्युक्तम् तदपि पूर्वविरोधाच्चिंत्यम् तेन वृद्धिं विनापकर्षे पुनः कृतिः अर्वाक्सं
वत्सराद्यस्य सपिंडीकरणं भवेत् प्रेतत्वमिह तस्यापि ज्ञेयं संवत्सरं त्वथेत्यग्निपुराणात् वृद्धिनिमित्तापकर्षे त्वस्यैव
तन्निवृत्तिः अन्यथा वृद्धिसंभवादिति शूलपाणिः कार्ष्णाजिनिः सपिंडीकरणादर्वाक् अपकृष्यकृतान्यपि पु
नरप्यपकृष्यंते वृद्ध्युत्तरविधेयनात् निषेधं चाह कात्यायनः निर्वर्त्य वृद्धिं तंत्रं तु मासिकानि न तंत्रयेत् अयातया
मं मरणं न भवेत्पुनरस्य त्विति हिरनुष्ठानं चोत्तरेषामेव न तु पूर्वेषां स्वकालकृतानाम् तदाह माधवीये वाकरणं तथा
अपकृष्यापि कुर्वीत कर्तुं नांदीमुखं द्विजः वृद्धिं विनापकर्षे दोषमाहोशनाः वृद्धिश्राद्धविहीनस्तु प्रेतश्राद्धानि यश्चरेत्
स श्राद्धी नरके घोरे पितृभिः सह मज्जतीति आधानेऽपकर्षे दोषमाहोशनाः पितुः सपिंडीकरणं कार्ष्णाजिनिः अर्वा
गब्दाद्यत्र यत्र सपिंडीकरणं कृतम् तदूर्ध्वं मासिकानां स्याद्यथाकालमनुष्ठितिः हेमाद्रौ शाट्यायनिः प्रेतश्राद्धानि शि
ष्टानि सपिंडीर्षिके मृतिवासरे आधानाद्युपसंप्राप्तावंतस्त्वागपि वत्सरात् विशेषस्तत्कौ विवाहनिर्णये एकवानव राम:
श्राद्धं मासिकं च यच्चेन्तरितं भवेत् तत्तदुत्तरसात्कृत्यादनुष्ठेयं प्रचक्षते गारुडेपि आपद्यपकृतं तत्तु कुर्यादूर्ध्वमता ३०२

पं १

हनि अथ सपिंडीकरणम् माधवीये हारीतः यातु पूर्वममावास्यायां तु ताहाद्दशमी भवेत् सपिंडीकरणं तस्यां कुर्यादेव सुतोग्नि
मान् मृताहादूर्ध्वं दशमी एकादशीत्यर्थः सपिंडीकरणं कुर्यान्न पूर्वं नाग्निमान् सुतः परतो दशरात्राच्चेत् कुर्याद्दर्शोपरीत स्मृतिका
र्ष्णाजिनिस्मृतेः आहिताग्नेस्तेन विनाग्नौ न पिंडपितृयज्ञासिद्धेः तदाह गालवः सपिंडीकरणात्प्रेते पैतृकं पदमास्थिते
आहिताग्नेः सिनीवाल्यां पितृयज्ञः प्रवर्त्तते मदनरत्ने प्रजापतिः नासपिंडाग्निमान् पुत्रः पितृयज्ञं समाचरेत् अपरार्के
कात्यायनः एकादशाहं निर्वर्त्य पूर्वं दर्शे यथाविधि प्रकुर्वीत निमातापित्रोः सपिंडताम् आशौचान्तप्रथमदर्शयोर्मध्ये क
स्मिन्नग्निरजोत्यर्थः पित्रादीनां सपत्नीनां देवनात्वेन मातुरपि तत्रानुप्रवेशान्मातुरपि प्राग्दर्शात्सपिंडने युक्तमित्यपरार्कः
एवं पितामहादेरपि सपिंडनात् प्राग्दर्शात्कार्य्यम् तेनाविनापार्वणयोगात् द्वादशाहे वा कार्य्यम् साग्निकस्तु यदाम
तौ प्रेतश्चानग्निमान् भवेत् द्वादशाहे भवेत्कार्य्यं सपिंडीकरणं सुतैरिति गोभिलोक्तेः साग्निः प्रेतस्य तु त्रिपक्षे प्रेतश्च
दाहिताग्निः स्यात्कर्त्ता नाग्निर्यदा भवेत् सपिंडीकरणं तस्य कुर्यात्पक्षे तृतीयके इति सुमन्तूक्तेः मदनरत्ने लघुहारीतोपि
अनग्निस्तु यदा वीर भवेत्कुर्यात्तदा गृही प्रेतश्चेदग्निमांस्तु स्यात्त्रिपक्षे वै सपिंडनम् द्वयोः साग्नित्वे द्वादशाह एव साग्नि
कस्तु यदा कर्त्ता प्रेतो वाप्यग्निमान् भवेत् द्वादशाहे तदा कार्य्यं सपिंडीकरणं पितुरिति तत्रैवोक्तेः द्वयोरनग्नित्वे
नुमतिविधे सपिंडीकरणं कुर्याद्यजमानस्त्वनग्निमान् अनाहिताग्नेः प्रेतस्य पूर्णेब्दे भरतर्षभ द्वादशेहनि षण्मासे
त्रिपक्षे वाग्नि त्रिमासि वा एकादशेपि वा मासि मंगलस्याप्युपस्थिते कात्यायनगोभिलौ यदहर्वृद्धिरापद्यते तच्च
वृद्धिदिने एवेति चावस्मृतिः तत्र प्राप्तवृद्धिनिमित्तकमिति नियमात्सपिंडनस्य चापराह्णकालीनत्वेन पूर्वं बाधापत्तेः
वृद्धिदिने न पूर्वादिदिने चेति श्राद्धतत्त्वे स्मार्त्तगौडस्तु वृद्धिपूर्वं वर्षीयश्राद्धक्षणः सपिंडनस्य प्रेतत्वनाशे सहकारि तेन
परेद्युर्विप्राद्यभावेपि तत्कर्त्तव्यतानिश्चयसहितमेव कालान्तरक्रियमाणवृद्धिपूर्वं सपिंडनसहकृतं प्रेतत्वनाश

नि॰ सि॰ कमित्याह तन्न अकालेकृतस्यफलाजनकत्वात् एतेननिमित्तनिश्चयवतएवाधिकाराच्छ्युमावेपितसतिरितिमिश्राः
३०३ पराम्ता वृद्धिपूर्वदिनस्यकालस्यागत्वेननिमित्तत्वाभावात् तेनपुनःकार्य्यमित्यन्ये मदनरत्नेपुलस्त्यः त्रिरग्निकः
सपिंडत्वंपितुर्मातुश्चधर्मतः एतोसंवत्सरेकुर्याद्वृद्धिर्यदहर्भवेत् चतुर्विंशतिमते सपिंडीकरणंचाष्टसप्रसंभुद
येपिवा द्वादशाहतुकर्वाचिन्मतंचैकादशेतथा पृथ्वीचन्द्रोदयेबौधायनः अथसपिंडीकरणंत्रिपक्षेवातृतीयेवामा
सिषष्ठेवैकादशेवाग्नेद्वादशाहेवैकादशाहेवेति एतन्नक्रमविहमुः मासिकार्थ्यद्वादशश्राद्धकृत्वात्रयोदशेह्निवाकु
र्यान्मन्त्रवर्जंहिशूद्राणांद्वादशेह्निसंवत्सराभ्यन्तरेयद्यधिमासोभवेत्तदामासिकार्थ्येदिनमेकंवर्द्धयेदिति आशौचे
नरद्वादशस्वहःसुमासिकानितेष्ववापषष्ठवादशादिनेषूनमासिकादीनिकृत्वात्रयोदशेह्निसापिंडनंकुर्यात् अधि
कमासेतुचतुर्दशेह्निकुर्यात् शूद्रस्त्रयोदशे द्वादशाहःकोत्यस्यमासिकोत्यादिनपरत्वादिति पृथ्वीचन्द्रः पैठीनसिः
संवत्सरान्तेसंसर्जनंनवमेमासीत्येके अत्रसाग्नेर्वोक्तकालाभावेत्रिपक्षादिः संवत्सरान्ताअनुकल्पाज्ञेयाः कल्प
तरुस्त्वग्नेर्वृद्धिनिश्चयएवसर्वेपिकर्षप्रकाराइत्याह तन्न यदहर्वृतिस्यात्स्यश्रुतेः यद्यपिवृद्धिनिमित्तोपकर्षोनिर
ग्निरेवोक्तस्तथापिसाग्नावपिज्ञेयः उक्तकालासम्भवेवर्षान्तादिगौणकालवद्वृद्धेरपिप्राप्तेः वक्ष्यमाणयोगमिलव
चनात् अयानयामेमरणंनभवेत्पुनरस्यात्विति दोषश्रुत्यविशेषाच्च अपरार्के पृथ्वीचन्द्रादिस्वरसोप्येवम् व्या
घ्रः आनंत्यात्कुलधर्माणांपुंसांचैवायुषःक्षयात् अस्थितेश्चशरीरस्यद्वादशाहःप्रशस्यते एतदशेणाग्नेनाप
लक्षणाम् सर्वेषामेववर्णानामाशौचान्तेसपिंडनमितिनिर्णयामृते कात्यायनोक्तेः सर्वेषामितितत्रैववर्णिकप राम:
रम् शूद्राणांत्वाशौचमध्येमंत्रवर्जंहिशूद्राणांद्वादशेहनिकीर्तितमितिविष्णूक्तेः एतद्दर्शश्राद्धकारिशूद्रविष ३०३

यमित्यपरार्के कल्पतरौच वृद्धमनुः द्वादशेहनिविप्राणामाशौचांतेतुभूभुजाम् वैश्यानांतु त्रिपक्षादावथवास्यात्सपिं
डनेनिर्णीयामृतेगोभिलः द्वादशाहादिकालेषु प्रमादादननुष्ठितम् सपिंडीकरणंकुर्यात्कालेषूत्तरभाविषु इदंसाग्नेस्तके
कालासंभवेगौणकालविधानार्थमिति मदनपारिजातः मदनरत्नेप्येवम् ऋष्यशृंगः सपिंडीकरणंश्राद्धमुक्तका
लनचेत्कृतम् रौद्रहस्तेचरोहिण्यांमैत्रमेवासमाचरेत् कालादर्शेपि एकादशेद्वादशेह्नि त्रिपक्षेवात्रिमासिवा षष्ठे
वैकादशेवाब्देसंपूर्णेवाशुभागमे सपिंडीकरणस्यान्त्यमध्यौकालाःप्रकीर्तिताः साग्नौकर्त्तर्यभावाद्वाप्रेतेसाग्नौतदी
यकः अनग्नेस्तु द्वितीयायाः सप्तकालामुनीरिताः रोहिण्यांरौद्रहस्तेषु मैत्रमेवापितच्चरेत् नारदसंहितायांतु स
पिंडीकरणंकार्यंवत्सरेवार्द्धवत्सरे त्रिमासेवात्रिपक्षेवामासिवाद्वादशेह्निवेत्युक्तम् वत्सतीतेयम् ततःसपिंडी
करणंवत्सरात्परतःस्थितमितिभविष्योक्तेः पितुःसपिंडीकरणंवत्सरादूर्ध्वतःस्थितमितिनागरखंडोक्तेःपि
तुःसपिंडीकरणंवार्षिकेमृतवासरे इत्युशनसोक्तेश्च पूर्णेसंवत्सरेपिंडःषोडशःपरिकीर्तितः तेनैवचसपिंडत्वंते
नैवाब्दिकमिष्यते इतिहेमाद्रिवचनाच्च अस्यानाकरत्वान्निर्मूलोक्तिरेव यत्तुपूर्णेसंवत्सरेकुर्यात्सपिंडीकरणं
सुतः एकोद्दिष्टंचतत्रैवमृताहनिसमापयेदितिधवलसंग्रहजावाल्युक्तेः पुत्रःसपिंडनंकुर्यात्ततःस्नानंसचेलकं
एकोद्दिष्टंततःकुर्यात्तुतत्पुनर्विचारयेदितिस्वल्पमात्स्योक्तेश्चाब्दिकंतद्दिनेपुनःकार्यमितिकेचित् तन्निर्मूलत्वाद्धेमाद्रिविरो
धाच्चोपेक्ष्याः षोडशत्वंचसपिंडनस्यषोडशश्राद्धान्तर्भावपक्षे स्मृत्यर्थसारेतुवर्षान्त्यदिनेसंवत्सरविमोकश्राद्धंसापिंडनं
चकृत्वापरेद्युर्मृताहवार्षिकंकार्यमित्युक्तम् गौडास्त्वप्येवमाहुः तन्मूलंविरोधाच्चिन्त्यम् नचपुत्रसंततिनान्यःकुर्यात् श्रा क ३
द्धानिषोडशादत्वानन्तुकुर्यात्सपिंडनाम् प्रोषितावसितेपुत्रैः कालादतिचिरादपीतिवायवीयोक्तेः षोडशश्राद्धदानांव

पूर्वमूर्ध्वकालाभावेपितान्यदत्त्वा न कुर्यात्किंतु दत्त्वैव तानि यदि कनिष्ठभ्रात्रादिना कृतानि तदा सपिंडनमेव कुर्यादित्यपरा
र्कः सपिंडने तु कनिष्ठानां नैवाधिकार इत्यर्थः तत्रैव अज्ञानादथवा मोहान्न कृता चेत्सपिंडता तत्रापि विधिवत्कार्या काल
दत्तिचिरादपि नष्टेवापि ज्येष्ठस्यैवाधिकारः ज्येष्ठेन जातमात्रेण पुत्री भवति मानव इति मनूक्तेः अपरार्के प्रचेता अपि ए
कोद्दिष्टाद्याः क्रमशो ज्येष्ठसु विधिवत्क्रियाः कुर्यान्नैकैकशः श्राद्धमाब्दिकं तु पृथक्पृथक् मरीचिः सर्वेषां तु मतं कृत्वा ज्येष्ठेन
वनु यत्कृतम् द्रव्येणाविभक्तेन सर्वैरेव कृतं भवेत् यत्तु वाचस्पतिशूलपाणिभ्यामुक्तम् द्रव्यदानानुमत्यभावे कनिष्ठैः
एव यत्कार्यमिति तन्न एवकारस्य तदभावेपि पृथक्करणाभावार्थत्वात् अथादौ विज्येष्ठे सति कनिष्ठानामनधिकारा
च्च अतस्तेषां प्रत्यवायमात्रमाहिताग्निः कनिष्ठस्तु कुर्यादेव अन्यथा पितृयज्ञासिद्धेः एवमावश्यकत्वाद्वापि कनिष्ठो
न्यः सपिंडो वा कुर्यात् भ्राता वा भ्रातृपुत्रो वा सपिंडः शिष्य एव च सहपिंडक्रियां कृत्वा कुर्यादभ्युदयं तेथव काम्यमात्र
मेवत्सरात्प्रथमाब्दे तु इति मदनरत्ने लघुहारीतवचनात् काम्यो नैरन्तावश्यकेष्टापूर्तादौ नापकर्षः एतच्चौतपुत्रादि
संस्कारे तस्या नाधिकारस्य तदा श्राद्धाधिकारार्थम् अभ्युदयपदं वचनम् श्राद्धनिमित्तकर्ममात्रपरमिति हेमाद्रिः
तेन ज्येष्ठे देशान्तरस्थे कनिष्ठः सपिंडनं विनैव वृद्धिं कृत्वा पुत्रसंस्कारं कुर्यादिति श्रीदत्तोक्तिः परास्ता भ्रातृशिष्याद्युक्तेर्नां
दीश्राद्धं ज्यदेवतामात्रपरो पकर्ष इत्यपास्तम् असंस्कृतमात्रपरत्वाद्वृद्धिकर्त्रैव सपिंडनं कुर्यादिति न नियम इति गौडाः
अत एव कन्याया मातृमरणे भ्रात्रा सपिंडे कृते पितुर्हीनाधिकारः श्राद्धालोकः शूलपाणिस्तु महागुरौ प्रेतभूते वृद्धि
कर्म न युज्यते इति निषेधात् मृतस्य धात्रादिः सपिंडनं कृत्वा न तत्पुत्रकन्यादेरभ्युदयं कुर्यात् न तु स्वपुत्रसंस्कारे संस्कार्य
पितुः सपिंडनं विना वृद्धौ देवतात्वाभावादित्याह तत्रावदेशस्य ज्येष्ठेन पुनः कार्यमिति बोध्यं साकृतं कर्म प्रेतशब्द
विहाय तत्तु न ज्येष्ठस्याकर्तव्यम् सपिंडीकरणं पुनरिति स्मृतेः ज्येष्ठेन वा कनिष्ठेन सपिंडीकरणे कृते आपपादमाता

पि १ न कुर्वीत २

पित्रोःकनिष्ठेनेतिवापाठः देशांतरगतानांचपुत्राणांतुकथंभवेत् अन्वानुवपनंकार्य्यंदशाहंतुतिलोदकम् ततःसपिंडीकरणं
कुर्यादेकादशेऽहनि द्वादशाहेनकर्त्तव्यमिति शातातपोऽब्रवीत् इतिवचनान्मुनिभेदाः सिंहाभट्टीयेप्येवमुक्त्वंवचनेत्रमूलंचिंत्यं
स्मृत्यर्थसारे तुविभक्ताग्निकामाश्चपुत्राःपृथक्सपिंडीकरणंकुर्युरनुक्रमम् अग्निदत्तेकस्तनत्पुत्रादीनांचविशेषःअ
गुरुः केचित्तुवृद्धिंविनापिकनिष्ठस्यसपिंडनमाहुः मातापित्रोर्मृतेःकालज्येष्ठेदेशान्तरस्थिते कनिष्ठेनैवकर्त्तव्यंस
पिंडीकरणंतदेतिकार्ष्णाजिनिस्मृतेः गतेवारोधितेज्येष्ठेपित्रावाप्रोषितेसति षाण्मासोन्तानिवर्तेततदाकार्य्यंकनीय
सासवर्णैः पुनःसपिंडीकरणंश्राद्धंपार्वणमेवचचरेत् अर्घ्यसंयोजनंनैवपिंडसंयोजनंनचेति तेवचसानिर्मूलत्वात्अवि
यावाप्तिनेपुत्रइत्यादिविरोधाच्चोपेक्ष्या मुक्तमस्मतोतुहेमाद्रौब्राह्मे मृतेपितरियस्याथजीवेत्तुपितामहः तेनदेयास्त्र विद्यतेतिद्विः७
यःपिंडाःप्रपितामहपूर्वकाः तेभ्यश्चपैतृकःपिंडोनियोक्तव्यस्तुपूर्ववत् मातर्य्यथमृतायांतुविद्यतेचपितामही प्रपि
तामहीपूर्वकस्तुकार्य्यस्तत्राप्ययंविधिः एवंप्रपितामहजीवनेऽप्यत्यादितिज्ञेयम् तदाहसुमन्तुः त्रयाणामपिपिंडा
नामेकेनापिसपिंडने पितृत्वमश्नुतेप्रेतइतिधर्मोव्यवस्थितः यत्तुमुक्त्वंमानुप्रमीतानांनैवकार्यासपिंडतेति त
न्मातापितृभर्तृभिन्नविषयम् मुक्त्वैमेणामृतानांनसपिंडीकृतिरिष्यते यदिमातायदिपिताभर्त्तानैषविधिःस्मृ
तइतिमाधवीयेस्कांदोक्तेः मदनरत्नादौचैवं अत्रपितामहादिभिःपितुःसपिंडनेकृतेपितामहस्तेनसपिंडनेस
तिपुनस्तेनसहपितुःसपिंडनंकार्यमितिहेमाद्रिमतमाह अन्येनेनत्यते पितामहेप्रपितामहेवापुत्रान्तरेरस
स्कृतेप्यसंस्कृताभ्यामेवपितुःसपिंडनंकुर्यात् असंस्कृतोनसंस्कार्यःपूर्वैःपौत्रप्रपौत्रकैः पितरंतत्रसंस्कुर्यादिति
कात्यायनोब्रवीदितिछंदोगपरिशिष्टात् असंस्कृतोदाहादेरितिकेचित् असपिंडीकृतावितितुतच्चम् अतएवाकृत
त्रैवपापिष्ठमपिस्मुदेनसुहृपापकृतापिवा पितामहेनापितरसंस्कुर्यादितिनिश्चयः पापिष्ठमकृतसपिंडनंनतुपति

तादित्रिशिशस्तपतितसूतकान्नं स्त्रियश्चान्त्यजातीर्न संस्पृशेदिति वैजवापोक्तेः पापकर्मिणा न संस्पृशेरन्निति
गौतमोक्तेश्चेत्युक्तम् निर्णयामृते पूर्वयोः पुत्राभावे तु पौत्रः कुर्यादेवं पितामहः पितुः पश्चात्पञ्चत्वं यदि गच्छति
पौत्रेणैकादशाहादिकं तत्पश्चाद्धषोडशम् न तत्पौत्रेण कर्त्तव्यं पुत्रवांश्चेत्पितामहः पितुः सपिण्डतां कृत्वा कुर्यान्
मासानुमासिकमिति कात्यायनोक्तेः अपरार्के शूलपाणौ चैवं तेन सपिण्डनस्यानित्यत्वादकृतसपिण्डनयोरेवयो
र्वैरणानुप्रवेशश्रुतिमूलेर्वा क्रियाः परास्तात्कृते सपिण्डीकरणे प्रेतः पार्वणभाग्भवेदिति हारीतविरोधाच्च केचित्पुत्रा
तरणाभावे पितामहवार्षिकमप्याहुः तन्न श्राद्धषोडशमिति नियमात् इच्छया भवत्येव पितामहस्य चेद्धघादेको
द्दिष्टं न पार्वणमिति वाचस्पतिधृतगार्ग्योक्तेः त्रयाणामपि यागपद्ये तु प्राग्धान्यासितः सपिण्डनं कृत्वा पूर्वयोः कुर्या
त् पितामहे मृते दशाहान्तः पितुर्मृतौ पितुः संस्कारं कृत्वा पितामहस्य पुनः सर्वमावर्त्तयेत् वर्जे दशाहे नैवं
अशक्त्या पित्रानुज्ञाते पौत्रेण पितामहश्राद्धे प्रक्रान्ते पितृमृतौ तदाहशौचं च हत्रे च पौत्रः पितामहकर्म कुर्यान्
त्र तत्वादिति मदनपारिजातपृथ्वीचन्द्रौ यत्तु उत्तरात्रितयरोद्ररोहिणीयाम्यसर्पपितृमेषु चाग्निभे श्मश्रु
कर्म सकलं च वर्जयेत्प्रेतकार्यमपि बुद्धिमान्नर इति सपिण्डनप्रकरणे पाठान्मुख्यस्य काले निषिद्धेष्वेसापि
ण्डनाभकर्षः सर्वकालेषु तद्धचेत तद्वर्जान्यैर्ध्ववीक्तप्राक्लेक्तानि षोडशश्राद्धानि कार्याणीति वाचस्पतिमि
श्राः तन्न अस्य परिभाषात्वेन वाक्यात्सावकाशप्राकर्मपरत्वादस्य प्रेतमात्रदैवत्यत्वाभावाच्च अथ स्त्रीणामु
च्यते हेमाद्रौ बृहस्पतिः भर्तृगोत्रेण नाम्ना च मातुः कुर्यात्सपिण्डनम् यत्तु भविष्ये पितृगोत्रं समुत्सृ
ज्य न कुर्याद्भर्तृगोत्रत इति तदासुरादिविवाहाद्यपरम् आसुरादिविवाहेषु पितृगोत्रेण धर्मवित् इति वक्ष

शातातपोक्तेः तच्चानेकवचनेषु पितामह्यापत्न्या मातामहेन वा सहोक्तम् तत्र प्रयुक्तस्योक्ताभावेप्ये जीवत्पिता पितामह्या मातुः
कुर्यात्सपिण्डनम् प्रमीतपितृकः पित्रा तत्पित्रा पितृकासुतः तेभिः त्रामातुः पित्रा नो गाः पितामह्यादिभिः सार्द्धं मात
रं तु सपिण्डयेत् पितरि प्रियमाणे तु तेनैवोपरते सति शंखः मातुः सपिण्डीकरणं कथं कार्यं भवेत्सुतैः पितामह्यादिभिः
सार्द्धं सापिण्डीकरणं स्मृतम् येन केनापि मातुः सपिण्ड्यं यत्रान्वष्टकादौ मातुः श्राद्धं पृथगुक्तम् तत्रापि पितामह्या सह कार्यं
नान्दीमुखे एकोद्दिष्टं गयायां च मृतेहनि पितामह्यादिभिः सार्द्धं मातुः श्राद्धं समाचरेदिति शातातपोक्तेः अपुत्रायाः
तु पैठीनसिः अपुत्रायां मृतायां तु पतिः कुर्यात्सपिण्डनम् श्वश्र्वादिभिः सहैवास्याः सपिण्डीकरणं भवेत् यत्तु लघु
हारीतः पुत्रेणैव तु कर्त्तव्यं सपिण्डीकरणं स्त्रियाः पुरुषस्य पुनस्त्वन्ये भ्रातृपुत्रादयो ये इति यच्च मार्कण्डेयपुराणे सपि
ण्डीकरणं स्त्रीणां पुत्राभावे न विद्यते इति तत्पुत्रपत्न्यभावे तथ मन्त्र सपत्नीपुत्रोपि ज्ञेयः वह्नीनामेकपत्नीनामेकश्चे
त्पुत्रिणी भवेत् सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुरिति मनूक्तेरेतत्परत्वात् यत्तु शातातपः मृते पितरि मातु
स्तु न कार्यं सहपिण्डता पितुरेव सपिण्डत्वे तस्या अपि कृतं भवेदिति तदप्यनुक्तपरम् केषांचिन्मते मितिह माध्वि
श्चेत्वारोहणे तु भर्त्तुरेव सापिण्ड्यम् मृतायां तु गता नायसा तेन सहपिण्डताम् अर्हति स्वर्गवासं च यावदाभूतसंप्लु
वमिति शातातपोक्तेः पत्या चैकेन कर्त्तव्यं सपिण्डीकरणं स्त्रियः सा मृतापि हि तेनैक्यं गता मन्त्राहुतिव्रतैर्यमोक्ते
श्च अत्रैकशब्दः पितामह्यादिपक्षनिवृत्त्यर्थः पतिपदं वर्गपरम् सपिण्डनस्य पार्वणैकोद्दिष्टरूपत्वादिति माध
मदन२ वकल्पतर्वादयः अन्ये तु भर्त्रैव एकेनाकुः सापिण्डीकरणं भवेदित्येवकारश्रवणात् पृथ्वीचन्द्रोदयोपि विक
ल्पउक्तः इदं तु नव्यम् यदा हेमाद्रिमते द्वयोरेकः पिण्डस्तद्वर्गेण सह यदा माधवपृथ्वीचन्द्रादिमते पृथक्पिण्ड

नि॰सिं॰ २०६ ...पत्न्यैवा न चैनान्येकेनापि अतो मातृपिंडम सपिंडीकृतेन च पतिपिंडम संयोज्य कोत्कृतं पिंडद्वयम् तन्त्रि त्रादि
भिः संयोजयेत् अत्रपक्षएवयुक्तः स्मृत्यर्थसारे तु अन्वारोहणेन तु दिनमरणे स्त्रियाः पृथक्सपिंडनं नास्ति
भर्तुः कृतस्त्रिया अपि... तन्मतो तरमस्तु इदं ब्राह्मादिविवाहयुक्तेयम् आसुरादिषु मातापितृः
तन्मात्रा तानि तु तामह्यात ...वा सपिंडनम् आसुरादिविवाहयु ...नाया वितो भवेत् मातामह्यामातुःपि
तामह्यातत्र पितामह्या वेत्यर्थः हेमनुः पितापितामहे योज्यः पूर्णे संवत्सरे सुतैः मातामाता महे तद्वदित्या
कूर्मे गवान् ...वः इदम आसुरादिपरं पुत्रिकापुत्रपरम् चोक्तं ब्राह्मादिस्तु अ ब्राह्मादिष्वपि सर्वत्रदेशभेदादि
त्यमाह अत गुर्जरेषु कोकिलमतानुसारेण मातामाता महेन मातामहादितिश्राद्धप्रयोगः सपिंडनं च ह
...पते हेमाद्रावापस्तंबोपि कोकिलस्य यथा पुत्रा अन्यस चयजीवितः पुत्रास्तु स्वकुलयाति एवं नारीस्वता म
ती यदापि विज्ञानेश्वरो मातामहेन मातुः सपिंडनं पितृश्राद्धवन्मातृश्राद्धेन न्याममित्याह यच्च ...श्राद्ध छंद
ोगपरिशिष्टम् षण्णां पितृभ्यस्तदनु श्राद्धदानमुपक्रमेदिति तदेतद्द्विविधमातुःपृथक्श्राद्धभावात् अत
एवहेमाद्रौ भविष्ये मातुः सपिंडनं प्रकम्यनुदितो च वहोमम दोषयथा भवेत् तथाकुलक्रमाधातमाचार
...यथेति युक्तम् अस्यकवचापवादमाह नचैव व्या...पात्कुर्यात् मातामहश्राद्धं सर्वदा मातृपूर्वकम्
विधिज्ञो विधिनास्थाप्य ... मातामहादितत् केचिदेतत्पुत्रिकापुत्रमाहुः पत्नुः सापिंड्यमाह ...सि
सर्वाभावे स्वयं पत्न्यः स्वभर्तॄणाम मंत्रकं सपिंडीकरणं कुर्युस्ततः पार्वणमेव चेति यत्तु वचनम् रामः
पुत्रस्य परेतस्य नैव कुर्यात्स पिण्डतामिति यच्चापस्तंबः अपुत्राय मृताः केचित्पुरुषाश्च स्त्रियो वा ते २०६

यांसपिंडनाभावादेकोद्दिष्टं न पार्वणमिति नपुत्रोत्पादनविधिप्रशंसार्थमिति माधवः सपिंडीकरणादूर्ध्वमे
कोद्दिष्टं विधीयते अपुत्राणां च सर्वेषामपत्नीनां तथैव चेति हेमाद्रौ प्रचेतसोक्तेश्च अन्ये तु द्विविधवाक्य
दर्शनाद्विकल्पमाहुः स्मृत्यर्थसारेपि ब्रह्मचारिणामनपत्यानां च सपिंडनं नास्ति तेषां सहैकोद्दिष्टमे
व व्युत्क्रममृतानां सापिंड्यकार्यं न वा केचित्सर्वत्र सपिंडनमाहुरिति अपुत्रे व्युत्क्रममृते तु विशेषो वार
णकारिकायाम् भ्राता वा भ्रातृपुत्रो वा सपिण्डः शिष्य एव वा सपिण्डीकरणं कुर्यात्पुत्रहीने मृते सति सर्वबंधुवि
हीने स्वपत्नी कुर्यात्सपिण्डनम् ऋत्विजं कारयेद्वापि पुरोहितमथापि वा बभ्रुरुद्रादितिसुतैः कार्यानेवां सपि
ण्डता व्युत्क्रमाघ्रप्रमीतायेते द्विना प्रेतेनाध्रुवम् पुनः सपिण्डनं तेषां कुर्यान्मृते पितामहे इति अत्र मूल
म्यपम् यतीनां सपिण्डनं नास्ति किं त्वेकादशेऽह्नि पार्वणं कार्यम् तदापि त्रिदण्डिनः एकदण्डादीनां तदपि
नेत्युक्तं प्राक् दण्डग्रहणात्पूर्वं मृते तु दाहादि सपिण्डनान्तं सर्वं कार्यमिति भेदश्चरणः सपिण्डनाविधि
माह वैजवापः समाप्ते संवत्सरे चत्वारि उदपात्राणि प्रपूर्णानि लोके प्रेताय त्रीणि पितृभ्यः प्रेतपात्रं पितृपा
त्रेष्वासिंचति ये समाना इति द्वाभ्यामेवं पिण्डान्याभिमृशत्येष वोऽनुगतः प्रेतः पितरस्तं ददामि वः शिवं
भवतु शेषाणां जायतां चिरंजीविनः समानीव संगच्छध्वं संवदध्वमिति यद्यपि तच्चापि देवरहितमेव
कार्यमेकपवित्रकम् नैवाग्नौकरणं तत्र तच्चावाहनवर्जितमिति मार्कण्डेयेनोक्तं तथापि सपिण्डीकर
णश्राद्धं दैवपूर्वं नियोजयेदित्यादि विरोधाद्विकल्पः प्रेतांशे वा ज्ञेयम् अत्र कामकालौ वैश्वदेवापि

नि॰ सिं॰ सुतानाम् प्राक्संवत्सरणीयपरिशिष्टापि त्र्यब्दविप्रकर्षे होमः साग्नेरपि भवेदिहायं तु गोभिलः अनुक्तकाले
२०७ स्वपितुः पुत्रः मरणमृतावपि आमान्नेन वापि राज्ञहेम्ना वापि प्रकल्पयेदिति तदा यदि माता पितृभिन्न
विषयम३ विपरम् आपन्नोऽपि न कुर्वीत श्राद्धं मासेन कर्हिचिदिति तेनैवोक्तेः शुद्धितत्त्वे कामधेनौ सपिण्डीक
रणं यावत्प्रेतश्राद्धं तु षोडशम् पक्वान्नेनैव कर्त्तव्यं सामिषेण द्विजातिभिः विश्वप्रकाशे प्रेतः
सपिण्डनादूर्ध्वं पितृलोकेऽनुगच्छति कुर्यात्तस्य तु पाथेयं द्वितीयेऽह्नि सपिण्डनात् तत्पूर्वसारे पूर्व
ततो वृद्धिश्राद्धं कुर्यात् एतन्मलमासेऽपि कार्य्यम् अधिमासे न कर्त्तव्यं श्राद्धमाभ्युदयं तथा तथै
व काम्यं यच्च भवेत्सर्वत्र अथ मासोर्द्धं तेइति हेमाद्रौ हारीतोक्तेः इति कमलाकरभट्टकृते निर्णयसिन्धौ
सपिण्डीकरणम् अथ प्रथमाब्दे निषिद्धानि हेमाद्रौ स्नानं चैव महादानं स्वाध्यायं चाग्नितर्प्प
णम् प्रथमेऽब्दे न कुर्वीत महागुरुनिपातने अग्नितर्पणं लक्षहोमादि न त्वाधानम् तत्तु प्रथमा
ब्दे भवत्येव तदाह हेमाद्रौ उशनाः पितुः सपिण्डीकरणं वार्षिके मृतवासरे आधानाद्युपसंप्राप्ताव
तस्मारागपि वत्सरात् अन्यतर्प्पणामिति शुद्धितत्त्वे पाठः आदि पदं वृद्धिनिमित्तकर्मपरम् दिवोदासी
सम३ ये महातीर्थगमनमुपवासव्रतानि च संवत्सरं न कुर्वीत महागुरुनिपातने दृष्टं श्राद्धकौमुद्याम् देवी
पुराणस्थमुक्तम् गौडनिबन्धे मात्स्ये ऊर्ध्वं प्रेतः पार्वणभुग्भवेत् वृद्धीष्टान्स्त्रेयो गृहस्थश्च राम॰
सदा भवेत् सपिण्डनाभावेनाधिकारीत्यर्थः गृहस्थः सपीयात् एव प्रेतकर्माण्यपनिवर्त्य चरेन्नाभ्युद २०७

यक्रियां [illegible] द्विसेविशातातपोक्तेः तथैवकाम्यमितिकेभ्यो उक्तंमाधवीये देवलः प्रमीतेपितरौयस्यदेहस्त
स्याशुचिर्भवेत् नदैवंतेन [illegible] मेयाऽग्निहोत्रोऽपिवत्सरः पित्र्यसपिंडदेवर्षांतसपिंडनपरम् तथैवकाम्यंय
त्कंमैवत्सरप्रथमाद्यतेष्वितिलघुहारीतावाक्यत्वात् वृद्धिनिमित्तापकर्षेतुकाम्यादिभवत्येवेतिगौडाः
अनएवलौगाक्षिः अन्येषांप्रेतकार्याणिमहागुरुनिपातने कुर्यात्संवत्सरादर्वाक्श्राद्धमेकंतुवर्जयेत् दा
हादेकादशाहांतंकार्यंतत्रशेषेचांतरस्याप्रतिबंधकत्वात् आद्यंश्राद्धमशुद्धोपिकुर्यादेकादशेहनीत्युक्तेश्च ए
पि३ कसरणुमेपत्न्यादौ प्रवादमाह माधवीयेऽभ्युग्रः पत्न्याःपुत्रस्यतत्पुत्रभ्रात्रोस्तत्तनयस्यच स्नुषायाश्च
पित्रोश्चसंघातमरणंयदि अर्वागब्दान्मातापित्र्ये सापिंड्यमाचरेत् लौगाक्षिः पत्नीपुत्रस्तथा
पौत्रोभ्राताततस्तुत्रकोऽपि पितरौचयदेकस्मिन्म्रियेरन्वासरेनरः आद्यमेकादशेकुर्यात्त्रिपक्षेतुसपि
ण्डनम् धवलनिबंधे महागुरुनिपातेतुप्रेतकार्यंयथाविधि कुर्यात्संवत्सरादर्वागेकोद्दिष्टंनपार्वणम्
भृगुः माताचैवतथाभ्राताभार्यापुत्रस्तथास्नुषा एषांमृतौवरंश्राद्धमन्यस्यनपुनःपितुः एतदपिसपिंड
नपरम् पितुर्मृतावन्यस्यश्राद्धंनचरेदित्यर्थः शुद्धितत्त्वेदेवलः अन्यश्राद्धंपरान्नंचगंधमाल्यंचमैथुनम्
वर्जयेद्गुरुपातेतुयावत्पूर्णोनवत्सरः पारस्करभाष्येबृहस्पतिः पितर्युपरतेपुत्रोमातुःश्राद्धान्निवर्तते
मातर्यपिचवृत्तायांपितृश्राद्धादृतेसमम् समंपितरंविनान्यश्राद्धंनेत्यर्थः शुद्धितत्त्वेदेवलः महागुरु
निपातेतुकाम्यंकिंचिन्नचाचरेत् आर्त्विज्यंब्रह्मचर्यंचश्राद्धंदेवक्रियांतथा एतत्सपिंडनात्प्रागितिके

स्त५

वितृउत्तरमपीत्यन्ये श्राद्धकौमुद्यां कालिकापुराणे पूर्वं पित्रे भवेत्‌ शिवापूज्यां प्रमीतपितृको नरः यावद्वत्स
रपर्यन्तं मन सापिन्न वाचरेत् केचित्तु पित्रोरब्दमध्ये चेत्स्यात्परणं समातुरेव च त्रैमासिकं तु भार्यायास्तदर्द्धं त्वा
त्मपुत्रयोरिति स्मृतेः सपत्नमातुरब्दं मातुः श्राद्धकौमुदीकारस्तु द्वयोरेव महागुर्वोरब्दमेकमशौचक
म् नान्येषामधिकारे चेत्स्वज्ञातिविहिताविलेति सम्बन्धज्ञानतः रपीत्येवधान्तिमूलमाह हेमाद्रौ भविष्ये
गयाश्राद्धं मृतानां तु पूरणे त्वब्दप्रमुखते त्रिस्थलीसेतौ गारुडे तीर्थश्राद्धं गयाश्राद्धं श्राद्धमन्यच्च पैतृकम्
अब्दमध्ये न कुर्वीत महागुरुविपत्तिषु इदं च पूर्वसपिण्डनाभावे वृद्ध्यादौ सपिण्डनोपकर्षे ऽब्दमध्येऽपि दर्शा
दिकार्यमेव पितुः सपिण्डनं कृत्वा कुर्यान्मासानुमासिकमिति छन्दोगपरिशिष्टात् सपिण्डीकरणादूर्ध्वं
प्रेतः पार्वणभुग्भवेदिति मात्स्यात् ततः प्रभृति वै प्रेतः पितृसामान्यमश्नुते विंदते पितृलोकं च ततः
श्राद्धं प्रवर्त्तते इति हारीतोक्तेश्च तिशूलपाणिः यत्तु कातीयम् सपिण्डीकरणादूर्ध्वं न दद्यात्प्रतिमासिक
म् एकोद्दिष्टविधानेन दद्यादित्याह शौनक इति तत्रैकोद्दिष्टविधिना न दद्यादित्यन्वयः तुल्यपादेन पा
र्वणेन विकल्प उक्तः अनेदंतात्वम् वृद्धिवित्तावर्गापि सपिण्डनापकर्षे पितृत्वप्राप्तिर्वक्षीत एव कृते सपि
ण्डीकरणे नरः संवत्सरात्परम् प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते इति विष्णुधर्मोक्तेः अर्वाक्सं
वत्सराद्यस्य सपिण्डीकरणं भवेत् धर्मात्स्य उद्धृपितस्यैव ज्ञेयं संवत्सरं ततः पैतृकपुराणाच्च तेन ततस्वपि रामः
वृद्धिरेवेत् सपिण्डनाभावेनाधिकारीत्यर्थः गृहस्थः कुर्यात्संवत्सरात् षष्ठे वा पूरणे संवत्सरेपि वा ये सपिण्डी ३०८

कृतास्तैर्न तेषां तु पृथक्क्रियेति शातातपोक्तेः तथैव कार्य्यमिति हेमाद्रिधृतहारीतादिवशाच्चैवमिति तथा अस्थिक्षेपं
गयाश्राद्धं चापरं परपाक्षिकम् प्रथमेऽब्देऽपि कुर्वीत कृते पितृसपिण्डने अस्यापवादः अस्थिक्षेपं गयाश्राद्धं चापरं परप
क्षिकम् प्रथमेऽब्देऽपि कुर्वीत यदि स्याद्वृद्धिमान्सुतः भजयाख्यश्राद्धं हानितिमदनरत्नपारिजातादयः अन्ये यथा
श्रुतमाहुः तावत्तु यदीदं समूलं तदाब्दिकं विनापकर्षे पृथग्वक्ष्यथैर्न तु परमिति योज्यम् पतितानां गयायां विशेषो ब्राह्मे
क्रियते पतितानां च गते संवत्सरे क्वचित् देशधर्मप्रमाणत्वात् गयाश्राद्धं स्वबंधुभिः अथ विधानानि तत्र पंचके
मृते मदनरत्ने गारुडे आदौ कृत्वा धनिष्ठार्द्धमेतन्नक्षत्रपंचकम् रेवत्यंतं सदा दुष्टमशुभं दाहकर्मणि शवस्य तु
समीपे तु क्षेप्तव्याः पुत्तलास्तदा दर्भमयास्तु चत्वारः ऋक्षमंत्राभिमंत्रिताः ततो दाहः प्रकर्त्तव्यस्तैश्च पुत्तलकैः सह
सूतकान्ते ततः पुत्रैः कार्य्यं शांतिकपौष्टिकम् पंचकेषु मृतो यो वै न गतिं लभते नरः तिलांश्चैव हिरण्यं च तमुद्दिश्य प्रद्य
ते दहेत् क्रियानिषेधो भाजनोपानहौ छत्रं हेममुद्रा च वाससी दक्षिणा दीयते विप्रे सर्वपातकमोचिनी मदन
रत्ने गार्ग्यः यदि नन्दा तिथौ तास्याज्ज्ञानुभौमशनैश्चरैः त्रिपादर्क्षैश्च संयोगो द्वयोर्योगाद्द्विपुष्करः द्वित्रिपु
ष्करयोगे तु मृतिः स्यात्तत्रावहा दहने मरणे चैव त्रिगुणं स्यात्त्रिपुष्करे एतत्तत्र द्विधैवमेवं स्याद्दते दोषोपशान्त
ये तिलपिष्टमयीं वै पित्राणौरं कारयेत्ततः हृदये निधायालंकृत्य दाहयेत्तस्योपरि दाहमंत्रमाह बौधाय
नः अस्मात्त्वामिति मंत्रेण तिलपिष्टं प्रदापयेत् द्वित्रिपुष्करयोर्दोषविशुद्धिभिः कुंभं वैपोहति वासवमरणं
चेत्स्याद्दहनापि पुनर्मृतिः सुवर्णं दक्षिणां दद्यात् कृष्णमवत्समथापि वा वासवधनिष्ठाप्राप्ते कुंभमीनास्थ

कृ ४

चे२

नि॰सिं॰ ३०९ तेषं चेद्धेमरणं यस्य जायते ततस्योर्ध्वगतिर्द्वादशं ततो न शुभं भवेत् ततस्य दाहः कर्त्तव्यो विनाशकृत्तस्येव शुर्जं तु शु अ
थवा तद्दिने कार्य्यो दाहस्तु विधिपूर्वकम् धनिष्ठापंचके जीवो मृतो यदि कथंचन त्रिपुष्करे यास्यमेवाकुलं जा
त्मारयेद्ध्रुवम् तत्रानिष्टविनाशार्थे विधानं समुदीर्यते दर्भोरणप्रतिमाः कार्याः पंचोरणीसूत्रवेष्ठिताः यवपि
ष्टेनानुलिप्ताभिः सह शवं वहेत् प्रेतदाहः प्रेतसखः प्रेतपः प्रेतभूमिपः प्रेतहर्त्ता पंचमस्तु नामान्येतानि चक्र
मात् अत्र प्रतिमाः गंधपुष्पैः पूजयित्वा प्रथमां शिरसि द्वितीयां नेत्रयोः तृतीयां वामकुक्षौ चतुर्थीं नाभौ
पंचमीं पादयोः यस्य तदुपरि स्नानाभिषेकं तं कृत्वा यमाय सोमेत्यवर्कमिति मंत्राभ्यां प्रत्येकं ताः स्वेज्य कृते दितिभ
ुः सूतकांते ततः पुत्रः कुर्याच्छान्तिकपौष्टिकम् कांस्यपात्रस्थिततैलं वीक्ष्य दद्याद्द्विजन्मने ब्रह्मविष्णुमहेशेन्द्र
रणप्रीतये ततः माषमुद्गयवव्रीहिप्रियंग्वादि प्रयच्छति स्वर्णदानं रुद्रजाप्यं लक्षहोमो द्विजार्चनम् गोभूद
नं खंडशो न कुर्याद्दोषोपशान्तये अपरार्के धनिष्ठापंचके मृते पंचरत्नानि तन्मुखे प्रास्याकृतित्रयं तत्र कु
र्याद्दहवयामिति ततोऽग्निहरणं कुर्यादेष साग्नेर्विधिः स्मृतः हृतं हरति खनेद्देवजले वा प्रतिपादयेत् त्रिपादर्क्षे
मृते तद्धिरण्यपशाकलं मुखे तस्यापि व्रश्मयं कुर्यात्पुरुषत्रितयं ततः होमं प्रतिमुखं कुर्यात्तथा चेहवयामिति
कांस्यायसं च कार्पासं कुसुंभं प्रतिपाद्य च निर्यातस्य साग्निसंस्कुर्याद्द्रव्यं शेषो वान्यमुत्सृजेत् तत्रैव कनकं ही
रकं नीलपद्मरागं च मौक्तिकम् पंचरत्नमिदं प्रोक्तं ऋषिभिः पूर्वदर्शिभिः रत्नानां वाप्यभावे तु स्वर्णं कृ वा राम॰
ध्वैमेव वा सुवर्णस्याप्यभावे त्वाज्यं देयं विचक्षणैः मदनरत्नेप्येवम् तथा एकाग्निपतिपलं कांस्यं तत ३०९

धर्मराजाय मृत्यवे चांतकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय च। औदुंबराय दध्नाय नीलाय परमेष्ठिने। वृकोदराय चित्राय चित्रगुप्ताय वै नमः। विधिनाऽपरांह्ने
त्वाऽस्यैकैकामाहुतिं हुनेत्। कृष्णांगीं कृष्णवस्त्रां च हेमनिष्कसमन्वितां। दद्याद्विप्राय शांताय प्रीतो भवतु मे यमः। त्रिपादर्क्षे त्वेतदेव अपरार्के। पुनर्वसूत्तराषाढा कृत्तिका
उत्तरफाल्गुनी। पूर्वभाद्रविशाखा च ज्ञेयमेतत्त्रिपादभम्। मयूरचित्रे गर्गः। मृतः श्मशानं यो नीतः उपजीवति मानवः। गृहं यस्य प्रविष्टोऽसौ तिष्ठेदप्यकदाचन। अचिरान्नरस्तुमा
यानि हतदारपरिग्रहः। तत्र शांतिं प्रवक्ष्यामि धर्मराजमतं यथा। सक्षीरं रंगाद्धृताक्तानामग्ने हुत्वा सुखं बुधः। औदुंबरीं रंगाविधिवत्ततः शांतिः कृता भवेत्। सावित्र्यष्ट
सहस्रेणाक्षीरशां
तिं च कारयेत्। कपि
लां तिलकांस्यं च कृ
तांते भूरिदक्षिणामिति
। अथ ब्रह्मचारिमृतौ
शौनकः। ब्रह्मचारि
मृतो रीतिं कथया
मि समासतः। तत्रा
वकीर्णिदोषस्य प्रा
यश्चित्तप्रशांतये।
द्वादशाब्दं षडब्दं वा
त्र्यब्दं शक्त्या यथा वाच
रेत्। स्नातको ब्रह्म
चारी च निधनं प्राप्नु
याद्यदि। संयोज्य वार्कविधिना संयोज्योतो ततः परम्। देशकालौ स्मृत्वामुकगोत्रामुकनाम्नो मृतस्य ब्रह्मचारिणो व्रतविसर्गं करिष्ये इत्युक्त्वा हुत्वा १

दर्द्वा तद्रुक्मम् नवन्द्त्रिपलं वापि दद्याद्विप्राय शक्तितः तथान्यच्च स्वगृह्योक्तविधानेन कृत्वाग्नेः स्थापनं ततः
अन्वाधाने निर्वपनं देवानां च तथाहुतिः यमाय धर्मराजाय मृत्यवे चांतकाय च वैवस्वताय कालाय स
र्वभूतक्षयाय च औदुंबराय दध्नाय नीलाय परमेष्ठिने वृकोदराय चित्राय चित्रगुप्ताय वै नमः विधि
नाऽपरांह्ने कृत्वा एकैकामाहुतिं हुनेत् कृष्णांगीं कृष्णवस्त्रां च हेमनिष्कसमन्विताम् दद्याद्विप्राय शां
ताय प्रीतो भवतु मे यमः त्रिपादर्क्षे त्वेतदेव अपरार्के पुनर्वसूत्तराषाढा कृत्तिकोत्तरफाल्गुनीम् पूर्व
भाद्रविशाखा च ज्ञेयमेतत्त्रिपादभम् मयूरचित्रे गर्गः मृतः श्मशानं यो नीत उपजीवति मानवः गृ
हे यस्य प्रविष्टोऽसौ तिष्ठेदप्यकदाचन अचिरान्नरस्तु मायाति हतदारपरिग्रहः तत्र शांतिं प्रवक्ष्यामि ध
र्मराजमतं यथा सक्षीरं रंगाद्धृताक्तानामग्नौ हुत्वा सुखं बुधः औदुंबरीं रंगाविधिवत्ततः शांतिः कृ
ता भवेत् सावित्र्यष्टसहस्रेण क्षीरशांतिं च कारयेत् कपिलां तिलकांस्यं च कृतांते भूरिदक्षिणामिति
अथ ब्रह्मचारिमृतौ शौनकः ब्रह्मचारिमृतौ रीतिं कथयामि समासतः तत्रावकीर्णिदोषस्य प्रायश्चित्त
प्रशांतये द्वादशाब्दं षडब्दं वा त्र्यब्दं शक्त्या यथाचरेत् स्नातको ब्रह्मचारी च निधनं प्राप्नुयाद्यदि
संयोज्य वार्कविधिना संयोज्योतो ततः परम् देशकालौ स्मृत्वामुकगोत्रामुकनाम्नो मृतस्य ब्रह्मचारिणो
व्रतविसर्गं करिष्ये इत्युक्त्वा हुत्वा दद्याद्विप्राय शक्तितः तथान्यच्च स्वगृह्योक्तविधानेन कृत्वाग्नेः स्थापनं त
तः अन्वाधाने निर्वपणं देवतानां तथाहुतिः यमाय नांदीश्राद्धं कृत्वार्कशाखाग्रं च हरिद्रया लिख

त्वापीतसूत्रेणवस्त्रयुग्मेनवावेष्ट्याग्निप्रतिष्ठापाधारांतेऽन्तयेवहस्यान्ते विवाहविधिप्रयोजनकायचयस्मैत्वंकामंका
मायैतिकामायव्याहृतिभिश्चाज्यहुत्वास्विष्टकृदादिसमाप्यार्कशाखाशवंचदहेत् विधानमालायाम् येषांकुलेप्र
लवारोगिनिधनंप्राप्नुयाद्यदि तत्कुलंक्षयमाप्नोति सोपिदुर्गतिमाप्नुयात् मृतस्यम्रियमाणस्यषडब्दव्रतमा
दिशेत् त्रिंशद्गोवृषंचापि रूप्योदद्यात्कौपीनकान्नवान् हस्तमात्रःकरणीमात्रादधोन्कुम्भोजिनाष्टिंच पा
दुकाछत्रमाल्यानिगोपीचंदनमेवच मणिप्रवालमालाश्चभूषणादिसमर्पयेत् एवंकृतेविधानेनविद्वः
कोपिनजायते अत्रमूलमन्वेषणम् कुष्ठिमृतौतुप्रश्नः मृतस्यकुष्ठिनोदेहनिखनेत्कोपकल्मषमिषु वासरत्रिंश
यपश्चादुद्धृत्यास्थितंदहेत् नगंगास्तवनकोप्यनिक्षेपविधिरुच्यते षडब्दव्रतमस्मिन्विधिनानेनकृत्तु चरे
त् ततोस्थिसंचयंतस्मगंगायांप्रक्षिपेत्सुधीः मासिमासिततःकुर्यान्मासिश्राद्धानिपार्वणात् इत्येतत्कुष्ठि
मरणेकथितंशास्त्रकोविदैः शुद्धितत्त्वेभविष्ये मृत्युकुष्ठगणोविप्र उत्तरोत्तरतोगुरुम् विचार्चिकानुउश्च
मौविवरीयस्तृतीयकः विकर्चुर्चूर्णतानाम्नौचकृष्णश्चेतेतथाष्टकम् अनुक्तामृतेचप्रापयेत्तीर्थमथवातरु
मूलकम् नपिंडंनोदकंकार्यंनचदानक्रियाचरेत् षण्मासीयत्रिमासीयमृतःकुष्ठीकदाचन यदिस्ने
हावरेद्दाहयतिचान्द्रायणंचरेत् अकृतप्रायश्चित्तेकुष्ठ्यादिदाहेइदंप्रायश्चित्तम् अतएवकृतस्वादिवि
कुष्ठिनोपिदाहप्रशस्त्रेशूलपाणिनोक्तम् अतएवान्यदीयकुष्ठिनोमरणान्तमाघ्रोचतुर्नैर्कौमीक्ष्ण रम:
याहीनस्यमूर्खस्यमहारोगिणएवच यथेष्टाचरणस्याकुमरणान्तमशौचकम् महारोगास्तुवक्ष्यन्त्याप ३२०

पस्मारिकुष्ठमेहोदरभगंदराः अर्शांसि ग्रहणीत्यष्टौ महारोगाः प्रकीर्तिता इति रजस्वलायास्तु ब्रह्मपुराणे
रजस्वलायाः प्रेतायाः संस्कारादीन्न नाचरेत् ऊर्ध्वं त्रिरात्रात्स्नातां तां शववद्धर्मेण दाहयेत् अतः प्रक्षाल्य मुक्ता
शववद्दग्ध्वा त्र्यहाद्ध्वं दहेत् संकेते तु मदनरत्ने स्मृत्यंतरे उदक्या सूतिका वापि म्रियते तस्या यदि तां तदा आग्नौ
चेच्चनतिक्रांते दाहयेदन्तरा यदि कुंभे तेन तु तोयेन स्नापयित्वानुमंत्रतः आपोहिष्ठेति तिसृभिर्हिरण्यवर्णा
श्चतसृभिः पवमानानुवाकेन यदंतीति च सप्तभिः ततो जन्नपवित्रेण गोमूत्रेणाथ च द्विजाः स्नापयित्वा
न्यवसनेनाछाद्य शववद्धर्मतः दाहादिकं ततः कुर्यात्प्राजापतिवचो यथा जन्नसवित्रमापोऽस्मानिति
मिताक्षरायाम् पंचभिः स्नापयित्वानु गव्यैः प्रेतां रजस्वलाम् वस्त्रांतरावृतां कृत्वा दाहयेद्विधिपूर्वकम्
गद्यकारिकायाम् अंतरिक्षमृताये च वज्राव प्रमादतः उदक्या सूतिका नारी चरेच्चांद्रायणत्रयम्
ततो यवपिष्टेन तु लिप्त्वाष्टोत्तरशतं शूर्पोदकैः संस्नाप्य भस्म गोमय मृत्कुशोदकपंचगव्यशुद्धोदकैरापो
हिष्ठा पावमानीभिः संस्नाप्यान्यवस्त्रं धृत्वा तद्दहेदिति मदनः अत्र प्रायश्चित्तमाह बौधायनः उदक्या सू
तिकामृत्या चरेच्चांद्रायणत्रयमिति सूतिकायास्तु मिताक्षरायाम् सूतिकायां मृतायां तु कथं कुर्वंति
याज्ञिकाः कुंभे सलिलमादाय पंचगव्यं क्षिपेत्ततः पुण्यर्ग्भिरभिमंत्र्यापो वाचा शुद्धं लभेत्ततः तेनै
व स्नापयित्वा तु दाहं कुर्याद्यथाविधि अग्निनात्वामंत्रियाभिर्वामदेव्याभिरेव च अन्त्यश्चैव वारुणैर्मंत्रैः
संस्नाप्याविधिना दहेत् गद्यकारिकायाम् सूतिकामरणे प्राप्ते सर्वौषध्यनुलेपनम् असूतिका तु सं
स्पृष्टः शूर्पाग्रेणग्रस्तां क्षिपेत् प्रायश्चित्तं विशेषस्तत्रैव सूतिका तु यदा साध्वी विस्नाता मरणं गता

नि॰ सिं॰ त्रिवन्नवदिनादर्वागेकाब्देन विमुच्यति ऊर्ध्वं तु सूतिकानु यदा नारी प्राणांश्चैव परित्यजेत् मासमेकावधिं
३११ यावत्त्रिभिः कृच्छ्रैर्विमुच्यति गर्भिणीमरणे तु मदनरत्ने शौनकः गर्भिण्युदक्यासंस्कारमेव च प्रवक्ष्या
गु३ मि समासेन शौनकोहं द्विजन्मनाम् गर्भिणीमरणप्राप्ते गोमूत्रेण जलैः सह आपोहिष्ठादिभिर्मंत्रैः
प्रोक्ष्य भर्तोसि मास्थितः प्रेतं श्मशानं नीत्वा योलिख्य सव्योदरं ततः पुत्रमादाय जीवं चेत्तत नद
त्वा स्तुनाययत् यस्तेस्तनः शशयेत्यचा ग्रामे निधाय च उदरं चाव्रणं कुर्यात् पृषदाज्येन पूरयेच्च मं
स्मकुश्मशो मूत्रेण पोहिष्ठादिभिस्त्रिभिः स्नाप्य चाच्छाद्य वासोभिः शवधर्मेण दाहयेत् तत्रैव षड्
शीतिमतेगंधानि गर्भिण्यां मृतायां दक्षिणं सिरं संनिधाय तस्या नाभिरं ध्रात्सव्यमुदरं चतुरंगुलं
हिरण्यगर्भः समवर्ततेति छित्वा गर्भं छेदं प्राणस्तं प्रक्षाल्य निखनेद् गत्तं यदि जीवन्तं जीवत्वं ममगु
त्रे केनुत्का सैत्रिये त्वोतिपंचभिः स्नापयित्वा हिरण्यमंतर्दाय मूत्रेण निधाय व्याहृतिभिर्भ्रूमयं
स्ते तं नगीशूयरुति स्तनं पाययित्वा शिशुं ग्रामं प्रापयेत् कृभं छिद्रे दस्युलेपनेनायुधायेति पंचाहुतीर्हु
त्वा प्राणाय स्वाहा पूषे स्वाहेत्यनुवाक्याभ्यां व्याहृत्या चाज्यं हुत्वाभिन्नमुदरं सूत्रेण संस्पृश्य त
नानुलिप्य ब्राह्मणाय तिलानां भूमिसुवर्णं दद्याद् दधय यथोक्तेन कल्पेन दहेत् बौधायनेन तु शन्नायुधा
येति पंचहोमानंतरं भस्मासायाया पाससि पासायसं पासायो घासाया वपासायाम्भुचे श्वोकायतनपते रम:
तपत्ये ब्रह्महत्यायै सर्वस्मै भूतिस्वाहा नेरहुतयो व्यधिका उक्ताः गृह्यकारिकायाम् यदा गर्भव ३११

तीनारीसशल्या संस्थिता भवेत् कुक्षिं भित्वा ततः शल्यं निर्हरेद्यदि जीवति प्रमीतं निखनेत्तं तु प्रायश्चित्तमतः परम् सा
त्रयस्त्रिंशता कृच्छ्रैः शुध्यते शल्यदोषतः सगर्भं दहते तस्या वरांगं न तु पातकम् प्रायश्चित्तं चरित्वा तु मुच्यते पापका
रिणः दग्ध्वा तु गर्भसंयुक्तां त्रिरब्दं कृच्छ्रमाचरेत् अन्वारोहणं स्त्रीणां मातृनो भर्तुरेव च सर्वपापक्षयकरं निरया
त्तारणाय च अनेकस्वर्गफलदं मुक्तिदं च तथैव च जन्मान्तरे च सौभाग्यधनपुत्रादिवृद्धिदम् देशकालौ स्मृत्वा रु
न्धतीसमाचारत्वस्वर्गलोकमहीयमानत्वमनुष्यलोमसमसंख्याब्दावच्छिन्नस्वर्गवासभर्तृसहितत्वचतुर्दशेन्द्रा
वच्छिन्नकालिकक्रीडमानत्वमातृपितृश्वशुरकुलत्रयपूतत्वब्रह्मघ्नमित्रघ्नकृतघ्नपतिभूतत्वपत्युवियोगकामा भ
र्तृज्वलच्चितारोहणं करिष्ये अनुगमने तु फलमुक्तिख्यात्वारोहणं करिष्ये इत्युक्त्वा हरिद्राकुंकुमाञ्जनादियु
तशूर्पाणि सुवासिनीभ्यो दद्यात् मंत्रस्तु लक्ष्मीनारायणौ देवौ बलसत्त्वगुणाश्रयः गाढसत्वं च मे देयाद्भ
नेः परितोषितः सोपस्कराणि शूर्पाणि वायनैः संयुतानि च लक्ष्मीनारायणप्रीत्यै सत्त्वकामा ददाम्यहम् त
तः समीपमागत्य पंचरत्नानि पल्लवे नीलाञ्जनं तथा बध्वा मुखे मुक्ताफलं न्यसेत् ततोग्निप्रार्थनं कृत्वा मन्त्रे
णानेन निश्चितम् स्वाहा सप्तशान्तिविस्फुलिंगसर्वगोत्रे कृताश्रान्ते सत्वमार्गप्रदानेन नय मां पत्युरन्तिकम् ततो
ग्नावाज्येनाग्नये तेजोधिपतये विष्णवे सत्त्वाधिपतये कालाय धर्माधिपतये पृथिव्यै लोकाधिपतये अद्भ्यो र
साधिपाभ्यः वायवे बलाधिपतये आकाशाय सर्वाधिपतये कालाय धर्माधिपतये अद्भ्यः सर्वसाक्षिणी
भ्यः ब्रह्मणे वेदाधिपतये रुद्राय श्मशानाधिपतये च हुत्वाग्निं प्रदक्षिणीकृत्य दद्यादमुं पत्नीं च संपूज्य पुष्पा
ञ्जलिं गृहीत्वाग्निं प्रार्थयेत् त्वमग्ने सर्वभूतानामन्तश्चरसि साक्षिवत् त्वमेव देव जानीषे न विदुर्यानि मा

नि॰ सिं॰ ३१२ तुबा: अनुगच्छामि भर्त्तारं वैधव्यभयपीडिता सत्वमार्गप्रदानेन नय मां भर्त्तुरन्तिकम् मंत्रमुच्चार्य्य शूनके:
प्रविशेद्वा हुताशनम् गोडास्तु इमा नारीरविधवा इति ॐ इमाः पतिव्रताः पुण्याः स्त्रियो या याः सुशोभनाः
सहभर्त्तृशरीरेण संविशन्तु विभावसुम् इति च विप्रः पठेदित्याहुः कातरं तु प्रेतोत्तरेषु तादवरः स्त्रिष्वावाउ
दीर्घ्वेति द्वाभ्यामुत्थापयेत् एतन्माहात्म्यं मिताक्षरादौ ज्ञेयाः पृथ्वीचन्द्रोदये स्कान्दे अनुव्रजन्ती भर्त्तारं गृहात्पि
तृवनं मुदा पदे पदेऽश्वमेधस्य फलं प्राप्नोत्यनुत्तमम् पत्न्वगिराः या स्त्री ब्राह्मणजातीया मृतं पतिमनुव्रजे
त् सा स्वर्गमात्मघातेन नात्मानं न पतिं नयेदिति यत्तु व्याघ्रपात् न म्रियेत समं भर्त्रा ब्राह्मणी शोकदर्शिता
न ब्रह्मगतिमाप्नोति मरणादात्मघातिनीति तत्पृथक्चितिपरम् पृथक्चितिं समारुह्य न विप्रा गन्तुमर्ह
सि अन्यासां चैव नारीणां स्त्रीधर्मोऽयं परः स्मृत इत्युशनसोक्तेः पृथक्चितिस्तु क्षत्रियादिपरा नहि
धिब्राह्मणे देशान्तरमृते पत्यौ साध्वीत्याहुश्च कालद्वयम् निधायोरसि संस्पृश्य प्रविशेज्जातवेदसम् ऋग्वे
दवादात्साध्वी स्त्री न भवेदात्मघातिनी त्र्यहाशौचे निवृत्ते तु श्राद्धं प्राप्नोति शास्त्रवित् इमा नारीरविधवा
इति ऋग्वेदवादः त्र्यहाशौचमन्वारोहणपरमिति स्मार्त्ताः निषेधवाक्यानि प्रायश्चित्तार्थं मृतेन पतिते
न वा सहमरणनिषेधपराणीत्याहुः अस्थिदाहे पलाशदाहे वा न पृथक्चितिदोषः अंगत्वेन स्थाना
पत्यावाशरीरतुल्यत्वात् यत्तु ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वा भवेत्पतिः पुनात्यविधवा नारी तमादाय मृ रामः
तातुये इति हारीतीये तत्पतितदाहादिनिषेधनसहगमनस्य दूरापास्तत्वादर्थवादमात्रमिति पृथ्वीचन्द्रः ३१२

प१

यन्मानारीं पापबलतः सहमरणे नोद्धारइति स्मार्तगौडाः मुद्रितत्वेव्यासः दिनैकगम्यदेशस्था साध्वी चेत्कृतनिश्चया
न दहेत्स्वामिनं तस्या यावदागमनं भवेत् तत्रैव भविष्ये तृतीयेह्नि उदक्यायास्ते भर्त्तारि वै द्विजाः तस्यास्तु म
रणार्थाय स्थापयेदेकरात्रिकम् एकांचितां समासाद्य भर्त्तारं यानुगच्छति तद्भर्तुर्यः क्रियाकर्त्ता स तस्या
श्चक्रियां चरेत् एतद्दशाहांते तच्चाग्निदाता प्रेतस्यापिण्डं दद्यात्सहैव हीति वायोक्तेः आपस्तंबः चितिभ्रष्टा
तु या नारी मोहाद्विचलिता भवेत् प्राजापत्येन शुद्ध्येत तस्माद्वै पापकर्मणः तथा अन्वारोहे तु [illegible] नारीणां
पत्युश्चैकोदकक्रिया पिण्डदानक्रियां तद्वच्छ्राद्धप्रत्याब्दिकं तथा अन्वारोहे कृते तस्याः पृथक्पिण्डांस्ति
लांजलीन् पृथक्छिले न कुर्वीत दद्यादेकछिले तथा अन्यः प्राउक्तम् इदं गर्भिणी वालापत्या सूति
कारजस्वला व्यभिचारिणीभिर्न कार्यम् स्वैरिणीनां गर्भिणीनां पतितानां च योषिताम् नास्ति पत्या
ग्निसंवेशः पतितो हि तथा उभाविति मदनरत्ने स्मृतिसंग्रहोक्तेः मदनरत्ने बृहस्पतिः वालसंवर्द्धनं तु
त्को वालापत्या न गच्छति व्रतोपवासनियता रक्षेद्गर्भं च गर्भिणी तृतीयपादे रजस्वलासूतिका चेति
पृथ्वीचन्द्रो गौडीयमुद्रितत्वे च पाठः तत्रैव बृहन्नारदीयेपि वालापत्याश्च गर्भिण्यो ह्यदृष्टऋतवस्तथा
रजस्वला राजसुते नारोहन्ति चितां तु ता इति अत्र पतिव्रता सा सदीप्तं प्रविश्य हुताशनमिति भारतम् अ
रवदवादात्साध्वी स्त्रीति प्राप्ताच्च पतिव्रतानामेवाधिकारेण दुर्वृत्तानाम् यत्तु अमवत्यचयाः हृदपतिं दु
ष्टं न चेतसा वर्त्तते याश्च सततं भर्त्तृरणप्रातिकूलतः तत्रानुमरणकाले याः कुर्वन्ति तथाविधाः कामा

नि॰सिं॰ क्रोधाद्भयान्मोहात्सर्वाः कृता भवंतु ते निश्चा रत्नात्वे मुक्तिकन्यायेन स्तावकमिति पृथ्वीचंद्रः ब्राह्मणाः एकचितिरेव
३१३ न पृथक्चितिः क्षत्रियादीनां पृथगेकाचेति कल्पतरुरत्नाकरमदनपारिजातादयः शुद्धिचिंतामणौ चैवं तत्रा
न्वारोहणे मेवे शौचमध्यते ऊर्ध्वं वा कृते त्रिरात्रमध्ये एव दशपिण्डाः सहगमने तु मेवे शौचं तुल्यमाशौचं पि
ण्डदानं च स्त्रान्वितायाः प्रदातव्या दशपिण्डाः स्वगृहेण तु स्वाम्यशौचव्यतीते तु तस्याः श्राद्धं प्रकीर्यते इति शुद्धि
... संस्थितं पतिमालिंग्य प्रविशेद्धुताशनम् तस्याः पिण्डादिकं देयं के
लेपस्त्वलपारणौ वपनेन सिंस्मृतेः ... अन्यत्राप्युक्तं यदा तु रजस्वलापि वि
मृताः पतिपिण्डवदिति जिवनस्त्वलपारिणशुद्धितत्त्वधृतव्यासोक्तेः नशुद्धिप्रतीक्षते तत्र विधिः देवयाज्ञिकनिबंधे यदा स्त्री
पत्नीमृते पत्यौ देशकालवशात्तदेवानुगच्छति नशुद्धिप्रतीक्षते तत्र विधिः देवयाज्ञिकनिबंधे यदा स्त्री
यामुदक्यायां पतिः प्राणान्समुत्सृजेत् द्रोणमेकं तण्डुलानामवहन्याद्विशुद्धये मुशलाघातैस्तदस्त्र
स्रवते योनिमण्डुलात् विसृजेत्कामन्यमानाश्चवितेन दस्रकृक्षयम् दृष्टशौचं प्रकुर्वीत पंचमं ति क्रिया
पृथक् त्रिंशद्दिवसाति दृष्टाच गवांदत्वाच हात्रमात् विप्राणां वचनाच्छुद्धा समरोहेद्धुताशनम् नारीणां स
रजस्कानां मियशुद्धिस्तदाहृता अन्वारोहादौ निर्णयः पूर्वमुक्तः इति भट्टकमलाकरकृते निर्णयसिंधौ
वत्यकर्मनिर्णयः अग्निप्रवेशाप्राप्तौ तु विष्णुः मृते भर्तरि ब्रह्मचर्यं तदन्वारोहणं चेति ब्रह्मवैवर्त्ते स
हानुगमनं नष्टास्तवैधव्यस्याश्रुपालनम् यत्तु तत्रैव कालो नान्यगतिः स्त्रीणां सहानुगमनादृते इति त रामः
ब्रह्मचर्याशक्यत्वपरम् तथा च मनुः ब्रह्मचर्यं चरेद्वापि प्रविशेद्वा हुताशनम् काशीखण्डेऽपि पत्योम् ३१३

तेपियायोषिद्वैधव्यंपालयेत्काचित् सापुनःप्राप्यभर्त्तारंस्वर्गलोकंसमश्नुते अनुयातिनभर्त्तारंयदिदैवात्कथं
चन तत्रापिशीलंसंरक्षेच्छीलभंगात्पतत्यधः तद्वैगुरोपादपिस्वर्गात्पतिःपततिमान्यथा तस्याःपिताचभ्रातृ माताच २
वर्गस्तथैवच अथविधवाधर्म्माः मदनरत्नेस्कांदे विधवाकवरीबंधोभर्त्तृबंधायजायते शिरसोवपनंत
स्मात्कार्यंविधवयासदा एकाहारःसदाकार्यानद्वितीयःकदाचन मासोपवासंवाकुर्याच्चांद्रायणमथापिवा
पर्य्यंकशायिनीनारीविधवापातयेत्पतिम् नैवांगोद्वर्त्तनंकार्य्यंस्त्रियाविधवयाक्वचित् गंधद्रव्यस्यसंभो
गोनैवकार्य्यस्तयापुनः तर्प्पणंप्रत्यहंकार्य्यंभर्त्तुस्तिलकुशोदकैः तत्पितुस्तत्पितुश्चापिनामगोत्रादिपूर्वकं
वृद्धस्यपुत्राद्यपरामृतिमदनपारिजाते नाधिकारोहनड्वाहंप्राणैःकंठगतैरपि कंचुकंनपरीदध्याद्वासोनविकृ
तंवसेत् वैशाखेकार्त्तिकेमाघेविशेषनियमंचरेत् प्रचेताः तांबूलाभ्यंजनंचैवकांस्यपात्रेचभोजनम् य
तिश्चब्रह्मचारीचविधवाचविवर्ज्जयेत् आद्यदोषविशेषःप्रागुक्तः यत्तुबोधायनः संवत्सरंप्रेतपत्नीम
धुमांसंविवर्ज्जयेत् अधःशयीतषण्मासानितिसोऽकल्पभाविनमितितदसवर्णापरमित्यपरार्कः अथ
संन्यासः याज्ञवल्क्यः वनाद्गृहाद्वाकृत्वेष्टिंसार्ववेदसदक्षिणाम् प्राजापत्यांतदंतेतानग्नीनारोप्यचा
त्मनि अधीतवेदोजपकृत्पुत्रवानन्नदोग्निमान् शक्त्याचयज्ञकृन्मोक्षेमनःकुर्यात्तुनान्यथा एतदाश्र
मसमुच्चयपक्षे जाबालश्रुतौत्वन्यपिपक्षाउक्ताः यदिवेतरथाब्रह्मचर्यादेवप्रव्रजेद्गृहाद्वावनाद्वा अथपु
नरव्रतीवाव्रतीवास्नातकोवास्नातकोवोत्सन्नाग्निरनग्निकोवायदहरेवविरजेत्तदहरेवप्रव्रजेदिति अं
गिराः प्रव्रजेद्ब्रह्मचर्याद्वाप्रव्रजेच्चगृहादपि वनाद्वाप्रव्रजेद्विद्वानातुरोवाथदुःखितः आतुराणुमूर्षुः

दुःखितश्चौरव्याघ्रादिभीतः भारते आतुराणां च संन्यासे न विधिर्नैव च क्रिया प्रैषमात्रं समुच्चार्य्य संन्यासं तत्र पूरये
त् जाबालश्रुतावपि यद्यातुरः स्यान्मनसा वा वाचा वा संन्यसेदिति अत्र विप्रस्यैवाधिकारः ब्राह्मणाः प्रव्रजंतीति
जाबालिश्रुतेः आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहादिति मनूक्तेश्चेति विज्ञानेश्वरादयः वृद्धयाज्ञ
वल्क्योपि चत्वार आश्रमा ब्राह्मणस्योक्ता आश्रमाः श्रुतिनोदिताः क्षत्रियस्य त्रयः प्रोक्ता द्वावेको वैश्यशूद्रयोरिति
माधवस्तु ब्राह्मणः क्षत्रियो वाप्यथ वैश्यो वा प्रव्रजेद्गृहादिति कौर्मोक्तेर्वर्णत्रयस्याप्यधिकारः पूर्ववाक्यं तु
काषायदण्डादिनिषेधार्थम् मुखजानामयं धर्मो यद्विष्णोर्लिंगधारणम् राजन्यवैश्ययोर्नेति दत्तात्रेयमुने
र्वच इति बौधायनोक्तेरिति पक्षांतरमाह तच्च कुटीचकादिपरमेनादिति योपि संन्यासपलपैतृकमिति क
लौ निषेधः सोपि त्रिदण्डादिपर इत्युक्तं प्राक् स च संन्यासश्चतुर्थ्या हारीतः कुटीचको बहूदको हंसश्चैव
तृतीयकः चतुर्थः परमहंसो यो यः पश्चात्स उत्तमः आद्यः पुत्रादिना कुटीं कारयित्वा तत्र गृह एव वसन् काषा
यवासाः शिखोपवीती त्रिदण्डवान् बंधुपुत्रगृहे वा भुंजान आत्मज्ञो भवेत् एतदंत्यं तावच्छक्तपरम् द्वितीयस्तु
बंधून्हित्वा सप्तागाराणि भैक्षं चरन् पूर्वोक्तवेषः स्यात् हंसस्तु पूर्वोक्तवेषोप्येकदण्डः एकं तु वैणवं दण्डं
धारयेन्नित्यमादरादिति स्कांदात् विष्णुरपि यज्ञोपवीतं दण्डं च वस्त्रं जंतुनिवारणम् तावान् परिग्रहः प्रो
क्तो नान्यो हंसपरिग्रहः चतुर्थोपि स्कांदे परहंसस्त्रिदण्डं च रज्जुं गोवालनिर्मितम् शिखां यज्ञोपवीतं च नि
त्यकर्म परित्यजेत् अयमप्येकदण्ड एव यत्तु शिखोपवीतादित्यागनिषेधास्ते कुटीचकादिपराः यत्तु मेधा
तिथिः यावन्नस्तु स्त्रयो दण्डास्तावदेकेन वर्जयेदिति तदपि तत्परमेव यच्चात्रिः चतुर्द्धा भिक्षवः प्रोक्ताः स

राम:
३२४

दैवैवत्रिदण्डनमूर्ति तद्वाग्दण्डादिपरम् नयच्छिपरम् वाग्दण्डोथमनोदण्डः कर्मदण्डस्तथैवच यस्यैतेत्रि
यतादण्डाः सत्रिदण्डीतिचोच्यतेइतिमनूक्तेः तस्मात्परमहंसस्यैकदण्डएवसोप्यविदुषः विदुषस्तुसोपि
नास्ति नदण्डोनशिखांनाच्छादनंचरतिपरमहंसइतिमहोपनिषदुक्तेः ज्ञानमेवास्यदण्डइतिवाक्यशेषाच्च
यत्तुयमः काष्ठदण्डोधृतोयेन सर्वाशीज्ञानवर्जितः सयातिनरकान्घोरान्महारौरवसंज्ञितानितितद्वैराग्य
विनाजीवनार्थसन्यासपरम् एकदण्डंसमाश्रित्यजीवन्तिबहवोनराः नरकेरौरवेघोरेकर्मत्यागात्पतन्तेइति
स्मृतेः यत्त्वाश्वमेधिके एकदण्डीत्रिदण्डीवाशिखीमुण्डितएववा काषायमात्रसारोपि यतिःपूज्योयुधि
ष्ठिरेति तस्यापिहवीतोप्यवस्थाज्ञेया अयतन्निधिर्वौधायनः कृत्वाश्राद्धानिसबांधिपित्रादिभ्योष्टकेष
यकृ वापयित्वाचकेशादीन्मार्जयेन्मातृकाइमाः सर्वाण्येतिस्वस्यनवश्राद्धषोडशश्राद्धादिकृत्वेयर्थः
स्वस्यपर्यसारेपि एकोद्दिष्टविधानेनकुर्याच्छ्राद्धानिषोडश अग्निमात्मावरोनैवविधिनानिर्वपेत्स्वयमि
तिकात्यायनः कृच्छ्रांस्तुचतुरः कृत्वापावनार्थमनाश्रमी आश्रमीचेत्तप्तकृच्छ्रंतेनासौयोग्यतांव्रजेत्
वौधायनः सदेवमार्षकंदिव्यंपित्र्यंमातृकमानुषे भौतिकंचात्मनश्चान्तेश्चष्टौश्राद्धानिनिर्वपेत् अत्रके
ममाहहेमाद्रौशौनकः देवश्राद्धेब्रह्मविष्णुमहेश्वरादेवताः आर्षेदेवर्षिब्रह्मर्षिक्षत्रर्षयः देवर्षिक्षत्र
र्षिमनुष्यर्षयोवामरीच्यादिऋषयइतिसन्यासपद्धतौ तन्नित्यम् दिव्येवसुरुद्रादित्याः मानुषेसनकस
नंदनसनातनाः भूतश्राद्धेपृथिव्यादिभूतानिचक्षुरादिकरणादिचतुर्विधोभूतग्रामश्चेतिनिष्कः पित्र्ये

त्रि५

नि॰सिं॰ ३१५ पित्रादित्रयोमातामहाश्च मातृकेमाश्राद्धयस्मितः आत्मश्राद्धेआत्मपितृपितामहादेवताः आत्मश्राद्धं परमा
त्मदैवत्यमितिसन्यासपद्धतौ नान्दिनियम सर्वत्रचनांदीमुखत्वविशेषणंज्ञेयम् सर्वत्रापिपरगुदानंकुम्भमाधि
माः दक्षकेतु सत्यवस्त्रुवाविश्वेदेवावन्यन्नांदीश्राद्धवादीतिहेमाद्रिः स्मृत्यर्थसारे केशश्मश्रुलोमनखंवा
पयित्वोपकल्पयेत् दंडजलपवित्रंचाशिक्यपात्रंकमण्डलुम् आसीनकौपीनमाच्छादनंकथांपादुके
तिदर्शपक्षवा एतच्चपूर्वेद्युर्नांदीमुखंकृत्वापरेद्युःपुण्याहवाचनंकृत्वाकार्य्यमितिशौनकः बौधायनः
त्रीन्दण्डान्वेणुलीस्थूलानवेणवान्मूर्ध्वसंमितान् एकादशान्तवाघित्रिचतुःसप्तान्यपर्वकान् वेष्टितान्
कृष्णगोवालरज्ज्वातुचतुरंगुलान् एकोवानादृशोदण्डोगोवालसदृशोभवेत् आग्निरग्निमुत्पाद्यघनि
त्यनविधिनाततः पक्षादिविविधानेत्यर्थः स्वात्मावेवाग्निमान्कुर्यादपवर्गोत्तमादितः आज्यंप
यादधीत्यनात्रिवृद्वाजलमेववा ॐभूरित्यादिनाप्राप्यरात्रिंचोपवसेत्ततः अथादित्यस्यास्तमयात्
पूर्वमग्नौधिहुत्यसः आज्यमग्नौगार्हपत्येसंस्कृत्येनतेनचस्त्रुवापूर्णयाहवनीयेतुजुहुयात्प्रणवेन
तत् ब्रह्मान्वाधानमेतत्स्यादग्निहोत्रेहुतेततः संस्तीर्य्यगार्हपत्यस्यदर्भानुत्तरतोऽत्रतु पात्राणपा
साद्यदर्भेषुब्रह्मायतनएवतु जाग्रयाद्रात्रिमेतांतुयावद्भूतामुहूर्तकः अग्निहोत्रंस्वकालेतुहुत्वाप्रा
तस्त्ततःततः इष्टिंवैश्वानरींकुर्यात्प्राजापत्यामथापिवा जाबालश्रुतौतदेकेप्राजापत्यामवेष्टिंकुर्व
तितदुतथानकुर्यादाग्नेयीमेवकुर्यादाग्नेयीमेवकुर्यात्सर्वात्रेधातवीयामेवकुर्यादित्युक्तम् तेनात्रैवि राम: ३१५

कल्पः अथाङ्कः त्रेताग्नेः प्राजापत्या तामाकृत्यष्टौ षण्णीतानिनिवर्तकत्वश्रुतेः एकाग्नेस्त्वाग्नेयीति अनाहि-
ताग्नेः शिखिस्थाने वैश्वानरस्याग्नेयो वा चरुरिति माधवः कात्यायनः आत्मन्यग्नीन्समारोप्य वेदिमध्ये
स्थितो हरिम् आत्वाहार्षमित्यनुज्ञातो गुरुरग्नौ प्रैषमीरयेत् कपिलो विधिवत्प्रैषमुक्त्वाथ वा हि व्रजेत्
बौधायनः सर्वं मत्त इत्यादिना दण्डं सेनइवाप पवित्रं कमं यदस्य पारे रजस इत्यनुपात्रं व्याहृतिभिस्तथा यु
वा सुवासाः कौपीनं गृहीत्वा बाधवास्य प्रजेत् अथ क्रमः तत्र सन्न्यासेऽधिकारसिद्ध्यर्थं स्वस्य नवश्राद्ध
षोडशश्राद्धसपिण्डनानि साग्निः पार्वणान्यनग्निस्त्वेकोद्दिष्टविधिना कृत्वा नान्दीमुखं चैतत् कृच्छ्रं चतुष्ट-
यमन्यस्तु सन्नेहत् कृच्छ्रं कृत्वोदगयने एकादश्यां द्वादश्यां वा साग्निरमावास्यायां पौर्णमास्यां चतुर्दश्यां वा
यथा पर्वणि प्राजापत्या स्यात् तत्र देशकालौ स्मृत्वा परमहंसादिसन्न्यासग्रहणं करिष्य इति सकल्प
गणेशं संपूज्य पुण्याहं वाचयित्वा मातृकापूजां वृद्धिश्राद्धं च कृत्वा स्वमयाग्नौ गोपासनं सामिध्याहि-
ताग्निस्तु गार्हपत्ये विधुरोऽग्निहोत्रं तु त्रिकाण्डमण्डनोक्तादिशा कुर्यात् पत्न्या सह पवमानेष्टिं तद्वत्सा कु
न वा प्रधानं कुर्यात् ब्रह्मचारी वह्नौ लौकिके विधुरश्च भूर्भुवः इत्यादिभिः अरणेर्वाग्निमाधायान्वग्निरुद्धानि
त्वानीय पिष्टादिवीतिनिधाय तेनैव समिध्य तत्सवितुः त्वा सवितुर्विश्वानि न इति तिसृः समिधोऽभ्या
दध्यात् एवमन्येष्वपि इदं कक्षोपस्थवर्ज्यं वपनं कृत्वा पयो दधि घृतमाज्यं वा पिबेत् ॐ भूः सावित्रीं प्रविशा
मि तत्सवितुर्वरेण्यमिति प्राश्याचम्य पुनरादाय ॐ भुवः सावित्रीं प्रविशामि भर्गो देवस्य धीमहीति

प्रथमः प्रवदसीति २

नि सिं द्वितीयम् ॐ स्वः सावित्रीं प्रविशामि धियो यो नः प्रचोदयादिति तृतीयम् समस्तयाच ॐ भूर्भुवः स्वः सावि
३१६ त्रीं प्रविशामि तत्सवितुर्यात् इति सन्न्यासपद्धतौ तु त्रिवदसीति द्वितीयम् विवदसीति तृतीयम् प्राश्या
पः पुनस्त्रिति जलं प्राश्य सावित्री प्रवेशः उक्तः ततश्चाहवनीयं विहृत्य ब्रह्माणमुपवेश्याज्यसंस्कृत्य च
तु द्विर्दशवा गृहीत्वा समित्पूर्वां मां स्वाहा परमात्मने इदमिति कृत्वोपवसेत् ततः सायं होमं वैश्वदेवं च कृ
त्वाग्रे ह कृष्णाजिनास्तीर्य दण्डादीनि दश पञ्च वा साध्य ब्रह्मासने कृष्णाजिनोपविष्टो रात्रौ जागरं कृत्वा
प्रातर्होमानन्तरं प्राजापत्यां वैश्वानरीं वा कृत्वा ऽऽत्विग्भ्यः सर्वस्वं ब्रह्मणे च मधुपूर्णं तैजसपात्रं दत्वा
दारुपात्राण्याहवनीये ऽश्मन्मयानि वजले क्षिपेत् कृष्णाजिनं वा दद्यात् अनाहिताग्निस्तु वैश्वान
रमाग्नेयं वा चरुं कृत्वा पात्राण्यप्सु क्षिप्त्वा भूर्भुवः स्वरित्यपः स्पृष्ट्वा ततस्तस्मै दीतिज्ञ्या विप्रान्संभोज्य
पुण्याहं वाचयित्वा वापनं कृत्वा हेमरूप्यकुशजलैः स्नात्वा पुरुषाय चरुं हुत्वा प्राणाय स्वाहेति पं
चाज्याहुतीर्हुत्वा पुरुषसूक्तेन प्रत्यृचमाज्यं चरुं च जुहुयात् अत्र विरजाहोमं केचिदाहुः यथोक्तं
शिवगीतासु जुहुयाद्विरजामन्त्रैः प्राणापानादिभिस्ततः अनुवाकान्तमेकाग्रः समिदाज्यचरुं
पृथक् आत्मन्यग्नीन्समारोप्य याते ऽग्नेति मन्त्रतः भस्मादायाग्निरित्याद्यैर्विमृज्याङ्गानि रामः
संस्पृशेत् पापैर्विमुच्यते सत्यं मुच्यते च न संशयः यथा प्राणापानव्यानोदानसमानानाम ३१६

मनोवाक्कायकर्माणि मे शुध्यंतां ज्योतिः। अव्यक्तभावैरहंकारैर्ज्योतिः। आत्मा मे शुध्यंतां ज्योतिः। अंतरात्मा मे शुध्यंतां ज्योतिः। परमात्मा मे शुध्यं
तां ज्योतिः ४

शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा सर्वत्र लिंगोक्तदेवताभ्य इदमिति प्राणवाङ्मनस्त्वक्चक्षुःश्रो
त्रजिह्वाघ्राणरेतोबुध्याकूतिसंकल्पा मे शुध्यंतां ज्योतिः त्वक्चर्ममांसरुधिरमेदोमज्जास्नायवोस्थीनि मे
शुध्यंतां ज्योतिः शिरःपाणिपादपार्श्वपृष्ठोरूदरजंघशिश्नोपस्थपायवो मे शुध्यंतां ज्योतिरहम् शब्दस्पर्शरूपरस
गंधा मे शुध्यंताम् ज्योतिः अन्नमयप्राणमयविज्ञानमयमानंदमयमात्मा मे शुध्यतां ज्योतिः क्षुधे स्वा
हा क्षुत्पिपासाय स्वाहा विविट्यै स्वाहा ऋग्विधानाय स्वाहा कषोत्काय स्वाहा क्षुत्पिपासायमं तां ज्येष्ठामल
क्ष्मीं नाशयाम्यहम् अभूतिमसमृद्धिं च सर्वान्निर्णुद मे पाप्मानं स्वाहेति ततः स्विष्टकृदादि कृत्वा ब्राह्मणा
हिरण्यमाज्यपात्रं धेनुं च दत्वा समाप्तिं चरित्वा सुपतिष्ठेत अत्र केचिदेतैः सावित्रीप्रवेशं पूर्णाहुतिं ब्राह्मणाः
ततो याते अग्ने यज्ञिया तनूस्तयेति त्रिभिरेकैकं जिघ्रन्नात्मन्यग्नीन् समारोप्य गुरवे सर्वस्वं दत्वा यो ब्र
ह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रप
द्ये इत्युपस्थाय दक्षिणं जान्वाच्य पादावुपसंगृह्य अधीहि भगवो ब्रह्मेति वदेत् ततो गुरुरात्मानं ब्रह्मरू
पं ध्यात्वा शंखं हृदः स्मरणे वैरभिमंत्र्य तेन शिष्यमभिषिच्य शं नो मित्र इति शांतिं पठित्वा तच्छिरसि
हस्तं दत्वा पुरुषसूक्तेन स्वाम मम व्रते ते हृदयं ते दधामीति च जप्त्वा दक्षुरवः शरणं वार्थमनुसंदध्यात् तं
दक्षिणे कर्णे प्रणवमुद्दिश्य तदर्थं च पंचीकरणं प्रबोध्य अयमात्मा ब्रह्म तत्त्वमसि प्रज्ञानं ब्रह्मे
त्याद्युपदिशेत् तदर्थं च वदेत् ततो नाम दद्यात् शिष्यः तेनोपदिष्टो हरिं स्मरन्नूर्ध्वबाहुस्तिष्ठन्सा

नि॰ सिं॰ त्रिरणः कृत्वा ॐ भूर्भुवः स्वः सन्न्यस्तं मयेति त्रिरुपांशु चिरुच्चैश्चोक्त्वा जलसमीपं गत्वा अभयं सर्वभूतेभ्यो मत्तः स्वा
३१७ हेत्यंजलिं क्षिप्त्वा भुवा भुवा सा इति काषायं कौपीनं वासश्च परिधाय सत्त्वा मा गोपायेति मुख्यं वैणव
पालाशं बैल्वमौडुम्बरं वा दण्डं गृह्णीयात् अत्र पुत्रकामो गृहस्थः शाखेन पुरुषसूक्तेन दण्डमभिषिच्य
दध्यादिमाचारः ततः शिखामुत्पाद्य ॐ भूः स्वाहेत्यप्सु जले वा हुत्वा तद्यज्ञोपवीतं हुत्वा येन देवाः पवि
त्रेणेति जलपवित्रम् यदस्य पारे इति शिक्यं सावित्र्या कमण्डलुं सप्तव्याहृतिभिर्भोजनपात्रमिदं विष्णु
रित्यासनं वृशीं वा गृहीत्वा ॐ गृहीत्वा ॐ भूस्तर्पयामीति व्यस्तसमस्तादिभिर्महर्जनमसीति तर्पयित्वा
ॐ भूः स्वधा भुवः स्वधा स्वः स्वधा भूर्भुवः स्वर्महर्नमः स्वधेति पितृन्संतर्पयित्वोदुत्यं चित्रं चक्षुर्हंसः शु
चिषदन्नमो मित्रस्येति स्नात्वा सुरभिमतीभिरापो हिष्ठेति हिरण्यवर्णाभिः पावमानीभिर्व्याहृतिभि
श्चमार्जयित्वाष्टोत्तरशतवारमघमर्षणं प्राणायामांश्च कृत्वा ॐ भूर्भुवः स्वरिति पठित्वा नमः सवि
त्रे इति च सूर्यमुपस्थाय पुनः स्नात्वा प्रजेक्षालयित्वा ओमिति ब्रह्म ओमितीदं सर्वं ओमिति ब्रह्म लवा एवं वद
पदेवनमस्तीति जपित्वाष्टसहस्रं गायत्रीं जपेदिति अथ यतिधर्माः प्रातरुत्थाय ब्राह्मणस्पते इति ज
पित्वा दण्डादीनि निधाय मूत्रपुरीषयोर्गृहस्थचतुर्गुणं शौचं कृत्वाचम्य पर्वतादश्मवर्जं प्रण रामः
वेन दन्तधावनं कृत्वा तेनैव मृदा बहिः कटिं प्रक्षाल्य जलं तर्पणवर्जं स्नात्वा पुनर्जङ्घे प्रक्षाल्य व ३१७
स्त्रादीनि गृहीत्वा यज्ञिनान्तं कृत्वा केशवादिनामभिस्तर्पयित्वा ॐ भूस्तर्पयामीत्यादि व्यस्त

एवनयतिवेघ्नमेवेतघएववेदोप ४

कै

समस्तव्याहृतिभिर्महर्जनस्तर्प्पयामीति तर्प्पयेत् ॐ भूः स्वाहेति स्वाहाप्राक्कांतोस्वधाशब्दान्तैश्चाभिरेव पु
नस्तर्प्पयेदिति केचित् तत आचम्याञ्जलिना प्रणवेन जलमादाय यथाशक्ति भिरुद्धृत्य गायत्र्या त्रिः क्षिप्त्वा
गायत्रीं जपेत् उदिते सूर्ये प्रणवेन व्याहृतिभिर्वार्घ्यं दत्त्वा मित्रस्य चर्षणीधृत इत्यादिभिः पूर्वोक्तैः शौरैभिरिदं वि
ष्णुर्विदेवो ब्रह्मजिज्ञानमिति चोपस्थाय सर्वभूतेभ्यो नमस्कृतिप्रदक्षिणमावर्तेत ततो नत्वा आदि
त्याय विद्महे सहस्रकराय धीमहि तन्नो सूर्यः प्रचोदयादिति त्रिर्जपेत् एवं त्रिकाले विष्णुपूजां ब्रह्म
यज्ञं च कुर्यात् अथ भिक्षाविधिः मे सन्नमुसले व्यङ्गारे भुक्तवज्जने काले पराह्णभूयिष्ठे नित्यं भि
क्षां यतिश्चरेदित्युक्ते काले तु द्वयमिति च ततस्त्रिरादित्यमुपस्थाय तेनैक्यं ध्यात्वा कुक्षेनेति प्रदक्षिणं कृत्वा यते पं
थानं शान्तः आयो सौ विद्युच्चारव्य आदित्ये पुरुषोन्तर्महदिस्थितः सोहं नारायणो देव इति ध्यात्वा प्रणम्य तम्
त्रिदण्डं दक्षिणे त्वंगे ततः संधाय वाग्गुना पात्रं वामकरे क्षिप्त्वा क्षेपयेद्दक्षिणे त्विति बोधायनोक्तदिशा त्रीन्पं
च सप्त वा गृहान् गत्वा भवत्सर्वा भिक्षां याचित्वा पूर्णमसि पूर्णमे भूया इत्यागत्य शुचिरन्नं प्रोक्ष्य ॐ भूः स्व
धा नमः इत्यादिव्याहृतीन्यस्तसमस्तव्याहृतिभिः सूर्यादिदेवेभ्यो भूतेभ्यश्च भूमौ क्षिप्त्वा भुक्त्वा प्रणवेनैवा
दुरुप्राणायामान् कुर्यादिति संक्षेपः गौतमव्याख्यायां तु प्रतिहस्ते जलं दत्त्वा भैक्षं दद्यात्पुनर्जलं
भैक्षं पवित्रमात्रं स्यात्तद्गोलसागरोपमम् अत्र सर्वत्र मूलं माधवपराशरमदनरत्नस्मृत्यर्थसारादौ

नैयम् कराद: एकरात्रं वसेद्ग्रामे नगरे पंचरात्रकम् वर्षासु मासांस्तु चतुरो वसेत् जाबालश्रुतौ शून्यागा
र देवगृह तृणकुटी वल्मीक वृक्षमूल कुलाल शाला अग्निहोत्र गृह नदी पुलिन गिरि कुहर निर्झर स्थंडिले
ष्वनिकेतन इति मात्स्ये अष्टौ मासान्विहारः स्याद्यतीनां संयतात्मनाम् एकत्र चतुरो मासान्वार्षिकान्नि
वसेत्पुनः अविमुक्ते प्रविष्टानां विहारस्तु न विद्यते अत्रिः भिक्षाटनं जपः स्नानं ध्यानं शौचं सुरार्चन
म् कर्त्तव्यानि षडेतानि सर्वथा नृपदंडवत् मंचकं शुक्लवस्त्रं च स्त्रीकथा लौल्यमेव च दिवास्वापं च पा
नं च यतीनां पतनानि षट् आसनं पात्रलोभं च संचयः शिष्यसंग्रहः दिवास्वापो वृथाजल्पो यतेर्ब
धकराणि षट् दक्षः नाध्येतव्यं न वक्तव्यं न श्रोतव्यं कथंचन याज्ञवल्क्यः पात्रिपात्राणि मृद्वेणुद
वैलाबुमयानि च मदनरत्ने अत्रिः पित्र्यं श्राद्धं कल्पितं पूर्वं मन्न देवादिकारणात् वर्जयेत्तादृशीं भिक्षां प
रबाधकरीं तथा बृहस्पतिः नतीर्थवासी नित्यं स्यान्नोपवासपरो यतिः न चाध्ययनशीलः स्यान्न
व्याख्यानपरो भवेत् एतद्वहाभिन्नपरम् अत्रिः स्नानं सुरार्चनं ध्यानं प्राणायामो बलिस्तुतिः
भिक्षाटनं जपः संध्या त्यागः कर्मफलस्य च एते यतिधर्म्मा इत्यर्थः अन्येपि माधवीयमिताक्षरादौ
ज्ञेयाः यतिधर्म्मसमुच्चये नस्नानं ना चरेद्भिक्षुः पुत्रादिनिधने श्रुते पितृमातृक्षयं श्रुत्वा स्नात्वा शु
ध्यति सांबरः अथ यतिसंस्कारः स्मृत्यर्थसारे सर्वसंगनिवृत्तस्य ध्यानयोगरतस्य च न तस्य द

हनं कार्यं नाशौचं नोदकक्रिया तथा कुटीचकं तु प्रदहेत् पूरयेच्च वकूदकम् हंसो जले तु निक्षिप्य परहंसं प्रपूरये
त् पलाशमूलेन दक्षिणीरे त्वग्र वा गंधपुष्पटम् कृतेष्वेवं वा पश्चाद्वापि एणनीत्वा दंडमात्रं व्याहृतिभिः खात्वा
सप्त व्याहृतिभिस्त्रिः प्रोक्ष्य दर्भान्नास्तीर्य नवं वटं पंचरत्नोदकं क्षिप्त्वा नारायणः परं ब्रह्मेत्यभिमंत्र्य
तेनैव संस्नाप्याष्टाक्षरेण वस्त्रं गंधपुष्पधूपदीपान् दत्वा विष्णो हव्यं रक्षस्वेति शवं गर्ते निधाय दवि
स्तु रिति दक्षिणहस्ते दंडं पदस्य पार्श्वे इति सव्ये शिक्यं येन देवाः पवित्रेणेति सुखं जलपवित्रं साक्ष्योद
रे पात्रं भूमिः श्वभ्रोत्रिति गुह्ये कमण्डलुम् निधाय विज्ञिः ह्यग्निति दशहोत्राभिमंत्रयेदिति विश्वादर्शात्
कायास्यन्नपर्यसारेव वह्वृच्छोनकोक्तं यतिपुरुषसूक्तेन स्नापयित्वा वटं ततः प्रणवेन तमभ्य
वारं प्रोक्षयेदथ सर्वतः विष्णो हव्यं रक्षस्वेति यजुषा प्रणवेन च गर्ते प्रेतं विनिक्षिप्य चेदं विष्णु
र्विचक्रमे इति मंत्रेण दंडं तु दद्यात् दक्षिणहस्तके मूर्धानं भूर्भुवः स्वश्चेत्युक्त्वा शंखेन भेदयीत्
गर्तं पुरुषसूक्तेन लवणेन प्रपूरयेत् शृगालश्वादिरक्षार्थं सम्यग्गर्तं प्रपूरयेत् इति कुटीचक
स्यत्तु ग्रहः कार्यः यथा सर्वं प्राग्वत् कृत्वाग्निं प्रज्वाल्य साग्नेर्दक्षिणकरे उमावरे हेत्यवरोहनि
र्मथ्य वा गर्ते चितिं कृत्वा एतेनाग्निः समिध्यते इदमग्निं दत्वा सावित्र्या प्रणवेन वा दहेत् ततो कृष्ण
न प्रणवेन नारायणः परं ब्रह्मेति च जप्त्वा सशिरः प्रणवव्याहृत्या गायत्र्या तज्जस्मास्थि तीर्थे क्षि

ग

नि॰ सिं॰ ३२९ स्नात्वा नाशुचिः नास्नात्वपदोर्ध्वदैहिकम्‌ त्रिदण्डग्रहणादेव प्रेतत्वं नैव जायते इति उशनस्मृतेः ए
कादशेह्नि पार्वणं तदपि त्रिदण्डिनः हंसपरमहंसादीनां पार्वणादिकमपि न कार्य्यमिति शूलपा
णिः श्राद्धचिंतामणौ दत्तात्रेयः एकोद्दिष्टं जलं पिण्डमाशौचं प्रेतसत्क्रियाम्‌ न कुर्यात्पार्वणं का
दन्यब्रह्मीभूताय भिक्षवे प्रेतक्रियायैकोद्दिष्टनिषिद्धे सिद्धे पुनस्तज्जहणाश्शाब्दिकपरम्‌ तेन तत्पार्वणा
मेव त्रिदण्डिनाम्‌ श्राद्धे नारायणबलिः तद्विधिरन्यत्र विशेषः प्रागुक्तः शूलपाणिवचना एवं नि
रूपितमिदं यद्ग्रहणांतु धर्मतत्त्वं विचार्य्य वचनैश्च नयैश्च सम्यक्‌ तद्दोषदृष्टिमपहाय विवेचनीय
विद्भिरित्यविरतं प्रणतोस्मि तेषु मयास एष सद्दीपदिह गदितमंदमतिना किमेतच्छक्यमेवा
ध्यवसितुमपि स्वल्पमतिना तदेवं यत्किंचिज्जगदितमिह विख्यातमहिमा प्रतापोयं सर्वो विकसि
तितु पित्रोश्चरणयोः १ योभाट्टतंत्रगहनार्णवकर्णधारः शास्त्रांतरेषु निखिलेष्वपि मम मे
मेता यात्र प्रमः कमलाकरेण श्रीतातमुनास्तु सुकृती बुधरामकृष्णः २ श्रीभट्टरामेश्वरसू
रिसूनुश्रीभट्टनारायणसूरिसूनोः श्रीरामकृष्णस्य सुतः कृतीमं व्यधान्निबंधं कमलाकराख्यः
३ नानानिबंधवचनान्नितणीयसिंधुः प्रोच्यतां विबुधाः निर्णयसरोजवाचान्निर्णयकमला
करोप्यस्तु ४ वसुऋतुभूमितगतेब्देनरपतिविक्रमतोययातिरौद्रो तपसिशिवतिथौ समा रा॰ म॰ ३२९

मतिमता ४

पित्रोर्यं रघुपतिपादसरोरुहेर्पितश्च ५ जगति सकलविद्यासिंधुमुग्धिं धियायानां परमगिरिणा विरी
शोद्युज्यते सज्जनानाम् तदिह मम निबंधे दूषणं भूषणं वा यादभवति निदग्धैस्तत्स्वरूपं वि
मृश्यम् ६ इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणश्रीमद्रामेश्वरभट्टसूरिसूनुनारायण
भट्टसुतविद्वन्मुकुटहीरकश्रीरामकृष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृत
निर्णयसिंधौ तृतीयः परिच्छेदः ❁ ऋष्यष्टवसुभूःसंख्येमन्मथाख्ये च वत्सरे निशाके न्वि
तेकामेपापेवक्रमदलेनथा १

सर्वत्रदर्भपाणिः स्याद्दैवे पित्र्ये च कर्मणि ॥ तिलकं पादशौचं तु न कुर्याद्दर्भपाणिना ॥१॥ स्नानमाचमनं दानं जपो होमः
प्रतिग्रहः। भोजनं च विना दर्भैर्वह्निर्जानु च निःफलम् ॥२॥ विकरे पिण्डदाने च तर्पणे भोजने तथा॥ कृते त्वाचमने प्रोक्तं
दर्भत्यागो विचक्षणैः॥३॥ तिलधेनुर्गजो वाजी प्रेतान्नमजिनं मणिः। सुरभी स्त्रयमाना च घोराः सप्त प्रतिग्रहाः ॥४॥
वर्णा वर्णाश्च वेदाश्च युगाश्चाचार एव च। तिस्रः संध्यास्त्रयो लोका अष्टादश इमे स्मृताः॥५॥ दर्शं पूर्णमासीं च
पितुः संवत्सरं दिनम्। पूर्वविद्धमकुर्वाणो नरकं प्रतिपद्यते॥६॥ मासे नभस्यमावास्या तस्यां दर्भोच्चयो मतः। प्रजा
नयामास्ते दर्भाः विनियोज्याः पुनःपुनः॥७॥ चितौ दर्भाः पथि दर्भाः ये दर्भा यज्ञभूमिषु॥ तरणासन पिण्डेषु तान्कुशा
न्परिवर्जयेत्॥८॥ असंक्रान्ते हि कर्तव्यमाब्दिकं प्रथमं द्विजैः। प्रत्यब्दं द्वादशे मासि कार्या पिण्डक्रिया सुतैः॥१॥ क्वचि
त्रयोदशेपि स्यादाद्यमुक्त्वानुवत्सरम्॥

स्पो २

॥अथपंचमीनिर्णयः॥साचोत्सर्गतः पूर्वविद्धाग्राह्या॥यु

॥ग्मवाक्यौत्सर्गिकत्वात॥यत्तुब्रह्मवैवर्तेवचनम्॥पंच॥

॥मीतुप्रकर्तव्याषष्ठीयुक्तातुनारदेति॥तत्कैकोपवास॥

॥विषयम्॥एकोदोपवासेस्त्रीकार्यापंचमीपरसंयुता॥

॥त्रिमुहूर्तोतुषष्ठ्यांस्यात्पराप्पूर्वयुतान्यथेति॥तत्रैवो

॥क्तत्वात्॥नचात्रयुग्मवचनेनकृष्णपक्षपरमिति॥

॥चतुर्दश्यातुपूर्णिमेतितत्रैवोपसंहारात्॥यद्यत्रके

॥चिद्यावस्थापयंति॥कृष्णपक्षेतिथिर्ग्राह्यायस्यामस्त

॥मितोरविः॥शुक्लपक्षेतिथिर्ग्राह्यायस्यामभ्यु

॥दितोरविरिति॥तथाचहारीतः॥चतुर्थीसंयुताका

॥र्यापंचमीपरयातनु॥दैवेकर्मणिपित्र्येचशुक्लप

॥क्षेतथासिते॥तदेतदत्रतपंचमीकृत्यविषयम्॥अ

॥तएवाभिधानात॥श्रावणेमासिशुक्लायापं॥

॥चमीनागसंज्ञिका॥वर्जयित्वातुपंचम्यश्चतुर्थी॥

॥सहितांहिता॥इतिदुर्गावतीप्रकाशे॥श्रावणे

॥पंचमीशुक्लासंप्रोक्तानागपंचमी॥तांपरित्य

॥ज्यपंचम्यश्चतुर्थीसहितांहिता॥इतिप्रतीपवच

॥नेनागपंचम्यामेव॥अन्योपवासेतुपूर्वविद्धैव॥

॥कीर्तिप्रकाशेतथानिबंधराजेतथासमयप्रकाशेपुन